
शिशुपालवधम्



महाकविमाघ विरचितम् ।

बि, ए, उपाधि धारिणा

श्रीजीवानन्द विद्यासागर भट्टाचार्य्येण

संस्कृत्य

प्रकाशितम् ।



कलिकाता नगरे ।

काव्यप्रकाशयन्त्रे मुद्रितम् ।

ई० ১৮৭৫

প্রিণ্টার—শ্রীক্ষেত্রমোহন মুখোপাধ্যায়

॥ अथ टीकायां पाणिनिव्याकरणानुयायिन्यां प्रमापकाः ॥

श्रुतिः	सज्जनः	मार्त्तण्डकोषः
स्मृतिः	भट्टोत्पलः	मेदिनीकोषः
पुराणम्	वल्लभः	त्रिकाण्डशेषकोषः
वाल्मीकिः	जैमिनिः	रत्नावलीकोषः
महाभारतम्	हरिकारिका	अभिधानचिन्तामणिः
पाणिनिः	बौद्धः	काव्यप्रकाशः
वार्त्तिकम्	अमरकोषः	अलङ्कारसर्वस्वम्
भाष्यकारः	हेमचन्द्रकोषः	दण्डी
कैयटः	विश्वप्रकाशकोषः	वृत्तरत्नाकरः
माधवः	हलायुधकोषः	वृत्तरत्नाकरटीका
शाकटायनः	शाश्वतकोषः	नीतिवाक्यामृतम्
न्यासोद्योत	वैजयन्तीकोषः	कामन्दकः
काशिका	शब्दार्णवकोषः	वसन्तराजीयम्
वामनः	यादवकोषः	हयलीलावती
क्षीरस्वामी	केशवकोषः	दशरूपकम्

॥ इति टीकाप्रमापकाः ॥

श्रीगणेशाय नमः ॥

शिशुपालवधम् ॥

॥ प्रथम सर्गः ॥

श्रियः पतिः श्रीमति शासितुं जग-
ज्जगन्निवासो वसुदेवसद्मनि ।

अथ तत्रभवान् माघकविः काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे । इत्यादालङ्कारिकवचनप्रामाण्यात् काव्यस्यानेकश्रेयःसाधनतां काव्यालापांश्च वर्जयेदिति निषेधशास्त्रस्यासत्काव्यविषयतां च पश्यन् शिशुपालवधाख्यं काव्यं चिकीर्षुः चिकीर्षितार्थाविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलसाधनत्वात् आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्याशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च काव्यार्थं शिशुपालवधबीजभूतं भगवतः श्रीकृष्णस्य नारददर्शनरूपं वस्तु आदौ श्रीशब्दप्रयोगपूर्वकं निर्दिशन् कथामुपक्षिपति । श्रिय इति । तत्रादौ श्रीशब्दप्रयोगात् वर्णगणादिशुद्धेरभ्युदयः । तदुक्तम् । देवतावाचकाः शब्दा ये च भद्रादिवाचकाः । ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वेति । श्रियः लक्ष्म्याः पतिः अनेन रुक्मिण्यात्मना श्रिया समेत इति सूचितम् । राघवत्वे भवेत् सीता रुक्मिणी कृष्णजन्मनीति विष्णुपुराणात् । जगन्निवासो 'जगतामाधारः कुक्षिस्थाखिलभुवन इति यावत् तथापि जगत् लोकं शासितुं दुष्टनिग्रहशिष्टानुग्रहाभ्यां नियन्तुम् श्रीमति लक्ष्मीयुक्ते वसुदेवसद्मनि [illegible] वेश्मनि

वसन् ददर्शावतरन्तमम्बरा
द्धिरण्यगर्भाङ्गभुवं मुनिं हरिः ॥ १ ॥
गतं तिरश्चीनमनूरुसारथेः
प्रसिद्धमूर्द्ध्वज्वलनं हविर्भुजः ।

वसन् कृष्णरूपेण तिष्ठन् हरिर्विष्णुः अम्बरादवतरन्तमायान्तं इन्द्रसन्देशकथनार्थमिति भावः हिरण्यस्य गर्भो हिरण्यगर्भो ब्रह्मा ब्रह्माण्डप्रभवत्वात् तस्याङ्गभुवं तनूजं अथवा तस्याङ्गादवयवादुत्सङ्गाद्भवतीति हिरण्यगर्भाङ्गभूः तं मुनिं नारदमित्यर्थः । उत्सङ्गान्नारदो जज्ञे दक्षोऽङ्गुष्ठात्स्वयम्भुव इति भागवतात् । ददर्श कदाचिदिति शेषः । अत्राल्पीयसि वसुदेवसद्मनि सकलजगदाश्रयतया महीयसो हरेराधेयत्वकथनादधिकप्रभेदोऽलङ्कारः । तदुक्तम् । आधाराधेययोरानुरूप्याभावेऽधिकोमत इति । जगन्निवासस्य जगदेकदेशनिवासित्वमिति विरोधश्च । तथा तकारसकारादेः कोमलस्यासकृदावृत्त्या जगज्जगदिति सकृद्व्यञ्जनद्वयसादृश्याच्च वृत्त्यनुप्रासभेदौ शब्दालङ्कारौ । एषाञ्चान्योन्यनैरपेक्ष्येणैकत्र समावेशात्तिलतण्डुलवत् संसृष्टिः । सर्गेऽस्मिन् वंशस्थवृत्तम् । जतौ तु वंशस्थमुदीरितं जराविति लक्षणात् ॥ १ ॥

तदानीं जनैर्विस्मयादीक्षितं प्रवृत्तमित्याह । गतमिति । अविद्यमानावूरू यस्य स अनूरुः स सारथिर्यस्य तस्यानूरुसारथेः सूर्यस्य गतं गतिः । भावे क्तः । तिरश्चीनं तिर्यग्भूतं विभाषाऽञ्चेरदिक्स्त्रियामिति तिर्यक्शब्दादस्त्यन्तात्प्रातिपदिकात् स्वार्थे खप्रत्ययः । हविर्भुजोऽग्नेरूर्द्ध्वज्वलनं ऊर्द्ध्वस्फुरणं प्रसिद्धं इदन्तु सर्वतो विसारि धामाधः पतति किमेतदिति सूर्याग्निविलक्षणं महदपूर्वमिदं धाम किमात्मकं स्यादित्याकुलं विस्मयात् सम्भ्रान्तं यथा तथा जनैरीक्षितं ईक्षणं कृतम् । अकर्मकाद्यविवक्षिते कर्मणि क्तः । प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रियेति वचनात् । केचित् कर्मणि क्तान्तं कृत्वा ईक्षितं मुनिं ददर्शेति पूर्वेण योजयन्ति । अत्रोपमेयस्य मुनिधाम्नः सूर्याग्निभ्यामुपमानाभ्या-

पतत्यधो धाम विसारि सर्वतः
किमेतदित्याकुलमीक्षितं जनैः ॥२॥
चयस्त्विषामित्यवधारितं पुरा
ततः शरीरीति विभाविताकृतिम् ।

अत्र प्रकृतवस्तुन आधिक्यदर्शनात् व्यतिरेकः । तदुक्तं काव्यप्रकाशे । उप-मानाद्यदन्यस्य व्यतिरेकः स एव स इति, धाम रश्मौ गृहे देहे स्थाने जन्मप्रभावयोरिति हेमचन्द्रः ॥ २ ॥

दिवाकरस्तु वृत्तरत्नाकरटीकायां प्रथमपठितेन

द्विधाकृतात्मा किमयं दिवाकरो विधूमरोचिः किमयं हुताशनः ।

इति चरणद्वयेन सह इममेव श्लोकं षट्पदच्छन्दस उदाहरत् अहो तस्माच्चरणद्वयेन ग्रन्थे ह्याकारो गतमिति तन्निरासश्च बोध्य इत्यु-परिष्टात् ॥

अथ क्रमवान्निरणैषीदित्याह । चयइति । पिंडीकृतत्वावधारणे समर्थः स हरिः पुरा प्रथमं त्विषां चय इत्यवधारितं तेजःपुञ्जमात्रत्वेन निश्चितं ततः प्रत्यासत्तौ विभाविता विस्पष्टा आकृतिः संस्थानं यस्य तं त-थोक्तं अत एव शरीरी चेतन इत्यवधारितम् ततोऽभिव्यक्ताः विविच्य ज्ञाता अवयवा मुखादयो यस्य तं तथोक्तम् अत एव पुमानित्यवधारितं क्रमशो आग-च्छन्तं व्यक्तिविशेषं नारदं क्रमशो अभिप्रायेणेति पुंलिङ्गतो निर्वाहः । क्र-मात् पूर्वोक्त सामान्यविशेषज्ञानक्रमेण । लोकदृष्टेरिदमुक्तम् हरिस्तु सर्वं वेदैवेति तत्त्वम् । नारद इत्यबोधि नारदं बुबुधे इत्यर्थः । नारदस्य कर्मत्वेऽपि निपातशब्देनाभिहितत्वात् द्वितीया । तिङाद्युपस्थानस्यो-पलक्षणत्वात् । यथाह वामनः । निपातेनाभिहिते कर्मणि न कर्मवि-भक्तिः परिगणनस्य प्रायिकत्वादिति । बुध्यतेः कर्तरि लुङ् दीपजने-त्यादिना चिण् चिणो लुगिति लुक् अत्र विभाविताकृतिं विभक्तावयवमि-त्यादिना आकृतिविभावनावयवविभावनयोः पदार्थयोर्विशेषणगत्या शरी-

विभुर्विभक्तावयवं पुमानिति
क्रमादमुं नारद इत्यबोधि सः ॥ ३ ॥
नवानधोऽधो बृहतः पयोधरान्
समूढकर्पूरपरागपाण्डुरम् ।
क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना
स्फुटोपमं भूतिसितेन शम्भुना ॥ ४ ॥
दधानमम्भोरुहकेशरद्युती
जटाः शरच्चन्द्रमरीचिरोचिषम् ।

श्लिष्टपुंस्त्वावधारणहेतुत्वेनोपन्यासात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः । हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतमिति लक्षणात् ॥ ३ ॥

अथ षड्भिर्मुनिं विशिनष्टि । नवानित्यादि कोऽयमत्र नवान् सद्यःसम्भृतसलिलानिति यावत् बृहतो विपुलान् पयोधरान् मेघान् अधो-ऽधः मेघानां समीपाधःप्रदेशे स्थितमिति शेषः । उपर्यध्यधसः सामीप्ये इति द्विर्भावः तद्योगे द्वितीया उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिष्वित्यादिवचनात् । समूढः पुञ्जीकृतः समूढः पुञ्जिते भुग्ने इति विश्वः । कर्पूरस्य परागवत् धूलिवत् पाण्डुरं अतएव क्षणं मेघसमीपा-वस्थानक्षणे । अत्यन्तसंयोगे द्वितीया । क्षणोत्सवेषु । निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षण इत्यमरः । भूत्या भस्मना सितेन । भूतिर्भस्मनि सम्पदीत्यमरः । शम्भुना स्फुटा उपमा सादृश्यं यस्य तं स्फुटं शम्भूपममित्यर्थः । सापेक्षत्वेऽपि समासः । सदृशप-र्याययोस्तुल्योपमाशब्दयोरतुलोपमाभ्यामिति निषेधात्सादृश्यवाचित्वं प्रती-येत्याहुः । केचिदिमं श्लोकं पयस्विशामित्यतः प्राक् लिखित्वा व्याचक्षते तेषां पुंस्त्वानवधारणात् प्राक् तेजःपिण्डमात्रस्य शम्भूपमत्वोक्तिरयुक्तमित्यम् ॥ ४ ॥

दधानमिति । पुनश्च अम्भोरुहकेशरद्युतीः पद्मकिञ्जल्कप्रभा

विपाकपिङ्गास्तुहिनस्थलीरुहो
धराधरेन्द्रं व्रततीततीरिव ॥ ५ ॥
पिशङ्गमौञ्जीयुजमर्जुनच्छविम्
वसानमेणाजिनमञ्जनद्युतिः ।
सुवर्णसूत्राकलिताधराम्बराम्
विडम्बयन्तं शितिवाससस्तनुम् ॥ ६ ॥
विहङ्गराजाङ्गरुहैरिवायत
हिरण्मयोर्वीरुहवल्लितन्तुभिः ।

पिङ्गैरित्यर्थः जटा दधानं स्वयन्तु परं चन्द्रमरीचिभिरिव रोचिर्भिः धवलमित्यर्थः अतएव विपाकेन परिणामेन पिङ्गा पिङ्गला तुहिनस्थले रोहन्तीति तुहिनस्थलीरुहः व्रततीः ततीर्लताव्यूहान् । वल्ली तु व्रततिर्लतेत्यमरः । दधानं धराधरेन्द्रो हिमवान् तुहिनस्थलीति लिङ्गात् रूढोपमानत्वाच्च तमिव स्थितम् ॥ ५ ॥

पिशङ्गेति । पुनः मुञ्जस्तृणविशेषः तन्मयी मेखला मौञ्जी पिशङ्गमौञ्ज्या युज्यत इति पिशङ्गमौञ्जीयुक् तम् । सत्सूद्विषेत्यादिना क्विप् स्त्रियाः पुंवदिति पिशङ्गशब्दस्य पुंवद्भावः । अर्जुनच्छविं धवलकान्तिं वलक्षो धवलोऽर्जुन इत्यमरः । अञ्जनद्युतिं कृष्णवर्णम् एणाजिनं कृष्णमृगचर्म वसानम् आच्छादयन्तम् । वस आच्छादन इति धातोः शानच् सुवर्णसूत्रेण कनकमेखलया आकलितं बद्धम् अधराम्बरम् अन्तरीयं यस्यास्तां शितिवाससो नीलाम्बरस्य रामस्य तनुं विडम्बयन्तमनुकुर्वाणं तद्वार्धीयस्तुपमा ॥ ६ ॥

विहङ्गेति । पुनः विहङ्गराजाङ्गरुहैरिव गरुत्मल्लोमतुल्यैः आयतैर्दीर्घैः हिरण्मयस्य विकारो हिरण्मयी । दाण्डिनायनेत्यादिना मयटि यलोपनिपातः । तस्या उर्व्यां रुहा रूढा ।

कृतोपवीतं हिमशुभ्रमुच्चकै
र्घनं घनान्ते तडितां गुणैरिव ॥ ७ ॥
निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा
लसद्बिसच्छेदसिताङ्गसङ्गिना ।
चकासतं चारुचमूरुचर्म्मणा
कुथेन नागेन्द्रमिवेन्द्रवाहनम् ॥ ८ ॥
अजस्रमास्फालितवल्लकीगुणः ।
क्षतोज्ज्वलाङ्गुष्ठनखांशुभिन्नया

[illegible] प्रत्ययः । तासां [illegible]
[illegible] कृतोपवीतं [illegible] हिमशुभ्रम् [illegible]
[illegible] घनान्ते शरदि तडितां गुणै [illegible] । 'तडित्सौदामिनी विद्यु
'द्यमरः । उच्चैः उच्चकैः घनतनुं मेघमिव स्थितम् ॥ ७ ॥
निसर्गेति । एष निसर्गात् स्वभावादेव चित्राणि शबलानि उज्ज्व-
लानि भास्वराणि सूक्ष्माणि पक्ष्माणि लोमानि यस्य तेन लसन् यो
बिसच्छेदो मृणालखण्डः । बिसं मृणालमिति त्रिकाण्डशेषः ।
[illegible] सङ्गिना [illegible] चारुणा चमूरुचर्मणा [illegible]
[illegible] । प्रवेण्यास्तरणे वर्णः परिस्तोमः कुथो द्वयोरित्यमरः ।
न्द्रवाहनं नागेन्द्रम् ऐरावतमिव चकासतं शोभमानम् इन्द्रस्य वाहन
[illegible]
[illegible]
[illegible]
[illegible] ॥ ८ ॥
अजस्रेति । [illegible]
[illegible]

पुरः प्रवालैरिव पूरितार्द्धया
विभान्तमच्छस्फटिकाक्षमालया ॥ ९ ॥
रणद्भिराघट्टनया नभस्वतः
पृथग्विभिन्नश्रुतिमण्डलैः स्वरैः।

तन्त्रीणां क्षतेन सङ्घर्षणेन उज्ज्वलैरङ्गुलिनखांशुभिर्भिन्नया मिश्रया तद्भागर-क्तयेत्यर्थः अतएव पुरः पुरोभागे प्रवालैः विद्रुमैः अथविद्रुमः पुंसि प्रवालं पुन्नपुंसकमित्यमरः। पूरितार्द्धयेव स्थितया अच्छस्फटिकाक्षमालया स्वच्छ-स्फटिकानां मालया जपमालयेत्यर्थः। अच्छो भल्लूके स्फटिकेऽमलेऽप्यभि-मुखेऽव्ययमिति हैमचन्द्रः। तथा प्रसिद्धस्फटिकग्रहणात् ऋषेर्मोक्षा-र्थित्वं व्यज्यते। स्फटिकोमोक्षदः परमिति मोक्षार्थिनां स्फटिकाक्ष-मालाभिधानात्। विभान्तं भासमानम्। भातेः शतृप्रत्ययः अत्र नखांशुभिन्नयेति स्वगुणत्यागेनान्यगुणस्वीकारलक्षणस्तद्गुणालङ्कार उक्तः। तद्गुणः स्वगुणत्यागादिति ॥ ९ ॥

रणद्भिरिति। पुनर्नभस्वतो वायोराघट्टनया आघातेन पृथग् सङ्कीर्ण रणद्भिर्ध्वनद्भिः अनुरणनोत्पद्यमानैरित्यर्थः। श्रुत्यारब्धं मधुरध्वनं स्व-रतीति लक्षणात्। तदुक्तं रत्नाकरे। श्रुत्यनन्तरभावी यः स्निग्धोऽनु-रणनात्मकः। स्वतो रञ्जयति श्रोतृचित्तं स स्वर उच्यत इति। श्रुतिर्नाम स्वरारम्भकावयवः शब्दविशेषः। तदुक्तम्। प्रथमश्रवणाच्छब्दः श्रूयते ह्रस्वमात्रकः। सा श्रुतिः सम्परिज्ञेया स्वरावयवलक्षणेति। विभिन्नानि प्रतिनियतसङ्ख्यया व्यवस्थितानि श्रुतीनां मण्डलानि समूहा येषां तैर्विभिन्न-श्रुतिमण्डलैः श्रुतिसङ्ख्यानियमश्च दर्शितः। चतुश्चतुश्चतुश्चैव षड्जमध्यम पञ्चमाः। द्वे द्वे निषादगान्धारौ त्रिस्त्रिऋषभधैवतौ। स्वराः षड्जा-दयः सप्तोक्तलक्षणाः। तदुक्तं, श्रुतिभ्यः स्युः स्वराः षड्जर्षभगान्धारम-ध्यमाः। पञ्चमो धैवतश्चाथ निषाद इति सप्त ते। तेषां संज्ञाः सरिग-मपधनीत्यपरा मता इति। तैः स्वरैः स्फुटीभवन्तो ग्रामविशेषाः षड्जा-द्यपरनामकानां स्वरसङ्घातभेदानां त्रयाणां मूर्च्छना स्वरारोहावरोहक्रम-

स्फुटीभवद्ग्रामविशेषमूर्च्छना
मवेक्षमाणं महतीं मुहुर्मुहुः ॥ १० ॥
निवर्त्त्य सोऽनुव्रजतः कृतानती
नतीन्द्रियज्ञाननिधिं नभःसदः ।

येन यस्यां ता महतीं निज वीणाम । विश्वावसोस्तु बृहती तुम्बुरोस्तु कलावती । महती नारदस्य स्यात् सरस्वत्यास्तु कच्छपीति वैजयन्ती । मुहुर्मुहुरवेक्षमाणम । तन्त्रीयोजनभेदवशपर्याहृत्वा । पुरुषप्रयत्नमन्तरेणैवानिलवशाद् ध्वनतीति कौतुकादनुसन्धानमित्यर्थः । अथ ग्रामलक्षणम् । यथा कुटुम्बिनः सर्वेऽप्येकीभूता भवन्ति हि । तथा स्वराणां सन्दोहो ग्राम इत्यभिधीयते । षड्जग्रामो भवेदादौ मध्यमग्राम एव च । गान्धारग्रामइत्येतत् ग्रामत्रयमुदाहृतमिति । तथाच नन्द्यावर्तोऽथ जीमूत सुभद्रो ग्रामकास्त्रय । षड्जमध्यमगान्धारास्त्रयाणां जन्महेतवइति । मूर्च्छनालक्षणन्तु । क्रमात्स्वराणां सप्तानामारोहश्चावरोहणम । सा मूर्च्छेत्युच्यते ग्रामस्था एताः सप्त सप्त च । ग्रामत्रयेऽपि प्रत्येकं सप्तसप्तमूर्च्छना इत्येकविंशतिर्मूर्च्छना भवन्ति । तत्र नामानि तु नातपेक्षितमुच्यतइति । प्रतिज्ञाभयान्न लिख्यन्ते इति सर्वमवदातम । अत्र पु व्यापारमन्तरेण स्वराद्यभिव्यक्तिः कोऽपि लोकातिक्रान्तोऽयं सिन्धवीष्वातिशयो वीणायाः प्रतीयते । तेन चक्र एत प्रसिद्धातिशयस्याभेदेनाध्यवसितत्वात तन्मूलातिशयोक्तिरलङ्कारः । सा च महत्या पु व्यापार विना मूर्च्छाद्युत्पत्त्यसम्बन्धेऽपि सम्बन्धाभिधानादसम्बन्धे सम्बन्धरूपतया पु व्यापाराख्यरूप कारण विनापि मूर्च्छनादिकार्योत्पत्तिद्योतनाद्विभावना व्यज्यतइत्यलङ्कारेणालङ्कारध्वनिरिति सङ्क्षेप ॥ १० ॥

निवर्त्त्येति । अतीन्द्रियाइन्द्रियमतिक्रान्ता देशकालस्वरूपादिप्रकर्षार्थाः । अत्यादयः क्रान्ताद्यर्थे द्वितीययेति समास । द्विगुप्राप्तापन्नालम्पूर्वगतिसमासेषु परलिङ्गताप्रतिषेधो वक्तव्यइति विशेष्यलिङ्गत्वम । तेषां ज्ञान तस्य निधिं सम्यग्द्रष्टेत्यर्थः कृतानतीन कृतप्रणामान अनुव्रजतो

समासदत्सादितदैत्यसम्पदः
पदं महेन्द्रालयचारु चक्रिणः ॥ ११ ॥

पतत्पतङ्गप्रतिमस्तपोनिधिः
पुरोऽस्य यावन्न भुवि व्यलीयत।
गिरेस्तडित्वानिव तावदुच्चकै
र्जवेन पीठादुदतिष्ठदच्युतः ॥ १२ ॥

ऽनुगच्छतः नभसि आकाशे सीदन्ति गच्छन्तीति नभःसदः सुरान् सत्सूद्विष इत्यादिना क्विप्। निवर्त्य प्रतिषिध्य स मुनिः सादितदैत्यसम्पदः सादिताः विध्वस्तीकृताः दैत्यानां सम्पदो येन तस्य चक्रिणः कृष्णस्य पदं स्थानं महेन्द्रालयचारु इन्द्रभवनमिव भासमानं समासदत्। समाङ्पूर्वात् सदधातोर्लङ्। अत्र नतीनतौ पदः पदमिति च द्वयोर्व्यञ्जनयुग्मयोरसकृदावृत्त्या छेकानुप्रासः अन्यत्र वृत्त्यनुप्रासः इत्यनयोः संसृष्टिः ॥ ११ ॥

पतदिति। पतन् यः पतङ्गः सूर्यः स प्रतिमा उपमानं यस्य सः। पतङ्गौ पक्षिसूर्यौ चेत्यमरः। तपोनिधिर्मुनिः अस्य हरेः पुरः पुरः प्रदेशे यावत् न व्यलीयत न तिष्ठत्। लीङ् गताविति धातोर्दैवादिकात्कर्त्तरि लङ्। तावदच्युतो गिरेः शैलात् तडितोऽस्य सन्तीति तडित्वान् मेघ इव। मादुपधायाश्च मतोर्वोऽयवादिभ्य इति मतुपो मकारस्य वकारः तसौ मत्वर्थे इति भसंज्ञायामेकसंज्ञाधिकारेणापदत्वाच्च जश्त्वम्। उच्चकैरुन्नतात् पीठात् आसनात् जवेनोदतिष्ठत्। हरिश्चरणस्य भूस्पर्शभागेव स्वयं स्थितवान्। ऊर्द्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति। प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते इति शास्त्रमनुसरन्निति भावः। उदोऽनूर्द्ध्वकर्मणीति नियमादिहोर्द्ध्वकर्मणि नात्मनेपदं पतत्पतङ्ग इत्यत्र पतङ्गस्य पतनासम्भवादियमभूतोपमा इत्याचार्य्यदण्डिप्रभृतयोऽप्यमनुः। अतएवात्र सिद्धस्योपमानत्वायोगादुत्प्रेक्षेत्याधुनिकालङ्कारिकाः सर्वे वदन्ति ॥ १२ ॥

अथ प्रयत्नोन्नमितानमत्फणै-
र्धृते कथञ्चित्फणिनाङ्गणैरधः ।
न्यधायिषातामभिदेवकीसुतम्
सुतेन धातुश्चरणौ भुवस्तले ॥ १३ ॥
तमर्घ्यमर्घ्यादिकयादिपूरुषः
सपर्य्यया साधु स पर्य्यपूपुजत् ।

अथेति । अथाच्युताभ्युत्थानानन्तरं धातुःसुतेन नारदेन प्रयत्नोन्न-मितास्तथापि मुनिपादन्यासभारादानमन्त्यः । फणा येषां तेषां फणिनां गणैः अधोऽधःप्रदेशे कथंचिद्धृते स्थापिते भुवस्तले भूपृष्ठे अभिदेवकीसुतं अभिलक्षीकृतेऽर्थे लक्षणेनाभिप्रती आभिमुख्ये इत्यव्ययीभावः । चरणौ पदौ । पदङ्घ्रिश्चरणोऽस्त्रियामित्यमरः न्यधायिषातां निक्षिप्तौ । दधातेः कर्म्मणि लुङ् । स्यसिचूसीत्यादिना चिण्वदिटि युक् । अत्र फणानां नमनोन्नमनासम्बन्धेऽपि मुनिगौरवाय तत्सम्बन्धाभिधानादतिशयोक्तिभेदः ॥१२॥

तमिति । आदिपूरुषः पुराणपुरुषः । अन्येषामपि दृश्यते इति वा दीर्घः । स कृष्णः अर्घं पूजामर्हतीति अर्घ्यः । दण्डादिभ्यो यः । तं नारदम् । अर्घाभ्यां चेति यत्प्रत्ययः । मूल्ये पूजाविधावर्घः षट् तु त्रिष्वर्घ्यमर्घार्थमिति चामरः । अर्घ्यमादिर्यस्यास्तया अर्घ्यादिकया । शेषाद्विभाषेति विकल्पेन कप् प्रत्ययः । सपर्य्यया पूजया । पूजा नमस्यापचितिः सपर्य्यार्च्चार्हणाः समा इत्यमरः । साधु यथा तथा पर्य्य-पूपुजत्परिपूजितवान् । णौ चङन्तं कर्त्तव्यम् । युक्तं चैतदित्यर्थो-न्तरं न्यस्यति गृहानिति । मनस ईषिणो मनीषिणः सन्तः पृषोदरादि-त्वात्साधुः । अपुण्यकृतामपुण्यवताम् । सुकर्मपापमन्त्रपुण्येषु कृञ् इति भूते क्विप् । गृहान् प्रणयादुपैतुमभीप्सवः प्राप्तुमिच्छवः आप्नोतेः सन्नन्तादुप्रत्ययः आप्ज्ञप्यृधामीदितीकारः । न भवन्ति किन्तु

गृहानुपैतुं प्रणयादभीप्सवो
भवन्ति नापुण्यकृतां मनीषिणः ॥ १४ ॥
न यावदेतावुदपश्यदुत्थितौ
जनस्तुषाराञ्जनपर्वताविव ।
स्वहस्तदत्ते मुनिमासने मुनि-
श्चिरन्तनस्तावदभिन्यवीविशत् ॥ १५ ॥
महामहानीलशिलारुचः पुरो
निषेदिवान् कंसकृषः स विष्टरे ।

पुण्यकृतामेव । अतः कृष्णस्य धन्यः पूज्यश्चेत्यर्थः ॥ १४ ॥

नयावदिति । उत्थितावेतौ मुनिकृष्णौ जनः तुषाराञ्जनमयोः पर्वताविव यावन्नोदपश्यन्नोपलक्षितवान् । तावच्चिरन्तनः पुराणो मुनिः कृष्णः पुरा किल भगवान् बदरिकाश्रमे नारायणावतारेण तपसि स्थितवानिति पुराणात् । अत्र चिरमित्यादिना ट्युप्रत्ययः तुडागमश्च । स्वहस्तेन दत्ते आसने मुनिं नारदम् अभिन्यवीविशत् स्वामिमुख्येनोपवेशितवान् । अभिनिपूर्वात् विशतेर्ण्यन्ताल्लुङि णिश्रीति चङ् ॥ १५ ॥

महामहेति । महत्या महानीलशिलायाः सिंहलद्वीपसम्भवेन्द्रनीलोपलस्य रुगिव रुग्यस्य तस्येत्युपमालङ्कारः । सिंहलस्थाकराद्भूता महानीलास्तु ते स्मृता इति भगवानगस्त्यः । कंसकृषो हरेः पुरोऽग्रे उच्चकैरुन्नते विष्टरे आसने । वृक्षासनयोर्विष्टर इति षत्वम् । निषेदिवानुपविष्टवान् । भाषायां सदवसश्रुव इति क्वसुः । स मुनिरभिसायं सायङ्कालाभिमुखम् । अव्ययीभावसमासः । सायङ्कालस्य कार्ष्ण्यात् कृष्णोपमानत्वम् । श्रित आश्रित उदयाद्रिरुदयाचलो येन तस्य चन्द्रमसोऽभिरामतां शोभामचूचुरत् चोरितवान् प्राप्तवानित्यर्थः । चुरेर्लुङि णिश्रीति चङ् । अन्यस्यान्यधर्मसम्बन्धासम्भवात् चन्द्रमसोऽभिरामतामिवाभिरामतामित्यौपम्यपर्यवसानाद-

अनन्यगुर्वास्तव केन केवलः
पुराणमूर्तेर्महिमावगम्यते ।
मनुष्यजन्मापि सुरासुरान् गुणै
र्भवान् भवच्छेदकरैः करोत्यधः ॥ ३५ ॥

लघूकरिष्यन्नतिभारभङ्गुरा
ममूं किल त्वं त्रिदिवादवातरः ।

अनन्येति । न विद्यतेऽन्यो गुरुर्यस्यास्तस्याः अनन्यगुर्वाः, इत्यमीषां [illegible] पादः संमासान्ताड् ङीपि नद्यृतश्चेति कप्प्रसङ्गः स्यात् पद्यान्तसुपस [illegible] अधिकारात् योतोगुणवचनादिति न प्राप्नोति [illegible] नदी- [illegible] केचित्तु समासान्त विधिरनित्य इति कपं [illegible] तस्याः सर्वैरनन्यादृश पुराणमूर्तेरनादिपुरुषस्य केवलः [illegible] । केवल [illegible] एक [illegible] इति विद्य । महिमा केनावगम्यते न केनापीत्यर्थः कुतः मनुष्य जन्म यस्य स मनुष्यजन्मा भवान् [illegible] जन्म [illegible] इति [illegible] । भवच्छेदकरैः संसार निवर्त्तकैर्गुणैर्ज्ञानादिभिः सुरासुरान् सुरा- सुरविरोधिनः [illegible] विरोधः [illegible] इति न [illegible] । अधः करोति । [illegible] प्रथम इति प्रथमपुरुषः भवच्छब्दस्य युष्मदर्थत्वेन [illegible] । [illegible] ते महिमा दुरव- गाह, [illegible] किमिति तात्पर्यार्थः । द्वितीयार्धे [illegible] [illegible] ॥ ३५ ॥

लघूकरिष्यन्निति । [illegible] भारेण [illegible] स्वरूपेण भङ्गुरां स्वयं भ- ज्यमानाम् । भञ्जभासमिदो घुरच् । भङ्गुर. कर्मकर्त्तरीति वामन. । अ- मूमुर्वीमित्यर्थः । लघूकरिष्यन् निर्भारां करिष्यन् किल । अभूततद्भावे च्वि. [illegible] दीर्घ । [illegible] त्रिदिवः स्वर्गस्तस्मात् । [illegible] पूर्वार्धस्य [illegible]

उदूढलोकत्रितयेन साम्प्रतम्
गुरुर्धरित्री क्रियतेतरां त्वया ॥ ३६ ॥
निजौजसोज्जासयितुं जगद्द्रुहा
मुपाजिहीथा न महीतलं यदि ।
समाहितैरप्यनिरूपितस्ततः
पदं दृशः स्याः कथमीश मादृशाम् ॥ ३७॥
उपप्लुतं पातुमदोमदोद्धतै
स्त्वमेव विश्वम्भर! विश्वमीशिषे ।

अवातरः अवतीर्णोऽसि साम्प्रतं इदानीं उदूढलोकत्रितयेन कुक्षाविति येन त्वया धरित्री गुरुः पूज्या भारवती च क्रियतेतरां अतिशयेन क्रियते। तिङश्चेति तरप् किमेत्तिङव्ययादित्यादिना आमुप्रत्ययः। लघुकर्त्ता गुरु-कर्त्तेति विरोधाभासोऽलङ्कारः। आभासत्वे विरोधस्य विरोधाभास उच्यते इति लक्षणात् ॥ ३६ ॥

निजेति। निजौजसा स्वतेजसा जगद्द्रुहो द्रुह्यन्तीति जगद्द्रुहः कंसा-दयः। सत्सूद्विषेत्यादिना क्विप्। तेषां उज्जासयितुमनात् हिंसितुमि-त्यर्थः। जासिनिप्रहणेत्यादिना कर्मणि शेषे षष्ठी जसु हिंसायामिति चुरादिः। महीतलं नोपाजिहीथा यदि नावतरेश्चेत्। ओहाङ् गतौ लङि थासि रूपम्। ततस्तर्हि समाहितैः समाधिनिष्ठैरपि सकर्मकाद्-व्यापितादिदर्शिते कर्मणि कर्त्तरि क्तः। अथवा समाहितैः समाहितचित्तैरित्यर्थः। विभक्तधनेषु विभक्ता भ्रातर इतिवदुत्तरपद-लोपो द्रष्टव्यः. गम्यमानार्थस्याप्रयोग एव लोप इति कैयटः। अनिरूपितोऽ-दृष्टोऽस्त्वमीश! मादृशामस्माकं चक्षुषामिति भावः। विनयोक्तिरियं दृशो दृष्टेः पदं गोचरः कथं स्याः न कथञ्चिदित्यर्थः। तथा स्वसाक्षात्कारएवागमन-प्रयोजनमिति भावः ॥ ३७ ॥

ऋते रवेः क्षालयितुं क्षमेत कः
क्षपातमस्काण्डमलीमसं नभः ॥ ३८॥
करोति कंतादिमहीभृतां वधात्
जनो मृगाणामिव यत्तव स्तवम् ।
हरे ! हिरण्याक्षपुरःसरासुर
द्विपद्विपः प्रत्युत सा तिरस्क्रिया ॥३९॥

ननु कोऽयं नियमो यत्कंसाय दुष्टनिग्रहाधिकारस्त्वयैवान्यथा ध्याययेवाह । उपप्लुतमिति । विश्वं बिभर्तीति विश्वम्भरस्तस्य सम्बुद्धौ हे विश्वम्भर । विश्वत्रातः । संज्ञायां भृतॄवृजीत्यादिना खच्प्रत्यये मुमागमः । मदोद्धतैः कंसादिभिः उपप्लुतं पीडितं जगदेतत् पातुमीश्वरः भवानेव नान्योऽस्ति विश्वम्भरत्वादिति भावः । ईश ऐश्वर्ये लिटि शानच्प्रत्ययः । अत्र वैधर्म्येण दृष्टान्तमाह । क्षपातमस्काण्डमलीमसं क्षपा वर्गः । काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिष्वित्यमरः । कस्कादिषु चेति विसर्जनीयस्य सत्वम् । मलीमसं मलिनम् । मलीमसन्तु मलिनं कच्चरं मलदूषितमित्यमरः । ज्योत्स्ना तमिस्रेत्यादिना मत्वर्थीयो- निपातः । नभः क्षालयितुं रवेः ऋते रविं विना । अन्यारा- दितरर्त्ते इति पञ्चमी । कः क्षमेत शक्नुयात् न कोऽपीत्यर्थः । अत्र वाक्यद्वये समानधर्मस्यैकस्यैव क्षमेतेति शब्दद्वयेन वस्तुभावेन निर्देशात्त- त्रापि व्यतिरेकमुखत्वाद्वैधर्म्येण प्रतिवस्तूपमालङ्कारः । तदुक्तं धर्म्यस्य वाक्यार्थगतत्वेन सामान्यस्य वाक्यद्वये पृथङ्निर्देशे प्रतिवस्तूपमा ॥३८॥

करोतीति । किन्तु जनोऽयं मृगाणामिव कंसादिमहीभृतां वधात् हेतोः तव स्तवम् । स्तवः स्तोत्रं नुतिः स्तुतिरित्यमरः । करोतीति यत् हे हरे हे कृष्ण हे विष्णो इति च गम्यते सा स्तुतिक्रिया हिरण्याक्ष- पुरःसरा हिरण्याक्षप्रभृतयो ये असुरास्त एव द्विपाः तेषां द्विपः कण्ठी- रवस्य । तस्य तव प्रत्युत वैपरीत्येन प्रत्युत तिरस्क्रियेति इति गम्य-

प्रवृत्त एव स्वयमुज्झितश्रमः
क्रमेण पेष्टुं भुवनद्विषामसि।
तथापि वाचालतया युनक्ति माम्
मिथस्त्वदाभाषणलोलुपं मनः ॥ ४० ॥
तदिन्द्रसन्दिष्टमुपेन्द्र! यद्वचः
क्षणं मया विश्वजनीनमुच्यते।
समस्तकार्य्येषु गतेन धुर्य्यतां
महिद्विषस्तद्भवता निशम्यताम् ॥ ४१ ॥

व्याख्यानात्। तिरस्क्रिया अवमानः। यदिति सामान्ये नपुंसकम्। चेति विधेयलिङ्गम्। गजघातिनः सिंहस्य मृगवधवर्णनमिव महासुरहन्तुस्तव कथादिक्षुद्रजन्तुवधवर्णनं तिरस्कार एवेत्यर्थः। महासुरद्विषामिति हरिर्हरिरिति श्लिष्टपरम्परितरूपकं मृगाधाभिषेवादुपमयाङ्गाङ्गिभावेन सङ्कीर्य्यते ॥ ३९ ॥

एवं स्तुत्वा देवमभिमुखीकृत्यागमनप्रयोजनं वक्तुमुपोद्घातयति। प्रवृत्त इति। त्वमुज्झितश्रमस्त्यक्तश्रमः सन् क्रमेण भुवनानि द्विषन्तीति भुवनद्विषो दुष्टास्तेषां पेष्टुं तान् हिंसितुमित्यर्थः। जासिनिप्रहणनाटेत्यादिना कर्म्मणि षष्ठी। स्वयमपरप्रेरित एव प्रवृत्तोऽसि एवं तर्हि किमुपदेश्यं किमिति चेत्तत्राह। तथापि त्वं प्रवृत्तोऽपि मिथो रहसि, त्वदाभाषणे त्वया सह संलापे लोलुपं लुब्धम्। लुब्धोऽभिलाषुकस्तृष्णक् समौ लोलुपलोलुभावित्यमरः। मनो मां वाचालतया सह युनक्ति वाचालं करोतीत्यर्थः। वाचो बह्व्योऽस्य सन्तीति वाचालः। आलजाटचौ बहुभाषिणीत्यालच्। स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवागित्यमरः ॥ ४० ॥

अथ स्ववाक्यश्रवणं सावधानमर्थयते। तदिति। तत्तस्मादिन्द्रसम्भाषणात्, उपेन्द्रः इन्द्रावरजः अतएवेन्द्रसन्दिष्टं श्रोतव्यमिति भावः। किम्

अभूदभूमिः प्रतिपक्षजन्मनाम्
भियां तनूजस्तपनद्युतिर्दितेः।
यमिन्द्रशब्दार्थनिसूदनं हरे
र्हिरण्यपूर्व्वं कशिपुं प्रचक्षते ॥ ४२ ॥

विश्वस्मै जनाय हितं विश्वजनीनम्। 'आत्मन्विश्वजनभोगोत्तरपदात्
खः'। यद्वचः वचनं तु चिरं मयोच्यते। तद्वचोऽहिद्विषोऽस्तम्ः।
सर्वं हतासुरेऽप्यहिरिपि वैजयन्ती। समस्तकार्य्येषु धुर्य्यता धुर-
न्धरत्वं गतेन त्वतोऽपि भवता निशम्यताम्। प्रार्थनायां लोट्। धुरं
वहतीति धुर्यः। 'धुरो यड्ढकौ' इति यत्प्रत्ययः। स्फुटमत्र पदार्थहेतु-
कं काव्यलिङ्गमलङ्कारः॥ ४१॥

अथ शिशुपालोऽहन्तव्य इति वक्तुन्तस्यास्यवध्यत्वेऽन्यवध्यत्व शाप-
नोपयिकतया क्रौर्य्यप्रकटनार्थं जन्मान्तरवृत्तान्तं तावदुद्घाटयति। अभू-
दिति। प्रतिपक्षाच्छत्रोः जन्म यासान्तासाम्भियामभूमिरविषय निर्भी-
क इत्यर्थः तपनद्युतिः सूर्य्यतापो दितेस्तनूजो दैत्योऽभूत्। कोऽसावत
आह। हरेरिन्द्रस्य इन्द्रशब्दार्थनिसूदनं इन्दतीति इन्द्रः। इदि पर-
मैश्वर्य्ये 'ऋज्रेन्द्र' इत्यादिना रन्प्रत्ययान्तः औणादिकनिपातः। तस्य इन्द्र
इति शब्दस्येन्द्र इति संज्ञापदस्य योऽर्थः परमैश्वर्य्यलक्षणः तस्य निसूदनं
निवर्त्तकम्। कर्त्तरि ल्युट्। हरेरैश्वर्य्यनिहन्तारमित्यर्थः। य
मेव हिरण्य पूर्व्वं कशिपुमचक्षते हिरण्यकशिपुमाहुरित्यर्थः। अत्र
हिरण्यशब्दपूर्व्वकत्वं कशिपुशब्दस्यैव न तु तदर्थस्येति शब्दपरस्य
कशिपुशब्दस्यार्थगतत्वेनान्वयोऽस्य प्रयोगादवाच्यवचनाख्यार्थदोषमाहुः।
तदेवावाच्यवचनमवाच्यवचनं हि तदिति समाधानं एवंविधविषये शब्द-
परेणार्थलक्षणेति कथञ्चित्तस्य दामितत्वमस्माभिरेव पूर्व्वं गिरित्वे इति
अनुरूपपदमपक्षे वेश्मभ्यादिदेशेत्यत्र व्याख्यानावसरे शङ्कीर्ण्यां पथे
निविष्य तार्थं दैत्यमदिश्य हिरण्य पूर्व्वं कशिपुमचक्षते संज्ञात्वेन
ते॥ ४२॥

समत्सरेणासुर इत्युपेयुषा
चिराय नाम्नः प्रथमाभिधेयताम् ।
भयस्य पूर्व्वावतरस्तरस्विना
मनःसु येन द्युसदां न्यधीयत ॥ ४३ ॥

दिशामधीशांश्चतुरो यतः सुरा-
नपास्य तं रागहृताः सिषेविरे ।
अवापुरारभ्य ततश्चला इति
प्रवादमुच्चैरयशस्करं श्रियः ॥ ४४ ॥

समत्सरेणेति । समत्सरेण अन्यशुभद्वेषसहितेन । मत्सरोऽन्यशुभद्वेष इत्यमरः । असुरः । असून् रमयतीत्यसुरः । असुर इति नाम्ना चिराय चिरकालेन । चिराय चिररात्राय चिरस्याद्याश्चिरार्थका इत्यमरः । प्रथमाभिधेयतामुपेयुषा अन्वर्थतया मुख्यार्थतां गतेन तरस्विना बलवता । तरसी बलरंहसी इति विश्वः । येन हिरण्यकशिपुना दिवि सीदन्तीति द्युसदां देवानां मनःसु भयस्य पूर्व्वावतरः प्रथमप्रवेशः । ऋदोरप् । न्यधीयत निहितः । धाञः कर्म्मणि लङ् । अस्मादेव देवानां प्रथमं भयस्योत्पत्तिरभूदित्यर्थः ॥४३॥

दिशामिति । श्रियः सम्पदः यतो यद्धेतोः दिशामधीशान् दिक्पतीनपि चतुरः सुरान् इन्द्रवरुणयमकुवेरान् अपास्य त्यक्त्वा तं हिरण्यकशिपुं रागहृताः रागकृष्टाः सत्यः न तु बलादितिभावः । सिषेविरे यतो सेविरे भियः इति भावः । तत आरभ्य तदा प्रभृति अयशः करोतीत्ययशस्करं दुष्कीर्त्तिहेतुमित्यर्थः । कृञो हेतुताच्छील्यानुलोम्येष्विति टप्रत्ययः । अतः कृकमीत्यादिना विसर्ज्जनीयस्य सत्वं । उच्चैः प्रचुरं चला अस्थिरा इति प्रवादमपवादमापुः । दिगीशानामपि सर्व्वस्वहारित्वात्तदौद्धत्यप्राकर्ष्यमिति भावः ॥४४॥

पुराणि दुर्गाणि निशातमायुधम्
बलानि शूराणि घनाश्च कञ्चुकाः ।
स्वरूपशोभैकफलानि नाकिनाम्
गणैर्यमाशङ्क्य तदादि चक्रिरे ॥ ४५ ॥

स सञ्चरिष्णुर्भुवनान्तरेषु याम्
यदृच्छयाशिश्रियदाश्रयः श्रियः ।
अकारि तस्यै मुकुटोपलस्खल
त्करैस्त्रिसन्ध्यं त्रिदशैर्दिशे नमः ॥ ४६ ॥

पुराणीति । किञ्च नाकिनां सुराणां गणैः यं हिरण्यकशिपुं आश-
ङ्क्य बाधकत्वेनोत्प्रेक्ष्य यस्य काल आदिर्यस्मिन् तद्यदादि तदाप्रभृति स्वरू-
पशोभैवैकं फलं मुख्यं प्रयोजनं येषां पुरादीनां तानि तथोक्तानि प्रागीदृ-
गबाध्ययत्नोरभावादिति भावः । नपुंसकमनपुंसकेनेत्यादिना नपुंसकैकशेषः
पुराणि दुर्गाणि प्राकारपरिखादिना अगम्यानि चक्रिरे । सुदुरोरधिकरणे
इति गमेर्डः । आयुधं निशातं निशितं चक्रे इति विभक्तिविपरिणामेनान्वयः ।
शो तनूकरणे इति धातोः क्त. शाच्छोरन्यतरस्यामितीत्वविकल्पात्तद्वे आत्वम्
बलानि सैन्यानि शूराणि शौर्यवन्ति चक्रिरे सम्पादितानि कञ्चुका वार-
बाणाः लोहमयाः मौलीत्यर्थः । कञ्चुको वारबाणोऽस्त्रीत्यमरः । घना दुर्भेदा-
श्चक्रिरेऽत्यन्तं नित्य सहजा जायन्तिकोऽलक्षणं. ॥ ४५ ॥

सटाच्छटाभिन्नघनेन बिभ्रता
नृसिंह ! सैंहीमतनुं तनुं त्वया ।
स मुग्धकान्तास्तनसङ्गभङ्गुरै
रुरोविदारं प्रतिचस्करे नखैः ॥ ४७ ॥
विनोदमिच्छन्नथ दर्पजन्मनो
रणेन कण्ड्वास्त्रिदशैः समं पुनः ।

नमस्यते स्म त्रिसन्ध्यं त्रिदशैर्दिवे । तिस्रः सन्ध्याः समाहृता-
स्त्रिसन्ध्यम् । तद्धितार्थोत्तरपदेत्यादिना समाहारे द्विगुः द्विगुरेकवच-
नं स नपुंसकमिति पक्षे नपुंसकत्वं अत्यन्तसंयोगे द्वितीया । तस्यै दिशे करे
इत्यर्थः । नमः स्वस्तीत्यादिना चतुर्थी । नमः नमस्कारोऽकारि कृतम् ।
करोतेः कर्मणि लुङ् चिण् भावकर्मणोरिति चिण् । सन्ध्यावन्दनेऽपि
दिङ्नियमं परित्यज्य तदागमनभयात्तस्यै दिशे नमस्कारः कृतइति
भावः ॥ ४६ ॥

अथ सोऽपि त्वयैव हतइत्याह । सटाच्छटेति । हे नृसिंह ! नरः सिंह
इवेत्युपमितसमासः न चासौ सिंहश्चेत्यपि प्रस्तावात् । सिंहस्येमां सैंहीं तनुं
कायं बिभ्रता नृसिंहावतारभाजेत्यर्थः । किम्भूतां अतनुं विस्तीर्णं अतएव
सटाच्छटाभिःकेसरसमूहैः भिन्ना घना मेघा येन अत्युच्चत्वादिति
भावः । सटा जटाकेसरयोरिति तनुः काये कृशेऽल्पे चेति च विश्वः । स्वयं
स दैत्यः मुग्धौ नवौ । मुग्धः सौम्ये नवे मूढे इति वैजयन्ती । यौ कान्तास्तनौ
तयोः सङ्गेनापि भङ्गुरैः कुटिलैर्नखैरुरोविदारं उरो विदार्य । परिक्लिश्यमा-
ने चेति णमुल्प्रत्ययः । प्रतिचस्करे हतः । किरतेः कर्मणि लिट् ऋच्छ-
त्यृतामिति गुणः हिंसायां प्रतेश्चेति सुडागमः । वज्रकठिनोऽपि नखैर्विदा-
रितइति वाङ्मनसयोरगोचरमहिम्नस्ते किमसाध्यमिति भावः ॥४७॥

अथास्य वक्ष्यमाणचेष्टितान्याचष्टे । विनोदमिति । अथ स हिरण्यकशिपुः
पुनः भूयोऽपि त्रिदशैः समं सह । साकं सार्धं समं सहेत्यमरः । रणेन द

स रावणोनाम निकामभीषणम्
बभूव रक्षः क्षतरक्षणं दिवः ॥ ४८॥
प्रभुर्बुभूषुर्भुवनत्रयस्य यः
शिरोऽतिरागाद्दशमं चिकर्त्तिषुः ।
अतर्क्यद्विघ्नमिवेष्टसाहसः
प्रसादमिच्छासदृशं पिनाकिनः ॥ ४९ ॥

मौर्दन्त.धाराञ्जन्म यस्य स्तस्य कण्डूः भुजकण्डूः तैर्विनोदमपनोदमिच्छन् प्राग्भवनस्य क्षतैस्तदपनोदाभावादित्यर्थः। दिवः स्वर्गस्य क्षतं नष्टं रक्षणं रक्षा येन तत् क्षतस्वर्गरक्षणमित्यर्थः । सापेक्षत्वेऽपि गमकत्वात्समासः । अनेन देवसर्वस्वापहारित्वमुक्तं । भीषयतइति भीषणः नन्द्यादित्वात् ल्यु । भियोहेतुभये षुगिति षुक् । निकामं भीषणः। सुप्सुपेतिसमासः, रावणो नाम रावणइति प्रसिद्धं रक्षोबभूव राक्षसयोनौ जात इत्यर्थः। विश्रवसोऽपत्यं पुमान् रावणइति विग्रहः तस्यापत्यमित्यपि कृते विश्रवसोविश्रवणरवणाविति प्रकृतेरवणादेशः । पौराणिकास्तु रावयती ति व्युत्पादयन्ति तदुक्तमुत्तरकाण्डे यस्माल्लोकत्रयं चैतद्रावितं भयमागतं । तस्मात्त्वं रावणोनाम नाम्ना वीरोभविष्यसीति । रौतेर्ण्यन्तात्कर्त्तरि ल्युट् । रावणरक्षसोर्नियतलिङ्गत्वाद्विशेष्यभावेऽपि स्वलिङ्गता ॥ ४८ ॥

यथासौत्थमष्टादशश्लोक्याचष्टे । प्रभुरिति । यो रावणः भुवनत्रयस्य प्रभुः स्वामी बुभूषुः भवितुमिच्छुः भुवः सन्नन्तादुप्रत्ययः। अतिरागादुत्साहात् न तु फलविलम्बननिर्वेदादिति भावः । दशमं शिरः चिकर्त्तिषुः कर्त्तितुमिच्छुः । कृती छेदे इति धातोः सन्नन्तादुप्रत्ययः । इष्टसाहसः प्रियसाहसः अतएवेच्छासदृशमिच्छानुरूपं पिनाकिनः प्रसादं वरं विघ्नमिवातर्कयत् उत्कं चिन्तितवान् इति परमसाहसिकत्वोक्तिः इतआरभ्य श्लोकषट्केऽपि यच्छब्दस्य स रावणोनाम रक्षोबभूवेति पूर्वेणान्वयः । रक्षराजस्तु स चक्रमसाक्षमताधिकन्धरमिति परस्मिन्नन्वय इत्याह तदसत्

समुत्क्षिपन् यः पृथिवीभृतां वरम्
वरप्रदानस्य चकार शूलिनः ।
त्रसत्तुषाराद्रिसुतास सम्भ्रम-
स्वयङ्ग्रहाश्लेषसुखेन निष्क्रयम् ॥ ५० ॥
पुरीमवस्कन्द लुनीहि नन्दनम्
मुषाण रत्नानि हरामराङ्गनाः ।

मुषाणां च परार्थत्वादिति न्यायादाक्षेपादित्वप्रत्यर्कं प्रधानान्वयिनां मिथःसम्बन्धायोगादित्यलम् शाखाचङ्क्रमणेन । पुरा किल रावणः कास्मिंश्चित् कस्मिंश्चित् पशुपतिप्रीणनाय नव शिरांसि अग्नौ हुत्वा दशमारम्भे सन्तुष्टात्तस्मात् त्रैलोक्याधिपत्यं वव्रे इति पौराणिकी कथात्रानुसन्धेया ॥ ४९ ॥

अथ कैलासोत्क्षेपवृत्तान्तमाह । समुत्क्षिपन्निति । यो रावणः पृथिवीभृतां पर्वतानां वरं श्रेष्ठं कैलासं समुत्क्षिपन् दर्पादिति शेषः । शूलिनो वरप्रदानस्य पूर्वोक्तस्य त्रसन्त्याः शैलचलनेन बिभ्यत्यास्तुषाराद्रिसुतायाः पार्वत्याः ससम्भ्रमो यः स्वयङ्ग्रहः प्रियप्रार्थनां विना कण्ठग्रहणम् । सुप्सुपेति समासः । तेन आश्लेषः संश्लेषणं तेन यत्सुखं तेन त्रैलोक्याधिपत्यसुखादुत्कृष्टेनेति भावः । निष्क्रयं प्रत्युपकारनिर्गतिं चकार । निष्क्रयोबुद्धियोगे स्यात्सामर्थ्ये निर्गतावपीति वैजयन्ती यद्वा निष्क्रयं चकार क्रयेण व्यवहारेण याच्ञादोषदैन्यं ममार्जेत्यर्थः अत्र सुखवरदानयोर्विनिमयात् परिवृत्तिरलङ्कारः ॥ ५० ॥

पुरीमिति । यो बली बलीयान् रावणः नमुचिद्विषा इन्द्रेण विरुद्ध विरुध्य पुरीममरावतीमवस्कन्द अवरुरोध नन्दनं इन्द्रवनम् । नन्दनं वनमित्यमरः । लुनीहि चिच्छेद । ईहल्यमोरितीकारः । रत्नानि श्रेष्ठवस्तूनि मणीन्वा । रत्नं श्रेष्ठे मणावपीति विश्वः । मुषाण मुषो

विगृह्य चक्रे नमुचिद्विषा बली
य इत्थमस्वास्थ्यमहर्दिवं दिवः॥५१।
सलीलयातानि न भर्त्तुरभ्रमो
र्न चित्रमुच्चैःश्रवसः पदक्रमम्।
अनुद्रुतः संयति येन केवलम्
बलस्य शत्रुः प्रशशंस शीघ्रताम्॥५२॥

मुष स्तेये इत्यस्य धातोर्ण्यन्तात् णमुल् इति णमुल् प्रत्ययः। अमराङ्गना हर णं हारं। सर्वत्र पौनःपुन्येनेत्यर्थः इत्थमनेन प्रकारेण अहनि च दिवा च अहर्दिवम् अहन्यहनीत्यर्थः। अचतुरेत्यादिना समास्यर्थवृत्तौ द्वन्द्वे समासान्तो निपातः। दिवः स्वर्गस्य अस्वास्थ्यमुपद्रवं चक्रे। ...स्वान्तेत्यादौ क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोरि- त्यनुवृत्तौ समुच्चयेऽन्यतरस्यामिति विकल्पेन कालसामान्ये लोट्। तस्य ...सर्वतिङादेशो हिस्वौ च प्रकरणादिना तत्तद्विशेषावगम इतोऽवेहीति यथायोग्यं हिलुक् पौनःपुन्यं भृशार्थो वा क्रियासमभिहार प्रस्कन्दनादि क्रियाविशेषाणां समुच्चयः क्रियासमभिहार तत्सामान्यस्य ...तौ। समुच्चये सामान्यवचनस्येत्यनुप्रयोगश्चक्रे इति। अत्र तिङ् ...विभ्राजौपच्छन्दोपयोगश्च। तथा तिङां परावृत्तिः सौवर्णमिति ...र्णनात् समुच्चयालङ्कारः॥५१॥

सलीलेति। संयति युद्धे। समुदाय स्त्रियां संयत्समित्याजि ...मिद्युधस्त्वमर। येन रावणेन अनुद्रुतोऽनुधावितः बलस्य शत्रुरिन्द्र ...अभ्रमोर्भर्त्तुरैरावतस्य सलीलयातानि सभङ्गीकगमनानि न प्रशशंस तथा ...च्चैःश्रवसः स्वाश्वस्य चित्रं नानाविधं पदक्रमं पादविक्षेपं आर्द्दपुला ...यितादिगतिविशेषमित्यर्थः न प्रशशंस किन्तु केवलं शीघ्रतां शीघ्रगामित्व ...व प्रशशंस अन्यथा शीघ्रं नाभाहात्स्यन्ते गृह्णीष्यतीति भयादिति भावः ५२

अशक्नुवन् सोढुमधीरलोचनः
सहस्ररश्मेरिव यस्य दर्शनम् ।
प्रविश्य हेमाद्रिगुहागृहान्तरम्
निनाय बिभ्यद्दिवसानि कौशिकः ॥ ५३ ॥

बृहच्छिलानिष्ठुरकण्ठघट्टना-
द्विकीर्णलोलाग्निकणं सुरद्विषः ।
जगत्प्रभोरप्रसहिष्णु वैष्णवम्
न चक्रमस्याक्रमताधिकन्धरम् ॥ ५४ ॥

अशक्नुवन्निति । अधीरलोचनः अस्थिरदृष्टिः कौशिको महेन्द्रः उलूकश्च । महेन्द्रगुग्गुलूलूकव्यालग्राहेषु कौशिक इत्यमरः । सहस्ररश्मेः सूर्यस्येव यस्य रावणस्य विक्रमकर्मणो दर्शनं सोढुमशक्नुवन् । हेमाद्रेर्गुहैव गृहं तस्यान्तरं प्रविश्य बिभ्यत्तत्रापि वेपमानश्च । बिभेतेः शतरि नाभ्यस्ताच्छतुरिति नुमभावः । दिवसानि वासराणि निनाय । द्वौ तु क्लीबे दिवसवासरौ इत्यमरः । यथा पेचकः सूर्योदये भीतः सन् निलीय तथा सोऽपीति भावः । कौशिक इत्यभिधायाः प्रस्तुतैकगोचरत्वे नोभयत्रेऽपि श्लेषेण उल्लूकविषयमद्युपक्रमणो ध्वनिः सहस्ररश्मेरिवेत्युपमाननिर्वाहकत्वात् वाच्यसिद्ध्यङ्गम् ॥ ५२ ॥

बृहच्छिलेति । बृहती शिलेव निष्ठुरे कण्ठे घट्टनादभिघाताद्विकीर्णा विक्षिप्ताः लोलाश्चाग्निकणाः स्फुलिङ्गाः यस्य तत् अत एवाप्रसहिष्णु असहनमभिभव इति तत्स्थिकारं । अलङ्कृञित्यादिना इष्णुच् । वैष्णवं चक्रं सुदर्शनं जगत्प्रभोः एकस्य लोकस्वामिन अस्य सुरद्विषो रावणस्य कन्धरायामधि अधिकन्धरं अधिग्रीवम् । विभक्त्यर्थे अव्ययीभावः अव्ययीभावः अव्ययीभावश्चेति नपुंसकत्वात् ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वत्वम् । कण्ठो गलोऽथ ग्रीवायां शिरोधिः कन्धरे

निभिन्नशङ्खः कलुषीभवन्मुहु
र्मदेन दन्तीव मनुष्यधर्मणः ।
निरस्तगाम्भीर्य्यमपास्तपुष्पकम्
प्रकम्पयामास न मानसं न सः ॥ ५५ ॥
रणेषु तस्य प्रहिताः प्रचेतसा
सरोषहुङ्कारपराङ्मुखीकृताः ।

इत्यमरः । माकृतमप्रतिहतं न भवतीत्यर्थः किन्तु प्रतिहतमेवेत्यर्थः । दन्तिपर्यायस्तदनेन प्रसङ्गेन अनेन दन्तिर-प्रतिबन्धः ॥ ५४ ॥

विभिन्नेति । स रावणो मदेन दर्पेण दानेन च । मदो दर्पेभदानयोरिति विश्वः । दन्तीव गज इव विभिन्नो विघट्टितः शङ्खो निधिभेदः कम्बुश्च येन स सन् । शङ्खो निध्यन्तरे कम्बुललाटास्थि नखेषु चेति विश्वः । अकलुषः कलुषः क्षुभ्यमाणश्च भवन् कलुषीभवन् निरस्त गाम्भीर्यमविकारित्वमगाधत्वं च यस्य तत् । अपास्तानि पुष्पाणि पुष्पकं विमानञ्च यस्मात् तत् । पुष्पपक्षे शैषिकः कप् प्रत्ययः । मनुष्यस्येव धर्मो यस्य कुबेरस्येति स्वामी । तस्य मनुष्यधर्मणः धर्मादनिच् केवलादित्यनिच् । मानसं चित्तं तदीयं सरश्च । मानसं सरसि स्वान्ते इति विश्वः । मुहुर्न कम्पयामास न क्षोभयामासेति न किन्तु कम्पयामासैवेत्यर्थः । कवेरस्य महामहिमतया सम्भावितप्रकम्पित्व-निरासाय नञ्द्वयम् सम्भाव्यनिषेधनिवर्त्तने नञ्द्वयमिति वामनः । अत्र दन्तिरावणयोः प्रकृताप्रकृतयोः श्लेषः ॥ ५५ ॥

रणेष्विति । किञ्च रणेषु प्रचेतसा वरुणेन प्रहिताः प्रयुक्ताः उरगराजाः महासर्पास्ते रज्जव इव उरगराजरज्जवः नागपाशा इत्यर्थः । तस्य रावणस्य सरोषहुङ्कारेण पराङ्मुखीकृताः व्यावर्त्तिताः । अतएव सभयाः सन्तः जवेन वेगेन प्रवृत्तं प्रयोक्तुः प्रचेतस एव कण्ठं प्रपेदिरे

प्रहर्त्तुरेवोरगराजरज्जवो
जवेन कण्ठं सभयाः प्रपेदिरे ॥ ५६ ॥
परेतभर्त्तुर्महिषोऽमुना धनु-
र्विधातुमुत्खातविषाणमण्डलः ।
हृतेऽपि भारे महतस्त्रपाभरा-
दुवाह दुःखेन भृशानतं शिरः ॥ ५७ ॥
स्पृशन् सशङ्कः समये शुचावपि
स्थितः कराग्रैरसमग्रपातिभिः ।
अघर्मघर्मोदकबिन्दुमौक्तिकै-
रलञ्चकारास्य वधूरहस्करः ॥ ५८ ॥

प्राप्ता । अत्र परहिंसाप्रयुक्तस्यायुधस्य वैपरीत्येन स्वकण्ठमण्डखण्डनस्यो-त्पत्तिरूपो विषमालङ्कारः ॥ ५६ ॥

परेतभर्त्तुरिति । अमुना राज्ञा धनुः शार्ङ्गं विधातुं निर्मातुं उत्खातमुत्पाटितं विषाणयोः शृङ्गयोर्मण्डलं वलयं यस्य स परेतभर्त्तुः यमस्य महिषो वाहनभूतइति भावः । भारे विषाणरूपे । भजोर्षेन् । हृतेऽपि महतस्त्रपैः भरस्तस्मात्ततोऽपि दुर्भरादितिभावः । भजः कर्म्यादिकान् कदोरचिति अम्नतत्रय । भृशमत्यर्थं मानतं नम्रं शिरो दुः-खेनोवाह वहति स्म । वसंयोगाद्दित् किल्लाहवि सपीतत्रादिना संप्रसारणम् । हृतेऽपि भारे नतमिति विरोधः तदनुप्राणिता चेयं अवनतिहेतुत्वसाधर्म्यात् त्रपा भारत्वोत्प्रेक्षा ॥ ५७ ॥

स्पृशदिति । अहः करोतीत्यहस्करः सूर्यः । दिवाविभा निशेत्यादिना टप्रत्ययः कस्कादित्वात्सत्वम् । शुचौ समये ग्रीष्मकाले अनुपहते आचारे च स्थितोऽपि । शुचिः शुद्धे ऽनुपहते शृङ्गाराषाढयोरपि । ग्रीष्मे हुतवहेऽपि स्यादिति विश्वः । समया. सपथाचार कालसिद्धा-

कलासमग्रेण गृहानमुञ्चता
मनस्विनीरुत्कयितुं पटीयसा ।
विलासिनस्तस्य वितन्वता रतिम्
न नर्मसाचिव्यमकारि नेन्दुना ॥ ५९ ॥
विदग्धलीलोचितदन्तपत्रिका-
विधित्सया नूनमनेन मानिना ।

स्वर्बिन्दुरित्यमरः । अमलप्रभाभिः शङ्कितस्तारकाभिरित्यर्थः । करा-ग्रामनुना हस्ताग्रं चार्थे । बलिहस्तांशवः कराः इत्यमरः । सशङ्क-स्पृशन् अविश्वासभयादिति भावः । अथर्मा अनुध्या धर्मोदकबिन्दवः । स्वेदोदबिन्दवः । मन्थौदनेत्यादिना विकल्पादुदकशब्दस्योदादेशाभावः । तैरेव मौक्तिकैरस्य मधूरलङ्कारं चीभे तद्वयाचाधरन्तपलीतार्थः । अत्र प्रस्तु-तसूर्यविशेषणसाम्यादप्रस्तुतप्रसाधकप्रतीतेः समासोक्तिरलङ्कारः ॥५८॥

कलासमग्रेणेति । कलाभिः षोडशार्थैः शिल्पविद्याभिश्च समग्रेण सम्पूर्णेन । कला शिल्पे विकारस्त्री चन्द्रांशे कलने कलेति वैजयन्ती । गृहानमुञ्चता सदा तद्गृहेष्वेव वसता दण्डभयात् दोषाधर्मत्वाच्चेति भावः । मनस्विनीर्मानिनीरुत्का उत्सुका कर्तुं उत्कयितुम् । उत्क उन्मनाः इति निपातनादुत्कशब्दात्तत्करोतीति णिजन्तात् तुमुन् । पटीयसा मनोभेदपटु-रेणेत्यर्थः । पुनः रतिं वितन्वता चन्द्रिकादिमतोऽत्तिमिष रागं वर्द्धयता इन्दुना विलासिनो विलासशीलस्य । वौ कषलसेत्यादिना घिनुण् प्रत्ययः । तस्य राजपस्य नर्मसाचिव्यं क्रीडासख्यत्वाधिकारित्वे सचिवत्वम् । द्रवा क्रीडा च नर्म चेत्यमरः । नाकारीति न किन्तु कार्यं वेत्यर्थः । अनौचित्या-त्प्राप्तनर्मसाचिव्यनिषेधनिवारणार्थं नञ्द्वयम् । सम्भाव्यनिषेधनिरासे नञ्द्वयमिति वामनः । अत्रेन्दौ प्रतीतस्याप्रस्तुतेन नर्मसचिवेन चेत्र ॥ ५९ ॥

विदग्धेति । मानिना अहङ्कारिणा अनेन राजपेन विदग्धलीलापवर

न जातु वैनायकमेकमुद्धृतम्
विषाणमद्यापि पुनः प्ररोहति ॥६०॥
निशान्तनारीपरिधानधूनन
स्फुटागसाप्यूरुषु लोलचक्षुषः।

विलासिन्य इत्यर्थः। तासामुचिता या दन्तपत्रिका च कर्णभूषणानि विलासिनीविभ्रमदन्तपत्रिकेति साधीयान् पाठः। अन्यथा विभ्रमार्थप्रतीतिकल्पेन कष्टार्थदोषापत्तेः। कष्टं तदर्थावगमो दूरायत्तो भवेदिति लक्षणात्। विलासिनीनां या विभ्रमदन्तपत्रिका विभ्रमार्थानि यानि दन्तमयपत्राणि। विभ्रमदन्तशब्दयोः षष्ठीसमासपर्यवसानात् तादर्थ्यलाभः। तासां विधित्सया विधातुमिच्छया। विपूर्वाद्धधातेः सनि मिमीत्यादिना इकारः लोपोऽभ्यासस्येत्यभ्यासलोपः ततः स्त्रियामित्यनुवृत्तौ अप्रत्ययादित्यकारप्रत्यये टाप्। नूनं निश्चितं जातु कदाचिदपि। कदाचिज्जात्वित्यमरः। उद्धृतमुत्पाटितं विनायकस्य गणेशस्येदं वैनायकं एकं विषाणं दन्तः। विषाणं पशुशृङ्गे स्यात् क्रोडादिरददन्तयोरिति विश्वः। अद्यापि पुनर्न प्ररोहति न प्रादुर्भवति। प्रपूर्वात् रुह प्रादुर्भावे इत्यस्मात् लट्। किमन्यत्कार्य्यमस्येति भावः। एतदन्यथा कथं गजाननस्यैकदन्तत्वमुक्तं स्यादिति नूनमिति ॥६०॥

निशान्तेति। निशान्तं गृहं। निशान्तं गृहशान्तयोरिति विश्वः। तत्र याः नार्यः शुद्धान्तस्त्रियइत्यर्थः। तासां परिधानानि अन्तरीयाणि। अन्तरीयोपसंव्यानपरिधानान्यधोंऽशुक इत्यमरः। तेषां धूननं चालनम्। धूञोऽच्यन्तात् ल्युट् धूञ्प्रीञोर्नुग्वक्तव्य इति नुक्। तेन स्फुटागसा व्यक्तापराधेनापि अन्तःपुरद्रोहस्य महापराधत्वादिति भावः। ऊरुषु तासां सक्थिषु लोलचक्षुषः सतृष्णदृष्टेः। सक्थि क्लीबे पुमानूरुरिति लोलचलसतृष्णयोरिति चामरः। अतएव तस्य रावणस्य प्रियेषु प्रमोदास्पदभूतेन अङ्गीकृता स्वामिनि दोषा येति न्यायादिति भावः। प्रकम्पनेन वायुना अनपराधे अपराधाभावेऽपि बाधिताः राजपुरुषैरिति शेषः। द्वाराः अनुचरा अभिरे दोषप्रमादेनान्तः प्रविश्यानपराधबाधानिवेदनेन मोचयता वायुना।

प्रियेण तस्यानपराधबाधिताः
प्रकम्पनेनानुचकम्पिरे सुराः ॥ ६१ ॥
तिरस्कृतस्तस्य जनाभिभाविना
मुहुर्महिम्ना महसां महीयसाम् ।
बभार बाष्पैर्द्विगुणीकृतं तनु
स्तनूनपाद्धूमवितानमाधिजैः ॥ ६२ ॥
परस्य मर्म्माविधमुज्झतां निजम्
द्विजिह्वतादोषमजिह्मगामिभिः ।

अनुकम्पितादृतवन्तः । एकस्य वेदश्रवाद्बहवोजीवन्तीति भावः ॥ ६१ ॥

तिरस्कृतइति । किञ्च तस्य रावणस्य जनाभिभाविना लोकतिरस्कारि-रिणा महीयसामतिमहतां महसान्तेजसां महिम्ना महत्त्वेन । पृथ्वादिभ्य इमनिज्वेति इमनिच् । मुहुस्तिरस्कृतः अतएव तनुः कृशः तनुं न पातयति जाठररूपेण शरीरं धारयतीति तनूनपादग्निरिति स्वामी । नभ्राण्नपादित्यादिसूत्रेण निपातनान्नञो लोपाभावः । आधिजैर्दुःखोत्थैर्बाष्पैः निश्वासोष्मभिः । बाष्पौ नेत्रजलोष्मणोः । पुंस्याधिर्मानसी व्यथेति विश्वामरौ । द्वौ गुणा आवृत्ती यस्य स द्विगुणः । ततः च्विः । द्विगुणीकृतं द्विरावृत्तं । गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुष्विति वैजयन्ती । धूमवितानं धूममण्डलं बभार अग्निरपि तत्सन्निधौ निस्तेजस्को धूमायमान आसीदित्यर्थः । धूमद्वैगुण्यसम्बन्धे तदसम्बन्धाभिधानादतिशयोक्तिः ॥ ६२ ॥

परस्येति । किञ्च इदं दीप्तमुपमित्यर्थः । इन्धी दीप्तौ कर्त्तरि क्तः । तं रावणमाराधयितुं सेवितुं परस्य स्वेतरस्य मर्म्माणि हृदयादिजीवस्थानानि कुलाचारमतानि च विध्यति भिनत्तीति मर्माविधं । नि-व्यतेः क्विप् ग्रहिज्येति सम्प्रसारणं नहिवृतीत्यादिना पूर्व्वस्य दीर्घः । तन्मर्माविधं निजं स्वीयं द्विजिह्वतायां सर्पत्वे यो दोषो दंशस्तस्य

तमिद्धमाराधयितुं सकर्णकैः
कुलैर्न्न भेजे फणिनां भुजङ्गता ॥ ६३ ॥
तदीयमातङ्गघटाविघट्टितैः
कटस्थलप्रोषितदानवारिभिः।
गृहीतदिक्कैरपुनर्न्निवर्त्तिभि
श्चिराय याथार्थ्यमलम्भि दिग्गजैः॥६४॥

दिः तम्। अन्यत्र द्विजिह्वता पिशुनता। द्विजिह्वौ सर्पसू-चकावित्यमरः। सैव दोषस्तमुत्सृजतां त्यजतां फणिनां सर्वद्विभिरजि-ह्मगामिभिः करचरणादिमद्विपक्षधारित्वात् ऋजु गतिभिः अकपटचा-रिभिश्च तथा कर्णाभ्यां सह वर्त्तन्त इति सकर्णकाः तैश्चतुःश्रवस्त्वं विहा-याविष्कृतकर्णैरित्यर्थः। तेन सहेति तुल्ययोगे बहुव्रीहिः शेषाद्विभा-षेति कप्। अन्यत्र कर्णयति सर्वं शृणोतीति कर्णको नियन्ता। कर्ण-यतेर्ण्वुल्। तत पूर्ववत्समासे सकर्णकैः सनियामकैरित्यर्थः कुलैर्न्न भेजे भु-जङ्गता सर्पता विटत्वञ्च। भुजङ्गो विटसर्पयोरिति हलायुधः। न भेजे त्यक्ता भुजैर्गच्छन्तीति भुजङ्गाः। गमेः सुपि खच् च डिद्वा वाच्यः। तस्मिंश्चियन्तरि पक्षे खलत्वमपि सर्पत्वमपि विहाय वेषमात्रन्त्रि-याभिः सौम्यत्वं निर्मितमित्यर्थः। अत्र प्रस्तुतधर्म्मविशेषणसाम्यादप्रस्तु-तव्यवहारप्रतीतेः समासोक्तिः ॥ ६३ ॥

तदीयेति। तदीयमातङ्गानां घटाभिर्व्यूहैः विघट्टितैरभिहतैः। ग-जानां घटना घटेत्यमरः। अतएव कटस्थलेभ्यः प्रोषितान्यपगतानि दानवारीणि येषां तैः गृहीताः पलाय्य रक्षिता दिशो यैस्तैर्गृहीतदिक्कैः। शेषाद्विभाषेति कप्। अपुनर्न्निवर्त्तिभिर्भयात्तत्रैव स्थितैर्दिग्गजैः चिराय याथार्थ्यं दिक्षु स्थिता गजाः दिग्गजा इत्यनुगतार्थनामकत्वमलम्भि लब्धम्। लभेर्णिजन्तात्कर्म्मणि लुङ्। विभाषा चिण्-णमुलोरिति नुमागमः ॥ ६४ ॥

प्रियेण तस्यानपराधबाधिताः
प्रकम्पनेनानुचकम्पिरे सुराः ॥ ६१ ॥
तिरस्कृतस्तस्य जनाभिभाविना
मुहुर्महिम्ना महसां महीयसाम् ।
बभार बाष्पैर्द्विगुणीकृतं तनु-
स्तनूनपाद्धूमवितानमाधिजैः ॥ ६२ ॥
परस्य मर्माविधमुज्झतां निजम्
द्विजिह्वतादोषमजिह्मगामिभिः ।

अनुकम्पितावित्यर्थः । एकस्य वैदग्ध्याद्बहुशोभोज्जीवनीति भावः ॥ ६१ ॥

तिरस्कृत इति । किञ्च तस्य रावणस्य जनाभिभाविना लोकतिरस्कारिणा महीयसामतिमहतां महस्वतां तेजसां महिम्ना महत्त्वेन । इगुपधादिभ्य इमनिज्वेति इमनिच् । मुहुस्तिरस्कृतः अतएव तनुः कृशः तनुं न पातयति जाठररूपेण शरीरं धारयतीति तनूनपादग्निरिति स्वामी । नभ्राडित्यादिसूत्रेण निपातनान्नञो लोपाभावः । आधिजैर्दुःखोत्थैर्बाष्पैः निश्वासोष्मभिः । बाष्पौ नेत्रजलोष्माणोः । पुंस्याधिर्मानसी व्यथेति विश्वामरौ । द्वौ गुणावावृत्ती यस्य स द्विगुणः । ततश्च्विः । द्विगुणीकृतं द्विरावृत्तं । गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुष्विति वैजयन्ती । धूमवितानं धूममण्डलं बभार अग्निरपि तत्सन्निधौ निस्तेजस्को धूमायमान आसीदित्यर्थः । धूमद्वैगुण्यासम्बन्धे सम्बन्धाभिधानादतिशयोक्तिः ॥ ६२ ॥

परस्येति । किञ्च इद्धं दीप्तमुग्रमित्यर्थः । इन्धी दीप्तौ कर्त्तरि क्तः । तं रावणमाराधयितुं सेवितुं परस्य स्वेतरस्य मर्माणि हृदयादिजीवस्थानानि कुलाचारगतानि च विध्यति भिनत्तीति मर्माविद् । वि-ध्यतेः क्विप् ग्रहिज्येति सम्प्रसारणं नहिवृतीत्यादिना पूर्वस्य दीर्घः । सर्वमपि निजं स्वीयं द्विजिह्वतायां सर्पत्वे यो दोषो द्वैजिह्वता-

तमिद्धमाराधयितुं सकर्णकैः
कुलैर्न भेजे फणिनां भुजङ्गता ॥ ६३ ॥
तदीयमातङ्गघटाविघट्टितैः
कटस्थलप्रोषितदानवारिभिः ।
गृहीतदिक्कैरपुनर्निवर्त्तिभि
श्चिराय याथार्थ्यमलम्भि दिग्गजैः ॥६४॥

दिः तम् । अन्यत्र द्विजिह्वता पिशुनता । द्विजिह्वौ सर्पसू-
चकावित्यमरः । सैव दोषस्तमुज्झतां त्यजतां फणिनां सत्त्वभिरजि-
ह्मगामिभिः करचरणादिमद्विग्रहधारित्वात् ऋजु गतिभिः अकपटचा-
रिभिश्च तथा कर्णाभ्यां सह वर्त्तन्त इति सकर्णकाः तैश्चतुःश्रवस्त्वं विहा-
याविष्कृतकर्णैरित्यर्थः । तेन सहेति तुल्ययोगे बहुव्रीहिः शेषाद्विभा-
षेति कप् । अन्यत्र कर्णयति मन्त्रं शृणोतीति कर्णको नियन्ता । कर्ण-
यतेर्ण्वुल् ततः पूर्ववत्समासे सकर्णकैः सनियामकैरित्यर्थः कुलैर्वर्गैर्भु-
जङ्गता सर्पता विटत्वञ्च । भुजङ्गो विटसर्पयोरिति हलायुधः । न भेजे
त्यक्ता भुजैर्गच्छन्तीति भुजङ्गाः । गमेः सुपि खच् च डिद्वा वाच्यः ।
तमिद्धियनरि खलैः खलत्वमपि सर्पैः सर्पत्वमपि विहाय वेशमात्रक्रि-
याभिः सौम्यत्वं श्रितमित्यर्थः । अत्र प्रस्तुतधर्मविशेषणसाम्यादप्रस्तु-
तव्यवहार प्रतीतेः समासोक्तिः ॥ ६३ ॥

तदीयेति । तदीयमातङ्गानां घटाभिर्व्यूहैः विघट्टितैरभिहतैः । ग-
जानां घटना घटेत्यमरः । अतएव कटस्थलेभ्यः प्रोषितान्यपगतानि
दानवारीणि येषां तैः गृहीताः पलाय्य संश्रिता दिशो यैस्तैर्गृहीतदिक्कैः ।
शेषाद्विभाषेति कप् । अपुनर्निवर्त्तिभिर्भयात्तत्रैव स्थितैर्दिग्गजैः चिराय
याथार्थ्यं दिक्षु स्थिता गजाः दिग्गजा इत्यनुगतार्थनामकत्वमलम्भि
लब्धम् । लभेः कर्मणि लुङ् विभाषा
चिण्णमुलोर्नुमागमः ॥ ६४ ॥

अभीक्ष्णमुष्णैरपि तस्य सोष्मणः
सुरेन्द्रवन्दिश्वसितानिलैर्यथा ।
सचन्दनाम्भःकणकोमलैस्तथा
वपुर्जलार्द्रापवनैर्न निर्ववौ ॥ ६५ ॥

तपेन वर्षाः शरदा हिमागमो
वसन्तलक्ष्म्या शिशिरः समेत्य च ।
प्रसूनक्लृप्तिं दधतः सदर्त्तवः
पुरेऽस्य वास्तव्यकुटुम्बितां ययुः ॥ ६६ ॥

अभीक्ष्णमिति । उष्मणा मन्युज्वरेण सहितः सोष्मा तस्य सोष्मणस्तस्य रावणस्य वपुरभीक्ष्णं भृशमुष्णैरपि शोकादिति भावः सुरेन्द्रस्य बन्द्यः बन्दीकृताः स्त्रियः तासां श्वसितानिलैः निःश्वासमारुतैर्यथा निर्ववौ निर्वृतम् । निर्वाणं निर्वृतौ मोक्षे इति वैजयन्ती । तथा सचन्दनाम्भःकणाः चन्दनोदकबिन्दुसहिताः ते च ते कोमलाः मृदुलाश्च तैर्जलार्द्राणां जलोक्षिततालवृन्तानां पवनैर्न निर्ववौ । भुवित्रं तालवृन्तं स्यादुत्क्षेपव्यजनं च तत् । जलेनार्द्रं जलार्द्रं स्यादिति वैजयन्ती । अत्र सन्तप्तस्योष्णोपचारात्सिद्धिरिति कारणविरुद्धकार्योत्पत्तिरूपो विषमालङ्कारः ॥ ६५ ॥

तपेनेति । सदा नित्यं न तु यथाकालं प्रसूनक्लृप्तिं कुसुमसम्पत्तिम् । प्रसूनं कुसुमं सुमनमित्यमरः । दधतो धारयन्तः ऋतवो वर्षाः प्रावृट् तपेन ग्रीष्मेण । उष्ण उष्मागमस्तपः इति स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा अथ शरत् स्त्रियामिति चामरः । तथा हिमागमो हेमन्तः शरदा तथा शिशिरो वसन्तलक्ष्म्या च समेत्य मिथुनीभावेन मिलित्वा अस्य रावणस्य पुरे वसन्तीति वास्तव्याः वस्तारः । वसेस्तव्यत्कर्तरि णिच्चेति तव्यत्प्रत्ययः । ते च कुटुम्बिनश्च तेषां भावं तत्तां प्रतिपादितमित्यर्थः । ययुः समेत्य ययुरिति समुदाय समुदायिनोरभेदविवक्षया समानकर्तृत्वम् । अत्र पुरे

अमानवं जातमजं कुले मनोः
प्रभाविनं भाविनमन्तमात्मनः ।
मुमोच जानन्नपि जानकीं न यः
सदाभिमानैकधना हि मानिनः ॥ ६७ ॥
स्मरत्यदो दाशरथिर्भवन्भवा
नमुं वनान्ताद्वनितापहारिणम् ।

युगपत सर्वेषां सम्बन्धाभिधानादसम्बन्धे सम्बन्धरूपातिशयोक्तिः ॥६६॥

स चायमासन्नविनाशस्तथैव कृतइति युग्मेनाह । अमानव मिति । मनोरयं मानवः । तस्येदमित्यण्प्रत्यये पर्यवसानाज्जातावेकवचनं अन्यथा मनोर्जातिमित्येव स्यात् । अमानवममानुषं न जायतइत्यजं अन्येष्वपि दृश्य-तइति डप्रत्ययः । तथापि मनोः कुले जातं रामस्वरूपेणोत्पन्नमिति वि-रोधः । सचाभासत्वादलङ्कार इत्याह । प्रभाविनमिति महानुभावे त-स्मिंश्च कश्चिद्विरोध इति भावः । आभीक्ष्ण्ये णिनिरिति णिनिर्वा मत्वर्थीय भवन्नमिति शेषः आत्मनः स्वस्यान्तं करोतीति अन्तम् । अन्तशब्दात्तत्करोतीति ण्यन्तात्पचाद्यच् । भाविनं भविष्यन्तम् । भविष्यति गम्यादयः । जानन्नपि यो रावणः जनकस्यापत्यं स्त्री जानकी सीता तां न मुमोच नामुञ्चदित्यन्वयः जानतोऽपि अमोचने कारणमाह । मानिनः सदा प्राणात्ययेऽपि अभिमानएवैकं मुख्यं धनं येषां ते प्राणात्ययेऽपि न मानं मुञ्चन्तीत्यर्थः । कारणेन कार्यसमर्थन रूपोऽर्थान्तरन्यासः ॥ ६७ ॥

स्मरतीति । भातीति भवान् । भातेर्डवतु । दशरथस्यापत्यं पुमान् दाशरथि । अतइञितीञ्प्रत्ययः । भवन् रामः सन्नित्यर्थः । भवते-र्लटः शत्रादेशः वनान्तात् दण्डकारण्यात् वनितापहारिणं सीतापहर्त्तारं अमुं रावणम् । आवद्धप्रविरामाद्रिभिर्बद्धसेतु अतएव चलन्ति उत्तानि यस्य स च अतएव आविलं जातं आवद्धोच्छलज्जलाविलं पयोधिं

)

सतीव योषित् प्रकृतिः सुनिश्चला
पुमांसमभ्येति भवान्तरेष्वपि ॥ ७२ ॥
तदेनमुल्लङ्घितशासनं विधे
र्विधेहि कीनाशनिकेतनातिथिम्।
शुभेतराचारविपक्त्रिमापदो
निपातनीया हि सतामसाधवः ॥ ७३ ॥
हृदयमरिवधोदयादुदूढ
द्रढिम दधातु पुनः पुरन्दरस्य।

सता योषिदिव सुनिश्चला अतिस्थिरा प्रकृतिः स्वभावो भवान्तरेष्वपि पुमांसमभ्येति। पतिं या नाभिचरति मनोवाक्कायसंयता। सा भर्तृलोकानाप्नोति सद्भिः साध्वीति चोच्यते इति मनुः। उपमोपमेयपुरस्कृतोऽर्थान्तरन्यासः ॥ ७२ ॥

तदेनमिति। तत्तस्माद्विधेर्विधातुरपि उल्लङ्घितशासनं स्वयं विध तेल्यादाक-रीत्या तिक्रान्तदैवमित्यर्थः। सापेक्षत्वेऽपि गमकत्वात्समासः। एनं शिशुपालं कीनाशनिकेतनातिथिं कीनाशो यमः तस्य निकेतनं गृहं तत्र अतिथिं प्राघुणिकं विधेहि कुरु यमगृहं प्रेषयेत्यर्थः। कीनाशः कर्षके क्षुद्रे कृतान्तोपांशुघातिनोरिति विश्वः। न चैतत् प्राघुणिकहस्तेन सर्पमारणं भवादृशामन्य-त्कर्तव्यत्वादित्याह। शुभेतराचारेण दुराचारेण विपक्त्रिमा परिपाकेन निर्वृत्ताः कालपरिपाकेण प्राप्ता आपदो येषां ते तथोक्ताः। ड्वितः क्त्रिरिति पचेः क्त्रिप्रत्ययः। क्त्रेर्मम्नित्यमिति तद्धितो मप्प्रत्ययः। असाधवो दुष्टाः सतां भवादृशां जगन्नियन्तॄणां निपातनीया वध्या हि। न च नैर्घृण्यदोषः स्वदोषैरेव तेषां विनाशे निमित्तमात्रत्वादस्माकमित्याशयेन शुभेतराचारे-त्यादिविशेषणोक्तिः। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ७३ ॥

किञ्चैवं दत्तनिग्रहे शिशुपाले स्यादित्याह। हृदयमिति। अरिवधोदयादिगुणाभावात् उदूढ द्रढिमानं चिन्तात् धृतदार्ढ्यं स्वस्थमिति

घनपुलकपुलोमजाकुचाग्र
द्रुतपरिरम्भनिपीडनक्षमत्वम् ॥ ७४ ॥
ओमित्युक्तवतोऽथ शार्ङ्गिण इति व्याहृत्य वाचन्नभ
स्तस्मिन्नुत्पतिते पुरः सुरमुनाविन्दोः श्रियं बिभ्रति

यावत् । पृथ्वादित्वात् हृदयशब्दादिमनिच् प्रत्ययः । र ऋतो हलादेर्लघोरिति ऋकारस्य रेफादेशः पुरः शत्रुपुराणि दारयतीति पुरन्दरः इन्द्रः । पूःसर्व्वयोर्दारिसहोरिति खच् प्रत्ययः खचि ह्रस्व इति उपधाह्रस्वः वाचंयमपुरन्दरौ चेति निपातनाददन्तत्वं मुमागमश्च । तस्य हृदयं पुनर्भूयोऽपि पूर्व्ववदेवेति भावः घनपुलकयोः सान्द्ररोमाञ्चयोः पुलोम्नोजाता पुलोमजा शची तस्याः कुचाग्रयोः द्रुतपरिरम्भः औत्सुक्यात् शीघ्रालिङ्गनं तत्र यत्पीडनं तस्य क्षमत्वं सहत्वं दधातु प्राक् चित्तविक्षेपात्तत्सम्भोगेन मन्दोत्स सम्प्रति तत्प्रसादान्निष्कण्टकं स्वकीयं राज्यं भुञ्जतामित्यर्थः अत्र दार्ढ्यपदार्थस्योद्दृढहृदिमेति विशेषणगत्या निपीडनक्षमत्वं प्रति हेतुत्वोक्त्या पदार्थहेतुकं काव्यलिङ्गम् । हृदयनिपीडनक्षमत्वसम्बन्धेऽप्यसम्बन्धोक्त्या सम्बन्धेऽसम्बन्धरूपातिशयोक्तिरित्यर्थालङ्कारौ वृत्त्यनुप्रासश्च तैरन्योन्यं संसृज्यते । पुष्पिताग्रावृत्तम् । अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रेति लक्षणात् ॥ ७४ ॥

ओमिति । तस्मिन्सुरमुनौ नारदे इति इत्थम्भूतां वाचं व्याहृत्योक्त्वा नभ उत्पतिते समुद्गते पुरोऽग्रे इन्दोः श्रियं बिभ्रति सति अथ मुनिवाक्यानन्तरमोमित्युक्तवतस्तथास्त्वित्यङ्गीकृतवत । ओमग्र्येऽङ्गीकारे रोषे इति विश्वः । चेदीनां जनपदानामयं चैद्यः शिशुपालः वृद्धेत्कोसलाजादाञ्ञ्यङिति ञ्यङ् प्रत्ययः । तम्प्रति क्रुद्धस्य शार्ङ्गिणो वदने व्योम्नीवानिशं सर्व्वदा अव्यभिचारेणेत्यर्थः । शत्रूणां विनाशस्य पिशुन सूचकः । चन्द्रमभ्युत्थितं केतुः द्वितीयानां विनाशकृदिति शास्त्रादिति भावः । केतुरुत्पातविशेषः । केतुर्ध्रुवौ पताकायां पक्षोत्पातारिलक्ष्मसु इत्यमरः । भ्रुकुटिच्छलेन भ्रूभङ्गव्याजेनास्पदं प्रतिष्ठां स्थितिं चकार आस्पदं प्रतिष्ठायामिति निपातनात् सुडागमः । अनेन

शत्रूणामनिशं विनाशपिशुनः क्रुद्धस्य चैद्यम्प्रति
योम्नीव भ्रुकुटिच्छलेन वदने केतुश्चकारास्पदम्॥७५

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये
कृष्णनारदसम्भाषणं नाम प्रथमः सर्गः॥ १॥

वीररसप्रकारिणो रौद्रस्य स्थायी क्रोधः स्वानुभावेन भ्रुकुट्या कार्यभूतेनानुमेय इत्युक्तम्। तथा तदविनाभूतस्याङ्गिनो वीरस्य स्थायी प्रयत्नोपनेय उत्साहोऽप्युक्त एवेत्यनुसन्धेयम्। इन्दोः श्रियं बिभ्रति इत्यत्र मुनेरिन्दुश्रियोऽयोगात्तत्सदृशीमिति सादृश्याक्षेपादसम्भवद्वस्तुसम्बन्धरूपो निदर्शनालङ्कारः। वदने व्योम्नीवेत्युपमा। भ्रुकुटिच्छलेन केतुरिति छलादिशब्दैर्नासत्यत्वप्रतिपादनरूपोऽपह्नवः तत्र शत्रुविनाशसूचके त्वपेक्षितेन्दुसादिध्यव्योमावस्थानसम्पादकत्वे निदर्शनोपमयोरपह्नवोपकारकत्वादङ्गाङ्गिभावेन सङ्करः। चमत्कारकारितया मङ्गलाचरणरूपतया च सर्गान्त्यश्लोकेषु श्रीशब्दप्रयोगः यथाह भगवान् भाष्यकारः। मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते वीरपुरुषाण्यायुष्मत्पुरुषाणि च भवन्ति अध्येतारश्च प्रवक्तारो भवन्तीति। शार्दूलविक्रीडितं वृत्तम्। सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितमिति लक्षणात्। सर्गान्तत्वाद्वृत्तभेदः। यथाह दण्डी। सर्गैरनतिविस्तीर्णैः श्राव्यवृत्तैः सुसन्धिभिः। सर्वत्र भिन्नसर्गान्तैरुपेतं लोकरञ्जकमिति॥ ७५॥

अथ कविः कविकाव्यवर्णनीयाख्यानपूर्वकं सर्गसमाप्तिं कथयति इतीति। इतिशब्दः समाप्तौ माघकृताविति कवेर्नामकथनं महाकाव्ये इति महच्छब्देन लक्षणसम्पत्तिः सूचिता शिशुपालवध इति काव्यनामकथनं प्रथमः सर्ग इति समाप्त इति शेषः। एवमुत्तरत्रापि द्रष्टव्यम्।
इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते शिशुपालवधकाव्यव्याख्याने सर्वङ्कषाख्ये प्रथमः सर्गः॥ १॥

यियक्षमाणेनाहूतः पार्थेनाथ द्विषन्मुरम्।
अभिचैद्यं प्रतिष्ठासुरासीत्कार्य्यद्वयाकुलः ॥ १ ॥
सार्द्धमुद्धवसीरिभ्यामथासावासदत्सदः ।
गुरुकाव्यानुगां बिभ्रच्चान्द्रीमभिनभः श्रियम्॥२

अस्मिन्सर्गे मन्त्रवर्णनाय बीजं वपति । यियक्षमाणेनेति । अथेन्द्रसन्देशश्रवणानन्तरं यियक्षमाणेन यष्टुमिच्छता । यजतेः सन्नन्ताल्लटः शानच् । पार्थेन पृथापुत्रेण युधिष्ठिरेण । तस्यैदमित्यण् अन्यथा ङीष्प्रसङ्गः स्यात् । आहूत आकारितः । ह्वयतेः कर्मणि क्ते सम्प्रसारणदीर्घौ । तथा अभिचैद्यं शिशुपालं प्रति । चैद्यमभि-लक्ष्यीकृत्याभिमुखमव्ययीभावः अभिरभागे इति कर्मप्रवचनीयत्वे तद्योगे द्वितीया वा । प्रतिष्ठासुः प्रस्थातुमिच्छुः । तिष्ठतेः सन्नन्तादुप्रत्ययः । मुरं द्विषन्मुरारिः । द्विषोऽमित्रे इति शतृप्रत्यये द्विषः षष्ठ्या वेति वैकल्पिकः षष्ठीप्रतिषेधः । कार्य्यद्वयेन क्रतुकार्य्यचैद्यकार्य्यरूपेणाकुलोऽभूदि-ति [illegible] द्वयोः [illegible] इति भावः ॥ १ ॥

तदा [illegible] मन्त्रोचितं देशमाह । सार्द्धमिति । अथ [illegible] असौ हरिः अभिनभः । [illegible] कर्म्मप्रवचनीयत्वे वा द्वितीया । गुरुकाव्यौ [illegible] शुक्रानुगतां [illegible] [illegible] । [illegible] । [illegible] [illegible] ॥ २ ॥

जाज्वल्यमाना जगतः शान्तये समुपेयुषी ।
व्यद्योतिष्ट सभावेद्यामसौ नरशिखित्रयी ॥३ ॥

रत्नस्तम्भेषु सङ्क्रान्तप्रतिमास्ते चकाशिरे ।
एकाकिनोऽपि परितः पौरुषेयवृता इव ॥ ४ ॥

अध्यासामासुरुत्तुङ्गहेमपीठानि यान्यमी ।
तैरूहे केशरिक्रान्तत्रिकूटशिखरोपमा ॥ ५ ॥

जाज्वल्यमानेति । जगतः शान्तयेऽनुपद्रवाय समुपेयुषी मिलिता जाज्वल्यमाना भृशं ज्वलन्ती । धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ततो लटः शानजादेशे टाप् । असौ नरा पुरुषा एव शिखिनोऽग्नयस्तेषां त्रयी । द्वित्रिभ्यामित्यादिना अयचायजादेशे कृते टिड्ढाणञित्यादिना ङीप् । सभा आस्थानी सैव वेदिः । वेदिः परिष्कृता भूमिरित्यमरः । तस्यां व्यद्योतिष्ट दीप्यते स्म । द्युद्भ्यो लुङीत्यभावे तङ् । रूपकालङ्कारः ॥ २ ॥

रत्नेति । रत्नानां स्तम्भाः । इति षष्ठीसमासः विशेषे पर्यवसानाद् विकारार्थत्वम् । तेषु सङ्क्रान्तप्रतिमाः सङ्क्रान्तप्रतिबिम्बाः । प्रतिमानं प्रतिबिम्बं प्रतिमेत्यमरः । ते त्रयः एकाकिनोऽसहाया अपि । एकादाकिनिच्चासहाय इत्याकिनिच् प्रत्ययः । परितोऽभितः सर्वतः पर्यभिभ्यां चेति तसिल् प्रत्ययः स च सर्वोभयार्थाभ्यामिष्यते । पौरुषेयेषु प्रतिबिम्बभूतत्वात् । पुरुष समूहेनावृता इवेत्युत्प्रेक्षा । चकाशिरे । शर्ङ्कृपाभ्यां पाठजौ । पुरुषाद्वधविकार समूहतेन कृतेष्विति वक्तव्यमिति समूहे ठञ् प्रत्ययः । एतेन विजनत्व मुक्तम् । यद्यपि निस्तम्भे निर्गवाक्षे निर्भित्त्यन्तर संश्रये । प्रासादापि तादृशे वा मन्त्रवेश्माभाविमिति श्रीमदरण्यकीये मन्त्रभूमेः स्तम्भप्राचुर्य्य निषेधो गम्यते । तथापि तस्यापि विजनोपलक्षणत्वाद्दोष इति भावः ॥ ४ ॥

अध्यासामासुरिति । अमी त्रयो यान्युत्तुङ्गहेमपीठानि आसनानि

गुरुद्वयाय गुरुणोरुभयोरथ कार्य्ययोः ।
हरिर्विप्रतिषेधन्तमाचचक्षे विचक्षणः ॥ ६ ॥
द्योतितान्तःसभैः कुन्दकुड्मलाग्रदतः स्मितैः ।
स्नपितेवाभवत्तस्य शुद्धवर्णा सरस्वती ॥ ७ ॥

भवद्भिरामवसरप्रदानाय वचांसि नः ।
पूर्वरङ्गप्रसङ्गाय नाटकीयस्य वस्तुनः ॥ ८ ॥
करदीकृतभूपालो भ्रातृभिर्जित्वरैर्द्विषाम् ।

कार्यविप्रतिपत्तिं निवेद्य तत्र स्वमतमावेदयिष्यन् पण्डितमानित्वं तावत्परिहरति । भवद्भिरामिति । भवद्भिः युष्माभिः हार्यां अवसरप्रदानाय प्रसङ्गायेत्यर्थः नोऽस्माकं वचांसि सिद्धान्तोपन्यासार्थमुच्यन्ते न तु सिद्धान्तत्वेनेत्यर्थः । तथाहि । पूर्वं रज्यतेऽस्मिन्निति पूर्वरङ्गः नाट्यशाला तत्स्थं कर्मापि पूर्वं रङ्ग इति दशरूपके । अतः पूर्वरङ्गो नाम रङ्गप्रधानस्योरङ्गविघ्नोपशान्तिकारी नान्दीपाठगीतवादित्राद्यनेकाङ्गविशेषो नाट्यादौ कर्त्तव्यः कर्मविशेषः । तदुक्तं वसन्तराजीये । यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये । कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः प्रकीर्त्तित इति । स पूर्वरङ्गो नाटके भवं नाटकीयं तस्य वस्तुन इत्यर्थः । वृद्धाच्छः तस्यायनेतीयादेशः । तस्य वस्तुनः प्रविष्टस्य प्रसङ्गाय प्रसञ्जनाय प्रवर्त्तनायेति यावत् । अत्र प्रथमवादो न दोषायेति भावः । पूर्वरङ्गः प्रस्तावनेति रङ्गराजः सञ्चिन्त्यम्, पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते । प्रविश्य तद्वदपरः काव्यमास्थापयेन्नटः । प्रथमं पूर्वरङ्गश्च ततः प्रस्तावनेति च । आरभ्य सर्वनाट्यानामेतत्सामान्यमिष्यत इति दशरूपकाद्युक्तभेदविरोधादिति । अत्र हरिवाक्यपूर्वरङ्गयोः प्रसङ्गकत्वस्वरूपसामान्यस्य वाक्यद्वये शब्दान्तरेण पृथङ्निर्देशात्प्रतिवस्तूपमालङ्कारः तल्लक्षणं तूक्तम् ॥ ८ ॥

सम्प्रति स्वमतमाह । करदीकृतेति । द्विषां जित्वरैः जयनशीलैः । इण्नशजिसर्तिभ्यः क्वरप् तद्योगात्कर्मणि षष्ठी । भ्रातृभिर्भीमादिभिर्हेतुभिः करदाः षष्ठभागप्रदाः । भागधेयो बलिः कर इत्यमरः । ततः च्विः ऊर्यादिच्विडाचश्चेति गतिसंज्ञायां कुगतिप्रादय इति नित्यसमासः । अकरदाः करदाः सम्पद्यमानाः कृताः करदीकृता-
यस्य सः करदीकृतराजमण्डलः तथा, धर्मो धर्मपुत्रः । तथा-

विनाप्यस्मदलम्भूष्णुरिज्यायै तपसः सुतः ॥ ९ ॥
उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता ।
समौ हि शिष्टैराम्नातौ वर्त्स्यन्तावामयः स च ॥१०॥
न दूये सात्वतीसूनुर्यन्मह्यमपराध्यति ।

[illegible] लोकान्तरेऽपि चेति विश्वः । अस्मद्विना अस्माभि-
र्विनापीत्यर्थः । पृथग्विनानानेत्यादिना तृतीयाविकल्पात्पञ्चमी । इज्यायै
यागाय । यजेर्भावे क्यप् । वचिस्वपीत्यादिना सम्प्रसारणं । भुवः स्नुरित्या-
दिना [illegible] । [illegible] भूष्णुर्भविष्णुर्भवितेत्य-
मरः । ग्लाजिस्थश्च ग्स्नुः प्रत्ययः । क्ङिति चेत्यस्य गकारप्रश्लेषान्न गुणा-
भावः । तथा च जयादित्यः तत्रैव गकारोऽपि च [illegible] निर्दिश्यते ।
[illegible] भावः ॥ ९ ॥

ननु [illegible] । उत्तिष्ठमान-
इति । उत्तिष्ठमानो वर्धमानः । उदोऽनूर्ध्वकर्मणीत्यात्मनेपदं । परः
शत्रुः [illegible] नोपेक्ष्यो नो-
दासीन्येन द्रष्टव्यः [illegible] । अतः
[illegible] ।
[illegible] । [illegible] । न मनुष्य
[illegible] ।
[illegible] ।
[illegible] ॥ १० ॥

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

यत्तु दन्दह्यते लोकमदो दुःखाकरोति माम् ॥११॥
मम तावन्मतमिदं श्रूयतामङ्ग वामपि ।
ज्ञातसारोऽपि खल्वेकः सन्दिग्धे कार्यवस्तुनि ॥१२॥
यावदर्थपदां वाचमेवमादाय माधवः ।
विरराम महीयांसः प्रकृत्या मितभाषिणः ॥१३॥
ततः सपत्नापनयस्मरणानुशयस्फुरा ।

आत्मकर्त्तरि लट् । उत्तमपुरुषैकवचनं । किन्तु लोकं दन्दह्यते गर्हितं यथा स्यात्तथा दहतीति यङ् । लुपसदचरजपेत्यादिना गर्ह्यायां यङ् । जपजभदहदशभञ्जपशां चेत्यभ्यासस्य नुमागमः । यदसावलोकदहनं सा दुःखाकरोति दुःखमनुभावयतीत्यर्थः । दुःखात्प्रातिलोम्ये इति डाच् प्रत्ययः । अतश्चैद्यवधाभियातव्यः पार्थस्तु प्रार्थनयापि पश्चात्साधनीय इत्यर्थः ॥११॥

स्वमतं निगमयन्परमतं शुश्रूषते इत्याह । ममेति । तावद्भवन्मत-श्रवणपर्यन्तमित्यर्थः मम मतमिदम् । अङ्गेत्यामन्त्रणेऽव्ययम् । अथ सम्बोधनार्थकाः स्युः प्याट् पाडङ्ग हे है भोरित्यमरः । वां युवयोः । युष्मदस्मदोः षष्ठीचतुर्थीत्यादिना वामादेशः मतं श्रूयताम् । विधौ लोट् । तदिदं मया श्रोतव्यमन्यथा सन्देहानिवृत्तेरिति भावः । विदुषस्ते कुतः सन्देह इत्यत आह । ज्ञातसारः ज्ञाततत्त्वार्थोऽप्येकः एकाकी कार्यवस्तुनि कर्त्तव्यार्थे सन्दिग्धे संशेते खलु निश्चये अतो मयापि सन्दिह्यत इत्यर्थः । दिह उपचये कर्त्तरि लट् मतधर्य । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ १२ ॥

यावदिति । माधवो हरिर्यावान् यावदर्थम् । यावदवधारणे इत्यव्ययीभावः । यावदर्थं पदानि यस्यास्तां अभिधेयसम्मिताक्षरामित्यर्थः । एवमुक्तप्रकारेण वाचमादाय गृहीत्वा उक्त्वेत्यर्थः विरराम तूष्णी-

ओष्ठेन रामो रामौष्ठबिम्बचुम्बनचुञ्चुना ॥ १४ ॥
विवर्चितामर्थविद्भिस्तत्क्षणप्रतिसंहृताम् ।
प्रापयन्पवनव्याधेर्गिरमुत्तरपक्षताम् ॥ १५ ॥
घूर्णयन्मदिरास्वादमदपाटलितद्युती ।

माष । घाङ् परिभ्योरमदति मरस्मैपदम् । ततोहि मद्दीयांसः उ-
त्पन्नाः प्रहत्वा मितमाभिगः । द्द्यालापनिषेधादिति भावः पूर्ववद-
लङ्कारः ॥ १२ ॥

कथाप्रभिः कुलकेन रामं वर्णयन्नाह अमतारयति । तत इति ।
ततोरामो जगाटेन्दु सदेवान्वयः । सप्तमोरिपुः । रिपुवैरिसपत्नारीत्य-
मरः । तस्मादनयोऽपकार तस्य स्मरणेन योऽनुशयः पश्चात्तापः । अवे-
दनुशयोर्द्वेषे पश्चात्तापानुबन्धयोरिति विश्वः । तेन स्फुरतीति स्फुरत्-
स्फुरं तेन स्फुरता ओष्ठो बिम्बमिवेत्युपमितसमासः । रामायाः ओष्ठ-
बिम्बस्य चुम्बनेन वित्तो रामौष्ठबिम्बचुम्बन चुञ्चुस्तेन विनयकुश्यप् चणमा-
विति चुञ्चुप्रत्ययः ओष्ठोष्ठयोः समासे वा पररूपं वक्तव्यम् । तेनौष्ठेनो-
पलक्षित समरसुरतयोः समस इति भावः । उपमानुप्रासयोः सं-
सृष्टिः ॥ १४ ॥

विवर्चितामिति । विवर्चितां यस्त्वानिमानाद्वपो वक्तुमिष्टाम् । पश्चे-
न्दु ओष्ठ पवनात्मकर्मेण न । तत्क्षणे विरताधरे एव स्वविश्वासोक्तिः
प्रतिसंहृतां रामानुरोधादनुक्तां अर्थविद. कार्यज्ञ अतएव पवनव्याधे-
र्हनुमतः गिरमुत्तरपक्षतां सिद्धान्तपक्षतां प्रापयन् स्वपक्षतत्त्वावलम्बि-
त्वादिति भावः । अनेन रामस्य नयता उक्ता ॥ १५ ॥

घूर्णयन्निति । इमं. मदिरास्वादेन मद्यपानेन योमदस्तेन पाट-
लिता ईषद्रक्तीकृता द्युतिर्ययोस्ते रेखा रेखाः सन्ते पर्यस्तिं कटाक्षेण-
रामस्यादि परिशुष्यमप्रलुप्तमिति भावः । तेन परितो यो उटे
पदोक्तो समौ घूर्णयन् परमदादिति कटाक्षप्रकारोक्तिः । उत्प्रेक्षानिरे-

रेवतीवदनोच्छिष्टपरिपूतपुटे दृशौ ॥ १६ ॥
आश्लेषलोलुपवधूस्तनकार्कश्यसाक्षिणीम् ।
म्लापयन्नभिमानोष्णैर्वनमालां मुखानिलैः ॥१७॥ ॥
दधत्सन्ध्यारुणव्योमस्फुरत्तारानुकारिणीः ।
द्विषद्द्वेषोपरक्ताङ्गसङ्गिनीः स्वेदविप्रुषः ॥ १८ ॥
प्रोल्लसत्कुण्डलप्रोतपद्मरागदलत्विषा ।

त्यल । रतिकाले मुख स्त्रीणां शुद्ध माखेटके शुनामिति स्मरणात् । उच्छिष्टस्य प विशुद्धजनकत्वविरोधस्याभावत्वाद्विरोधाभासोऽलङ्कार । आभासत्वे विरोधस्य विरोधाभासउच्यतद्दति लक्षणात ॥ १६ ॥

आश्लेषेति । पुनराश्लेषलोलुपाया आलिङ्गनलुब्धाया वध्वा स्तनयो' कार्कश्यस्य काठिन्यस्य साक्षिणी उपद्रष्ट्रीं नितरां पीड्यमाना मिति भाव । साक्षाद्द्रष्टरि सज्ञायामिति साक्षाच्छब्दादिनि प्रत्यय । वनमालामभिमानोष्णैरहङ्कारतप्तैर्मुखानिलै निश्वासमारुतैर्म्लापयन् ग्लापयन् । म्लायतेर्ण्यन्ताल्लट शत्रादेश आदेच इत्यात्वे पुगागम' । अम्लाने म्लानसम्बन्धादतिशयोक्ति ॥ १७ ॥

दधदिति । पुन सन्ध्ययारुणे व्योम्नि स्फुरन्तीस्तारा अनुकुर्वन्तीति तथोक्ता कुत द्विषत शत्रोर्द्वेषेण क्रोधेनोपरक्ते अङ्गे वपुषि सङ्गिनो सक्ता स्वेदविप्रुष स्वेदबिन्दून् । पृषन्ति बिन्दु पृषता पुमासो विप्रुष स्त्रिय इत्यमर । दधद्धान । नाभ्यस्ताच्छतुरिति नुमभाव । उपमालङ्कार ॥ १८ ॥

प्रोल्लसदिति । पुन प्रकर्षेणोल्लसता कुण्डलयो प्रोताना स्यूताना पद्मरागदलाना माणिक्यशकलानांत्विषा कान्त्या । प्रोतेति प्रपूर्वाद्वेञ कर्मणि क्त यजादित्वात्सम्प्रसारण । लम्बोत्तरासङ्गोनीशोत्तरीयम । द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा सम्यानमुत्तरीयञ्चेत्यमर' । नस्य इव चूतपल्लवसेना

कृष्णोत्तरासङ्गरुचं विदधच्चौतपल्लवीम्॥१९॥
ककुद्मिकन्यावक्त्रान्तर्वासलब्धाधिवासया।
मुखामोदं मदिरया कृतानुव्याधमुद्वमन्॥२०॥
जगाद वदनच्छद्मपद्मपर्यन्तपातिनः।

चौतपल्लवीं विदधत् कृष्णलोहितमिश्रवर्णचूतपल्लववद्रक्तां कुर्वन्नित्यर्थः। धूम्रधूमलौ कृष्णलोहिते इत्यमरवचनात्। अत्रान्यस्यान्यदीयत्वायोगात् सादृश्याक्षेपेण निदर्शनालङ्कारः॥१९॥

ककुद्मीति। एवं ककुद्मिकन्याया रेवत्या वक्त्रस्यान्तः अभ्यन्तरवासेन स्थित्या लब्धोऽधिवासो वासना यया तया तन्मुखसौरभवासितयेत्यर्थः। संस्कारो गन्धमाल्याद्यैरधिवासनमुच्यते। मदिरया कृतानुव्याधं कृतसंसर्गं श्रियागाढं पुनरुत्थितमित्यर्थः। व्यधजपोरनुपसर्गे इत्यनुपसृष्टादप्प्रत्ययविधानादुपसृष्टाद्व्यधेर्घञ् प्रत्ययः। मुखामोदं मुखगन्धविशेषम् आमोदः सोऽतिनिर्हारीत्यमरः। उद्वमन् उद्गिरन्। अत्र मदिरारामयोर्गन्धयोः रागप्रतिरोधानेन रामामुखगन्धस्यैव स्फुटमनुभूयमानत्वात् तद्गुणयोस्तयोस्तस्यात्मविशेषकत्वेन पूर्वमपेक्षणादङ्गाङ्गिभावेन सङ्करः। तद्गुण अतद्गुणयोगाद्वत्स्वोत्कृष्टगुणाङ्गीकारस्तद्गुण इति लक्षणात्॥२०॥

जगादेति। वदनमेव छद्म कपटं यस्य तत् पद्मं वदनमेव पद्ममित्यर्थः। छद्मशब्देनान्यस्य प्रतिपादनात् अपह्नवः। तस्य पर्यन्तपातिनः प्रान्तसञ्चारिणः। मधु लिहन्तीति मधुलिहः तान् मधुपान् द्विरुक्तैः उद्विग्नैः [illegible] धारयन् सन् जगाद [illegible]॥

[illegible] रामोऽजगदेवमुक्ति वदितौ [illegible]। वदतीति। [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible]। [illegible] [illegible]

चिरं न सहते स्थातुं परेभ्यो भेदशङ्कया ॥२९॥
आत्मोदयः परग्लानिर्द्वयं नीतिरितीयती ।
तदूरीकृत्य कृतिभिर्वाचस्पत्यं प्रतायते ॥ ३० ॥
तृप्तियोगः परेणापि महिम्ना न महात्मनाम् ।

शङ्कया चिरं स्थातुं विलम्बितुमित्यर्थः न सहते न क्षमः । शकधृषेत्यादिना तुमुन्प्रत्ययः । अतो न विलम्बितव्यमन्यथा मन्त्रभेदे कार्यहानिः स्यादिति भावः ॥ २९ ॥

किञ्च नीतिमार्गस्य पर्यालोचनयापि न विलम्ब्य कार्यमित्यभिप्रेत्याह आत्मोदय इति । आत्मन उदयो वृद्धिः परस्य शत्रोर्ग्लानिर्हानिः । ग्लाज्याहाज्वरीभ्यो निरित्यौणादिको निप्रत्ययः । इति इयं इदं परिमाणमस्या इति इयती एतावती । किमिदंभ्यां वो घ इति वतुपो वस्य घः उगितश्चेति ङीप् । नीतिः नीतिशब्दः एतद्द्वयातिरिक्तो न कश्चिन्नीतिपदार्थोऽस्तीत्यर्थः । यदन्यत् षाड्गुण्यादिकं तत्सर्वमनयोरेव प्रपञ्च इत्यर्थः । तदिति । तद् द्वयमूरीकृत्याङ्गीकृत्य उरीकृतमुररीकृतमङ्गीकृतमित्यमरः । ऊर्यादिच्विडाचश्चेति गतिसंज्ञायां कुगतिप्रादय इति समासे क्त्वो ल्यप् । कृतिभिः कुशलैः वाचस्पत्यं वाग्मित्वम् । कस्कादित्वादलुक् सत्वे षष्ठ्याः पतिपुत्रेत्यादिना षत्वनिति स्वामी तस्य भावः वाचस्पत्यं ब्राह्मणादित्वात् भावे ष्यञ् प्रत्ययः । प्रतायते विस्तार्यते कर्मणि लट् तनोतेर्यकीत्यात्वम् । तस्मादात्मोदयार्थिभिः अविलम्बात् शत्रुरुच्छेत्तव्य तत्रान्तरीयमात्रमेवेति भावः ॥ ३० ॥

ननु लब्धोदयस्य किं परोच्छित्त्येत्याह । तृप्तियोग इति । महीयसां महात्मनां परेणापि प्रभूतेनापि महिम्ना ऐश्वर्येण तृप्तियोगः सन्तोषसम्भवो नास्ति अतः प्रवृद्धैरपि शत्रुच्छेदे उद्यन्तव्यमिति भावः । महार्णवोऽप्यत्र दृष्टान्तोऽभिमतः इत्यन्योक्तिदर्शनम् उपमानमिति यावत् राजा उदधिरिव परवृद्धिं न सहते । अन्यथा हि शशी महा

पूर्णश्चन्द्रोदयाकाङ्क्षी दृष्टान्तोऽत्र महार्णवः । ३१

सम्पदा सुस्थिरम्मन्यो भवति स्वल्पयापि यः ।
कृतकृत्यो विधिर्मन्ये न वर्द्धयति तस्य ताम् ।३२।

समूलघातमघ्नन्तः परान्नोद्यन्ति मानिनः ।
प्रध्वंसितान्धतमसस्तत्रोदाहरणं रविः ॥ ३३ ॥

समुदाय महीभुजः । स्वच्छा रश्मिका महा निर्ऋत्या च तुल्याङ्गनेति न्यायादिति भावः । नायं दृष्टान्तालङ्कारः, बिम्बप्रतिबिम्बभावेनौपम्यस्य गम्यत्वे तस्योत्थानात् । किन्तु दृष्टान्तशब्देन तस्याभिधानादुपमालङ्कारः । अतएव दृष्टान्तोदाहरणनिदर्शनरूपाः शब्दा न प्रयोक्तव्याः पौनरुक्त्यापत्तेरित्यालङ्कारिकाः ॥ ३१ ॥

तथापि यत्नोऽयं दोषमाह । सम्पदेति । यः स्वल्पयापि सम्पदा सुस्थिरमात्मानं मन्यत इति सुस्थिरम्मन्यः स्वस्थमानी भवति । आत्ममाने खश्चेति खश्प्रत्यये मुमागमः । तस्याल्पसन्तुष्टस्य तां स्वल्पसम्पदं कृतकृत्य इवेति कृतार्थं विधिर्दैवमपि न वर्द्धयति वृद्धिं नेति मन्ये पौरुषहीने दैवमपि न सुगुणमिति तात्पर्यं परमर्द्धिप्राप्तिरिति भावः ॥ ३२ ॥

किञ्च पराभवस्य प्रत्नोदयो नास्तीत्याह । समूलेति । मानिनः अभिमानिनः परान् शत्रून् समूलं कृत्वा समूलघातम् । अघ्नन्तः समूलमहत्वेत्यर्थः । समूलाकृतजीवेषु हन्कृञ्ग्रह इति णमुल् प्रत्ययः, कषादिषु यथाविध्यनुप्रयोग इति हन्तेरनुप्रयोगः । नोद्यन्ति नोदयं प्राप्नुवन्ति, तत्र तस्मिन्नर्थे प्रध्वंसितान्धतमसो रविरुदाहरणं दृष्टान्तः । अन्धं करोतीत्यन्धं तच्च तत्तमश्चान्धतमसम् । अवसमन्धेभ्यस्तमस इत्यच् समासान्तः । यावत्कर्तव्यं तावत्कृतं सर्वं तदुदयप्रतिबन्धकं तमो नैव हन्ति तावन्नोदेतीति भावः । दृष्टान्तरूपेण दृष्टान्तं प्रदर्शयति दृष्टान्तोऽत्र महार्णव इतिवदत्र रविरिति दृष्टान्तः ॥ ३३ ॥

विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा।
अनीत्वा पङ्कतां धूलिमुदकं नावतिष्ठते ॥ ३४ ॥
ध्रियते यावदेकोऽपि रिपुस्तावत्कुतः सुखम्।
पुरः क्लिश्नाति सोमं हि सैंहिकेयोऽसुरद्रुहाम् ॥ ३५ ॥
सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्य्यतः।

किञ्चाहत्य शत्रून् प्रतिष्ठैव दुर्घटेत्याह । विपक्षमिति । विपक्षं शत्रुमखिलीकृत्य । खिलमवशेषमकृत्वा अनुन्मूल्येत्यर्थः प्रतिष्ठा दुर्लभा खलु । तथाहि उदकं कर्तृ धूलिं खुरविभाविनीमिति भावः । पङ्कतामनीत्वा नाप कृत्वेत्यर्थः नावतिष्ठते किन्तु नीत्वैव तिष्ठतीत्यर्थः । समस्तविशेष्य स्पष्टतयाक्षेपदम् । वाक्यभेदेन प्रतिबिम्बभावेनो दृष्टान्तालङ्कारः ॥ ३४ ॥

नन्वयं शिशुपाल एकाकी न किं करिष्यतीत्याशङ्क्याह । ध्रियत इति । एकोऽपि रिपुर्यावत् ध्रियते अवतिष्ठते । धृङ् अवस्थाने इति धातोर्लौदादिकात्कर्तरि लट् रिङ् शयग्लिङ्क्षु इति रिङादेशः । तावत्तदवधि सुखं । कुतः यावत्तावच्च साकल्येऽवधाविति अमरः । तथाहि सिंहिकाया अपत्यं पुमान् सैंहिकेयो राहुः । तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुद इत्यमरः । स्त्रीभ्यो ढक् । असुरद्रुहां देवानां पुरः अग्रे सोमं क्लिश्नाति बाधते । प्राचुर्यात् सोमपदग्रहणं सूर्यं चेति भावः । तस्मादेकोऽपि शत्रुरच्छेद्य इति भावः । अत्र शेषकथनाक्षेप शत्रोः शेषं न शेषयेदिति तात्पर्यं । विशेषेण सामान्य समर्थनरूपोऽर्थान्तरन्यासः ॥ ३५ ॥

ननु क्षुद्रोऽयं चैद्य किं नः करिष्यतीत्याशङ्क्य तस्य बलवत्त्वं शत्रुमित्रामित्रबलाबलविवेकं तावत्करोति । सखेति । क्रियया उपकारापकारान्यतरलक्षणया निर्वृत्त कृत्रिमः । ड्वितः क्त्रिः क्त्रेर्मम्नित्यम् । सखा सुहृत् शत्रुश्च तौ कृत्रिमौ गरीयान् गुरु किं यतस्तौ कृत्रिमौ अत्र कार्यतः का-

स्यातामभिव्रे मित्रौ च सहजप्राकृतावपि ॥३७॥
उपकर्त्रारिणा सन्धिर्न मित्रेणापकारिणा ।
उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ॥३७॥
त्वया विप्रकृतश्चैद्यो रुक्मिणीं हरता हरे ।।

यतः उपकारापकाररूपकार्यवशात् निर्दिष्टाविति शेषः। उभयोर्मध्येऽपि माधेयोऽव्यतिक्रमनपायादनयोर्मित्रामित्रभावोऽपि ध्वनपायीति गरीयांस्त्व-मिति भावः। सहजप्राकृतौ तु नैवमित्याह । स्यातामिति । सहजातः सहजः एकशरीरावयवत्वात् तत्र मित्रं मातृष्वसेयपितृष्वस्रेयादि सहज-शत्रुस्तु पितृव्यतत्सुतादिः प्रकृत्या सिद्धः प्राकृतः पूर्वोक्तसहजकृत्रिमल-क्षणरहित इत्यर्थः। तत्र विषयान्तरः प्राकृतः शत्रुः तदनन्तरः प्राकृतं मित्रं अपि स्वेच्छैतौ सहजप्राकृतौ शत्रुमित्रे च स्यातां तात्कालिककार्य-वशादनियमेनोभयरूपतामापद्येते न कृत्रिमशत्रुमित्रे कृत्रिमः शत्रुः शत्रु रेव मित्रं च मित्रमेवेति कृत्रिमाविमौ स्थिरामित्रौ गरीयांसौ न तु सहजौ नापि प्राकृतावित्येवं कृत्रिमत्वं प्रबलमिति भावः ॥ ३६ ॥

एवं चेदयं चैद्यस्त्वेदः क्रिमनाद्य सहजमित्रत्वात्स्यान्नो न तु दानस्य रन्ध्र इत्याह । उपकर्त्रेति । उपकर्त्रा उपकारकारिणा अरि-णापि सहजेन प्राकृतेन वेति शेषः सन्धिः कार्यः अन्योपकारेण कृत्रि-मत्वापादनात् बलीयस्त्वं प्राकृतोऽनर्थिस्थानसमीकरणवर्धनादिति भावः । अपकारिणा मित्रेणापि सहजेन प्राकृतेन वेति शेषः सन्धिर्न कार्यः मित्रापकारेण कृत्रिम शत्रुत्वापादनात् दानस्थिरमैत्रीत्वाभावादलदला-दिति भावः । ननु भावाद्भिया कथन्तात् मित्रेण कथं विरुद्धाचरिता-इत्यत्र विपक्षा त्वयैवेत्युक्तादवयोः इत्याह । हि यस्मादुपकारापकारावेव तयोर्मित्रामित्रयोर्लक्ष्यं लक्षणं व्यवच्छेदकं चिह्नम् । उपकार्येव मित्रं अप-कार्येव शत्रुरित्यर्थः । तथाप्यन्यमित्रतोऽपि चैद्य शिशुपालः शत्रुरेवात् दानम् इत्येव भावः ॥ ३७ ॥

विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा ।
अनीत्वा पङ्कतां धूलिमुदकं नावतिष्ठते ॥ ३४ ॥
ध्रियते यावदेकोऽपि रिपुस्तावत्कुतः सुखम् ।
पुरः क्लिश्नाति सोमं हि सैंहिकेयोऽसुरद्रुहाम् ३५
सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्य्यतः ।

किं शत्रुक्षयतो प्रतिष्ठैव दुर्घटेत्याह । विपक्षमिति । विपक्षमखिलीकृत्य । निःशेषमकृत्वा अनुन्मूल्येत्यर्थः प्रतिष्ठा दुर्लभा खलु । तथाहि उदकं कर्त्तृ धूलिं स्वप्रतिबन्धिनीमिति भावः । पङ्कतामनीत्वा आपादितमनीत्वेत्यर्थः नावतिष्ठते किन्तु नीत्वैव तिष्ठतीत्यर्थः । सम प्रतिष्ठ स्वरूपतयाल्पेयदम । वाक्यभेदेन प्रतिबिम्बनापेक्षो दृष्टान्तालङ्कारः ॥ ३४ ॥

नन्वयं शिशुपाल एकाकी न किं करिष्यतीत्याशङ्क्याह । ध्रियत इति । एकोऽपि रिपुर्यावत् ध्रियते अवतिष्ठते । धृङ् अवस्थाने इति धातोस्तौदादिकात्कर्त्तरि लट् । रिङ् शयग्लिङ्क्षु इति रिङादेशः । तावत्तदवधि सुखं । कुतः यावत्तावच्च साकल्येऽवधाविमानेऽमरः । तथाहि सिंहिकाया अपत्यं पुमान् सैंहिकेयो राहुः । तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुद इत्यमरः । स्त्रीभ्यो ढक् । असुरद्रुहां देवानां पुरः अग्रे सोमं क्लिश्नाति बाधते । प्राचुर्य्यात्सोमग्रहणं सूर्य्यं चेति भावः । तस्मादेकोऽपि शत्रुरुच्छेद्य इति भावः । इन्दौ शेषस्याच्छेद्य शत्रौ श्रेय न संभवेदिति तात्पर्य्यं । विशेषेण सामान्य समर्थनरूपोऽर्थान्तरन्यासः ॥ ३५ ॥

ननु दुष्टोऽयं चैद्यः किं नः करिष्यतीत्याशङ्क्य तस्य सत्कृत्या शत्रुत्वाभिमत्वावलिवेक नाभ्यकरोति । सखेति । क्रियया उपकारापकाराभ्यां उत्पत्ता निर्वृत्त कृत्रिमः । ड्वितः क्त्रिः क्त्रेर्मम्नित्यम् । सखा शत्रुश्च कृत्रिमो गरीयान् कुतः हि यस्मात्तौ कृत्रिमसखशत्रू का-

स्यातामभित्रे मित्रौ च सहजप्राकृतावपि ॥३७॥
उपकर्त्रारिणा सन्धिर्न मित्रेणापकारिणा।
उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ॥३७॥
त्वया विप्रकृतश्चैद्यो रुक्मिणीं हरता हरे।

यतः उपकारापकारस्वरूपकार्यवशात् निर्वृत्ताविति शेषः। उपकार्यो-पाधेयौ च्छत्रीश्चमनपायादनयोर्मित्रामित्रभावोऽपि अनपायीति गरीयांस्त्व-मिति भावः। सहजप्राकृतौ तु नैवमित्याह। स्यातामिति। सहजातः सहजः एकशरीरारम्भकत्वात् तत्र मित्रं मातृष्वसेयपितृष्वसेयादि सहज-शत्रुस्तु पितृव्यतत्पुत्रादिः प्रकृत्या सिद्धः प्राकृतः पूर्वोक्तसहजकृत्रिमल-क्षणरहित इत्यर्थः। तत्र विषयान्तरः प्राकृतः शत्रुः तदनन्तरः प्राकृतं मित्रं चापि स्यैर्यें तौ सहजप्राकृतौ शत्रुमित्रे च स्यातां तावात्मकार्य-वशादनियमेनोभयरूपतामापद्येते न कृत्रिमशत्रुमित्रे कृत्रिमः शत्रुः शत्रु-रेव मित्रं च मित्रमेवेति कृत्रिमावेव नित्यामित्रौ गरीयांसौ न तु सहजौ नापि प्राकृतावित्यर्थः अनेन कृत्रिमत्वं सर्वाधिकमिति सिद्धम् ॥ ३६ ॥

एवं चेदस्माकं चैद्यस्यैव शिशुपालः सहजमित्रत्वात्स्वामयो न तु घातय इत्यत आह। उपकर्त्रेति। उपकर्त्रा उपकारकारिणा अरि-णापि सहजेन प्राकृतेन चेति शेषः सन्धिः कार्यः उपकारप्रसादेन कृत्रि-ममित्रतायाः बलीयस्त्वा यावज्जीवं तदभिमानस्योत्पन्नत्वादिति भावः। अपकारिणा मित्रेणापि सहजेन प्राकृतेन चेति शेषः सन्धिर्न कार्यः मित्रत्वापवादेन कृत्रिमशत्रुतया बलीयस्या यावज्जीवमभाविन्यास्तस्योत्पन्नत्वा-दिति भावः। ननु शत्रोःमित्रत्वं मित्रस्य शत्रुत्वं कथं निश्चेतव्यमित्या-शङ्क्य लिङ्गया तयोर्निर्धारणादरोप इत्याह। हि यस्मादुपकारापकारावेव तयोर्मित्रामित्रयोर्लक्षणं स्वरूपं लक्ष्यं ज्ञापकम्। उपकर्तैव मित्रं अप-कर्तैव शत्रुरित्यर्थः। तस्मादपकृतमित्रत्वेऽपि चैद्यः शिशुपालः शत्रुत्वात् घात्य एवेति भावः ॥ ३७ ॥

वद्धमूलस्य मलं हि महद्वैरतरोः स्त्रियः ॥३८॥
भौमासुर
त्वयि भौमं गते जेतुमरौत्सीत्स पुरीमिमाम् ।
प्रोषितार्य्यमणं मेरोरन्धकारस्तटीमिव ॥ ३९ ॥
आलप्यालमिदं बभ्रोर्य्यत्स दारानपाहरत् ।
कथापि खलु पापानामलमश्रेयसे यतः ॥४०॥
विराद्धएवं भवता विराद्धा बहुधा च नः ।

अथ चैद्यस्य त्वन्निमित्तं वैरं चतुर्भिराह । त्वयेति । हे हरे रुक्मिणी हरता बन्धुभिस्तस्मै प्रदत्तां राक्षसधर्म्मेणोढेत्यर्थः । राक्षसो युद्धहरणादिति याज्ञवल्क्यः । गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृताविति मनुः । त्वया चैद्यो विप्रकृतः तथाहि बद्धमूलस्य दृढमूलस्य वैरतरोः स्त्रियो महत् प्रधानं मूलं हि निश्चये । रूपकसंसृष्टोऽयम् । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ३८ ॥

अथ तेनापि त्वं विप्रकृत इत्याह । त्वयीति । त्वयि भूमेरपत्यं पुमांसं भौमं नरकासुरं जेतुं गते सति स चैद्य इमां पुरीं द्वारकां प्रोषितोऽर्य्यमा सूर्य्यो यस्यास्तां मेरोस्तटीं सानुमन्धकार इवारौत्सीत् रुरोध रुधेरनिटो लुङि रूपम् । उपमालङ्कारः ॥ ३९ ॥

अथ कारान्तरमाह । आलप्येति । स चैद्यो बभ्रोर्यादवभेदस्य दारान् भार्य्याम् । भार्य्या जायाथ पुंभूम्नि दाराः स्यात्तु कुटुम्बिनीत्यमरः । अपाहरत् इति यदिदं दारापहरणं आलप्योऽश्राव्यमिदं नालपनीयमित्यर्थः । अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वा इति क्त्वाप्रत्यये समासे ल्यबादेशः । यतः पापानां पाप्मनां कथनं शुभारम्भमपि । चिन्तिपूजिकथिकुम्बिचर्च्चश्चेत्यङ्प्रत्ययः । अश्रेयसेऽनर्थायालं समर्थम् । नमःस्वस्तीत्यादिना चतुर्थी । अत्र निषिध्यमानालपन निषेधनसमर्थनात्कार्य्येण कारणसमर्थनोऽर्थान्तरन्यासः ॥ ४० ॥

निर्वर्त्त्यतेऽरिः क्रियया सः श्रुतश्रवसः सुतः।४१।
विधाय वैरं सामर्षे नरोऽरौ य उदासते ।
प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम् ॥५२॥
मनागनभ्यावृत्त्या वा कामं क्षाम्यतु यः क्षमी ।

फलितमाह । विराडिति । एवं भवता विराड् विप्रकृतः । राज्ञेरनिष्टः कर्म्मणि क्तः । बहुधा नोऽस्माकं च विराद्धा विप्रकर्त्ता श्रुतश्रवा नाम हरेः पितृष्वसा तस्याः सुतः पैतृष्वसेयत्वात्स्वजनमित्यपीति भावः । स चैद्यः क्रियया पूर्व्वकृतान्योन्यापक्रियया अरिः निर्वर्त्त्यते नितरां शत्रुः क्रियते अतो बलीयस्त्वादनुपेक्ष्य इति भावः ॥ ४१ ॥

अत्राप्युपेक्षायां दोषमाह । विधायेति । ये नरः पुमांसः 'पुंसि पुमांसः पञ्चजनाः पुरुषाः पूरुषा नर' इत्यमरः । सामर्षे प्रबले अरौ वैरं विधाय स्वयञ्चापकृत्येत्यर्थः उदासते उपेक्षन्ते ते नरः कक्षे गुल्मे । 'कक्षस्तु गुल्मे दोर्मूले च पापे जीर्णवने तृणे' इति वैजयन्ती । उदर्चिषं अग्निं प्रक्षिप्य अभिमारुतं । आभिमुख्येऽव्ययीभावः । शेरते स्वपन्ति तद्दाहहेतुरित्यर्थः । शीङो रुडिति रुडागमः । अत्र ये उदासते ते शेरते इति विशिष्टोदासीन्यशयनयोर्निर्दिष्टैकत्वासम्भवात्सादृश्ये लक्षणायाम सम्भवद्वस्तुसम्बन्धो वाक्यार्थनिवृत्तिरिति निदर्शना- भेदः न चा- दृष्टान्तः वाक्यभेदेन प्रतिबिम्बकरणाक्षेपे तस्योत्थानात् । अत्र तु वाक्यार्थे वाक्यार्थसमारोपादेकवाक्यतायां तदभाव इत्यलङ्कारसर्वस्वकारः ॥ ४२

तथापि बान्धवत्वात् सोढव्य इत्याशङ्क्याह । मनागिति । यः क्षमी स हनः । यस्मिन्यद्यप्योपितृनु प्रत्यय । स सोढा मनागल्पं अभ्यावृत्त्यापीति भावः. अनभ्यावृत्त्या सकृद्वा अनल्पत्वेऽपीति भावः विराध्यन्तमेव पुर्नाथं कामं भृशं क्षाम्यतु क्षमतां । प्रार्थनायां लोट् । शमाम ष्टानां दीर्घः । क्रियासमभिहारेण भृशं पौन पुन्येन वेत्यर्थः । न च पुं, वाक्येमनेकार्थत्वं दोषाय । विराध्यन्तं कः क्षमेत सहेत सोढुं शक्नुयात् ।

क्रियासमभिहारेण विराध्यन्तं क्षमेत कः ॥ ४३ ॥
अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः ।
पराक्रमः परिभवे वैयात्यं सुरतेष्विव ॥ ४४ ॥
माजीवन् यः परावज्ञादुःखदग्धोऽपि जीवति ।
तस्याजननिरेवास्तु जननीक्लेशकारिणः ॥ ४५ ॥
पादाहतं यदुत्थाय मूर्द्धानमधिरोहति ।

कोऽपीत्यर्थः । क्षमेतेति शक्यार्थे लिङ् । क्षमूष् सहने दैवादिको भौ-वादिकश्च ॥ ४३ ॥

ननु सर्वदा क्षमैव पुंसो भूषणं अतोऽपराधेऽपि क्षन्तव्यमत आह । अन्यदेति । अन्यदा सुरतव्यतिरिक्ते काले योषितो लज्जेव पुंसोऽन्यदा अपरिभवे क्षमा भूषणं परिभवे तु योषितः सुरतेषु वैयात्यं धार्ष्ट्यमिव । धृष्टे धृष्णुर्वियातश्चेत्यमरः । पराक्रमः पौरुषं भूष्यतेऽनेनेति भूषणं आभरणं एवं च क्रियावचनत्वान्निरोध इति वल्लभोक्तमयु-क्तम् ॥ ४४ ॥

अथ परिभवेऽप्यपराक्रमे त्रिभिर्निन्दामाह । मा जीवन्निति । यः परकृतावज्ञया अपमानेन यद्दुःखं तेन दग्धः सोऽत एव मा जीवन् गर्हितजीवी सन् । माङ्याक्रोश इति शतृः समादेशः । जीवति प्राणान् धारयति जनन्याः क्लेशकारिणः गर्भधारणप्रसवादिवेदनाकारिणस्त-द्व्यतिरिक्तार्थक्रियाहीनस्येत्यर्थः तस्याजननमजननिरनुत्पत्तिरेवास्तु । ज-ननीक्लेशनिष्फलमर्थमिति भावः । आक्रोशे नञ्यनिरिति नञ्पूर्वाज्ज-नेर्धातोरनिप्रत्ययः ॥ ४५ ॥

पादेति । यद्रजो धूलिः पादेनाहतं सत् उत्थायोड्डीय मूर्द्धानं रजस्तदेव शिरोऽधिरोहति आक्रमति तद्रजः अचेतनमपीति । अवमाने सत्यपि स्वस्थात्मानुदासीनात् चेतनाद्वरं श्रेष्ठम् ।

स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ॥ ४६ ॥
असम्पादयतः कञ्चिदर्थं जातिक्रियागुणैः ।
यदृच्छाशब्दवत्पुंसः संज्ञायै जन्म केवलम् ॥ ४७ ॥
तुङ्गत्वमितरा नाद्रौ नेदं सिन्धावगाधता ।
अलङ्घनीयताहेतुरुभयन्तन्मनस्विनि ॥ ४८ ॥
तुल्येऽपराधे स्वर्भानुर्भानुमन्तं चिरेण यत् ।

व्यतिरेकालङ्कारः ॥ ४६ ॥

असम्पादयत इति । किञ्च जातिर्ब्राह्मणत्वादिः क्रिया इज्याध्ययनादिः गुणः शौर्यादिः तैः साधनैः । करणे तृतीया । कञ्चिदर्थं सुकृतकीर्त्यादिपौरुषार्थमन्यत्र गोत्रपाचकशूरगौरादिभिः स्वाभिधेयभूतैः करणैः कञ्चिदर्थं व्यवहाररूपं प्रयोजनं असम्पादयतः उभयत्र तादृग्जात्याद्यसम्भवादिति भावः । पुंसो जन्म सत्तालाभः यदृच्छाशब्दवत् इच्छाप्रकल्पितस्य जात्यादिप्रवृत्तिनिमित्तशून्यस्य डित्थादिशब्दस्येव । तत्र तस्येवेति वति प्रत्ययः । स्वेच्छा यदृच्छा स्वच्छन्दः स्वैरता इति तु स मा इति केशवः । संज्ञायै केवलं संज्ञार्थमेव एकत्र पारिभाषिकं किञ्चिन्नाम मात्रमनुभवितुमन्यत्र तादृक्नामानुभवितुमित्यर्थः ॥ ४७ ॥

एवमपौरुषं दूषयित्वा पौरुषं भूषयति । तुङ्गत्वमिति । अद्रौ पर्वते तुङ्गत्वमौन्नत्यमस्तीति शेषः । अस्तिर्भवन्तीपरोऽप्रयुज्यमानोऽप्यस्तीत्यादिभाष्यात् भवन्ती पूर्वाचार्याणां लट् संज्ञा । इतरा अगाधता नास्ति सिन्धौ समुद्रे अगाधता गम्भीरतास्ति इदं तुङ्गत्वं नास्ति मनस्विनि धीरे तु अलङ्घनीयताहेतुरनतिक्रमत्वकारणं तदुभयं तुङ्गत्वमगाधता च । तस्मादद्रिसिन्धुभ्यामधिकोऽयमस्तीति व्यतिरेकालङ्कारः ॥ ४८ ॥

सम्प्रति शत्रौ मार्दवमसमर्थयेत्याह । तुल्य इति । स्वर्भानू राहुः अपराधे तुल्येऽपि भानुमन्तं सूर्यं चिरेण ग्रसते हिमांशुं चन्द्रमाशु

हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलम् ॥ ४९ ॥
स्वयं प्रणमतेऽल्पेऽपि परवायावुपेयुषि ।
निदर्शनमसाराणां लघुर्बहुतृणं नरः ॥ ५० ॥
तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते ।

*ग्रीष्मं ग्रसते गिलतीति यत् । ग्रसिते गिलिते गोर्णमित्यभिधानात् । तत् म्रदिम्नो मार्दवस्य फलं स्फुटम् । पृथ्वादिभ्य इमनिच् इतीमनिच् प्रत्ययः । तद्विपक्षे तीक्ष्णेन भवितव्यं अन्यथा मृदुः सर्वैर्बाध्यत इति भावः । एतच्च प्रस्तुतमप्रस्तुतार्केन्दुकथनेन सारूप्यात्प्रतीयते इत्यप्रस्तुतप्रशंसाभेदोऽयम् । अप्रस्तुतस्य कथनात्प्रस्तुतं यत्र गम्यते । अप्रस्तुतप्रशंसेयं सारूप्यादिनियन्त्रितेति लक्षणात् ॥ ४९ ॥

एतदेव भङ्ग्यन्तरेणाह । स्वयमिति । असाराणां दुर्बलानां निदर्शनं दृष्टान्तः अतएव ईषदसमाप्तं तृणं बहुतृणं तृणकल्पमित्यर्थः । विभाषा सुपोबहुच् पुरस्तादिति बहुच् प्रत्ययः प्रकृतेः पूर्वं च भवति । स्यादीषदसमाप्तौ तु बहुच् प्रकृतिलिङ्गकः इति वचनात् प्रकृतिलिङ्गता । लघुर्निःसारो नरोऽल्पोऽपि परो वायुरिवेत्युपमित समासः । बहुतृणमिति श्रौतोपमा इवव्यर्थकल्पब्देश्यदेशीयदेश्यादिति दण्डिना कल्पबादीनामौपम्यस्य वाचकत्वाभिधानात् । तस्मिन्वायावुपेयुषि प्राप्ते सति स्वयं प्रणमते स्वयमेव प्रह्वोभवति कर्मवत्कर्मणा तुल्यक्रिय इति कर्मवद्भावात् । भावकर्मणोरित्यात्मनेपदं न दुहस्नुनमां यक् चिणाविति यक् प्रतिषेधः । वायुना तृणमिवाल्पीयसापि रिपुणा लघुरक्लेशेन परिभूयत इत्यर्थः । उपमालङ्कारः ॥ ५० ॥

पुनः पौरुषे गुणमाह । तेजस्वीति । दवीयानपि दूरस्थोऽपि । स्थूलदूरेत्यादिना पूर्वगुणयणादिपरलोपौ । तेजस्वी तेजस्विनां मध्ये गण्यते सङ्ख्यायते तथाहि पञ्चाग्निसाध्यं तपोयस्य स तथा तस्य पञ्चाग्निमध्ये तपस्यतः तपनोऽर्कः जातवेदसामग्नीनां पञ्चमः प-

पञ्चमः पञ्चतपसस्तपनो जातवेदसाम्॥ ५१ ॥
अकृत्वा हेलया पादमुच्चैर्मूर्द्धसु विद्विषाम्।
कथङ्कारमनालम्बा कीर्त्तिर्द्यामधिरोहति ॥ ५२॥
अङ्काधिरोपितमृगश्चन्द्रमा मृगलाञ्छनः।
केशरी निष्ठुरक्षिप्तमृगयूथो मृगाधिपः ॥ ५३ ॥
चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया।

ज्ञानां पूरणः पञ्चमो जातवेदा भवतीत्यर्थः। विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ५१ ॥

गुणान्तरस्य व्यतिरेकेणाह। अकृत्वेति उच्चैरुन्नतेषु विद्विषां मूर्द्धसु हेलया पादमकृत्वा अनिधाय। अनञ् पूर्व इति निषेधात्समासेऽपि न ल्यबादेशः। कीर्त्तिः कथङ्कारं कथमित्यर्थः। अन्यथैवं कथमित्थंसु सिद्धाप्रयोगश्चेदिति करोतेः कथम्पूर्वात् णमुल्। अनालम्बा निराधारा कीर्त्तिर्द्यां दिवमधिरोहति न कथञ्चिदित्यर्थः किञ्चिन्निःश्रेण्यादिकमन्तरा उच्चसौधस्य दुरारोहत्वादिति भावः। तस्मात्कीर्त्तिमिच्छतः पौरुषमेवाश्रयणीय इति श्लोकतात्पर्यम्। कीर्त्तितद्वतोरभेदोपचारात्कर्त्तृतानिर्देशः। अत्र प्रस्तुतायाः कीर्त्तेर्विषयमहिम्ना अप्रस्तुत प्रासादारोहणस्त्रीव्यवहार प्रतीतेः समासोक्तिः ॥५२॥

पौरुषमेवाश्रयणीयमित्यत्रान्वय व्यतिरेक दृष्टान्तावाचष्टे। अङ्केति। अङ्कमुत्सङ्गमधिरोपितो मृगो येन स चन्द्रमाः मृगलाञ्छनः मृगाङ्कः तथा निष्ठुरं यथा तथा क्षिप्तो हतो मृगयूथो मृगसमूहो येन स केशरी सिंहो मृगाधिपः उभयथापि स्यादिति शेषः. तस्मात्क्षमा मार्दवं दुष्कीर्त्तये पौरुषं तु कीर्त्तये इति भावः। अत्राप्रस्तुत कथनात् प्रस्तुतार्थ प्रतीतेरप्रस्तुत प्रशंसा ॥ ५३ ॥

ननु सामादिचतुरोपायसत्त्वे किं दानादिविहाय दण्डेन इत्याह

स्वेद्यमामज्वरं प्राज्ञः कोऽम्भसा परिषिञ्चति॥५४
सामवादाः सकोपस्य तस्य प्रत्युत दीपकाः ।
प्रतप्तस्येव सहसा सर्पिषस्तोयबिन्दवः ॥ ५५ ॥
गुणानामायथातथ्यादर्थं विप्लावयन्ति ये ।
अमात्यव्यञ्जना राज्ञां दूष्यास्ते शत्रुसंज्ञिताः॥५६॥

मनुः । साम्ना भेदेन दानेन समस्तैरथवा पृथक् । विजेतुं प्रयतेतारीन्न युद्धेन कदाचनेति । तथाप्यास्त्वमेव युक्तमित्याशङ्क्य द्वाभ्यां निराचष्टे । चतुर्थोपायेति । चतुर्थोपायसाध्ये दण्डसाध्ये रिपौ सान्त्वं साम । सान्त्वसामनी समे इत्यमरः । अपक्रिया अपकारः तथा हि स्वेद्यं स्वेदार्हं स्वेदनकार्यमित्यर्थः । स्वेदस्तु स्वेदने घर्म इति विश्वः । आमज्वरमपक्वज्वरमाद्य । आमो रोगे रोगभेदे चामोऽपक्वे तु वाच्यवदिति विश्वः । कः प्राज्ञः पण्डितः अम्भसा जलेन परिषिञ्चति न कोऽपीत्यर्थः । ज्वरितस्याम्भःसेकवत् क्रुद्धस्य सान्त्वमुद्दीपकं स्यात् अतो दण्ड एवेति भावः । वाक्यभेदेन प्रतिबिम्बकरणाद्दृष्टान्तालङ्कारः ॥ ५४ ॥

सामेति । सकोपस्य क्रुद्धस्य तस्य चैद्यस्य सामवादाः प्रियोक्तयः सहसा प्रतप्तस्य क्वथितस्य सर्पिषो घृतस्य तोयबिन्दव इव प्रत्युत वैपरीत्येन दीपकाः प्रज्वलनकारिणः न तु शान्तिकरा इत्यर्थः तस्माद्दण्ड एव साध्यः । मनुवचनन्त्वाक्रुद्धवैरविषयमिति भावः ॥ ५५ ॥

एवं स्थिते केचिदुद्धवादयः प्रत्याचक्षीरन् तान् प्रत्याह । गुणानामिति । सन्ध्यादीनां गुणानामायथातथ्यात् यथातथ्यात् अनतिक्रम्य यथातथं यथायोग्यं इति यावत् । यथार्थं तु यथातथमित्यमरः । यथार्थेऽव्ययीभावः स नपुंसकमिति नपुंसकत्वं ह्रस्वो नपुंसके इति ह्रस्वत्वम् । ततो नञ्समासे अयथातथस्य भावः आयथातथ्यं ब्राह्मणादित्वात् ष्यञ् प्रत्ययः यथातथयथापुरयोः पर्यायेणेति विकल्पादज्पूर्व

स्वशक्त्युपचये केचित्परस्य व्यसनेऽपरे ।
यानमाहुस्तदासीनं त्वामुत्थापयति द्वयम् ॥५७॥
लिलङ्घयिषतो लोकानलङ्घ्यानलघीयसः ।

पदर्थाद्वः । तस्मादवधातव्यादयदा योग्यत्वादन्यकालेऽन्यप्रयोगादित्यर्थः । अर्धकयोजनं विज्ञापयन्ति निघ्नन्ति कार्याणि कुर्वन्तीत्यर्थः । अमङ्-लानां अङ्कनं चिह्नं येषां ते तथोक्तास्तद्वेधारिण इत्यर्थः । अवजौप-द्वयीहिर्व्यधिकरणोऽजन्ताद्युत्तरपद इति वामनः । वस्तुतस्तु मतुरिति संज्ञा एषां सञ्जाता मतु कलिताः मलव एव ते कूटमन्त्रिणोऽराद्वां दूर-यितुमर्हा. दूष्या गर्ह्याः त्याज्या इति यावत् । कृत्यानां कर्तरि वेति कर्तरि षष्ठी । अतः स्थोऽस्तं न प्रतिरोद्धव्यमिति भावः ॥ ५६ ॥

ननु यातव्योऽपि काले यातव्य इत्यत्राभिप्रायमेव स्वाह इत्याह । स्वेति । केचिद्वृद्धाः स्वस्य शक्त्युपचये सामर्थ्यातिरेके यानं यात्रामाहुः । यथाह कामन्दकः प्रायेण सन्तो व्यसने रिपूणां यातव्यमित्येव समादिशन्ति । तथा रिपुद्वे व्यसनानपेक्षी दमोऽहिष्णुं च उदितः प्रतीयादिति । अपरे तु परस्य शत्रोर्व्यसने विपदि । व्यसनं विपदि भ्रंश इत्यमरः । यानमाहुः । यथ मनुः । यदा पाषाड्विषद्वैरी व्यसने पीडिते रिपे रिति । तद् द्वय मपद्वयं कर्तृ आसीनमनुद्युञ्जानं ईदाम इति यानजावारणेकाल-देश । उत्थापयति प्रेरयति । तदुभयसमासादीदृक् कालोऽन कर्तव्य मतदूत इत्यर्थः ॥ ५७ ॥

अथ शत्रुमिषदः तार्क्ष्यगर्वति । लिलङ्घयिषत इति । लोकान् लङ्घयितुमिच्छतोऽभिलङ्घयिषतः । लङ्घतेः सन्नन्तात् शतरि शसु अन-लङ्घ्यान् स्वयं दुर्लङ्घ्यान् कृतः अलघीयसः अतिगुरून् अतएव यादस अन्ये मत्सरस्येतुर्दर्शितसमामः तान् यादसाम्भोनिधीन् अतः समा तितिक्षा वेलेव धुन्वित । येन कूलेऽपि साधिभिरिति विदः । स्मे संहरन्ति एनत्ता प्राणेन कर्षं संहरेदुरिति भावः ॥ ५८ ॥

यादवाम्भोनिधीन् रुन्धे वेलेव भवतः क्षमा॥५८॥
विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम्।
फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि॥५९॥
हते हिडिम्बरिपुणा राज्ञि द्वैमातुरे युधि।
चिरस्य मित्रव्यसनी सुदमो दमघोषजः॥६०॥
नीतिरापदि यद्गम्यः परस्तन्मानिनो ह्रियै।

अभ्युच्चयान्तरं यदलोभेनैवं विजयलाभस्त्वाह। विजय इति। से नाया कर्त्र्या विजय साक्षिमात्रे उदासीने एव फलभाजि त्वयि समीक्ष्योक्ते साङ्ख्योक्ते साङ्ख्यं समीक्षमिति त्रिकाण्डः। आत्मनि बुद्धेर्महत्तत्त्वस्य मूलप्रकृतेः प्रथमविकारस्य कर्त्र्या भोग सुखदुःखानुभव इवापदिश्यता व्यपदिश्यता भृत्यजयपराजयौ स्वामिगामित्वादिति भाव साङ्ख्या अप्याहुः। पत्तेत्र भवतादासीनइति सर्वं प्रत्युपभोग यथात्मनुरूपान् साधयति बुद्धिरिति च॥५९॥

अथ परस्य व्यसनमाह। हत इति। हिडिम्बरिपुणा भीमेन द्वयोर्मात्रोरपत्यं पुमान् द्वैमातुरः मातुरुत्संख्यासंभद्रपूर्वाया इत्यण् प्रत्यय उकारश्चान्तादेशोरेकपर। तस्मिन् राज्ञि जरासन्धे दुहिताभ्यां पत्नीभ्यां अर्धेन प्रसूतो जरया नाम पिशाच्या सन्धित श्चेति कथयन्ति। युधि हते सति चिरस्य चिरकालेन। चिराय चिररात्राय चिरस्य द्यादिश्चिरार्थकाइत्यमरः। मित्रव्यसनी मित्र व्यसनवान् मित्रव्यसनागिति यावत्। व्यसनं विपदि भ्रंशे इत्यमरः। दमघोषाज्जातो दमघोषजः सुखेन दम्यत इति सुदमः एकाकित्वात् साध्य इत्यर्थः॥६०॥

[illegible] यदि पराभ्युदयेन दमो[illegible] [illegible] इति पयोदः [illegible] यथाह [illegible] [illegible] [illegible]
[illegible] तस्मादुक्तितन्मध्यवित्तम। [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible]

विधुर्विधुन्तुदस्येव पूर्णस्तस्योत्सवाय सः ॥६१॥
अन्यदुच्छृङ्खलं सत्त्वमन्यच्छास्त्रनियन्त्रितम्।
सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः॥६२॥
इन्द्रप्रस्थगमस्तावत् कारि मा सन्तु चेदयः।

क्षयो गमनार्हः नीतिरिति यत्तदापदि गमनं मानिनः शौर्याभिमानिनः ह्रियं लज्जाकरमित्यर्थः। किन्तु पूर्णः उपचितगात्रः स भवान् तस्य मानिनः विधुश्चन्द्रः विधुं तुदति हिनस्तीति विधुन्तुदो राहुः। विध्वरुषोस्तुद इति खश् प्रत्यये मुमागमः। तस्येवोत्सवाय अतएव बलिना बलवतैव यातव्यः बलिनस्य वधमिति भावः॥ ६१॥

तर्हि गुर्वोरुक्तमन्वादिशास्त्रविरोधः स्यादित्याशङ्क्याह। अन्यदिति। अन्यत् उच्छृङ्खलमनर्गलं प्रवृत्तं पौरुषमिति भावः सत्त्वं बलं अन्यत् शास्त्रेषु मन्वादिशास्त्रेष्वेव नियन्त्रितं उदाहृतं परव्यसनकाले अक्रमणम् तयोः सापेक्षत्वनिरपेक्षत्वाभ्यां मिथोविरोधान्नैकशास्त्रत्वं सम्भवतीत्यर्थः। अत्र दृष्टान्तमाह। तेजस्तिमिरयोः समानमधिकरणं ययोस्तयोर्भावः सामानाधिकरण्यं एकाश्रयत्वं कुतः न कुतश्चित् तयोः सहावस्थानविरोधादिति भावः। तस्मादुभयोरुदितानुदितहोमवद्भिन्नविषयतादितरेतरयोरविरोधो न बाधक इति भावः॥ ६२॥

तर्हि नः किमिदानीं कार्यमत आह। इन्द्रप्रस्थेति। इन्द्रप्रस्थस्य पाण्डवनगरस्य गमो गमनम्। ग्रहवृदृनिश्चिगमश्चेत्यप् प्रत्ययः। मा कारि तावत् क्रियतामित्यर्थः। यावत्तत्कालरिष्टे द्वे कार्ये साधारणारभ्ये इति शेषः। कुतः कदापि लुङ् माङि लुङिति माङोर्योगे न माङ्योग इत्यट् प्रतिषेधः। किन्तु चेदयः चेदिदेशाः जनपदविशेषाः। शुभहरद्वोरन्यतरस्यां लङ् वेति विकल्पा लप् प्रत्ययः तर्हिकदपि च सुप्तावभ्याणादिकाकारेषः। सर्वधिरेव भविष्यत्। मार्गे मम प्रमदः। आशावर्मा दर्शिता वाविध्यात् आमनी मूढाः

आस्माकदन्तिसान्निध्याद्धामनीभूतभूरुहः ॥ ६३ ॥
निरुद्धवीवधासारप्रसारा गा इव व्रजम् ।
उपरुन्धन्तु दाशार्हाः पुरीं माहिष्मतीं द्विषः ॥ ६४ ॥
यजतां पाण्डवः स्वर्गमवत्विन्द्रस्तपत्विनः ।
वयं हनाम द्विषतः सर्व्वः स्वार्थं समीहते ॥ ६५ ॥

शाखाभङ्गात् धाम्नीभूता भूरुहो वृक्षा येषां ते तथोक्ताः सन्तु चैद्यात्वेव क्रियतामित्यर्थः । सा च प्रस्तुता प्रस्तुतेनैव स्वकार्येण गम्यत इति पर्य्यायोक्तालङ्कारः । कारणं गम्यते यत्र प्रस्तुतात् कार्य्यदर्शनात् । प्रस्तुतत्वेन सम्बन्धात्पर्य्यायोक्तः स उच्यत इति लक्षणात् ॥ ६३ ॥

निरुद्धेति । किञ्च दाशार्हाः यादवाः वीवधो धान्यादि प्राप्ति-रासारः सुहृद्बलं प्रसारस्तृणकाष्ठादेः प्रवेशः । धान्यादेर्वीवधं प्राप्ति-रासारस्तु सुहृद्बलं प्रसारस्तृणकाष्ठादेः प्रवेश इति वैजयन्ती । ते निरुद्धा यैस्ते तथोक्ताः अन्यत्र निरुद्धौ वीवधानां पर्य्याहारापरनाम्नां स्कन्धशाखावीराद्याहरणसाधनभारविशेषाणां आसार प्रसरौ प्रवेशनि-र्गमौ यैस्ते तथोक्ताः । विवधो वीवधो भारे पर्य्याहाराध्वनोरपीति हेम-चन्द्रः । व्रजं गोष्ठम् । व्रजः स्याद्गोकुलं गोष्ठमिति वैजयन्ती । गा इव माहिष्मतीं पुरीं द्विषोऽरींश्चोपरुन्धन्तु व्रजे गा इव माहिष्मत्यामरीन् स्थापयन्त्वित्यर्थः । दुहियाचरुधीति द्विकर्मकत्वं यत्र पुरीव्रजयोरक-थितं कर्म अन्यदीप्सितं कर्म ॥ ६४ ॥

तर्हि पार्थप्रार्थनायाः का गतिरित्याशङ्क्य उपेक्षैव गतिरित्याह य-जतामिति । पाण्डवो युधिष्ठिरो यजतां यागं करोतु इन्द्रः स्वर्गमवतु रक्षतु इनोऽर्कः । इनः पत्यौ नृपार्कयोरिति मेदिनी । तपतु प्रकाशतां वयं द्विषोऽरीन् हनाम मारयाम । आङुत्तमस्य पिच्चेत्याडागमः प्र-र्थने प्राप्तकाले लोट् । तथाहि सर्व्वजनः स्वार्थं स्वप्रयोजनं समीहते

प्राप्यतां विद्युतां सम्पत्सम्पर्कादर्करोचिषाम् ।
शस्त्रैर्द्विषच्छिरश्छेदप्रोच्छलच्छोणितोचितैः ॥ ६६ ॥
इति संरम्भिणो वाणीर्बलस्या लेख्यदेवताः ।
सभाभित्तिप्रतिध्वानैर्भयादन्ववदन्निव ॥ ६७ ॥
निशम्य ताः शेषगवीरभिधातुमधोक्षजः ।
शिष्याय बृहतां पत्युः प्रस्तावमदिशद्दृशा ॥ ६८ ॥

अनुप्रवक्ते । इन्द्रादि समानयोगक्षेमो नः पार्थ इत्यर्थः । अर्थान्तरन्यासः ॥ ६५ ॥

प्राप्यतामिति । किंतु द्विषतां शिरश्छेदेन प्रोच्छलता उद्गच्छता शोणितेनोचितैः सिक्तैः शस्त्रैरर्करोचिषां सम्पर्काद्विद्युतां सम्पत् लक्ष्मीः प्राप्यतामिति निदर्शनालङ्कारः ॥ ६६ ॥

इतीति । इतीयं संरम्भिणः क्षुभितस्य बलभद्रस्य वाणीर्वाचो लेख्यदेवताश्चित्रलिखिता देवताः सभायाः सदोगृहस्य भित्तीनां प्रतिध्वानैः प्रतिध्वनिव्याजेनेत्यर्थः । भयादन्ववदन् अन्वमोदयन्निवेत्युत्प्रेक्षा ॥ ६७ ॥

निशम्येति । अथ अधःकृतमक्षजमिन्द्रियजं ज्ञानं येन सोऽधोक्षजो हरिः ताः शेषस्य शेषावतारस्य बलभद्रस्य गाः वाचः शेषगवीः । गोरतद्धितलुकीति टच् टित्वाद्ङीप् । निशम्य श्रुत्वा । निशाम्यतीति ल्यपि तथा निशमयतीति ल्यप्यपि । तत्र शाम्यतेरिदं रूपं अन्यथा निशमय्येति स्यात् । अतएव वामनः निशम्य निशमय्यशब्दौ प्रकृतिभेदादिति । बृहतां वाचां पत्युः बृहस्पतेश्शिष्याय उद्धवायाभिधातुं वक्तुं दृशा दृष्ट्या प्रस्तावं अवसरमदिशत् अतिसृष्टवान् । प्रस्तावः अवसरः ॥ ६८ ॥

भारतीमिति । अथ हन्दानुमतमतं उद्धवः ... गौरवं यथा तथा तां तथा भारतीं वाचं ...

आस्माकदन्तिसान्निध्याद्वामनीभूतभूरुहः ॥ ६३ ॥
निरुद्धवीवधासारप्रसारा गा इव व्रजम् ।
उपरुन्धन्तु दाशार्हाः पुरीं माहिष्मतीं द्विषः ॥ ६४ ॥
यजतां पाण्डवः स्वर्गमवत्विन्द्रस्तपत्विनः ।
वयं हनाम द्विषतः सर्व्वः स्वार्थं समीहते ॥ ६५ ॥

शाखाभङ्गात् खर्वीभूताभूरुहो वृक्षा येषां ते तथोक्ताः सन्तु दिशालेव क्रियतामित्यर्थः । सा च प्रस्तुता प्रस्तुतेनैव स्वकार्येण गम्यत इति पर्यायोक्तालङ्कारः । कारणं गम्यते यत्र प्रस्तुतात् कार्यवर्णनात् । प्रस्तुतेन सम्बन्धात्पर्यायोक्तः स उच्यत इति लक्षणात् ॥ ६३ ॥

निरुद्धेति । किञ्च दाशार्हा यादवाः वीवधो धान्यादि प्राप्तिः आसारः सुहृद्बलं प्रसारस्तृणकाष्ठादेः प्रवेशः । धान्यादेर्वीवधः प्राप्तिरासारस्तु सुहृद्बलं प्रसारस्तृणकाष्ठादेः प्रवेश इति वैजयन्ती । ते निरुद्धा यैस्ते तथोक्ताः अन्यत्र निरुद्धौ वीवधानां पर्य्याहारापरनाम्नां स्कन्धवाह्यवीवधाद्युपकरणसाधनभारविशेषाणां आसार प्रसरौ प्रवेश नि-र्गमौ यैस्ते तथोक्ताः । विवधो वीवधो भारे पर्य्याहाराध्वनोरपीति हेम-चन्द्रः । व्रजं गोष्ठम् । व्रजः स्याद्गोकुलं गोष्ठमिति वैजयन्ती । गा इव माहिष्मतीं पुरीं द्विषोऽरीनुपरुन्धन्तु व्रजे गा इव माहिष्मत्यामरीन् आवृण्वन्त्वित्यर्थः । दुहियाचिरुधीति द्विकर्मकत्वं तत्र पुरीमजापक-थितं कर्म अन्यदीप्सितं कर्म ॥ ६४ ॥

तर्हि पार्थप्रार्थनायाः का गतिरित्याशङ्क्य उपेक्षैव गतिरित्याह य-जतामिति । पाण्डवो युधिष्ठिरो यजतां यागं करोतु इन्द्रः स्वर्गमवतु रक्षतु इनोऽर्कः । इनः पत्यौ नृपार्कयोरिति मेदिनी । तपतु प्रकाशतां वयं द्विषोऽरीन् हनाम मारयाम । आडुत्तमस्य पिच्चेत्याडागमः स-र्व्वत्र प्रार्थनायां लोट् । तथाहि सर्व्वो जनः स्वार्थं स्वप्रयोजनं समीहते

प्राप्यतां विद्युतां सम्पत्सम्पर्कादर्करोचिषाम्।
शस्त्रैर्द्विषच्छिरश्छेदप्रोच्छलच्छोणितोक्षितैः॥६६॥
इति संरम्भिणो वाणीर्बलस्यालेख्यदेवताः।
सभाभित्तिप्रतिध्वानैर्भयादन्ववदन्निव॥ ६७॥
निशम्य ताः शेषगवीरभिधातुमधोक्षजः।
शिष्याय बृहतां पत्युः प्रस्तावमदिशद्दृशा॥ ६८॥

अनुमन्यते। इन्द्रादि समानयोगक्षेमो नः पार्थ इत्यर्थः। अर्थान्तरन्यासः॥ ६५॥

प्राप्यतामिति। किञ्च द्विषतां शिरश्छेदेन प्रोच्छलता उच्छलता शोणितेनोक्षितैः सिक्तैः शस्त्रैरर्करोचिषां सम्पर्काद्विद्युतां सम्पत् शोभा प्राप्यतामिति निदर्शनालङ्कारः॥ ६६॥

इतीति। इतीत्थं संरम्भिणः क्षुभितस्य बलभद्रस्य वाणीरालेख्यदेवताः चित्रलिखित देवताः सभायाः सदोगृहस्य भित्तीनां प्रतिध्वानैः प्रतिध्वनिव्याजेनेत्यर्थः। भयादन्ववदन् अन्वमोदयन्निवेत्युत्प्रेक्षा॥ ६७॥

निशम्येति। अथ अक्षमिन्द्रियजं ज्ञानं येन सोऽधोक्षजो हरिः ताः शेषस्यानन्तस्यावतारस्य बलभद्रस्य गाः वाचः शेषगवीः। गोरतद्धितलुकीति टच् टित्वात् ङीप्। निशम्य श्रुत्वा। निशाम्येति पाठे तथा निशमयतीति भट्टमल्लः। तत्र शाम्यतेरिदं रूपं चक्षुषा निशमय्येति स्यात्। अतएव वामनः निशम्य निशमय्यशब्दौ प्रकृतिभेदादिति। बृहतां वाचां पत्युः बृहस्पतेश्शिष्याय उद्धवायाभिधातुं वक्तुं दृशा दृष्ट्या प्रस्तावमवसरमदिशत् अतिदिष्टवान्। प्रस्तावः स्यादवसरः॥ ६८॥

भारतीमिति। अथ हरिणानुज्ञातावसरं उद्धवः, आहितोऽर्थः [illegible] गौरवं दधतीं ... भारतीं वाचं ...

भारतीमाहितभरामथानुद्धतमुद्धवः।
तथ्यामुतथ्यानुजवज्जगादाग्रे गदाग्रजम्॥६९॥
सम्प्रत्यसाम्प्रतं वक्तुमुक्ते मुसलपाणिना।
निर्धारितेऽर्थे लेखेन खलूक्त्वा खलु वाचिकम्।७०
तथापि यन्मय्यपि ते गुरुरित्यस्ति गौरवम्।

तथा गदस्याग्रजं कृष्णं अग्रे पुरत इति प्रागल्भ्योक्तिः। उतथ्यस्य महर्षेरनुजो बृहस्पतिः। उतथ्यानुजो जीव इति निघः। तद्वत् तेन तुल्यं जगाद। तद्वत्तेन तुल्यं क्रिया चेद्वतिरिति वतिः तद्धितगेयमुपमा॥६९॥

किं जगादेत्याह। सम्प्रतीति। सम्प्रति मुसलपाणिना बलभद्रेण केशवं शूरेणेति ध्वनिः। उक्ते सति वक्तुमसाम्प्रतं अयुक्तम्। असाधु-त्वादभ्यासे समानयोगक्षेमप्रसङ्गादिति ध्वनिः। साम्प्रतशब्दस्यार्हार्थ-त्वात्तद्योगे शकधृषेत्यादिना तुमुन्। तथा हि लेखेन पत्रेणार्थे वाच्ये निर्धारिते निर्णीते सति वाचिकं व्याहृतार्थां वाचं सन्देशवचनमित्यर्थः। सन्देशवाग्वाचिकं स्यादित्यमरः। वाचो व्याहृतार्थायामिति ठक्। उक्त्वा खलु न वाच्यं खल्वित्यर्थः। खलुशब्दः प्रतिषेधे वाक्यालङ्कारे। निषेधवाक्यालङ्कारे जिज्ञासानुनये खलु इत्युभयत्राप्यमरः। अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वेति क्त्वाप्रत्ययः। इह न पादादौ ख-ल्वादय इति निषेधस्योद्वेजकाभिप्रायत्वात्। नञर्थे खलु शब्दस्यानुद्वे-जकत्वात् नञ् वदेव पदादौ प्रयोगे न दुष्यतीत्यनुसन्धेयम्। लिखितार्थे वाचिकमिव यथोक्तं मदुक्तिरनर्थकमेवेति भावार्थे प्रतिबिम्बकरणात् सदृशावहृष्टान्तः स्तुति व्याजेन निन्दावगमात् व्याजस्तुतिश्च लक्षणं चाग्रे वक्ष्यते॥७०॥

तर्हि किं तूष्णीम्भूतेन भाव्यं नेत्याह। तथापीति। तथापि यद्येवं निर्धारितेऽपि ते तव मय्यपि यद्यपि अस्मद्वचनेनापि प्रयोजनाभावः। गुरुरित्येव गुरुरिति गौरवादरः तद्गौरवं लालयः लालने प्रयोज्य कर्मणो मे प्रयोजक-

तत्प्रयोजककर्त्तृत्वमुपैति मम जल्पतः ॥७१॥
वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव ।
अनन्ता वाङ्मयस्याहो गेयस्येव विचित्रता ॥७२॥
बह्वपि स्वेच्छया काम प्रकीर्णमभिधीयते ।
अनुज्झितार्थसम्बन्धः प्रबन्धो दुरुदाहरः ॥७३॥
म्रदीयसीमपि घनामनल्पगुणकल्पिताम् ।

इत्थं प्रेक्षकतयैवेति भवतोऽवच्छिन्नमीत्यर्थः । न हि पण्डितैः सादरं दृष्टस्य
विदेशस्य ब्रह्मसूत्रस्यौन्मत्येयुक्त इति भावः ॥ ७१ ॥
ननु रामेश्वर सर्वं प्रबन्धेनैक्त मस्मति किन्तो वाच्यमन्तैर्व्याख्या इदा
प्रबन्धोऽयमिति हृदि निधाय स्तुवदाह । वर्णैरित्यादि क्लेश । कतिपयै-
रपरिमितैरेव पञ्चाशतैव मातृकाक्षरैः कतिपये सप्तभिरेव स्वरैर्निषा-
दादिभिः ग्रथितस्य गुम्फितस्य वाङ्मयस्य शब्दजालस्य । एवञ्चोऽपि
नित्य मयप्रविदनि इति स्वार्थे मयट् । गीयत इति गेय तस्य गानस्य
चेव विचित्रता रचना भेदादनन्ता अपरिमिता भवतीत्यर्थः अहो आश्च-
र्येण शब्दोऽपि विशेषानन्त्यात् समापि दृष्टसमर्थोऽविदोमान । एव
दुरवगम्यमेवसौन्दर्य । मदवदर्शितोमादानादनेकैवमदभा ॥ ७२ ॥
बह्वपीति । स्वेच्छया स्वप्रतिभानुसारेण प्रकीर्णमसङ्गत बह्वपि काम
यथेष्टमभिधीयते किन्तु अनुज्झितोऽपरित्यक्त पदार्थ सम्बन्धोऽपि न
प्रबन्ध दुर्लभ दुरुदाहरो दुर्वच । इरते सम् मल्पय । रमेण त
मङ्गमितोऽस्ति विधि स्तुति प्रबन्धमेतेन मिति निन्दा च स-
स्ते ॥ ७३ ॥
म्रदीयसीमिति । मृदुतमा सुकुमारीमपीयमपि श्यामवदना तस्य
मतो च स्पर्शय अनमर्षगुणैरीघत्ताः घनाम् घनत्वोपकल्पितम् ।
मनसैवद्भुमन्तुं दं वेदान्तविरुद्धमप इसिता रचिता निर्मिता च

'प्रसारयन्ति कुशलाश्चित्रां वाचं पटीमिव ॥७४॥
विशेषविदुषः शास्त्रं यत्तवोद्ग्राह्यते पुरः ।
हेतुः परिचयस्थैर्ये वक्तुर्गुणनिकैव सा ॥ ७५ ॥
प्रज्ञोत्साहवतः स्वामी यतेताधातुमात्मनि ।
तौ हि मूलमुदेष्यन्त्या जिगीषोरात्मसम्पदः॥७६॥

चित्रां शब्दादिविचित्रां विचित्ररूपां च वाचं पटीं शाटीमिव प्रसार-
यन्ति रामभागधेय विधेति स्तुतिः रामवाक् तु नैवं विधेति निन्दा च
गम्यते । अत्र श्लेषस्य शुद्धविषया सम्भवेन सर्वालङ्कारबाधकत्वादुपमा-
प्रतिभोत्थापित प्रकृताप्रकृतश्लेषोऽयमित्यलङ्कार सर्वस्वकारः । एवञ्च
पूर्वोपमायां निर्विषयत्व प्रसङ्गात श्लेष प्रतिभोत्थितैयमुपमेत्ये-
त्यन्ये ॥ ७४ ॥

अथोद्धवः स्वसिद्धान्तं वर्णयिष्यन् स्तुत्या गर्वम्परिहरन् हरि-
मभिमुखीकरोति । विशेषेति । विशेषं वेत्ति विशेषविद्वान् तस्य विशेष-
विदुषो विपश्चितः । गतिगम्यादिपाठात् द्वितीयासमासः । तव पुरो-
ऽग्रे शास्त्रं नीतिशास्त्रमुद्ग्राह्यते उपन्यस्यत इति यत् । उद्ग्राहितमु-
पन्यस्तमिति वैजयन्ती । सा तदुद्ग्रहणमित्यर्थः । विधेय प्राधान्यात्
स्त्रीलिङ्गत्वम् । वक्तुः उद्ग्राहयितुः परिचयस्थैर्ये अभ्यासदार्ढ्ये हेतुर्गु-
णनिका आम्रेडितमेवेति यावत् न ते वैदुष्य प्रकटनमिति भावः । गुण
आम्रेडने चौरादिकात् ण्यास श्रन्थोयुजि ति युच् ततः स्वार्थे कन्
कात्पूर्वस्येकारः ॥ ७५ ॥

सम्प्रति स्वमतमुपन्यस्यति । प्रज्ञेति । धनोऽस्मात्कारणात स्व-
मस्यास्तीति स्वामी प्रभुः । स्वामिन्नैश्वर्ये इति निपातः । प्रज्ञोत्साहौ
मन्त्रोत्साहशक्ती आत्मनि स्वस्मिन्नाधातुं सम्पादयितुं यतेत स्वयमुभय-
शक्तिमान् भवेदित्यर्थः । कुत हि यस्मात् तौ प्रज्ञोत्साहौ उदेष्यन्त्या-
न्त्या जिगीषोरात्मनः सम्पदः प्रभुशक्तेर्मूलं निदानम् । यतोत्सा-

रसस्यैकस्य भूयांसस्तथा नेतुर्महीभृतः ॥८७॥
तन्त्रावापविदा योगैर्मण्डलान्यधितिष्ठता ।
सुनिग्रहा नरेन्द्रेण फणीन्द्रा इव शत्रवः ॥८८॥
करप्रचेयामुत्तुङ्गः प्रभुशक्तिं प्रथीयसीम् ।
प्रज्ञाबलबृहन्मूलः फलत्युत्साहपादपः ॥८९॥

दैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः । आनीयमानः स्वादुत्वं स्थायिभावो रसः स्मृत इति । तथा स्थायिनः स्थिरस्य अन्यथा कार्यं प्रतीक्षमाणस्येष्टार्थे एकस्यैव नेतुर्विजिगीषोर्नायकस्यार्थे प्रयोजने भूयांसो महीभृतो राजानः प्रवर्त्तन्ते स्वयमेवास्य कार्यं साधयन्तीत्यर्थः । ततः स्वल्पमिति भावः । केचित्तु भावपदस्यापि रसपरत्वमाश्रित्य यथा शृङ्गारादयः प्रधानादागन्तुकाः अन्ये रसाः स्थायिनः स्थिरस्यैकस्य मुख्यस्यार्थे प्रवर्त्तन्ते । यथा भिन्नेव काव्ये वीरस्य शृङ्गारादय इति व्याचक्षते । उपमालङ्कारः ॥ ८७ ॥

आश्रितस्य एव गुणान्तरमाह । तन्त्रेति । तन्त्रावापौ स्वपरराष्ट्रचिन्तनं अन्यत्र तन्त्रावाप शास्त्रौषधप्रयोगञ्च वेत्ति यस्तेन तन्त्रावापविदा । तन्त्रं स्वराष्ट्रचिन्तायामावापः परचिन्तने शास्त्रौषधप्रधानमुख्येषु तन्त्रमिति वैजयन्ती । योगैः सामाद्युपायैः अन्यत्र देवताध्यानैश्च । योगः संहननोपायध्यानसङ्गतियुक्तिष्वित्यमरः । मण्डलानि स्वपरराष्ट्राणि माहेन्द्रादि देवतायतनानि च अधितिष्ठता अतिक्रमता नरेन्द्रेण राज्ञा विषवैद्येन च । नरेन्द्रो वार्त्तिके राज्ञि विषवैद्ये च कथ्यत इति विश्वः । शत्रवः फणीन्द्रा इव सुनिग्रहाः सुखेन निग्राह्याः । एतच्च प्रकृताप्रकृतविषयः श्लेषः । उपमेति केचित् ॥ ८८ ॥

प्रज्ञोत्साहाभ्यां स्वामीत्यत्रैव तावत् प्रभुशक्तेर्मूलमित्युक्तमन्वदेव ध्वनति । करेति । उत्तुङ्गोऽभ्युन्नतः प्रज्ञा बलं मन्त्रशक्तिरेव बृहत्प्रधानं मूलं तस्य सः उत्साह एव पादपः करेण बलिना

अनल्पत्वात्प्रधानत्वाद्वंशस्येवेतरे स्वराः।
विजिगीषोर्नृपतयः प्रयान्ति परिवारताम् ॥९०॥
अप्यनारभमाणस्य विभोरुत्पादिताः परैः ।
व्रजन्ति गुणतामर्थाः शब्दाइव विहायसः ॥ ९१॥
यातव्यपार्ष्णिग्राहादिमालायामधिकद्युतिः ।

प्रवेशं वर्द्धयन्तीं फलप्राप्तौ च । वनितार्थप्रसरः प्रसरश्चेत्यमरः । प्रथीय-सीं पृथुतराम् । र ऋतो हलादेरिति रेफादेशः । प्रभुशक्तिं तेजोविशेषम् । स प्रतापः प्रभावश्च यत्तेजः कोशदण्डजमित्यमरः । फलति प्रसवतीत्यर्थः । फलनिष्पत्तौ मन्त्रमूलकत्वोत्साहः स्यात् विपरीतस्तु छिन्नमूलोऽङ्कुरइव शुष्यतीति भावः । रूपकालङ्कारः ॥ ८९ ॥

विजिगीषोरपि परेषु विश्वासोऽपि विधेयं स्यादिति लक्षयेणाह । अनल्पत्वा-त्त इत्याद्यधिकत्वादनल्पत्वात् प्रधानता मण्डलाभिव्यक्तत्वादन्यराजसत्त्वादुच्चै-स्तरत्वात् प्रधानत्वान्नायकस्वरत्वाच्च वंशस्य वेणोरिव नायकस्वरस्य इतरे स्वरा गीयमानादिशब्दा इव । अथवा प्राधान्यत्वाद्वंशस्य वंशस्थानात्-सिद्धितः स्वर उच्यते तस्य स्वरस्येतराः षड्जादयः विजिगीषोर्नृपतयः अन्ये मण्डलवर्त्तिनो राजानः परिवारतां दीनतां प्रयान्ति तत्कार्य-मेव साधयन्तीत्यर्थः । तस्मादिदमन्यत्र वर्तं व्यमित्यर्थः ॥ ९० ॥

अपीति । किञ्च अनारभमाणस्य स्वयमकिञ्चित्कुर्वाणस्यापि विभोः प्रभोः व्यापकस्य च परैरन्यैर्नृपतिभिः सङ्घभेदादिभिर्वोत्पा-दिताः सम्पादिताः जनितास्तथार्थाः प्रयोजनानि विहायसः आकाशस्य शब्दा इव गुणतां विशेषतां कारणता इत्यर्थं व्रजन्ति । यस्कोऽपि राजा स्वयं उदासीन एव आसन् अन्यभिर्न्नैव कार्यं दैवं स्यात् तत् एव शब्दाश्च गुणोपेतानि स्वकीयतां भजन्तोऽद्वैः । गुणत्वाद्वायुसिद्धादि-त्वो निगदामल तत्त्वमिति वैभवनी ॥ ९१ ॥

यातव्येति । किञ्च एतावं दण्डयोजनं इत्र दन्तः एवं तव

एकार्थतन्तुप्रोतायां नायको नायकायते॥९२॥
षाड्गुण्यमुपयुञ्जीत शक्त्यपेक्षं रसायनम्।
भवन्त्यस्यैवमङ्गानि स्थास्नूनि बलवन्ति च॥९३॥
स्थाने शमवतां शक्त्या व्यायामे वृद्धिरङ्गिनाम्।

प्रोतायां एकार्थोऽभिन्नाभिप्रायो मिथः। अपूर्वोद्देशे कर्मणि प्र' श्विस्वपीळ्वादिना सम्प्रसारणम्। यातव्योऽपि पेषणीयत्व' अरि' पार्ष्णि-गृह्णातीति पार्ष्णिग्राहः पृष्ठानुधावी। कर्मण्यण्। तावादौ येषां ते पर्यन्ताः पङ्क्तयः स्थिताः तत्र माला रत्नमालिका तस्यामधिरत्न ति-महातेजाः नायकः शक्तिसम्पन्नो जिगीषुर्नायकायते मध्यमणिरिवाचरति स्वयमेव सर्वोत्कर्षेण वर्तते इत्यर्थः। तस्मात्तिस्र एव कर्तव्यमिति भावः। नायको नेतरि श्रेष्ठे हारमध्यमणावपीति विश्वः। उपमानादाचार इति क्यच् अकृत्सार्वधातुकयोरिति दीर्घः। नायकायते इत्युपमा। अन्यथा तन्तुपाश-नविरोधात् एकार्थतन्त्विति तु रूपकमभिमतमिति धानेन चारोपमाण-तन्तुत्वस्यैवोद्भटत्वात् प्रोतत्वसिद्धेस्तदेव युक्तम्। तन्तुतात्पर्यात्यरादि-मालायामित्यत्रापि रूपकमेव। तदनु प्रासिता वेयमुपमेत्यङ्गाङ्गिभावेन तयोः सङ्करः॥ ९२॥

अथ विस्तरकरणप्रकारमाह। षाड्गुण्यमिति। शक्तिं प्रभावादित्रयं बलं धार्यते इति शक्त्यपेक्षः यत् पञ्चा...। शक्तिर्बले प्रभावादाविति विश्वः। सन्ध्यादयः षड्गुणाः एव षाड्गुण्यम्। चातुर्वर्ण्या-दित्वात् स्वार्थे ष्यञ् प्रत्ययः। तदेव रसायनमौषधविशेषमुपयुञ्जीत सेवेत रसायनं जिह्वेऽपि जराव्याधिविदौषधमिति विश्वः। एवं षाड्गुण्य प्रयोक्तु रङ्गानि स्वाम्यादीनि गात्राणि च स्थास्नूनि स्थिराणि कालान्तरक्षमाणी-त्यर्थः। ग्लाजिस्थश्च ग्स्नुः। बलवन्ति च परपीडाक्षमाणि च भव-न्ति। श्लिष्टपरम्परितरूपकम्॥ ९३॥

स्थाने इति। किञ्च स्थाने युक्तमित्यर्थे शमवतां शमावतां वृद्धिर्ना

अयथाबलमारम्भो निदानं क्षयसम्पदः ॥ ९४ ॥
तदीशितारं चेदीनां भवांस्तमवमंस्त मा ।
निहन्त्यरीनेकपदे य उदात्तः स्वरानिव ॥ ९५ ॥
मा वेदि यदसावेकोजेतव्यश्चेदिराडिति ।

यष्टॄणां राज्ञां शरीरिणाञ्च यक्ष्मा प्रभावादयुत्साहेन बलेन च व्यायामे व्यापारे षाड्गुण्यप्रयोगे गमनादौ च सतीत्यर्थः इद्धिरुपचयः राज्यस्य शरीरस्य चेति भावः । विपक्षे बाधकमाह । अयथाबलं शक्त्यतिक्रमेण । यथाशब्दस्याव्ययी भावे नञ् समासः । आरम्भो व्यायामः क्षयसम्पदोऽत्यन्तहानेर्निदानं आदिकारणं अङ्गानामिति भावः । तस्मादस्माकमक्षमस्य स्यन्दनमश्रेयस्करमिति भावः । अत्र विशेषस्यापि श्लिष्टत्वात् सन्दर्भितशब्दोत्थवस्तुना वस्तुध्वनिः । अतोऽद्वयानामङ्गिनामौपम्यञ्च गम्यते इति सङ्क्षेपः ॥ ९४ ॥

फलितमाह । तदिति । तत्तस्मादशक्यार्थोऽकार्य्यत्वात्तं चेदीनामीशितारं शिशुपालं भवान् मावमंस्त मावजानातु । मन्यतेर्माङि लुङ् अनुदात्तत्वादिडागमः । कुतो यश्चैद्यः उदात्तः स्वरान् अनुदात्तानिवारीनेकपदे एकस्मिन्नुपदन्यासे इत्यत्र नक्षये च निहन्ति छिनत्ति नीचैः करोति च अतिशूरत्वात् अनुदात्तं पदमेकवर्जमिति परिभाषावलाच्चेति भावः ॥ ९५ ॥

न चायमेकाकी किं नः करिष्यतीति मन्तव्यमित्याह । मावेदीति असौ चेदिराट् एकः एकाकी अतोजेतव्यः सुजय इति मा वेदि मा ज्ञायि । वेत्तेः कर्म्मणि माङि लुङ् । यद्यस्मात् चेदिराट् राजयक्ष्मा राजा चासौ यक्ष्मेति वा राज्ञ यक्ष्मा क्षयरोगोरोगान्तराभिर् भिर्महीभृतां समूहः समष्टिरूपः । तथाह वाग्भटः । अनेकरोगानुगतो बहुरोगपुरःसरः । राजयक्ष्मा क्षयः शोषोरोगराडिति च स्मृत नक्षत्राणां द्विजानां च राजोऽभूद्यदयं पुरा । यच्च राजा च यक्ष्मा च

राजयक्ष्मेव रोगाणां समूहस्स महीभृताम् ॥९६॥
सम्पादितफलस्तेन सपक्षः परभेदनः ।
कार्मुकेणेव गुणिना बाणस्सन्धानमेष्यति ॥९७॥
ये चान्ये कालयवनशाल्वरुक्मिद्रुमादयः ।
तमःस्वभावास्तेऽप्येनं प्रदोषमनुयायिनः ॥९८॥
उपजापः कृतस्तेन तानाकोपवतस्त्वयि ।
आशु दीपयिताल्पोऽपि साग्नीनेधानिवानिलः ९९

राजयक्ष्मा क्षयरोग इति । सतो दुर्जेय इति भाव. । एतेन चिरस्य मिलत्वमुक्तं सद्भेदस्याभावोऽत्र इति निरस्तम् ॥ ९६ ॥

अथास्य सर्वराजसङ्घटितामेव शक्तिं व्याचष्टे । सम्पादितेति सम्पादितं फलं लाभो बाणाग्रं च यस्य स. । फलं लाभशराग्रयोरिति शाश्वत । सपक्षः सहायसम्पत्तियुतश्च परैश्चाश्चर्यकः शत्रुविदारकः बाणो बाणासुरः शरश्च । गुणिना शौर्यादिगुणवता मौर्व्या च तेन चैद्येन कर्मण्ये प्रभवतीति कार्मुकम् । कर्मण उकञ् । तेनैव सन्धानं सन्धिमेष्यति अतोऽनेकाकीति भाव । अत्राप्युपमा श्लेषो वा सकलभेदात् ॥ ९७ ॥

ये चेति । ये चान्ये कालयवनशाल्वरुक्मिद्रुमादयो राजानः तमःस्वभावाः तमोगुणात्मकाः अतएव तेऽपि प्रदोषं प्रकृष्टदोषम् । प्रदोषो दुष्टो रात्रिमुखं चेति वैजयन्ती । तामसमेनं चैद्यमनु यायिन अनुयास्यन्ति आवश्यकादिति भावः । भविष्यति गम्यादय इति णिनिर्भविष्यदर्थे अकेनोर्भविष्यदाधमर्ण्ययोरिति षष्ठीप्रतिषेधात् द्वितीया । यथा ध्वान्तजनीमुखमनुयाति तद्वत् इति वस्तुना अलङ्कारध्वनि. ॥ ९८ ॥

ननु बाणादयोऽस्माभि. कृतसन्धाना इदानीं विराधयन्तीत्यत आह । उपेति । तेन चैद्येन कृतोऽल्पोऽपि उपजापो भेद. । भेदो

बृहत्सहायः कार्य्यान्तं क्षोदीयानपि गच्छति ।
सम्भूयाम्भोधिमभ्येति महानद्या नगापगा ॥१००॥
तस्य मित्राण्यमित्रास्ते ये च ये चोभये नृपाः ।
अभियुक्तन्त्वयैनन्ते गन्तारस्त्वामतः परे ॥ १०१ ॥
मखविघ्नाय सकलमित्थमुत्थाप्य राजकम् ।

यतापापित्यमरः । त्वयाक्रान्तस्तान् वाय्वादीन् इनिव मार्गानेधान्-
धनमीरः । काष्ठं दार्विन्धनं त्वेध इध्ममेध समित् स्त्रियामित्यमरः ।
धातु दीपयिता यद्व मरुत्वर्द्धयति दीपयत्यनलमित्यर्थः । अनेन रा.
महितापापदि मति रक्ष्ये मद्यो निक्षिपन्तीति भावः ॥ ९९ ॥

नत विमतयाह । बृहदिति । बृहत्सहायो महासहायवान्
क्षोदीयान् क्षुद्रतरोऽपि । स्थूलदूरेत्यादिना यणादिपरलोपः पूर्व्व
गुणश्च । कार्य्यान्तं पारङ्गच्छति । तथा हि नगापगा नगजापगा ।
नग्नस्य इत्यम् । तेन नगोत्थापगा नगापगा गिरिनदी महो-
नद्या गङ्गादिकया सम्भूय मिलित्वा अम्भोधिमभ्येति । क्षुद्रोऽप्येवं
तादृक् महाशीरवं याम् किमु पक्षस्य इत्यपि महार्थं । विशेषेण सामा-
न्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ १०० ॥

किञ्च न केवलं मनोरथमात्रं मित्रविरोधवाधिकोऽनर्थकर इत्याह
तस्येत्यादिश्लोकेन । ये च तस्य चैद्यस्य मित्राणि तथा ये च ते तवामित्रा-
स्तथा ते उभये त्वयाभियुक्तमभियातमेनं चैद्यं गन्तारो गमिष्यन्ति । गमे-
र्लुट् । अतः परे उभयव्यतिरिक्तास्तु मित्रापि तवामि-
त्रापेक्षया त्वां गन्तारः ॥ १०१ ॥

नत विमतमाह । मखेति । इत्थमनेन प्रकारेण । इत्थमव्ययमिति
मखुरन्दनः । मखविघ्नाय मखविघाताय सकलं राजकं राज्ञां समूहम् ।
गोत्रोक्षेत्यादिना वुञ् । उत्थाप्य चोदयित्वा इत्यं प्रति छेदे समाप्ते

हन्त जातमजातारेः प्रथमेन त्वयारिणा ॥ १०२ ॥
सम्भाव्य त्वामतिभरक्षमस्कन्धं स बान्धवः ।
सहायमध्वरधुरां धर्मराजो विवक्षते ॥ १०३ ॥
महात्मानोऽनुगृह्णन्ति भजमानान् रिपूनपि ।
सपत्नीः प्रापयन्त्यब्धिं सिन्धवो नगनिम्नगाः ॥ १०४ ॥
चिरादपि बलात्कारो बलिनः सिद्धयेऽरिषु ।

अजातशत्रोर्युधिष्ठिरस्य त्वया प्रथमेनारिणा जातमजनि । नपुंसके भावे क्तः ॥ १०२ ॥

अस्तु सोऽपि खलु कोदोषस्तत्राह । सम्भाव्येति । बन्धुरेव बान्धवः स धर्मराजः अतिभरस्य क्षमः स्कन्धो यस्य तं त्वां सहायं सम्भाव्याभिसम्भाव्य अध्वरस्य धुरमध्वरधुरां । ऋक्पूरित्यादिना समासान्तोऽप्रत्ययः । समासान्तानां प्रकृतिलिङ्गत्वात्तत्पुरुषे परवल्लिङ्गत्वे टाप् । विवक्षते वोढुमिच्छति । वहतेः स्वरितेत्त्वात् सन्नन्तात्तङ् । तथाहि विरोधे विश्वासघातोऽभ्युद्रोहश्च स्यातामिति भावः ॥ १०२ ॥

ननु प्रतिश्रुत्याकरणे दोषः प्रागेव परिहारे तु कोदोषस्तत्राह । महात्मान इति । महात्मानो भजमानान् शरणागतान् रिपूनप्यनुगृह्णन्ति किमुत बन्धूनिति भावः । अर्थान्तरन्यासमाह । सिन्धवो महानद्यः समानः एकः पतिर्यासां ताः सपत्नीः । नित्यं सपत्न्यादिष्विति ङीप् नकारश्च । नगनिम्नगाः गिरिनिर्झरिणीः अब्धिं प्रापयन्ति सपत्नीभावं ताश्च प्रयच्छन्तीति भावः । अतः परिहारोऽप्यनर्थ इति भावः ॥ १०४ ॥

तर्हि सम्प्रत्युपेक्षायामपि पश्चात्साधनया पार्थमार्जपर्यवसितम् आह । चिरादिति । बलिनः स्वयं बलवतोऽप्यरिषु सिद्धये बलात्कारो-दण्डः चिराच्चिरकालेनापि सद्योऽभूदिति भावः सिद्धये पर्याप्तद्वय-सिद्धये भवतीति शेषः । धर्मिणश्चो विषमस्य सम्पद्यमाना सता विपर्ययीकृत-वैषम्यस्य मापिता द्रुतं । आरम्भगतस्य चेतोरश्लोरमशी कोपयन्ति

छन्दानुवृत्तिदुःसाध्याः सुहृदोविमनीकृताः॥१०५॥
मन्यसेऽरिवधः श्रेयान् प्रीतये नाकिनामिति ।
पुरोडाशभुजामिष्टमिष्टङ्कर्तुमलन्तराम् ॥ १०६ ॥
अमृतं नाम यत्सन्तोमन्त्रजिह्वेषु जुह्वति ।

भिप्रायस्तदनुवृत्तिरेव यस्य चानुवृत्तिकारः । शोभनं हृदयं येषां ते सुहृदो-
मित्राणि च । सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातः । छन्दोऽभि-
प्रायस्तदनुवृत्त्या चित्तानुरोधेनापि दुःसाध्या आराधयितुमशक्या
इत्यर्थः । अभिप्रायश्छन्द आशय इत्यमरः । एतैः शत्रुवधेनापि यथो-
भवति मित्रं वैमनस्ये न प्राप्नोतीति भावः ॥ १०५ ॥

ननु सुहृत्कार्यात् सुरकार्यं गरीय इत्यत आह । मन्यस इति ।
नाकिनां प्रीतये अरिवधः श्रेयान् प्रशस्ततरः । प्रशस्यस्य श्र इति
श्रादेशः । इति मन्यसे चेत् तर्हि पुरोडाशभुजां हविर्भोजिनां अतएव
नाकिनामिष्टमभीप्सितं कर्तुं । इषेः कर्मणि क्तः । इष्टं इष्टिः याग
इति यावत् । यजेर्भावे क्तः वचिस्वपीत्यादिना सम्प्रसारणम् । अलन्तरा-
मतिपर्याप्तम् । अव्ययात्तरप्प्रत्यय आम्वागमश्च । शत्रुवधादपि प्रिय-
करो याग एव नाकिनां भुक्त्यादिदानात् वधस्य सुकरत्वादिति भावः ॥ १०६ ॥

तथापि यज्ञहविर्भिरमीषां देवानां किमेभिः दिवि भक्ष्य प्रलोभनैरत
आह । अमृतमिति । अमृतं नाम सन्तो विद्वांसः मन्त्रा एव जिह्वा येषां
तेषु मन्त्रजिह्वेष्वग्निषु । मन्त्रजिह्वः सप्तजिह्वः शुचिर्होता हव्यवाहन
इति वैजयन्ती । यत्पुरोडाशादिकं जुह्वति तदेवेति शेषः यज्ञशेषनि-
[illegible] । मन्त्र एव दुग्धोदधिमन्थन दण्डः । सुधाध्मानमित्यादिना-
विवर्त निराकरणात् सिद्धम् । तेन क्षुभितस्य पयोधेः [illegible]
[illegible] अन्यथा [illegible] एव । [illegible] ततस्तुल्यादिन मिति यतः सोऽपि-
[illegible] इति भावः । [illegible]
[illegible] ॥ १०७ ॥

शोभैव मन्दरक्षुब्धक्षुभिताम्भोधिवर्णना ॥ १०७ ॥

सहिष्ये शतमागांसि सूनोस्त इति यत्त्वया ।
प्रतीच्यं तत्प्रतीच्छायै पितृष्वस्रे प्रतिश्रुतम् ॥ १०८ ॥

तीक्ष्णा नारुन्तुदा बुद्धिः कर्म शान्तं प्रतापवत् ।
नोपतापि मनः सोष्म वागेका वाग्मिनस्तव ॥ १०९ ॥

स्वयङ्कृत प्रसादस्य तस्याह्नोभानुमानिव ।
समयावधिमप्राप्यनान्तायालमसावपि ॥ ११० ॥
कृत्वा कृत्यविदस्तीर्थैरन्तः प्रणिधयः पदम् ।
विदाङ्कुर्वन्तु महतस्तलं विद्विषदम्भसः॥१११॥
अनुत्सूत्रपदन्यासा सद्वृत्तिसन्निबन्धना ।

अथ समयाभावे चैद्यवध इत्याह । स्वयमिति । किञ्च अह्नो भा-
नुमानिव स्वयं कृतः प्रसादोऽनुग्रहः । प्रकाशश्च यस्य तस्य चैद्यस्यान्ताय
समयावधिं नियतकालावसानं अप्राप्य असावपि नालं शक्तो न तथा च
[illegible]र्निर्देशान्यथ किञ्चित् फलं स्यादिति भावः ॥ ११० ॥

तर्हि किमयमुपेक्ष्य एव नेत्याह । कृत्वेति । किन्तु कृत्यविदः
कार्यज्ञाः निधिदाश प्रणिधीयन्त इति प्रणिधयो गूढचारिणः । प्रणि-
धिर्गूढचर इति । हलायुधः । तीर्थैरिति तीर्थानि मन्त्र्याद्यष्टाद-
शस्थानानि तत्रस्थैरेव । योनौ जलावतारे च मन्त्र्याद्यष्टादशस्वपि ।
पुण्यक्षेत्रे तथा पात्रे तीर्थं स्यादिति हलायुधः । तैरन्तः पदं स्थानं
[illegible] च कृत्वा महतोऽप्यगाधस्य दुर्लङ्घ्यस्य च विद्विषत् [illegible]
तस्य तलं स्वरूपं प्रमाणमिति यावत् । अधः स्वरूपयोरस्त्री तलमित्य-
मरः । विदां कुर्वन्तु विदन्तु । विद ज्ञाने लोट् । विदां कुर्वन्त्वित्य-
न्यतरस्यामिति । [illegible] । [illegible] प्राणिनः प्रविश्य [illegible] । श्लिष्टपरम्परित-
रूपकम् ॥ १११ ॥

शास्त्रमन्तर्भेदेनाह । अनुत्सूत्रेति । उत्सूत्र उच्छास्त्रो [illegible]
[illegible]
[illegible]
[illegible]

शब्दविद्येव नो भाति राजनीतिरपस्पशा॥११२॥
अज्ञातदोषैर्दोषज्ञैरुद्दूष्योभयवेतनैः।

सूत्राकारैरेव ग्रन्थार्थप्रतिपादकोऽन्यासो वृत्तिव्याख्यानग्रन्थविशेषो यस्यां सा तथोक्ता तथा सती यथार्थकल्पनया शोभना वृत्तिर्व्याख्यात्या- दीनामाजीविका यस्यां सा सद्वृत्तिः अन्यत्र सती वृत्तिः काशिकाख्य न्यास व्याख्यान ग्रन्थविशेषो यस्यां सा। वृत्तिर्भृत्यजीवनयोरिति वैजयन्ती। सन्ति निबन्धनानि अनुजीव्यादीनां क्रियावेतनेषु दत्तानि गोहिरण्यदियाश्च पारितोषिकदानानि यस्यां सा, एतच्च दत्त्वा भूमिनिबन्धनमेतत् तद्वचन व्याख्याने मिताक्षरायां द्रष्टव्यम्। अन्यत्र सन्निबन्धनं भाष्यग्रन्थो यस्यां सा एवं भूतापि राजनीतिः राजवृत्तिः अगतः स्पशः चारो यस्यां सा अपस्पशा चेत्। यथार्हवर्णो मन्त्रज्ञः स्पशो गूढचर इति हलायुधः। अन्यत्र दर्शयमानः पस्पशः शास्त्रारम्भसमर्थक उपोद्घात सन्दर्भ ग्रन्थो यस्याः सा अपस्पशा शब्दविद्या व्याकरणविद्येव नो भाति न शोभते तस्याधिरप्रवेशमावश्यकं तद्विहीनस्य राज्ञोऽस्थायित्वादिति भावः। अत्रापस्पशेत्यत्र तद्भावश्चान्द्रयोरेव शिष्टत्वाच्छब्दश्लेषः सद्वृत्तिः सन्निबन्धनेत्यत्रैकरत्नात्मकमपि फलद्वयस्पर्श- श्लेषः। अनुत्सूत्रपदन्यासेत्यत्र तूभयसम्भवादुभयश्लेषः। शब्दविद्येवेति पूर्णोपमा व्यक्तैव तयोः सापेक्षत्वात् सङ्करः ॥ ११२ ॥

न केवलं स्वारस्येन वृत्तान्तज्ञानमपि तु उपजापश्च कर्त्तव्य इत्याह। अज्ञातेति। अज्ञातदोषैः परैरज्ञातस्वकर्मभिर्दोषज्ञैः, स्वयं परमर्म- ज्ञैरभिज्ञानि भेद्याय प्रकटितानि शासनानि तद्भृत्यावृत्तिविषयक- णि कूटलिखितानि येषां तैः उभयवेतनैः उभयत्र भेद्ये स्वामिनि च वेतनं भृतिर्येषां तैः उभय वीथिकापाहिभिः भेद्यनगरप्रवेशक्रिश्चरै- रित्यर्थः। भृतयोर्भर्म वेतनमित्यमरः। शत्रोः सम्बन्धिनः समवायं समवयन्ति इति सामवायिकाः मन्त्रसचिवादयः। समवायात् सम- नौति ठक्। उद् द्विष्य द्विणमेते इत्तरूसा, अस्माभिरेषां विश्वासदेव

भेद्याः शत्रोरभिव्यक्तशासनैः सामवायिकाः ॥११३॥
उपेयिवांसि कर्तारः पुरीमाजातशात्रवीम् ।
राजन्यकान्युपायज्ञैरेकार्थानि चरैस्तव ॥११४॥
सविशेषं सुते पाण्डोर्भक्तिं भवति तन्वति ।
वैरायितारस्तरलाः स्वयं मत्सरिणः परे ॥११५॥

य इहात्मविदो विपक्षमध्ये
सह संवृद्धियुजोऽपि भूभुजः स्युः ।

स्फुटीकृतानि एतच्छासनैः घटिता भेद्याः विघटनीयाः ॥ ११३ ॥

उपेयिवांसीति । किञ्च उपायज्ञैः कार्यसाधनकुशलैः तव चरैः गूढचारिभिः । चरट् । एकार्थानि त्वया सहैकप्रयोजनानि राजन्यकानि राजन्यसमूहाः । गोत्रोक्षेत्यादिना वुञ् । अजात-शत्रोरिमामाजातशात्रवीं पुरीं इन्द्रप्रस्थमुपेयिवांसि प्राप्नुवन्ति । उपे-यिवानित्यादिना क्वसुप्रत्ययो निपातः । कर्तारः करिष्यन्ति । कृञः कर्मणि लुट् । इन्द्रप्रस्थेऽपि यज्ञकार्यमभिप्रेत्य तत्कारणस्याव्याजेन एवंवैरायमाणानपि सुहृदं करिष्यन्ति तत्र कर्तुं मेलयितव्य इत्यर्थः ॥११४॥

ननु तथापि रागद्वेषादिशत्रुत्वात् तत्रैव अकृत्यकृ-द्वेषं सम्पादयति । सविशेषमिति । पाण्डोः सुते युधिष्ठिरे भवति पूज्ये त्वयि सविशेषं यथा तथा भक्तिं तन्वति सति तरलाश्चपला मत्स-रिणो द्वेषिणः परे शत्रवः स्वयमेव वैरायितारः वैरं कर्तारः शब्दवैर-कलहेत्यादिना क्यङ् ततः कर्तरि लुट् ॥११५॥

किमेतावदेव वैरायितत्वमेतेषामित्याह । य इति । ये इह विपक्ष-मध्ये शत्रुमध्ये सह संवृद्धियुजोऽपि ऐक्येन सहैश्वर्यवृद्धा अपि । सह विद्यमानादिना विगृह्य । ते भूभुजो राजानः आत्मविदः स्वामिसम्बन्धिनः स्युः सम्भूय प्रतिकूलत्वात् आत्मानं ज्ञात्वा । कालेन कटाक्षिताश्चिरसुहृत्स-

वलि पुष्टकुलादिवान्यपुष्टैः
पृथगस्मादचिरेण भाविता तैः ॥ ११६ ॥

सहजचापलदोषसमुद्धत
श्चलितदुर्बलपक्षपरिग्रहः ।
तव दुरासदवीर्य्यविभावसौ
शलभतां लभतामसुहृद्गणः ॥ ११७ ॥

इति विशकलितार्थामौद्धवीं वाचमेना
मनुगतनयमार्गामर्गलां दुर्नयस्य ।

त्यमरः । अन्यपुष्टैः परभृतैरिव चिरेण सद्योऽस्मात् विपक्षा-द्ध्यात् । अन्यपुष्टादिशब्दानामन्यपुष्टस्यार्थे परत्वात् धर्मादिप्रयोगेऽपि पक्षो ऽस्माभिर्भाविता पृथग्भविष्यते । भावे लुट् । चिण्वदिति वृद्धिः । तेष्वपि केचिदस्माभिः सह स्थास्यन्त इत्यर्थः । औपच्छन्दसिकं वृत्तम् ॥ ११६ ॥

अथ फलितं नियमयन्नाधिप प्रयुङ्क्ते । सहजेति । सहजं स्वाभाविकं चापलं दुर्विनीतत्वं अनवस्थितत्वं च । चपलः पारदे शीघ्रे दुर्विनीतेऽनवस्थित इति वैजयन्ती । तेनैव दोषेण समुद्धतो दृप्तः पक्षः सहायो गरुच्च । पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिष्विति वैजयन्ती । चलितोऽस्थिरो-दुर्बलपक्षपरिग्रहो यस्य सः असुहृद्गणः शत्रुवर्गः तव दुरासदवीर्यविभावसौ दुष्प्रसहतेजोवह्नौ । वीर्यं शुक्रे प्रभावे च तेजःसामर्थ्ययोरपि । सूर्ये वह्नौ विभावसुरिति विश्वामरौ । शलभतां पतङ्गत्वम् । समौ पतङ्गशलभावित्यमरः । भावे तल् । लभतां गच्छतु । रूपकालङ्कारः । द्रुतविलम्बितं वृत्तम् ॥ ११७ ॥

इतीति । स हरिः इत्थं विशकलितार्थां विवेचितार्थां अनुगतनयमार्गां नीतिमार्गानुसारिणीं दुर्नयस्य पक्षभङ्गादावृभस्येत्यर्थः । अर्गलां निवारयित्रीं इति वैधर्म्यरूपकालङ्कारः । तद्विष्कम्भोऽर्गलं न ना इत्यमरः ।

जनितमुदमुदस्थादुच्चकैरुच्छ्रितोरः
स्थलनियतनिषण्णश्रीश्रुतां शुश्रुवान् सः ॥ ११८॥

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये
द्वितीयः सर्गः ॥ २ ॥

अतएव जनितमुदं हरेः कृतानन्दां उच्छ्रिते उन्नते उरःस्थले नियतं निषण्णया अविश्लेषमाश्रितया श्रिया श्रुतां नान्यथेति मन्त्रगुप्तिः उद्धवस्य आमीद्धवीं एनां पूर्वोक्तां वाचं शुश्रुवान् श्रुतवान्। भाषायां सदवसश्रुवः इति क्वसुः। उच्चैरित्योच्चकैरुद्धतः सन्। अव्ययसर्वनाम्नामकच् प्राक् टेरित्यकच् प्रत्ययः। उदस्थादासनादुत्थितवान्। उदोऽनूर्द्धकर्म्मणि इत्यस्य प्रत्युदाहरणमेतत्। ननमययगभोगिलोकैरिति। मालिनी वृत्तम् ॥ ११८ ॥

इति श्रीमल्लिनाथसूरिविरचिते माघकाव्यव्याख्याने सर्वङ्कषाख्ये
द्वितीय सर्गः ॥ २ ॥

तृतीय सर्गः

कौवेरदिग्भागमपास्य मार्ग्ग

मागस्त्यमुष्णांशुरिवावतीर्ण्णः ।

अपेतयुद्धाभिनिवेशसौम्यो

हरिर्हरिप्रस्थमथ प्रतस्थे ॥ १ ॥

जगत्पवित्रैरपि तन्न पादै

स्प्रष्टुं जगत्पूज्यमयुज्यतार्क्कः ।

कौबेरेति । अथो ह्रस्वप्रकारान्तरमपेतो युद्धे अभिनिवेश आ-ग्रहो यस्य स शान्तकोप इत्यर्थः । अतएव सौम्यः प्रसन्नः अतएव कौबेर्य्या दिशो भागमुत्तरायणमित्यर्थः । स्त्रियां पुंवदित्यादिना पुंवद्भावः । समपास्यागस्त्यस्य समागस्त्यं मार्ग्गमवतीर्ण्णः दक्षिणायनगत इत्यर्थः उष्णांशुरिव स्थितः । अनेन हरेः क्रोधः कार्य्यं यथाकालमन्तःसन्निहितो-न तु सर्वात्मना निवृत्त इति सूचितं हरिः कृष्णः हरिप्रस्थमिन्द्रप्रस्थं प्रतस्थे प्रचचाल । इन्द्रोऽश्वचन्द्रोऽर्कहरि रिति हलायुधः । समवप्रविभ्यः स्थ इत्यात्मनेपदम् । देशकालाध्व गन्तव्याः कर्म्मसंज्ञा ह्यकर्म्मणामिति गन्तव्यकर्म्मत्वम् । उपमालङ्कारः । सर्गेऽस्मिन्निन्द्रोपेन्द्रवज्रामिश्रणादुपजातिवृत्तम् । अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ता इति लक्षणात् ॥ १ ॥

अथास्य प्रस्थानप्रकारं वर्णयन्नादौ फलधारणमाह । जगदिति । अर्क्कोऽजगत्पूज्यं तं हरिं अतएव जगत्पवित्रैरपि पादैः करैः शिरसि स्पृष्टुं नायुज्यत नार्हति । युक्ते द्वैमादिकात्कर्त्तरि लङ् । अतः

यतोवृहत्पार्श्वग चन्द्रचारु
तस्यातपत्रं बिभरांबभूवे ॥ २ ॥
मृणालसूत्रामलमन्तरेण
स्थितश्चलच्चामरयोर्द्वयं सः ।
भेजेऽभितः पातुकसिद्धसिन्धो-
रभूतपूर्व्वां रुचमम्बुराशेः ॥ ३ ॥
चित्राभिरस्योपरि मौलिमालाम्
भाभिर्मणीनामनणीयसीभिः ।

[illegible] हरेः [illegible] पार्श्वगचन्द्रचारु पूर्णेन्दु सुन्दरमित्युपमालङ्कारः [illegible] छत्रम् । [illegible] । दिग- [illegible] ॥ २ ॥

अथ चामरधारणमाह । मृणालेति । 'मृणालसूत्रामल' [illegible] । चलती च ते चामरे च चलच्चामरे [illegible] इति भावः । तयोर्द्वयमन्तरेण [illegible] मध्ये [illegible] । [illegible] । [illegible] पातुका [illegible] । [illegible] ॥ ३ ॥

अनेकधातुच्छुरिताश्मराशे

र्गोवर्द्धनस्याकृतिरन्वकारि ॥ ४ ॥

तस्योल्लसत्काञ्चनकुण्डलाग्र

प्रत्युप्तगारुत्मतरत्नभासा ।

अवाप बाल्योचितनीलकण्ठ

पिच्छावचूडाकलनामिवोरः ॥ ५ ॥

तमङ्गदे मन्दरकूटकोटि

व्याघट्टनोत्तेजनया मणीनाम् ।

अथास्य शिरःप्रसाधनविधिं वर्णयन् मुकुटधारणमाह । चित्रा-भिरिति । अस्य हरेरुपरि ऊर्ध्वदेशे मौलिभागे मौलिभाजां मुकुटग-तानां मणीनामणीयसीभिर्दृश्यतीभिश्चित्राभिरनेकवर्णाभिर्भाभिः प्रभाभिः कलीभिः । स्युः प्रभारुग्रुचिस्त्विड्भा भाश्छविद्युतिदीप्तय इत्यमरः । आ-नयच्छ शोभने इत्यादिनायोर्थकारे तस्य हलि सर्वेषामिति लोपः । अ-नेकैर्धातुभिर्गैरिकादिभिश्छुरितानां खचितानामश्मनां मणीनां राशिः समूहो यस्य तस्य गोवर्द्धनाख्यस्य पर्वतस्याकृतिरन्वकारि अनुकृता तस्मात्पादस्य सभाजीत्यर्थः । पूर्णोपमेयम् ॥ ४ ॥

कुण्डले च धृते इत्याह । तस्येति । तस्य हरेरुर उरस्थलमुल्लसन्त्या का-ञ्चनकुण्डलाग्रयोः प्रत्युप्तानां खचितानां गारुत्मतरत्नानां मरकतमणीनां भासा दीप्त्या उरसि प्रसरन्त्येति भावः । बाल्यं शैशवम्, ब्राह्मणादित्वात् ष्यञ् । तत्रोचितमभ्यस्तं यन्नीलकण्ठपिच्छं मयूरबर्हम् । "अभ्यस्तेऽप्युचित न्याय्ये इति यादवः । पिच्छबर्हे नपुंसके इत्यमरः । तेन निर्मि-तावचूडा मालिका तस्याः कलनामामोचनमवमोचनं वा अवापेवेत्युत्प्रेक्षा यत्रान्यधर्मः सम्बन्धादन्यत्रैवोपलक्षितम् । प्रतीते हि भवेत्साक्षात्स उत्प्रेक्षा प्रकीर्तिता इति लक्षणात् ॥ ५ ॥

बंहीयसा दीप्तिवितानकेन

चकासयामासतुरुल्लसन्ती ॥

निसर्गरक्तैर्वलयावनद्ध

ताम्राश्मरश्मिच्छुरितैर्नखाग्रैः

व्यद्योततद्यापि सुराद्रिवप्रो

विक्षोभजासृक्स्नपितैरिवासौ ॥ ७ ॥

उभौ यदि व्योम्नि पृथक् प्रवाहा

वाकाशगङ्गापयसः पतेताम्।

तमङ्गदे इति । तं हरिं मन्दरकूटकोटिव्याघट्टनं मन्दराचल-
शिखराग्रसङ्घर्षणं तेनोत्तेजना शाणोल्लेखना तया बंहीयसा बहुतरेण -
प्रियस्थिरेत्यादिना बहुलशब्दस्येयसुनि बंहादेशः । मणीनां दीप्तिविता-
नकेन प्रभापटलेन उल्लसन्ती दीप्यमाने । [illegible] तुमी-
[illegible] । अङ्गदे केयूरे । केयूरमङ्गदं तुल्ये इत्यमरः । चकासयामा-
सतुः शोभयामासतुः अङ्गदे इति कर्तृनिर्देशः । चकास्तेर्ण्यन्तात् लिटि आम्-
[illegible] । अङ्गदयोः [illegible] भेदेऽप्यभेदोक्तिरूपो[illegible]
[illegible] द्वयोरतिशयोक्त्योः सङ्करः ॥ ६ ॥

निसर्गेति । असौ हरिर्निसर्गरक्तैः स्वभावलोहितैः [illegible]
[illegible] कटके । कटकं वलयोऽस्त्रियामित्यमरः । तयोरवनद्धानां [illegible]
[illegible] रश्मिभिः छुरितैः [illegible] सुराद्रेर्मेरो-
[illegible] विक्षोभेण जाता या असृक् तया स्नपितैः
[illegible] । [illegible] व्यद्योतत । कटके च [illegible] ॥ ७ ॥

[illegible]

तेनोपमीयेत तमालनील-
मामुक्तमुक्तालतमस्य वक्षः ॥ ८ ॥
तेनाम्भसां सारमयः पयोधे-
र्दध्रे मणिर्दीधितिदीपिताशः ।
अन्तर्वसन् बिम्बगतस्तदङ्गे
साक्षादिवालक्ष्यत यत्र लोकः ॥ ९ ॥
मुक्तामयं सारसनावलम्बि
भाति स्म दामाप्रपदीनमस्य ।

दीर्घत्वसाम्येन मौक्तिकहारौ यस्मिन् तदस्य हरेर्वक्षः आकाशगङ्गायाः पयसः उभौ प्रवाहौ व्योम्नि यदि पृथक् पतेतां प्रवहेतां चेत् । सम्भावनायां लिङ् । तेन व्योम्नोपमीयेत समीक्रियेत नान्योपमानं किञ्चिदस्तीति भावः । मुक्ताहारं धृतवानित्यर्थः । अत्र व्योम्नो गङ्गाप्रवाहद्वयासम्बन्धेऽपि सम्भावनया सम्बन्धकथनादतिशयोक्तिः । तदेतत् तुल्यं समालोपस्थितं यदि स्यादित्याद्युदाहृतमलङ्कारसर्वस्वकारः सञ्जीवकार ॥ ८ ॥

तेनेति । तेन हरिणा दीधितिभिर्दीपिता आशा येन सः दिगन्तविश्रान्ततेजा इत्यर्थः । पयोधेरम्भसां सारस्य विकारः सारमयः मणिः समुद्रमन्थनोत्थः कौस्तुभाख्य इत्यर्थः । दध्रे धृतः । धृङ् धारणे कर्मणि लिट् । यत्र मणौ बिम्बगतः प्रतिबिम्बगतो लोकः बाह्यप्रपञ्चः तदङ्गे तस्य हरेः शरीरे साक्षात् बहिः प्रत्यक्षेण लक्ष्यमाण इत्यर्थः । अन्तर्वसन् अन्तर्गतो लोक इवालक्ष्यत यत्र मणौ प्रतिबिम्बितो बाह्यलोकः तदङ्गस्य नैर्मल्याद्बहिः प्रतिफलितः कुक्षिस्थलोक इवालक्ष्यत इत्युत्प्रेक्षा ॥ ९ ॥

मुक्तेति । अस्य हरेर्मुक्तामयं मुक्ताप्रचुरम् । [illegible] सघने

अङ्गुष्ठनिष्ठ्यूतमिवोर्द्ध्वमुच्चै
स्त्रिस्रोतसः सन्ततधारमम्भः ॥ १० ॥
स इन्द्रनीलस्थलनीलमूर्त्ति
रराज कर्च्चूरपिशङ्गवासाः ।
विसृत्वरैरम्बुरुहां रजोभि
र्यमस्वसुश्चित्रइवोदभारः ॥ ११ ॥
प्रसाधितस्यास्य मधुद्विषोऽभू
दन्यैव लक्ष्मीरिति युक्तमेतत् ।

मयट् । सारसने कटिस्थले स्वनुस्यते इति सारसनावलम्बि । क्लीबे सार-
सनं चाथ पुंस्कट्यां शृङ्खलं त्रिष्वित्यमरः । आप्रपदीनं आप्रपदमाप्रपदं
प्राप्नोतीति खञ् प्रत्ययः । पादाग्रं प्रपदं मत इत्यमरः । दाम सन्तु-
मारः अङ्गुष्ठेन निष्ठ्यूतं विसृष्ट मित्यर्थः । गौणार्थत्वाद ग्राम्यत्वं यथाह
दण्डी । निष्ठ्यूतोद्गीर्ण्णवान्तादि गौणवृत्तिव्यपाश्रयम् । अति सुन्दर
मन्यत्र ग्राम्यकक्षां विगाहत इति । ऊर्द्धं ऊर्द्धं प्रवाह उच्चैस्त्रि-
स्रोतसो मन्दाकिन्याः सन्ततधारमविच्छिन्न मम्बुपातमम्भ इव स्थितमित्युत्-
प्रेक्षा ॥ १० ॥

स इति । इन्द्रनीलस्थलमिव नीलमूर्त्तिः श्यामाङ्गः । संहितायां
रोरीति रेफलोपे ढ्लोपे-पूर्व्वस्येति दीर्घः । कर्च्चूरं हरितालमिव
पिशङ्गं वासो यस्य सः पीताम्बरो हरिः । हरितालन्तु कर्च्चूरमिति वै-
जयन्ती । स हरिर्विसृत्वरैः विसृमरैः । इण् न शजिसर्त्तिभ्यः क्वरप् ।
अम्बुरुहां अम्बुजानाम् । रुहेः क्विप् । रजोभिः परागैश्चित्रचित्र-
वर्णैः यमस्वसुर्यमुनायाः ... भारः पूरः उदभारः स इव रराज ।
अम्भोदलोपादिना ...

तेनोपमीयेत तमालनील-
मामुक्तमुक्तालतमस्य वक्षः ॥ ८ ॥
तेनाम्भसां सारमयः पयोधे-
र्दध्रे मणिर्दीधितिदीपिताशः ।
अन्तर्वसन् बिम्बगतस्तदङ्गे
साक्षादिवालक्ष्यत यत्र लोकः ॥ ९ ॥
मुक्तामयं सारसनावलम्बि
भाति स्म दामाप्रपदीनमस्य ।

दीर्घत्वसाम्येन मौक्तिकहारौ यथास्तु तदस्य हरेर्वक्ष व्योमगङ्गाया-
पयस उभौ प्रवाहौ व्योम्नि यदि युगपत् पतेतां प्रवहेतां चेत् । सम्भा-
वनायां लिङ् । तेन व्योम्नोपमीयेत समीक्रियेत नान्योपमानं किञ्चि-
दीयाम इति भावः । मुक्ताहारं छत्वानित्यर्थः । अत्र व्योम्नो गङ्गा-
प्रवाहद्वयासम्बन्धेऽपि सम्भावनाया सम्बन्धकथनादतिशयोक्तिः । तदेतत्
पुष्पं मशालोपहितं यदि स्यादित्युदाहृत्यालङ्कारं सर्वस्वकार
समीचकार ॥ ८ ॥

तेनेति । तेन हरिणा दीधितिभिर्दीपिता आशा येन सः दिगन्त-
विश्रान्ततेजा इत्यर्थः । पयोधेरम्भसां सारस्य विकारः सारमयः मणिः
समुद्रमन्थनोत्थः कौस्तुभाख्य इत्यर्थः । दध्रे धृत एव धारणे कर्मणि
लिट् । यत्र मणौ बिम्बगतः प्रतिबिम्बगतो लोकः साक्षात् प्रत्यक्षं तदङ्गे
तस्य हरेः शरीरे साक्षात् बहिः प्रत्यक्षेण लक्ष्यमाण इत्यर्थः । अन्तर्वसन्
[illegible] लोक इवालक्ष्यत यत्र मणौ प्रतिबिम्बितो बाह्यलोकः तदङ्ग
[illegible]न्तर्वर्ति प्रतिफलितः पृथिव्यादिक इत्युत्प्रेक्षा इत्युक्तं ॥ ९ ॥
मुक्तेति । अस्य हरेर्मुक्तामयं दाम ... । [illegible] वसने

अङ्गुष्ठनिष्ठ्यूतमिवोर्ध्वमुच्चै
स्त्रिस्रोतसः सन्ततधारमम्भः ॥ १० ॥
स इन्द्रनीलस्थलनीलमूर्त्ति
र्रराज कर्पूरपिशङ्गवासाः ।
विसृत्वरैरम्बुरुहां रजोभि
र्यमस्वसुश्चित्र इवोदभारः ॥ ११ ॥
प्रसाधितस्यास्य मधुद्विषोऽभू
दन्यैव लक्ष्मीरिति युक्तमेतत् ।

मयट् । सारसने कटिस्थले ऽवलम्बते इति सारसनावलम्बि । क्लीबे सारसनं चाथ पुंस्कट्यां शृङ्खलं त्रिष्वित्यमरः । आप्रपदीनं आप्रपदमाप्रपदं प्राप्नोतीति खञ् प्रत्ययः । पादाग्रं प्रपदं पाद इत्यमरः । दाम सूत्राकारः अङ्गुष्ठेन निष्ठ्यूतं निःसृष्ट मित्यर्थः । गौणार्थत्वाद ग्राम्यत्वं यथाह दण्डी । निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम् । अति सुन्दर मन्यत्र ग्राम्यकक्षां विगाहत इति । ऊर्ध्वं ऊर्ध्वं मुच्चैस्त्रिस्रोतसो मन्दाकिन्याः सन्ततधारमविच्छिन्न गम्भातमम्भ इव भाति इत्युत्प्रेक्षा ॥ १० ॥

स इति । इन्द्रनीलस्थलमिव नीलमूर्त्तिः श्यामाङ्गः । संहितायां रोरीति रेफलोपः ढ्रलोपे पूर्वस्येति दीर्घः । कर्पूरं हरितालमिव पिशङ्गं वासो यस्य सः पीताम्बरो हरिः । हरितालन्तु कर्पूरमिति वैजयन्ती । स हरिर्विसृत्वरैः विसृमरैः । इण् न शजिसर्त्तिभ्यः क्वरप् । अम्बुरुहां अम्बुजानाम् । रुहेः क्विप् । रजोभिः परागैश्चित्रचित्रवर्णैः यमस्वसुर्यमुनायाः उदकस्य भारः पूरः उदभारः स इव रराज । मन्थौदनेत्यादिना उदकस्योदादेशः ॥ ११ ॥

न नीतमन्येन नतिङ्कदाचित्
कर्णान्तिकप्राप्तगुणं क्रियासु ।
विधेयमस्याभवदन्तिकस्थं
शार्ङ्गं धनुर्मित्रमिव द्रढीयः ॥ २० ॥

प्रवृद्धमन्द्राम्बुदधीरनादः
कृष्णाश्रयाभ्यर्णचरैकहंसः ।
मन्दानिलापूरकृतन्दधानो
निध्वानमश्रूयत पाञ्चजन्यः ॥ २१ ॥

न नीतमिति । अन्येन पुरुषान्तरेण नतिमाकर्षणं भेदेन स्वानुकूल्यं च न नीतं न प्रापितं क्रियासु रणकर्मसु हिताहितप्राप्त्योश्च कर्णान्तिकं कर्णगोचरं प्राप्तो गुणो मौर्वी आप्तताधर्मश्च यस्य तत् विधेयं क्रियासु वश्यं द्रढीयः दृढतरं पीडासहतरमिति यावत् मृदुत्वविकारः शार्ङ्गं नाम धनुः मित्रमिवास्य हरेरन्तिकस्थं संनिहितमभवत् ॥ २० ॥

प्रवृद्धेति । धियं रातीति धीरो मनोहरः मन्द्रो गम्भीरोऽम्बुदस्य मेघस्येव धीरश्च नादः प्रवृद्धोऽस्य सः प्रवृद्धमन्द्राम्बुदधीरनाद इत्युपमा । कृष्णा एवाश्रयः तस्याभ्यर्णचरोऽन्तिकचरः । उपकण्ठान्तिकाभ्यर्ण इत्यमरः । स चासावेकहंसश्चेति श्लिष्टपरम्परितरूपकम् । मन्दानिलापूर स्यापूरणेन कृतं जनितं निध्वानं दधानः ध्मानाध्मातेऽपि मन्दमारुतप्रवेशादेव ध्वनतीति पाठवादतिशयोक्तिः ध्वन्यसम्बन्धेऽपि सम्बन्धकथनात् । पञ्चजनो नाम कश्चिद्दैत्यस्तस्मात् पाञ्चजन्योऽस्य शङ्खः । तस्येदं पञ्चजनेभ्यश्च ञ्यप्रत्ययाविति ञ्यप्रत्ययः । अश्रूयत, श्रूयते स्म पाञ्चजन्योऽपि संनिहितोऽभूदित्यर्थः । श्रोता श्रूयते प्रमाणसामान्ये इत्यादि वक्तृधर्मिणोरभेदोपचारात् पाञ्चजन्यस्य कर्तृतोक्तिः ॥२१॥

रराज सम्पादकमिष्टसिद्धेः
सर्व्वासु दिक्ष्वप्रतिषिद्धमार्गम् ।
महारथः पुण्यरथं रथाङ्गी
क्षिप्रं क्षपानाथ इवाधिरूढः ॥ २२ ॥

ध्वजाग्रधामा ददृशेऽथ शौरेः
संक्रान्तमूर्त्तिर्मणिमेदिनीषु ।
फणावतस्त्रासयितुं रसाया
स्तलं विविक्षन्निव पन्नगारिः ॥ २३ ॥

रराजेति । महान् रथो यस्य स महारथो [illegible] । आ
त्मानं सारथिं च [illegible] युध्येत यो नरः । स महारथ इत
्यभिधानचिन्तामणिः इति । रथाङ्गञ्चक्रमस्यास्तीति रथाङ्गी चक्रि
[illegible] सम्पादकं साधकत्वात् । पुण्यः [illegible] इति भाषा
[illegible] । सर्व्वासु दिक्ष्वप्रतिषिद्धमार्गं [illegible]
[illegible] । [illegible] इति [illegible] । क्षिप्रं [illegible]
[illegible] । [illegible] पुण्यरथं [illegible]
[illegible] । [illegible] पुण्यरथं [illegible] । [illegible]
[illegible] रराज ॥ २२ ॥

ध्वजेति । [illegible] शौरेः [illegible]
[illegible] प्रतिबिम्ब-
[illegible]
[illegible] । [illegible]

यियासतस्तस्य महीध्ररन्ध्र-
भिदापटीयान् पटहप्रणादः ।
जलान्तराणीव महार्णवौघः
शब्दान्तराण्यन्तरयाञ्चकार ॥ २४ ॥
यतः स भर्त्ता जगतां जगाम
धर्त्ता धरित्र्याः फणिना ततोऽधः ।

सन्ताल्लटः शत्रादेशः । ददृशे दृष्टः । सोऽपि सन्निहितोऽभूदित्यर्थः ॥ २३ ॥

यियासत इति । यातुमिच्छतो यियासतः । यातेः सन्नन्ताल्लटः शत्रादेशः । तस्य हरेः सम्बन्धी महीं धरन्तीति महीध्राः पर्वताः । मूलविभुजादित्वात्क इति वामनः । महीध्रादयो मूलविभुजादि दर्शना-दिति । तेषां रन्ध्राणि बिलानि तेषां भिदा भेदनम् । षिद्भिदादिभ्यो-ऽङ् । तस्यां पटीयान् समर्थतरः पटहप्रणादः आनकघोषः महार्णवौघः समुद्रस्य प्रवाहः अन्यानि जलानि जलान्तराणीव । सुप्सुपेति समासः । अन्यान् शब्दान् शब्दान्तराणि । पूर्ववत्समासः । अन्तर-याञ्चकार अन्तर्हितानि चकार छादयामासेत्यर्थः । अन्तर शब्दादन्त-र्धानार्थात्करोतेर्ण्यन्ताल्लिट् । अन्तरमवकाशावधिपरिधानान्तर्द्धिभेदता-दर्थ्य इत्युभयत्राप्यमरः ॥ २४ ॥

यत इति । जगतां भर्त्ता धारयिता कृष्णस्याखिललोक इत्यर्थः । कर्तृकर्मणोः कृतीति कर्मणि षष्ठी । स हरिर्यतो येन भूभागेन जगाम ततस्तस्मिन्भूभागे अधः पाताले धरित्र्याः धरण्याः धर्त्ता धारयिता । पूर्ववत् षष्ठी । फणिना शेषेण महता भरेण आयमनाद्गत्वा पुञ्जी-भूतस्य शिरःसहस्रस्य साहाय्यके गडाय कर्मणि । यौपधाद्गुरूपोत्तमाद्वुञ् । व्यथाः स्मरमाणाः भुजा यस्मिन् तद्यथा तथा प्रश्रयं प्रहतम् । भावे

महाभराभुग्नशिरस्सहस्र
साहायकव्यग्रभुजं प्रसक्ते ॥ २५ ॥
अथोच्चकैस्तोरणतङ्गभङ्ग
भयावनम्रीकृतकेतनानि ।
क्रियाफलानीव सुनीतिभाजं
सैन्यानि सोमान्वयमन्वयुस्तम् ॥ २६ ॥
श्यामारुणैर्वारणदानतोयै
रालोडिताः काञ्चनभूपरागाः ।

लिट् । हरिसाचाल्येत्यर्थः । अत्र शेषस्य विशिष्टभरणासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ २५ ॥

अथेति । अथ हरिचलनानन्तरं उच्चकैरुन्नते तोरणे द्वार दादिव सङ्गेन भङ्गस्त्रासाद्भयेनावनम्रीकृतानि केतनानि येषां तानि सैन्यानि सोमस्यान्वये भवानः तं सोमान्वयं हरिं सुनीतिभाजं सुनीतिमन्तं क्रियाः सामाद्युपायप्रयोगास्तासां फलानि हिरण्यभूमिलाभादिलाभा इवान्वयुः अन्वगच्छन् । यातेर्लङि लङः शाकटायनस्यैवेति जुस् ॥२६॥

श्यामेति । श्यामानि चारुणानि च तैः श्यामारुणैः कृष्णलोहितैः वर्णविशेषैर्नेति समासः । वारणदानतोयैर्गजमदोदकैरालोडिताः सम्मिलिता अतएव मिलितकृष्णलोहितोदाः मयूरकण्ठचूर्णा इव द्योतन्त इति गम्योत्प्रेक्षा । छिर् । उपमालङ्कारः । काञ्चनस्य भूः काञ्चनभूस्तस्याः परागाः पांशवः आनेमि नेमिमभिव्याप्य । अत्रान्ते नेमिः स्त्रीत्यमरः आङ् मर्यादाभिविध्योरित्यभिविधावव्ययीभावः । मग्नैः रथौघ पुरः दिदेविरे इत्यर्थः । परागाणां विशिष्टदेशासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः । सा च महती गजरथसम्पत्तिर्व्यञ्जना इत्यलङ्कारेण वस्तुध्वनिः ॥ २७ ॥

आनेमिमग्नैः शितिकण्ठपत्त्र
चोदयतश्चुक्षुदिरे रथौघैः ॥ २७ ॥
न लङ्घयामास महाजनानां
शिरांसि नैवोद्धतिमाजगाम।
अचेष्टताष्टापदभूमिरेणुः
पदाहतो यत्सदृशं गरिम्णः ॥ २८ ॥
निरुध्यमाना यदुभिः कथञ्चि
न्मुहुर्यदुच्चिक्षिपुरग्रपादान्।

नेति। अष्टसु धातुषु पदं प्रतिष्ठा यस्येति अष्टापदं सुवर्णम्। रुक्मं कार्त्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियामिति सुवर्णे पर्यायेष्वमरः। तस्य भूमिस्तस्याः रेणुः काञ्चनभूरजः पदा हतोरथाश्वादिचरणैराभिहतोऽपि सुधियर्थः महाजनानां बहुजनानां पूज्यानाञ्च शिरांसि न लङ्घयामास आक्रामति स्म किं बहुना उद्धतिं मुत्पतनं दर्पं च नैवाजगाम कुत यद्यस्मात् गरिम्णो गुरुत्वस्य गुणस्य माहात्म्यस्य च। प्रियस्थिरेत्यादिना गुरोर्गरादेशः। सदृशमनुरूपं यथा तथा अचेष्टत अलङ्घनत्वस्पृहा गुरुत्वसौहित्यप्रतिबन्धकत्वादिति भावः। अत्रानौद्धत्यादिप्रस्तुतमहत्त्वरूपविशेषणसाम्यादप्रस्तुतमहाजनप्रतीतेः समासोक्तिरलङ्कारः ॥ २८ ॥

निरुध्यमाना इति। तुरगाः यदुभिरारूढैरिति भावः कथञ्चिदति प्रयत्नेन निरुध्यमाना वल्गाकर्षणेन रुध्यमाना अपि यद्यस्माद्यस्य ते तादृशास्तानग्रपादान्। हस्ताग्राग्रहस्तादयोऽपुष्प गुणिनो रमेदभेदयो- रादिति वामनः सामानाधिकरण्येन समासः। मुहुरुच्चिक्षिपुरुत्क्षिप- न्तः तत्तस्मान्मार्गं दशन्तीति मार्गदशः मन्दगमनेन मार्गरोधिनः। लेपु। गच्छन् महतः पूज्यास्तानुल्लङ्घयन्तीति भावः। करीन्द्रानुलङ्घ

भुवं गुरुन्मार्गरुधः करीन्द्रा
गुल्लङ्घ्य गन्तुन्तुरगात्तदीयुः ॥२९॥
अवेक्षितानायतवल्गसग्रे
तुरङ्गिभिर्यत्ननिरुद्धवाहैः।
प्रक्रीडितान्रेणुभिरेत्य तूर्णं
निन्युर्जनन्यः पृथुकान्पथिभ्यः ॥३०॥
दिदृक्षमाणाः प्रतिरथ्यनीयु
स्मुरारिमारादनघं जनौघाः।

गन्तुमीयुरिच्छन्ति स्म। भुव मिच्छार्थे चायाम्। गुरवोऽपि सन्मार्गरोधकाः मरुद्रलङ्घ्य्रा इति बलद्वारेण गन्तुमर्हन्ति ॥ २९ ॥

अवेक्षितानिति। आयता आकृष्टा वल्गा कुशरज्जुर्यस्मिन् कर्मणि तद्यथा तथा यत्नेन दुर्वारवेगत्वात् अतिप्रयत्नेन निरुद्धा वाहा-वाजिनो यैस्तैः। वाजिवाहार्वगन्धर्व इत्यमरः। तुरङ्गिभिः अश्वसा-दिभिरग्रे पुरोदेशेऽवेक्षितानालोकितान् रेणुभिः प्रक्रीडन्तीति प्रक्रीडि-तान् पांशुक्रीडापरान्। कर्त्तरि क्तः। पृथुकान् शिशून्। पृथुकः शावकः शिशुरित्यमरः। जनन्यः तूर्णमेत्य पथिभ्यो निन्युः अपसारयाम्बभूवुरिति स्वभावोक्तिः ॥ ३० ॥

दिदृक्षमाणा इति। अनघमकलङ्कं मुरारिं दिदृक्षमाणा द्रष्टु-मिच्छन्तः। ... कृष्णाद्दृशः सानवादेषः ... इत्यादि-नेपदम्। ... रथ्यायां रथ्यायां प्रतिरथ्यं यथार्थेऽव्ययी भावः। आरात् समीपे। आराद्दूरसमीपयोरित्यमरः। ईयुर्जग्मुः। इणो लिट् दीर्घ इः स्थितिल्यव्यास दीर्घः। ननु निबन्धरचिते का दिदृ-... [illegible]

अनेकशस्संस्तुतमप्यनल्पा
नवन्नवं प्रीतिरहो करोति ॥ ३१ ॥
उपेयुषोवर्त्म निरन्तराभि
रसौ निरुच्छ्वासमनीकिनीभिः ।
रथस्यतस्याम्पुरि दत्तचक्षु
र्विद्वान् विदामास शनैर्न्नयातम्॥ ३२ ॥
मध्येसमुद्रं ककुभः पिशङ्गी
र्या कुर्वती काञ्चनवप्रभासा ।

उत्कारकादन्यतरस्यामिति यम् प्रत्यय । संस्तुत परिचितमपि वस्तु व
नेनेति शेष । संस्तवः स्यात्परिचय इत्यमर । अनल्पा अधिका प्रीतिः
प्रेम कर्त्री नव नवम् । आभीक्ष्ण्ये नव करोति । नित्यवीप्सयोरिति
द्विर्भाव. । अहो शब्द पुराणस्यापि नूतनत्वनिदानाश्चर्ये यथा परप्रेमा-
स्पदं वस्तु नित्यदृष्टमपि अदृष्टपूर्वमिव प्रतिक्षणं दिदृक्षते भगवानपि त-
थैवेति भाव सामान्येन विशेष समर्थन रूपोऽर्थान्तरन्यास: ॥३१॥

उपेयुष इति । विद्वानभिज्ञ; अतएव तस्यां पुरि भगवान् दत्तचक्षु-
र्निहितदृष्टिरसौ हरिर्निरन्तराभिर्निरवकाशाभिरनीकिनीभिः सेनाभिर्निरुच्छ्वासं
यथा तथा वर्त्म उपेयुषः प्राप्तस्य रथस्य शनैर्यातं मन्दमन्दगमनं मन्द
गमनं न विदामास न विवेद । उषविदजागृभ्योऽन्यतरस्यामिति आम्प्र-
त्यय: । आसक्त्या हि वेदनं न तु मन्दाध्वानादिति भाव: । अत्र हेतोः प-
दार्थत्वात् पदार्थहेतुकं काव्यलिङ्गम् ॥ ३२ ॥

अथैकादशभिः श्लोकैर्द्वारकां वर्णयति । मध्य इति । समुद्रस्य मध्ये
मध्येसमुद्रम् । पारे मध्ये षष्ठ्या वेति विकल्पादव्ययीभाव: मध्यशब्दस्य
एत्वनिपातनादेकारान्तत्वम् । काञ्चनवप्रभासा हेम प्राकार प्रभया ककुभो-

तुरङ्गकान्तामुखहव्यवाह
ज्वालेव भित्त्वा जलमुल्ललास ॥ ३३ ॥
कृतास्पदा भूमिभृतां सहस्रै
रुदन्वदम्भःपरिवीतमूर्त्तिः ।
अनिर्विदा या विदधे विधात्रा
पृथ्वी पृथिव्याः प्रतियातनेव ॥ ३४ ॥

दिशः पिशङ्गीः पिङ्गलवर्णाः । गौरादित्वात् ङीष् । कुर्वती या भूः जलं समुद्रोदकं भित्त्वा उल्ललासेति शेषः । तुरङ्गकान्तायाः वडवायाः मुखे हव्यं वहतीति हव्यवाहोऽग्निः । कर्मण्यण् प्रत्ययः । तस्य वाडवाग्नेः ज्वालेव उल्ललास उद्बभासे । अत्र समुद्रान्तर्लीनायां वडवानलज्वालायां कदाचित्सम्भाव्यमानस्य मध्योल्लङ्घनस्य भुवि दर्शनाभेदाध्यवसाये भासा ज्वालात्वेनोत्प्रेक्ष्यते इव शब्दोऽयमुत्प्रेक्षाया एव व्यञ्जको नोपमाया इदंगुज्ज्वालाया अप्रसिद्धत्वेनोपमानत्वायोगात् । मन्ये शङ्के ध्रुवं नूनं प्राय इत्येवमादिभिः । उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृश इत्याचार्य्य दण्डी ॥ ३३ ॥

कृतास्पदेति । भूमिभृतां राज्ञां गिरीणां च सहस्रैः कृतास्पदा कृताधिष्ठाना । आस्पदं प्रतिष्ठायामिति निपातः । उदकं अस्यास्तीत्युदन्वानुदधिः । उदन्वानुदधिः सिन्धुरित्यमरः । उदन्वानुदके चेति निपातनात्साधुः । तस्याम्भोभिः परिवीता परिवेष्टिता मूर्त्तिः स्वरूपं यस्याः सा पृथ्वी पृथुः । वोतो गुणवचनादिति ङीष् । एवम्भूता या भूः न निर्विद्यते न खिद्यते इत्यनिर्विद् । निर्विदानार्थस्याविदः पूर्ववत् सत्सूद्विषेत्यादिना क्विप् । तेनानिर्विदा अखिन्नेन अन्यथा शिल्पसौष्ठवासिद्धेरिति भावः विधात्रा प्रथत इति पृथिवी भूः । प्रथेरौणादिकः षिवन् षिद्गौरादिभ्यश्चेति ङीष् । तस्याः प्रतियातना प्रतिकृतिरिव विदधे विहिता ।

त्वष्टुः सदाभ्यासगृहीतशिल्प-
विज्ञानसम्पत्प्रसरस्य सीमा ।
अदृश्यतादर्शतलामलेषु
छायेव या स्वर्जलधेर्जलेषु ॥ ३५ ॥
रथाङ्गभर्त्रेऽभिनवं वराय
यस्याः पितेव प्रतिपादितायाः ।
प्रेम्णोपकण्ठं मुहुरङ्कभाजो
रत्नावलीरम्बुधिराबबन्ध ॥ ३६ ॥

प्रतियातना प्रतिच्छाया प्रतिकृतिरित्यमरः । सुप्रतिनिधिर्नोत्कोचया पुरो तच्चिह्नं निसारादि वस्तु व्यज्यते ॥ २४ ॥

त्वष्टुरिति । त्वष्टुर्विश्वकर्मणः सदाभ्यासेन गृहीतो लब्धो यः शिल्प विज्ञानसम्पद प्रसर प्रकर्षः तस्य सीमा अवधि रूपनिर्मितिर्यावत् सा पुरी आदर्शतलामलेषु दर्पणपृष्ठस्वच्छेषु । दर्पणे मुकुरादर्शावित्यमरः । जल-धेर्जलेषु स्वः स्वर्गस्य । स्वरव्ययं स्वर्गनाकावित्यमरः । छाया प्रतिबिम्बमिवादृश्यत इत्युत्प्रेक्षा । छायात्वनातपे कान्तौ प्रतिबिम्बार्कजायोः शोभायां च वैजयन्ती ॥ २५ ॥

रथाङ्गेति । अम्बुधिः पितेव वराय श्रेष्ठाय जामात्रे च । वरो जामातरि श्रेष्ठ इति विश्वः । रथाङ्गभर्त्रे चक्रधराय हरये अभिनवं यथा तथा प्रतिपादितायाः दत्तायाः । अङ्कः समीपमुत्सङ्गश्च तद्भाजः । अङ्कः समीप उत्सङ्गे चिह्ने स्थानापराधयोरिति केशवः । यस्याः पुरः उपकण्ठम-न्तिके । अन्यत्र संयोगे द्वितीया । अन्यत्र कण्ठे । विभक्त्यर्थेऽव्ययी-भावः । मुहुः प्रेम्णा रत्नावलीराबबन्ध आसमन्ताद्बबन्ध । श्लेषानुप्रा-णितोपमालङ्कारः ॥ २६ ॥

यस्याश्चलद्वारिधिवारिवीचि
च्छटोच्छलच्छङ्खकुलाकुलेन ।
वप्रेण पर्य्यन्तचरोडुचक्रः
सुमेरुवप्रोऽन्वहमन्वकारि ॥३७॥

वणिक्पथे पूगकृतानि यत्र
भ्रमागतैरम्बुभिरम्बुराशेः ।
लोलैरलोलद्युतिभाञ्जि मुष्णन्
रत्नानि रत्नाकरतामवाप ॥ ३८ ॥

यस्या इति । चलतो वारिधिवारिवीचीनां छटाभ्यः परम्पराभ्य उच्छलद्भिरुत्पतद्भिः शङ्खानां कुलैः समूहैराकुलेन यस्याः पुरो वप्रेण प्राकारेण पर्यन्ते चरतीति तत् तादृशं उडुचक्रं नक्षत्रमण्डलं यस्य सः सुमेरोर्वप्रः सानुः । सानु प्राकारयोर्वप्रः स्यादिति सज्जनः । अन्वहमनुदिनम् । अव्ययम् । विभक्त्यादिना यथार्थेऽव्ययीभावः । अनश्च नपुंसकादन्यतरस्यामिति । समासान्तोऽच् । अन्वकारि अनुकृतः सादृश्यं प्रापित इत्यर्थः । मेरुप्राकारादप्यस्य तत्तुल्यमौन्नत्यं व्यज्यते ॥३७॥

वणिक्पथ इति यत्र यस्यां पुरि वणिजां पथि वणिक्पथे आपणे अपूगाः पूगाः सम्पद्यमानानि कृतानि पूगकृतानि पूगीकृतानि । श्रेण्यादयः कृतादिभिरिति समासः । अलोलद्युतिभाञ्जि स्थिरप्रकाशानि रत्नानि लोलैश्चलैः अत एव भ्रमागतैः जलनिर्गममार्गागतैः । भ्रमाय जलनिर्गमा इत्यमरः । अम्बुभिर्मुष्णन् अपहरन् अम्बुराशिः समुद्रः तत्रत्यावतारोऽस्तीति भावः । रत्नाकरतामवाप प्राप न तु प्रागिति भावः । अम्बुराशेः प्राक् रत्नसम्बन्धेऽप्यसम्बन्धोक्तेरतिशयोक्तिः तथा च पुर्याः समृद्धातिशयादिको रत्नसमृद्धिरस्य व्यज्यते । ३८ ।

स्फुरत्तुषारांशुमरीचिजालै-
र्विनिह्नुताः स्फाटिकसौधपङ्क्तीः ।
आरुह्य नार्यः क्षणदासु यत्र
नभोगता देव्य इव व्यराजन् ॥ ४३ ॥

कान्तेन्दुकान्तोपलकुट्टिमेषु
प्रतिक्षपं हर्म्यतलेषु यत्र
उच्चैरधःपातिपयोमुचोऽपि
समूहमूहुः पयसां प्रणाल्यः ॥ ४४ ॥

स्फुरदिति । यत्र पुरि क्षणदासु रात्रिषु नार्यः स्फुरद्भिस्तुषारांशोश्चन्द्रस्य मरीचिजालैश्चन्द्रिकाभिः विनिह्नुता अपह्नुता. तद्वर्णतया तिरस्कृता इत्यर्थः । अतएव सामान्यालङ्कारः । सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकतेति लक्षणात् । स्फाटिकानां स्फटिकविकाराणां सौधानां पङ्क्तीरारुह्य नभोगता देव्यो देवाङ्गना इव । देवशब्दस्य पचादिषु देवडिति पाठात् टिड्ढाणञित्यादिना ङीप् । व्यराजन् सौधानामप्रकाशात्तासां तत्र लक्ष्यमाणाः स्त्रियः खेचर्य इव रेजुरित्यर्थः । अत्र नभोगतत्वोत्प्रेक्षा पूर्वोक्तसामान्यसापेक्षत्वात् सङ्करः ॥ ४३ ॥

कान्तेति । यत्र पुरि क्षपासु रात्रिषु प्रतिक्षपम् । विभक्त्यर्थेऽव्ययीभावः । कान्तानि रम्याणि इन्दुकान्तोपलानां चन्द्रकान्तानां कुट्टिमानि बद्धभूमयो येषु तेषु । कुट्टिमं बद्धभूमि स्यादित्यमरः । हर्म्यतलेषु उच्चैरुन्नताः प्रणाल्यो जलमार्गाः । पयसां प्रवाहं पयःप्रवाहमित्यर्थः । अथ पातिनोऽधस्तराः पयोमुचो मेघा यासां ताः तथाभूता अपि तद्भेदाभावात् अप्रतापत्वमित्यर्थः । विरोधालङ्कारः । मेघा अधःस्थाः पयःप्रवाहं वहन्ति च चन्द्रकान्तनिष्यन्दैरिति भावः ।

रतौ ह्रिया यत्र निशाम्य दीपान्
जालागताभ्योऽधिगृह गृहिण्यः।
बिभ्युर्बिडालेक्षणभीषणाभ्यो
वैदूर्यकुड्येषु शशिद्युतिभ्यः ॥ ४५॥
यस्यामतिश्लक्ष्णतया गृहेषु
विधातुमालेख्यमशक्नुवन्तः।

वद्दे लिट्। यच्चिम्पीदादिना सक्कारदम्। यत्र सौधानां प्रयालीनां च तादृगौज्ज्वल्यं परसम्बन्धेऽपि ततसम्बन्धोक्तिरतिशयोक्तिः ॥ ४४ ॥

रताविति। यत्र पुरि गृहेष्वधिगृहम्। विभक्त्यर्थेऽव्ययीभावः। गृहिण्यः कुलाङ्गनाः अतएव रतौ रतिकाले ह्रिया दीपान्निशाम्य निर्वाप्य। शमेर्मित्वाद् ह्रस्वादेशाभावश्चिन्त्यः। जालागताभ्योगवाक्षमार्गं प्रविश्याभ्य। जालं गवाक्ष आनाय इति विश्वः। विदूराच्च भवन्तीति वैदूर्याणि बालवायजानि मणयः। वैदूर्यं बालवायजमिति विश्वः। विदूरात् प्रभवति अप्रत्ययः। अत्र विदूरशब्दो बालवायादेशः पर्यायो वा तत्रोपचरितो वा तेन बालवायाद्रिरेवासौ प्रभवति न विदूरान्नगरात् तत्र न कश्चिदत्र दृष्टान्तेन प्रयुक्तः। यदुक्तम्। बालवायो विदूरं च प्रकृत्यन्तरमेव वा। न वै तत्रेति। वैदूर्यशाक्लि-नरेन्द्रप्रभवेति। तेन कुड्येषु भित्तिषु सङ्क्रान्ताभ्य इति शेषः अतएव तच्छायारूपा वैडूर्यत्वात् बिडालेक्षणवत् भीषणा इति भीषणा-भ्यो भयङ्कराभ्य। नन्द्यादित्वात्कर्त्तरि ल्युप्रत्यये टाप्। शशिद्युतिभ्यो-बिभ्युः भीताः सौन्दर्यादिति भावः। विभेतेर्लिट्। अत्र नक्षत्रादिपाव-दोषनिरोधिनो न केवलं गर्ववित्ति प्रयुक्त भयहेतुत्वविभिन्नर्थोऽलङ्कारो-त्प्रेक्षः। विषयकार्यं कोशलरचितानां वा भवेत्। विरूप घटना या स्यादिप्रमाणदृशिर्मतेति दर्पणात् ॥ ४५ ॥

यस्यामिति। यस्यां पुरि गृहेष्वतिश्लक्ष्णतया रत्नभित्तीनां प्रतिबि-
[illegible]

चक्रुर्युवानः प्रतिबिम्बिताङ्गाः
सजीवचित्रा इव रत्नभित्तीः ॥ ४६ ॥
सावर्ण्यभाजां प्रतिमागतानां
लक्ष्यैः स्मरापाण्डुतयाङ्गनानाम् ।
यस्यां कपोलैः कलधौतधाम
स्तम्भेषु भेजे मणिदर्पणश्रीः ॥ ४७ ॥
शुकाङ्गनीलोपलनिर्मितानां
लिप्तेषु भासा गृहदेहलीनाम् ।

स्वयञ्चाप्यसङ्क्रान्तमूर्तय स्त्नीरत्नभित्तीः सजीवचित्राः सचेतनचित्रवती-
रिव चक्रुरित्युत्प्रेक्षा ॥ ४६ ॥

सावर्ण्येति । यस्यां पुरि कलधौतधामस्तम्भेषु हेमागारस्तम्भेषु
कलधौतं रौप्यहेम्नोरिति विश्वः । प्रतिमागतानां सावर्ण्यभाजां तत्सा-
वर्ण्याद्गृहीतभेदानामित्यर्थः. अतएव सामान्यालङ्कारः सामान्यं गुण-
साम्येन यत्र वस्त्वन्तरैकतेति लक्षणात् । अङ्गनानां स्मरापाण्डुतया ल-
क्ष्यैर्विभिन्नवर्णत्वाङ्गेदेन लक्ष्यमाणैरित्यर्थः. कपोलैर्मणिदर्पणानां स्फटि-
कमुकुराणां श्रीरिव श्रीर्भेजे प्राप्ता इति निदर्शना । सा चोक्तसामान्य-
प्रादुर्भूतेति तेनास्याः सङ्करः ॥ ४७ ॥

शुकाङ्गेति । यस्यां पुरि शुकाङ्गनाः शुकाङ्गवन्नीलोपला नीलम-
णयो मरकतानीत्यर्थः । उपल. प्रस्तरे मणावपि च इति विश्वः ।। तैर्निर्मि-
तानां गृहाणां देहल्योऽद्वारस्याधारदार्वपि ।, गृहद्वार पक्षयो
देहलीत्यमरः । तासामभासा लिप्तेषु धवलितेषु द्वारबहिरेषु । प्रधान
प्रघणालिन्दा बहिर्द्वारप्रकोष्ठक इत्यमरः । गोः पुरीषं गोमयम् । गोश्च
पुरीषे इति मयट् । तस्य गोमयानि छिन्नेरनानि । गोमयं कुट्टिमाकारे
प्रघाणाग्रे छिन्ने इति विश्वः । न चक्रुरेव । मरकतप्रभायां विन्दन

यस्यामलिन्देषु न चक्रुरेव
मुग्धाङ्गनागोमयगोमुखानि ॥ ४८ ॥
गोपानसीषु क्षणमास्थितानाम्
आलम्बिभिश्चन्द्रकिणां कलापैः ।
हरिन्मणिश्याममृणाभिरामै
र्गृहाणि नीध्रैरिव यत्र रेजुः ॥ ४९ ॥
वृहत्तुलैरप्यतुलैर्वितान
मालापिनद्धैरपि चावितानैः ।

भ्रान्त्येति भावः । अतएव भ्रान्तिमदलङ्कारः कविसम्मतसादृश्याद्वस्त्वन्तरप्रतीतिर्हि यत् । स भ्रान्तिमानित्यलङ्कारसर्वस्वकारलक्षणात् ॥ ४८ ॥

गोपानसीष्विति । यत्र पुरि गृहाणि गोपानसीषु वलभीच्छादनाधारेषु वंशपञ्जरेष्वित्यर्थः । अतएव गोपानसी तु वलभीच्छादने वक्रदारुणीत्यत्र पटलाधारवंशपञ्जरे इत्याह स्वामी । क्षणमीषत्कालम् । अत्यन्तसंयोगे द्वितीया । आस्थितानामासीनानां चन्द्रकाः मेचकाः । समौ चन्द्रकमेचकावित्यमरः । तद्वतां चन्द्रकिणां मयूराणां आलम्बिभिर्लम्बमानैः कलापैः वर्हैः । कलापो भूषणे वर्हे इत्यमरः । हरिन्मणयो मरकतानि । गारुत्मतं मरकतमश्मगर्भं हरिन्मणिरित्यमरः । तद्वत् श्यामैस्तृणैरभिरामाणि हरितवृणमयानीत्यर्थः । तैर्नीध्रैः पटलप्रान्तैरिव रेजुः । वलीकनीध्रे पटलप्रान्तेऽथ पटलं छदिरित्यमरः । छादनपर्यायौ पटलच्छदी कटाङ्कुशादिनी वलीकनीध्रे छेदाधारो वंशपञ्जरो गोपानसीति विवेकः । अतएव हरितत्वालम्बनादिगुणक्रिया निमित्तत्वान्नीध्रैरिवेति जातिस्वरूपोत्प्रेक्षा ॥ ४९ ॥

वृहदिति । या पूः वृहत्यस्तुला उपरिस्थाप्यदार्वाधारभूतानि

...र्वितैरिति विशेषः ।

चक्रायुधेनाः प्रतिबिम्बिताः
सजीवचित्राइव रत्नभित्तीः ॥
सावर्ण्यभाजां प्रतिमागतानां
लक्ष्मीः स्मरापाण्डुतयाङ्गनाः
यस्यां कपोलैः कलधौतधाम
स्तम्भेषु भेजे मणिदर्पणश्रीः ॥
शुक्राङ्गनीलोपलनिर्मितानां
लिप्तेषु भासा गृहदेहलीनां

मार्ज्जारमप्यायतनिश्चलाङ्गं
यस्यां जनः कृत्रिममेव मेने ॥ ५१ ॥
क्षितिप्रतिष्ठोऽपि मुखारविन्दै
र्वधूजनश्चन्द्रमधश्चकार ।
अतीतनक्षत्रपथानि यत्र
प्रासादशृङ्गाणि वृथाध्यरुक्षत् ॥ ५२ ॥
रम्यादृति प्राप्तवतीः पताका
रागं विविक्तादृति वर्द्धयन्तीः ।

च्चारं बिडालमपि । ओतुर्बिडालो मार्ज्जार इत्यमरः । जनः कृत्रिमं क्रियानिर्वृत्तमेव मेने न तु वास्तवमित्यर्थः । चित्र विन्यस्तमेवामंस्त इति सम्बन्धः । अनेन कृत्रिमार्ज्जारनिर्माणकौशलं सूच्यत इति । शिल्पकृ नगरे तयोर्भ्रान्तिः अत कविकल्पितमार्ज्जारजनयोः कृत्रिमार्ज्जारविमेषु विपरीतमतिवर्णनाद्भ्रान्तिमदलङ्कारः ॥ ५१ ॥

क्षितीति । यस्यां पुरि वधूजनः क्षितौ प्रतिष्ठा यस्य सः भूनिष्ठितोऽपि चन्द्रं दिवि स्थितमिति भावः । तथापि मुखैरेवारविन्दैरधश्चकारेति विरोधः स्वभावस्यमहिम्ना अधरीचकारेति परिहाराद्विरोधालङ्कारः । अतीतानि नक्षत्रपथमतीतनक्षत्रपथानि । अत्यादयः क्रान्ताद्यर्थे द्वितीयेति समासः द्विगुप्राप्तापन्नेत्यादिना परवल्लिङ्गताप्रतिषेधः । प्रासादशृङ्गाणि वृथा अध्यरुक्षत् अधिरोहति स्म वर्णधरद्वैरधिकरणादिति भावः । रोहतेर्लुङ् शल इगुपधादनिटः क्स इति क्सादेशः । अत्रार्थ करणनासार्थस्य विरोधोपजीव्यवैयर्थ्यं हेतुत्वकल्पनात् काव्यलिङ्गभेदः ॥ ५२ ॥

रम्यादृति । यस्यां पुरि युवानो रम्या रमणीया इति हेतोः पताकाः प्राप्तवतीः उत्तुङ्गध्वजा इत्यर्थः । अन्यत्र रम्या इत्येवं पताकाः प्राप्तवतीः प्रतिष्ठिता इत्यर्थः । पताका वैजयन्त्यां च सौभाग्ये ऽर्थध्वजेऽपि

यस्यामसेवन्त नमद्वलीकाः
समं वधूभिर्वलभीर्युवानः ॥ ५३ ॥

सुगन्धितामप्रतियत्नपूर्व्वां
बिभ्रन्ति यत्र प्रमदाय पुंसाम्।
मधूनि वक्त्राणि च कामिनीना
मामोदकर्म्मव्यतिहारमीयुः ॥ ५४ ॥

च इति हेतौ प्रकरणे प्रकारादिसमाप्तिष्वित्यमरः अत्रापि त्रिवः। त्रिविक्रा निजना विमलास्थ इति हेतौ रागं वर्द्धयन्ती। त्रिविक्रौ पृत रिजनावित्यमरः। नमद्वलीका. नम्र नीध्राः। वलीकनीध्रे पटल प्रान्त इत्यमरः। अन्यत्र नमन्त्यो वल्यस्त्रिवल्याख्या मध्यरेखा यासान्ता न मद्व-लीकाः। नद्यृतश्चेति कप्रत्यय। वली मध्यमरेखोर्म्मिजोर्णाग्रत्वगृह-दारुष्विति वैजयन्ती। वलभीः कूटागाराणि। कूटागार तु वलभीत्य-मरः। वधूभिः समममेवन्त वधूसहिता अमेवन्तेत्यर्थः। अत्र वधूना वलभीना च प्रकृतानामेव धर्म्मसाधर्म्यौपम्यावगमात्केवलप्रकृतगोचरा तुल्ययो-गिता न श्लेषः तत्र विशेष्यस्यापि श्लिष्टत्वनियमात् यथाह. प्रस्तुता-नामन्येषां केवलं तुल्यधर्म्मत.। औपम्यं गम्यते यत्र सा मता तुल्य-योगितेति ॥ ५३ ॥

सुगन्धितामिति। यत्र पुरि न प्रतियत्नः संस्कारः पूर्व्वौ यस्या स्तामप्रतियत्नपूर्व्वामकृत्रिमां स्वाभाविकीमित्यर्थः। प्रतियत्नस्तु संस्कार इति वैजयन्ती। शोभनो गन्धो येषां तेषां भावस्तत्ता तां सुगन्धितां सौरभ्यं बिभ्रन्ति बिभ्राणानि। वा नपुंसकस्येति नुमागमः। मधूनि मद्यानि कामिनीनां वक्त्राणि च यूनां प्रमदाय प्रीत्यै आमोदकर्म्म सौरभकार्य्य स्य व्यतिहारं परस्परकरणमीयुः अन्योन्यगन्धेन अन्योन्यं वासया-मासुरित्यर्थः। इत्यौचित्। अत्रापि मधूनां वक्त्राणां च प्रकृतत्वात्स-न्ध्योक्त एव तुल्ययोगिताभेदः तेन यूनां मधुवासितवधूवदनपानं वदे

रतान्तरे यत्र गृहान्तरेषु
वितर्दिनिर्व्यूहविटङ्कनीडः ।
रुतानि शृण्वन् वयसाङ्गणोऽन्ते-
वासित्वमाप स्फुटमङ्गनानाम् ॥ ५५ ॥
छन्नेष्वपि स्पष्टतरेषु यत्र
स्वच्छानि नारीकुचमण्डलेषु ।

नशायितगण्डूषपानञ्च वस्तु व्यज्यते तेन च निरातङ्कभोगाः पौरा इति गम्यते ॥ ५४ ॥

रतान्तर इति । यत्र पुरि गृहान्तरेषु वितर्दयो विहारवेदिकाः । वितर्दिस्तु वेदिकेत्यमरः । तासां निर्व्यूहा मत्तवारणाख्या उपाश्रयाः । निर्व्यूहो मत्तवारण इति वैजयन्ती । तेषां विटङ्काः उपरितन्यः कपोतपालिकाः तएव नीडाः कुलायाः यस्य सः । कुलायो नीडमस्त्रियामित्यमरः । वयसां शुकशारिकादिपक्षिणाङ्गणः । वयः पक्षिणि बाल्यादाविति विश्वः । अङ्गनानां वितर्दिषु रममाणानामिति भावः । रतान्तरे रुतानि रतिकूजितानि शृण्वन् अन्ते समीपे वसन्तीत्यन्तेवासिनः शिष्याः छात्रान्तेवासिनौ शिष्ये इत्यमरः । शयवासवासिष्वकालादित्यलुक् । तेषां भावस्तत्त्वमाप । समीपे प्रतिशब्दं यथाश्रुतमुच्चारणादेवमुक्तमुच्यते । अतएव स्फुटमिति व्यञ्जकप्रयोगः ॥ ५५ ॥

छन्नेष्विति । यत्र पुरि छन्नेषु आच्छादितेषु । वा दान्तेत्यादिना वैकल्पिको निपातः । स्पष्टतरेषु स्फुटतरं लक्ष्यमाणेष्वित्यर्थः । नारीकुचमण्डलेषु स्वच्छानि स्फटिकादिवदतिरोधायकानि अम्बराणि वस्त्राणि केवलं नामतोऽम्बरमिति नाम्नैवाकाशसाम्यं न दधुः । अम्बरं व्योम्नि वाससीति विश्वः । किन्तु अर्थतोऽपि अर्थं क्रिययापि तत्साम्यं दधुः । स्वदर्शनविघ्नकरत्वादव्यवधायकत्वं इत्यादे मूर्च्छान्तरगतविषा-

आकाशसाम्यं दधुरम्बराणि
न नामतः केवलमर्थतोऽपि ॥ ५६ ॥
यस्यामजिह्मा महतीमपङ्काः
सीमानमत्यायतयोऽत्यजन्तः ।
जनै रजातस्खलनैर्न जातु
द्वयेऽप्यमुच्यन्त विनीतमार्गाः ॥ ५७ ॥
परस्परस्पर्द्धिपरार्द्ध्यरूपाः
पौरस्त्रियो यत्र विधाय वेधाः ।

तिलकं त्वादिनापि साम्यन्दधुरित्यर्थः । उपमालङ्कारः ॥ ५६ ॥

यस्यामिति । यस्यां पुरि अजिह्माः अवक्राः अव्यलीकपटाः दम्भा-
दिरहिता इत्यर्थः । आचरेत्सदर्शी इतिमजिह्मामपठ तथेति पार-
प्रादिति भावः । जिह्मं कपटवक्रयोरिति विश्वः । अपङ्काः कर्दम-
रहिता निष्पापाश्च । पङ्कोऽस्त्री कर्दमे इति हेमः । महतीं सीमानं
राजकल्पितक्षेत्रमानं मर्यादां कुलागतानुष्ठानस्थितिञ्च अत्यजन्त अत्य-
जन्महामर्यादा इत्यर्थः । अतिमात्रा आयतिरायामः उत्तरकालश्च
येषां ते अत्यायतयः । आयतिस्तूत्तरे काले संयमायामयोरपीति विश्वः ।
थे द्विरूपा अपि । प्रथमचरमतयेत्यादिना जसि विभाषया सर्वनाम-
ता । विनीतमार्गैः उपचितपुरवीथयः सुशिक्षिताचारपद्धतयश्च न
जातं स्खलनं पाषाणादिप्रतिघातो विरुद्धाचरणं च येषां तैर्जनैः जातु
कदाचिदपि नात्यज्यन्त न त्यक्ताः न कदाचित् विलीनता इत्यर्थः । अत्र
र्गशब्दस्य [illegible] मार्गद्वयप्रतीतेः
द्वयानामपि मार्गाणां प्रकृतत्वाच्च केवलप्रकृतविषयोऽर्थश्लेषः । विशेष्य-
स्यापि श्लिष्टत्वान्न तुल्ययोगिता ॥ ५७ ॥

परस्परेति । यत्र पुरि परस्परस्पर्द्धिन्यः स्पर्द्धिकयान्योन्यसामर्थ्य

श्रीनिर्मिति प्राप्तघुणाक्षरैक
वर्णोपमावाच्यमलं ममार्ज्ज ॥ ५८ ॥
चुसं यदन्तःकरणेन वृक्षाः
फलन्ति कल्पोपपदास्तदेव ।
अध्यूषुषीयामभवन् जनस्य
याः सम्पदस्तामनसोऽप्यगम्याः ॥ ५९ ॥
कलादधानः सकलाः स्वभाभि
रुद्भासयन् सौधसिताभिराशाः ।

पराद्ध्यानि श्रेष्ठानि रूपाणि सौन्दर्याणि यासान्ता । रूपं स्वभावे सौन्दर्ये इति विश्वः । पुरे भवाः पौराः ता स्त्रियः पौरस्त्रियः । स्त्रियाः पुंवदित्यादिना पुंवद्भावः । विधाय निर्माय वेधाः स्रष्टा श्रियो लक्ष्मीदेव्या निर्मित्या निर्माणेन प्राप्तं यत् घुणेन वज्रकीटेन चतस्रोत्कीर्णः सैकवर्ण उपमया साम्येन वाच्यमपवादः तदलमत्यन्तं सदैव ममार्जेति केचित् ममार्ज घुणाक्षर वत् यादृच्छिकमिदं श्रीदेवतःसौन्दर्यं शिल्पं न कौशल मित्ययशः चालितवानित्यर्थः । अनया चातिशयोक्त्या पौरस्त्रीणां रमा समानसौन्दर्यं वस्तु व्यज्यते ॥ ५८ ॥

चुसमिति । यदन्तःकरणेन चुसमभ्यस्तं मनेदमभूयादिति भूयोभूयः सङ्कल्पितमित्यर्थः कल्पयन्ति सङ्कल्पितार्थानिति कल्पाः कल्प इत्युपपदं व्यावर्त्तकं येषां ते कल्पोपपदाः वृक्षाः कल्पवृक्षाः तदेव फलन्ति निष्पादयन्ति फलनिष्पत्ताविति धातोर्लट् । किन्तु यां पुरम ध्यूषुषीयसामुषितवन्तः । उपान्वध्याङ्वस इति कर्मत्वं भाषायां सदवसश्रुव इति क्वसुप्रत्ययः । जनस्य याः सम्पदोऽभवन् तामनसोऽप्यगम्याः वाचामभूमय इति किमु वक्तव्यमिति भावः । स्वर्गे स्वर्गे कल्पवृक्षव्यतिशयोक्त्या पौराणां देवेन्द्रभोगो व्यज्यते ।
इत्युपपदं स्वर्गैकदेशो येषामिति व्याख्याने ।५९

यां रेवतीजानिरियेष हातुं
न रौहिणेयो न च रोहिणीशः ॥ ६० ॥

बाणाहवव्याहतशम्भुशक्ते-
रासत्तिमासाद्य जनार्दनस्य ।
शरीरिणा जैत्रशरेण यत्र
निःशङ्कमूषे मकरध्वजेन ॥ ६१ ॥

कलेति । सकला समग्रा ; कलास्तु चन्द्रिकाः षोडश भा-
गाश्च इत्याह । कला शिल्पे कालभेदे इति । कला तु षोडशो भाग इति
चामरः । इयमपि भोग्यत्वदर्शिताभिः समाभिसारादिसम्भ्रमयन
ती ककुद्मिकन्या पूर्वं यस्य जाया यस्य स रेवतीजानिः । जायया
निङिति समासान्तो निङादेशः । लोपो व्योर्वलीति यलोपः । रोहिण्या
अपत्यं पुमान् रौहिणेयः बलभद्रः । स्त्रीभ्यो ढक् । यां पुरीं हातुमत्यक्तु-
मियेष नैच्छति स्म । लिट् । रोहिणीशश्चन्द्रश्च हातुं न इयेष । अत्र
रौहिणेयरोहिणीशयोः प्रकृताप्रकृतत्वेन तयोः प्रकृतत्वाद्विशेषणसा-
म्यत्वाच्च केवलप्रकृतविषया तुल्ययोगिता । गतमन्यत् ॥ ६० ॥

बाणेति । यत्र पुरि बाणाहवे बाणासुरयुद्धे व्याहता व्यर्थीकृता शम्भुश-
क्तिर्येन तस्य हरविजयिनो जनार्दनस्य कृष्णस्यासत्तिं सन्निधिमासाद्य
प्राप्येत्यर्थः शरीरिणा विग्रहवता न त्वनङ्गेनेति भावः । जेतार
एव जैत्रा जयशीलाः । तृन्नन्तात्प्रज्ञादित्वादण् प्रत्ययः । ते शरा यस्य
तेन मकरध्वजेन कामेन प्रद्युम्नरूपेणेति भावः । निःशङ्कं निर्भीकमूषे
स्थितम् । वसनिवासे भावे लिट् वचिस्वपियजादीनां सम्प्रसारणम् ।
शासिवसिघसीनां चेति षत्वम् । अत्र शम्भुशक्तिव्याघातकत्वादिविशे-
षणगत्यानि शङ्कनिवासहेतुत्वोक्तेः काव्यलिङ्गभेदः । पुरा शिव-
नेत्रानलदग्धो धूर्जटिशत्रुमूर्तिर्बाणनियोधिनं हरिमभियुक्तः

निषेव्यमाणेन शिवैर्मरुद्भि
रध्यास्यमाना हरिणा चिराय ।
उदग्ररत्नाङ्कुरधाम्नि सिन्धो
र्वाह्वास्त मेरावमरावतीं या ॥ ६२ ॥

स्निग्धाञ्जनश्यामरुचिः सुवृत्तो
वध्वा इवाध्वंसितवर्णकान्तेः ।

निषेव्यमाणेनेति । शिवैर्मरुद्भिर्मन्दमारुतैः अन्यत्र शिवैरुद्रैर्मरुद्भिर्देवैश्च चिराय निषेव्यमाणेन हरिणा श्रीकृष्णेन शक्रेण च अध्यास्यमाना अधिष्ठीयमाना उदग्राणां रत्नाङ्कुराणां धाम्नि स्थाने एकत्र रत्नाकरत्वादन्यत्र रत्नसानुत्वाच्चेति भावः सिन्धौ स्थितेति शेषः या पुरी मेरौ स्थितामस्मरा यस्यां सन्तीत्यमरावतीमिन्द्रनगरीम् । मतौ बह्वचोऽनजिरादीनामिति दीर्घः संज्ञायां मादुपधायाश्चेति वत्वम् । आह्वास्त स्पर्धया आह्वतवती अमरावतीमनु चकारेत्यर्थः । ह्वयतेर्लुङ् स्पर्धायामाङ इत्यात्मनेपदं लिपिसिचिह्वश्चेति आत्मनेपदेष्वन्यतरस्यामिति च्लेरङ् आतपत्ते सिजादेशः । अत्र प्रथमार्थे श्लेषेऽपि सिन्धौ मेरौ स्थितेति प्रतिबिम्बभावेन साधर्म्यात्तो श्लेषात्तु प्रातितेयमुपमेति सङ्क्षेपः । आह्वास्तेति सादृश्यप्रतिपादकः शब्दः स्पर्धते ह्वयते इत्यीष्यनुपातनात् ॥ ६२ ॥

स्निग्धेति । स्निग्धं यदञ्जनं तद्वत्तेन च श्यामरुचिः सुवृत्तः सद्वृत्तिः सुवृत्तश्च । त्रयाणां लोकानां समाहारस्त्रिलोकी । तद्धितार्थोत्तरपदसमाहारे चेति समासः । सङ्ख्यापूर्वो द्विगुरिति द्विगुसंज्ञा, अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्यत इति स्त्रीत्वं द्विगोरिति ङीप् । तस्यास्तिलको भूषणभूतः स हरिरेव विशेषको वा तिलक इवेत्यर्थः । इवार्थे वा यथा वा इत्यमरोक्तेः । तमालपत्रतिलकचित्रकाणि विशेषकम् द्वितीयञ्च

विशेषको वा विशिशेष यस्याः
श्रियं त्रिलोकीतिलकः स एव ॥ ६३ ॥
तामीक्षमाणः स पुरं पुरस्ता
त्प्रापत्प्रतोलीमतुलप्रतापः ।
वज्रप्रभोद्भासिसुरायुधश्री
र्या देवसेनेव परैरलङ्घ्या । ६४ ।
प्रजा इवाङ्गादरविन्दनाभेः
शम्भोर्जटाजूटतटादिवापः ।

रौप्यस्य यस्या तस्या पुर अन्यलोकस्थितो यथो गौरादि कान्तिमा-
त्वस्य च यस्यास्तस्या । वर्णो द्विजादौ शुक्लादावित्युभयत्राप्यमर ।
तथा एव श्रिय विशिशेष विशेषितवान् । अनेकशब्दैरुपमेयत्वे ।
शब्दमात्रसाधर्म्यात श्लेषस्तत्रापि सोपमेत्याह दण्डी ॥ ६३ ॥

तामिति । अतुलप्रताप स हरि ता पूर्वोक्ता पुरमीक्षमाण
पुरस्तात पूर्वस्यान्दिशि । सप्तम्यर्थे अस्ताति प्रत्यय । प्रतोलीं रथ्याम ।
रथ्या प्रतोली विशिखेत्यमर । प्रापत प्राप्तवान् । लृदित् पुषादित्वादङा
देशः । वज्राणां तोरणप्रासादादिगतहीरकादिमणीनां प्रभा
भिरुद्भासिनी सुरायुधश्रीरिन्द्रचापलक्ष्मीर्यस्या सा । इन्द्र वज्र पक्षप
र्याप्तमात्रोपलक्षण अन्यैन्द्रायुधाभावाद्यादिति भावः । अन्यत्र वज्रस्य
कुलिशस्य प्रभाभिरुद्भासिनी सुरायुधानामितरदेवतायुधानां श्रीर्यस्या सा ।
वज्रोऽस्त्री हीरके पवावित्यमर । या प्रतोली देवसेना सुरचमूरिव परैः
शत्रुभिरलङ्घ्या दुष्प्रधर्षा ॥ ६४ ॥

प्रजा इति । अरविन्दनाभेर्विष्णोरङ्गात् प्रजा इव । यतो वा
इमानि भूतानि जायन्त इति श्रुतेरिति भाव । शम्भोर्जटाजूट तटादाप

मुखादिवाथ श्रुतयो विधातुः
पुरान्निरीयुर्मुरजिद्ध्वजिन्यः ॥ ६५ ॥
श्लिष्यद्भिरन्योन्यमुखाग्रसङ्ग
स्खलत्खलीनं हरिभिर्विलोलैः ।
परस्परोत्पीडितजानुभागा
दुःखेन निश्चक्रमुरश्ववाराः ॥ ६६ ॥
निरन्तरालेऽपि विमुच्यमाने
दूरं पथि प्राणभृतां गणेन ।

सेनाः पुरान्निरीयुः निर्गताः । मालोपमेयम् ॥ ६५ ॥

श्लिष्यद्भिरिति । अन्योन्येषां मुखाग्रेषु सङ्गेन स्खलन्तः खलीनाः कविका यस्मिन्कर्मणि तद्यथा तथा । कविका तु खलीनोऽस्त्रीत्यमरः । श्लिष्यद्भिः संश्यद्भिः विलोलैः मुखरचञ्चद्भिर्हरिभि स्तुरङ्गैः करणैरश्वान् वारयन्ति ये तेऽश्ववारा अश्वारोहाः परस्परेणोत्पीडित जानुभागाः सन्तो दुःखेन निश्चक्रमुः निर्जग्मुः । अत्र सम्बाधोक्त्यातिशयोक्तेः स-ङ्करः ॥ ६६ ॥

निरन्तरालइति । तमसा निर्विशेषेण प्राणभृतां गणेन प्राणिवर्गेण कर्त्रा निरन्तरालेऽपि पूर्वं सैन्यैरविरलद्रष्टेऽपि पथि सम्प्रति दूरं दूरत एव विमुच्यमाने सति एतच्च दीपभयादन्धतमसभयाच्चेत्यर्थः । तेजो-महद्भिर्बाधितैः प्रभादस्यैव । तेजोमहस्प्रभा तेज इति विश्वः । दिपैर्दीपैरिव सम्बाधम सङ्कीर्णं यथा तथा भूरे जग्मे । न त्वैरिव सम्बाधादिति भावः । अय गतौ भावे लिट् दयायासश्चेत्याम्प्रत्ययः । सतेजसैव दूरो-त्सारिततमस्के दीपा इव तयोल्कारिप्रादिभिः पथि निरर्गलं द्विपाः प्रययुरित्यर्थः । तमसीति सम्प्रयन्तपाठे तु तमस पथ्युपमानत्वे द्विपा-गमनात्पूर्वं इव तत्रत्यो दीपागमनात् प्राणभृद्भिर्मोचे निरन्तरालं

तेजोमहद्भिस्तमसेव दीपै
र्द्विपैरसम्बाधमयाम्बभूवे ॥ ६७ ॥
शनैरनीयन्त रयात्पतन्तो
रथाः क्षितिं हस्तिनखादखेदैः ।
सयत्नसूतायतरश्मिभुग्न
ग्रीवाग्रसंसक्तयुगैस्तुरङ्गैः ॥ ६८ ॥
वलोर्मिभिस्तत्क्षणहीयमान
रथ्याभुजायावलयैरिवास्याः ।

यथान्मुच्यमानत्वं च न सम्भवतीत्युपमानोपमेययोर्वैरूप्यं स्यात् । प्रती- यान्त पाठे तमसः प्राप्तिकर्मोपमानत्वे तस्याद्दृश्यत्वाकल्पात्स एव साधीया नित्यालङ्कारिकाणां पन्थाः ॥ ६७ ॥

शनैरिति । रयात्पतन्तो वेगात्पतन्तो रथाः सयत्नैः सूतैः सारथिभिः । सूतः क्षत्ता च सारथिरित्यमरः । आयता आकृष्टा ये रश्मयः प्रग्रहाः । किरणप्रग्रहौ रश्मी इत्यमरः । तैर्भुग्नेषु वक्रेषु ग्रीवाग्रभागेषु सं- सक्ताः युगाः युग्याः स्कन्धवाह्याः दारुविशेषाः येषां तैरतएवाखेदैर- ग्रैः तुरङ्गैः हस्तिनखात् हस्तिनखः पुरद्वारि कूटः । कूटं पुरद्वारि यद्धस्तिनखस्तस्मिन्नित्यमरः । तस्माच्छनैः क्षितिं भूमिम् अनीयन्त नीता इति स्वभावोक्तिः यथावद्वस्तुवर्णनात् ॥ ६८ ॥

वलोर्मिभिरिति । । वेलायामूर्मय इव तैर्वेलोर्मिभिः वलयैः कङ्कणैरिव तत्क्षणे हरिनिर्गमनक्षण एव हीयमाना प्रापरिच्यमाना रथ्या भुजेव यस्याः अतएवास्याः शरीरोद्धारस्याश्वकपाणौ कण्ठे निष्क्रा- न्ति निर्गच्छति सति प्रायेण भूम्ना द्वारवतीत्वं द्वारकात्वं स्वस्वरूप मेति यावत् इदं नासीत् हरिविरहे तद्वैकल्यादिति भावः । द्वार- ... मद्रस्य संख्यासात् स्तनयोर्गुणस्वमस्तेति न पुंवद्भावः । अस्य ।

प्रायेण निष्क्रामति चक्रपाणौ
नेष्टं पुरो द्वारवतीत्वमासीत् ॥ ६९॥
पारेजलं नीरनिधेरपश्य
न्मुरारिरानीलपलाशराशीः ।
वनावलीरुत्कलिकासहस्र
प्रतिक्षणोत्कूलितशैवलाभाः ॥ ७० ॥
लक्ष्मीभृतोऽम्भोधितटाधिवासान्
द्रुमानसौ नीरदनीलभासः ।

द्वारवतीत्वं द्वारवत्त्वं नेष्टं तस्य हरेः निष्क्रमणहेतुत्वादित्युपमेयाम्बु-पमितभुजवलयगलनहेतुत्वादुपमा सङ्कीर्णेयम् निष्टत्वोत्प्रेक्षा प्रायेणेत्य-नेन व्यज्यते ॥ ६९ ॥

अथासर्गसमाप्तेः समुद्रं वर्णयति । पार इति । मुरारिर्नीरनिधेः समुद्रस्य जलानां पारे परतीरे पारेजलम् । पारावारे परार्वाचीतीरे इत्यमरः । पारे मध्ये षष्ठ्या वेत्यव्ययीभावः । तत्संयोगादेकारान्तत्वं च पारेशब्दस्य । आसमन्तान्नीलाः पलाशानां पत्राणां राशयो यासां ताः हरितपर्णपुञ्जा इत्यर्थः । पत्रं पलाशं छदनमित्यमरः । अतएवोत्कलिका ऊर्मयः । ऊर्मिरुत्कलिकोल्लोलकल्लोललहरिस्तथेति हलायुधः । तासां सहस्रैः प्रतिक्षणमुत्कूलिताः कूलमुद्गताः कूलं प्रापिता इत्यर्थः । उत्कूलयत्युत्करोतीति ण्यन्तात्कर्मणि क्तः । तेषां शैवलानां आभेवाभा यासां ताः तत्सदृशीरित्यर्थः वनावलीरपश्यत् । अत्रोत्कूलितशैवलस्य स्वतः सिद्धसन्देहादुपमोत्प्रेक्षयोः सन्देहसङ्करः ॥ ७० ॥

लक्ष्मीभृत इति । असौ हरिर्लक्ष्मीं शोभां श्रीदेवीं च बिभर्तीति लक्ष्मीभृतस्तान् अम्भोधितटे अधिवासो येषां तान् नीरदवन्नीलभासः नीलरत्नान् लतावध्व इवेत्युपमितसमासः अन्यत्र लता इव वध्व इति

लतावधूसम्प्रयुजोऽधिवेलं
बहूकृतान् स्वानिव पश्यति स्म ॥ ७१ ॥

आश्लिष्टभूमिं रसितारमुच्चै
र्लोलद्भुजाकारबृहत्तरङ्गम्।
फेनायमानं पतिमापगाना
मसावपस्मारिणमाशशङ्के ॥ ७२ ॥

पीत्वा जलानान्निधिनातिगार्ध्या
द्वृद्धिङ्गतेऽप्यात्मनि नैव मान्तीः।

शाकपार्थिवादित्वान्मध्यमपदलोपी समासः। ताभिः सम्प्रयुज्यन्त इति सम्प्रयुजः बहूकृतान्। क्विप्। अधिवेलं वेलायाम्। विभक्त्यर्थेऽव्ययीभावः। द्रुमान् बहूकृतानेककीकृतान् स्वान् स्वकीय विपक्षानिवेत्यर्थः। एतच्च पुंलिङ्गतानिर्देशे। आत्मपरत्वे नपुंसकत्वापातः। स्वोज्ञात्यात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धन इत्यमरः। पश्यति स्म लेपसहीस्थ यदसमेवा ॥ ७१ ॥

आश्लिष्टेति। आश्लिष्टभूमिमाश्लिष्टभूतलं उच्चैस्तारं रसितारं क्रन्दितारं लोलतां चञ्चलतामितरतः पततां भुजानां आकार इव आकारो येषां ते बृहत्तरङ्गा यस्य तमधोक्तं फेनायमानं फेनमुद्वमन्तम्। फेनायेति वमन्त्यनिति क्यङ्। अपां समूह आपम्। तस्य समूह इत्यण्। तेन गच्छन्तीत्यापगा। तासां पतिं समुद्रं असौ हरिरपस्मारिणमपस्मारोगिणमाशशङ्के। तत्कार्ययोगात्तथा उत्प्रेक्षाञ्चक्रे इत्यर्थः। यथाहुर्निदानिकाः। क्षुब्धो पतित्वभिराहतोऽय दशति प्राणी मन धमिन्त्स्नान् खादति फेनमुद्गिरति दो पादौ विपन्नदृष्टिः। यदनु दन्तपङ्क्तिविते निपतति अपाङ्गरोति क्रिया विभ्रम मयभेर पश्यति रते वेगे तदपस्मारवत् ॥ ७२ ॥

[illegible]ति। जलानां निधिना समुद्रेण गर्द्ध इव गार्द्धम्। अतिरम्या

चिप्ता इवेन्दोः स रुचोऽधिवेलं
मुक्तावलीराकलयाञ्चकार ॥ ७३ ॥
साटोपमुर्वीमनिशं नदन्तो
यैः प्लावयिष्यन्ति समन्ततोऽमी ।
तान्येकदेशान्निभृतं पयोधिः
सोऽम्भांसि मेघान् पिबतो ददर्श ॥ ७४ ॥
उद्धृत्य मेघैस्तत एव तोय
मर्थं मुनीन्द्रैरिव सम्प्रणीताः ।

इतिचातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् । तदतिमात्रमतिगार्द्ध्यं तस्मात्तृष्णा भरादित्यर्थः । गृध्नोः पुनरोर्गुणः धाप्नोयि प्रत्यये इति गार्द्ध्यमिति स्यात् पीत्वा चोषणक्रियापेक्षया पूर्व्वकालता च्यय वृद्धिं गते आत्मनि देहे । चन्द्रोदये समुद्रस्य वृद्धिरित्यागमः । अत एव मानीरमान्तीः अति- रिच्यमाना इत्यर्थः । मातेः मतरि ङीप् चाक्षीनद्योर्हस्वः । चिप्ता उद्गीर्णा अति तृष्णयोत्कटं पीत्वा अन्तरमानाद्बहिरुद्गाता इत्यर्थः । इन्दोश्चोभरीचीरिवेत्युपमेत्यर्थः स हरिरधिवेलमधितीरम् । वेला कूलवि- कारयोरिति विश्वः । मुक्तावलीराकलयाञ्चकार आकलयामास कलतिः कामधेनुः ॥ ७३ ॥

साटोपमिति अमी मेघाः साटोपं ससम्भ्रमम् । सम्भ्रमाटोप संर- म्भाः इति यादवः । अनिशं नदन्तो गर्ज्जन्तो यैस्तोयैरम्भोभिरुर्वीं समन्ततः प्लावयिष्यन्ति तान्यम्भांसि पयोधेरेकदेशादेककोणान्निभृतं निश्चलं यथा तथा पिबतो मेघान् स हरिर्ददर्श । एतेन समुद्रस्यापरिच्छिन्नमहत्त्वं व्यज्यते ॥ ७४ ॥

उद्धृत्येति । मुनीन्द्रैस्ततोवेदात् वेदार्थमिव मेघैस्ततोऽम्बुराशे रेव तोयमुद्धृत्य सम्प्रणीताः कृताः अम्बुराशिं भजन्तीः प्रविशन्तीर्नदी-

लतावधूसम्प्रयुजोऽधिवेलं
बहूकृतान् स्वानिव पश्यति स्म ॥ ७१ ॥
आश्लिष्टभूमिं रसितारमुच्चै-
र्लोलद्भुजाकार बृहत्तरङ्गम्।
फेनायमानं पतिमापगाना-
मसावपस्मारिणमाशशङ्के ॥ ७२ ॥
पीत्वा जलानान्निधिनातिगार्द्ध्या-
द्वृद्धिंगतेऽप्यात्मनि नैव मान्तीः ।

शाकपार्थिवादित्वान्मध्यपदलोपी समासः। ताभिः सम्प्रयुज्यन्त इति सम्प्रयुजः सङ्गतान्। क्विप्। अधिवेलं वेलायाम्। विभक्त्यर्थेऽव्ययीभावः। द्रुमान् बहूकृताननेकीकृतान् स्वान् स्वकीय विपक्षानिवेत्यर्थः। एवञ्च पुंविशेषतानिर्वाहः। आत्मपरत्वे नपुंसकत्वापातः। 'स्वो ज्ञाता-वात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धन इत्यमरः। पश्यति स्म श्लेष-सङ्कीर्णोत्प्रेक्षा ॥ ७१ ॥

आश्लिष्टेति। आश्लिष्टभूमिमालिङ्गितभूतलं उच्चैस्तारं रसितारं क्रन्दितारं लोलानां चञ्चलानामतएव भुजानां आकार इव आकारो येषां ते बृहत्तरङ्गा यस्य तत्तथोक्तं फेनायमानं फेनमुद्वमन्तम्। फेनाच्चेति वक्तव्यमिति क्यङ्। अपां समूह आपम्। तस्य समूह इ-त्यण्। तेन गच्छन्तीत्यापगाः तासां पतिं समुद्रं असौ हरिरपस्मारिणम-पस्माररोगिणम् आशशङ्के। तत्कर्मयोगात्तथा उत्प्रेक्षितवानित्यर्थः। यथाहुर्नैदानिकाः। क्षुब्धैर्धातुभिराहतेऽथ मनसि प्राप्तो मन इन्द्रिय-न्द्वत्वात् खादति फेनमुद्गिरति दोःपादौ क्षिपन्मूढधीः। पतन् भ्रमम-न्मूर्च्छितो निपतति अपाङ्गरोति क्रिया विश्वस्य अयमेव मारुति गते भंगे त्वपस्मारकः ॥ ७२ ॥

पीत्वेति। जलानां निधिना समुद्रेण गर्द्धस्य गार्द्धम्। अतिदम्या

छिप्रा इवेन्दोः स रुचोऽधिवेलं
मुक्तावलीराकलयाञ्चकार ॥ ७३ ॥
साटोपमुर्वीमनिशं नदन्तो
यैः प्लावयिष्यन्ति समन्ततोऽमी ।
तान्येकदेशान्निभृतं पयोधेः
सोऽम्भांसि मेघान् पिबतो ददर्श ॥७४॥
उद्धृत्य मेघैस्तत एव तोय
मर्थं मुनीन्द्रैरिव सम्प्रणीताः ।

दिवचातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् । तदतिमात्रमतिगार्ध्यं तस्मात्तृष्णा भरादित्यर्थः । गृध्नोः पुनरोर्गुणः वाक्तोयि प्रत्यये इति गार्ध्यमिति स्यात् पीत्वा चोभयक्रियापेक्षया पूर्वकालता अथ वृद्धिं गते आत्मनि देहे । चन्द्रोदये समुद्रस्य वृद्धिरित्यागमः । नैव मान्तीरमान्तीः अति-रिच्यमाना इत्यर्थः । मातेः शतरि ङीप् आच्छीनद्योर्नुम् । छिप्रा उद्गीर्णा अति तृष्णयोत्कटं पीत्वा अन्तरमानादहिरुद्गाना इत्यर्थः । इन्दोरुचो मरीचीरिवेत्युत्प्रेक्षा स हरिरधिवेलमधितीरम् । वेला कूलवि-कारयोरिति विश्वः । मुक्तावलीराकलयाञ्चकार आकलयामास कलतिः कामधेनुः ॥ ७३ ॥

साटोपमिति अमी मेघाः साटोपं ससम्भ्रमम् । सम्भ्रमाटोप संर-म्भादति यादवः । अनिशं नदन्तो गर्जन्तो यैस्तोयैरम्भोभिरुर्वीं समन्ततः प्लावयिष्यन्ति तान्यम्भांसि पयोधेरेकदेशादेककोणान्निभृतं निश्चलं यथा तथा पिबतो मेघान् स हरिर्ददर्श । एतेन समुद्रस्यापरिच्छिन्नरूपत्वं व्यज्यते ॥ ७४ ॥

उद्धृत्येति । मुनीन्द्रैस्ततो वेदात् वेदार्थमिव ... रेत तोयमुद्धृत्य सम्प्रणीताः कृताः अम्बुराशिं पतन्तीः प्रविशन्तीर्न

विलोचनस्थानगतोष्णरश्मि-
निशाकरं साधु हिरण्यगर्भम् ॥ ४ ॥
क्वचिज्जलापायविपाण्डुराणि
धौतोत्तरीय प्रतिमच्छवीनि ।
अभ्राणि बिभ्राणमुमाङ्गसङ्ग
विभक्तभस्मानमिव स्मरारिम् ॥ ५ ॥
छायां निजस्त्रीचटुलालसानां
मदेन किञ्चिच्चटुलालसानाम् ।

चनयोर्यत् स्थानं योग्यदेशं तद्गतावुष्णरश्मिनिशाकरौ यस्य तं ब्रह्माणं ने-त्रोत्सङ्गेन्दुमित्यर्थः अत साधु सत्यं हिरण्यगर्भमिव स्थितमित्युत्प्रेक्षा सहस्रशीर्षत्वादिश्रुतेरिति भावः । हिरण्यगर्भो विधिगर्भः ॥ ४ ॥

क्वचिदिति । पुनः क्वचिदेकदेशे जलानामपायेनापगमेन विपाण्डु-राणि शुभ्राणि अतएव धौतं क्षालितं यदुत्तरीयं तत्प्रतिमा तत्सदृशा छविर्येषां तानि अभ्राणि मेघान् बिभ्राणं दधानम् । अत्र कर्त्तरि शानच् । अतएवोमायाः पार्वत्याः अङ्गसङ्गेनार्द्धभागेन विभक्तं एक-भागस्थापितं भस्म यस्य तं स्मरारिं हरमिव स्थितमित्युत्प्रेक्षाल-ङ्कारः ॥ ५ ॥

छायामिति । पुनः निजस्त्रीणां चाटुषु प्रियवचनेषु लालसाः लो-लुपाः । लोलुपो लोलुभो लोलो लम्पटो लालसोऽपि चेति यादवः । तेषां निजस्त्रीचटुलालसानां मदेन किञ्चिदीषच्चटुलाश्चपलाश्च ते अलसाश्च । मयपयोरपि मिथोऽपि विशेषणविशेष्यभावविवक्षया विशेषणसमासः । चाटुचटुलालसानां विहङ्गमानां हंसादीनां कलितकूजितानि जातानि कलित-कूजितानि । पूर्ववत्समासः । तानि पत्राणि येषां तैः कलितकुलभा-कलितमुखरीभूतपत्रैरित्यर्थः । दलयोरभेदः । जलजातपत्रैः जल-

कुर्वाणमुत्पिञ्जलजातपत्रै
विहङ्गमानां जलजातपत्रैः ॥ ६ ॥

स्कन्धाधिरूढोज्ज्वलनीलकण्ठा
नुर्वीरुहः श्लिष्टतनूनहीन्द्रैः ।
प्रवर्त्तितानेकलताभुजाग्रान्
रुद्राननेकानिव धारयन्तम् ॥ ७ ॥

विलम्बिनीलोत्पलकर्णपूराः
कपोलभित्तीरिव लोध्रगौरीः ।

जैरातपत्रैः छायां कुर्वाणम् । एतेन महती कमलाकरसमृद्धिर्व्यज्यते । यमकरूपकयोः सङ्करः ॥ ६ ॥

स्कन्धेति । पुनः स्कन्धं प्रकाण्डमधिरूढाः उज्ज्वला नीलकण्ठा मयूरा येषां तान् अन्यत्र स्कन्धाधिरूढाः अंसस्थिताः नीलाः कण्ठा येषां तान् । अथ प्रकाण्डो स्कन्ध इति विश्वः । अहीन्द्रैः श्लिष्टतनून् आश्लिष्टदेहान् एतच्च तदानीमपि तत्त्वमुपपाद्येति भावः । प्रवर्त्तितानि अनेकलतानामेव भुजानां लतानामिव च भुजानां यथापि वेगान्
[illegible] उर्वीरुहो धारयन्तम् ॥ ७ ॥

विलम्बीति । विलम्बिनो नीलोत्पलान्येव कर्णपूराः कर्णाभरणानि यासां ताः लोध्ररजसा गौरीरिव । [illegible] । कपोलभित्तीः कपोलयोः भित्तीरिव स्थिताः । उपमालङ्कारः । यथा [illegible] । उपमा [illegible] इति विश्वः । [illegible] [illegible] कपोलाः पुनः [illegible] [illegible]

नवोलपालङ्कृत सैकताभाः
शुचीरपः शैवलिनीर्दधानम् ॥ ८ ॥
राजीवराजीवशलोलभृङ्ग
मुष्णन्तमुष्णन्ततिभिस्तरूणाम् ।
कान्तालकान्ताललनाः सुराणां
रजोभिरजोभितमुद्वहन्तम् ॥ ९ ॥
मुदे मुरारेरमरैः सुमेरो
रानीय यस्योपचितस्य शृङ्गैः ।

नवतटे ... धानम् । शुचित्वधवलत्वाभ्यां बिम्बप्रतिबिम्बभावेनो-
पमाद्वयम् ॥ ८ ॥

राजीवेति । पुन राजीवराजीनां पद्मपङ्क्तीनां वशा अधीना लो
ला चलाभृङ्गा यस्मिन् तं राजीवराजीवशलोलभृङ्गं तरूणां ततिभि पङ्क्ति
रुष्णमातप मुष्णन्तं हरन्तं कान्ता रम्या अलकान्ताश्चूर्णकुन्तलान्ता या-
सान्ता कान्तालकान्ता । अलकाश्चूर्णकुन्तला इत्यमरः । सुराणां ललनाः
स्त्रियोऽप्सरसः रजोभी रागैः ... मनभिभूतं यथा तथा उद्वहन्तम् ॥

नन्वत्रीयानय कश्चिद्दैवतकोनाम शिलोच्चय कथमियद्वर्ण्यत इति
शङ्का निरस्यति । मुद इति । मुरारेर्मुदे सन्तोषाय अमरै कर्तृभि
सुमेरोः शृङ्गै करणैरानीयोपचितस्य वर्धितस्य ... शृङ्गैरुपचितस्ये-
त्यर्थं । उपचये कारणानां शृङ्गाणामयोदानयनकर्मत्वम् । यस्य शैलस्य
उच्छ्राय औन्नत्य सौन्दर्यं च तयो गुणा उत्कर्षो उद्दामगिरा प्रगल्भ-
वाचा कवीनां स्वपा उद्यन्त इति स्तयोद्या मिथ्यावाच्या न भवन्ति मेरु-
शृङ्गेषु सर्वगुणसम्भवादिति भाव । राजसूयसूर्यमृषोद्येत्यादिना क्यप्
व्यन्तोनिपात । उत्पूर्वात् श्रयतेः उच्छ्राय इति पचान्तेनोपसर्गस्य
समास ... घञ् प्रत्यय । श्रीणीभुवोऽनुपसर्गे इति नियमात्

भवन्ति नोद्दामगिरां कवीनां
मुच्छ्रायसौन्दर्य्य गुणास्तृषोद्याः ॥ १० ॥
यतः पराग्र्याणि भृतान्यनूनैः
प्रस्थैर्मुहुर्भूरिभिरुच्छिखानि ।
आप्यादिव प्रापणिकादजस्रं
जग्राह रत्नान्यमितानि लोकः ॥ ११ ॥
अखिद्यतासन्नमुदग्रतापं
रविन्दुयानेऽप्यरविन्दधाने ।

इद इत्यादिश्लोकद्वयके यच्छब्दस्य दृष्टोऽयं शैलः स इत्यनेनान्वयः । चैत्यमुद्रा सम्बन्धेऽपि असम्बन्धरूपेणातिशयोक्तिः ॥ १० ॥

यत इति । लोकः पराग्र्याणि श्रेष्ठानि अनूनैर्महद्भिः भूरिभिः प्रभूतैः । प्रभूतं प्राज्यं भूरीत्यमरः । प्रस्थैः सानुभिर्मानविशेषैश्च । प्रस्थोऽस्त्री सानुमानयोरित्यमरः । भृतानि च सम्भृतानि मितानि उच्छिखान्युद्गतशीर्षाणि च अमितानि अपरिमितानि रत्नानि यतः शैलादापणिकात् । पण्य आपो धनीत्यमरः । पण्यो व्यवहारः प्रयोजनमस्य प्रापणिकोऽवणिक् । तदस्य प्रयोजनमिति ठञ् । यथा लोकः प्रापणिकाद्देशान्तरमागतात् ते वणिज इति वैजयन्ती । तथाविधरत्नपूर्णमित्यर्थः । उपमालङ्कारः ॥ ११ ॥

अखिद्यतेति । ...

भृङ्गावलिर्यस्य तटे निपीत
रसा नमत्तामरसा न मत्ता ॥ १२ ॥
यत्राधिरूढेन महीरुहोच्चै
रुन्निद्रपुष्पार्चिसहस्रभाजा ।
सुराधिपाधिष्ठितहस्तिमल्ल
लीलान्दधौ राजतगण्डशैलः ॥ १३ ॥
विभिन्नवर्णा गरुडाग्रजेन
सूर्यस्य रथ्याः परितः स्फुरन्त्या ।

धानेऽप्यरविन्दाकरविहारान्मधुकरालापं नापुरित्यर्थः ॥ १२ ॥

यत्रेति । यत्र शैले रजतस्य विकारो राजतः । प्राणिरजतादिभ्योऽञित्यञ् प्रत्ययः । स चासौ गण्डशैलश्च । गण्डशैलास्तु च्युताः स्थूलोपला गिरेरित्यमरः । उन्निद्राणि विकसितानि पुष्पाण्यर्चींषीवेत्युपमितसमासः । तेषां सहस्रं भजतीति तद्भाजा अधिरूढेनोच्चैर्महीरुहा वृक्षेण सुराधिपेन देवेन्द्रेण अधिष्ठितो यो हस्ती मल्ल इव तस्यैरावतस्य लीलां शोभान्दधौ ऐरावतस्य धावल्यादिति भावः । हस्तिमल्लोऽभ्रमातङ्गे हस्तिमल्लो विनायके इति विश्वः । अत्र लीलामिव लीलामिति सादृश्याक्षेपान्निदर्शनालङ्कारः ॥ १२ ॥

विभिन्नेति । गरुडाग्रजेनारुणेन विभिन्नवर्णा अन्यथाकृतवर्णा अरुणिमानमापादिता इत्यर्थः । सूर्यस्य सम्बन्धिनो रथं वहन्तीति रथ्याः रथाश्वाः । तद्वहति रथयुगप्रासङ्गमिति यत्प्रत्ययः । यत्र शैले वंशकरीरनीलैः वंशाङ्कुरश्यामैः रत्नैर्मरकतैरित्यर्थः । वंशाङ्कुरे करीरोऽस्त्रीत्यमरः । वंशाङ्कुरश्यामताहेतोरनुमानाधाः प्रतिपत्त्यर्थत्वादपौनरुक्त्यम् । अतएवैकार्थपदप्रयोगोऽर्थमित्युक्त्वा कदिकुलभकर्णावतंसादिषु [illegible] न दोष इत्याह वामनः । स विशेषणे इति ।

रत्नैः पुनर्यत्र रुचा रुचं स्वा

मानिन्यिरे वंशकरीरनीलैः ॥ १४ ॥

यत्रोज्झिताभिर्मुहुरम्बुवाहैः

समुन्नमद्भिर्न समुन्नमद्भिः ।

वनं बबाधे विषपावकोत्था

विपन्नगानामविपन्नगानाम् ॥ १५ ॥

फलद्भिरुष्णांशुकराभिमर्षात्

कार्शानवं धाम पतङ्गकान्तैः ।

सरितः स्फुरन्त्या रुचा स्वप्रभया करणेन पुनः स्वां रुचं निजहरितवर्णमेव आनिन्यिरे आनीताः । नयतेर्द्विकर्मकात् प्रधाने कर्मणि लिट् । प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणामिति वचनात् । अत्र विभिन्नवर्णा इत्येकस्तद्गुणः । रथ्यानां स्वगुणत्यागेन गरुडाश्मजगुणग्रहणात् पुनस्तत्त्यागेन मरकतगुणग्रहणादपरस्तद्गुणस्तदुपजीवीति सजातीययोः सङ्करः । तेन गिरेः सूर्यमण्डलपर्यन्तमौन्नत्यं वस्तु व्यज्यते तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणग्रहः ॥ १४ ॥

यत्रेति । यत्र शैले समुन्नमद्भिः समुत्पतद्भिरम्बुवाहैरुज्झिताभिस्त्यक्ताभिरद्भिर्मुहुः समुन्नं सम्यक् उन्नं क्लिन्नं सिक्तमित्यर्थः । उन्दी क्लेदने इति धातोः कर्मणि क्तः नुदविदेत्यादिना निष्ठानत्वं । विपन्नगा विगतपर्णा न भवन्तीत्यविपन्नगाः सपन्नगाः इत्यर्थः । तेषामविपन्नगानामगानां वृक्षाणां वनं विषपावकोत्था विषाग्निसम्भूता विपदापत् न बबाधे नित्यं वर्षानुषङ्गाद्विषाग्निक्षोभो वृक्षाणामकिञ्चित्कर इति भावः ॥ १५ ॥

फलद्भिरिति । यः शैलः उष्णांशुकराभिमर्षादर्ककरसम्पर्कात् कृशानोरिदं कार्शानवं आग्नेयं धाम तेजः फलद्भिर्ददद्भिः अग्नि

प्रशंस यः पात्रगुणाद्गुणानां
सङ्क्रान्तिमाक्रान्तगुणातिरेकाम् ॥ १६ ॥
दृष्टोऽपि शैलः स मुहुर्मुरारे
रपूर्ववद्विस्मयमाततान ।
क्षणे क्षणे यन्नवतामुपैति
तदेव रूपं रमणीयतायाः ॥ १७ ॥
उच्चारणज्ञोऽथ गिरान्दधान
मुच्चारयत्पक्षिगणास्तटीस्तम् ।

करणयोरभिव्यञ्जकैरिति भावः । पतङ्गकान्तैः सूर्यकान्तैः दृष्टान्तभूतैरिति भावः । गुणानां सङ्क्रान्तिमन्यत्र सङ्क्रमणं संक्रान्तगुणामित्यर्थः पात्रगुणादाधारगुणसहकारादाक्रान्तः प्राप्तो गुणातिरेकः कार्यविशेषाधानरूपो गुणोत्कर्षो यस्यास्तां प्रशस प्रतिपादयामास अत्र शिलानां सर्वत्र सङ्क्रमणाविशेषेऽपि सूर्यकान्तेष्वेव ज्वलनजननदर्शनात् सर्वत्रापि सङ्क्रमकारिणां गुणानामाधारगुणसहकारात्कार्यविशेषाधायकत्वमिति निश्चयोऽत्रैव जातः इत्यर्थः । ततश्च सहकारशक्तिविरहिणी सहजशक्तिरनुपकारिणीति भावः । इत्यनुमानोऽलङ्कारः ॥ १६ ॥

दृष्टोऽपीति । मुहुर्दृष्टोऽपि स शैलो मुरारेरपूर्वेण अदृष्टपूर्वेण तुल्यमपूर्ववत् । तेन तुल्यं क्रिया चेद्वतिरिति वतिः । विस्मयमाततान अतिरमणीयत्वादिति भावः । तथाहि क्षणे क्षणे प्रतिक्षणम् । वीप्सायां द्विर्भावः । नवतामपूर्वभावं उपैतीति यत् । तन्नवत्वोपगमनमेव रमणीयतायाः रूपं स्वरूपं लक्षणमित्यर्थः । अत्र रमणीयत्वलक्षणस्य वाक्यार्थस्य विस्मये हेतुत्वसमर्थनाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥१७॥

उच्चारणज्ञ इति । अथ हरिर्विस्मयानन्तरं गिरां वाक्यानां उच्चारणं जानातीत्युच्चारणज्ञः उक्तिकुशलः । ज्ञातोऽनुपसर्गे क इति कप्रत्ययः

उत्कन्धरं द्रष्टुमवेक्ष्य शौरि
मुत्कन्धरं दारुक इत्युवाच ॥ १८ ॥
आच्छादितायतदिगम्बरमुच्चकैर्गा
माक्रम्य संस्थितमुदग्रविशालशृङ्गम् ।

नेगुपदेशादिना आकारादनुपदमन्तर्गोमयदो भवति विप्रतिषेधेनेति वच-
नात् । दारुकः कृष्णसारथिः उत्काः उन्नताः रयन्तः पक्षिगणाः यस्य-
ताः रथलक्षिगणास्तटीर्दधानं तं पूर्वोक्तम् । धरतीति धरं पर्वतम् ।
पचाद्यच् । अहार्यधरपर्वता इत्यमरः । द्रष्टुमुत्कं उत्सुकम् । उत्क-
उन्मना इति निपातः उत्कन्धरमौत्सुक्यादुन्नमितकन्धरं शौरिमवेक्ष्य इति
वक्ष्यमाणक्रमेण वाचमुवाच । नह्यौङ्गितज्ञोऽवसरेऽवसीदतीति भावः ॥१८॥
- इतः प्रभृति यमकानन्तरश्लोकेषु वसन्ततिलकावृत्तं नियमेन नाह
आच्छादितेति । आच्छादितान्यावृतानि आयतानि दीर्घाणि दिशोऽम्ब-
रञ्च दिगम्बराणि येन तं अन्यत्र आच्छादितं वसितमायतं दिगेवाम्बरं
वासो येन तं तयोक्तं उच्चकैरुन्नतां गां भुवमाक्रम्य व्याप्य संस्थितम् । तथा
उदग्राणि उन्नतानि विशालानि च शृङ्गाणि शिखराणि यस्य तं अन्यत्र उदग्रे
विशाले शृङ्गे विषाणे यस्य तं उच्चकैरुन्नतां वृषभमाक्रम्याधिष्ठाय संस्थि-
तमित्यर्थः । शृङ्गं विषाणे शिखरेऽपीति । गौः स्वर्गे वृषभे रश्मौ वज्रे
चन्द्रमसि स्मृतः । अर्जुनीनेत्रदिग्बाणभूवाग्वारिषु गौर्मतेति च विश्वः ।
मूर्ध्नि शिखरे अन्यत्र शिरसि स्फुरन्ती तुहिनदीधितेरिन्दोः कोटिः रश्मिः
कला च यस्य तमेनं नगेशं नगश्रेष्ठं रैवतकं कैलासनायकमीश्वरञ्चोदीक्ष्य
को न विस्मयते सर्वोऽपि विस्मयत इत्यर्थः । नेयं तुल्ययोगिता प्रकृता-
प्रकृतविषये तदनुत्थानात् नापि समासोक्तिः तस्या विशेषणसाम्यजीवितात्
नापि श्लेषः उभयस्यापि विशेष्यस्योपयोगात् तस्मादाकरणिकार्थमात्रपर्य-
वसि ताभिधाव्यापारेणापि शब्देनार्थान्तरधीरुद्धनिरित्याहुः । तदुक्तं
काव्यप्रकाशे । अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते । संयोगा-

इतस्ततोऽस्मिन्विलसन्ति मेरोः
समानवप्रे मणिसानुरागाः।
स्त्रियश्च पत्यौ सुरसुन्दरीभिः
समा नवप्रेमणि सानुरागाः॥२७॥

उच्चैर्महारजतराजिविराजितासौ
दुर्वर्णभित्तिरिह सान्द्रसुधासवर्णा।
अभ्येति भस्मपरिपाण्डुरितस्मरारे
रुद्वह्निलोचनललामललाटलीलाम्॥२८॥

प्रहर्षिणी वृत्तम्। म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्॥ २६॥

इत इति। मेरोः समानवप्रे तुल्यप्रस्थे अस्मिन्नद्रौ इतस्ततो मणिसानुरागा रत्नतटकान्तयो विलसन्ति प्रसरन्ति। किञ्च नवप्रेमणि यस्मिन्नवप्रेमणि पत्यौ अनुरागेण सह वर्तन्त इति सानुरागाः सुरसुन्दरीभिः समाः सदृशाः स्त्रियश्च इतस्ततो विलसन्ति क्रीडन्ति अन्योन्यमनुरागिणोऽत्र दम्पती इव शिलाश्च तदनुरूपाणि च विहारस्थलानि सन्तीति भावः॥ २७॥

उच्चैरिति। इहाद्रौ सान्द्रया सुधया लेपविशेषेणाक्तेन सवर्णा समानवर्णा। ज्योतिर्जनपदेत्यादिना समानस्य सादेशः। लेपमृत्स्नायां सुधेति वैजयन्ती। महारजतराजिविराजिता काञ्चनरेखाशोभिता असौ पुरोवर्तिनी उच्चैरुन्नता दुर्वर्णभित्तिः रजतभित्तिः। महारजतकाञ्चने इति। दुर्वर्णं रजतं रूप्यमित्यमरः। भस्मना परिपाण्डुरितस्य स्मरारेरुद्वह्नि उद्गतार्चिर्लोचनमेव ललामभूषा यस्य तस्य ललाटस्य लीलां शोभामभ्येति भजतीति निदर्शनालङ्कारः। ललामं पुण्ड्रपुण्ड्रध्वजभूषाप्राधान्यकेतुनित्यमरः॥ २८॥

अयमतिजरठाः प्रकामगुर्वी-
रलघुविलम्बिपयोधरोपरुद्धाः ।
सततमसुमतामगम्यरूपाः
परिणतदिक्करिकास्तटीर्बिभर्त्ति ॥२९॥
धूमाकारं दधति पुरः सौवर्णे
वर्णेनाग्नेः सदृशि तटे पश्यामी ।

अयमिति । अयमद्रिरतिजरठाः अतिकठिनाः अतिजरतीश्च । जरठः कठिने जीर्णे इति वैजयन्ती । प्रकामगुर्व्यः श्रेष्ठाः स्थौल्यात् दुर्भराश्च प्रकामगुर्वीः । गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भरे इति शब्दार्णवः । विस्पष्टपटुवत् मयूरव्यंसकादयश्चेति समासः अलघुभिर्विलम्बिभिर्लम्बमानैः पयोधरैर्मेघैः स्तनैश्च । स्त्रीस्तनाब्दौ पयोधरावित्यमरः । उपरुद्धाः आवृताः निरुद्धाः सततं सर्वदा असुमतां प्राणभृतामगम्यरूपाः अन्यत्र उन्नतत्वात् दुरारोहस्वरूपाः अन्यत्र वृद्धत्वाद्गमनानर्हविग्रहाः । त्यजेदन्यकुलोत्पन्नां वृद्धां स्त्रीं कन्यकान्यगामिति गमननिषेधादिति भावः । परिणतास्तिर्यग्दन्तप्रहारिणो दिक्करिणो दिग्गजाः यासु ताः परिणतदिक्करिकाः । तिर्यग्दन्तप्रहारस्तु गजः परिणतो मत इति हलायुधः । इनः स्त्रियामिति समासान्तः कप्प्रत्ययः । अन्यत्र परिणताः क्षीणीभूताः दिग्भ्यो दन्तक्षतविशेषाः करिकाः नखव्रणाश्च यासान्ताः । दिग्दष्टे वर्त्तुला-कारे करिका नखरेखिकेति वैजयन्ती । तटीर्बिभर्त्ति । अत्र प्रकृततटी-विशेषणमहिम्ना अप्रकृतवृद्धाङ्गनाप्रतीतेः समासोक्तिः । पुष्पिताग्रा-वृत्तमुक्तम् ॥ २९ ॥

धूमेति । हे कान्ते पुरोऽग्रे वर्णेनाग्नेः सदृशि समाने अग्निसमान-वर्णे इत्यर्थः; सौवर्णे सुवर्णविकारे तटे कुसुमसमूहे लीना स्थिता । ल्वा-दिभ्यश्चेति निष्ठानत्वं । अलीनां भृङ्गाणामालीभिरावलीभिश्छायाः; अतएव श्यामीभूताः अमी तरवो धूमाकारं धूमसारूप्यं दधति त्वं पश्य । स्वर्णतटे

श्यामीभूताः कुसुमसमूहैरलीनां
लीनामालीमिह तरवो बिभ्राणाः ॥ ३० ॥
व्योमस्पृशः प्रथयता कलधौतभित्ती-
रुन्निद्रपुष्पचणचम्पकपिङ्गभासः ।
सौमेरवीमधिगतेन नितम्बशोभा-
मेतेन भारतमिलावृतवद्विभाति ॥ ३१ ॥
रुचिरचित्रतनूरुहशालिभि-
र्विचलितैः परितः प्रियकव्रजैः ।

क्षरन्तीति श्यामाभूतवोधूमवज्ञालीत्युपमा । जलधरमाला वृत्तम् । अम्भोङ्गैः स्याज्जलधरमाला म्भौ स्माविति लक्षणात् । ३० ॥

व्योमेति । व्योमस्पृशोऽभ्रङ्कषाः उन्निद्रैर्विकसितैः पुष्पैर्वित्ताः उन्निद्रपुष्पचणाः । तेन वित्त इति चणप्प्रत्ययः । ते च ते चम्पकाश्च तद्वत्पिङ्गभासः पिङ्गवर्णाः कलधौतभित्तीः कनकतटीः । कलधौतं रौप्यहेम्नोरिति विश्वः । प्रथयता प्रकटयता अतएव सौमेरवीं सुमेरुसम्बन्धिनीं नितम्बशोभां कटकलक्ष्मीं अधिगतेन प्राप्तवता । गत्यर्थाकर्मकेत्यादिना गमेः कर्त्तरि क्तः । एतेन रैवतकाद्रिणा भारतं भरतस्य राज्ञ इदम्भारताख्यं वर्षं भूखण्डम् । स्याद्वर्षो लोकधात्वंशे वत्सरे वर्षमस्त्रियामित्यमरः । इलावृतवदिलावृतवर्षमिव विभातीत्युपमा । नवखण्डस्य जम्बूद्वीपस्य हिमाद्रेर्दक्षिणभूखण्डं हैमवताख्यमेकं भारतवर्षं सुमेरुयोगात्सौमेरवापरस्य मध्यमखण्डमिलावृतवर्षं अतएव नात्रेदम्भारतं वर्षं हिमाद्रेस्तु दक्षिणे । तेन हैमवतं नाम परे यद्येवमुच्यते । इलावृतं सौमेरवं सुमेरोः परितोऽस्ति तदिति वैजयन्ती ॥ ३१ ॥

रुचिरेति । असौ गिरिः रुचिरैः उज्ज्वलैः चित्रैर्नानावर्णैः तनूरुहैः लोमभिः शालन्त इति तथोक्तैः परितः प्रचलितैः प्रचरद्भिः प्रियकाः

विविधरत्नमयैरभिभात्यसा
ववयवैरिव जङ्गमतां गतैः ॥ ३२ ॥
कुशेशयैरत्र जलाशयोषिता
मुदा रमन्ते कलभाविकस्वरैः ।
प्रगीयते सिद्धगणैश्च योषिता
मुदारमन्ते कलभाविकस्वरैः ॥ ३३ ॥
आसादितस्य तमसा नियतेर्नियोगा
दाकाङ्क्षतः पुनरपक्रमणेन कालम् ।

कम्बलप्रकृतयोस्तृणविशेषाः । प्रियको रोमभियुक्तौ मृदुः चर्मस्तस्यमिनेरिति वैजयन्ती । तेषां व्रजैः समूहैः जङ्गमतां चरिष्णुतां गतैर्विविधरत्नमयैरवयवैः स्वाङ्गैरिव प्रतिभातीत्युत्प्रेक्षा । द्रुतविलम्बितं वृत्तम् ॥३२॥

कुशेशयैरिति । अत्राद्रौ जलाशयोषिता जलाशयेषु ह्रदेषु उषिता; वसन्तः । गत्यर्थाकर्मकेत्यादिना वसतेः कर्त्तरि क्तः सम्प्रसारणं मतिबुद्धि पूजार्थेभ्यश्चेति चकाराद्वर्त्तमानार्थता । कलभा स्त्रिंशद्वर्षकरिणः । त्रिंशद्वर्षस्तु कलभ इति वैजयन्ती । विकस्वरैर्विकसनशीलैः । स्थेशभसविकसेत्यादिना वरच् । कुशेशयैः शतपत्रैः मुदा प्रीत्या रमन्ते क्रीडन्ति करिविहाराणां कमलाकराणामप्यभावर इति भावः । किञ्च कला अव्यक्त मधुराः विकारो मानसोभावः स प्रयोजनमेषां भाविका उद्दीपका इत्यर्थः कला भाविकाश्च स्वराः षड्जादयोयेषान्तैः कलभाविकस्वरैः सिद्धगणैः सुरसङ्घैः योषिता स्वस्त्रीणामन्ते समीपे उदारहर्षैः प्रगीयते च भूस्वर्गैश्वर्यमिति भावः ॥ ३३ ॥

आसादितस्येति । इहाद्रौ अपूर्वमहौषधयः नियतेर्नियोगादस्मिन् काले इदं भातीति दैवयोगात् । तमसाऽन्धकारेण तत्प्रादेश व्यसनेन ~

पत्युः स्त्रियामिव महौषधयः कलत्र
स्थानं परैरनभिभूतममूर्वहन्ति ॥ ३४ ॥

वनस्पतिस्कन्धनिषण्णबाल
प्रवालहस्ताः प्रमदा इवात्र ।
पुष्पेक्षणैर्लम्भितलोचकैर्वा
मधुव्रतव्रातवृतैर्व्रतत्यः ॥ ३५ ॥

आसादितस्याक्रान्तस्य पुनरपक्रमणेन पुनरारोहणकाले समागमकालमा-काङ्क्षन्तः पुनरागत्य सङ्गन्तुमिच्छन्त इत्यर्थः । स्त्रियां पत्युः सूर्यस्य स-म्बन्धि परैस्तेजोऽन्तरैः पुरुषान्तरैश्चानभिभूतमतिरस्कृतमनुपहतञ्च कलत्रस्थानं कलत्रभूतानां स्त्रियां स्थानं स्थितिं वहन्ति नित्यं दधतीत्यर्थः । स्त्रीणां स्त्रीभिरेव रक्षणं कार्यमिति भावः । यथा केनचिदापदि न्यासी-कृतानि कलत्राणि संरक्ष्य कालान्तरे साधवस्तस्मै प्रयच्छन्ति तद्वदोष-धयोऽपि स्त्रिय स्त्रियां पत्युरर्पयन्तीत्यर्थः एतच्च तासां सूर्यास्तमये प्रज्वलनादुदये विपर्ययाच्चोपपद्यते । अत्र विशेषणसाम्यादर्कादीना-माप्रभादि साम्य प्रतीतेः समासोक्तिरलङ्कारः ॥ २४ ॥

वनस्पतीति । अत्राद्रौ वनस्पतयो वृक्षाः । वनस्पतिस्तु समासे वि-ना पुष्पफलद्रुम इति विश्वः । तेषां स्कन्धेषु प्रकाण्डेषु च निषण्णाः सक्ताः बालप्रवाला बालपल्लवा हस्ता इव यासान्ता तथोक्ताः मधूनि व्रतयन्ति भुञ्जते इति मधुव्रता मधुपास्तेषां व्रातेन वृन्देन वृतैः छन्नैः अतएव ल-म्भिताः प्रापिताः लोचकाः कज्जलानि यैस्तैरीतैरिव स्त्रैरित्यु-त्प्रेक्षा । इवार्थे वापदः तद्दुभयत्रापि ज्ञेयः । लोचको मांसपिण्डे स्याद्भितारे च कज्जल इति विश्वः । पुष्पैरीक्षणैरिव पुष्पेक्षणैरुपल-क्षिता व्रतत्यो लताः प्रमदा इव लक्ष्यन्त इति शेषः । न च प्रकृते क्रियाध्याहारदोष इत्याह वामनः । विक्राध्याहारादिति ॥ २५ ॥

विहगाः कदम्बसुरभाविह गाः
कलयन्त्यनुक्षणमनेकलयम् ।
भ्रमयन्नुपैति मुहुरभ्रमयं
पवनश्च धूतनवनीपवनः ॥ ३६ ॥

विद्वद्भिरागमपरैर्विवृतं कथञ्चित्
श्रुत्वापि दुर्ग्रहमनिश्चितधीभिरन्यैः ।
श्रेयान् द्विजातिरिव हन्तुमघानि दक्षं
गूढार्थमेष निधिमन्त्रगणं बिभर्ति ॥३७॥

विहगा इति । कदम्बैः सुरभिः सुगन्धिस्तस्मिन् कदम्बसुरभाविह अस्मिन्नद्रौ विहगाः पक्षिणः क्षणमनु प्रतिक्षणं अनेके बहुविधा लयाः स्वा-च्छेदायस्मिन् कर्मणि तद्यथा तथा गाः वाचः शब्दानित्यर्थः । कलयन्ति उच्चरन्ति । स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले । लक्ष्यदृष्ट्या स्त्रियां पुंसि गौरिति विश्वः । किञ्च धूतानि कम्पितानि नवानि नीपवनानि कदम्बकाननानि येन स धूतनवनीपवनः । नीपप्रियकदम्बास्तु हलिप्रिय इत्यमरः । अयम्पवनः मुहुरभ्रमेघसम्भ्रमयन् उपैति । प्रमिताक्षरा वृत्तम् । प्रमिताक्षरा सजससैरुदितेति लक्षणात् ॥ ३६ ॥

विद्वद्भिरिति । एषोऽद्रिः श्रेयान् श्रेष्ठः द्विजातिर्ब्राह्मण इव गूढो निधिकल्पो मन्त्रगणस्तु अयं परमात्मतत्त्वमागमपरैर्विद्वद्भिर्निधीनां मन्त्राणां च संसाधनविधानज्ञैः कथञ्चिद्विवृतं स्वरूपतः प्रकाशितं नास्ति निश्चिता इद मित्थमिति निश्चयात्मिका धीर्येषां तैरनिश्चितधीभिरन्यैरज्ञैः श्रुत्वापि इह निधिरस्तीत्यत्र महिमा असौ मन्त्र इति चाप्तमुखात् कर्णयित्वापि दुर्ग्रहन्दुःसाधनं अघानि दुःखान्येनांसि च हन्तुं दक्षं समर्थम् । दुःखैनो व्यसनेष्वघमिति वैजयन्ती । गूढः संवृतोऽर्थोऽभिधेयम् यस्मिन् तं गूढार्थं निधयो मन्त्राश्च इत्यन्वयः निधयश्च मन्त्राश्च तेषां गणं बिभर्ति द्विजातिर्मन्त्रगणमिव निधिगणमेष बिभर्तीत्युपमार्थः ॥ ३७ ॥

बिम्बोष्ठं बहु मनुते तुरङ्गवक्त्र
श्चुम्बन्तं मुखमिह किन्नरं प्रियायाः ।
श्लिष्यन्तं मुहुरितरोऽपि तं निजस्त्री
मुत्तुङ्गस्तनभरभङ्गभीरुमध्याम् ॥ ३८ ॥

यदेतदस्यानुतटं विभाति
वनं ततानेकतमालतालम् ।
न पुष्पितात्र स्थगितार्करश्मा
वनन्तताने लतमा सतालम् ॥३९॥

दन्तोज्ज्वलासु विमलोपलमेखलान्ताः
सद्रत्नचित्रकटकासु बृहन्नितम्बाः।
अस्मिन् भजन्ति घनकोमलगण्डशैला
नार्योऽनुरूपमधिवासमधित्यकासु ॥४०॥
अनतिचिरोज्झितस्य जलदेन चिर
स्थितबहुबुद्बुदस्य पयसोऽनुकृतिम्

दन्तोज्ज्वलास्विति। अस्मिन्नद्रौ दन्ता निकुञ्जा इत्यसौ। दन्तो निकुञ्जे दशने इति विश्वः। तैरुज्ज्वलासु रुचिरासु सद्रत्नैश्चित्राणि कटकानि सानूनि वलयानि च यासां तासु। कटकं वलये सानाविति विश्वः। अधित्यकास्वूर्ध्वभूमिषु। भूमिरूर्ध्वमधित्यकेत्यमरः। उपाधिभ्यां त्यकन्नासन्नारूढयोरिति त्यकन् प्रत्ययः। विमलोपलाः स्वच्छशिला उज्ज्वलमणयो च मेखलाः काञ्च्यो नितम्बभूमयश्च। मेखला खड्गबन्धे स्यात्काञ्च्यां शैलनितम्बयोरिति विश्वः। ताभिरन्ताः रम्याः। अन्तोऽस्त्रियाम्... इत्यमरः। बृहन्तो नितम्बाः कटिपश्चाद्भागाः शिखराणि च यासां ताः। नितम्बो रोधसि स्कन्धे शिखरे च कटेरपि इति विश्वः। घना निबिडाः कोमला मृदवः गण्डशैलाः स्थूलोपलाः ... नार्योऽनुरूपमधिवासं स्थानं भजन्ति। अत्र नारीणामधित्यकानां च प्रकृतत्वात्केवलप्रकृतगोचरा श्लेषोपमा तद्यथोक्ता। एतदुभयविशेषणानि उभयत्र विशेषणविशेष्यभावेन योजनीयानि ॥ ४० ॥

अनतिचिरेति। इहाद्रौ चिरं यथा तथा ... जलधरेण या धौता शुभ्रा कलधौतमयी रजतभूमिः जलदेनानतिचिरोज्झितस्य ... इत्यर्थः। चिरस्थितानि बहूनि बुद्बुदानि यस्मिन् तस्य पयसोऽम्भसः सकलामनुकृतिं ...

विरलविकीर्णवज्रशकला सकला
मिह विदधाति धौतकलधौतमहीम् ॥४१॥
वर्जयन्त्या जनैः सङ्गमेकान्तत
स्तर्कयन्त्या सुखं सङ्गमे कान्ततः ।
योषयैष स्मरासन्नतापाङ्गया
सेव्यतेऽनेकया सन्नतापाङ्गया ॥ ४२ ॥
सङ्कीर्णकीचकवनस्खलितैकबाल
विच्छेदकातरधियश्चलितुं चमर्यः ।

विदधाति अत्र मेघोज्झितजलस्य स्थिरबुद्ध्यादाभ्यस्तेऽपि सम्भावनया स-म्बन्धोक्तेरतिशयोक्तिः । कुररीरुतं वृत्तम् । कुररीरुता ननभभैर्लग-युगिति लक्षणात् ॥ ४१ ॥

वर्जयन्त्येति । एकान्ततः एकान्ते रहसीत्यर्थः । कान्ततः कान्तेन प्रियेणेत्यर्थः । उभयत्रापि सार्वविभक्तिकस्तसिः । सङ्गमे रतौ सुखं त-र्कयन्त्या उत्प्रेक्षमाणया विलम्बं विहारपराङ्मुख्येत्यर्थः । अतएव जनैः सङ्गं वर्जयन्त्या कुतः स्मरेणासन्नतापानि प्राप्तज्वराणि अङ्गानि यस्यास्तया स्मरासन्नतापाङ्गया । अङ्गगात्र कण्ठेभ्यश्चेति वक्तव्यमिति विकल्पादिह पक्षे टाप् । सन्नाः अपाङ्गा यस्यास्तया सन्नतापाङ्गया अव-नामात् कुण्ठितेक्षया अनेकया योषया अनेकाभिर्योषाभिरित्यर्थः । जातावेकवचनम् । स्त्री योषिदबला योषा नारी सीमन्तिनी वधूरित्यमरः । एषोऽद्रिः सेव्यते इच्छाविहारस्थानानि इह सन्तीति भावः । स्रग्विणी वृ-त्तम् । रैश्चतुर्भिर्युता स्रग्विणी सम्मतेति लक्षणात् ॥ ४२ ॥

सङ्कीर्णेति । अतिसङ्कटाः सङ्कीर्णाः मिथः सन्दष्टाः कीचकाः वेणुवि-शेषाः । वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धता इत्यमरः । तेषां वने स्खलितस्यैकबालस्यैकरोम्णो विच्छेदात् कातरा त्रस्ता धीर्यासामताप-

अस्मिन् मृदुश्वसनगर्भतदीयरन्ध्र
निर्यत्स्वनश्रुतिसुखादिव नोत्सहन्ते ॥४३॥
युक्तं मुक्तागौरमिह क्षीरमिवाभ्रै-
र्वापीष्वन्तर्लीनमहानीलदलासु ।
शस्त्रीश्यामैरंशुभिराशु द्रुतमम्भ-
श्छायामच्छामृच्छति नीलीसलिलस्य ॥ ४४ ॥

मर्थः । मृदुश्वसनो मन्दमारुतो गर्भे येषां तैस्तदीयरन्ध्रेभ्यः कीचकविव-रेभ्यो निर्यतो निर्गच्छतः स्वनस्य श्रुत्या श्रवणेन यत् सुखं तस्मादिवेति हे-तूत्प्रेक्षा । चलितुं नोत्सहन्ते वस्तु तत्तु वात प्रियत्वादिति भावः । शकधृषेत्यादिना तुमुन्प्रत्ययः ॥ ४३ ॥

युक्तमिति । इहाद्रावन्तर्लीनानि महानीलदलानि इन्द्रनीलविशेषखण्डानि यासु तासु । सिंहलस्थाकरोद्भवा महानीलास्तु ते मता इति भगवानगस्त्यः । वापीषु दीर्घिकासु अभ्रैर्मेघैर्मुक्तं दत्तं मुक्तागौरं मौक्तिकशुभ्रं अतएव क्षीरमिव स्थितं शस्त्री छुरिका । स्याच्छस्त्री चासि-पुत्री च छुरिका चासिधेनुकेत्यमरः । बह्वादिभ्यश्चेति ङीप् । शस्त्रीवत् श्यामैरंशुभिरन्तर्गतेन्द्रनील मरीचिभिः आशु तत्क्षणमेव द्रुतं लोलितं सत् छुरितमित्यर्थः नीलीसलिलस्य नीलाख्यौषधिरसस्य । नीली काला क्लीतकिकेत्यमरः । अच्छां छायां कान्तिमृच्छति तत्सदृशीं छायां गच्छ-तीत्यर्थः । अतो निदर्शनालङ्कारः । स च मुक्तागौरं क्षीरमिव शस्त्री-श्यामैरिति चोपमाद्वयेनान्तर्लीनमहानीलदलासु वापीष्विति पदार्थहेतुकं काव्यलिङ्गं तेनोत्थापितेनांशुभिर्द्रुतमिति तद्गुणोत्थापित इत्यङ्गाङ्गिभावेन सङ्करः । क्षीरमिवेत्यनेनेन्द्रनीलानां सौध्य सूचितम् । क्षीरमध्ये क्षि-पेन्नीलं क्षीरं चेन्नीलतां व्रजेत् । इन्द्रनीलमिति ख्यात इति लक्षणश-शास्त्रात् । तेनात्र नीलीरसोपमानेन तद्वर्ण एवेति सूचितम् । नीलीरस-

विरलविकीर्णवज्रशकला सकला-
मिह विदधाति धौतकलधौतमहीम् ॥४१॥
वर्जयन्त्या जनैः सङ्गमेकान्तत-
स्तर्कयन्त्या सुखं सङ्गमे कान्ततः ।
योषयैष स्मरासन्नतापाङ्गया
सेव्यतेऽनेकया सन्नतापाङ्गया ॥ ४२ ॥
सङ्कीर्णकीचकवनस्खलितैकबाल-
विच्छेदकातरधियश्चलितुं चमर्यः ।

विदधाति अत्र मेघोज्झितजलस्य स्थिरबुद्ध्यादायम्बरेऽपि सम्भाव्यमानया स-
म्बन्धोक्त्यातिशयोक्तिः । कुटरीवृत्ता वृत्तम् । कुटरीवृत्ता नजभजैर्जग-
रुगिति लक्षणात् ॥ ४१ ॥

वर्जयन्त्या इति । एकान्ततः एकान्ते रहसीत्यर्थः । कान्ततः कान्तेन
प्रियेणेत्यर्थः । उभयत्रापि सार्वविभक्तिकस्तसिः । सङ्गमे रति सुखं त-
र्कयन्त्या उत्प्रेक्षमाणया विलम्ब्य विहारमाकाङ्क्षन्त्येत्यर्थः । अतएव
जनैः सङ्गं वर्जयन्त्या कृतः स्मरेणासन्नतापानि प्रत्यङ्गाणि अङ्गानि
यस्यास्तया स्मरासन्नतापाङ्गया । अङ्गगात्रकण्ठेभ्यो वक्तव्यमिति
क्रोडादिषु पक्षे टाप् । सन्नतावपाङ्गौ यस्यास्तया सन्नतापाङ्गया आन-
तात् कुञ्चितनेत्रया अनेकया योषया अनेकाभिर्योषाभिरित्यर्थः ।
जात्यैकवचनम् । स्त्री योषिदबला योषा नारी सीमन्तिनी वधूरित्यमरः ।
अद्रिः सेव्यते दृष्टाविहारस्थानानि दृष्ट्वा यान्तीति भावः । स्रग्विणी
वृत्तम् । रैश्चतुर्भिर्युता स्रग्विणी सम्मतेति लक्षणात् ॥ ४२ ॥

सङ्कीर्णेति । सङ्कीर्णेषु सङ्कटेषु मिथः सन्दष्टेषु कीचकाः वेणुवि-
शेषाः । वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः इत्यमरः । तेषां
वनेषु स्खलितस्यैकबालस्यैकरोमणो विच्छेदात् कातरा भीता धीर्यासां ताश्च-

अस्मिन् मृदुश्वसनगर्भतदीयरन्ध्र-
निर्यत्स्वनश्रुतिसुखादिव नोत्सहन्ते ॥४३॥

मुक्तं मुक्तागौरमिह क्षीरमिवाभ्रै-
र्वापीष्वन्तर्लीनमहानीलदलासु ।
शस्त्रीश्यामैरंशुभिराशु द्रुतमम्भ-
श्छायामच्छामृच्छति नीलीसलिलस्य ॥ ४४ ॥

अर्थः मृदुश्वसनो मन्दमारुतो गर्भे येषां तैस्तदीयरन्ध्रेभ्यः कीचकविवरेभ्यो निर्यतो निर्गच्छतः स्वनस्य श्रुत्या श्रवणेन यत् सुखं तस्मादिवेति हेतूत्प्रेक्षा । चलितुं नोत्सहन्ते यस्तु तस्य मा भूत् प्रियत्वादिति भावः । शकधृषेत्यादिना तुमुन्प्रत्ययः ॥ ४३ ॥

मुक्तमिति । इह रैवतके अन्तर्लीनानि महानीलदलानि इन्द्रनील विशेषशकलानि यासु तासु । सिंहलस्थाकरोद्भवा महानीलास्तु ते मता इति भगवानगस्त्यः । वापीषु दीर्घिकासु अभ्रैर्मेघैर्मुक्तं दत्तं मुक्तागौरं मौक्तिकशुभ्रं अत एव क्षीरमिव स्थितं शस्त्री छुरिका । स्याच्छस्त्री चासिपुत्री च छुरिका चासिधेनुकेत्यमरः । गौरादिभ्यश्चेति ङीष् । शस्त्रीवत् श्यामैरंशुभिरन्तर्गतेन्द्रनील मरीचिभिः आशु तत्क्षणमेव द्रुतं लोलितं सत् हरितमित्यर्थः नीलीसलिलस्य नीलाख्यौषधिप्रकरस्य । नीली काला क्लीतकिकेत्यमरः । अच्छां छायां कान्तिमृच्छति तत्सदृशीं छायां गच्छतीत्यर्थः । अतो निदर्शनालङ्कारः । स च मुक्तागौरं क्षीरमिव शस्त्रीश्यामैरिति चोपमाद्वयेनान्तर्लीनमहानीलदलासु वापीष्विति पदार्थहेतुकं काव्यलिङ्गं तेनोत्थापितेनांशुभिर्द्रुतमिति तद्गुणोत्थापित उल्लङ्घाङ्गिभावेन सङ्करः । क्षीरमिवेत्यनेनेन्द्रनीलानां सौक्ष्म्यं सूचितम् । क्षीरमध्ये निक्षिप्तं क्षीरं स्वदीप्त्या नीलतां नयेत् । इन्द्रनीलमिति ख्यात इति लक्षण शास्त्रात् । तेनात्र नीलीसलिलोपमानेन तद्वर्णता एवेति सूचितम् । नीली

या न ययौ प्रियमन्यवधूभ्यः
सारतरागमना यतमानम्।
तेन सहेह बिभर्ति रहः स्त्री
सा रतरागमनायतमानम् ॥ ४५ ॥
भिन्नेषु रत्नकिरणैः किरणेष्विहेन्दो-
रुच्चावचैरुपगतेषु सहस्रसङ्ख्याम्।

भिन्नाः केचिच्छ्मश्रुकयडभिन्नाः पर इत्यादिना अगस्त्येन रत्नानां एषामेकादशविधच्छायाभिधानादिति । मत्त मयूरं वृत्तम् । वेदैरन्ध्रैर्म्तौ यसगा मत्तमयूरमिति लक्षणात् ॥ ४४ ॥

या नेति । इहाद्रावन्यवधूभ्यः सपत्नीभ्यः । पञ्चमीविधानादिति पञ्चमी । सारतरं श्रेष्ठमागमनं यस्याः सा सारतरागमना श्लाघ्यगमनेत्यर्थः । या स्त्री यतमानं सम्भोगाय प्रयतमानं प्रार्थयमानमित्यर्थः । यती प्रयत्ने शानच् । प्रियं न ययौ सा तथा प्रतिकूलापि स्त्री रहस्येन प्रियेण सह अनायतमानमदीर्घरोषं यथा तथा रतरागं सुरतानुरागं बिभर्ति धत्ते अयमतिमानवतीरपि कन्दर्पोद्दीपयतीति भावः । दोधकवृत्तम् । दोधकवृत्तमिदं भभभा गाविति लक्षणात् ॥ ४५ ॥

भिन्नेष्विति । इहाद्राविन्दोः किरणेषु उच्चावचैर्नैकविधैरित्यर्थः । उच्चावचं नैकभेदमित्यमरः । मयूरव्यंसकादिषूच्चावचशब्दो पठितः उद्गतश्चावगतश्चेति तत्पुरुषे निपातनात् साधुः । रत्नकिरणैर्भिन्नेषु मिश्रेषु अतएव सहस्रसङ्ख्यामुपगतेषु सत्सु भविष्यं पर्यायः । मत्तं एषां मतं इत्यमिति शब्दतः । असौ प्रकाशमानोऽहिमांशुर्जयेति सहस्र किरणत्वात् सूर्य एवेति सम्भावनानुबन्धस्यर्थ । वार्त्ता सम्भाव्ययोः किलेत्यमरः । दोषापि रात्रावपि । रात्र्यर्थेऽव्ययम् । दिवा-शीथ दोषा च नक्तं च रजनावित्यमर । व्याकोशकोकनदतां विकच-

दोषापि नूनमहिमांशुरसौ किलेति
व्याकोशकोकनदतां दधते नलिन्यः ॥ ४६ ॥
अपशङ्कमङ्कपरिवर्त्तनोचिता
श्चलिताः पुरः पतिमुपैतुमात्मजाः ।
अनुरोदितीव करुणेन पत्त्रिणां
विरुतेन वत्सलतयैष निम्नगाः ॥ ४७ ॥
मधुकरविटपानमिता
स्तरुपङ्क्तीर्बिभ्रतोऽस्य विटपानमिताः ।

ञ्चता दधते नूनमित्युत्प्रेक्षायाम् । कोकनदं रक्तसरोरुहम् । रक्तोत्पल कोकनदेऽपि इति व्याकोशविकचस्फुटा इति चामर । इह देवभूमित्वादित्यपि ग्रानन्दिन्य इति भावः । इह नलिनीनां दोषादलविकाशः सम्बन्धेऽपि तदसम्बन्धरूपा विषयोक्त्या तथेन्द्रार्कभ्रान्तिमदलङ्कारो व्यज्यते ॥ ४६ ॥

अपशङ्कमिति । अपशङ्कं निःशङ्कमङ्कपरिवर्त्तनेषु उत्सङ्गलुण्ठनेषूचिता परिचिताः पतिं भर्त्तारमुपैतुं पुरोऽग्रे चलिता प्रयाताः आत्मजा सन्ततयाद् दुहितॄश्च निम्नगा नदीः करुणेन दीनेन पत्त्रिणां पक्षिणां विरुतेन क्रोशरवेण निमित्तेनैषोऽद्रिर्वत्सलत्वात् तदा वात्सल्येन स्नेहेनेत्यर्थः । कीमान् स्निग्धस्तु वत्सल इत्यमरः । वत्सांसाभ्यां कामबले इति वत्सच् प्रत्यय । अनुरोदिती वानुक्रोशतीवेत्युत्प्रेक्षा । रुदश्च पञ्चभ्य इति सुप इडादिश्च सार्वधातुके इतीट् ॥ ४७ ॥

मधुकरेति । मधुकरा एव विटास्तेषां पानमुत्सवमिता प्राप्ता । इत कर्त्तरि क्तः । विटपैः शाखाविस्तारैरानमिता विटपानमिता । विस्तारो विटपोऽस्त्रियामित्यमरः । तरुपङ्क्तीर्बिभ्रतोऽस्याद्रेः रोधोभिः स्थितो लता ततता परिसाकेष मियङ्गीना ततना रजः पुष्परेणु तेन परिणाकमिदं-

परिपाकपिशङ्गलता
रजसा रोधश्चकास्ति कपिशङ्गलता ॥ ४८ ॥
प्राग्भागतः पतदिहेदमुपत्यकासु
शृङ्गारितायतमहेभकराभमम्भः ।
संलक्ष्यते विविधरत्नकरानुविद्ध
मूर्द्ध्वप्रसारितसुराधिपचापचारु ॥ ४९ ॥
दधति च विकसद्विचित्रकल्प
द्रुमकुसुमैरभिगुम्फितानिवैताः ।

लतारजसा कपिशं पिशङ्गं चकास्ति । मात्रावृत्तमियमार्यागीतिरष्ट-गणा । अर्द्धे षड्गणा आर्यागीतिरिति पिङ्गलनागः ॥ ४८ ॥

प्राग्भागत इति । इहाद्रौ प्राग्भागतः ऊर्द्ध्वप्रदेशात् उपत्यकासु अधःप्रदेशेषु । उपत्यकाद्रेरासन्नेत्यमरः । उपाधिभ्यामित्यादिनोप शब्दात् त्यकन्प्रत्ययः । पतत् । शृङ्गारः सिन्दूरादिमण्डनमस्य सञ्जात शृङ्गा-रितः । शृङ्गारः सुरते नाट्ये रसे दिग्गजमण्डने इति विश्वः । आयतो-दीर्घः तस्य महेभकरस्याभेवाभा यस्य तत् विविधरत्नानां करैरंशुभिरनुवि-द्धमनुरञ्जितमिदमम्भः ऊर्द्ध्वं प्रसारितं यत् सुराधिपचापमिन्द्रधनुस्तद्वदाच-रत् संलक्ष्यते । अत्रेन्द्र चापस्योर्द्ध्वत्वासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः । अद्भुतोपमेति मतान्तरम् । तिरोहितविशेषायां सूपमानस्य प्रसिद्धत्वादुपमे-यम् ॥ ४९ ॥

दधतीति । किञ्चेति चार्थः अमुष्याद्रेरेताः शिखराणि शृङ्गाण्येव शिखाः केशपाशः । शिखा चूडा केशपाशीत्यमरः । विकसद्भिर्विचित्रैः नानावर्णैः कल्पद्रुमकुसुमैरभिगुम्फितान् ग्रथितानिव स्थितानित्युत्प्रेक्षा । अलघूनि विलम्बीनि लम्बमानानि च पिच्छान्येव दामानि स्रजोयेषु तान्

श्यामलघुविलम्बिपिच्छदाम्नः
शिखरशिखाः शिखिशेखरानमुष्य ॥ ५० ॥
सवधूकाः सुखिनोऽस्मि-
न्ननवरतममन्दरागतामरसदृशः ।
नासेवन्ते रसव-
न्नवरतममन्दरागतामरसदृशः ॥ ५१ ॥
आच्छाद्य पुष्पपटमेष महान्तमन्त-
रावर्त्तिभिर्गृहकपोतशिरोधराभिः ।

शिखिनः केकिन एव शेखरान् आपीडान् चयं दधतीः । शिखाश्च शिखी चेत्युभौ शिखरा आपीडशेखरा इत्यमरः । अत्र कुसुमगुम्फे नो-क्तेऽपि शाल्मलिन पिच्छादीनां दामादिरूपकर्षविह्वलत्वात्प्रतिपादिता ओजसेति सङ्करः । पुष्पिताग्रावृत्तम् ॥ ५० ॥

सवधूका इति । कश्चिद्रैवतके न भवन्तीत्यनवरताः क्लेशाः कुत्र वर-तमाः श्रेष्ठतमाश्च मन्दरागैरलसैः दृशः कृपाश्च अनवरतम मन्दरागता-मरसदृशः अमन्दरागाश्चतरक्तानि तामरसानि पद्मे स्वच्छायीव दृशो ये पाल्ये अमन्दरागतामरसदृशः रक्तनेत्राः । पद्मे तु स्वच्छतामरसमित्यमरः । सुखिनोऽस्मिन् गिरः सह वधूभिः सवधूकाः जनाः । तेन सहेति तुल्ययोगे बहु-व्रीहिः नद्यृतश्चेति कप् । रस दत्तानुरागम् । गुणे रागे द्रवे रस इत्य-मरः । नवरतं नूतनसुरतंवा सेवन्त इति न किन्त्वासेवन्त एवेत्यर्थः । सम्भाव्य-निषेधनिवर्त्तने द्वौ प्रतिषेधाविति वामनः विशिष्टसुरतोनां सेवनस्य सामान्यतः प्रवृत्तेः । उपमालङ्कारः । गतेयमार्यागीतिः ॥ ५१ ॥

आच्छाद्येति । एषोऽद्रिर्महान्तं पुष्पाण्येव पटरूपेण स्वदकेन मा-च्छाद्य अन्तः पटाभ्यन्तरे आवर्त्तिभिरभीक्ष्णं भ्रमद्भिः । वहुना माभीर्ष्ये

स्वाङ्गानि धूमरुचिमागुरवीं दधानै-
र्धूपायतीव पटलैर्नवनीरदानाम्॥ ५२ ॥

अन्योन्यव्यतिकरचारुभिर्विचित्रै-
रत्रस्यन्नवमणिजन्मभिर्मयूखैः।
विस्मेरान् गगनसदः करोत्यमुष्मि-
न्नाकाशे रचितमभित्ति चित्रकर्म॥ ५३ ॥

समीरशिशिरः शिरःसु वसतां

इति शिनि.। कङ्ककपोतशिरोधरायाम्इव पारावतकण्ठस्य मेचका येषा-
मेतेरित्युपमा। पारावते कपोतः स्यादिति विश्वः। अगुरो. कालागुरोरि-
यम् आगुरवीम्। कालागुर्वगुरुः स्यादित्यमरः। धूमरुचिम् मकालिकासङ्ग-
मात् धूमिलाङ्ग। अतएव निर्वर्णा। दधानैर्नवनीरदानां पटलैः स्वाङ्गानि
धूपायतीव धूपैरिव धिवासयतीवेत्युत्प्रेक्षा. रूपकोत्प्रेक्षानिदर्शनैरङ्गैः
सङ्कीर्यते। धूप सन्तापे इति धातोः। गुपूधूपविच्छिपणिपनिभ्य आय-
प्रत्ययः॥ ५२॥

अन्योन्येति। अन्योन्यं व्यतिकरेण मिश्रणेन चारुभि-
रतएव विचित्रैर्नानावर्णैः रत्नस्य लावण्येनोत्पन्नैः। मणिर्भणि-
स्त्रियोरिति विश्वः। मा भावेत्यादिना वैकल्पिकः प्रत्ययः। तेभ्यो
नवमणिभ्यो जन्म येषां तैर्मयूखैराकाशे रचितमभित्ति कुड्यं यत्राधार-
त्वेन चित्रकर्म कर्तृ गगनसदः खेचरान् विस्मेरान् विस्मयशीलान्
करोति। नमिकम्पीत्यादिना रप्रत्ययः। अत्र मणिमयूखेषु खे चित्र-
कर्मभ्रान्तिमता भित्तिं विना चित्रकर्मेति कारणकार्योत्पत्तिवर्णनात्
भ्रान्तिमदलङ्कारो विभावनेति सङ्करः। कारणेन विना कार्योत्पत्तिः
स्याद्विभावनेति। प्रहर्षिणी वृत्तम्॥ ५३॥

समीरेति। समीरेण मारुतेन शिशिरः शीतलः शिरःसु शिखरेषु व-

सतां जवनिकानिकामसुखिनाम् ।
बिभर्त्ति जनयन्नयं मुदमपा
मपायधवला वलाहकततीः ॥ ५४ ॥
मैत्र्यादिचित्तपरिकर्म्मविदो विधाय
क्लेशप्रहाणमिह लब्धसबीजयोगाः ।

सतां निकामसुखिनां अत्यन्तसुखिनां सतां पुण्यवतां मुदञ्जनयन्नयं मद्रिरपामम्भसामपायेनापगमेन धवलावलाहकततीर्मेघपङ्क्तीरेव जवनिकास्तिरस्करिणीर्बिभर्त्ति । अनावृतेष्वपि शिखरेषु क्रीडने मेघैरेवावरणतां सम्पाद्य मुदञ्जनयतीत्यर्थः । अत्र वलाहकततिष्वारोप्यमाणानां जवनिकानां मुदञ्जनयन्निति प्रकृतोपयोगिवर्णनात् परिणामालङ्कारः । आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणाम इति लक्षणात् । रूपके तूपरञ्जनमात्रमिति भेदः । जलोद्धतगतिर्वृत्तम् । रसैर्जसजसाजलोद्धतगतिरिति लक्षणात् ॥ ५४ ॥

मैत्रीति । इहाद्रौ समाधिं योगमिच्छतीति समाधित्सतो योगिनः । मैत्री करुणा मुदिता उपेक्षेति चतस्रश्चित्तवृत्तयः । तत्र पुण्यकृत्सु मैत्री दुःखिषु करुणा सुखिषु मुदिता अनुमोदनं पापिषु उपेक्षा । मैत्र्यादियैपान्तानि चित्तस्य परिकर्म्माणि प्रसाधकानि शोधकानीत्यर्थः तानि विन्दन्ति लभन्त इति तद्विदः तल्लाभवद्भिः क्षीणान्तःकरणमलत्वादित्यर्थः अत एव क्लेशप्रहाणं विधाय । अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः । तत्रानित्येषु नित्यत्वाभिमानः अनात्मनि च देहेन्द्रियादावात्मधीरित्यादिविभ्रमोऽविद्या । अस्मिता अहङ्कारः । रागोऽभिमतविषयाभिलाषः । द्वेषोऽनभिमतेषु रोषः । अभिनिवेशः कार्याकार्याग्रहः । ते हि पुरुषं क्लिश्नन्तीति क्लेशाः क्लेशहेतवः । पचाद्यच् । तेषां प्रहाणं क्षयः । ल्युडिति ण्यत्वम् । तद्विधाय क्लेशान् हित्वेत्यर्थः । अतो लब्धः सबीजः सालम्बनो योगो यैस्ते लब्धसबीजयोगाः सन्तः आलम्बनमेव व्य-

ख्यातिं च सत्त्वपुरुषान्यतयाधिगम्य
वाञ्छन्ति तामपि समाधिभृतो निरोद्धुम् ॥ ५५ ॥
मरकतमयमेदिनीषु भानो
स्तरुविटपान्तरपातिनो मयूखाः ।
अवनतशितिकण्ठकण्ठलक्ष्मी
मिह दधति स्फुरिताणुरेणुजालाः ॥ ५६ ॥
या बिभर्ति कलवल्लकीगुण
स्वानमानमतिकालिमालया ।

सत्त्वेति । सत्त्वपुरुषयोः प्रकृतिपुरुषयोरन्यतया अन्यत्वेन भिन्नत्वेन ख्यातिं ज्ञानं चाधिगम्य प्रकृतिपुरुषौ भिन्नाविति ज्ञात्वेत्यर्थः । प्रकृतिपुरुषयोर्विवेकाग्रहणात्संसारः । विवेकग्रहणान्मुक्तिरिति सांख्याः । अथ तां ख्यातिमपि निरोद्धुं निरसयितुं वाञ्छन्ति वृत्तिरूपत्वात् निवर्त्य स्वयम्प्रकाशतयैव स्थातुमिच्छन्तीत्यर्थः । प्रशान्तवृत्तिरूपायां स्वरूपेणावस्थानं मुक्तिरिति योगसिद्धान्तः । न केवलं भोगभूरियं किन्तु मोक्षक्षेत्रमपीति भावः ॥ ५५ ॥

मरकतेति । इहाद्रौ मरकतानां विकारा मरकतमय्यः तासु मेदिनीषु । स्त्रियाः पुंवदित्यादिना पुंवद्भावः । तरूणां विटपाः पल्लवाः तेषामन्तराण्यवकाशाः पतन्तीति तथोक्ताः । विटपः पल्लवे स्कन्धे विस्तारे स्तम्बशाखयोरिति विश्वः । स्फुरितान्यणुरेणूनां सूक्ष्मरजसां जालानि येषु ते भानोर्मयूखा अवनतस्य शितिकण्ठकण्ठस्य मयूरकन्धरस्य लक्ष्मीं दधतीति निदर्शनालङ्कारः । पुष्पिताग्रा वृत्तम् ॥ ५६ ॥

येति । अत्यादावत्यन्तं कालिमा कार्ष्ण्यं यस्याः सा अतिकालिमा अतिश्यामेत्यर्थः । न विद्यते लयो लयनं संश्लेषोऽस्यामिति यस्याः सा अलया

नात्र कान्तमुपगीतया तथा
स्वानमा नमति कालिमालया ॥ ५७ ॥

सायं शशाङ्ककिरणाहतचन्द्रकान्त
निस्यन्दिनीरनिकरेण कृताभिषेकाः ।
अर्कोपलोल्लसितवह्निभिरह्नि तप्ता
स्तीव्रं महाव्रतमिवात्र चरन्ति वप्राः ॥ ५८ ॥

एतस्मिन्नधिकपयः श्रियं वहन्त्यः
संक्षोभं पवनभुवा जवेन नीताः ।

भ्रमन्तीत्यर्थः । अतएव सखेति भावः । या अलिमाला कलोऽव्यक्तमधुरः बहुलो गुणः स्वानस्य वीणातन्त्रीशब्दस्य मानमुपमानं बिभर्ति तन्त्रीवद्ध्वनतीत्यर्थः । उपमालङ्कारः । उपगीतया समीपे गातुमारब्धयैव न तु पूर्वमागायन्त्येवेति भावः । आदिकर्मणि क्तः । कर्तरि चेति क्तः । तया अलिमालया भृङ्गपङ्क्त्या स्वानमा दुःखेनानमयितुमाक्रष्टुं शक्या । ईषद्-रित्यादिना खल्प्रत्ययः । का वा स्त्री कान्तं प्रियं न नमति सर्वापि मानं विहाय कान्तं सद्यः प्रणमत्येव तयोद्दीपकत्वाद्गानस्येत्यर्थः । रथोद्धता वृत्तम् । रौन राविति रथोद्धता लगाविति लक्षणात् ॥ ५७ ॥

सायमिति । इहाद्रौ वप्राः सानवः । वप्रोऽस्त्री सानुमानयोरित्यमरः । सायं रात्रौ शशाङ्ककिरणैराहतेभ्यश्चन्द्रकान्तेभ्यो निस्यन्दिना प्रस्राविणा नीरनिकरेण जलपूरेण कृताभिषेकाः कृतस्नानाः अह्नि अर्कोपलेभ्यः सूर्यकान्तेभ्य उल्लसितैरुत्थितैर्वह्निभिस्तप्ताः सन्तः तीव्रं उग्रं दुश्चरं महाव्रतं कृच्छ्रादिव्रतं चरन्तीवेत्युत्प्रेक्षा ॥ ५८ ॥

एतस्मिन्निति । एतस्मिन्नद्रावधिकपयः श्रियमधिकाम्बुसम्पत्तिं वहन्त्यः अन्यत्र तु अधिकाः पयः क्षीरादयो वर्धकत्वेन यासु तद्-

वाल्मीकेररहितरामलक्ष्मणानां
साधर्म्यं दधति गिरा महासरस्यः ॥५९॥
इह मुहुर्मुदितैः कलभैरवः
प्रतिदिशं क्रियते कलभैरवः ।

अधिकपयः श्रियं पुण्डरीकादिशोभां बहन्त्यः पवनाद्भवतीति पवनभूस्तेन पवनभुवा वायुजन्येन जवेन वेगेन संक्षोभमुल्लनद्दीता अन्यत्र तु जवेन जविना । जवो जविनि वेगे स्यादिति विश्वः । पवनभुवा हनुमता संक्षोभमौद्धत्यं नीता हनुमद्वेगवर्णनया प्रागल्भ्यं नीता इत्यर्थः । वाक्पक्षे सर्वत्र पष्ठीविपरिणामः कार्यः । महासरस्यो महासरांसि अरहितावर्जितौ रामलक्ष्मणौ याभिस्तासां अन्यत्र तु रामो रमणः अरहिताराभा-अवियुक्तरामालक्ष्मणाः सारसयोषितो यासु ताः केचित्त्वरहितरामाः अवियुक्त स्त्रीकाः लक्ष्मणाः सारसा इति पुंपक्षिपरत्वेन व्याचक्षते तेषां हंसस्य योषिद्वरटा सारसस्य तु लक्ष्मणा लक्ष्मणौषधिसारस्योरित्याद्यमर विश्वप्रकाशादिवाक्यगतनियतस्त्र्यर्थताविरोधः । तासां वाल्मीकेर्गिरां साधर्म्यं सादृश्यं दधति । अत्र पवनभुवा जवेनेत्यत्रैकवृन्तगतफलद्वयवदभिन्नैकपदगतत्वेनार्थद्वयप्रतीतेरर्थश्लेषः । अन्यत्र पदभङ्गेनार्थद्वयप्रतीतेर्जतुकाष्ठवच्छब्दयोरेव मिथः श्लिष्टत्वाच्छब्दश्लेष इत्युभयसाहित्यादुभयश्लेषोऽयं प्रकृताप्रकृतगोचरः उपमालङ्कारमिति सङ्करः ॥ ५९ ॥

इहेति । इहाद्रौ मुदितैर्विहारमन्तुष्टैः, कलभैः करिपोतैः । कलभः करिशावक इत्यमरः । दिशि दिशि प्रतिदिशम् । यथार्थेऽव्ययीभावः अव्ययीभावे शरत्प्रभृतिभ्य इति समासान्तोऽच्प्रत्ययः । कलश्चासौ भैरवश्च कलभैरवो मधुरभीषणः । विशेषणयोरपि कृष्णपिङ्गलवदेकस्योपसर्जनत्वविवक्षया विशेषणसमासः । रवो बृंहणाध्वनिः सकृत् क्रियते अनुवनं वने वने चमरीषयः चमरी मृगपङ्क्तिः स्फुरति । किञ्च

स्फुरन्ति चानुवनं चमरीचयः
कनकरत्नभुवां च मरीचयः ॥ ६० ॥
त्वक्साररन्ध्रपरिपूरणलब्धगीति-
रस्मिन्नसौ मृदितपक्ष्मलरल्लकाङ्गः ।
कस्तूरिकामृगविमर्दसुगन्धिरेति
रागीव सक्तिमधिकां विषयेषु वायुः ॥ ६१ ॥
प्रीत्यै यूनां व्यवहिततपनाः
प्रौढध्वान्तं दिनमिह जलदाः ।

कनकरत्नानां या भुवस्तासां मरीचयश्च स्फुरन्ति यमकद्विमइस्तुवंशेना॰ इदानीमलङ्कारे यमकस्याधुनेदः ॥ ६० ॥

त्वगिति । अस्मिन्नद्रौ त्वचि सारो येषान्ते त्वक्सारा वंशाः । वंशे त्वक्सारकर्मारत्वचिसारतृणध्वजा इत्यमरः । तेषां रन्ध्राणि तेषां परिपूरणेन आपूरणेन लब्धा गीतिर्गानमुपलम्भेन येन सः । मृदितानि मर्दितानि पक्ष्मलानि लोमशानि रल्लकानां कम्बलमृगाणां कम्बलानां वाङ्गानि शरीराणि येन सः । रल्लकः कम्बलमृगे कम्बले परिकीर्त्तित इति वैजयन्ती । एतेन स्पर्शसुखत्वं कस्तूरिकामृगाणां विमर्देन संघर्षेण सुगन्धिः सौरभ्यवान् यद्यपि । गन्धस्त्वेतदेकान्त पदं कर्त्तुमिच्छन्तं तथापि निरङ्कुशाः कवय इत्यनपर्ययोगः । अतएवम्भूतो वायू रागीव कामीव विषयेषु प्रदेशेषु च । विषयः स्यादिन्द्रियार्थे देशे जनपदेऽपि चेति विश्वः । अधिकां सक्तिं आसक्तिमेति गच्छति ॥ ६१ ॥

प्रीत्यै इति । इहाद्रौ युवानश्च युवतयश्च तेषां यूनाम् । पुमान् स्त्रियेत्येकशेषः । प्रीत्यै व्यवहिततपनाः तिरोहितार्काः अतएव सुरतान्तेन क्रीडाश्रमभिदे आयासोच्छ्वासादामर्द्देन यः श्रमः खेदः । ततः

दोषामन्यं विदधति सुरत
क्रीडायासश्रमशमपटवः ॥ ६२ ॥
भग्नोनिवासोऽयमिहास्य पुष्पैः
सदानतोयेन विषाणिनागः ।
तीव्राणि तेनोज्झति कोपितोऽसौ
सदाननोयेन विषाणि नागः ॥ ६३ ॥
प्रालेयशीतमचलेश्वरमीश्वरोऽपि

खेदोऽध्वरत्यादेरिति लक्षणात् । नभ धर्मे शारदे पटव समर्थाः जलदाः प्रोद्ध्वान्त मेघावरणाद्गाढान्धकारं दिन दिवसं दोषां रात्रिमात्मानं मन्य तद्दति दोषामन्यं रात्रिमानिनं विदधति मेघावरणभङ्गिम्ना दिवसं स्वय-मप्यात्मानं रात्रिं मन्यते विपुलं च इत्यर्थः । दोषेत्यव्ययमनुपपदा न्मन्यतेर्धातोरात्ममाने खश् चेति खश् प्रत्ययः । इह यूना दोषाश-ह्वयापि विस्रम्भविहाराः सम्भवन्तीति भावः । भ्रमरविलसितं वृत्तम् म्भौ न्लौ गः स्याद्भ्रमरविलसितमिति लक्षणात् ॥ ६२ ॥

भग्न इति । इहाद्रावस्य नागस्य निवासः आश्रयः सदा पुष्पैरा-नतो नम्रोऽयं न गच्छतीत्यगो वृक्षः दानतोयैर्मदोदकैः सह वर्तत इति सदानतोयेन मत्तेनेत्यर्थः । येन विषाणिना दन्तिना भग्नस्तेन विषाणिना कोपितः कोपमापितः असौ नागः सर्पस्तीव्राणि विषाणि गरलान्युज्झति वमति परप्रतीकाराक्षमस्य क्रोधः स्वाश्रयमेव व्याहन्तीति भावः ॥ ६२ ॥

प्रालेयेति । ईश्वरः शिवोऽपि हिमार्तास्य इति भावः । कान्त द्विपचर्म तदेव वसनं प्रदेशावरणं छादनं यस्य सः तथा शक्तस्यमा स्योष्णापि शिशिरातुरस्य इति भावः । प्रलयादागतं प्रालेयं हिमम् ।

सान्द्रेभचर्मवसनावरणोऽधिशेते ।
सर्वर्त्तुनिर्वृतिकरे निवसन्नुपैति
न द्वन्द्वदुःखमिह किञ्चिदकिञ्चनोऽपि॥६४॥
नवनगवनलेखाश्याममध्याभिराभिः
स्फटिककटकभूमिर्नाटयत्येष शैलः ।
अहिपरिकरभाजो भास्मनैरङ्गरागै

तत्र सागत इत्यादि केश्वमित्युपलक्षणानां वार्द्धिव इति वरत्वं
दादेशः । तेन शीतं शीतलमचर्मवसन् हिमस्तनमधिशेते तत्पत्तु मे
रत्नदः । अधिशीङ्स्थासां कर्मेति कर्मत्वम् । सर्वर्त्तुनिर्वृतिकरे
सदासुखकरे इहाद्रौ निवसन् पुमान्नास्ति किञ्चनास्येत्यकिञ्चनो निःस्वो-
ऽपि । पुष्पाञ्चेत्यादिना मयूरव्यंसकादिषु निपातनात्समासः । कि-
ञ्चिदल्पमपि द्वन्द्वदुःखं शीतोष्णदुःखं नोपैति नित्यं कर्पूरकलिताना स्फट-
नीमन्दोष्णदेशेऽतिसारस्कन्दादिति भावः । द्वन्द्वं दुर्गं रहस्योरादि मिथुनं
कलहोरहस्यति वैजयन्ती । अत्रोपमानात् हिमाचलादुपमेयस्याधिक्य-
कथनाद्व्यतिरेकः ॥ ६४ ॥

नवेति । एष शैलो रैवतको नवया नवनगवनलेखया
श्याममध्याभिर्मध्यभागे श्यामाभिराभिः स्फटिकानां कटकभूमिः तट-
प्रदेशैः करणैरहिरिव परिकरो गात्रिकाबन्धस्तम् । भजतीति तस्य अहि-
परिकरभाजः । नवेतस्य परिकरोज्ञाति पर्यङ्कपरिकरयोः प्रगाढे गात्रिका-
बन्धे विवेकारम्भयोरपीति विश्वः । भजतोऽपि च । भास्मनैः भस्ममयैः ।
वैकारिकोऽण् प्रत्ययः अस्त्रियौ प्रकृतिभावश्चमहिम्न इति दिनोदोषेन ।
अङ्गरागैरनुलेपनैरधिगतधवलिम्नः प्राप्तधावल्यस्य भूतं पत्युः यस्य तस्य
भूतनाथस्येश्वरस्य । प्रकरणादीशः । भवे निश्चयन्यौ भव । धवलिम्नां
शोभाम् । धवलिम्ना नामधेयोरिल्मनः । धातवोरपत्र्यं इत्यादि-

रधिगतधवलिम्नः शूलपाणेरभिख्याम् ॥ ६५ ॥
दधद्भिरभितस्तटौ विकचवारिजाम्बू नदै
र्विनोदितदिनक्लमाः कृतरुचश्च जाम्बूनदैः ।
निषेव्य मधु माधवाः सरसमत्र कादम्बरं
हरन्ति रतये रहः प्रियतमाङ्ककादम्बरम् ॥६६॥
दर्पणनिर्मलासु पतिते घनतिमिरमुषि

षयः । भाट्यमनुकरोतीति निदर्शनालङ्कारः । मालिनी वृत्तमेतद् ॥६५॥

दधद्भिरिति । अत्राद्रौ माधवस्य इमे माधवाः यादवाः विकचानि वारिजानि येषु तान्यम्बूनि ययोस्तौ विकचवारिजाम्बु अभित उभयतस्तटौ दधद्भिः नदैः । अम्बुप्रवाहैः प्राक्स्रोतसो नद्यः प्रत्यक्स्रोतसो नदाः नर्मदां विनेत्याहुः । विनोदितो दिनक्लमो येषान्ते विहारायासी-त्थक्लमतापा इत्यर्थः किञ्च जाम्बूनदस्य विकारैर्जाम्बूनदैः कन-कभूषणैः कृतरुचो जनितशोभाः सन्तः रसवत् स्वादवत् । रसो गन्धे रसे स्वाद इति विश्वः । कादम्बरं मद्यं । कादम्बः कलहंसोऽपीति विश्वः । कादम्बं राति रलयोरभेदात्लाति प्रकृतिस्वेनादत्त इति कादम्बरमैक्ष-वम् । पानसन्दानभाण्डं शाञ्जु रसालमैक्षवमिति स्मरणात् । आतो-ऽनुपसर्गे कः । मधु मद्यम् । एतच्च मधुकादम्बरशब्दयोः सामान्यवि-शेषपरत्वादपौनरुक्त्यम् । निषेव्य पीत्वा । तत्क्रियाकर्मैव्याप्ता एव निषे-व्यादिति भावः । रतये सुरतार्थं रहः प्रियतमानां प्रेयसीनामङ्का-देवाङ्कादाम्बरं वस्त्रं हरन्ति यादवाश्चैव मधुपानरसोल्लसिताः सन्तः क्रीडन्तीति भावः । पृथ्वी वृत्तम् । जसौ जसयलावसुग्रहयतिश्च पृथ्वी गुरुरिति लक्षणात् ॥ ६६ ॥

दर्पणेति । इहाद्रौ रविदर्पणनिर्मलासु प्रतः रौप्यभित्तिषु । कासुनकन्दरामर्शरजतधातुषु पतिते संक्रान्ते घनं सान्द्रं यत्तिमिर-

ज्योतिषि रौप्यभित्तिषु पुरः प्रतिफलति मुहुः
व्रीडमसम्मुखोऽपि रमणैरपहृतवसनाः
काञ्चनकन्दरासु तरुणीरिह नयति रविः ॥६७॥
अनुकृतशिखरौघश्रीभिरभ्यागतेऽसौ
त्वयि सरभसमभ्युत्तिष्ठतीवाद्रिरुच्चैः ।

चन्द्रद्युतीनि हरतीति तद्युट् । किञ्च । तस्मिन् ज्योतिषि रजतेषमि
काञ्चनकन्दरासु मुहुः प्रतिफलति सम्मूर्च्छति सति रमणैरपहृतवसना-
स्तदपीरसम्मुखोऽपि कन्दरानभिमुखोऽपि व्रीडं लज्जाम् । यद्यपि गु-
रोश्च हल इति स्त्रियामप्रत्ययः अतएव मन्दाक्षं ह्रीस्त्रपा व्रीडेत्यमरः
तथापि तस्य स्त्रीत्वाविवक्षया बाहुलकान्नपुंसकत्वं च । अतएवावि-
वधौ गुरौ स्त्रियां बहुलं विवक्षेति वामनः । नयति प्रापयति । नीव-
ह्योर्हरतेश्चैवेति द्विकर्मकता । यस्मिन् सूर्ये कन्दरासु क्रीडार्थं प्र
विष्टाः स्त्रियोऽस्मद्रूपं इति ज्ञात्वा पुरुषैरपहृतवस्त्रा एव पुरः स्थि-
तरौप्यनिर्मितेनाभासने प्रतिबिम्बव्याजाद्वे सति सलज्जा इति भावः ।
अत्र काञ्चनकन्दरागमनसम्बन्धे ज्योतिः प्रतिफलनसम्बन्धेऽपि सम्ब-
न्धोक्तेरतिशयोक्तिः । वंशपत्रपतितं वृत्तम् । दिङ्मुनि वंशपत्रपतितं
भरनभनलगैरिति लक्षणात् ॥ ६७ ॥

अनुकृतेति । असावुच्चैरुन्नतोऽद्रिः रैवतकः त्वयि अभ्यागते सति
अनुकृता शिखरौघाणां श्रीर्यैस्तैः कपोतैः शिखरौघभ्रमकारिभिरिति
भावः । अतएवात्र 'श्रीरिव श्रीरिति निदर्शनया भ्रान्तिमदलङ्कारो-
व्यज्यते । द्रुतमरुता भीममारुतेनोपनुन्नैः प्रेरितैः अतएव ऊर्ध्व
वर्त्तनमुद्गमद्भिः उत्पतद्भिः धरतीति धरः । पचाद्यच् । इत्यस्य
वनमद्रः तस्य परिधानानि अम्बराणि तद्वत् आचरद्भिः आचरद्भिरम्बुवाहैः
निमित्तेन सरभसमभ्युत्तिष्ठतीव प्रत्युत्थानं करोतीवेति क्रियानिमित्ता

द्रुतमरुदुपनुन्नैरुन्नमद्भिः सहेलं
हलधरपरिधानश्यामलैरम्बुवाहैः ॥६८॥

इति श्रीमाघकृतौ शिशुपालवधे
महाकाव्ये रैवतकवर्णनं नाम
चतुर्थः सर्गः ।

क्रियासंबन्धोऽत्र निविडमेघोन्मज्जनक्रियया विद्युन्निक्रियोत्प्रेक्षणात् । सा चोपमानिदर्शनानुप्राणितेति सङ्करः । मालिनी वृत्तम् ॥ ६८॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघ
काव्यव्याख्याने सर्वङ्कषाख्ये चतुर्थः सर्गः ॥ ४ ॥

पञ्चम सर्गः ।

इत्यङ्गिरः प्रियतमाइव सोऽव्यलीकाः
शुश्राव सूततनयस्य तदा व्यलीकाः ।
रन्तुन्निरन्तरमियेष ततोऽवसाने
तासाङ्गिरौ च वनराजिपटं वसाने ॥ १ ॥
तं स द्विपेन्द्रतुलितातुलतुङ्गशृङ्ग
मभ्युल्लसत्कदलिकावनराजिमुच्चैः ।

इत्थमिति । स हरिरित्थमनेन प्रकारेण । इदमस्थमुरिति थमु-प्रत्ययः । अव्यलीकाः अप्रियरहिताः । व्यलीकन्त्वप्रियेऽनृते इत्यमरः । प्रियतमाः प्रेयस्य इव स्थिताः कान्तावस्थिता इत्यर्थः व्यलीका विग-तानृता सत्याः सूततनयस्य सारथिकुमारस्य दारुकस्य गिरः तदा शुश्राव ततः श्रवणानन्तरं तासाङ्गिरामवसाने समाप्तौ निरन्तरं नीर-न्ध्रं वनराजिरेव पटस्तं वसाने आच्छादयति । वस आच्छादने इति धातोः कर्त्तरि लटः शानजादेशः । गिरौ रैवतकाद्रौ रन्तुं क्रीडितु-मिच्छन् तत्र वसतिं कर्त्तुमिच्छति स्मेत्यर्थः अनुप्रासयमकयोः संसृष्टिः । सर्गेऽस्मिन् वसन्ततिलका वृत्तम् । उक्तं वसन्ततिलका तभजाजगौ ग इति ॥ १ ॥

तमिति । कदल्य एव कदलिकाः वैजयन्त्यो रम्भातरवश्च । कदली वैजयन्त्यां च रम्भायां हरिणान्तरे इति विश्वः । अभ्युल्लसन्त्यः कद-ल्योवैजयन्त्यो वनराज्य इव यस्य सः अन्यत्र रम्भावन पङ्क्तीयस्य त-

विस्ताररुद्धवसुधोऽन्वचलञ्चचाल
लक्ष्मीन्दधत्प्रतिगिरेरलघुर्बलौघः ॥ २ ॥
भास्वत्करव्यतिकरोल्लसिताम्बरान्ताः
सापत्रपा इव महाजनदर्शनेन ।
संविव्युरम्बरविकाशि चमूसमुत्थं
पृथ्वीरजः करभकण्ठकडारमाशाः ॥ ३ ॥

मिति योज्यम् । उच्चैरिति. विस्तारेण रुद्धवसुधः व्याप्तभूमिः अतएव प्रतिगिरेर्लक्ष्मीन्दधत् स्वयमप्यन्यो गिरिरिव स्थित इत्यर्थः अलघुर्महान् स बलौघः सेनासङ्घः. द्विपेन्द्रैस्तुलितान्यतुलान्यप्रतिमानि द्विपेन्द्रव्यतिरिक्तप्रतिमारहितानि उत्तुङ्गशृङ्गाणि यस्य तन्तथोक्तमचलं रैवतकमनु चचाल तमनु ययावित्यर्थः । अनुर्लक्षण इति कर्मप्रवचनीयत्वात्तद्योगे द्वितीया । अत्र प्रतिगिरेः कस्यचिदप्रसिद्धत्वात् गिरिधर्मयोगी बलौघः प्रतिगिरेर्लक्ष्मीमिव लक्ष्मीन्दधातीति निदर्शनामुखेन प्रतियोगित्वेनोत्प्रेक्ष्यते इत्युत्प्रेक्षैवेयं सा चोपमागर्भितेति सङ्करः ॥ २ ॥

भास्वदिति । आशा दिशो भास्वत्करव्यतिकरेण सूर्यांशुव्याप्त्या उल्लसिताम्बरान्ताः प्रकाशिताकाशदेशाः अन्यत्र भास्वान् भासुरः अभिरूपः । भास्वान् भासुरसूर्ययोरिति विश्वः । तस्य करस्य स्पर्शेन उल्लसिताम्बरान्ताः उत्तरलाञ्चलाः अतएव महाजनदर्शनेन सापत्रपा इव लज्जा सापत्रपान्यत इत्यमरः । अम्बरविकाशि व्योमव्यापि वासः शोभि च । अम्बरं व्योमवाससोरिति विश्वः । चमूसमुत्थं करभ उष्ट्रपोतः । उष्ट्रे क्रमेलकमयमहाङ्गाः करभः शिशुरित्यमरः । तस्य कण्ठ इव कडारं कपिशम् । कडारः कपिशः पिङ्ग इत्यमरः । पृथ्वीरजः । संविव्युः संववुराच्छादयामासुरित्यर्थः । व्येञ् संवरणे लिट् कित्वात्सम्प्रसारणे द्विर्भावः एरनेकाच इति यणादेशः । स्त्रियोऽवस्थापहारे

आवर्त्तिनः शुभफलप्रदशुक्तियुक्ताः
सम्पन्नदेवमणयो भृतरन्ध्रभागाः ।

लज्जया यत्किञ्चिदाच्छादयन्तीति भावः । अत्राचेतनाश्वाश्वाश्च श्लिष्टवि-
शेषणमहिम्ना स्त्रीप्रतीतौ तदभेदाध्यवसायेन संध्यानव्यवहारसमारोपात्
समासोक्तिः । सा च सापत्नपत्नीश्लेषानुप्राणितेति सङ्करः ॥ ३ ॥

आवर्त्तिन इति । आवर्त्तिनः दक्षावर्त्तवन्तः । प्रशंसायामिनि-
रिति । ते च द्वावुरसौ शिरस्यौ द्वौ द्वौ द्वौ रन्ध्रोपरन्ध्रयोः । एकौ भाले
ह्यपाने च दक्षावर्त्ताः शुभाः स्मृताः इत्युक्तादश शुभावर्त्ता निर्दिष्टाः । अन्ये-
षामनन्तरमेव पृथगभिधानात् । अन्यत्र तु जलभ्रमवन्तः । स्यादावर्त्तो
ऽम्भसां भ्रम इत्यमरः । रोमसंस्थाने तु तत्सम्यादुपदेशः तदुक्तम् ।
आवर्त्तसाम्यादावर्त्तो रोमसंस्थानमङ्गिनामिति । शुभफलानि राज्य-
लाभादीनि प्रददतीति शुभफलप्रदाः । प्रे दाधे इत्यकः । ताभिः
शुक्तिभिः संस्थानैरावर्त्तविशेषैर्युक्ताः । तदुक्तम् । यस्यास्याः शुक्तयस्ति-
स्रस्तद्रोमा जयावहा इति । अन्यत्र शुभफलानि मुक्ताफलानि तत्प्रदाः
शुक्तयो मुक्तास्फोटाः ताभिर्युक्ताः । मुक्तास्फोटे ह्यावर्त्ते शुक्तिः शङ्ख-
पार्श्वयोरिति यादवः । सम्पन्नाः सम्पूर्णाः देवमणयो निगालावर्त्ताः कौस्तु-
भादिदिव्यमणयश्च येषान्ते । आवर्त्तो रोमजो देवमणिस्तु स्यात् निगालजः ।
निगालस्तु गलोद्देशे सक्तु इति वैजयन्ती । भृताः पूर्णा रन्ध्रभागाः
पार्श्वदेशा निम्नप्रदेशाश्च येषान्ते अतिशयिता रोचमानाः कण्ठावर्त्ता येषान्ते
अतिरोचमानाः । कण्ठजो रोचमानश्च स्वामिसौभाग्यवर्द्धन इति वैज-
यन्ती । अन्यत्र तु अश्वन्त दीप्यमानाश्वर्ष्णः ऊर्मिभिर्गतिविशेषैर्वीचि-
भिश्च पतन्तः धावन्तः । पञ्चीकृतानामश्वानां नमनोन्नमनाकृतिः ।
अतिवेगसमायुक्ता गतिरूर्मिरुदाहृतेति वैजयन्ती । ईदृशोऽश्वाः पयोधय
इव तूर्णं वहुमतीं पृथुः छादयन्ति स्म । अपिधानतिरोधानपिधानच्छद-
नानि चेत्यमरः । अपिपूर्वाद्दधातेर्लुङ् वष्टि भागुरिरल्लोपमवाप्योरुप-

अश्वाः प्यधुर्वसुमतीमतिरोचमाना
स्तूर्णं पयोधय इवोर्मिभिरापतन्तः ॥ ४ ॥
आरुग्णमग्रमवमत्य सृणिं सिताग्र
मेकः पलायत जवेन कृतार्त्तनादः ।
अन्यः पुनर्मुहुरुदप्लवतास्तभार
मन्योन्यतः पथि बताविभितामिभोष्ट्रौ ॥ ५ ॥
आयस्तमैक्षत जनश्चटुलाग्रपादं
गच्छन्तमुच्चलितचामरचारुमश्वम्

कर्णयोरित्यकारलोपः । एकनालावलम्बिफलद्वयवदेकपदेनार्थद्वयप्रतीते रर्थश्लेषोऽयं प्रकृताप्रकृतगोचरः उपमात्वङ्गमिति सङ्करः ॥ ४ ॥

आरुग्णेति । पथि मार्गे इभोष्ट्रावन्योन्यतः अन्योन्यस्माद् बिभितां भीतवन्तौ । ञिभी भये लङ् भियोऽन्यतरस्यामितीत्वं । बतेत्यनयोरपि भीतिरिति खेदेऽतिविस्मये वा । खेदानुकम्पासन्तोषविस्मयामन्त्रणे बतेत्यमरः । तत्र लिङ्गमाह । एक इभस्यारूढः कुम्भयोरधस्तात् अग्रप्रविष्टं सिताग्रं सितमुखं सृणिमङ्कुशं । अङ्कुशोऽस्त्री सृणिर्द्वयोरित्यमरः । अवमत्यावधूय कृत आर्त्तनादोयेन सः अतिकरुणक्रन्दित इत्यर्थः, जवेन पलायत पलायितवान् । परापूर्वादयतेर्लङ् उपसर्गस्यायताविति रेफस्य लत्वम् । अन्यः पुनरुष्ट्रस्तु अस्तानादरभारं यथा तथा मुहुरुदप्लवत उत्प्लुतवान् । प्लुङ् गताविति लङ् । स्वभावोक्तिः ॥ ५ ॥

आयस्तमिति । जनश्चटुलाग्रपादं चञ्चलपूर्वचरणं यथा तथा गच्छन्तं धीरं धावन्तमित्यर्थः, उच्चलितैरुत्क्षिप्तैश्चामरैश्चारुमश्वं आयस्तं प्रयत्नमाहृतं यथा तथा । यसु प्रयत्ने कर्त्तरि क्तः क्तान्तं क्रियाविशेष-

नागं पुनर्मृदु सलीलनिमीलिताक्षं
सर्वः प्रियः खलु भवत्यनुरूपचेष्टः ॥ ६ ॥
त्रस्तः समस्तजनहासकरः करेणो
स्तावत्खरः प्रखरमुल्ललयाञ्चकार ।
यावच्चलासनविलोलनितम्बबिम्ब
विस्रस्तवस्त्रमवरोधवधूः पपात ॥ ७ ॥
शैलोपशल्यनिपतद्रथनेमिधारा
निष्पिष्टनिष्ठुरशिलातलचूर्णगर्भाः ।

णम् । ऐक्षत ईक्षितवान् । ईक्षतेर्लङ् आडजादीनामाडिति वृद्धिः । नागं पुनर्गजं सलीलं निमीलिते अक्षिणी यस्मिन् कर्मणि तत् । बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् । मृदु मन्दमुच्छलमायतमैक्षत कथं भीमभन्दयोस्तुल्यरहितत्वात् सर्वः प्राणी अनुरूपचेष्टः स्वजात्युचितव्यापारः सन् प्रीणातीति प्रियः प्रीतिकरो भवति खलु । इगुपधज्ञाप्रीकिरः कः । अर्थान्तरन्यासः ॥ ६ ॥

त्रस्त इति । करेणोरिभ्याः । करेणुरिभ्यां स्त्रीनेभे इत्यमरः । भीतार्थानां भयहेतुरित्यपादानत्वम् । त्रस्तो भीतः खरो गर्दभः समस्तजनस्य हासं करोतीति तत्करः सन् । कृञो हेत्वित्यादिना टप्रत्ययः । तावत्तदवधि प्रखरं यथा तथा उल्ललयाञ्चकार उत्पपात यावत् चलात् स्थानचलितादासनात् विलोलोऽपसृतस्तस्या नितम्बबिम्बाद्विस्रस्तं वस्त्रं यस्मिन् कर्मणि तद्यथा तथा अवरोधवधूः पपात । स्वभावोक्तिः ॥ ७ ॥

शैलेति । शैलस्य रैवतकाद्रेरुपशल्यं प्रान्तं । यद्यपि ग्रामान्त उपशल्यं स्यादित्यमरः तथापि उपचाराददोषः । तत्र निपततां रथानां नेमयः चक्रान्ताः । चक्रं ... न्ते ... स्त्री स्यात्प्रधिः

भूरेणवो नभसि नद्धपयोदचक्रा-
श्चक्रीवदङ्गरुहधूम्ररुचो विसस्रुः ॥ ८ ॥
उच्चलच्छकलकेषु खुराभिघाता-
दूर्वीसमायतशिलाफलकाचितेषु ।
पर्यन्तवर्त्मसु विचक्रमिरे महाश्वाः
शैलस्य दर्दुरपुटानिव वादयन्तः ॥ ९ ॥
तेजोनिरोधसमतावहितेन यन्त्रा
सम्यक्कशात्रयविचारवता नियुक्तः ।

पुमानित्यमरः । तावाश्वादिभिः निष्पिष्टानां चूर्णितानां सिकताशिला-तलानां चूर्णा गर्भे येषां ते तथोक्ताः. नभसि नद्धानि पयोदचक्राणि पयोदाकारमण्डलानि यैस्ते चक्रवद्भ्रमणमस्यास्तीति चक्रीवान् गर्दभः । चक्रीवन्तस्तु बालेय रासभा गर्दभाः खरा इत्यमरः । आसन्दीवच्चक्रीवदष्ठी-वदित्यादिना साधुः । तस्याङ्गरुहाणि रोमाणि तद्वत् धूम्ररुचः कृष्णलो-हितवर्णाः । धूम्रधूमलौ कृष्णलोहितावित्यमरः । भूरेणवो विसस्रुः प्रसृताः ॥ ८ ॥

उच्चलदिति । खुराः शफानि । शफं क्लीबे खुरः पुमानित्यमरः । तेषामभिघातादुच्चलन्तः शकलशकलाः स्फुलिङ्गाः येभ्यस्तेषु टङ्कप्राया खुरा इति भावः । भूम्याः समानि समतलानि आयतानि च यानि शिलाः फलकानीव शिलाफलकानि तैराचितेभ्यास्तृतेषु शैलस्य पर्यन्तवर्त्मसु प्रान्तमार्गेषु महाश्वा दर्दुराणां वाद्यविशेषाणां पुटान् मुखानि वाद-यन्त इव विचक्रमिरे जग्मुः पादन्यासैः तादृशं शब्दमकुर्वन्नित्यर्थः । * पादविहरणे इत्यात्मनेपदम् । दर्दुरा तोयभेकेषु वाद्यभाण्ड-

आरट्टजश्चटुलनिष्ठुरपातमुच्चै-
श्चित्रं चकार पदमर्धपुलायितेन ॥ १० ॥

तेज इति । तेजो नाम दर्पापरनामा सत्त्वगुणविकारः प्रकाशकं मनःसारविशेषः यथाह भोजराजः तेजोनिसर्गजं सत्त्वं वाजिनां स्फुरणं रजः । क्रोधसम इति चैयास्कयोऽपि कहला गुणा इति तच्च द्विविधं सततोत्थितमयोत्थितञ्चेति । यथाह स एव भारात् योन्नितानाञ्च निसर्गात्प्रेरणं विना । अविच्छिन्नमिवाभाति तत्तेजः सततोत्थितम् । कशापादादिघातैर्यत् साध्वसात् स्फुरितं तु तदिति च तेजःशब्देन तत्कार्यं वेगो लक्ष्यते तथा च तेजसि वेगे निरोद्धुमशक्ये सत्यपि निवारणे समतायां वेगसाम्ये चारीकृतेन वल्गाविभागजुष्टत्वेनेत्यर्थः । कशा ताडिनी । अश्वादेस्ताडिनी कशेत्यमरः । अत्र कशाः कशाघातास्तासां त्रयमुत्तममध्यमाधमेषु यथासङ्ख्यं मृदुसमनिष्ठुर द्विविधरूपं लिङ्गयल्लक्ष्य विचारः एतेषु निमित्तेषु अश्वं वेदनाद्य इति विभागः तद्वत तदङ्गेन । यथाह भोजः । मृदु नैकेन घातेन दण्डकालेषु ताडयेत् तीक्ष्णं मध्यं पुनर्द्वाभ्याञ्च मन्दनिष्ठुरैस्त्रिभिः । उपवेशेऽथ निद्रायां स्खलिते दृष्टचेष्टिते । अकस्मालोकनोत्सुक्ये वडवार्थिं तद्धृष्टे । अन्याश्च दुःस्थाने विमार्गगमने भये । पिशाचाद्यागमस्य समये सञ्जाते चित्तविभ्रमे । दण्डः प्रयोज्यो वाहानां कालेषु द्वादशस्वपि । भीताभीतमाहन्यात् स्तब्धं च वाजिनम् । विभ्रान्तचित्तमधरे स्कन्धे ताडयेत् । प्रेक्षितं स्कन्धपार्श्वे वक्रमालोकितं तथा । उपवेशे च निद्रायां कटिदेशे च ताडयेत् । दुश्चेष्टितं मुखे स्कन्धादनुमार्गं प्रस्थितं तथा । जघने स्खलितं स्कन्धादिनमार्गं दुःस्थितम् । यः कुत्सप्रकृतिर्वाजी सं सर्वतैव ताडयेदिति । एवम्भूतेन दत्त्वा सादिना समयपथाप्तं नियुक्त इरितः उच्चैस्तत आरट्टोऽश्वो- निर्दोषवृत्तिः तज्ज्ञोऽथ आरट्टज । विशेषमालप्रयोगे ।

नीहारजालमलिनः पुनरुक्तसान्द्राः
कुर्वन् वधूजनविलोचनपक्ष्ममालाः ।
क्षुण्णः क्षणं यदुबलैर्दिवमातितांसः
पांशुर्दिशां मुखमतुल्ययदुत्थितोऽद्रेः ॥११॥

वक्तावत्तैव विशेष्यप्रतीतेरित्याह वामन विशेषण प्रयोगो विशेष्यप्रतिपत्तावेति । घटजस्वपलोनिष्ठुर पक्ष्मस्य यात मध्येयो यस्मिन् कर्माणि तद्यथा तथा । अर्द्धपुलायितेन मण्डलगतिविशेषेण चित्तमद्भुतस्पदक्रमश्चकार । यताद्वीपं नभाद्भूतैर्मण्डलायितवल्गितैः । उन्मुख श्वाश्वस्त्यस्य गतिरर्द्धपुलायितं मतिः लक्षणात । पुला नाम प्लुतादनेकापरनामा हयानाङ्गति विशेष । तदुक्तं हयलीलावत्यां प्लुतां स्वङ्गिताभाक्षयो धारा पुलनाभिधा । पुनरेना रत्नोपाला पुलामित्याह दैशिक । तल्लक्षणञ्च तत्रैवोक्तम् । विपति समविशेषानुतत्विपक्ष्मपपादान प्रवदति पुरतोऽस्य. साथ धारा पुलाख्या । विसर्पति समपादोतक्षेपणाकुञ्चनाना करणमिह गतिज्ञाः प्राहुरन्ये पुलाख्यामिति पार्ष्णिं प्रधान प्रविधाय रागाद्धभृगा लघीकृत्य पश्चेतुपुलाख्यामित्यादि । पुलाख्यया अयित गमि पुलायितम् । अयगतौ भावे क्त तस्यार्द्धन्त्यादपुत्रत्या अनुष्ठितमर्द्धपुलायितमित्यलमतिविस्तरेण ॥ १० ॥

नीहारेति । नीहारजालवत् तुहिनव्यूहवन्मलिन वधूजन विलोचनाना पक्ष्ममालाः पुनरुक्तसान्द्रा. द्विगुणसान्द्रा कुर्वन् स्वभावतोऽपि सान्द्रत्वादिति भाव, । मयूरस्य पक्षादिस्ताद्विस्परत्वञ्च पक्ष्मभाग । यथ यदूनां बले सैन्ये क्षुण्णं चर्द्दितमिति दिवमाकाशमाततामित्युभयतामिति ख्याततान् । तनोतेः यङ्लुगन्तादुप्रत्यय सनीवन्तर्द्धेत्यादि सनिपतिदरिद्राणामुपसङ्ख्यानादर्द्धं कर्स्मिक इट्भाव तनोतर्विभाषेति दीर्घ । पांशुर्दिशांमुखमतुल्ययदाच्छादयति स्म । तुदम् आच्छादने इति धातोरौणादिकाङ्घन् ॥ ११ ॥

उच्छिद्य विद्विषदिव प्रसभं मृगेन्द्रा
न्निन्द्रानुजानुचरभूपतयोऽथ वास: ।
वन्येभमस्तकनिखातनखाग्रमुक्त
मुक्ताफलप्रकरभाञ्जि गुहागृहाणि ॥ १२ ॥
विभ्राणया बहलयावकपङ्कपिङ्ग
पिच्छावचूडमनुमाधवधाम जग्मु: ।

उच्छिद्येति । इन्द्रानुजस्योपेन्द्रस्य हरेरनुचरा अनुजीविनो भूपतयो भूपतयोऽन्ये मृगेन्द्रान् सिंहान् विद्विषः शत्रूनिव प्रसभं प्रसह्योच्छिद्य हत्वा वन्येभानां मस्तकेषु निखातैर्निक्षिप्तैर्नखाग्रैः [illegible] मुक्ता मुक्ताफलप्रकरान् भजन्तीति तथोक्तानि गुहागृहाणि [illegible] ॥ विद्विष इवेति [illegible] [illegible] इति [illegible] [illegible] इति तदनुसार

विभ्राणयेति । अन्ये भूपतयः [illegible] । [illegible] [illegible] [illegible] । [illegible] [illegible] । बहलेन यावकपङ्केन पिङ्गं पिङ्गलं पिच्छं बर्हमेवावचूडं [illegible] विभ्राणया । [illegible] [illegible] । [illegible] । [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इत्यर्थः तदा [illegible] भावः अनुमाधव धाम [illegible] [illegible] [illegible] [illegible] दूरादेव [illegible] [illegible] [illegible] [illegible] ॥ १३ ॥

[illegible] । [illegible] [illegible] । [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible]

चञ्च्वग्रदष्टचटुलाहिपताकयान्ये
स्वावासभागमुरगाशनकेतुयष्ट्या ॥ १३ ॥

छायामपास्य महतीमपि वर्त्तमाना
मागामिनीं जगृहिरे जनतास्तरूणाम्।
सर्वो हि नोपगतमप्यपचीयमानं
वर्द्धिष्णुमाश्रयमनागतमभ्युपैति ॥ १४ ॥

अग्रे गतेन वसतिं परिगृह्य रम्या
मापात्यसैनिकनिराकरणाकुलेन।
यान्तोऽन्यतः प्लुतकृतस्वरमाशु दूरा
दुद्बाहुना जुहुविरे मुहुरात्मवर्ग्याः ॥१५॥

आगामिनीं छायां जगृहिरे वह्निभ्यस्त्रासादिति भावः। न च प्राप्तत्यागो दोषाय त्यागस्वीकारयोः न्यायप्रयुक्तत्वादिति भावः। सर्व इति। तथा हि सर्वो जनः उपगतं प्राप्तमप्यपचीयमानं क्षीयमाणम्। कर्मकर्त्तरि प्रयोगः। आश्रयं नोपैति न स्वीकरोति किन्त्वनागतमप्राप्तमपि वर्द्धिष्णुं वर्द्धनशीलं आश्रयमुपैति। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः॥ १४ ॥

अग्र इति। अग्रे गतेन पुरः प्रयातेन रम्यां वसतिं निवासम्। वहिवस्यर्त्तिभ्यश्चेति वसेरौणादिकोऽतिप्रत्ययः। परिगृह्य आपतन्तीत्या पाताः स्वयमाक्रमितुमागच्छन्तः। श्याद्व्यधेत्यादिना कर्त्तरि णप्रत्ययान्तो निपातः। तेषां सैनिकानां निराकरणे निरसने आकुलेन व्यग्रेण उद्बाहुना उद्यतहस्तेन केनचिदिति शेषः अन्यतो यान्तो गच्छन्तः आत्मवर्ग्याः स्वयूथ्याः प्लुतं त्रिमात्रिकं यथा तथा ततः स्थानात् आहूताः

क्लिन्ना इवामृतरसेन मुहुर्जनानां
क्लान्तिच्छिदो वनवनस्पतयस्तदानीम्।
शाखावसक्तवसनाभरणाभिरामाः
कल्पद्रुमैः सह विचित्रफलैर्विरेजुः॥ १९॥
यानाज्जनः परिजनैरवतार्य्यमाणा
राज्ञीर्नरापनयनाकुलसौविदल्लाः।
स्रस्तावगुण्ठनपटाः क्षणलक्ष्यमाणा

यस्मिन् कर्मणि तद्यथा तथा। दूराद् दूरेवेति दूरादाह्वाने ऽप्लुतविधाना-दिति भावः। आशु दूरान्मुहुराजुहुविरे आहूताः। ह्वयतेराङ्पूर्वात् कर्मणि लिट् अभ्यस्तस्य चेति सम्प्रसारणे द्विर्वचनमुवङादेशश्च॥ १८॥

क्लिन्ना इति। अमृतरसेन क्लिन्ना इव स्थिता मुहुर्जनानां क्लान्ति-च्छिदः श्रमहराः कल्पद्रुमवदमृतफलाभावादपि तद्वदाह्लादका इति भावः। शाखास्ववसक्तैर्लग्नैर्वसनैराभरणैश्चाभिरामा एकत्र सेनास्थापितै-रन्यत्र स्वप्रकृतैरिति भावः। वनवनस्पतयो वनवृक्षाः विचित्रफलैर्वस्त्राभर-णाद्यनेकफलयुक्तैः कल्पद्रुमैस्तत्सदृशैरिति यावत् सह तदानीं विरेजुः। तद्वद्विरेजुरित्यर्थः। सहेति साहाय्ये। सह शाकल्येन सहयोगपद्यस-त्त्विति सिद्धः। तथा चोपमालङ्कारः॥ १९॥

यानादिति। परिजनैर्यानाद्वाहनादवतार्य्यमाणा अवरोप्यमाणाः। अवतारयतेर्ण्यन्तात्कर्मणि यक्ः शानजादेशः। एवः पोऽन्यतरस्यामिति प्रकारः। नराणां पुरुषाणामपनयनेऽपसारणे आकुलाः सौविदल्लाः क-ञ्चुकिनो यासान्ताः। सौविदल्लाः कञ्चुकिन इत्यमरः। स्रस्ता अवरो-पणक्षोभात्पतिता अवगुण्ठनपटा यासान्ताः अतएव क्षणं लक्ष्य-माणाः दृश्यमाना यासान्ताः तथोक्ताः राज्ञीः राजपत्नीः। पुंयोगा-

वक्त्रश्रियः समयकौतुकमीक्षते स्म ॥ १७ ॥
कण्ठावसक्तमृदुबाहुलतास्तुरङ्गा-
द्राजावरोधनवधूरवतारयन्तः ।
आलिङ्गनान्यधिकृताः स्फुटमापुरेव
गण्डस्थलीः शुचितया न चुचुम्बुरासाम् ॥ १८ ॥
दृष्ट्वैव निर्जितकलापभरामधस्ता-
द्व्याकीर्णमाल्यकबरां कबरीं तरुण्याः ।

स्त्रियामिति ङीप् । समयकौतुकमीक्षते स्म । तात्कालिकं कामातु-
कौतुकम् ॥ १७ ॥

कण्ठेति । तुरङ्गाद्राजावरोधनवधूः राज्ञामवरोधस्त्रीरवतारयन्तोऽव-
रोपयन्तोऽधिकृताः अन्तःपुराधिकारिणः कण्ठेषु अवसक्ता मृद-
वो बाहुलतास्तदीया येषां ते तथोक्ताः सन्तः स्फुटं व्यक्तमालिङ्गनान्यापुरेव
अन्यथा दुरवरोहत्वाद् व्याजाच्चेति भावः । आसां वधूनां गण्डस्थलीः शु-
चितया स्वयं शुद्धचित्तत्वाद्गण्डस्थलानि भर्तृभयाच्च न चुचुम्बुः । यानस्कन्धाधिका-
रिणः शुद्धात्मानो भवन्तीति भावः । अन्यत्र तु पापाचाराः पापलि-
ङ्गानि प्रकाशयन्तीति भावः ॥ १८ ॥

दृष्ट्वेति । अधस्तात्तरुतले निर्जितः कलापभारो बर्हभारो यया
ताम् । कलापो भूषणे बर्हे इत्यमरः । व्याकीर्णेन विक्षिप्तेन माल्येन
कबरा शारम् । शबरः कर्बुरः शार इति हलायुधः । तरुण्याः
कबरीं केशपाशम् । कबरी केशपाशोऽथेत्यमरः । जानपदेत्यादिना ङीप् ।
दृष्ट्वैव मयूरा वर्हिणः चन्द्रकाः सन्त्येषामिति चन्द्रकवान् मयूरः दृष्टा-
पादादुत्पत्य प्रायुर्वनान् । दृ गतौ भुवि विषयीत्यादिना सुरादेश
इति भुवावित्यादिना उवङादेशः । तथा हि संकर्षिता मयूर-

दृष्ट्वैव निर्ज्जितकलापभरामधस्ता
व्याकीर्णमाल्यकवरां कवरीं तरुण्याः ।
प्राद्रवत् सपदि चन्द्रकवान् द्रुमाग्रात्
संहर्षिणां सह गुणाभ्यधिकैर्दुरासम्॥१९॥
रोचिष्णुकाञ्चनचयांशुपिशङ्गिताशा
वंशध्वनैर्जलदसंहतिमुल्लिखन्त्यः ।
भूभर्त्तुरायतनिरन्तरसन्निविष्टाः
पादा इवाभिविभुरावलयोरथानाम् ॥ २० ॥
छायाविधायिभिरनुज्झितभूतिशोभै

रित्या कर्त्रा गुणाभ्यधिकैर्गुणोत्कृष्टैः सह दुरासमासितुमशक्यमित्यर्थः । व्यादिरक्षमकादीषद्दुरित्यादिना खल्प्रत्ययः तयोरेव कल्पयन्तर्थाविति नियमात् । अत्र मयूरहेतुकस्य पलायनस्य कवरीदर्शनहेतुकत्वसम्बन्धस्य तत्पराभवनामसम्बन्धोऽयं अर्थान्तरन्यासः तत इत्यसामान्याङ्गेन सङ्करः । न हि जितैर्जेतरि स्थातमुचित मिति भावः । १९ ॥

रोचिष्णु इति । रोचिष्णवो रोचनशीलाः । अलङ्कृञित्यादिना इष्णुच् प्रत्ययः । तेषां काञ्चनचयानां काञ्चनचयानामंशुभिः पिशङ्गिताः पिशङ्गीकृताः आशाः याभिस्ताः वंशानां वेणूनां ध्वजभूतानां ध्वजैः प्रतिनियतकुमारनामाङ्कितार्दिविशिष्टकेतनैः अन्यत्र वंशा वेणवस्तैरेव ध्वजैः जलदसंहतिं मेघसङ्घातमुल्लिखन्त्यः आयतन्तीर्घं निरन्तराश्चैर्यन्तश्च सन्निविष्टाः संस्थिताः रथानामावलयः भूभर्तुरचलकाद्रेः पादाः प्रत्यन्तपर्वता इवाभिबभुः शोभिताः । अयादिवि मद्दोरत्वादिक्रियाविभिन्ना जातिम्न्दयोग्येका ॥ २० ॥

छायेति । क्षितिभर्तुः राज्ञः निवासयोग्या निवासाः [illegible] देहाच्छायाविधायिभिः कान्तिकरैरनातपत्रादिभिः । [illegible]

रुच्छ्रायिभिर्बहलपाटलधातुरागैः ।
दूष्यैरिव क्षितिभृतां द्विरदैरुदार-
तारावलीविरचनैर्व्यरुचन्निवासाः ॥ २१ ॥

उत्क्षिप्तकाण्डपटकान्तरलीयमान-
मन्दानिलप्रशमितश्रमघर्मतोयैः ।
दूर्वाप्रतानसहजास्तरणेषु भेजे
निद्रासुखं वसनसद्मसु राजदारैः ॥ २२ ॥

कान्तानिति विश्वः । उच्छ्रिता ऊर्जिता भक्तीनामुपरचनानां सम्पदां च शो-भा येषां तैः; भूतिर्भस्मनि सम्पदीत्यमरः । उच्छ्रायिभिरुन्नतैर्बहलः सान्द्रः पाटल आरक्तश्च धातुरागो गैरिकादिरञ्जनं येषान्तैः उदारा ताराणां शुद्धमुक्तावलीनां विरचना येषु तैः मुक्ताहारभूषितैरित्यर्थः । तारा मुक्ता-दिसंशुद्धौ तरले शुद्धमौक्तिके इति विश्वः । दूष्यपक्षे तारावलीर्ज्योतिषां सन्त-तिरिति केचित् द्विरदैर्दूष्यैः पटमण्डपैरिव । दूष्यं वस्त्रे च तद्गृहे इति विश्व. । व्यरुचन् रोचन्ते स्म । रुच दीप्तौ द्युद्भ्यो लुङीति परस्मैपदं पुषादीत्यादिना च्लेरङादेशः । अत्र द्विरदानां दूष्याणां च प्रकृतत्वाच्चोपमा नापि श्लेषभेदः विशेष्यस्य विशेषणानां च केषाञ्चि-च्छ्लिष्टत्वात् तस्मात् केवलप्रकृतास्पदा तुल्ययोगितेयं इवशब्दस्तु साम्यमा-त्रानुवादक इति सङ्क्षेपः ॥ २१ ॥

उत्क्षिप्तेति । उत्क्षिप्त उद्धृतो यः काण्डपटस्तस्य काण्डपटकः दूष्यावलम्बि वायुसञ्चारार्थः पटः । अपटः काण्डपटी स्यादिति वैज-यन्ती । तस्यान्तरेऽवकाशे लीयमानेन मन्दानिलेन प्रशमितं श्रमेणाध्व-खेदेन यत् घर्मतोयं स्वेदाम्बु तद्येषान्तैः राजदारैः राजावरोधैः दूर्वाणां प्रतानं प्रचय एव सहजमकृत्रिममास्तरणं तल्पं येषु तेषु वसनसद्मसु पटमण्डपेषु निद्रासुखमभेजे ॥ २२ ॥

प्रस्वेदवारिसविशेषविषक्तमङ्गे
कूर्प्पासकं क्षतनखक्षतमुत्क्षिपन्ती ।
आविर्भवद्घनपयोधरबाहुमूला
शातोदरी युवदृशां क्षणमुत्सवोऽभूत् ॥ २३ ॥
यावत्स एव समयः सममेव ताव
द्व्याकुलाः पटमयान्यभितो वितत्य ।

प्रस्वेदेति । अङ्गे गात्रे प्रस्वेदवारिणा सविशेषं सातिशयं यथा तथा विषक्तं श्लिष्टं कूर्पासकं चोलकं कञ्चुकमित्यर्थः । चोलः कूर्पास-कोऽस्त्रियामित्यमरः । क्षतानि पुनर्विदीर्णानि नखक्षतानि यस्मिन् कर्मणि तद्यथा तथा उत्क्षिपन्ती उन्मोचयन्ती अतएवाविर्भवत्प्रकाशमानं घन-पयोधरबाहुमूलं घनौ पयोधरौ बाहुमूले च यस्याः सा शातोदरी । नासिकोदरेत्यादिना ङीष् । युवदृशां क्षणमुत्सवोऽभूत् । एतेन यूनां स्मराविनादिकरमिष्ट वस्त्ववलोकननिमित्तकालाक्षमत्वलक्षणमौत्सुक्यं व्यज्यते । नायिकाभिसारिणी प्रगल्भा या ॥ २३ ॥

यावदिति । निपथो व्यवहारः स एषामस्तीति । निपथिनो वणि-जो यावत् स एव समयः सेनानिवेशनक्षण एव तावत्क्षण एव समं युगपत् व्याकुलाः त्वरावन्तः सन्तः पटमयानि पटविकाराणि पटमण्डपानी-त्यर्थः अभितो वितत्य उभयतः श्रेण्या वितत्य विस्तार्य क्रयेण जीवन्तीति क्रयिकाः । वस्नक्रयविक्रयादिति ठन् । पर्याप्ततनुः प्रचुरो धावन् क्रयिक-लोकः क्रेतृजनो यस्मिन् कर्मणि तत् क्रयपर्याप्तैर्द्रव्यैः पण्यैः पण्य-द्रव्यैः पूर्णा आपणाः पण्य प्रसारणस्थानानि यासु ताः विपणीः पण्य-वीथीः । आपणस्तु निषद्यायां विपणिः पण्यवीथिकेत्यमरः । विभेजुर-

पर्य्यापतत्क्रयिकलोकमगण्यपण्य
पूर्णापणा विपणिनो विपणौ विभेजुः ॥ २४ ॥
अल्पप्रयोजनकृतोरुतरप्रयासै
रुद्गूर्णलोष्टलगुडैः परितोऽनुविद्धम् ।
उद्भ्रान्तमद्भुतमनोकहजालमध्या
दन्यः शशं गुणमनल्पमवन्नवाप ॥ २५ ॥
त्रासाकुलः परिपतन् परितो निकेतान्
पुम्भिर्न कैश्चिदपि धन्विभिरन्वबन्धि ।

पण्यैर्विक्रेतुमित्यर्थः । स्वभावोक्त्यनुप्रासौ ॥ २४ ॥

अल्पेति । अल्पप्रयोजनेनाल्पफलेन निमित्तेन कृत उरुतरो भूयान् प्रयासो यैस्तैः अल्पस्यैकस्य शशपिण्डस्य भूयसा प्रकाशितत्वादिति भावः उद्गूर्णा उद्यताः लोष्टानि मृत्खण्डाः लगुडाश्च दण्डकाष्ठानि यैस्तैः पुम्भिरिति शेषः परितोऽनुविद्धमनुरुद्धं अतः प्रकटसाकूतं क्लीबमनोकहा वृक्षाः तेषां जालमध्यादुद्यन्तमुत्थितम् । उत्पतदिति; कर्त्तरि क्तः । उद्द्रुतमपलायितं शशं मृगविशेषं अन्यः परः अवन् हन्तुमिवार्य्य रक्षन् अनल्पं गुणं महान्तमुत्कर्षमवाप । दयालोरनभि-मतोलुपस्य सुकीर्त्तिः सुलभेति भावः अल्पार्थानारम्भाद्धः अन्योगुणं पापमवन् प्रयुञ्जानः पापमवाप जघान यो हन्ता तस्यैव मृग इति व्याधसमयोदिति भावः ॥ २५ ॥

त्रासेति । त्रासाकुलो जनदर्शनाद्भयविह्वलोऽतएव निकेतान्निवे-शान् परितः सर्व्वतः । अभितः परित इत्यादिना द्वितीया । परिप-तन्धावन् मृगो हरिणः कैश्चिदपि धन्विभिर्धनुष्मद्भिः । धन्वीधनुष्मा-न्मानुष्क इत्यमरः । व्रीह्यादित्वादिनिरिति स्वामी । पुम्भिर्नान्वबन्धि

तस्थौ तथापि न मृगः क्वचिदङ्गनाना
माकर्णपूर्णनयनेषु हतेक्षणश्रीः ॥ २६ ॥

आस्तीर्णतल्परचितावसथः क्षणेन
वेश्याजनः कृतनवप्रतिकर्मकाम्यः।
खिन्नानखिन्नमतिरापततो मनुष्यान्
प्रत्यग्रहीच्चिरनिविष्ट इवोपचारैः ॥ २७ ॥

सस्नुः पयः पपुरनेनिजुरम्बराणि

नानुयातः। बध्नातेः कर्मणि लुङ्। तथाप्यङ्गनानामाकर्णपूर्णं विस्तीर्णं आकृष्टाश्च ये नयनान्येवेषवस्तैः क्षता ईक्षणश्रीर्यस्य सः अतः क्वचिदपि न तस्थौ किन्तु वीरविशिखपाताभावेऽप्यङ्गनापाङ्गविशिखपातात्पलायित एवेति भावः। अत्र जनालोकनोत्थभयहेतुकस्य मृगानवस्थानस्याङ्गनापाङ्गेषु इति हेतुकत्वोत्प्रेक्षणाद्धेतूत्प्रेक्षा सा च व्यञ्जकाप्रयोगात् प्रतीयमाना। हेतोश्च क्षतेक्षणश्रीरिति विशेषणगत्योक्तत्वात् काव्यलिङ्गमिति सङ्करः ॥ २६ ॥

आस्तीर्णेति। क्षणेनास्तीर्णतल्पं वेश्यावृत्तेः शय्याप्रधानत्वात् प्रागेव सज्जितशय्यं यथा तथा रचितावसथः कल्पितनिकेतः। स्थानावसथवास्तु चेति कोशः। कृतेन नवप्रतिकर्मणा नूतनेन प्रसाधनेन काम्यः स्पृहणीयः अखिन्नमतिरश्रान्तचित्तः अगणिताध्वखेद इत्यर्थः। वेश्याजनः खिन्नानध्वश्रान्तानापततः आगच्छतो मनुष्यान् पुरुषान् चिरनिविष्ट इव तत्रैव चिरकालस्थ इवेत्युत्प्रेक्षा उपचारैः शीताम्बुताम्बूलदानादिसत्कारैः प्रत्यग्रहीत् वशीचकारेत्यर्थः ॥ २७ ॥

सस्नुरिति। सेनायां भवाः सैन्याः सैनिकजनाः। सेनाया वा इति ण्यप्रत्ययः। मार्गनिम्नगानां याः श्रियः सम्पदः तासामनुपभोगः उप-

जग्मुर्विसं धृतविकासिविसप्रसूनाः ।
सैन्याः श्रियामनुपभोगनिरर्थकत्व
दोषप्रवादममृजन्नगनिम्नगानाम् ॥ २८ ॥
नाभिह्रदैः परिगृहीतरयाणि यत्र

भोगाभावः । क्वचित् प्रसज्यप्रतिषेधेऽपि नञ्समास इष्यते । यथाऽद-
र्शनमश्रवणमनुच्चारणं अनुपलब्धिरभाव इत्यादि । तेन यन्निरर्थकत्वं
निष्फलत्वं तदेव दोषः तेन यः प्रवादो निन्दा तममृजन् अमार्क्षुन् ।
मृजूष् शुद्धौ अदादित्वाल्लङि यथोक्तं मृजेरजादौ क्ङिति विभाषा-
वृद्धिर्वक्तव्येति विकल्पाद् वृद्ध्यभावः । मार्ज्जनप्रकारमाह । सस्नुः
स्नानमकुर्वन् । पयः पानीयं पपुः । ष्णा शौचे पा पाने लिट् । अम्बरा-
ण्यनेनिजुः अक्षालयन् । णिजिर् शौचे जुहोत्यादित्वाल्लङि श्लाविति
द्विर्भावः सिजभ्यस्तविदिभ्यश्चेति झेर्जुसादेशः णिजान्त्रयाणां गुणः ।
श्लावित्यभ्यासस्य गुणः । धृतानि विकासिविसप्रसूनानि विकसितपुष्क-
राणि यैस्ते । विसप्रसूनराजीवपुष्कराम्भोरुहाणि चेत्यमरः । विस-
मृणालञ्जग्मुः भक्षयाञ्चक्रुः । घसेर्लिटि गमहनेत्यादिना उपधालोपे
चर्त्वं शासिवसिघसीनां चेति षत्वम् । स्नानाद्युपभोगेनोक्तनैरर्थ्यं निराच-
क्रुरित्यर्थः । अत्र दोषमार्ज्जनस्य स्नानादिनाकृतत्वाद्वाक्यार्थहेतुकं काव्य-
लिङ्गमलङ्कारः । स्नानादिक्रिया समुच्चयस्त्वङ्गमस्येति सङ्करः ॥ २८ ॥

नाभीति । स्त्रीणां नाभिभिरेव ह्रदैः परिगृहीतरयाणि प्रति-
बद्धवेगानि उरुभिर्जघनैरेव सेतुभिर्निवारितानि प्रतिहतगतिकानी-
त्यर्थः । पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुर इत्यमरः । जल-
मेव मृदङ्गवाद्यं वाद्यविशेषः जलमिव तेन पाणिनोत्थापितमपरेण ताडि-
तं मृदङ्गवत् ध्वनतीति प्रसिद्धमेतेन वल्गु सुन्दरं वल्गद्भिश्चलैश्च तैः
स्तनतटैः स्खलितानि स्खलनङ्गतानि गमितानि वा जलानि पूर्वोक्तमग-

स्त्रीणां बृहज्जघनसेतुनिवारितानि ।
जग्मुर्जलानि जलमण्डुकवाद्यवल्गु
वल्गद्घनस्तनतटस्खलितानि मन्दम् ॥ २९ ॥
आलोलपुष्करमुखोल्लसितैरभीक्ष्ण
मुक्षाम्बभूवुरभितो वपुरम्बुवर्षैः ।
खेदायतश्वसितवेगनिरस्तमुग्ध
मूर्द्धन्यरत्ननिकरैरिव हास्तिकानि ॥ ३० ॥
ये पक्षिणः प्रथममम्बुनिधिङ्गतास्ते

निम्नगाचलितानि मन्दङ्गमन् । अत्र जलमन्दगमनस्य विशेषणगत्या
स्यप्रतिबन्धादि पदार्थहेतुकत्वात्काव्यलिङ्गम् ॥ २९ ॥

आलोलेति । हस्तिनां समूहा हास्तिकानि । अचित्तहस्तिधेनो
ष्ठक् । आलोलानि यानि पुष्कराणि हस्ताग्राणि । पुष्करं द्विपहस्ता-
ग्रे इत्यमरः । तेषां मुखैरग्रैरुल्लसितानि उत्क्षिप्तानि तैरम्बुवर्षैः खेदे-
नाध्वश्रमेणायतेन द्राघीयसा श्वसितस्योच्छ्वासमारुतस्य वेगेन निरस्ताः
बहिरुत्क्षिप्ताः ये मुग्धाः सुन्दराः मूर्धन्याः मूर्द्धनि भवाः । शरीरा-
वयवाच्चेति यत्प्रत्ययः ये चाभावकर्मणोरिति प्रकृतिभावाद्दलोपो न इति
टिलोपाभावः । रत्ननिकरा मुक्ताफलप्रकरास्तैरिवेत्युत्प्रेक्षा वपुरभीक्ष्णम-
भ्यभूवुः सिषिचुः । उक्ष सेचने इजादेश्च गुरुमतोऽनृच्छ इत्याम्प्रत्ययः ।
गजेन्द्रजीमूतवराह शङ्खमत्स्याहिशुक्त्युद्भववेणुजानि । मुक्ताफलानि
प्रथितानि लोके तेषां तु शुक्त्युद्भवमेव भूरीति गजानां मुक्ताकरत्वे
प्रमाणम् ॥ ३० ॥

य इति । ये पक्षिणः पक्षवन्त इन्द्रेणाच्छिन्नपक्षा इत्यर्थः । बल-
र्गे इति प्रत्ययः । तेऽद्रिपतयो मैनाकादयः प्रथममम्बुनिधिङ्गताः प्रविष्टाः

येऽपीन्द्रपाणितुलितायुधलूनपक्षाः ।
ते जग्मुरद्रिपतयः सरसीर्विगाढु-
माक्षिप्तकेतुकुथसैन्यगजच्छलेन ॥ ३१ ॥
आत्मानमेव जलधेः प्रतिबिम्बिताङ्ग-
मूर्मौ महत्यभिमुखापतितं गजेन ।
क्रोधादधावदपभीरभिहन्तुमन्य-
नागाभियुक्त इव युक्तमहो महेभ. ॥ ३२ ॥
नादातुमन्यकरिमुक्तमदाम्बुतिक्त

येऽपीति ये इत्यर्थः इन्द्रस्य पाणिना तुलितेन प्रेरितेनायुधेन वज्रेण लूनपक्षाः छिन्नगरुतस्तेऽद्रिपतयः आक्षिप्ता आकृष्टाः केतवो ध्वजाः कुथाः पृष्ठास्तरणानि च येषाम् । प्रवेण्यास्तरणं वर्णं परिस्तोमः कुथो द्वयोरित्यमरः । तेषां सैन्यगजानां छलेन सरसीर्विगाढुं विगाहितुम् । स्वरतिसूतीति विकल्पादिडागमः । जग्मुः अत्र गजच्छलेनेति छल-शब्देन गजत्वमपह्नुत्याद्रित्वारोपणाच्छलादिशब्दैरसत्यत्वप्रतिपादनरूपोऽपह्नवालङ्कारः । तेन मन्दरतामद्रीणां सागरावगाहनदर्शनात् मत्सरात् स्वयमपि सलिलमवगाहमानाः साक्षाल्लूनपक्षाः पर्वता इवेत्युत्प्रेक्षा व्यज्यते ॥ ३१ ॥

आत्मानमिति । महेभो जलधेर्जलाशयस्य महत्यूर्मौ प्रतिबिम्बिताङ्गं यस्य तमभिमुखापतितमभिमुखमागतमात्मानमेव आत्मप्रतिबिम्बमेवेत्यर्थः निरीक्ष्यान्यनागेन प्रतिगजेनाभियुक्तोऽभिद्रुत इवातितूर्णमपभीर्निर्भीकः सन् क्रोधादधावत् अहो इति मौढ्येन विस्मये तच्च युक्तं महेभस्येति भावः । अभियुक्त इवेत्युत्प्रेक्षा । प्रतिगजभ्रान्तिनिबन्धनात् भ्रान्तिमदलङ्कारेण च तयोरङ्गाङ्गिभावेन सङ्करः ॥ ३१ ॥

नेति । अन्यकरिणा प्रतिगजेन मुक्तेन मदाम्बुना तिक्तं सु-

धृताङ्कुशेन न विहातुमपीच्छताम्भः ।
रुद्धे गजेन सरितः सुरुपावतारे
रिक्तोदपात्रकर आस्त चिरं जनौघः ॥ ३३ ॥

पन्थानमाशु विजहीहि पुरः स्तनौ ते
पश्यन् प्रतिद्विरदकुम्भविशङ्किचेताः ।
स्तम्बेरमः परिणिनंसुरसावुपैति
षिड्गैरगद्यत ससम्भ्रममेव काचित् ॥ ३४ ॥

रभि । कटुतिक्तकषायास्तु सौरभ्येऽपि प्रकीर्तिता इति केशवः । अम्भ-स्थानात् पङ्कीलं नेच्छता विहातुमन्तर्जलमपि नेच्छता अनिच्छता क्रोधपि पासाभ्यामिति भावः । धृताङ्कुशेन यन्त्रा सक्रोधेन गजेन नगसरितोऽवतारे तीर्थे रुद्धे सति जनौघः । रिक्तान्युदपात्राणि येषु ते करा यस्मिन् यथा तथा चिरमास्त अतिष्ठत् । आस उपवेशने लङ् । एकहलादौ पूरयितव्येऽन्यतरस्यामित्युदकस्योदादेशः ॥ ३३ ॥

पन्थानमिति । पन्थानमाशु विजहीहि । ओहाक् त्यागे लोटि सेर्ह्यादेशः आ च हाविति विकल्पादीकारादेशः । पुरोऽग्रे ते स्तनौ पश्यन् प्रतिद्विरदस्य कुम्भौ विशङ्कत इति तद्विशङ्कि चेतो यस्य सः कुम्भभ्रान्तिमानित्यर्थः । अतएव भ्रान्तिमदलङ्कारः । स्तम्बे तृणे रमत इति स्तम्बेरमः । इभः स्तम्बेरमः पद्मीत्यमरः । स्तम्बकर्णयो रमिजपोरित्यच् प्रत्ययः । तत्पुरुषे कृति बहुलमित्यलुक् । परिणन्तुं तिर्यक् प्रहर्तुमिच्छुः परिणिनंसुः । नमेः सन्नन्तादुप्रत्ययः उकार उपदेशेऽनुदात्तादितीट्प्रतिषेधः । असावुपैति पुरेति पाठे पुरोऽर्थेतीत्यन्वयः एवमेवार्थः । यावत्पुरानिपातयोर्लडिति भविष्यदर्थे लट् । षिड्गैः विटैः । षिड्गः पल्लविको विटः इति कोशः । काचिदुत्सवदर्शनार्थं ससम्भ्रमं सत्वरं अगद्यत गदिता ॥ ३४ ॥

कीर्णं शनैरनुकपोलमनेकपानां
हस्तैर्विगाढमदतापरुजः शमाय ।
आकर्णमुल्लसितमम्बु विकासिकाश
नीकाशमाप समतां सितचामरस्य ॥ ३५ ॥
गण्डूषमुज्झितवता पयसः सरोषं
नागेन लब्धपरवारणमारुतेन ।
अम्भोधिरोधसि पृथुप्रतिमानभाग

कीर्णमिति । अनेकपानां द्विपानां विगाढं प्ररूढो यो मदेन ताप-स्स एव रुक् रोगः तस्याः रुजः शमाय शनैर्मन्दं हस्तैरनुकपोलं कपो-लयोः कीर्णं क्षिप्तम् आकर्णं कर्णपर्यन्तम् । आङ्मर्यादाभिविध्यो-रित्यव्ययीभावः । उल्लसितमुत्थितं विकासि यत्काशङ्काशकुसुमं तेन सदृशङ्काशनीकाशम् । नित्यसमासत्वादस्वपदविग्रहः । अतएव लुगुत्तर-पदे स्वमो । निभसङ्काशनीकाशप्रतीकाशोपमादय इत्यमरः । अम्बु सितचामरस्य समतां साम्यमाप । तुल्यार्थैरित्यादिना षष्ठी । उपमा-लङ्कारः ॥ ३५ ॥

गण्डूषमिति । लब्धः परवारणस्य प्रतिगजस्य मारुतो मदगन्ध-वाहो येन तेन अतएव सरोषं यथा तथा पयसः पानीयस्य गण्डूषं मुखपु-रस्तु मुखान्तर्गतमम्बु इत्यर्थः । गण्डूषो मुखपूरण इति हलायुधः । स्त्रीलिङ्गत्वेऽपि पुंलिङ्गमेवाह वामनो लिङ्गाध्याहारादिविधम् । उज्झितं यथा त्यक्तवता नागेन गजेन । मतङ्गजो गजो नाग इत्यमरः । अम्भो-धिरोधसि समुद्रतीरे । दन्तयोरन्तयोर्मध्यप्रतिमानमिति सज्जनः । पृथुना प्रतिमानभागेन रुद्धं प्रतिबद्धं जलं दन्तौ मुसलाविव तयोः प्रहारो यस्मिन् कर्मणि तत् । अयोग्रमुसलोऽस्त्री स्यादित्यमरः ।

रुद्धोरुदन्तमुसलप्रसरं निपेते ॥ ३६ ॥

दानं ददत्यपि जलैः सहसाधिरूढे
कोविद्यमानगतिरासितुमुत्सहेत ।
यद्दन्तिनः कटकटाहतटान्मिमङ्क्षो
र्मङ्क्षूदपाति परितः पटलैरलीनाम् ३७॥
अन्तर्जलौघमवगाढवतः कपोलौ
हित्वा क्षणं विततपक्षतिरन्तरीक्षे ।

निपेते निपतितम् । भावे लिट् । क्रोधवेगादवधातोऽपि प्रहृत्य पारवश्य-मयङ्काधोमुखः प्रपातेत्यर्थः । क्रोधान्धाः किन्न कुर्वन्तीति भावः ॥३६

दानमिति । दीयत इति दानं मदं मदश्च । दानं गजमदे त्याग इति विश्वः । तद्ददति विसृजत्यपि दानपरेऽपीत्यर्थः । सहसा अत्र स्यात् । स्वरादिपाठादव्ययमिति शाकटायनः । जलैर्जडैः नीरैश्च जलं त्वाक्रान्ते नीरे ह्रीबेरे च जडेऽन्यवदिति विश्वः । अधिरूढे आक्रान्ते सति विद्यमानगतिः गमनसाधनसमर्थश्च कः पुमानासितुमुत्सहेत न कोऽपीत्यर्थः । यक्षश्चेत्यादिना लिङ् । यथा मिमङ्क्षोर्मङ्क्तुमिच्छोः । मज्जेः सन्नन्तादुप्रत्ययः । दन्तिनः कटो गण्ड स कटाहः खर्परस्तस्य । कटाहः खर्परस्तुप इति वैजयन्ती । तत्तटादपयातानामलीनां पटलैः परितो मङ्क्षु द्राक् द्राक् मङ्क्षु सपदि द्रुतमित्यमरः । उदपाति उत्पतितम् । भावे लुङ् चिण् भावकर्मणोरिति चिण् । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ३७ ॥

अन्तरिति । जलौघे अन्तरन्तर्जलौघम् । विभक्त्यर्थेऽव्ययीभावः । अथवा जलौघस्यान्तःपूरमन्तरस्यान्तरे अवगाढवतः प्रविष्टवतः । गाढैर्मितः प्रवृत्तस्य दानधुतदनोयाः । गजस्य कपोलौ हित्वा अपगमनरूपतयाऽत्याज्ये विततपक्षतिर्विस्तृतपक्षमूलः आमूलात् विततपक्ष-इत्यर्थः

द्रव्याश्रयेष्वपि गुणेषु रराज नीलो
वर्णः पृथग्गत इवालिगणो गजस्य ॥ ३८ ॥
संवर्तिभिः पयसि गैरिकरेणुरागै-
रम्भोजगर्भरजसाङ्गनिषङ्गिणा च ।
क्रीडोपभोगमनुभूय सरिन्महेभा-
वन्योन्यवस्त्रपरिवर्तमिव व्यधत्ताम् ॥ ३९ ॥
यांश्चन्द्रकैर्मदजलस्य महानदीनां

लो पैचकिः पक्षमूलमित्यमरः । पक्षात्तिरिति तिप्रत्ययः । अलिगणो गुणेषु रूपादिषु द्रव्यभावयो येष्वतेषु द्रव्याश्रयेषु अपि अयुतसिद्धत्वात् द्रव्यसमवेतत्वात् द्रव्याधीन सत्ताकेषु सत्स्वपीत्यर्थः । पृथग्गतः जलसम्बन्धात् स्वाश्रयपरिहारेण स्थितो नीलोवर्णो गजस्य नीलिमेव रराज । गुणे शुक्लादयः पुंसीत्यमरः । अत्रालिगणे वादव्याङ्गजनीलस्याश्रयादन्यत्र उपलब्धिनिराशाय पृथक् स्थितिरिवेत्युत्प्रेक्ष्यते ॥ ३८ ॥

संवर्तिभिरिति । सरिच्च महेभश्च सरिन्महेभौ पयसि संवर्तिभिः मज्जनादिष्वले विहरद्भिः गैरिकरेणव एव रागास्तैः । करणे घञ् । अङ्गनिषङ्गिणा गजाङ्गसङ्गिना अम्भोजगर्भरजसा पद्मपरागेण च निमित्तेन क्रीडया लीलया उपभोगं सम्भोगमनुभूयान्योन्यस्मिन्यो वस्त्रयोः परिवर्तं विनिमयं व्यधत्तामकुरुतामिव । दधातेर्लङि परस्मैपदे तमस्तामादेशः । अत्र सरिन्महेभयोः प्रतीयमाननायिकादेरभेदाध्यवसायेन वस्त्रविनिमयोत्प्रेक्षा ॥ ३९ ॥

यानिति । गजेन्द्राः विकसत्सु अमलात्मसु अपि तैलबिन्दुवत्प्रसरतो मदजलस्य चन्द्रकैश्चन्द्राकारैर्मण्डलैर्महानदीनां यान् त्वचि विदधुः पङ्कजानां नेत्रभिषयस्वरत्नो जलानि गर्भनलीधौतेषु यानितेष्वङ्गेषु सर्वे

नेत्रश्रियं विकसतो विदधुर्गजेन्द्राः ।
ताम्रात्यवापुरविलम्बितमुत्तरन्तो
धौताङ्गलग्ननवनीलपयोजपत्रैः ॥ ४० ॥
प्रत्यन्यदन्ति निशिताङ्कुशदूरभिन्न
निर्याणनिर्यदसृजं चलितं निषादी ।
रोद्धुं महेभमपरिव्रढिमानमागा
दाक्रान्तितो न वशमेति महान् परस्य॥४१॥

[illegible] प्रत्यवापुः प्रतिपेदिरे । अत्र गजानां नदीनां च [illegible] । [illegible] यदा [illegible] भवेत् । [illegible] भवतीति लक्षणात् ॥ ४० ॥

प्रतीति । अन्यदन्तिनमभि प्रत्यन्यदन्ति प्रतिगजाभिमुखं [illegible] । लक्षणेनाभिप्रती आभिमुख्ये इत्यव्ययीभावः । चलितं धावन्तं [illegible] निशिताङ्कुशेन दूरभिन्नं यथा तथा भिन्नं सत् निर्याणदपाङ्गदेशः । अपाङ्गदेशो निर्याणमित्यमरः । [illegible] महेभं [illegible] प्रभुः । [illegible] ॥४१

सेव्योऽपि सानुनयमाकलनाय यन्त्रा
नीतेन वन्यकरिदानकृताधिवासः ।
नाभाजि केवलमभाजि गजेन शाखी
नान्यस्य गन्धमपि मानभृतः सहन्ते ॥ ४२ ॥

अद्रीन्द्रकुञ्जचरकुञ्जरगण्डकाष
सङ्क्रान्तदानपयसो वनपादपस्य ।
सेनागजेन मथितस्य निजप्रसूनै
र्मम्ले यथागतमगामि कुलैरलीनाम् ॥ ४३ ॥

सेव्य इति । यन्त्रा निषादिना आकलनाय बन्धनाय सानुनयं सप्रश्रयं नीतेन समीपं प्रापितेन गजेन वन्यगजदानैः कृतोऽधि वासो वासना यस्य स तद्वासित इत्यर्थः शाखी वृक्षः । व्रीह्यादित्वात् णिनिः । सेव्योऽपि सन्नाभाजि नासेवि । भज सेवायां कर्मणि लुङि चिणो लुक् । किन्तु केवलमभाजि भग्न इत्यर्थः । भञ्जो आमर्दने भञ्जेश्च चिणीति विभाषा नलोपः । शेषं पूर्ववत् । तथाहि मानभृतोऽहङ्कारिणोऽन्यस्य गन्धमपि न सहन्ते परं किमुतेति भावः । अतो वृक्षभङ्गं युक्तमित्यर्थः । पूर्ववदलङ्कारः ॥ ४२ ॥

अद्रीन्द्रेति । अद्रीन्द्रस्य रैवतकस्य कुञ्जे चरति यस्तस्य कुञ्जचरस्य कुञ्जरस्य गण्डकाषेण कपोलकषणेन सङ्क्रान्तं दानपयो मदाम्बु यस्य तस्मात्तदेव सेनागजेन मथितस्य भग्नस्य वनपादपस्य निजैरात्मीयैः प्रसूनैः पुष्पैः । निजमात्मीयनित्ययोरिति वैजयन्ती । मम्ले म्लानम् । म्लायतेर्भावे लिट् । अलीनां कुलैस्तु यथा गतमगामि गतम् । यथागतक्रमेणैव गतं न तु म्लानमित्यर्थः । आपद्यात्मीयानात्मीययोर्भेद इति भावः । गमेर्गत्यर्थस्याकर्मकत्व विवक्षायां भावे लुङ् । इभवनपादपादीनां विशेष-

नोच्चैर्यदा तरुतलेषु ममुस्तदानी
माधोरणैरभिहिताः पृथुमूलशाखाः ।
बन्धाय चिच्छिदुरिभास्तरसात्मनैव
नैवात्मनीनमथ वा क्रियते मदान्धैः ॥४४॥
उष्णोष्णशीकरसृजः प्रबलोष्मणोऽन्त
स्तत्फुल्लनीलनलिनोदरतुल्यभासः ।

[illegible] दौपम्य प्रतीते कश्चिद्विसमासोक्तिरस्त्येव ॥ ४३ ॥

नेति । इभा यदा उच्चैरुन्नतेषु तरुतलेषु न ममुर्नान्तर्गताः तदानीं आधोरणैर्नियन्तृभिरभिहिताः इमाश्छिन्द्धीत्युपदिष्टाः पृथुमूलशाखाः बन्धाय स्वबन्धनायैव तरसा बलेनात्मना स्वयमेव चिच्छिदुः न चैतदाश्चर्यमित्याह । यद्वा मूढाना [illegible] । अथ वेति । अथ वा मदान्धैरात्मनीनमात्मने हितं न क्रियत एव । आत्मन्विश्वजनभोगोत्तरपदात् खः इति खप्रत्यये आत्मनीने [illegible] इति प्रकृतिभावात् [illegible] टिलोपो न । पूर्ववदर्थान्तरन्यासः ॥ ४४ ॥

उष्णोष्णेति । [illegible] उष्णोष्णा उष्णप्रकाराः । प्रकारे गुणवचनस्येति द्विर्वचनं कर्मधारयवद्भावात् सुपो लुक् । तान् शीकरान् सृजन्ति [illegible] । क्विप् । अन्तः प्रबलोष्मणः प्रवृद्धतापान् [illegible] फुल्लं विकचं [illegible] फुल्लं निर्गता [illegible] । तस्य [illegible] नीलोत्पलस्योदरेण तुल्यभासः समानकान्तीन् [illegible] शिरास्थितो [illegible] कान्तिविस्तारान् [illegible] । [illegible] । [illegible] । [illegible] । [illegible]

स्कन्धान् विशालशिरसो हरिचन्दनेषु
नागानबन्धुरपरान्मनुजा निरासुः ॥४५॥
कण्डूयतः कटभुवं करिणो मदेन
स्कन्धं सुगन्धिमनुलीनवता नगस्य ।
स्थूलेन्द्रनीलशकलावलिकोमलेन
कण्ठे गुणत्वमलिना वलयेन भेजे ॥४६॥
निर्धूतवीतमपि वालकमुल्ललन्तं
यन्ता क्रमेण परिसान्त्वनतर्जनाभिः ।

अस्यतेर्लिट् । अत्रोभयेषामपि नागानां प्रकृतत्वात्केवलप्रकृतश्लेषः ॥४५॥

कण्डूयत इति । कटभुवं गण्डस्थलं कण्डूयतः कषतः कण्ड्वादिभ्यो यक् इति यक्प्रत्ययः । कण्डूञ्धातोर्ञित्त्वात् प्रकृतित्वादुभयपदित्वम् । करिणो मदेन सुगन्धिं शोभनगन्धम् । गन्धस्येत्त्वे तदेकान्तग्रहणान्नाद्रियन्ते कवयः । नगस्य वृक्षस्य स्कन्धं प्रकाण्डं अनुलीनवता तत्संश्लिष्टेनेत्यर्थः । लीयतेर्निष्ठेति क्तवतुप्रत्ययः ल्वादिभ्य इति निष्ठानत्वम् । स्थूलानामिन्द्रनीलशकलानां आवलिरिव कोमलेन मनोहरेणालिनां वलयेन कण्ठे गुणत्वं कण्ठसूत्रत्वम् । मूर्द्धमस्तकात् स्वाङ्गादकाम इत्यलुक् । भेजे प्राप्तम् । कर्मणि लिट् । अत्रालि वलये इन्द्रनीलमयकण्ठभूषणत्वारोपाद्रूपकालङ्कारः ॥४६॥

निर्धूतेति । यन्ता निषादी निर्धूतं निरस्तं वीतं पादपाताङ्कुशवारणं यस्मिन् कर्मणि तद्यथा तथा उल्ललन्तमुत्प्लवमानमपि । पादकर्म यत् प्रोक्तं यतमङ्कुशवारणम् । उभयं वीतमाख्यातमिति हला-युधः । बालकमश्वपोतकम् । पञ्चवर्षो गजो बालः पोतस्तु दशवार्षिक इति वैजयन्ती । शिक्षायोगेन स्पर्शादेव गजपादाभ्यासवशेन क्रमेण

शिक्षावशेन शनकैर्वशमानिनाय
शास्त्रं हि निश्चितधियां क्व न सिद्धिमेति॥४७॥
स्तम्भं महान्तमुचितं सहसा मुमोच
दानं ददावतितरां सरसाग्रहस्तः ।
बद्धापराणि परितो निगडान्यलावी
त्स्वातन्त्र्यमुज्ज्वलमवाप करेणुराजः ॥४८॥

परिभाषा परि[illegible] दुर्दान्तानपि तर्ज्जना भर्त्सनञ्च तानिः [illegible] [illegible]। [illegible] प्रचयः। वशं [illegible]मानिनाय। तथा हि दृढ़ निश्चितार्थां धीरैशास्त्रं [illegible] शास्त्रं क्व सिद्धिमेति [illegible] शास्त्रं [illegible] [illegible]। [illegible] [illegible] इति [illegible] [illegible] [illegible] [illegible] [illegible] ॥४७॥

स्तम्भमिति। करेणुराजो राजा च करेणुराजो [illegible] करेणु-राजेति गजपति राजा च [illegible]। उभयत्रापि राजाऽह[illegible] इति टच्। [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible] [illegible] सहसा [illegible]। [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इति [illegible] [illegible]। [illegible]। [illegible]। परितो [illegible] [illegible] [illegible] च। [illegible] [illegible] इति [illegible]। [illegible]। [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible] ॥४८॥

जज्ञे जनैर्मुकुलिताक्षमनाददाने
संरब्धहस्तिपकनिष्ठुरचोदनाभिः ।
गम्भीरवेदिनि पुरः कवलं करीन्द्रे
मन्दोऽपि नाम न महानवगृह्य साध्यः॥४८॥
चिप्तं पुरो न जगृहे मुहुरिक्षुकाण्डं
नापेक्षते स्म निकटोपगतां करेणुम्।
सस्मार वारणपतिः परिमीलिताक्ष

जज्ञ इति। गम्भीरमन्तः वेत्तीति गम्भीरवेदी। त्वग्भेदाच्छोणित स्रावान्मांसस्य व्यथनादपि। आत्मानं यो न जानाति तस्य गम्भीरवेदि तेति राजपुत्रीये। चिरकालेन यो वेत्ति शिक्षाम्परिचितामपि। गम्भीर-वेदी विज्ञेयः स गजो गजवेदिभिरिति मृगचर्यायै। तस्मिन् गम्भीर-वेदिनि करीन्द्रे पुरः कुपित हस्तिनं पातीति हस्तिप स एव हस्ति पकोनिषादी। आधोरणा हस्तिपका हस्त्यारोहा निषादिन इत्यमरः। तस्य निष्ठुराभिश्चोदनाभिस्तर्जनाभिरपि मुकुलिताक्ष निमीलितनेत्र यथा तथा पुरः कवलं ग्रास अनाददाने सति। मन्दो मूढोऽपि। मूढाल्पापटुनिर्भाग्या इत्यमरः। गजभेदोऽपि। भद्रोमन्द्रोमृगश्चैव विज्ञेयास्त्रिविधा गजा इति। महान् बलाधिकोऽप्यवगृह्य निगृह्य साध्योन नाम न खल्विति जनैर्जज्ञे ज्ञातम्। जानातेः कर्मणि लिट्। मन्दोऽपीत्यादिवाक्यार्थः कर्म॥ ४८ ॥

चिप्तमिति। वारणपतिः करिवरोऽमुष्य पुरः चिप्तमग्रे न्यस्त मिक्षुकाण्डमिक्षुदण्डं न जगृहे न स्वीचकार निकटोपगतां समीपस्थां करेणुं हस्तिनीञ्च नापेक्षते स्म नेच्छति स्म। लट् स्म इति भूतार्थे लट्। किन्तु परिमीलिताक्षं यथा तथेति पूर्वानुभावः इच्छया विहारा येषु ते वनायाः एव महोन्नतशाखिनी ससार तानेव चिन्तयामासेत्यर्थः। धर्मी-

मिक्षाविहारवनवासमहोत्सवानाम् ॥ ५० ॥
दुःखेन भोजयितुमाशयिता शशाक
तुङ्गाग्रकायमनमन्तमनादरेण ।
उत् क्षिप्तहस्ततलदत्तविधानपिण्ड
स्नेहस्नुतिस्नपितबाहुरिभाधिराजम् ॥ ५१ ॥
मुक्तांशुकोपरचितानि निरन्तराभि
र्वेश्मानि रश्मिविततानि नराधिपानाम् ।

[illegible] । न स्वच्छन्दचारिणां [illegible] भोगेषु मन प्रसजति इति भावः । वसन्ततिलका[illegible] ॥ ५० ॥

दुःखेनेति । [illegible] ॥ ५१ ॥

मुक्तेति । [illegible]

चन्द्राकृतीनि गजमण्डलिकाभिरुच्चै-
र्नीलाभ्रपङ्क्तिपरिवेशमिवाधिजग्मुः ॥५२॥

गत्वूनमार्गगतयोऽपि गतोरुमार्गाः
स्वैरं समाचकृषिरे भुवि वेल्लनाय ।
दर्पोदयोल्लसितफेनजलानुसार
संलक्ष्यपल्ययनवर्ध्रपदास्तुरङ्गाः ॥ ५३ ॥

वेश्मानि दूष्याणि । निरन्तराभिर्नीरन्ध्राभिः उच्चैर्गजमण्डलिकाभिर्गजपरिधिभिः । स्वार्थे कप्रत्ययः कात्पूर्वस्येकारः । नीलाभ्रपङ्क्तिपरिवेशं परिधिमधिजग्मुरिवेति यावत् । परिवेशस्तु परिधिरित्यमरः । अधिजग्मुरित्युत्प्रेक्षा ॥ ५२ ॥

गत्वूनेति । गत्वूनाः शिक्षागमनहीना मार्गा गतयोऽश्वगमनानि येषां ते तथापि गतोरुमार्गाः प्रस्थितदूराध्वान इति विरोधः । अपि विरोधे गत्वूना मार्गा स्वगत्यभिन्ना गतिर्येषां ते इति विरोधपरिहारः । अतएव विरोधाभासोऽलङ्कारः । दर्पस्य तेजसोऽन्तःसारस्योदयेनौत्कर्षेणोल्लसितस्योद्गतस्य फेनजलस्य फेनीभूतोद्गतस्वेदोदकस्यानुसारेण संलक्ष्याणि पल्ययनवर्ध्राणां पल्ययनबन्धचर्मवरत्राणां पदानि तन्नोदनचिह्नीभूतस्थानानि येषां ते तथोक्ताः । तुरङ्गाः भुवि वेल्लनायाङ्गपरिवर्त्तनाय स्वैरं मन्दं समाचकृषिरे समाकृष्टाः श्रमश्रमापनोदनार्थमिति भावः । वर्द्धते छेदनमार्द्रीभवतीति वर्ध्रं वृधिवपिभ्यां रन्नित्यौणादिके रन्प्रत्यये लघूपधगुणे रपरः । वर्ध्रं लघुवरत्रयोरिति विश्वः । अमरस्तु नध्री वर्ध्री वरत्रा स्यादित्याह । तदा ष्ट्रन्नित्यौणादिके ष्ट्रन्प्रत्यये पूर्ववत् गुणे रपरः प्रत्ययतकारस्य झषस्तथोर्धोऽध इति धत्वे षित्वात् स्त्रीलिङ्गे ङीप् ॥ ५२ ॥

आजिघ्रति प्रणतमूर्द्धनि वाह्लिजेऽश्वे
तस्याङ्गसङ्गमसुखानुभवोत्सुकायाः ।
नासाविरोकपवनोल्लसितं तनीयो
रोमाञ्चतामिव जगाम रजः पृथिव्याः ॥५४॥
हेम्नः स्थलीषु परितः परिवृत्य वाजी
धुन्वन्वपुः प्रविततायतकेशपङ्क्तिः ।

आजिघ्रतीति । वाह्लिर्देशविशेषः तज्जे वाह्लिजेऽश्वे वाह्लिदेश्ये इति पाठे विशेष्याप्रयोगोऽश्वसामान्यादित्युक्तम् । पाघ्रादि घ्रो जिघ्रति भावार्थे शतृप्रत्ययः । तदन्तविधिस्तु स्पष्टः । प्रणतमूर्द्धनि नम्रशिरसि कृतचण्डादि च आजिघ्रति गन्धं गृह्णाति चुम्बति च सति स्वभावात्कामात्रेति भावः । नासाविरोकं नासारन्ध्रं तस्य पवनो निःश्वासः तेनोल्लसितमुत्थितं तनीयोऽल्पतरं रजस्तस्याश्वस्याङ्गसङ्गमेन वेष्टनप्रयुक्तेन यत्सुखं तस्यानुभवे उत्सुकायाः उत्कण्ठितायाः पृथिव्याः रोमाञ्चतां जगामेवेत्युत्प्रेक्षा । सा च भूतरजसोः प्रतीयमानेन नासाग्रभेदाध्यवसायादित्यवधेयम् । विरोचतेऽनेनेति विरोकम् । घञ्प्रत्ययः. चजोः कु घिण्ण्यतोरिति कुत्वं लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति नपुंसकत्वाविरोधः । अतएव छिद्रं निर्व्यथनं रोकबिलम् । रोकोऽस्त्री छिद्रे न पुंसि वैजयन्ती । रोको दीप्तौ छिद्रे रोकमिति दिक् । ये तु केनाप्यभिप्रायेण विरोकपवनेति पठन्ति तेषामपरोक्षमौकलीविकासमिति यद्यपि [illegible] रोमाञ्चो दोषः [illegible] इत्यलम् ॥ ५४ ॥

हेम्न इति । हेम्नः स्थलीषु अकृत्रिमभूमिषु । जानपदेत्यादिना अकृत्रिमार्थे ङीप्प्रत्ययः । परितः परिवृत्य परिवृत्त्य त्वरया वपुर्धुन्वन् धुनिर्विकम्पनम् प्रविततायता प्रविस्तृता आयता च केशपङ्क्ति-

रेजे जनैः स्नपनसान्द्रतरार्द्रमूर्त्ति-
र्देवैरिवानिमिषदृष्टिभिरीक्ष्यमाणः ।
आसन्निधानरमणीयतरोऽश्वयूना-
मुच्चैःश्रवा जलनिधेरिव जातमात्रः ॥ ५७ ॥
अश्रावि भूमिपतिभिः क्षणवीतनिद्रै-
रश्वः पुरो हरितकं मुदमादधानः ।

ग्रीवाग्रलोलकलकिङ्किणिकानिनाद-
मिश्रं दधद्दशनचुर्चुरशब्दमश्वः ॥ ५८ ॥
उत्खाय दर्पचलितेन सहैव रज्ज्वा
कीलं प्रयत्नपरमानवदुर्ग्रहेण ।
आकुल्यकारि कटकस्तुरगेण तूर्ण-
मश्वेति विद्रुतमनुद्रवताश्वमन्यम् ॥ ५९ ॥
अव्याकुलं प्रकृतमुत्तरधेयकर्म
धाराः प्रसाधयितुमव्यतिकीर्णरूपाः ।

दधाति सुतः अश्वस्य शब्दोऽस्यास्तीत्ययं । ग्रीवा. चुचुरो भेदः; चुचुर
इत्यादिवत् शब्दधर्मः परिस्फुरत्यर्थेन । स्वभावोक्तिरलङ्कारः ॥ ५८ ॥

उत्खायेति । दर्पाद्वलितेनोल्लसितेन अतएव रज्ज्वा पाशेन सह
कीलं शङ्कुम् । शङ्कुरपि द्वयोः कीलेत्यमरः । उत्खाय उत्पाट्य तूर्णं
विद्रुतमश्वान्तरं अन्यमश्वं अश्वेत्यनुद्रवता पश्चैति धान्यानुधावता प्रयत्न-
परैः ग्रहीतुमुद्यतमानैरपि मानवैर्दुर्ग्रहेण तुरङ्गेण कटकः शिबि-
रमाकुल्यकारि आकुलीकृतः । [illegible] भूततद्भावे च्वि अत
आकुलीकारः । करोतेः कर्मणि लुङि चिण्णेलुक् ॥ ५९ ॥

अव्याकुलमिति । [illegible] मा [illegible] भेदेन पञ्च
विधाः । प्रकृतं प्रस्तावितम् । [illegible] विविधा [illegible]
[illegible] [illegible] [illegible] विभक्ता तथा ।
[illegible] [illegible] [illegible]
[illegible] [illegible] [illegible]
[illegible] । [illegible]
[illegible]

मुक्तास्तृणानि परितः कटकं चरन्त
स्तुष्यद्वितानतनिकाव्यतिषङ्गभाजः ।
सस्नुः सरोषपरिचारकवार्यमाणा
दामाञ्चलस्खलितलोलपदं तुरङ्गाः ॥६१॥
उत्तीर्णभारलघुनाप्यलघूलपौघ
सौहित्यनिःसहतरेण तरोरधस्तात् ।

रथ्ये नित्यं वल्गयायां सुदं भजेदिति । अन्ये तु उरसाख्यादयो गतिवि-
शेषा वीथ्य इत्याहुः । उरसाशीघ्रत्वाभ्री पृथुलो मध्यगामकः । आवीदः
शोभनैरङ्गैः प्रख्यातोऽस्तथापरः । उपधेनश्चक्रं च पादचाली च सर्वगाः ।
निर्दिष्टा वीथयस्तेता इति ॥ ६० ॥

मुक्ता इति । मुक्ताविहारार्थमुत्सृष्टा अतएव कटकं शिबिरम्परितः
अभितः परित इत्यादिना द्वितीया । तृणानि चरन्तो भक्षयन्तः तुष्य-
न्तीषु क्षिप्तासु वितानतनिकासु पटमण्डपरज्जुषु व्यतिषङ्गं सङ्गम्भज-
न्तीति तथोक्ताः । अतएव सरोषैः परिचारकैः किङ्करैर्वार्यमाणाः
अपसार्यमाणाः, तुरगादामाञ्चलेषु निपादपाशाः । दामाञ्चलम्पादपाश
इति वैजयन्ती । तुरगपल्ययनग्रहणम् इति केचित् । तेषु स्खलितेन
लोलानि पदानि यस्मिन् कर्मणि तद्यथा तथा प्रसुस्रुवुः ॥ ६१ ॥

उत्तीर्णेति । उत्तीर्णभारमारोपितभारं अतएव लघुः तेन तथो-
क्तेन तथाप्यलघुना उलपानां बल्वजतृणानां ओघेन यत्सौहित्यम्पूर्त्तिः ।
पर्याप्तिमुपसम्पत्सम्पूर्त्तिः सौहित्यमुच्यते इति हलायुधः । तेन निःसहत-
रेणात्यन्तमसहतरेण भाराभावतारेऽप्यनतरगुरुभोजनाद्गुरुत्व भवते-
त्यर्थः । सहेः निःपूर्वात् पचाद्यच्प्रत्ययः परम् प्रत्ययः । उलपा बल्वजाः
प्रोक्ता इति विश्वः । औपचेण उष्णां तपूर्वेण । गोत्रोच्चेत्यादिना इञ्
प्रत्ययः । तरोरधस्तात्तरस्तले रोमन्थः पयूषाद्युद्गीर्णचर्वणेन अभ्यवहृतस्य

रोमन्थमन्थरचलद्गुरुसास्नमासां
चक्रे निमीलदलसेक्षणमौक्षकेण ॥६२॥
सत्पिण्डशैखरितकोटिभिरर्द्धचन्द्रं
शृङ्गैः शिखाग्रगतलक्ष्ममलं हसद्भिः ।
उच्छृङ्गिताभ्युदयभाः सरितां नदन्तो
रोधांसि धीरमवचस्करिरे महोक्षाः ॥ ६३ ॥
मेदस्विनः सरभसोपगतानभीकान्
भङ्क्त्वा परानऩडुहो मुहुराहवेन ।

रोमन्थो गुर्णैः खाद्यागतमभ्यवहृतानि यस्मिन् कर्मणि तद्यथा । सास्ना तु गलकम्बल इत्यमरः । किञ्च निमीलन्ति दृष्टान्यलसानि ईक्षणानि यस्मिन् कर्मणि तत् यथा तथा आसाञ्चक्रे आसितम् । आस उपवेशने भावे लिट् । दयादास्येत्यामप्रत्ययः । कृञ्चानुप्रयुज्यते लिटीति कृञोऽनुप्रयोगः । एतः प्रश्नव्याजत्वात् स्वभावोक्तिः ॥ ६२ ॥

सत्पिण्डेति । सत्पिण्डैर्वप्रक्रीडासक्तैर्मृत्स्नाभिः शेखरिताः सञ्जातशेखराः कोटयोऽग्राणि येषां तैरत एव शिखाग्रगतलक्ष्मकैर्वोद्गलितं मृदैव मलं यस्य स एतादृशं तं चेतमर्द्धचन्द्रं शृङ्गैर्हसद्भिरिवेति भावः । आमूर्द्धमेति भतान्तरम् । शृङ्गैर्विभासैरुच्छृङ्गितशृङ्गाः तथा उच्छृङ्गिताः अभ्युदयभाः प्रतिद्वन्द्वभावेनेव अतएव धीरकमीरं नदन्तो गम्भीरनादाः महान्तं उक्षाणो महोक्षाः । अचतुरेत्यादिना निपातात् साधुः । सरितां रोधांसि अवचस्करिरे चाविलिखुः शृङ्गैरुल्लिखितवन्तः । अपाच्चतुष्पाच्छकुनिष्वालेखन इति किरतेः सुडागमः । विलेखनार्थत्वादयम् । अन्याय्यमार्गमिव एतैः अवकिरतीति तृनायामतः ॥ ६३ ॥

ऊर्जस्वलेन सुरभीरनु निःसपत्नं

जग्मे जयोद्धुरविशालविषाणमुक्ष्णा ॥ ६४ ॥

शिश्राणमायतिमतीमकृशां शिरोधिं

प्रत्यग्रतामतिरसामधिकं दधन्ति ।

लोलौष्ठमौष्ट्रकमुदग्रमुखं तरूणा

मभ्रंलिहानि लिलिहे नवपल्लवानि ॥ ६५ ॥

मेदस्विन इति । ऊर्जोऽस्यास्तीति तेन ऊर्जस्वलेन बलिना । ज्योत्स्नातमिस्रेत्यादिना निपातः । उक्ष्णा वृषभेण मेदस्विनो मांसलान् अस्मायामेधास्रजो विनिः । अतएव सरभसं सत्वरमुपगतान् अभिकामयन्त इत्यभीकान् कामुकान् । कम्रः कामयिताभीक इत्यमरः । अनुकाभिकाभीकः कमितेति निपातः । परान् महोक्षो बलीवर्दान् कुलजान्वेन युद्धेन भङ्क्त्वा निर्जित्य जयेनोद्धुरं निर्वृते । ऋक्पूरित्यादिना समासान्तः । विशाले च विषाणे यस्मिन् कर्मणि तद्यथा तथा निःसपत्नप्रतिपक्षं सुरभीरनु गवी इत्यतः । कर्मप्रवचनीययुक्ते द्वितीया । जग्मे गतम् । भावे लिट् ॥ ६४ ॥

शिश्राणमिति । आयतिमतीं दैर्घ्यवतीं न च कृशा दैर्घ्यमित्याह । अकृशेति । उच्चैस्तरपल्लवपङ्क्त्याक्रमणक्षमामित्यर्थः । शिरो धीयतेऽस्यामिति शिरोधिं ग्रीवाम् । शिरोधिः कन्धरेत्यपीत्यमरः । कर्मण्यधिकरणे चेति किप्रत्ययः । शिश्राणन्धानं उदग्रमुखं पल्लवपङ्क्त्यर्थमूर्ध्वीकृतं विप्रलम्बलोष्ठमौष्ट्रकमुष्ट्रसमूहः । गोत्रोक्षेत्यादिना वुञ् । अतिशयितो रसः स्वादो येषां तेषामतिरसामल्पतामभिनवत्वं दधन्ति दधति । नाभ्यस्ताच्छतुरिति वैकल्पिको नुमागमः । अभ्रं लिहन्तीत्यभ्रंलिहान्युन्नतानि । वहाभ्रे लिह इति खश् प्रत्ययः अरुर्द्विषदित्यादिना मुमागमः । तरूणां नवपल्लवानि । पल्लवोऽस्त्री किसलयमित्यमरः । लो-

सार्द्धं कथञ्चिदुचितैः पिचुमर्दपत्रै
रास्यान्तरालगतमाम्रदलं त्वदीयः ।
दासेरकः सपदि संवलितं निषादै
र्विप्रं पुरा पतगराडिव निर्ज्जगार ॥ ६६॥

स्पष्टं बहिः स्थितवतेऽपि निवेदयन्त
श्चेष्टाविशेषमनुजीविजनाय राज्ञाम् ।
वैतालिकाः स्फुटपदप्रकटार्थमुच्चै
र्भोगावलीः कलगिरोऽवसरेषु पेठुः ॥ ६७ ॥

चौष्ठ यथा तथा ओतोष्ठयोः समासे वेति पररूपं वक्तव्यम् । त्रिविष्टे ध्वासाटयामास जघानेत्यर्थः ॥ ६५ ॥

सार्द्धमिति । उचितैरभ्यस्तैः । अभ्यस्तेऽप्युचितं न्याय्यमिति यादवः । पिचुमर्दपत्रैर्निम्बदलैः सार्द्धम् । पिचुमर्दश्च निम्ब इत्यमरः । कथञ्चित्प्रमादादास्यान्तरालगतं मुखान्तर्गतं त्वदीयो मृदुतरमाम्रपल्लवं दासेरकः उष्ट्रः पुरा निषादैः म्लेच्छैः संवलितं विप्रम्पतगराट् गरुत्मानिव निर्ज्जगार उद्गीर्णवान् । पुरा किल क्षुधितः(?) कारणात् म्लेच्छभक्षणे तैः सहान्तः प्रविष्टं गलन्दहन्तं विप्रवरमुज्जगारेति पौराणिकी कथानुसन्धेया ॥ ६६ ॥

स्पष्टमिति । बहिःस्थितवतेऽपि अनुजीविजनाय राज्ञोऽन्तरकाङ्क्षिण इति भावः । राज्ञां चेष्टाविशेषमन्तःकालोचितपरिचर्याविशेषं स्पष्टं निवेदयन्तः तदुपलक्षणप्रबन्धपाठैरिति भावः । कलगिरो मधुरवाचो वैतालिका मङ्गलपाठकाः अवसरेषु तत्तद्वेलासु स्फुटैः प्रसिद्धैः पदैः प्रकटः प्रकाशोऽर्थोऽभिधेयं यस्मिन् कर्मणि तद्यथा तथा उच्चैः भोगावलीः

उन्नम्रताम्रपटमण्डपमण्डितन्त
दानीलनागकुलसङ्कुलमाबभासे ।
सन्ध्यांशुभिन्नघनकर्वुरितान्तरीक्ष
लक्ष्मीविडम्बि शिबिरं शिवकीर्त्तनस्य ॥६८॥

धरस्योद्धर्त्तासि त्वमिति ननु सर्व्वत्र जगति
प्रतीतस्तत्किं मामतिभरमधः प्रापिपयिषुः ।
उपालब्धेवोच्चैर्गिरिपतिरिति श्रीपतिमसौ

प्रबन्धान् येतुः पतन्ति च । अत एव कृत् मध्ये नारेपारैर्विटीत्ये साध्या-
वलोपौ ॥ ६७ ॥

उन्नम्रेति । उन्नम्रैरुन्नतैस्ताम्रैः ताम्रवर्णैः पटमण्डपैर्दूष्यैर्मण्डित
आनीलनीलैर्नागकुलैर्गजकुलैः सङ्कुलं अतएव सन्ध्यांशुभिन्नैः सन्ध्या-
रागसम्मिश्रैर्घनैर्मेघैः कर्व्वुरितस्य चित्रीकृतस्यान्तरीक्षस्य लक्ष्मीं विडम्ब-
यत्यनुकरोतीति तथोक्तं शिवकीर्त्तनस्य मङ्गलकीर्त्तेः कृष्णस्य शिवि-
रिर्द्धकमावभासे बभौ अभूदित्यर्थः । उपमालङ्कारः ॥ ६८ ॥

धरस्येति । असौ रैवतको गिरिपतिः ... निर्झर-
मार्गैर्दिरदैर्मदिताभ्यागतौ ... रवैः ... श्रीपतिं हरिम् । धरस्य पर्वतस्योद्धर्त्ता उद्धारकोऽसीति सर्वत्र
जगति प्रतीतः प्रसिद्धः गोवर्द्धनोद्धरणादिति भावः । तत्किं किं-
मर्थं अतिभरमतिभारवन्तं मामधः प्रापिपयिषुः प्रापयितुमिच्छुरसि ।
प्रापयतेः सन्नन्तादुप्रत्ययः । ... इव ...
उपालब्धवानिवेत्युत्प्रेक्षा ...
..... भलागः शिखरिणी ... । शिखरिणी वृत्तम् ।

बलाक्रान्तः क्रोडैर्द्विरदमथितोर्वीरुहरवैः॥६९॥

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये
पञ्चमः सर्गः ॥ ५॥

रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणीति लक्षणात् ॥ ६९ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघकाव्यव्याख्याने सर्वङ्कषाख्ये पञ्चमः सर्गः ॥ ५ ॥

षष्ठः सर्गः।

अथ रिरंसुममुं युगपद्गिरौ
कृत यथास्वतरुप्रसवश्रिया।
ऋतुगणेन निषेवितुमादधे
भुवि पदं विपदन्तकृतं सताम्॥ १॥
नवपलाशपलाशवनं पुरः
स्फुटपरागपरागतपङ्कजम्।

अथ ऋतुवर्णनमारभते। अथेति। अथ सेनानिवेशानन्तरं गिरौ रैवतके रिरंसुं रन्तुमिच्छुम्। रमेः सन्नन्तादुप्रत्ययः। एतेन ऋतुवर्णनप्रसक्तेः प्रभुचित्तवृत्तिज्ञानपूर्वकत्वमुक्तम्। सतां साधूनां विपदामन्तं करोतीति विपदन्तकृत्। क्विप्। न विपदन्तकृतं सेव्यमिति भावः। अमुं हरिं निषेवितुं स्वतरून् स्वस्वनियतक्रमान् अनतिक्रम्य यथास्वतरु। यथार्थे ऽव्ययीभावः। यथास्वतरुस्थिता प्रसवश्रीः पुष्पफलसम्पत्तिः यथास्वतरुप्रसवश्रीः। प्रसवस्तु फले पुष्पे इत्यमरः। शाकपार्थिवादित्वात् समासः। सा कृता येन तेन कृतयथास्वतरुप्रसवश्रिया यथास्वतरुकृतप्रसवश्रियेत्यर्थः। ऋतुगणेन युगपद्भुवि पदमादधे धारितं युगपदृतुगणः प्रादुरभूदित्यर्थः। महान्तरं सेवकाः क्षिपन्तीति भावः। अत्र सर्गे सर्वत्र यमकालङ्कारः। तल्लक्षणं तत्र तत्रैव। अर्थालङ्कारस्तु यथासम्भवमूह्यः। अस्मिन् सर्गे द्रुतविलम्बितं वृत्तम्। द्रुतविलम्बितमाह नभौ भराविति लक्षणात्॥ १॥

अत्र वोक्तभेदयोः प्राधान्येन व्यवहारात् वसन्तमादौ वर्णयति।

मृदुलतान्तलतान्तमलोकय
त्स सुरभिं सुरभिं सुमनोभरैः ॥ २ ॥
विलुलितालकसंहतिरामृषन्
मृगदृशां श्रमवारि ललाटजम् ।
तनुतरङ्गततिं सरसां दल
त्कुवलयं वलयन्मरुदाववौ ॥ ३ ॥
तुलयति स्म विलोचनतारकाः
कुरवकस्तवकव्यतिषङ्गिणि ।

स्फुटेति । स हरिः पुरोऽग्रे प्रथमं वा नवपलाशानि नूतनपर्णानि पलाश-वनानि किंशुककाननानि यस्मिंस्तं नवपलाशपलाशवनम् । बहुव्रीहि-गर्भो बहुव्रीहिः । पलाशं किंशुके पर्णे पलाशं चेति विश्वः । स्फुटानि विकचानि परागैः रजोभिः परागतानि व्याप्तानि पङ्कजानि यस्मिंस्तं स्फुटपरागपरागतपङ्कजं मृदुलाः कोमलाः अतएव तान्ताः आतपसम्पर्के किञ्चित् म्लानाः लतान्ताः पल्लवा यस्मिंस्तं मृदुलतान्त-लतान्तं सुमनोभरैः पुष्पसमृद्धिभिः सुरभिं सुगन्धिं सुरभिं वसन्तमलोकयद-पश्यत् । सुरभिश्चम्पके स्वर्णे जातीफलवसन्तयोः । सुगन्धौ च मनोज्ञे च वाच्यवदिति विश्वः । द्रुतविलम्बितं वृत्तम् ... पादेऽपि तदेव यमकम् । एतच्छ्लोकादपुष्पं मति-प्रशंसीय संसृष्टिः ॥ २ ॥

विलुलितेति । विलुलितालकसंहतिर्विधुतचिकुरनिकरः मरुत् मृग-दृशां ललाटजं श्रमवारि स्वेदमामृषन् परिमृजन् इति भावः । सरसां सरसीनां तनुतरङ्गततिं दलन्ति विकसन्ति कुवलयानि यस्मिन् कर्म तत् तथा वलयन् चालयन् मौल्यं इति भावः । मन्दसुगन्धशीतलत्वं मा-रुतस्य च ॥ ३ ॥

प्रियतमाय वपुर्गुरुमत्सर
च्छिदुरयादुरयाचितमङ्गना ॥ ८ ॥
मधुकरैरपवादकरैरिव
स्मृतिभुव, पथिका हरिणा इव ।
कलतया वचस: परिवादिनी
स्वरजिता रजितावशमाययु: ॥ ९ ॥
समभिसृत्य रसादवलम्बित:
प्रमदया कुसुमावचिचीषया ।

द्रुमदुरपयामास । दद्रातेर्णुङि णौ तिस्थेत्यादिना मिचोलुक् । कोकिला कूजितश्रवणानन्तरमेवाङ्गार्पणात् दौत्यस्य हेतुकार्यान्तरङ्गत्वात्तया किमपि बोधिता इत्युत्प्रेक्षा ॥ ८ ॥

मधुकरैरिति । मधुकरैः कर्तृभिः अपवादः मृगवञ्चनाय घण्टादि-कूजितशब्दः कुर्वन्तीत्यपवादकराः व्याधास्तैरिव पथिकाः हरिणा इव परिवादिनीस्वरजिता वीणाविशेषध्वनिजयिन्या । सप्तभिः परिवादिनी इत्यमरः । 'जे' क्विपि तुक् । वचसो गीतस्य कलतया माधुर्येण करणेन रजिता वशीकृताः सन्तः । रञ्जेरण्यन्तात्कर्मणि क्तः रञ्जेर्णौ मृग-रमणे इति उपधानकारलोपः । इहोपमानमृगसादृश्यादौपचारिक मृगत्वं उपमेयेषु पथिकेष्वस्तीत्यविरोधः स्मृतिभुवः स्मरस्य मृगयार्तचिन्ता विषयत्वात् मृगयाव्याधस्य देशस्य च वशमाययुः यथा व्याधगाना सक्ता गर्ते मृगा पतन्ति तद्वन्मधुकरझङ्कारालापा मान्या स्मर पारवश्य मीयुरित्यर्थः । अनेकेवयमुपमा ॥ ९ ॥

समभिसृत्येति । प्रमदया कान्त्या कुसुमानामवचिचीषयावचेतुमि-

न्यविनमन्न रराज वृथोच्चकै
रनृतया नृतया वनपादपः ॥ १० ॥
इदमपास्य विरागि परागिणी
रलिकदम्बकमम्बुरुहान्ततीः ।
स्तनभरेण जितस्तवकानम
न्नवलते वलतेऽभिमुखं तव ॥ ११ ॥
सुरभिनिश्वसिते दधतस्तृषं
नवसुधामधुरे च तवाधरे ।

नृतया रिरमयेति भावः । विनीते यङन्तादप्रत्ययादिति स्त्रियामकार प्रत्ययः विभाषार्थेरिति विकल्पात् यत्वाभावः । रसात्रागात्कमभिकृत्य समागमार्थमभिवितो हस्तेन गृहीतकाया न्यविनमत् यमनमगच्छत् अतएव वृथो च्चकैर्व्यर्थमुन्नतो वनपादपः न तु नागरिक इति भावः न रराज अनृतया न सत्या तया कृत्रिमे नृता तया नृतया पुम्बिन रराज । स्तुतमाह पल्लवजना पुरुषाः पूरुषाधर इत्यमर । द कान्ताकरस्पर्शोऽपि न द्रवति न मृदु भव इव यौक्तिकस्तु पुम्व्यपदेशो मिथ्यैवति भावः ॥ १० ॥

अथ कर्णिकारद्राक्षेप्सुनार्थमिदानीं भीष्मम् विमि युग्मेनाह । इदमित्यादि । स्तनभरेण मानवेन जिताभ्यां स्तवकाभ्यामानमन्तीः नम्रता यदा या तयोक्ता तस्याः अम्बुरुहान्ततीः अत्यन्तमनवलते अवलोकनपमे इत्यर्थः । अतएवेद विरागि विरक्तपद्मिकदम्बक परागिणीः परागवतीरिति विकल्पेनेषु अम्बुरुहान्ततीरपास्य तवाभिमुख वलते कर्मणि विविधरसान्वयादिति भावः । तदा च मन्मिमदतुरो दश्यते ॥ ११ ॥

अलमलेरिव गन्धरसावमू
मम न सौमनसौ मनसो मुदे ॥ १२ ॥
इति गदन्तमनन्तरमङ्गना
भुजयुगोन्नमनोच्चतरस्तनी ।
प्रणयिनं रभसादुदरश्रिया
वलिभयालिभयादिव सस्वजे ॥ १३ ॥

अथ,केस्तदभिमुखागमने कारणमाह । सुरभीति । तव सुरभि निश्वसि-ते निश्वासमारुते नवसुधावन्मधुरे अधरे च तृषं तृष्णामन्वयतोदधानस्यालेर्भ्रम-रस्य ममैताम् उपलभ्यमानौ सुमनसां पुष्पाणां सम्बन्धिनौ सौमनसौ गन्ध-रसौ सौरभमाधुर्ये मनसोऽन्तःकरणस्य मुदे नाल न पर्याप्तौ अतस्तवद-नरसगन्धलोभादागच्छतीत्यर्थः । नमः स्वस्तीत्यादिना चतुर्थी । अत्र का-न्तावक्त्र स्वयमुपासेवमुखार्थिन, प्रियस्य तद्वयहेतोरदैवागमनहेतुत्वेनाभि-हितत्वेन सुखसौरभरसलोभस्य सुमनःसौरभ्ययोर्वैधर्म्यमौचित्यादायक तुषा-रेण विप्रकर्षेणापि ममभर्तुर्नैवमदस्साम्यम् इत्यतोऽभिमुखस्तव अलिभया-दिव सस्वज इत्युत्प्रेक्षणोपमाद्वाराभ्यामपि प्रकृतत्वेनोपमेयत्वावगमात् । अन्यथा मध्ये तद्वैपरीत्ये तद्विरोधादित्यलमतिप्रसङ्गेनाप्रमागर्त्येण अलो-पमानुप्रासयमकानामन्यायविजातीयानां संसृष्टिः सैव तथा यमकानां त्वयाया चतुर्थपादादा वैकपादगतत्वात् द्वाभ्यामन्योन्यमपि परतोऽन्यत्र-याऽशक्तिलक्षणानां स्थितत्वात् सजातीयसंसृष्टिरेषा ॥ १२ ॥

इतीति । इतीत्थङ्गदन्तं प्रणयिनं अनन्तरं भुजयुगस्योन्नमनेनोच्च-तरावत्युन्नतौ स्तनौ यस्याः सा । स्वाङ्गाच्चोपसर्जनादसंयोगोपधादिति ङीप् । वलिभया वलयो विद्यन्ते यस्यास्तया वलिमत्या । तुन्दिवलि-वटेर्भ इति भप्रत्ययः । उदरश्रिया मध्यशोभया उपलक्षिता अङ्गना अलिभयादिव रभसात्सस्वजे आलिलिङ्ग । वस्तुतस्तु रागादेवेति भावः ।

वदनसौरभलोभपरिभ्रम
द्भ्रमरसम्भ्रमसम्भृतशोभया ।
चलितया विदधे कलमेखला
कलकलोऽलकलोलदृशान्यया ॥ १४ ॥
अजगणन् गणशः प्रियमग्रतः
प्रणतमप्यभिमानितया न याः । .

षञ्ज परिष्वङ्गे इति धातोः कर्तरि लिट् । लज्जामन्दमध्यस्था मध्येयं नायिका उक्ता ॥ १२ ॥

वदनेति । वदनस्य सौरभे सौगन्ध्ये लोभेन परिभ्रमता भ्रमरेण हेतुना यः सम्भ्रमस्तेन संभृतशोभया सम्पादितश्रिया चलितया अलिसम्भ्रमात् प्रस्थितया चलदलकलोलकर्णपातदृष्टया अङ्गनाख्या अन्यया अङ्गनया कलो मेखलायाः कलकलः कोलाहलो विदधे विहितः अलिभया-त्प्रसरन्त्याः काञ्चीगुणध्वनिरजनीत्यर्थः । एतेन चकितत्वमुक्तम् । चकितं भयसंभ्रम । अनुप्रासयमकयोः सजातीयशब्दालङ्कारयोः संसृष्टिः अद्वैत तावत् तया यमकयोश्च द्वयोः सजातीययोः चतुर्थपादादावेकत्रा-दपरात् द्वाभ्यां च परतोऽपरत्र व्यवस्थितत्वात् स्थितत्वात् संसृष्टिः ॥ १३ ॥

अजगणन्निति । याः कुकुरस्त्रियो यादवाङ्गनाः गणशो बहुशः । बह्वल्पार्थाच्छस् कारकादन्यतरस्यामिति शस् प्रत्ययः । अग्रतः प्रणतमपि प्रियं प्रणामैकशरणं प्रियानित्यर्थः । अभिमानिनो भावोऽभिमानिता तया । त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः । नाजगणन्नगणयन् च । गणेश्चौरादिकाल्लुङि चङि ई च गण इत्यभ्यासस्य चकारादीत्वाभावः । ताः कुकुरस्त्रियो मधौ वसन्ते इति प्रकर्षार्थे । मधुश्चैत्रे वसन्ते चेति विश्वः । मदनमधाविभुरंता ऋतुपतिः सदः भुवि अपोनिवर्तन

सति मधावभवन्मदनव्यथा
विधुरिताधुरि ताः कुकुरस्त्रियः ॥ १५ ॥
कुसुमकार्मुककार्मुकसंहित
द्रुतशिलीमुखखण्डितविग्रहाः ।
मरणमप्यपराः प्रतिपेदिरे
किमु मुहुर्मुहुर्गतभर्तृकाः ॥ १६ ॥
रुरुदिषा वदनाम्बुरुहश्रियः
सुतनु ! सत्यमलङ्करणाय ते ।
तदपि सम्प्रति सन्निहिते मधा
वधिगमं धिगमङ्गलमश्रुणः ॥ १७ ॥

स्वयमेव पुरः मङ्क्षु इत्यर्थः ॥ १५ ॥

कुसुमेति । गतभर्तृकाः वियोगिन्यः नद्यृतश्चेति कप् । अपराः काश्चिदङ्गनाः कुसुमकार्मुकस्य कामस्य कार्मुके संहितैः द्रुतं क्षिप्रैः शिलीमुखैः शरैः खण्डितविग्रहाः पातितशरीराः सद्योमरणमपि प्रतिपेदिरे मुहुः पुनः पुनः मुमुहुर्मूर्छुरिति किमु वक्तव्यमित्यर्थः । १६ ॥

अथ कस्याश्चित् प्रोषितभर्तृकायाः सख्युक्तमश्रुमार्जनं विरोधेनाह । रुरुदिषेति । हे सुतनु ! सुभ्रु ! स्वार्थे नद्योर्ह्रस्व इति ह्रस्वत्वं दीर्घेतरपदो बहुव्रीहिः अन्यथा सुष्ठु स्यात् । रुरुदिषा रोदनेच्छा स्वविलोचनमित्यर्थः । रुदः सन्नन्तादप्रत्यये टाप् । ते तव वदनाम्बुरुहश्रियः अलङ्करणाय सत्यं रम्याणां विकृतिरपि श्रियमाधोतीति न्यायादिति भावः । गम्यमानक्रियापेक्षयाश्चतुर्थी । तदपि तथापि सम्प्रति मधौ वसन्ते सन्निहिते सन्निहितोत्सवे सति अश्रुणोऽधिगममाप्तिम-

त्यजति कष्टमसावचिरादसून्
विरहवेदनयेत्यघशङ्किभिः ।
प्रियतया गदितास्त्वयि वान्धवै
रवितथावितथाः सखि मा गिरः ॥ १८ ॥
न खलु दूरगतोऽप्यतिवर्त्तते
महमसाविति वन्धुतयोदितैः ।

कृतं धिक् । धिङ्निर्भर्त्सननिन्दयोरित्यमरः । धिगुपर्यादिषु त्रिष्विति द्वितीया । अतो मा रम इत्यर्थः ॥ १७ ॥

त्यजतीति । प्रियतया इष्टतया अघशङ्किभिरनिष्टोत्प्रेक्षिभिः । प्रेम पश्यति भयान्यपदेऽपीति भावः । बान्धवैस्त्वयि विषये गदिताः उदाहृताः कष्टं बत असौ बाला विरहवेदनया अचिरादसून् प्राणांस्त्यजति त्यक्ष्यति । वर्त्तमानसामीप्ये वर्त्तमानवद्वेति लट् । इत्येवंविधा गिर उक्तीः हे सखि ! वितथत्वात् यथार्थाः वितथा अनृताः । वितथं त्वनृतं वच इत्यमरः । नञ्समासो विशेष्य लिङ्गता माङ्घ्यादित्वात्पुंवत् ततो नञ्समासः । अवितथाः सत्याः मा वितथा मा कृथाः इत्यति-मौनेन मा कृथा इत्यर्थः । सिद्धाप्रयोगीतिर्नुडि यासुट् तनादिभ्यस्तथा-सोरिति सिचो लुक् अनुदात्तोपदेशेत्यादिनानुनासिकलोपः न माङ्योगे इत्यडागमप्रतिषेधः ॥ १८ ॥

नेति । किञ्चासौ ते प्रणयी दूरगतो दूरस्थोऽपि मत्तं हृदनो-त्सवम् । मह उद्धव उत्सव इत्यमरः । नातिवर्त्तते नातिक्रामति सम्, इति बन्धुतया बन्धुसमूहेन । ग्रामजनबन्धुसहायेभ्यस्तल् इति तल्प्रत्ययः । उदितैः उक्तैः । वदेः कर्मणि क्तः । यजादित्वात् सम्प्रसारणम् । वचनैः । कल्याणं हृदयं विदयन्ति मुधा । अत्र व्यङ्ग्यं इति गोरादिकान् स्यन्

प्रणयिनोनिशमय्य वधूर्वहिः
स्वरमृतैरमृतैरिव निर्ववौ ॥ १९ ॥

[विशेषकम्]

मधुरया मधुबोधितमाधवी
मधुसमृद्धिसमेधितमेधया ।
मधुकराङ्गनया मुहुरुन्मद
ध्वनिभृता निभृताक्षरमुज्जगे ॥ २० ॥
अरुणिताखिलशैलवना मुहु
र्विदधती पथिकान् परितापिनः ।

मित्त्वान्ह्रस्वः ल्यपि लघुपूर्वादित्ययादेश । वधूरमृतैः सुधाभिरिव नि- र्ववौ निर्ववार । वातेर्लिट् । निर्वाणं निर्वृतिः सुखमिति ॥ १९ ॥

मधुरयेति । मधुरया मनोहरया मधुना वसन्तेन बोधिता विका- सिताश्च ता माधव्यश्च । पुष्पधर्मं पुष्पितासूपचर्यते । तासां माधवीना- मतिमुक्तलतानाम् । अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवीलतेत्यमर मधुसमृद्ध्या मकरन्दसम्पदा समेधितमेधया सवर्द्धितप्रतिभया अतएवो- न्मदयतीत्युन्मदो मदकर । पचाद्यच् । स ध्वनिं बिभर्त्ति तदुन्मद- ध्वनिभृत् तया मधुकराङ्गनया मुहुर्निभृताक्षरं अव्यक्ताक्षरं यथा तथेत्यर्थः । अथवा सर्वं शब्दो वर्णात्मक एव व्यञ्जकविशेषाभावादस्फु ट इति मतमाश्रित्योक्तं संपयो । कमय इति । उज्जगे उच्चैर्गीतम् गायतेरविवक्षितकर्मत्वाद्भावे लिट् । अत्रैकपथ्यराहित्यं समता पद्गुम्फे इति लक्षणात्समताख्योगुण ॥ २० ॥

अरुणितेति । अरुणितान्यरुणीकृतानि अखिलानि शैलवना

विकचकिंशुकसंहतिरुच्चकै
रुदवहद्वहव्यवहश्रियम् ॥ २१ ॥

रवितुरङ्गतनूरुहतुल्यतां
दधति यत्र शिरीषरजोरुचः ।
उपययौ विदधन्नवमल्लिकाः
शुचिरसौ चिरसौरभसम्पदः ॥ २२ ॥

दलितकोमलपाटलकुड्मले
निजवधूश्वसितानविधायिनि ।

यथा स मधुः पथिकानध्वगान् विरहिणश्च परितापिन, महादेवतो त्रिदशी उच्चैरीषदर्थे कन्ता । अव्ययसर्वनाम्नामकच् प्राक्टेरित्यकच् प्रत्ययः । विकचा विकसिता या किंशुकसंहतिः पलाशपुष्पराशिः सा दहव्यवहश्रियं दवाग्निशोभामुदवहत् । निदर्शनालङ्कारः । इति वसन्तवर्णनम् ॥ २१ ॥

अथ ग्रीष्मवर्णनमारभते । रवीत्यादि । यत्र शुचौ शिरीषरजसां रुचः कान्तयो रवितुरङ्गतनूरुहतुल्यतां सूर्याश्वरोमसादृश्यं दधति हरिद्वर्णत्वादित्यर्थः । असौ शुचिर्ग्रीष्मः । शुचिः शुद्धेऽनुपहते शृङ्गाराषाढयोः सिते ग्रीष्मे हुतवहेऽपि स्यादिति विश्वः । नवमल्लिकाः । [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] । चिरं स्थायिन्यः सौरभ[illegible] [illegible] [illegible] [illegible] [illegible] ॥ २२ ॥

दलितेति । पाटलायाः पुष्पाणि पाटलाः । [illegible] [illegible] [illegible] [illegible] । ते च ते [illegible] दलिता विभिन्नाः कोमलाः पाटलकुड्मला येन तस्मिन् निजवधूनां श्वसितं निःश्वासमनुविधत्ते [illegible] [illegible] [illegible]

मरुति वाति विलासिभिरुन्मद
भ्रमदलौ मदलौल्यमुपाददे ॥ २३ ॥
निदधिरे दयितोरसि तत्क्षण
स्नपनवारितुषारभृतस्तनाः ।
सरसचन्दनरेणुरनुक्षणं
विचकरे च करेण वरोरुभिः ॥ २४ ॥
स्फुरदधीरतडिन्नयना मुहुः
प्रियमिवागलितोरुपयोधरा ।

तस्मिन् उन्मदभ्रमदलौ मरुति वीणानिभे वाति सति इति । वातेर्न-
ः शत्रादेशः । विलासिभिर्विलसनशीलैः कामिभिः । वौ कषलसकत्थस्रम्भ-
इति घिनुण् प्रत्ययः । मदेन लौल्यञ्चापल्यमुपाददे मत्तैर्जातमित्यर्थः
। २३ ॥

निदधिर इति । वरोरुभिः स्त्रीभिः तत्क्षणस्नपनेन सद्यःसेकेन
वारितुषारभृतो जलशीकरधारिण इत्यर्थः । तुषारौ हिमशीकरावपि
शाश्वतः । स्तना दयितोरसि निदधिरे निहिताः तेषां सन्तापशान्तये
स्नानार्द्रीकृता एवालिङ्गितमित्यर्थः । किञ्च करेण पाणिना सरसचा-
न्दनरेणुः सरसचन्दनपङ्कस्यानुचयं विचकरे विकीर्णः । 'किरतेः' कर्मणि
लिट् ऋच्छत्यृतामिति गुणः । करेणुकरोरुभिरिति पाठस्तु ऊरूत्तरप-
दादौपम्य इत्यूङ् प्रसङ्गाद्धेयः । इति मोदवर्णनम् ॥ २४ ॥

अथ षड्भिः सुरतमाह । स्फुरदिति । स्फुरन्ती अधीरे चञ्चले तडितौ
नयने इव तडिन्नयने यस्याः सा अवगलिता श्लथिता उरुपयोधरा श्लथ-
लौ श्लथौ ऊरू च पयोधरौ च ऊरुपयोधरम् । प्राण्यङ्गत्वाद्द्वन्द्वैक-
वद्भावः । न गलितं न पतितं यस्याः सा [illegible]

जलधरावलिरप्रतिपालित
स्वसमयासमयाज्जगतीधरम् ॥ २५ ॥

गजकदम्बकमेचकमुच्चकै
र्नभसि वीक्ष्य नवाम्बुदमम्बरे ।
अभिससार न वल्लभमङ्गना
न चकमे च कमेकरसं रहः ॥ २६ ॥

अनुययौ विविधोपलकुण्डल
द्युतिवितानकसंवलितांशुकम् ।

जलधरावलेः पयोधराणामावयवावयविभावात् पृथङ्निर्देशः । अप्रति-
पालितस्वसमया अनपेक्षितनिजवेला सती एतच्च यौवनमदादन्यत्राधैर्या-
द्वेति भावः । जगतीधरं रैवतकभूधरं प्रियमिव समयात् समागच्छत् ।
गतेर्लङ् । पयोजगतीशब्दयोः पयोजलेन धरशब्देन पदैकदेशः ॥
अत्र विशेषणमहिम्ना जलधरादौ नायिकादिप्रतीतेः समासोक्तिः सा तु
प्रियमिवेत्युपमयाङ्गेन सङ्कीर्यते ॥ २५ ॥

गजेति । नभसि श्रावणमासे । नभः श्रावणिकश्च सः इत्यमरः ।
अम्बरे व्योम्नि गजकदम्बकमिव मेचकं श्यामलम् । कालश्यामलमेचका
इत्यमरः । उच्चैरेवोच्चैर्नदन्तं नवाम्बुदं वीक्ष्य अङ्गना एकः एकायनः
रसो रागो यस्य तं एकरसं तिरस्कृतरसान्तरं प्रियतमं । कं वल्लभ-
मिदं रह एकान्ते न चकमे न कामयते स्म तदा नाभिससार च सर्व-
वल्लभं सर्वापि तदङ्गना चकमे अभिससार चेति । नवाम्बुदस्योद्दी
पकत्वादनियमोक्तिः इह कामना पूर्वकत्वादभिसरणस्य तयोरेकक्रमतो
दम्पत्योर्येन दम्पत्योः यथासङ्ख्यसम्बन्धेन योजना न चैव ॥ २६ ॥

अनुययाविति । हरधनुर्वदन्य इतीन्द्रचापमनुययौ पयोमुचो मेघस्य

जलदपङ्क्तिरनर्त्तयदुन्मदं
कलविलापि कलापिकदम्बकम् ।
कृतसमार्जनमर्दलमण्डल
ध्वनि जया निजया स्वनसम्पदा ॥ ३१ ॥

नवकदम्बरजोरुणिताम्बरै
रधिपुरन्ध्रि शिलीन्ध्रसुगन्धिभिः ।
मनसि रागवतामनुरागिता
नवनवा वनवायुभिरादधे ॥ ३२ ॥

जलदेति । निजया आत्मीयया स्वनसम्पदा कृतः समार्ज्जनस्य मार्ज्जनाख्यसंस्कारसंस्कृतस्य मर्दलमण्डलस्य ध्वनेर्जयो यया सा तथोक्ता मार्ज्जनं नाम मृदङ्गानां ध्वननार्थमभ्यन्तरादितायाः पुष्कर लेपनम् जलदपङ्क्तिरुन्मदमुत्कटमदं कलविलापि मधुरालापि कलापिकदम्बकं मयूरवृन्दमनर्त्तयत् ॥ ३१ ॥

नवेति । नवकदम्बरजोभिररुणितमरुणीकृतमम्बरमाकाशं यैस्तैः शिलीन्ध्राणां कन्दलीकुसुमानां यः सुगन्धः स एषामस्तीति शिलीन्ध्रसुगन्धिभिः । गन्धस्येत्वे तदेकान्तग्रहणादित्प्रत्ययाभावः । कदल्यां तु शिलीन्ध्रं स्यादिति शब्दार्णवे । वनवायुभिः पुरन्ध्रीषु स्त्रीषु इत्यर्थे अधिपुरन्ध्रि । विभक्त्यर्थेऽव्ययीभावः । रागवतां कामिनां मनसि नवा नवप्रकारा । प्रकारे गुणवचनस्येति द्विर्भावः कर्मधारयवद्भावात् सुपो लुक् । अनुरागिता आदधे अनुराग उत्पादित इत्यर्थः ॥ ३२ ॥

शमितेति । अम्बुमुचो मेघाः प्रविरलैरल्पधारापातबिन्दुभिः शमितातपमपोढमहीरजो निरस्तभूरेणुकं न तु पङ्किलमिति भावः । सुगन्धि धन्यप्रवेशाद्युत्कटोरभम् । इह तदेकान्तताग्रहणमस्तीत्यम् । अवनाम

शमिततापमपोढमहीरजः
प्रथमबिन्दुभिरम्बुमुचोऽम्भसाम् ।
प्रविरलैरचलाङ्गनमङ्गना
जनसुगं न सुगन्धि न चक्रिरे ॥ ३३ ॥

द्विरददन्तवलक्षमलक्ष्यत
स्फुरितभृङ्गमृगच्छवि केतकम् ।
घनघनौघविघट्टनया दिवः
कृशशिखं शशिखण्डमिव च्युतम् ॥ ३४ ॥

दलितमौक्तिकचूर्णविपाण्डवः
स्फुरितनिर्झरशीकरचारवः ।

रैवतकाङ्गनम् । अङ्गनं चत्वराजिर इत्यमरः । अङ्गना जनस्य सुखेन गन्तव्यमिति सुगं सुखसञ्चारमित्यर्थः । सुदुरो रधिकरणे इति गमेर्डप्रत्यये टिलोपः । न न चक्रिरे चक्रिरे एवेत्यर्थः । द्वौ नञौ प्रकृतमर्थं गमयतः ॥ ३३ ॥

द्विरदेति । द्विरददन्तवलक्षं दन्तधवलम् । वलक्षो धवलोऽर्जुन इत्यमरः । भृङ्गो मृग इव भृङ्गमृगः तस्य छविः सा स्फुरिता यस्मिन् तत्तथोक्तं केतकम् । [illegible] मादि- [illegible] मृग [illegible] मृग । घनघनौघविघट्टनया [illegible] दिवोऽन्तरिक्षात् च्युतं कृशशिखं [illegible] मिवालक्ष्यतेत्युत्प्रेक्षा ॥ ३४ ॥

दलितेति । दलितमौक्तिकानां [illegible] चूर्णं इव विपा-
ण्डवः स्फुरिता ये निर्झराणां शीकराः कणास्त इव चारवः

कुटजपुष्पपरागकणाः स्फुटं
विदधिरे दधिरेणुविडम्बनाम् ॥ ३५ ॥
नवपयःकणकोमलमालती
कुसुमसन्ततिसन्ततसङ्गिभिः ।
प्रचलितोडुनिभैः परिपाण्डिमा
शुभरजोभरजोऽलिभिराददे ॥ ३६ ॥
निजरजः पटवासमिवाकिरद्
धृतपटोपमवारिमुचां दिशाम् ।
प्रियवियुक्तवधूजनचेतसा-
मनवनी नवनीपवनावलिः ॥ ३७ ॥

कुटजपुष्पपरागकणाः स्फुटन्दधिरेणुविडम्बनान्दधिचूर्णानुकारं विदधिरे चक्रिरे तद्वद्बभुरित्यर्थः । पूर्वोपमानद्वयात्प्रतीयमानोपमेति सङ्करः ॥ ३५॥

नवेति । नवपयः कण-नवोदकबिन्दुवत् कोमलाया मालत्या कुसु-मानाञ्जातीपुष्पाणां सन्ततिषु सन्ततसङ्गिभिर्निरन्तरासक्तैः । सुमना मालती जातीत्यमरः । अतएव प्रचलितोडुनिभैः परागभूषणात्सञ्चर-न्नक्षत्रैरिवेत्युत्प्रेक्षा । अलिभिः शुभ्राद्रजोभरात्परागपुञ्जात्, शु-भ्ररजोभरजः परिपाण्डिमा धवलिमा आददे स्वीकृतः ॥ ३६ ॥

निजेति । प्रियवियुक्तवधूजनचेतसाम् । कर्मणि षष्ठी । अनवनी अरक्षणी किन्तु हन्त्रीत्यर्थः । अवतेः कर्त्तरि ल्युटि ङीप् । नवनीपव-नावलिः नवकदम्बकाननपङ्क्तिः धृताः पटोपमाः पटकल्पा वारिमुचो मेघा-वाभिन्नाः मेघपटावृता इत्यर्थः । तासान्दिशां निजरजः स्वपराग-म्पटवास विधानमिवेत्युत्प्रेक्षा अकिरत् अक्षिपत् सर्वा दिशोऽतिभाः ॥ ३७॥

प्रणयकोपभृतोऽपि पराङ्मुखाः
सपदि वारिधरारवभीरवः।
प्रणयिनः परिरभ्य मथाङ्गना
ववलिरे वलिरेचितमध्यमाः ॥ ३८ ॥

विगतरागगुणोऽपि जनोनक
स्खलति वाति पयोदनभस्वति।
अभिहितेऽलिभिरेव मिवोच्चकै
रनन्नते नन्नते नवपल्लवैः ॥ ३९ ॥

अरमयन् भवनादचिरद्युतेः

प्रणयेति। प्रणयकोपभृतः अतएव पराङ्मुखाः विमुखा अपि स्वाङ्गाच्चोपसर्जनात्संयोगोपधादिति विकल्पादाकारः। सपदि वारिधरारवेभ्यो गर्जितेभ्यो भीरवो भीताः स्त्रिय इति शेषः। अथ अनन्तर- मूर्जितमाकर्ण्यानन्तरमेव प्रणयिनः प्रियान् परिरभ्य आलिङ्ग्य वलिविरचि- तान्यालिङ्गनसंमर्दप्रकारत्वाद्वलिविरचितानि मध्यमान्यवलग्नानि यासां ताः सत्यो ववलिरे प्रवृत्ताः। वलतेर्वकारादित्वात् न शसददवादिगु- णानामित्येत्वाभ्यासलोपप्रतिषेधः ॥ ३८ ॥

विगतेति। पयोदनभस्वति मेघमारुते वाति वहति सति। वातेर्लट शत्रादेशः। विगतरागगुणैर्विरक्तोऽपि को जनो न स्खलति धैर्यादपि चल- त्येवेत्यर्थः। [illegible] नमनशीलमपि नमित- अनमन्ते नन्दवने अभिहिते सति नवपल्लवैरेव हस्ताभिनेयमि- त्येवा। नमतेर्भावे लिट् ॥ ३९ ॥

अरमयदिति। अचिरद्युतेर्विद्युतोऽभयं भवनादिव न हि तद्

किल भयादपयातुमनिच्छवः ।
यदुनरेन्द्रगणन्तरुणीगणा
स्तमथ मन्मथमन्थरभाषिणः ॥ ४० ॥
ददतमन्तरिताहिमदीधितिं
खगकुलाय कुलायनिलायिताम् ।
जलदकालमबोधकृतं दिशा
मपरथाप रथावयवायुधः ॥ ४१ ॥

किन्तु रागादेवेति भावः । किलेत्यलीके । भवनाद्रमणगृहादपयातुं निर्गन्तुमनिच्छवः भयव्याजात्तत्रैव स्थिता इति भावः । बिन्दुरिच्छुरित्युप्रत्ययान्तो निपातः । मन्मथेन मन्थरमलसम्भाषन्त इति मन्मथमन्थरभाषिणः कामवशा इत्यर्थः तरुणीगणाः तम्प्रकृतं यदवएव नरेन्द्रास्तेषां गणमरमयन् रमयन्ति स्म । अत्र भयेन रागनिगूहनान्मीलनालङ्कारः । मीलनं वस्तुना यत्र वस्त्वन्तरनिगूहनमिति लक्षणात् । सोऽप्यागन्तुकेन भयेन सहजस्य रागतिरोधानादागन्तुकेन सहजतिरोधानरूपः ॥ ४० ॥

अथ शरद्वर्णनमारभते । ददतमिति । रथावयवायुधश्चक्रायुधो हरिरन्तरिताहिमदीधितिस्तिरोहितोष्णांशुस्तथा खगकुलाय पक्षिसङ्घाय कुलायेषु नीडेषु निलीयन्त इति कुलायनिलायिनः । कुलायो नीडमस्त्रियामित्यमरः । तेषां भावस्तत्ता तां ददतमप्रयच्छन्तं पक्षिसञ्चारमतिबध्नन्तमित्यर्थः । नाभ्यस्ताच्छतुरिति नुम्प्रतिषेधः । दिशामिति । कर्मणि षष्ठी । अबोधकृतं अबोधकारिणं मेघावरणेन प्राच्यादिविवेकं लुम्पन्तमित्यर्थः जलदकालं प्रावृट्कालं अपरथा प्रकारान्तरेण आप प्राप । मेघोदयोपाधिना प्रावृड्व्यवहारभाजमेव कालं मेघापायोपाधिना शरत्संज्ञयोपलेभे इत्यर्थः कालोऽपि एकएव सन्ननेकोपाधि सम्बन्धान्नानात्वेनोपचर्यत इति तद्विदः ॥ ४१ ॥

स विकचोत्पलचक्षुषमैक्षत
क्षितिभृतोऽङ्कगतां दयितामिव।
शरदमच्छगलद्वसनोपमा
क्षमघनामघनाशनकीर्त्तनः॥ ४२॥
जगति नैशमशीतकरः करै
र्वियति वारिदवृन्दमयन्तमः।
जलजराजिषु नैद्रमदिद्रव
न्न महतामहताः क्व च नारयः॥ ४३॥

शरदिति। अघानां नाशनं निवर्त्तनं कीर्त्तनं यस्य सोऽघनाशनकीर्त्तनः स हरिः विकचोत्पलमेव चक्षुर्यस्यास्तामच्छं शुभ्रं गलत् [illegible] तदुपमा साऽच्छगलद्वसनोपमा। क्षमा योग्या घना मेघा यस्यां न सा [illegible] क्षितिभृतोऽङ्कगतामुत्सङ्गगतां दयितामिवैक्षत। शरदमैक्षत॥ ४२॥
जगतीति। अशीतकर उष्णांशुः करैः अंशुभिः जगति लोके निशायाभवं नैशम्। निशाप्रदोषाभ्यां चेति विकल्पादण्प्रत्ययः। तमः तिमिरमदिद्रवत् द्रावयति स्म निरस्तवानित्यर्थः। द्रुगतौ णौ चङि रूपम्। [illegible] [illegible] [illegible]। वियत्याकाशे वारिदवृन्दमयं मेघसमूहरूपम्। [illegible] [illegible]। तथा अदिद्रवत् जलजराजिषु [illegible] नैद्रं निद्रासम्बन्धं तदेव तमः अदिद्रवत्। तथा हि महतामहताः [illegible]। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]॥ ४३॥

समयएव करोति बलाबलं
प्रणिगदन्त इतीव शरीरिणाम् ।
शरदि हंसरवाः परुषीकृत
स्वरमयूरमयूरमणीयताम् ॥ ४४ ॥
तनुरुहाणि पुरोविजितध्वने
र्धवलपक्षविहङ्गमकूजितैः ।
जगलुरक्षमयेव शिखण्डिनः
परिभवोऽरिभवोहि सुदुःसहः ॥ ४५ ॥

समय इति । समयः काल एव शरीरिणां बलाबलं बलाबले । विप्र-
तिषिद्धं चानधिकरणवाचीति विकल्पात् द्वन्द्वैकवद्भावः । करोतीति
प्रणिगदन्तः प्रतिपादयन्त इवेत्युत्प्रेक्षा । नेर्गदनदपतेत्यादिना णत्वम् ।
शरदि हंसरवाः परुषीकृतस्वरा निष्ठुरीकृतनादा मयूरा यस्मिन् कर्मणि तत्
परुषीकृतस्वरमयूरं यथा तथा रमणीयतामयुः प्राप्ताः । यातेर्लङि
लङः शाकटायनस्यैवेति झेर्जुसादेशः उस्यपदान्तादिति पररूपं [illegible]-
तायां [illegible] पूर्वस्य दीर्घाभावः । यस्मादपि हंसमयूरकूजिते माधुर्या-
माधुर्यविपर्ययदर्शनात्काल एव प्राणिनां बलाबलविधायक [illegible]
॥ ४४ ॥

तनुरुहाणीति । पुरोऽपि धवलपक्षविहङ्गमाः हंसविशेषाः । हं-
सास्तु श्वेतगरुतः इत्यमरः । तेषां कूजितैर्विजितध्वनेः निर्जितरवो
मयूरस्य तनौ रुहाणि रुहाणि तनुरुहाणि बर्हाणि । [illegible]
[illegible] । अक्षमया कूजितैर्व्यसनेव जगलुर्गलितानि च । [illegible]
[illegible] इति [illegible] । [illegible]

अनुवनं वनराजिवधूमुखे
बहलरागजवाधरचारुणि ।
विकचबाणदलावलयोऽधिकं
रुरुचिरे रुचिरेक्षणविभ्रमाः ॥ ४६ ॥
कनकभङ्गपिशङ्गदलैर्दधे
सरजसारुणकेशरचारुभिः ।

दित्याह । अरिभिः परिभवः सद्य सह्यः अल्पत्वाद्धि । पराजयदु-
र्जितस्यापि प्रमादो युज्यत इति भावः । कारणेन कार्यसमर्थनरूपोऽर्थान्तर-
न्यासः स च अस्पष्टोल्लेखया कल्पीर्यते ॥ ४५ ॥

अनुवनमिति । अनुवनमतिशयं बहलो रागोदयो यस्य सा जवा
च । ओड्रपुष्पं जवेत्यमरः । दुर्भेद्य आर्तिप्रवर्तित्वात् सौहित्या ।
तेनाधरेण चारुणि रम्ये वनराजिरेव वधूस्तस्या मुखमग्रभागः तदेव
मुखं तस्मिन् विकचबाणदलावलयो रुचिराणामीक्षणानां विभ्रम इव
विभ्रमः शोभा यासान्ता विकचबाण दलावलयोऽधिकं रुरुचिरे ।
बाणोऽस्त्री नीलझिण्ट्या चेति वैजयन्ती । अधिकं रुरुचिरे दिदीपिरे ।
उपमालङ्कारयो सङ्करः ॥ ४६ ॥

कनकेति । कनकभङ्गाः सुवर्णखण्डा इव पिशङ्गानि दलानि येषां
तैः रजसा सरजसं सरजस्का इत्यर्थः अरुणाः । न सरजसमित्यव्ययीः
भाव इति यावत् । अथ वा सहार्थे सह्योगात् सुप्सुपेति समासः
सर्वत्र प्रादिदर्शनात् सहस्य सभावो वक्तव्य इत्युक्तेः । तस्य च
सरजसं सरजसा या वै अरुणकेशरा. तैः रुचिः सदा त्रिधैः. विकसि-
तः करणेन सामान्येनार्थस्य शाखां वा तस्य शोभाकारणस्य वैभि-

प्रियविमानितमानवतीरुषां
निरसनैरसनैरवृथार्थता ॥ ४७ ॥
मुखसरोजरुचं मदपाटला
मनुचकार चकोरदृशां यतः ।
धृतनवातपमुत्सुकतामतो
न कमलं कमलम्भयदम्भसि ॥ ४८ ॥

रायके । असुते कर्त्तरि ल्युट् । असनैः प्रियकप्रसूनैः । सप्तकाह
मत्स्यकृष्णप्रियककोविदा इत्यमरः । अवृथार्थता मानविरोधकत्वादस्य
स्त्रीत्यसनानीत्यन्वर्थनामकत्वं दध दधे । दधाते कर्मणि लिट् ॥ ४७ ॥

मुखेति । धृतो नवातपो येन तद्धृतनवातपं बालातपतापमित्यर्थः
अम्भसि कमलं अम्भः स्व कमलम् । अम्भोपद्दृश स्वनकमलनिरस्यर्थं
अम्लानतादोतनार्थं वा यतो मदपाटलाश्चकोरदृशां स्त्रीणां मुखसरोज
रुचं मुखारविन्दयोभामनुचकार । अनुपराभ्यां कृञः इति परस्मैपद
नियम । अतोऽनुकरणाद्धेतो समुत्सासमुत्सुकतामौत्सुक्यं सुराङ्गलोक
नकौतुकिना नालम्भयत नागमयत् सर्वस्यालम्भयदेव तत्कारकत्वादि
त्यर्थः । एतेनौत्सुक्यवस्तुना कार्येण कारणभूता कमलदर्शनोत्था मधु
स्याभिव्यञ्जत इति वस्तुनालङ्कारध्वनिः । एतेन स्त्रीमुखसादृश्यात् कमल
स्याधारेऽम्भसि पुनः उत्सुकतामलम्भयदिति रङ्गराजव्याख्यानं काकस्य
कार्ष्ण्यं धवलः प्रसादः इति यद्वदत्र मन्तव्यमिति । अलम्भयदिति लभेर्गत्य-
र्थत्वाण्णिच् लभेश्चेति नुमागमः अकर्मकप्राप्त्युपसर्जनकागत्यर्थत्वाद्गतिव
द्बीत्याणिणा अणिकर्त्तुः कमलस्य कर्मता । गत्युपसर्जनकप्राप्त्यर्थत्वे
तु वैपरीत्यमित्युक्तं प्रागिति विशेषः ॥ ४८ ॥

विगतशस्यजिघत्समघट्टय
त्कलमगोपवधूर्न मृगव्रजम् ।
श्रुततदीरितकोमलगीतक
ध्वनिमिषेऽनिमिषेक्षणमग्रतः ॥ ४९ ॥

कृतमदं निगदन्त इवाकुली
कृतजगत्त्रयमूर्जमतङ्गजम् ।
ववुरयुक्छदगुच्छसुगन्धयः
सततगास्ततगानगिरोऽलिभिः ॥ ५० ॥

विगतेति । इह [illegible] । [illegible] [illegible] तुज-
न्मर । कलमगोपी शालिगोप्त्री या [illegible] वधूः कलमगोपवधूः
स्त्रियाः पुंवद्भावादिना पुंवद्भावः । श्रुत [illegible] तया वध्वा ईरितस्य
[illegible] कोमलगीतकस्य मधुर [illegible] [illegible] न श्रुततदीरितको
मलगीतकध्वनि [illegible] [illegible] न निमिषति [illegible]
[illegible] । [illegible] [illegible] । [illegible] यस्य [illegible]
[illegible] [illegible] [illegible] । [illegible] [illegible]
[illegible] । [illegible] जिघत्सा यस्य तं विगतशस्यजिघत्सम् ।
[illegible] । मृगव्रजं नाघट्टयत् नाताडयत् [illegible]
[illegible] भाव । [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] । [illegible]
[illegible] [illegible] ॥ ४९ ॥

कृतेति । [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] । [illegible]

विगतवारिधरावरणाः क्वचि
द्ददृशुरुल्लसितासितासिताः।
क्वचिदिवेन्द्रगजाजिनकञ्चुकाः
शरदि नीरदिनीर्यदवोदिश ॥ ५१ ॥
विलुलितामनिलैः शरदङ्गना
नवसरोरुहकेशरसम्भवाम्।

सततगः सदागतयोऽशय इति यावत् ललमर्इर्जा नमद घनदशारुचीन-
तगजूक्ष्म जर्ज कार्त्तिक। बाहुलोर्जौ कार्त्तिकिकद्मरत्यमर। सदव
मतद्गद्गति रूपकम्। न निगदलङ्ग अयमागच्छतीत्यावेदयतद्रव वनु
वाति स्म। मत्तमातङ्गगगनेऽस्थेयशिखरयुवङ्गनगमयादिसुतमेवा रूपक
मङ्गमत्वा ॥ ५० ॥

विगतेति। शरदि यदवो यादवा यदुशब्देन रघुशब्दात् तदपत्य-
लक्षणा जनपदशब्द नामीर तद्राजस्य बहुष्विति लुकुवत्त्वादिति। क्वचि-
द्विगतवारिधरावरणा विगतमेघावरणा अतएवोल्लसिता कोमादुल्लता-
सिताऽसितास्ता अदृश्यता श्यामा इत्युपमा क्वचिन्नीरदिनीर्मेघवती
शुभ्राभ्रपटलच्छन्नादृदर्श अतएवेन्द्रगजाजिन ऐरावतचर्म तदेव कञ्चुक
कूर्पासकोयासामाताइव स्थिता इत्युत्प्रेक्षा। दिशो ददृशु। उक्तालङ्का-
रयो सङ्करः ॥ ५१ ॥

विलुलितामिति। शरदेवाङ्गना इति रूपक अनिलैर्विलुलितां विक्षो-
भितां नवसरोरुहकेशरसम्भवां धूलिं परागं परिहास विधित्सया नर्मकरी-
विधित्सया। इषाते समुत्पन्नात् स्त्रियामप्रत्यय टाप्। कविषु
विकरितु विक्षेप्तुमिव। तमुद्गमनुमो क्रियायां क्रियार्थायामिति तुमुन्प्र
त्यय। अर्दावपद् प्रेरितवती। रूपकोत्प्रेक्षयोः सङ्करः। किर-

विकरितु परिहासविधित्सया
हरिवधूरिव धूलिमुदक्षिपत् ॥ ५२ ॥

हरितपत्रमयीव मरुद्गणैः
स्रगवनद्धमनोरमपल्लवा ।
मधुरिपोरभिताम्रमुखी मुदं
दिवि तता विततान शुकावलिः ॥ ५३ ॥

स्मितसरोरुहनेत्रसरोजला
मतिसिताङ्गविहङ्गहसद्दिवम् ।

निरय [illegible] । यथा [illegible] हरति मारुतः । कश्चित्[illegible]-
हेलया कर्षति यथा तद्वदिति [illegible] ॥ ५१ ॥

हरितेति । अभिताम्रमुखी आरक्तमुखी । [illegible]
[illegible] विस्तृता [illegible] । शुका [illegible] [illegible]
[illegible] विततान हरितपत्रमयी [illegible] हरि
तपत्रमयी । [illegible] विस्तृता [illegible] । [illegible]
मनोरम [illegible] यथा [illegible] । मधुरिपो [illegible]
विततान ॥ ५२ ॥

स्मितेति । [illegible] स्मितानि [illegible] सरोरुहाण्येव नेत्राणि
[illegible] तानि सरोजलानि [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] इति [illegible] । [illegible]
[illegible] । [illegible] [illegible]
[illegible] [illegible]
[illegible] । [illegible]

अकलयन्म् दितामिव सर्वतः
स शरदं शरदन्तुरदिङ्मुखाम् ॥ ५४ ॥
गजपतिद्वयसीरपि हैमन
स्तुहिनयन् सरितः पृषताम्पतिः।
सलिलसन्ततिमध्वगयोषिता
मतनुतातनुतापकृतं दृशाम् ॥ ५५ ॥
इदमयुक्तमहो महदेव य
द्वरतनोः स्मरयत्यनिलोऽन्यदा।

रोपणाद्रूपकालङ्कारः। तद्गात्मनीयमानाङ्गनाभेदाध्यवसायादाक्रन्दि
इदितस्त्री क्षेत्रेति सङ्करः ॥ ५४ ॥

अथ हेमन्तं वर्णयति। गजपतीति। गजपतिः प्रमाणमासां
गजपतिद्वयसीः महागजप्रमाणाः। प्रमाणे द्वयसज्दघ्नञ्मात्रच् इति
प्रमाणार्थे द्वयसच्प्रत्ययः टिड्ढाणञित्यादिना ङीप्। ता अपि सरितस्तु-
हिनयन् हिमीकुर्वन्। तत्करोतीति ण्यन्ताच्छतृ शत्रादेशः। हेमन्ते
भवो हैमनः। सर्वत्राण् च तलोपश्चेति हेमन्तशब्दाच्छैषिकोऽण्प्रत्ययः
तकारलोपश्च। पृषतां बिन्दूनां पतिर्वायुः। पृषन्ति बिन्दुपृषताद्रत्य-
मरः। अध्वानङ्गच्छन्तीत्यध्वगाः पथिकाः अन्तात्यन्ताध्वदूरपारसर्वा-
नन्तेषु डः। तद्योषितां प्रोषितभर्तृकाणां दृशां अतनुतापकृतं महा-
सन्तापकारिणीं सलिलसन्ततिं अतनुत। उष्णमश्रूत्पादयामासेत्यर्थः।
हेमन्तमारुतो विरहिणीदुःसहो जातेति भावः ॥ ५५ ॥

सर्वदापि वियोगिनामुद्दीपकत्वायोर्हेमन्ते वैशिष्ट्यमाचष्टे। इद
मिति। अनिलो वायुरन्यदाऽन्यस्मिन् काले ग्रीष्मादाविव्यर्थः। सर्वैका-
न्येत्यादिना दाप्रत्ययः। वियोगिनो वियुक्तान्। गतिबुद्धीत्यादिना

स्मृतसयौवनसोष्मपयोधरान्
सतुहिनस्तु हिनस्तु वियोगिनः ॥ ५६ ॥
प्रियतमेन यया सरुषा स्थितं
न सहसा सहसा परिरभ्य तम्।

अभिहन्तुं कर्मत्वम्। स्मरतेर्विस्मरतुमित्यर्थः। अधीगर्थेत्यादिना कर्मणि शेषे षष्ठी। स्मरयतीति यत् स्मरतेराध्याने मित्त्वाद्ध्रस्वत्वम्। इदं स्मारकत्वमपि सहृदयत्वमयुक्तमेव सहकारि विरहादिति भावः। अहो अवन्तासिद्धित्वात् हिमस्य। हेमन्ते तु हन्तृत्वमप्यस्य सम्भवतीत्याह। सतुहिनस्तुहिनसहितस्तु सयौवना यौवनयुक्ताः अतएव सोष्माणो ये पयोधराः कुचास्ते स्मृता यैस्तान् स्मृतसयौवनसोष्मपयोधरान् वियोगिनो वियुक्तान्। तथा युक्तं चानीप्सितमिति कर्मत्वम्। हिनस्तु हन्तु। सम्भावनायां लोट्। हेमन्ते हि हिमसहकारात्कुचोष्मैकवेद्यदुःखोत्पादन सामर्थ्याद्वियोगिमारकत्वमपि सम्भाव्यते ग्रीष्मादौ तु तादृक्सहकारि विरहात् स्मारकत्वमप्ययुक्तमित्यर्थः। अमारके मारकत्वसम्बन्धोक्तेरतिशयोक्तिभेदः इह सहकारिप्रौढोक्तिद्वयोरभेदाध्यवसाय इति सङ्करः॥ ५६॥

प्रियतमेति। अत्राद्यमर्धमपि सहसा इति द्वेधा विभागं कृत्वा सहसेतीदं पदं सरुषा सरोषया यया स्त्रिया कयाचित् प्रियतमेन सह न स्थितम्। नपुंसके भावे क्तः। सा अङ्गना स्त्री सहसा मार्गशीर्षमासेन। मार्गशीर्षे सहामार्गः इत्यमरः। जातवेपथुः जनितकम्पा सती। द्वितोऽथुजित्यथुच्प्रत्ययः। तं पूर्वमनादृतमेव प्रियं हसेन सह वर्त्तत इति सहसा सहासा सती। हासो हसो हास्यो हास इत्यमरः। स्वनहसोर्वेति विकल्पादप्प्रत्ययः। सहसा शीघ्रम्। सरादिपाठादव्ययत्वम्। परिरभ्याश्लिष्य स्वयं दयामपीत्यर्थः। अन्यथा वैरं स्यात्। अतएव सामर्थ्यसम्भावनार्थत्वात्पेरप्रयोगः। अपि तु ना-

श्लथयितुं चणमक्षमताङ्गना
न सहसा सहसा कृतवेपथुः ॥ ५७ ॥

भृशमदूयत याधरपल्लव
द्युतिरनावरणा हिममारुतैः ।
दशनरश्मिपटेन च शीत्कृतै
र्निवसितेव सितेन सुनिर्ववौ ॥ ५८ ॥

प्रणभृता सुतनोः कलशीत्कृत
स्फुरितदन्तमरीचिमयं दधे ।
स्फुटमिवावरणं हिममारुतै
र्मृदुतया दुतयाधरलेखया ॥ ५९ ॥

श्लथ शिथिलीकर्तुं नोत्सहते स्म इत्यर्थः । मानिनीमानभङ्गसम्बन्धोऽयं भाव इति भावः । कलहान्तरितेयं नायिका । कोपात्कान्तं पराणुद्य पश्चात्तापसमन्वितेति लक्षणात् ॥ ५७ ॥

भृशमिति । अनावरणा आवरणरहिता या अधरपल्लवस्य द्युतिः सैषो हिममारुतैर्भृशमदूयत अतप्यत । दूङो दैवादिकात् कर्मणि लङ् । सा द्युतिर्दशनांशुपटेन च । शीत्कृतैः शीत्कारैः करणैः सितेन शुभ्रेण दशनरश्मय एव पटस्तेन करणेन निवसिते वाच्छादितेवेत्युत्प्रेक्षा । वसे राच्छादनार्थात्कर्मणि क्तः इडागमः । सुनिर्ववौ सुष्ठु निर्ववार । शीतानु राच्छादित इति भावः । हिमदूनाधरनिर्वापणस्य शीत्कारकारणकस्य दशनरश्मिपटाच्छादने हेतुत्वोत्प्रेक्षणात् सङ्करः ॥ ५८ ॥

धृततुषारकणस्य नभस्वत
स्तरुलताङ्गुलितर्जनविभ्रमाः ।
पृथु निरन्तरमिष्टभुजान्तरं
वनितयानितया न विषेहिरे ॥ ६० ॥
हिम ऋतावपि ताः स्म भृशस्विदो
युवतयः सुतरामुपकारिणि ।

उक्तमेवार्थमङ्गान्तरेणाह । नवेति । अर्दितया माहिवेन हेतुना हिममारुतैर्दितया पीडितया । टु दूञ् उपतापे इति धातोर्भीमादित्वात्कर्मणि क्तः । व्रणभृता दन्तक्षतवता सुतनोः स्त्रियाः अधरो मेनेव तया अधरनेत्रया कव्यां कवलीकृतेन हेतुना स्फुरिताः प्रकाशिता ये दन्तमरीचयस्तन्मयन्दूयं स्फुटमाधरदमाच्छादनं दध इव इत्युत्प्रेक्षा । दधातेः कर्मणि लिट् ॥ ५९ ॥

धृतेति । धृतास्तुषारकणास्तुहिनशीकरा येन तस्य नभस्वतः पवनस्य सम्बन्धिनः तरुलता एवाङ्गुलयस्ताभिस्तर्जनानि तान्येव विभ्रमाः विलासा पृथु विपुलं निरन्तरमिष्टस्य दयितस्य भुजान्तरं भुजमध्यं वक्षःस्थलं निरन्तरमनितया अप्राप्तया गाढालिङ्गनमलभमानया इत्यर्थः । इणः कर्तरि क्तः । वनितया स्त्रिया न विषेहिरे न सोढाः विरहिण्यस्तर्जिता इव मन्यन्तेऽस्मिन्निति भावः ॥ ६० ॥

हिमेति । ऋतमयं ऋतादागतं ऋतप्रयुक्तमित्यर्थः । तत आगत इति मयट् । अकृत्रिममनुरागं सहजं प्रेम प्रकटयति प्रकटी कुर्वन्ति स्वार्थेन स्वेदेनेति भावः । अत एव सुतरामुपकारिणि पुंसां रिरंसाजनकत्वेन अनुरागप्रकाशकत्वाच्चात्यन्तोपकारिणि स्वेदे । हिमऋतौ शैत्येऽपि स्वेदस्याकस्मात्सात्त्विक कार्यत्वादित्यर्थः । सात्त्विक स्वेद इति पदार्थः । अयं विशेषोक्ति रागोत्कर्ष भर्त्सितदर्शि

प्रकटयत्यनुरागमकृत्रिमं
स्मरमयं रमयन्ति विलासिनः ॥ ६१ ॥
कुसुमयन् फलिनीरलिनीरवै-
र्मदविकाशिभिराहितहुङ्कृतिः ।
उपवनं निरमंस्त यत प्रियान्
वियुवतीर्युवतीः शिशिरानिलः ॥ ६२ ॥

चाटूक्तिः । किमु हेमन्तोऽपि रागिणां खेदहेतुरेव तद्वदनुरागहेतु- त्वादिति भावः । तासकथा धीरायवतयो विलासिनः प्रियान् रमयन्ति स्म हेमन्तस्योद्दीपकत्वादिति पीडा वमनात् दीर्घरात्रित्वाच्चोभयथेच्छा- सद्भावस्तत्रेत्यर्थः ॥ ६१ ॥

अथ शिशिरं वर्णयति । कुसुमयन्नित्यादिना । उपवन वन इत्यर्थे । विभक्त्यर्थेऽव्ययीभावः तृतीयासप्तम्योर्बहुलमिति विकल्पादमभाव । फलिनीः प्रियङ्गुलताः । प्रियङ्गुः फलिनी फली त्यमरः । कुसुमयन् कुसुमवतीः कुर्वन् । इत्युद्दीपनसामग्री वर्णनम् । कुसुमयतेर्मत्वन्त- प्रातिकारात्तत्करोतीति ण्यन्तात् लटः शत्रादेशः आविष्टवद्भावे शिल्लो- लुक् । मदविकाशिभिर्मदेन विजृम्भमाणैरलिनीरवैः भ्रमरीझङ्कारैराहित- हुङ्कृतिः कृतहुङ्कारः माधुर्याद्युद्दीपकत्वातिशयद्योतनार्थमलिनीति स्त्री- लिङ्गनिर्देशः शिशिरानिलः प्रियान्वियुवतीः कोपादियुक्ताः । यौतेः शतरि धातोरुगङ्कादेशः उगितश्चेति ङीप् । युवतीः वधूः युनाविति तिप्रत्ययः । निरमंस्त व्यतर्क्षयत । तर्किभस्योः शीरादिकयोरत्र दात्तत्वादात्मनेपदम् । अत्र प्रायो पदेतने हेतवधर्मानिर्भङ्गेन दृश्ये- स्वते वा चालिनीझङ्कारकाराज्जीवितेति रूपकमलीयो दृढ्ढकाप्रयो- गाद्रष्या च ॥ ६२ ॥

उपचितेषु परेष्वसमर्थतां
व्रजति कालवशाद्बलवानपि ।
तपसि मन्दगभस्तिरभीषुमा
न्नहि महाहिमहानिकरोऽभवत् ॥ ६३ ॥

अभिषिषेणयिषुम्भुवनानि यः
स्मरमिवाख्यत लोध्ररजश्चयः ।
क्षुभितसैन्यपरागविपाण्डुर
द्युतिरयं निरयन्नद्भूद्दिशः ॥ ६४ ॥

उपचितेष्विति । [illegible] परेषु [illegible] उपचितेषु [illegible] । [illegible] मन्दगभस्ति[illegible] । अभीषु[illegible] । [illegible] करोतीति [illegible] । [illegible] ॥ ६३ ॥

[illegible] । क्षुभित [illegible] विपाण्डुर [illegible] द्युति [illegible] भुवनान्यभि[illegible] । [illegible] ।

शिशिरमासमपास्य गुणोऽस्य नः
क इव शीतहरस्य कुचोष्मणः ।
इति धियास्तरुषः परिरेभिरे
घनमतो नमतोऽनुमतान् प्रियाः ॥ ६५ ॥

अधिलवङ्गममी रजसाधिकं
मलिनिताः सुमनोदलतालिनः ।
स्फुटमिति प्रसवेन पुरोहस-
त्सपदि कुन्दलता दलतालिनः ॥ ६६ ॥

शिशिरेति । शिशिरमासमपास्यापहाय शीतं हरतीति शीतहरस्य । 'हरतेरनुद्यमनेऽजित्यच् प्रत्ययः । नोऽस्माकमस्य कुचोष्मणः कुचोष्णस्य क इव गुणः किंफलमुपकारः इति शेषः । ... क्रियापेक्षया कर्मनिर्देशः । ... इति धियास्तरुषः अस्मिन् शिशिरमासे । सार्वविभक्तिकस्तसिः । प्रियाः कान्ताः घनमतिशयेन नमतः प्रणतानतनुमतान् स्वप्रियान् घनं निविडं परिरेभिरे आश्लिष्टवत्यः । इतिधियेति सुखार्थस्य परिरम्भस्य कुचोष्मणामस्कार्यत्वमुक्तौ व्यक्ता-प्रयोगाद्गम्यत्वम् ॥ ६५ ॥

अधीति । लवङ्गेष्वधिलवङ्गम् । विभक्त्यर्थेऽव्ययीभावः । सुमनसां पुष्पाणां दलेषु तालयन्ति प्रतितिष्ठन्ति इति सुमनोदलतालिनः । ... आभीक्ष्ण्ये वा णिनिः । अमी अलिनो मधुपा रजसा परागेणापरेण च अधिकं मलिनाः मलीमसा मालिन्यं कृताः मलिनिताः इति हेतोः पुरोऽग्रे सपदि कुन्दलता माध्यकी । माघ्यं कुन्दमित्यमरः । दलता विकसता प्रसवेन निजकुसुमेन व्याजेन स्फुटमभिव्यक्तमुपाया रजसमाकृत्याकारं कामिव उपहासं करोतीति भावः । कुन्दकुसुमस्य धावल्यात्तादात्म्योत्प्रेक्षा ॥ ६६ ॥

अतिसुरभिरभाजि पुष्पश्रिया
मतनुतरतयैव सन्तानकः ।
तरुणपरभृतः स्वनं रागिणा
मतनुत रतये वसन्तानकः ॥ ६७ ॥

नोज्झितुं युवतिमाननिरासे
दक्षमिष्टमधुवासरसारम् ।
चूतमालिरलिनामतिरागा
दक्षमिष्ट मधुवासरसारम् ॥ ६८ ॥

[illegible] ॥ ६७ ॥

[illegible] ॥ ६८ ॥

जातप्रीतिर्या मधुरेणानुवनान्तं
कामे कान्ते सारसिका काकुरुतेन ।
तत्सम्पर्कं प्राप्य पुरा मोहनलीलां
कामे कान्ते सा रसिका का कुरुते न ॥ ७६ ॥

कान्ताजनेन रहसि प्रसभं गृहीत
केशे रते स्मरसहासवतोषितेन ।
प्रेम्णा मनःसु रजनीष्वपि हैमनीषु
के शेरते स्मरसहासवतोषितेन ॥ ७७ ॥

बलीयसेति भाव परिरम्भकर्चिमालिङ्गनेच्छां नाभिनत् न बिभेद । सा-रदस्य दस्याधवद्धारतया प्रहीभिरस्मात्तुषितत्वादिः सम्पत्तमृक्तरा वि-जयत इत्यर्थः । सातप्त रसनिरन्तमाद्वत्पद्लङ्कारः । एतच्च सक्त पूर्वश्लोके । चौपच्छन्दसिकं वृत्तम् ॥ ७५ ॥

जातेति । या.स्त्री अनुवनान्तम् । विभक्त्यर्थेऽव्ययीभावः । मधुरेण श्राव्येण सारसिकाया रुतेन आरस्य एव सारसिकाः सारसाङ्गनाः । का-त्यर्थं स्त्वत्वम् । तासां काकुरुतेन विकृतशब्देन । काकुः स्त्रियां विका-रो यः शोकभीत्यादिभिर्ध्वनेरित्यमरः । काकुश्च तद्रुतञ्च तेन । कामे कामवत्यै । सिंहो देवदत्त इतिवद्भेदोपयोगः । कान्ते प्रिये जातप्रीतिः जातस्पृहा अभूत् । रसिका रसवती साम वतीत्यर्थः । अतदनिरामा विति तत्प्रत्ययं । सा का स्त्री एकान्ते रहसि तस्य कान्तस्य सम्पर्क-माप्य पुरा पुरस्तादेव यावत्पूर्वमेव का मोहनलीलां सुरतक्रीडां न कुरुते सर्वापि स्त्री मध्यानिमिव सुरत विशेषान् कामतन्त्रप्रसिद्धान् विपरीतप्रकारेत्यर्थः । तेन सुहृत्स्य परा काष्ठामाप्नोत्विति । मत्तमयूरं वृत्तम् ॥ ७६ ॥

गतवतामिव विस्मयमुच्चकै
रसकलामलपल्लवलीलया ।
मधुकृतामसकृद्गिरमावली
रसकलामलपल्लवलीलया ॥ ७८ ॥

अथैकेन हेमन्तमाह । कान्तेति । षड्ज इति षड्जः । पचाद्यच् ।
अस्य षड्जः कामोद्दीपक इत्यर्थः । तेनाध्वेन मोदितः तेन अस्मद्दा-
समोदितेन अतएव रक्षोधावस्य स्व इति रसुखामवता शीगहास्वता
अतएव प्रेमुणा मनःसु पुंसां चित्तेषु दर्पितेन वसता न्यियतेः कान्ति
का वसतिसुधो रहितोद्गगम. । नीति वृक्षीयादिष्वे ‘ककाराहुत्त-
मानार्दता । कान्तैश्चक्रमस्तेन कान्ता जनेन । जातावेकवचनम् ।
प्रथमं रहसि बलाद् टंकोलिकेषु कासुष्ट गिरौ वहे रते सुरते हेमन्ते
मयाहैमन्य त्राता हैमभीषु कपि दर्पोदबोधपीति भावः । सर्वत्राप्
च मतोपयीति हेमन्तशब्दा दर्शप्रत्ययः तुकारलोपश्च टिड्ढाणञिया-
दिना ङीप् । रतमोषु वे युगाः मेरते गम सुपीन् म न केऽपीत्यर्थः ।
मद् मदे इति भूते मद् । एतेनाभिर्मर्दिता शृङ्गारः इति अभ्यते ।
वसन्ततिलका वृत्तम् ॥ ७७ ॥

अथैकेन शिशिरं वर्णयति । गतवतामिति । अमलकोमलपल्लवली-
लया अचरला अमलपत्रिकाविशोऽमला निर्मलोऽपि पल्लवाश्रीमीला
तदा मनःकृपयेन्दनं विस्मयमुच्चतामिव स्थितानामिवेन्दु मे तां मधुकर्तां
मधुकराणां मन्दश्रमी कम्भोषु सततविर्पेषु मदोदयन् स्थितिर्दष्टा
वा कम्भोदचा मारविं दक्षिः रसकलां रसेन मधुस्वादेन कलामलङ्-
मधुराम् । ध्वनी तु मधुरास्फुटे कल इत्यमरः । गिरं वाचममृतद्रवी-
रचनम् । मधुकरैश्चरकर मधुकराभानवर पल्लवलीलया सन्निरविहस
वेदवन्यत्र इति गुणदेशोऽर्थः । द्रुतविलम्बितं वृत्तम् ॥ ७८ ॥

कुर्वन्तमित्यतिभरेण नगानवाचः
पुष्पैर्विराममलिनां च न गानवाचः ।
श्रीमान्समस्तमनुसानु गिराविहन्तु-
म्विभ्रत्यचोदि स मयूरगिरां विहर्तुम् ॥७९॥
इति श्रीमाघकृते शिशुपालवधे महाकाव्ये
ऋतुवर्णनं नाम षष्ठः सर्गः ॥ ६ ॥

अनुगिरमृतुभिर्वितायमाना
मथ सविलोकयितुं वनान्तलक्ष्मीम्।
निरगमदभिराद्धुमादृतानां
भवति महत्सु न निष्फलः प्रयासः॥ १॥

दधति सुमनसो वनानि वह्वी
र्युवतियुता यदवः प्रयातुमीषुः।

इत्थं ऋतुगणप्रादुर्भावमभिधाय तत्फलतया भगवतः सानुचरस्य वनविहारमेवावर्णनमारभते। अनुगिरमिति। ऋतवः प्रादुर्भावान-
न्तरमेव हरिः गिरावित्यनुगिरम्। विभक्त्यर्थेऽव्ययीभावः। गिरेश्च
सेनकस्येति समासान्तः। ऋतुभिर्वितायमानां वितन्यमानाम्। तनोते
कर्मणि लटः शानजादेशः। तनोतेर्यकीति वैभाषिक आकारादेशः
वनान्तलक्ष्मीं विलोकयितुं निरगमत् निर्गतः। इणो गादिना गमे
र्लुङि [illegible]। ऋतुगणभक्तिं स्वीकर्तुमिति भावः। तथा हि
अभिराद्धुमाराधयितुमादृतानामादरं [illegible]मित्यर्थः। कर्तरि
क्तः। प्रयासः [illegible] महत्सु विषये निष्फलो न भवति न [illegible]
[illegible] भावः। [illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥ १॥

दधतीति। [illegible]। [illegible]। [illegible]
[illegible]। [illegible]। [illegible]
[illegible]। [illegible]। [illegible]
[illegible]।

मनसिशयमहास्त्रमन्यथामी
न कुसुमपञ्चकमप्यलं विसोढुम् ॥ २ ॥
अवसरमधिगम्य तं हरन्त्यो
हृदयमयत्नकृतोज्ज्वलस्वरूपाः ।

एव प्रयातुमीषुरिच्छन्ति स्म । अत्र हेतुमाह । अन्यथा युवजनाभावे अमी यद्वा मनसि शेते इति मनसिशयः कामः । अधिकरणे शेतेरित्यच्प्रत्ययः हलदन्तात्सप्तम्याः संज्ञायामित्यलुक् । तस्य महास्त्रभूतं कुसुमपञ्चकमपि पञ्चापि कुसुमानीत्यर्थः । पञ्चानां सङ्घः पञ्चकम् । सङ्ख्यायाः संज्ञासङ्घसूत्राध्ययनेष्विति कप्रत्ययः । विसोढुं मार्ष्टुं न शक्ताः । सकलकुसुमानां सामर्थ्ये तत्रारविन्दादीनामेव पञ्चबाणबाणत्वप्रमाणसिद्धत्वादिति भावः । अतो युवतिभिः सह प्रयातुं युक्तमिति वाक्यार्थेन वाक्यार्थसमर्थनाद्वाक्यार्थसमर्थनरूपकाव्यलिङ्गमलङ्कारः । अरविन्दमशोकञ्च चूतञ्च नवमल्लिका नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य सायकाः ॥ २ ॥

अवसरमिति । तमवसरं वसन्तागमलक्षणं कालं अधिगम्य हृदयं हरन्त्यो हृदयङ्गमा भवन्त्यः सर्वं हि प्राप्तकालमेव प्रियम्भवतीत्यर्थः यत्नेन कृतं न भवतीत्ययत्नकृतं तथाप्युज्ज्वलं स्वरूपं यासां ताः स्वभावसुन्दरमूर्तय इत्यर्थः अङ्गनास्तदानीं तस्मिन्नवसरे अवनिषु पदं न्यदधत निहितवत्यः पादचारेणैव चेलुरित्यर्थः । दधातेर्लङ्यात्मनेपदे न्यदधत इति तङ्भावादादेशः । अङ्गनासु विभ्रमसम्पदो विलाससम्पदः पदं न्यदधत तन्वीनां विलासाः प्रवृत्ता इत्यर्थः । अत्राङ्गनानां विलाससम्पदां चोभयेषामपि प्रकृतानामेव हृदयहरत्वादिना धर्मेणौपम्यस्य गम्यमानत्वात् केवलप्रकृतविषया तुल्ययोगितालङ्कारः । वाच्यभेदेनाप्यङ्गना-विलाससम्पदामुत्तरोत्तरस्य पूर्वपूर्वविशेषकत्वादेकावलीभेदोऽप्यस्ति ।

अवनिषु पदमङ्गनास्तदानीं
न्यदधत विभ्रमसम्पदोऽङ्गनासु ॥ ३ ॥
नखरुचिरचितेन्द्रचापलेखं
ललितगतेषु गतागतं दधाना ।
मुखरितवलयं पृथौ नितम्बे
भुजलतिका मुहुरस्खलत्तरुण्याः ॥ ४॥
अतिशयपरिणाहवान् वितेने
बहुतरमर्पितरत्नकिङ्किणीकः ।

इत्यलङ्कारेणालङ्कारध्वनिः ॥ ३ ॥

न्यदधत विभ्रमसम्पदोऽङ्गनास्वित्युक्तं ता एव प्रपञ्चयति । नखेति ललितगतेषु मन्दगमनेषु नखानां रुचिभिः प्रभाभिः रचिता इन्द्रचापलेखा यस्मिन् कर्मणि तद्यथा तथा गतागतं यातायाते । विप्रतिषिद्धं चानधिकरणवाचीति वैभाषिको द्वन्द्वैकवद्भावः । दधाना तरुण्याः भुजलतिका मुखराः कृता इति मुखरिताः ध्वनिता वलया यस्मिन् कर्मणि तद्यथा तथा । कटकोवलयोऽस्त्रियामित्यमरः । पृथौ नितम्बे मुहुरस्खलत् चस्खाल । अत्र नखरुचोत्याद्यलङ्कारगुण उक्तः । गतागतं दधाना अस्खलदिति सम्बन्धः । मुखरितवलयमिति तदलङ्कृतिः । तटस्था सूक्ता-वलम्बनादयः अन्य च विस्तारत इति चतुर्विधोऽप्युद्दीपनक्रम उक्तः । उक्तञ्च आलम्बनगुणाश्चैव तच्चेष्टा तदलङ्कृतिः । तटस्थाश्चेति विज्ञेयाः चतुष्कोद्दीपनक्रम इति । तत्रालम्बनं रसस्य समवायिकारणं नायिका नायक, [illegible] । एवमुत्तरत्रापि ॥ ४ ॥

अतिशयेति । अतिशयेन परिणाहवान् विशाल इत्यर्थः । अन्यथा

मनसिशयमहास्त्रमन्यथामी
न कुसुमपञ्चकमप्यलं विसोढुम् ॥ २ ॥
अवसरमधिगम्य तं हरन्त्यो
हृदयमयत्नकृतोज्ज्वलस्वरूपाः।

एव प्रयातुमीषुरिच्छन्ति स्म। अत्र हेतुमाह। अन्यथा युवतिजना-
भावे अमी यदवो मनसि शेते इति मनसिशयः स्मरः। अधिकरणे
शेतेरित्यच्प्रत्ययः हलदन्तात्सप्तम्याः संज्ञायामित्यलुक्। तस्य महा-
स्त्रभूतं कुसुमपञ्चकमपि पञ्चापि कुसुमानीत्यर्थः। पञ्चानां समूहः प-
ञ्चकम्। संख्यायाः संज्ञासङ्घसूत्राध्ययनेष्विति कप्रत्ययः। विसोढुं
नालं न शक्ताः। यदवः कुसुमस्य सामर्थ्यं तत्रारविन्दादीनामेव प-
ञ्चानां बाणत्वप्रमाणसिद्धत्वादिति भावः। अतो युवतिभिः सह प्रयाणं
युक्तमिति वाक्यार्थेन पदार्थसमर्थनाद्वाक्यार्थसमर्थनरूपकाव्यलिङ्गमल-
ङ्कारः। अरविन्दमशोकञ्च चूतञ्च नवमल्लिका नीलोत्पलञ्च पञ्चैते
पञ्चबाणस्य सायकाः ॥ २ ॥

अवसरमिति। तमवसरं सहजिगमिषाकालं अधिगम्य हृदयं
हरन्त्यो हृदयङ्गमा भवन्त्यः सर्वं हि प्रार्थ्यमानमेव प्रियम्भवतीत्यर्थः यत्नेन
कृतं न भवतीत्ययत्नकृतं तथाप्युज्ज्वलं स्वरूपं यासान्ताः स्वभावसुन्द-
रमूर्त्तय इत्यर्थः अङ्गनास्तस्मिन्नवसरे अवनिषु पदं न्यदधत
निहितवत्यः पादचारेणैव चेलुरित्यर्थः। दधातेर्लङ्यात्मनेपदेऽदभ्यस्तादिति
अत्सादादेशः। अङ्गनासु विभ्रमसम्पदो विलाससम्पदः पदं न्यदधत त-
दानीं विलासाः प्रवृत्ता इत्यर्थः। अत्राङ्गनानां विलाससम्पदां चोभ-
योनामपि प्रकृतानामेव हृदयहरणादिना धर्मेणाभिसम्बन्धस्य गम्य-
मानत्वात् केवलप्रकृतविषया तुल्ययोगितालङ्कारः। पादभेदेनाप्यङ्गना-
विलाससम्पदामुत्तरोत्तरस्य पूर्वपूर्वविशेषकत्वाच्चमाद्रेका एकावलीभेदोऽप्यत्र ,

अवनिषु पदमङ्गनास्तदानीं

न्यदधत विभ्रमसम्पदोऽङ्गनासु ॥ ३ ॥

नखरुचिरचितेन्द्रचापलेखं

ललितगतेषु गतागतं दधाना ।

मुखरितवलयं पृथौ नितम्बे

भुजलतिका मुहुरस्खलत्तरुण्याः ॥ ४॥

अतिशयपरिणाहवान् वितेने

बहुतरमर्पितरत्नकिङ्किणीकः ।

इत्यलङ्कारेणालङ्कारध्वनिः ॥ ३ ॥

न्यदधत विभ्रमवदङ्गनास्वित्युक्तं तदेव प्रपञ्चयति । नखेति ललितगतेषु मन्दगमनेषु नखानां रुचिभिः प्रभाभिः रचिता इन्द्रचापलेखा यस्मिन् कर्मणि तद्यथा तथा गतागतं यातायाते । 'द्विप्रतिषिद्धं चानधिकरणवाचीति' वैभाषिको द्वन्द्वैकवद्भावः । दधाना तरुण्याः भुजलतिका मुखराः कृता इति मुखरिताः ध्वनिता वलया यस्मिन् कर्मणि तद्यथा तथा । कटकोवलयोऽस्त्रियामित्यमरः । पृथौ नितम्बे मुहुरस्खलत् चलत्वाच्च । अत्र नखरुचोत्थालम्बनगुण उक्तः । गतागतं दधाना अस्खलदिति तच्चेष्टा । मुखरितवलयमिति तदलङ्कृतिः । तटस्थास्तूक्ता-वसन्तादयः अन्ये च विस्तारत इति चतुर्विधोऽप्युद्दीपनक्रम उक्तः । उक्तञ्च आलम्बनगुणश्चैव तच्चेष्टा तदलङ्कृतिः । तटस्थाश्चेति विज्ञेयाः चतुर्धोद्दीपनक्रम इति । तत्रालम्बनं रसस्य समवायिकारणं नायिका नायकश्च । तद्गुणो रूपलावण्यादिः । तच्चेष्टा भावहावादिः । अन्यत् सुगमम् । एवमुत्तरत्रापि ॥ ४ ॥

अतिशयेति । अतिशयेन परिणाहवानतिविशाल इत्यर्थः । अन्दमा

अतिरभसकृतालघुप्रतिज्ञा-
मनृतगिरं गुणगौरि ! मा कृथा माम् ॥ ७ ॥
न च सुतनु ! न वेद्मि यन्महीया-
न सुनिरसस्तव निश्चयः परेण ।
वितथयति न जातु मद्वचोऽसा-
विति च तथापि सखीषु मेऽभिमानः ॥ ८ ॥

प्रत्यासमीप्ये वर्त्तमानप्रत्ययः कर्त्तरभिप्राये आत्मनेपदम् । इति मया तत्प्रापणोऽभ्यधायि अभिहितम् । दधातेः कर्मणि लुङ् आतो युक् चिण्कृतोरिति युगागमः । हे गुणगौरि ! गुणैः सौभाग्यादिभिर्गौरि पार्वतीति रूपकम् । अतिरभसे नातित्वरया कृता अलघुर्महती प्रतिज्ञा त्वदानयनार्था यया तां मामनृतगिरमसत्यवाचं मा कृथाः मा कार्षीः मद्वचनं सर्वथा कर्त्तव्यमित्यर्थः । करोतेः लुङि थास् न माङ्योगे इत्यडागमप्रतिषेधः ॥ ७ ॥

ननु मत्प्रतिज्ञापि दुस्त्याज्येति विप्रतिषेधमाशङ्क्याह । न चेति । हे सुतनु ! शुभाङ्गि ! दीर्घान्तोत्तरपदात्सम्बुद्धि. अन्यथा गुणः स्यात् । अहं न वेद्मीति न किन्तु वेद्म्येवेत्यर्थः । किमहं वेद्मीत्यत आह । महीयान्महत्तरस्तव निश्चयः त्वदेनैक्यं प्रतिज्ञापरेण जनान्तरेण सुनिरसः सुखमोच्यः । अस्यतेः खल्प्रत्ययः । स न भवतीत्यसुनिरस इति यत् तदित्यर्थलभ्यम् । उद्देश्येन विधेयाक्षेपाद्यच्छब्दस्योत्तरवाक्यस्थत्वाच्च न पूर्ववाक्ये तच्छब्दप्रयोग इति निरवद्यः । तथापि विदितत्वेऽपि असौ मत्सखी जातु कदाचिदपि मद्वचो न वितथयति नान्यथाकरोतीति सखीषु मध्ये मेऽभिमानः स्वप्रतिज्ञा भङ्गेऽपि मत्प्रतिज्ञामेव पालयतीत्यहङ्कारादिः महत्प्रतिज्ञातमित्यर्थः ॥ ८ ॥

इति वदति सखीजनेऽनुरागा
द्दयिततमामपरश्चिरं प्रतीक्ष्य ।
तदनुगमवशादनायतानि
न्यधित मिमान इवावनिम्पदानि॥ १३ ॥
यदि मयि लघिमानमागताया
न्तव धृतिरस्ति गतास्मि सम्प्रतीयम् ।
अनिभृतपदपातमापपात
प्रियमिति कोपपदेन कापि सख्या ॥ १४ ॥

दननुभूतखेदत्वेति न किन्तु चेत्येवेत्यर्थः । अतः कथं शीघ्रमायास्यतीति भावः । अत्राप्यनिषेधनिवर्तने द्वौ प्रतिषेधाविति वामनः ॥ १२ ॥

इतीति । सखीजने इति वदति सति अपरः कश्चिद्दयिततमां अनुरागात् स्नेहात् चिरं प्रतीक्ष्य तदनुगमवशात् तस्याः प्रियायाः अनुगमः पश्चाद्गमनं तस्य वशादनुसारादनायतानि मिमान मानं कुर्वाण इवेत्युत्प्रेक्षा । माङ्‌ लटः कर्तरि शानजादेशः श्लाविति द्विर्भावः । अनायतान्यनतिदीर्घाणि पदानि न्यधित निहितवान् । धाञो लुङि तङ् स्थाघ्वोरिच्चेतीकारः सिच. कित्त्वान्न गुणः ह्रस्वादङ्गादिति सकारलोपः । एषा च नायिका स्वाधीनपतिका । स्वाधीनपतिका सा तु या न मुञ्चति वल्लभमिति लक्षणात् । वृत्तं चेयम् ॥ १३ ॥

अथ काचित्पुरः प्रयातप्रियमिलनाय शीघ्रानुधावनं प्रार्थयमानां सखीमाह । यदीति । हे सखि मयि लघिमानमागतायां स्वयङ्गमनेन लाघवं प्राप्तायामन्तर धृतिरस्ति यदि सन्तोषो भवति चेत् । धृतिः सन्तोषधैर्ययोरित्यमरः । इयमेतावत्यैव सम्प्रत्यधुनैव अथ एव गताऽस्मि
. वदन्तीति शेषः । इतिना गम्यमानार्थस्याप्रयोगः । अन्यथा ·

अविरलपुलकः सह व्रजन्त्याः
प्रतिपदमेकतरस्स्तनस्तरुण्याः ।
घटितविघटितः प्रियस्य वक्ष
स्तटभुवि कन्दुकविभ्रमं बभार ॥ १५ ॥
अशिथिलमपरावसज्य कण्ठे
दृढपरिरब्धबृहद्बहिस्तनेन ।

पौनरुक्त्यादित्यालङ्कारिकाः । छद्मना सह कोपपदेन कोपव्याजेन वस्तुतस्तु रागादेवेति भावः व्याजोऽपदेशो लक्ष्यञ्च निमित्तं व्यञ्जनं छद्मिति चामरः । कविद्राविका द्रुततराः शीघ्रतराः पदपाताः पादन्यासा यस्मिन् कर्मणि तद्यथा तथा प्रियं वल्लभमापतन्तमनुधावति स्म । एषा च स्वयमदृष्टत्वा स्वलाघवशङ्कितया पूर्वं निराकृतप्रिया अथेदानीं स्वयमनुसरन्ती पश्चात्तप्ता चेति गम्यते । अत कलहान्तरिता । कोपात्कान्तं पराणुद्य पश्चात्तापसमन्वितेति लक्षणात् ॥ १४ ॥

अविरलेति । सह व्रजन्त्या पार्श्वमाश्रित्य गच्छन्त्या इत्यर्थः तरुण्याः सम्बन्धी अविरलपुलकः प्रियाङ्गसङ्गमात्सान्द्ररोमाञ्चः एकतरोऽन्यतरः द्वयोरन्यः सन्निहितः इति भावः । एकाच्च प्राचामिति द्वयोरेकस्य निर्द्धारणे डतरच् प्रत्ययः । स्तनः प्रियस्य वक्षस्तटमिव तस्य भूः प्रदेशस्तस्यां वक्षस्तटभुवि प्रतिपदं घटितविघटितः संयुक्तवियुक्तः पतितोत्पतित इति यावत् । विशेषणयोरपि मिथोगुणप्रधानभावविवक्षया विशेषणविशेष्यबहुलमिति समासः । कन्दुकविभ्रमं कन्दुकशोभाम् । गेन्दुकः कन्दुकः इत्यमरः । बभार । अन्यविभ्रमस्यान्यसम्बन्धायोगात्सादृश्याक्षेपे निदर्शना । एषा च प्रियपार्श्वगामिनी । अत एव प्रस्तुतमदनरसैस्तत प्रागल्भ्यमाप्ता षट्पदिका स्वाधीनपतिका मुग्धा प्रगल्भा चेत्यनुसन्धेयम् ॥ १५ ॥

अथापरस्या अपरकृतिविशेषं विशेषकेणाह । अशिथिलमित्यादि ।

हृषिततनुरुहा भुजेन भर्तु-
र्मृदुमृदु व्यतिविद्धमेकबाहुम् ॥ १६ ॥
मुहुरसममाघ्नती नितान्त-
प्रणदितकाञ्चि नितम्बमण्डलेन ।
विषमितपृथुहारयष्टि तिर्यक्
कुचमितरत्तदुरःस्थले निपीड्य ॥ १७ ॥
गुरुतरकलनूपुरानुनादं
सललितनर्तितवामपादपद्मा ।

अपरा स्त्री हर्षे परिरब्धो हृष्टोऽत एव हृषितानि उद्धृतानि तनुरुहाणि रोमाणि यस्य तेन पुलकितेनेत्यर्थः । किन्तूत्तरपदोक्तं (?) हृषेर्लोमसु इतीडागमः । भुजेन भर्तुः पीनभाजुना व्यतिषङ्गं गाढं यथा तथा व्यतिविद्धं व्यतिषक्तं मृदु कोमलमेकबाहुमितरदेकबाहुमभर्तुः कण्ठे प्रथियित्वा हृदयवल्लभस्य जगामेति भाविना सम्बध्यते ॥ १६ ॥

मुहुरिति । पुनः किं कृत्वा नितम्बमण्डलेन कर्त्रा नितान्तमतिशयेन प्रणदिता प्रकर्षेण नदन्ती काञ्ची यस्मिन् कर्मणि तद्यथा तथा । उपसर्गादसमासेऽपि णोपदेशस्येति णत्वम् । मुहुरसकृत् प्राणेशमाघ्नती ताडयन्ती । हन्तेराङ्पूर्वात्. अकर्मकात् इति ण्यन्तस्य स्वाङ्गकर्मकत्वात् आङो यमहन इत्यात्मनेपदम् । विषमिता विषमीकृता पृथुहारयष्टिर्यस्मिन् कर्मणि तद्यथा तथा इतरत् पूर्वश्लोकोक्ताद्भिन्नं स्तनाद्न्यत् द्वितीयमित्यर्थः, कुचकलशं भर्तुरुरःस्थले तिर्यक् निपीड्य पूर्ववदन्वयः ॥ १७ ॥

गुरुतरेति । पुनर्गुरुतरः मान्द्रतरः कलो मधुरश्च नूपुरस्य नुनादो ऽनुनादो यस्मिन् कर्मणि तद्यथा तथा सललितं सलीलं नर्तितं व्यापारितं वामं सव्यम्पादपद्मं यया सा इतरद्विषमपदमतिलोलं स्मरपरवशत्वादतिचपलं यथा तथा व्याद्धाना निक्षिपन्ती सती भर्तुरस्य मन्मर-

इतरदनतिलोलमादधाना
पदमथ मन्मथमन्थरं जगाम ॥ १८ ॥
विशेषकम्।
लघुललितपदन्तदंसपीठ
द्वयनिहितोभयपाणि पल्लवान्या ।
सकठिनकुचचूचुकप्रणोदं
प्रियमबला सविलासमन्वियाय ॥ १९ ॥
जघनमलघुपीवरोरुकृच्छ्रा
द्दुरुनिविरीसनितम्बभारखेदि ।

मदमन्वगाम । एषा च पार्श्वगामिनी ॥ १८ ॥

अथान्यासामप्येकैकेन गतिविशेषमाह । लघ्वित्यादि अन्या अबला स्त्री तस्य प्रियस्यांसौ पीठे इव तयोर्द्वन्द्वे निहितावुभौ पाणिपल्लवौ यया सा सती । उभादुदात्तोनित्यमिति अयच्प्रत्ययस्येदं प्रयोजनं वृत्तिविषये उभशब्दस्य प्रयोगोमाभूदुभयशब्दस्यैव यथा स्यादित्युभयतोऽत्यादि भवतीति । लघुनी द्रुते ललिते च पदे यस्मिन् कर्मणि तद्यथा तथा कठिनाभ्यां कुचचूचुकाभ्यां स्तनाग्राभ्यां यः प्रणोदोनिर्पीडनन्तेन सह यथा तथा । चूचुकन्तु कुचाग्रं स्यादित्यमरः । तेन सहेत्यादिना समासे वोपसर्जनस्येति सहशब्दस्य स भावः वोपदेशत्वात्प्रणोद इति णत्वम् । सविलासं च प्रियमन्वियायानुजगाम । एषा पृष्ठगामिनी ॥ १९ ॥

जघनमिति । काचित् स्त्री अलघु गुरु पीवरौ पीनौ चोरू यस्य तत् जघनं हरन् निविरीसोऽनिबिडः । निबिडं निविरीसं च दृढं गाढं प्रचक्षते इति वैजयन्ती । नेर्बिडज्बिरीसचाविति निशब्दाद्बिरीसच् प्रत्ययः । स च यो नितम्बः स्त्रीकटिपश्चाद्भागः । पश्चान्नितम्बः स्त्रीकट्याः

दयिततमशिरोधरावलम्बि
स्वभुजलताविभवेन काचिदूहे ॥ २० ॥
अनुवपुरपरेण बाहुमूल
प्रहितभुजाकलितस्तनेन निन्ये ।
निहितदशनवाससा कपोले
विषमवितीर्णपदं बलादिवान्या ॥ २१ ॥
अनुवनमसितभ्रुवः सखीभिः
सह पदवीमपरः पुरोगतायाः ।

क्लीबे तु भवनं पुरे इत्यमरः । स एव भारस्तम् खिदान इति तथो-
क्तम् । अभीक्ष्णेरिति । अथ । कर्णपुरोभागं दयिततमस्य शिरो-
धरायां ग्रीवायामवलम्बिन्यां लम्बमानयोः स्वभुजलतयोर्विभवेन सामर्थ्येन
लब्धादूहे उवाह । वहेः स्वरितेत्त्वात्कर्त्रभिप्राये आत्मनेपदम् ।
इयञ्च दृष्टगामिनी प्रियकण्ठावलम्बा ॥ २० ॥

अनुवपुरिति । अन्या स्त्री वपुषः पश्चादनुवपु स्त्रीपृष्ठभागे ।
अव्ययं विभक्तीत्यादिना पश्चादर्थेऽव्ययीभावः । बाहुमूलयोः स्कन्ध-
योः प्रहितावथ प्रसारितौ भुजौ ताभ्यामाकलितस्तनेन गृहीतस्तनेन
कपोले निहितदशनवाससा न्यस्ताधरेण किञ्चिदा इतरस्त्र्याः कन्याः
कपोलं चुम्बतेत्यर्थः अपरेण कामिना विषमक्रियाहि...त्पात शिष्टं नि-
तीर्णपदं न्यस्ताङ्घ्रि यथा तथा बलादिव निन्ये नीता आरोप्य नीय-
मानेव गमयाञ्चक इत्यर्थः । एषा पुरोगामिनी ॥ २१ ॥

अनुवनमिति । अपरः कामी अनुवनं वनं प्रति सखीभिः सह
पुरोगताया असितभ्रुवः स्वकान्तायाः पदवीमुरसि वक्षसि सरस
आर्द्रं रागेणालक्तकेनारञ्जितस्य तस्य पादस्य या रेखा विन्यासः सा

उरसि सरसरागपादलेखा
प्रतिमतयानुययावसंशयानः ॥ २२ ॥
मदनरसमहौघपूर्णनाभी
ह्रदपरिवाहितरोमराजयस्ताः ।
सरित इव सविभ्रमप्रयात
प्रणदितहंसकभूषणा विरेजुः ॥ २३ ॥
श्रुतिपथमधुराणि सारसाना

प्रतिमा उपमानं यस्याः सा तत्प्रतिमा तस्य भावस्तत्ता तया तत्सदृशत-येत्यर्थः असंशयानोऽसन्दिहानः । शीङो लटः कर्त्तरि शानजादेशः । अनुययौ । अत्र पादरेखाप्रतिमतयेति सादृश्यवस्तुना सुरतकालीनं पादताडनं वस्तु सरागपदार्थमहिम्ना प्रतीयत इति पदगतः स्वतःसि-द्धार्थशक्तिमूलो वस्तुध्वनिः संलक्ष्यक्रमध्वनेर्भेदः ॥ २२ ॥

मदनेति । मदनस्य रसः शृङ्गारः अन्यत्र रसो जलं तस्य महौ-घेन महापूरेण पूर्णां नाभय एव ह्रदास्तेषां परिवाहाः क्षताः परिवाहि-ताजनोच्चारीकृता रोमराजयो यासां तास्ताः । जलोच्छ्वासाः परीवाहा इत्यमरः । सरिज्जलानि ह्रदानापूर्य परितः उच्छलन्तीति प्रसिद्धिः । सविभ्रमैः सविलासैः प्रयातैः प्रकृष्टगमनैः प्रणदिताः शिञ्जिताः ये हं-सकाः पादकटकाः । हंसकाः पादकटका इत्यमरः । अन्यत्र हंसा एव हंसकाः मरालास्त एव भूषणानि यासां ताः स्त्रियः सरित इव वि-रेजुः । मदनरसपूर्णत्वेन नाभीनां तद्ह्रदोपमत्वं व्यज्यते । परिवाहि-तरोमराजय इति रोमराजीनां परिवाहत्वरूपणान्नाभय एव ह्रदा इति रूपकान्यथानुपपत्त्या सरित इवेति श्लिष्टविशेषणेयमुपमा श्लेष एवेत्यन्ये ॥२३॥

श्रुतिपथेति । अनुनदि नदीनां समीपे । समीपार्थेऽव्ययीभावः ।

मनुनदि शुश्रुविरे कृतानि ताभिः ।
विदधति जनतामनःशरव्य
व्यधपटु मन्मथचापनादशङ्काम् ॥ २४ ॥
मधुमथनवधूरिवाह्वयन्ति
भ्रमरकुलानि जगुर्यदुत्सुकानि ।
तदभिनयमिवावलिर्वनाना
मतनुत नूतनपल्लवाङ्गुलीभिः ॥ २५ ॥

अनुनदीमावयेति मधुपकार्ये त्रुस्तम् । ताभिः स्त्रीभिः जनानां समूहो जनता । ग्रामजनेत्यादिना सामूहिकस्तल् प्रत्ययः । तस्याः मनांसि एव शरव्यं लक्ष्यम् । लक्ष्यं शरव्यं चेत्यमरः । तस्य व्यधः वेधः । व्यधजपोरनुपसर्गे इत्यप्प्रत्ययः । तत्र पटुः समर्थो यो मन्मथचापनादः स इति शङ्कां भ्रमं विदधति विदधानानि । वा मधुकरकृतेति वैकल्पिको नुम्-निषेधः । श्रुतिपथमधुराणि श्राव्याणीत्यर्थः सारसानां रुतानि शुश्रुविरे श्रुतानि । सारसरुतश्रवणान्मन्मथोद्दीपनमासीदित्यर्थः । अत्र सारसरुते मन्मथचापनादभ्रमाद्भ्रान्तिमदलङ्कारः । कविसम्मतसादृश्याद्विषयेऽपिहितात्मनि । आरोप्यमाणानुभवो यत्र स भ्रान्तिमान्मतः इति लक्षणात् ॥ २४ ॥

मधुमथेति । उत्सुकान्युन्मनांसि भ्रमरकुलानि मधुमथनस्य हरेर्वधूराह्वयन्त्याकारयन्तीवेत्युत्प्रेक्षा । ह्वेञ् आकारणाह्वानयोरित्यमरः । मधुमथनोर्नित्यमिति ह्वयतेः शतुर्नुमागमः । जगुरिति यत् । गायतेर्लिट् । वनानामावलिर्नूतनपल्लवा यथाङ्गुल्य इत्येक देशरूपिसावयवरूपकम् अस्यैव वनावली मत्तकोकिलगमकत्वादिति । ताभिस्तदभिनयं व्यञ्जकचेष्टामतनुतेव । व्यञ्जकाभिनयौ समाविस्त्यमरः । पञ्चरागमयेनैव हस्तेनार्थं प्रदर्शयेदिति वचनात् । गीतार्थस्याह्वानस्य व्यञ्जकमङ्गुलिभिर-

असकलकलिकाकुलीकृतालि
स्खलनविकीर्णविकासिकेसराणाम्
मरुदवनिरुहां रजोवधूभ्यः
समुपहरन् विचकार कोरकाणि ॥ २६ ॥
उपवनपवनानुपातदक्षै
रलिभिरलम्भि यदङ्गनागणस्य ।

कार्णैरिवेति क्रिया स्वरूपोत्प्रेक्षा । पूर्वोक्तच्छन्दसानुप्रासिता साक्षान्नो-क्तेः वाच्यापेक्षेति सजातीयसङ्करोऽपीति ॥ २५ ॥

असकलेति । मरुद्वनिरुहः असकला असमग्रा अर्द्धविकचा इ-त्यर्थः ताभिः कलिकाभिः कोरकैराकुलीकृतानां सङ्कोचितानां अलिनां स्खलनेन विघट्टनेन विकीर्णा विक्षिप्ता विकासिनः केसरा किञ्जल्का येषां तेषामवनिरुहाम् । वृक्षाणाम् । रजः परागं वधूभ्यः समुपहरन् प्रय-च्छन् यथा कश्चित्करोति भाव । धनमर्ज्जयन्वसतीतिवत् लक्षणहेत्वोः क्रियाया इति हेत्वर्थे शतृप्रत्ययः । कोरकाणि कुड्मलानि । कलिका कोरकः पुमानित्यमरकोषे पुंस्त्वाभिधानं प्रायिकाभिप्रायम् । कोरकं कुड्मलेऽपि स्यात्कङ्कोलकमृणालयोरिति विश्वप्रकाशादौ नपुंसकत्वा-भिधानात् । विचकार विक्षिप्तवान्विकासयामासेत्यर्थः विपूर्वात्किरतेः कर्तरि लिट् । अत्र कोरकविकासकरणस्य समुपहरन्निति हेतुत्वेन वधूसम्प्रदा-नक परागोपहरणार्थत्वादित्युत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या ॥२६॥

उपवनेति । वने उपवनम् । विभक्त्यर्थेऽव्ययीभावः । तत्र यः पवनस्तस्यानुपातेनानुसारेण दक्षैरिष्वेरलिभिरनुधावनद्वारेण यदङ्ग-नाजनस्य सम्बन्धी परिमलोऽलम्भि । विमर्दोत्थे परिमलो गन्धे जनमनोहरे इत्यमरः । स एव विम्बोष्ठयोरपि । तस्य स्पर्शो ऽस्यार-विन्दस्य विस्पष्टमो इति । कर्मणि लुङ् । यमे कर्मणि लुङ् चि-

परिमलविषयस्तदुन्नताना-
मनुगमने खलु सम्पदोऽग्रतःस्थाः ॥ २७ ॥
रथचरणधराङ्गनाकराब्ज-
व्यतिकरसम्पदुपात्तसौमनस्याः ।
जगति सुमनसस्तदादि नूनं
दधति परिस्फुटमर्थतोऽभिधानम् ॥ २८ ॥

भाषायामुभयत्रेति विकल्पादनुभाव [illegible] उपधाया इति वृद्धि । तस्मादुन्नतानां महतामनुगमने पश्चाद्गमने अनुवृत्तौ च सम्पदोऽग्रतःस्था पुरोवर्तिन्य खलु । सुपि स्थ इति कप्रत्ययः । अत्रानुगमनयोर्द्वयो रभेदाध्यवसायात् [illegible] तोऽयमर्थान्तरन्यास सामान्येन विशेषसमर्थनरूपः ॥ २७ ॥

रथेति । सुमनसः पुष्पाणि रथचरणं चक्रं तस्य धरो धारयिता हरिः । तद्धारिणः । तस्याङ्गनानां कराब्जैर्व्यतिकरः सम्पर्कः स एव सम्पत् तया उपात्तं लब्धं सौमनस्यं सुमनस्त्वं सन्तुष्टचित्तत्वं या भिस्ताः सत्यः अतएव सौमनस्यलाभ [illegible] कर्मणि तदादि तत प्रभृतीत्यर्थः अर्थतः [illegible] परिस्फुटम् [illegible] अभि- धानं सुमनस इति नामधेयं दधति । [illegible] नाम । आख्याह्वे चाभिधानं च नामधेयं च नाम च इत्यमरः । स्त्रियः सुमनसः पुष्पम् इत्यमरः । [illegible] । अत्रो- पात्तसौमनस्या इति [illegible] पदार्थस्य [illegible] सुमन [illegible] वाक्यार्थ [illegible] तदादित्वोक्तेरिति [illegible] व्याख्यानं [illegible] ॥ २८ ॥

अभिमुखपतितैर्गुणप्रकर्षा-
दवजितमुद्धतिमुज्ज्वलां दधानैः।
तरुकिसलयजालमग्रहस्तैः
प्रसभमनीयत भङ्गमङ्गनानाम् ॥ २९ ॥

मुदितमधुभुजो भुजेन शाखा-
श्चलितविशृङ्खलशङ्खकं धुवत्याः
तरुरतिशयितापराङ्गनायाः
शिरसि मुदेव मुमोच पुष्पवर्षम् ॥ ३० ॥

अभिमुखेति। अभिमुखपतितैः सङ्गमार्थमभिमुखमागतैः उज्ज्वला-मुत्कटामुद्धतिमुपरिगमनमौद्धत्यञ्च दधानैः अग्राणि च ते ह-स्ताश्चेति समानाधिकरणसमासः। अतएव हस्ताग्राग्रहस्तयोर्गुणगुणि-नोर्भेदाभेदादिति वामनः। तैरग्रहस्तैः करैर्भिः गुणप्रकर्षाद्धेतोरवजि-तमवधीरितं तरुकिसलयजालं प्रसभं बलात् भङ्गं छेदं पराजयञ्चानीयत नीतम्। प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणामिति किसलयजालस्य प्राधान्यादभिधानम्। अत्रापह्नवे विशेषणमहिम्ना जिगीषुवृत्तस्य किसलयजाले चेतनव्यवहारस्य च प्रतीतेः समासोक्तिरलङ्कारः॥ २९॥

मुदितेति। मुदिता हृष्टा मधुभुजो मधुपा यासु ताः शाखा भुजेन ह-स्तेन चलितानि विशृङ्खलानि अर्गलितान्यपि शङ्खकानि वलयानि य-स्मिन् कर्मणि तद्यथा तथा धुवत्याः कम्पयन्त्याः। धू विधूनने इति धातोस्तौदादिकाच्छतरि ङीप्। कुटादि चेति गुणवृद्धिप्रतिषेधादुवङा-देशः। अतिशयिता सौन्दर्येणातिक्रान्ता अपराङ्गना यया तस्याः शिरसि तरुः मुदेव सन्तोषेणेवेति गम्योत्प्रेक्षा पुष्पवर्षं पुष्पवृष्टिं मुमोच ॥ ३०॥

अनवरतरसेन रागभाजा
करजपरिचितिलब्धसंस्तवेन ।
सपदि तरुणपल्लवेन वध्वा
विगतदयं खलु खण्डितेन मम्ले ॥ ३१ ॥
प्रियमभि कुसुमोद्यतस्य बाहो-
र्नवनखमण्डनचारु मूलमन्या ।

अनवरतेति । अनवरतरसेनानवच्छिन्नद्रवेण [illegible] रागभाजा रक्तेन प्रीतिभाजा च करजपरिचितिषु नखक्षतेषु लब्धसंस्तवेन प्राप्तपरिचयेन । संस्तवः स्यात्परिचय इत्यमरः । वध्वा विगतदयं नि-र्दयं यथा तथा खण्डितेन छिन्नेन [illegible] च [illegible] [illegible] च । [illegible] इति [illegible] । सपदि मम्ले म्लानं खलु प्रतिभाति । म्लायतेर्भावे लिट् । अत्राभिधायाः प्रकृतार्थे नियन्त्रितत्वादप्रकृतार्थप्रतीतिः [illegible] न श्लेषः तेन चो-भयोः पल्लवयोरौपम्यं गम्यते ॥ ३१ ॥

अथाष्टौ पुष्पावचये शृङ्गारचेष्टाः [illegible] विशेष-केणाह । प्रियमिति । अन्या स्त्री प्रियमभि प्रियस्याग्र इत्यर्थः । अभिरभागे इत्यभेर्लक्षणार्थकर्मप्रवचनीयत्वात्तद्योगे द्वितीया । कुसुमो-द्यतः कुसुमोद्यतः कुसुमग्रहणार्थमुत्क्षिप्त इत्यर्थः । [illegible] । तस्य [illegible] मण्डनं तेन चारु सुन्दरं मूलं [illegible] [illegible] ॥ ३२ ॥

मुहुरितरकराहितेन पीन
स्तनतटरोधि तिरोदधेऽशुकेन ॥ ३२ ॥
विततवलिविभाव्यपाण्डुलेखा
कृतपरभागविलीनरोमराजिः ।
कृशमपि कृशतां पुनर्नयन्ती
विपुलतरोन्मुखलोचनावलग्नम ॥ ३३ ॥
प्रसकलकुचबन्धुरोद्धुरोरः
प्रसभविभिन्नतनूत्तरीयबन्धा ।
अवनमदुदरोच्छ्वसद्दुकूल

अथापरस्याश्चेष्टाविशेषं षड्भिः कुलकेनाह । विततेत्यादि । क
र्विहृतताभिर्गात्रोन्नमनादिभिरायताभिर्वलिभिस्त्रिवलिभिर्विभाव्याः संलक्ष्य
पाण्डुरेखा रेखाकारा वलीत्रयान्तरालभागा ताभि कृतपरभागा
नितरामौत्कर्ष्यं अतएव विशेषेण लीना विलीना रोमराजिर्यस्याः स
तथोक्ता कृशमपि स्वभावत एवेति भाव अवलग्न मध्यम् । मध्य
मावलग्नं च मध्योऽस्त्रीत्यमरः । पुन कृशतां नयन्ती अपाङ्गुरवक्ष
गात्रविजृम्भणादिति भाव तथा विपुलतरे उन्मुखे ऊर्ध्वे
च लोचने यस्याः सा अयम् पश्चपद्कणार्थमिति भाव ॥ ३३ ॥

प्रसकलेति । प्रसकलाभ्यामतिसमपाभ्यां कुचाभ्यां बन्धुरं नतोन्नत
बन्धुरं तूनतानतमित्यमर । उद्धुर निर्भर दृढमिति यावत् । अकृपूरि
त्यादिना समासान्त । तस्मादुरस प्रसभाद्वलात्कारादिभिन्नो विश्लिष्ट
तनूत्तरीयबन्धो यस्याः सा गात्रविजृम्भणा हि रक्तकुचावरणेत्यर्थः । कि
अवनमतोऽत्यर्थं नमनादुदरादुच्छ्वसत् विश्लिष्य दुकूल यस्य तत् कृतव

स्फुटतरलक्ष्यगभीरनाभिमूला ॥ ३४ ॥
व्यवहितमविजानती किलान्त
र्वणभुवि वल्लभमाभिमुख्यभाजम् ।
अधिविटपि सलीलमग्रपुष्प
ग्रहणपदेन चिरं विलम्ब्य काचित् ॥ ३५ ॥
अथ किल कथिते सखीभिरत्र
क्षणमपरेव ससम्भ्रमा भवन्ती ।
शिथिलितकुसुमाकुलाग्रपाणिः
प्रतिपदसंयमितांशुकावृताङ्गी ॥ ३६ ॥

स्फुटतरं यथा तथा लक्ष्यं गभीरमगाधं नाभिमूलमन्तरालं यस्याः सा ॥ ३४ ॥

व्यवहितमिति । काचित् स्त्री उक्तविशेषणविशिष्टा अङ्गना अन्तर्वणभुवि वनाभ्यन्तरप्रदेशे । प्रनिरन्तरित्यादिना वनशब्दनकारस्य णत्वम् । व्यवहितं तिरोहितं आभिमुख्यभाजं अभिमुखावस्थितमित्यर्थः तं वल्लभं प्रियं अविजानती किल अजानतीव अधिविटपि विटपेषु इत्यर्थे विभक्त्यर्थेऽव्ययीभावः । सलीलं यथा तथा अग्रे इदानीं यानि पुष्पाणि तेषां ग्रहणस्य पदेन मिषेण चिरं विलम्ब्य प्रियाय स्वाङ्गप्रकाशनार्थमिति भावः ॥ ३५ ॥

अथेति । अथ विलम्बानन्तरं अत्रास्मिन् प्रिये सखीभिः कथिते सति । किल यस्मात् कारणात् निवेदिते सति क्षणं ससम्भ्रमा अपरेव पूर्वविपरीतव्यापारकारणादन्येव भवन्ती बुद्धिपूर्वकरित्यसम्भ्रमनाट्येन प्रदर्शयन्तीत्यर्थः । शिथिलितः पुष्पग्रहणादिरहितः कुसुमाकुलः कुसुमव्याप्तोऽग्रपाणिर्यस्याः सा तथोक्ता प्रतिपदं प्रतिस्थानं संयमितेन नियमितेनांशुकेन । अंशुकं स्यादिति विश्वः । आवृतमङ्गं यस्याः सा तथोक्ता इतीयं

कृतभयपरितोषसन्निपातं
सचकितसस्मितवक्त्रवारिजश्रीः ।
मनसिजगुरुतत्क्षणोपदिष्टं
किमपि रसेन रसान्तरं भजन्ती ॥ ३७ ॥
अवनतवदनेन्दुरिच्छतीव
व्यवधिमधीरतया यदस्थितास्मै ।

कृतभयेति । किञ्च कृतः भयपरितोषयोः भयहर्षयोर्मिलनमात्रं कर्म-
णो सन्निपातः सङ्करो येन तत् मनसि जातो मनसिजः स्मरः । स एव गुरुरा-
चार्यः तत्क्षणोपदिष्टं तत्कालमुपदिष्टम् । अत्र गुरुराचार्यकेण तत्क्षणे
उपदिष्टमित्युक्तेरुत्प्रेक्षा । किमप्यनिर्वाच्यं रसान्तरं तत्कथा
भवान्तरं तच्च किं किञ्चिन्नाम विवक्षितं कृतभयेत्यादिविशेषणेन भो-
धायकर्षणीयादिः सङ्करः किंकिञ्चितमिति लक्षणार्थस्य प्रतीतेः । रसेन
रागेण हेतुना भजन्ती अतएव सञ्चकिता सभयसस्मिता । चकितमेव
सस्मितमस्मितम् । सञ्चिता हर्षान्वितमन्दहासा वक्त्रवारिजश्रीर्यस्याः
सा सती । अत्र चकितस्मितयोः पूर्वोक्तभयहर्षानुभावत्वेनोक्तिः ॥३७॥
अवनतेति । अवनतवदनेन्दुः लज्जया नम्रमुखीत्यर्थः । अधीरतया
अधृष्टतया व्यवधिं किञ्चिद्व्यवधानम् । उपनेतुं योः इच्छतीव किमन्वयः
इच्छती वाञ्छतीव तथा व्याकुला सतीत्यर्थः । व्याजीनयोर्गुम्फिति
विकल्पानुभावः । अग्रे प्रियाय अस्मै आत्मानं प्रकाशयन्ती स्थिते-
त्यर्थः । तिष्ठते कर्तरि लुङ् । प्रकाशनस्थेयाख्ययो चेत्यात्मनेपदं
स्थाघ्वोरिच्चेति इत्वः किच्चभिकारश्च धातोरन्त्यादेश किच्चाच्च गुणः ।
इति यदनौचित्योऽस्य प्रियस्य चेतः सुतरां मह्यरत । तथाहि लघेन
क्रियोऽभिभूतयति स्फुटमनिर्वचनीयम् । तत्तोऽस्या अपि नवाभूप-
तत्वादतिमनोहरत्वं युक्तमिति भावः । पुष्पिताग्रान्त्यसौ । मध्या

अहरत सुतरामतोऽस्य चेतः
स्फुटमभिभूषयति स्त्रियस्त्रपैव ॥ ३८ ॥

षड्भिः कुलकम् ।

किसलयशकलेष्ववाचनीयाः
पुलकिनि केवलमङ्गके निधेयाः ।
नखपदलिपयोऽपि दीपितार्थाः
प्रणिदधिरे दयितैरनङ्गलेखाः ॥ ३९ ॥

कृतकृतकरुषा सखीमपास्य
त्वमकुशलेति कयाचिदात्मनैव ।

चेयं नायिका । सञ्जातमन्मथा मध्यस्था मध्यमोदितयौवनेति लक्षणात् ॥ ३८ ॥

किसलयेति । किसलयशकलेषु वर्णात्मना इति शेषः अवाचनीयाः प्रतिद्वन्द्विभिरनल्पत्वाद्वाचयितुमशक्याः किन्तु केवलं पुलकिनि दयितस्प-र्शात्सततस्पर्शादेव रोमाञ्चवत्यङ्केऽपि निधेया विरहतापप्रशमनार्थमर्प-णीया नखपदानि नखाङ्का एव लिपयोऽक्षराणि येषु ते न तु प्रसिद्धा-क्षरा अतोऽवाचनीया इत्यर्थः । नैतावताऽनुतापकारित्वं चेत्याह त-थापि दीपितार्थाः सङ्केतितसन्निवेशवशादेव द्योतिताभिधेया लिखन्त्विति लेखाः । कर्मणि घञ् प्रत्ययः । अनङ्गस्य लेखाः तत्प्रयुक्ता इत्यर्थः । दयितैः दयिताभिः दयितैश्च । पुमान्स्त्रियेत्येकशेषः । प्रणिदधिरे प्रणि-हिता लिखिता इत्यर्थः । दधातेः कर्मणि लिट् । नेर्गदनदेत्यादिना नकारस्य णत्वम् । लोकप्रसिद्धलेख्यवैलक्षण्याद् व्यतिरेकालङ्कारः ॥ ३९ ॥

कृतेति । कृतकृतकरुषया कृतककृत्रिमरोषया कयाचिद्दयितया स्वम-कुशला आत्मप्रयाने कुशला नासीति सखीमपास्य निरस्यात्मना स्वयमेवा-भिमतमभिप्रायाभिज्ञश्च साभिसारमभिसृत्य तमनुनयन् प्रसादितमदन- ।

अभिमतमभि साभिलाषमाविः
कृतभुजमूलमवन्धि मूर्ध्नि माला ॥ ४० ॥
अभिमुखमुपयाति मा स्म किञ्चि
त्त्वमभिदधाः पटले मधुव्रतानाम् ।
मधुसुरभिमुखाब्जगन्धलब्धे
रधिकमधित्वदनेन मा निपाति ॥ ४१ ॥
सरजसमकरन्दनिर्भरासु
प्रसवविभूतिषु भूरुहां विरक्तः ।

देयं यथा तथा मूर्ध्नि माला अवन्धि बद्धा । अयञ्च स्वाभिप्रायसूचकचेष्टा-रूपस्थापनाख्यः सञ्चारिविशेषः । नायिका प्रौढैव । स्मरमन्दीकृतव्रीडा प्रौढा सम्पूर्णयौवनेति लक्षणात् ॥ ४० ॥

अथ काञ्चिन्नायिकां प्रति सखीवचनं विशेषकेणाह । अभिमुख-मिति । मधु मकरन्दं व्रतयन्ति भुञ्जत इति मधुव्रताः मधुपाः । कर्म-ण्यण्प्रत्ययः । तेषां पटले अभिमुखमुपयाति आगते सति त्वं किञ्चित्का-भिदधाः न किञ्चिदालप मौनं भजेत्यर्थः । स्मोत्तरे लङ् न मा-ङ्योग इत्यट्प्रतिषेधः । मौनस्य मधुकरबाधनिवृत्तिरेव फलमित्याह । मध्विति । मधुना मद्येन सुरभेः मुखाब्जस्य यो गन्धस्तस्य लब्धेर्लोभात् । स्त्रियां क्तिन् । अनेन मधुव्रतपटलेन अधित्वत् त्वयि । विभक्त्यर्थेऽ-व्ययीभावः । सप्तम्येकवचन इत्यत्रैकवचन इत्यर्थनिर्देशादिह विभक्त्य-र्थेऽप्येकार्थवृत्तेर्युष्मदोऽमपर्यन्तस्य त्वादेशः अत एव विभक्त्यभावाच्च ला-घवोऽत्र चिन्त्य इति वल्लभवचनं चिन्त्यम् । अधिकमत्यन्तं वर्त्तते-ऽलिभिः मा निपाति मा निपत्यताम् । भावे लुङि चिण्वद्वृद्धिः । अत्रानि-पाताख्यसम्बन्धेऽपि तत्सम्बन्धोक्तिरतिशयोक्तिरलङ्कारः ॥ ४१ ॥

ध्रुवममृतपनामवाञ्छयासा
वधरममुं मधुपस्तवाजिहीते ॥ ४२ ॥
इति वदति सखीजने निमील

सरजसमिति । किञ्च मधु पिबतीति मधुपोमधु लिट् मद्यमद्य । अमोऽनुस्वर्गेक । भुवि रोहन्ति जायन्त इति भूरुहाभूरुहाणा मौ मानाश्च दैहिना सम्बन्धिनीषु सह रजसा सरजसम् । अचतुरेत्यादिना साकल्यार्थेऽव्ययीभाव समासान्तनिपातः । तेन सरजस्क इति बहुव्री ह्यर्थेऽलक्ष इष्टो ये महाकविप्रयोगबाहुल्यात अव्ययीभावदर्शन त प्रायिकमित्युक्त प्राक् । तथा च सरजस सरन्ध्रो वा यो मकरन्दस्तेन निर्भरासु पूर्णासु न तु तदधरामृतेन नाधरजस्कोनेति भाव । अन्यत्र रज स्त्रीपुष्पम । स्यादज पुष्पमार्त्तवमित्यमर । तस्मात्चर्यामकरन्दरूपेण शुक्र मतीति तेन शुक्रयोषितस्तत्पातप्रायासित्यर्थः प्रसवति भूतिषु पुष्पवतीषु जन्मपरम्परासु च विरक्त निस्पृह सन अमृत पिबतीति अमृतप इति नाम्नोवाञ्छयाऽसमुत्तवाधरभोष्ठ प्रति व्याजिहीते आगच्छति ध्रुव सत्यमित्युत्प्रेक्षायाम । अन्यत्र तु अमृतपोदेश इति नामवाञ्छया देवभूयापेक्षयेत्यर्थ । अथ वा ऽमृ श्रेयसप्राप्तीच्छयेत्य र्थ । अथो न श्रेयसामृतमित्यमरः । ध्रुव शाश्वत अधरस्वराममत्य-रहित अमुमपरलोकपदम् । शुभमिह चामुत्र चाप्नोति इत्यादौ लोके वेदे चेदमदसोर्लोकद्वये वृद्धिप्रदर्शनात । व्याजिहीते यास्यतीत्यर्थ । ओ हाङ्गताविति धातोर्लटि स्वादिति द्विर्भावा ई हल्यघोरितीकार । इह नायिका वदनसौरभहेतुकस्य मधुपानामागमनस्यामृतपनामव ञ्छा-हेतुकत्वोत्प्रेक्षा सा च ध्रुवमिति व्यञ्जकप्रयोगाद्वाच्या तती मधुपस्याधरोष्ठ सम्बन्धेऽपि सम्बन्धाभिधानादतिशयोक्त्युत्थापितेति सङ्कर । पूर्वा त्वाप्रकृतार्थप्रतीतिस्तु मधुपादिशब्दानामभिधया प्रकृतार्थनियन्त्रितत्वाच्छब्दशक्तिमूलोध्वनिरेव न श्लेष इत्यत्र विस्तरेणेति ॥ ४२ ॥

इतीति । इति इत्थं मत्येव जनसमाज सखीजने वदति सति निमी-

द्विगुणितसान्द्रतराक्षिपक्ष्ममाला ।
अपतदलिभयेन भर्त्तुरङ्कं
भवति हि विक्लवता गुणोऽङ्गनानाम् ॥४३॥

[विशेषकम्].

मुखकमलकमुन्नमय्य यूना
यदभिनवोढवधूर्बलादचुम्बि ।

उन्मौ भयानुमुकुलीभवन्त्यौ अथच द्वे आवृत्ती ययोस्ते द्विगुणे द्विरा-
वृत्ते । गुणास्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुष्विति वैजयन्ती । ते कृते द्विगुणिते अतएव सान्द्रतरे अक्षिपक्ष्ममाले नेत्रलोमपङ्क्ती यस्याः सा काचिदिति शेषः । अक्षिपक्ष्मपदे पक्ष्मद्वयस्यैव गुरुलघ्वक्षरयोरेवेति द्यो तनार्थत्वान्न पौनरुक्त्यम् । अलिभयेन भर्त्तुरङ्कमुत्सङ्गमपतत् प्राप्तवती । अङ्गो महोत्कटं यत्कीटकादपि भयमित्याशङ्क्याह । अङ्गनानां न तु पुंसामिति भावः विक्लवता भीरुता गुणो भवति हि न तु दोष इति भावः अतएव लताभयं भर्त्तुरङ्कारोहणमपि न दोषः पार्श्वस्थालम्बनादीन भयानुभावत्वात् । वृत्तकेऽस्त्यलङ्कारोऽर्थान्तरन्यासः ॥ ४३ ॥

मुखेति । यूना अभिनवोढवधूर्नवोढाङ्गनापि बलात् बलात्कारात् मुखं कमलमिवेत्युपमितसमासः । तदेव मुखकमलकम् । स्वार्थे कः प्रत्ययः । उन्नमय्य उद्यम्य । ल्यपि लघुपूर्वादित्ययादेशः । अचुम्बि चु म्बितेति यत् तच्चुम्बनं शिरःकम्पनेन चतुरमनसा अन्यया ... अकृतम् । अकृतकर्त्तरि कर्म्मण्येव प्रत्ययः । तत्परया तदासक्तया मन्द कौतुकयापि कस्यचिन्नेष्टम् न विविदे अपि किम न प्रकाशितमिति किमुत बहुशश्चिन्तितमिति तात्पर्यम् । विलोकनीये वस्तुनो विदित्वार्थविशि ष्टैव स्थितं वैदग्ध्यात् कान्तया रचितस्याविष्कारविचारादिति भावः कुतूहलं मादिवा । उद्दयोरसा मुग्धा कस्मादिदित मनुष्यैरित न

तदपि न विफलं दाम्पत्यपाय
प्रतपरया पिपिटे पिटग्यसस्त्रा ॥ ४४ ॥
प्रततिविततिभित्तिरोहितायां
प्रतियुवतौ वदनं प्रियः प्रियायाः ।
यदपयदधरावलोपमन्त्य
त्करयन्नयस्वनितेन तद्विपत्रे ॥ ४५ ॥
विलसितमनुकुर्वती पुरस्ता
द्धरणिरुहाधिरुहोवधूर्लतायाः ।
रमणाङ्कगतया पुरः सखीना

मधाम् ॥ ४६ ॥

प्रततीति । प्रतिकूला युवतिः प्रतियुवतिः सपत्नी तस्यां प्रतति वितततो लताजालानि । ततो ह प्रततिभित्तैरव्यवः । तत्भित्तिरोहितायां सत्यां प्रियः प्रियाया वदनमचयत् अविपत्नादिति यत् । येदोभौजादिकार्थ । तद्दन्तरत्न अधरावलोपेनावरस्वतनेन तक्षणित अवयवैर्दः स्तनतोवस्तोः करयोर्वदनां बहूनां ध्वनितेन ध्वनिना विदमे विहतम् तदेव तस्मादतुमायकमभूदित्यर्थः । पार्श्वस्था दूता वपरा सौम्यौर्निर्दृश्यौत्युपक्षेयम् ॥ ४५ ॥

विलसितमिति । वधूः काचित् स्त्री पुरस्तादग्रे धरणिरुहं अधिरोहतीति धरणिरुहाधिरुट् वृक्षाधिरूढा । रुहेः क्विप् । तस्या लताया विलसितं चेष्टितम् । भावे क्तः । अनुकुर्वती एवमित्याश्चर्यप्रकारमभिनयन्ती अङ्गतया अङ्गमिश्रितया सखीनां पुरोऽग्रे प्रकाशितः परिवारिताचापलमनुचितकरणमेव दोषो यस्मिन् कर्मणि तद्यथा तथा रमणं

मकलितचापलदोषमालिलिङ्ग ॥ ४६ ॥
सललितमवलम्ब्य पाणिनांसे
सहचरमुच्छ्रितगुच्छवाञ्छयान्या ।
सकलकलभकुम्भविभ्रमाभ्या
मुरसि रसादवतस्तरे स्तनाभ्याम् ॥ ४७ ॥
मृदुचरणतलाग्रदुःस्थितत्वा
दसहतरा कुचकुम्भयोर्भरस्य ।
उपरि निरवलम्बनं प्रियस्य

प्रियमालिलिङ्ग । एषा ह्रीत्युक्तवती प्रौढा च ॥ ४६ ॥

सललितमिति । अन्या स्त्री उच्छ्रितगुच्छवाञ्छया उद्गतस्तवक लि- प्सया सललितं सविलासं यथा तथा सहचरं प्रियम्पाणिना चौचि- ह्रासिनेति शेष. अंसे अवलम्ब्यानन्तरम् सकलयोः समग्रयोः कलभकुम्भ- करिकुम्भयोर्विभ्रम इव विभ्रमः सौन्दर्यं ययो स्ताभ्यां स्तनाभ्यां र- भसादुरसि अवतस्तरे आच्छादयामास सहचरमित्यनुषङ्गः । अभि- प्रायस्थानादिति भावः । स्तृणातेः कर्त्तरि लिट् । ऋतश्च संयोगादे- र्गुण. शर्पूर्वाः खय इत्यभ्यासशकार लोपः । इयञ्च प्रौढैव ॥ ४७ ॥

मृद्विति । अन्या स्त्री उच्चतराणामत्युन्नतकुसुमानामुच्चेतु मप्रचे- तुमिच्छया उच्चतरोच्चिचीषया । चिनोतेः सन्नन्तात् स्त्रियाम प्र- टाप् । विभाषा चेरिति कुत्वविकल्प. । मृदुचरणतलाग्रे दुःस्थितत्व दुःखेन कुचकुम्भयोर्भरस्य । पुंसि संज्ञायां घः प्रायेणेति घप्रत्ययः । सहतेऽत्यन्तमित्यसहतरा । सहेः पचाद्यजन्तादत्यन्तस्य तरप्प्रत्यय भरमसहमानेत्यर्थः । कृद्योगात् कर्मणि षष्ठी । अनालम्बना निरवलम्बनं यथा तथा प्रियस्योपरि न्यपतत् निरवलम्बनत्वाद्विपपातेत्यर्थ

न्यपतदधोऽवतरोच्चिचीषयान्या ॥ ४८ ॥

उपरिजतरुजानि याचमानां
कुशलतया परिरम्भलोलुपोऽन्यः ।
प्रथितपृथुपयोधरां गृहाण
स्वयमिति मुग्धवधूमुदास दोर्भ्याम् ॥ ४९ ॥

इदमिदमिति भूरुहां प्रसूनै-
र्मुहुरतिलोभयता पुरः पुरोऽन्या
अनुरहसमनायि नायकेन
त्वरयति रन्तुमहो जनं मनोभूः ॥ ५० ॥

सा च प्रौढा । स्वभावोक्तिरलङ्कारः ॥ ४८ ॥

उपरिजेति । उपरिजानि उपरिजातानि तरोर्जातानि तरुजानि कुसुमानि तानि याचमानां अवचित्य देहीति प्रार्थयमानां प्रथितपृथुपयोधरां प्रशस्तपीवरकुचां मुग्धवधूं अकुटिलधियं स्त्रियं परिरम्भलोलुप आश्लेषलालसोऽन्यः कुशलतया चतुरतया स्वयं गृहाण स्वयमेवावचित्यार्थं इति गम्यमानार्थत्वादुक्तेति न प्रयुक्तं पौनरुक्त्यात् । दोर्भ्यामुदास उदक्षिपत् । अयमेकायत्तत्वादनुकूलनायकः नायिका तु स्वाधीनपतिका प्रौढा च ॥ ४९ ॥

इदमिति । अन्या स्त्री इदमिदमिति इदं ग्राह्यमिदं ग्राह्यमित्यर्थः भूरुहां वृक्षाणां प्रसूनैः पुष्पैः पुरः पुरो मुहुरतिलोभयता लोभयता नायकेन रहोऽनु अनुरहसं रहमेकान्तम् । अन्ववतप्तमित्यव्ययीभावसमासान्तः । अनायि नीता । तथा हि मनोभूः कामो जनं रन्तुं त्वरयति देशकालानपेक्षयेति भावः । अतएवाश्चर्यमहो इति । पूर्ववन्नायिकानायकौ । अर्थान्तरन्यासः ॥ ५० ॥

विजनमिति बलादमुं गृहीत्वा
क्षणमथ वीक्ष्य विपक्षमन्तिकेऽन्या ।
अभिपतितुमना लघुत्वभीते
रभवदमुञ्चति वल्लभेऽतिगुर्वी ॥ ५१ ॥
अधिरजनि जगाम धाम तस्याः
प्रियतमयेति रुषा स्रजावनद्धः ।

विजनमिति । अन्या स्त्री विजनमेकान्तमिति हेतोरमुं वल्लभं क्षणं बलादुद्गृहीत्वा आकृष्य अथान्तिके विपक्षं सपत्नीजनं वीक्ष्य लघुत्वभीतेर्लघुत्वभयादभिपतितुं मनो यस्याः सा अभिपतितुमनाः । तुङ्काममनसोरपीति मकारलोपः । अपसर्तुकामेत्यर्थः वल्लभे अमुञ्चत्यत्यजति सति तस्य विपक्षानवेक्षणादिति भावः । अति गुर्वी अतिगौरववत्यभवत् स्वयङ्ग्रहलाघवतिरोधानात् भर्तृवल्लभत्व प्रकाशनाच्चेति भावः । भाग्यवतां सर्वं श्रेयसे भवतीति रहस्यम् । एषा त्वतिप्रगल्भैव ॥ ५१ ॥

अधीति । अधिरजनि रजन्याम् । विभक्त्यर्थेऽव्ययीभावः । तस्याः सपत्न्या इत्यर्थः । बुद्धिस्थत्वाद्धामपङ्क्त्यासहत्वाच्च तच्छब्देन निर्देशः । धाम गृहं जगामेति रुषा हेतुना प्रियतमया कलत्रैः स्रजा करणेन नादनद्धोऽयुगपदमपि । अत्यन्तसंयोगे द्वितीया । चलितुं न सेहे न शशाक । तथा हि ससाध्वसानां भयपराणां किमिव किंवा । इवशब्दो वाक्यालङ्कारे इवेतीपदर्थोपमोत्प्रेक्षावाक्यालङ्कारेष्विति गणव्याख्याने । शक्तिं हरतीति शक्तिहरम् । हरतेरनुद्यमनेऽजिति अच्प्रत्ययः । न भवतीति शेषः । अस्तिर्भवन्तीपरोऽप्रयुज्यमानोऽप्यस्तीति वचनात् भवन्तीति लटः पूर्वाचार्याणां संज्ञा । सर्वं स्रगपि भीरूणां शक्तिहरत्वादवन्ध्यावाक्येऽपि पुनः शक्तिं हरतीति युक्तं इति सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः स्वपुष्पितेयं मालिका ख्यातेऽन्यासङ्गविकृतेष्वपि इते-

पदमपि चलितुं युवा न सेहे
किमिव न शक्तिहरं ससाध्वसानाम्॥ ५२॥
न खलु वयममुष्य दानयोग्याः
पिबति च पाति च यासकौ रहस्त्वाम्।
व्रज विटपममुं ददस्व तस्यै
भवतु यतः सदृशोश्चिराय योगः॥ ५३॥
तव कितव किमाहितैर्वृथा नः
क्षितिरुहपल्लवपुष्पकर्णपूरैः।

पांसुलयितेति लक्षणात्। नायकस्तु दक्षिणः। अयमपि ... नादिभिस्तुल्या नैकत्र दर्शयतीति ... प्रतीतिरिति॥ ५२॥

अथ काचित्सपत्नीचिह्ना निजकान्तमागस्कारिणं पल्लवदानेन प्रसादयन्तं सपत्नीभिर्भर्त्सयितुमारभते। नेत्यादि। वयममुष्य दानयोग्या न भवामः खलु किन्तु या असावेवासकौ त्वत्प्रिया। अज्ञाते कुत्सिते प्राक्टेरित्यकच्। रहो रहसि। रहश्चोपांशु चालिङ्गे रहस्यमरः। त्वां पिबति पानं करोति। पा पाने भौवादिकात् कर्तरि तिप् पाघ्रेत्यादिना पिबादेशः। पाति रक्षति च अन्यतो वारयतीत्यर्थः। पा रक्षणे अदादिकाल्लट्। तस्यै अमुं विटानुपातीति विटपं पल्लवम्। विटपः पल्लवे विड्गे इति विश्वः। ददस्व प्रयच्छ। दद दाने इति भौवादिकाल्लोट्। व्रज गच्छ यतो दानात् चिराय चिरकालात्। विटावैशिष्ट्यं सदृशयोरनुरूपयोर्योगोऽभवतु समयोरपि विटप्रेष्ययोरिति भावः। व्याजस्तुतिरलङ्कारोऽयम्। ... समयोरिति नैपुणी समयोरनुरूपयोरिति वचनात्॥ ५३॥

तवेति। हे कितव! धूर्त! वृथा अस्मदर्थं केवलाहितैः ...

ननु अनविदितैर्भवद्यलीकै
श्चिरपरिपूरितमेव कर्णयुग्मम् ॥ ५४ ॥
मुहुरुपहसितामिवालिनादै
र्वितरसि नः कलिकां किमर्थमेनाम् ।
वसतिमुपगतेन धाम्नि तस्याः
शठ कलिरेष महांस्त्वयाद्य दत्तः ॥ ५५ ॥

सिद्धत्वादिति भावः तत्र सम्बन्धिभिः. नितिसद्धाणा मद्रथाः पुष्पाणि च तान्येव कर्णं पूरयन्तीति कर्णपूराः स्वर्णावितमाः । कर्म्मण्यण् । तेना-ऽस्माकं किं तत्साध्यं न किञ्चिदस्तीत्यर्थः । गम्यमानसाधनक्रियापेक्षय कर्णपूराणां करणत्वात् तृतीया । उक्तञ्च न्यासोद्योते न केवलं श्रूयमाणैव क्रिया निमित्तं कारकभावस्य अपि तु गम्यमानापीति । किन्तु अस्माकं जनविदितैर्जनैर्ज्ञातैः प्रसिद्धैः । जनेषु विदितैरिति सप्तमीसमास क्तस्य च वर्त्तमानइति तद्योगे षष्ठीप्रतिप्रसवस्तेऽपि क्तेन च पूजायामिति षष्ठीसमास निषेधात् जनानामाधारत्वविवक्षायां तदप्राप्तेः । भवद्व्यलीकैः प्रियवचनैः कर्णयुग्मं चिरपरिपूरितं नित्यं पूर्णमेव अतः परिपूरितस्य पूरणायोगादफलैरेभिरित्यर्थः । अत्रोत्तरवाक्यार्थस्य पूर्ववाक्यार्थहेतुत्वेनोपनिबन्धाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कार. ॥ ५४ ॥

मुहुरिति । अलिनादैर्मुहुरुपहसितां प्रतरणादीन प्रहस्यमाना मिव स्थितामेनां कलिकां कोरकं नोऽस्मभ्यं किमर्थं वितरसि । कलहे च युगे कलिरिति वैजयन्ती । स्त्रीप्रत्ययस्तु विशिष्टः श्लेषे गोऽस्माकं किमर्थं वितरसि हे शठ गूढविप्रियकारिन् तस्याः स्त्रियाः धाम्नि भवने वसतिं स्थिति-मुपगतेन त्वया अद्यैव वर्त्तमानो महान् कलिः कलहोऽस्मभ्यं दत्तः वसतिं कलिं स्थिते कि कलहतरेदेहि । अत्रापि पूर्ववाक्यार्थस्योत्तरवाक्यार्थहेतुत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गम् कलिकाकलिरिति शब्दोक्ता-

इति गदितवती रुषा जघान
स्फुरितमनोरमपक्ष्मकेसरेण ।
श्रवणनियमितेन कान्तमन्या
सममसिताम्बुरुहेण चक्षुषा च ॥ ५६ ॥

कलापकम् ॥

विनयति सुदृशो दृशः परागं
प्रणयिनि कौसुममाननानिलेन ।
तदहितयुवतेरभीक्ष्णमक्ष्णो-
र्द्वयमपि रोषरजोभिरापुपूरे ॥ ५७ ॥

तथा कोरककलङ्कयोर्भेदे अभेदरूपातिशयोक्तिरवाप्राणिमनिति सङ्करः ॥ ५५ ॥

इतीति । इतीत्थं गदितवत्युक्तवती अन्या स्त्री रुषा कान्तं स्फुरितानि चञ्चलानि मनोरमाणि च पक्ष्माण्येव केसराणि यस्य अन्यत्र केसराणीव पक्ष्माणि यस्य तेन श्रवणनियमितेन श्रोत्रे धृतेन निबद्धेन च असिताम्बुरुहेण नीलोत्पलेन चक्षुषा च समं युगपत् जघान ताडयामास । एषा खण्डिता नायकस्तु धृष्टः । व्यक्ताङ्गो निर्भयो धृष्ट इति लक्षणात् । अत्र स्फुरितेत्यादितुल्यधर्मा गम्योपमानयोः असिताम्बुरुहचक्षुषोरुभयोरपि ताडनसाधनतयोपात्तत्वेन प्रकृततया केवलप्रकृतास्पदा तुल्ययोगिता । लक्षणं सूक्तम् ॥ ५६ ॥

विनयतीति । प्रणयिनि प्रिये सुदृशः प्रियायाः दृशो लोचनात् [illegible] इति भावः कुसुमेषु भवं कौसुमम् परागं रजः कणम् [illegible] इति भावः आननानिलेन निजमुखमारुतेन विनयति अपनयति सति तदहितयुवतेः [illegible] अक्ष्णोर्द्वयमपि न [illegible] इति भावः रोषः एव रजांसि तैः

स्फुटमिदमभिचारमन्त्र एव
प्रतियुवतेरभिधानमङ्गनानाम्।
वरतनुरमुनोपहूय पत्या
मृदुकुसुमेन यदा हताप्यमूर्च्छत् ॥ ५८ ॥
समदनमवतंसितेऽधिकर्णं
प्रणयवता कुसुमे सुमध्यमायाः।

[illegible] नैकेन रजः कणेन [illegible] भावः । पूरयत् कर्माणि लिट् पूर्ण मित्यर्थः ॥ ५७ ॥

स्फुटमिति । इदम्प्रतियुवतेः सपत्न्याः अभिधानं नामधेयं अङ्गनानामभिचारः परमारणकर्म यदा मन्त्रेणाभिचर्यते इति तस्य मन्त्रोऽभिचारमन्त्रः एव स्फुटमित्युत्प्रेक्षा यदा वरतनुः काचि [illegible] अमुना सपत्नीनामधेयेनोपहूय मृदुकुसुमेन मृदु [illegible] तनाय देवताभिचारमन्त्र [illegible] संस्कारोऽयं द्योतयति तेनाप्याहता अमूर्च्छत् [illegible] मारकं कोऽभिचारमन्त्र [illegible] ॥ ५८ ॥

समदनमिति । प्रणयवता प्रियेण सुमध्यमायाः प्रियायाः अधिकर्णं । विभक्त्यर्थेऽव्ययीभावः । कुसुमे समदनं यथा तथा अवतंसिते [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] । [illegible] [illegible] [illegible] । [illegible]

अजदपि लघुतामभूव भारः
सपदि हिरण्मयमण्डनं सपत्न्याः ॥ ५९ ॥
अवजितमधुना तवाहमक्ष्णो
रुचिरतयेत्यवनम्य लज्जयेव ।
श्रवणकुवलयं विलासवत्या
भ्रमररुतैरुपकर्णमाचचक्षे ॥ ६० ॥
अवचितकुसुमा विहाय वल्ली
र्युवतिषु कोमलमाल्यमालिनीषु ।

परिहाराद्विरोधाभासभेदः ॥ ५९ ॥

अवजितमिति । विलासवत्याः स्त्रियः श्रवणकुवलयं श्रवणोत्पलं कर्तृ अहमधुना तवाक्ष्णो रुचिरतया रुचिरस्य भावः रुचिरता । भावे तल् । तया सौन्दर्येणावजितमिति वक्ष्यमाणानुवाद । अतएव लज्जया अवनम्य भ्रमररुतैः तन्निभैरित्यर्थः उपकर्णं कर्णे । विभक्त्यर्थेऽव्ययीभाव. । आचचक्ष इवेत्युत्प्रेक्षा ॥ ६० ॥

अवचितेति । अलीनां कुलानि अवचितानि युवतिभिरुपात्तानि कुसुमानि यासां ताः रिक्ता इत्यर्थः वल्लीः पुष्पलताः विहाय कोमलानि माल्यानि मलन्ते धारयन्तीति तासु कोमलमाल्यमालिनीषु । मल मल्ल धारणे इति धातोर्णिनिः ऋन्नेभ्यो ङीप् । युवतिषु पदमुपदधिरे निदधुः तथा हि मालिनामात्मनां कुसुमदेहानां दुश्चित्तानां च परिचयवि- ज्ञानगुरुत्वमेव प्रधानं न प्रयोजकं किन्तु भुक्तिरेवेति भावः । अतः रिक्तलतात्यागो भावयितव्य इत्यर्थः । अत्र मालिनामात्मनामिति कृष्णाङ्- गस्य दुश्चित्तस्येव वल्लीभेदाध्यवसायेनाचीनत्वान्तरप्रतीत्यावगमात् अप-

पदमुपदधिरे कुलान्यलीनां
न परिचयो मलिनात्मनां प्रधानम् ॥ ६१ ॥

श्लथशिरसिजपाशपातभारा-
दिव नितरां नतिमद्भिरंसभागैः ।
मुकुलितनयनैर्मुखारविन्दै-
र्घनमहतामिव पक्ष्मणाम्भरेण ॥ ६२ ॥

अधिकमरुणिमानमुद्वहद्भि-
र्विकसदशीतमरीचिरश्मिजालैः ।
परिचितपरिचुम्बनाभियोगा-

प्रतिबोध्यापितास्तिमयोक्त्या तुप्राप्तितोऽप्यमिति सङ्करः ॥ ६१ ॥

अथोत्तरसर्गे जलक्रीडावर्णनाय तदुपोद्घातत्वेनासां वनविहारोद्भव-श्रमातिरेकं सप्तभिः कुलकेन दर्शयति । श्लथेत्यादि । शिरसि जाता शिरोरुहाः । सप्तम्याङ्जनेर्डः इत्यदन्तादित्यादिना सप्तम्या अलुक् । तेन पाशः कलापः श्लथस्य तस्य यः पातः तस्य भारादिवेति हेतूत्प्रेक्षा । न पादादौ खल्वादय इति वामनीय निषेधेऽपि इवशब्दस्य पादादौ प्रयोग कवेः प्रौढिरूपम् । नितरामतिशयेन । अव्ययादाम्प्रत्ययः । नतिमद्भिरंस मार्गैरुपलक्षिताभिर्नितम्बिनीभिरिति भाविना सम्बन्धः एवमुत्तरत्रापि योज्यम् । नतांसत्वमुत्तमस्त्रीलक्षणम् । पुनर्घनमहतां सान्द्रदीर्घाणां पक्ष्मणां भरेणेवेति पूर्ववद्धेतूत्प्रेक्षा मुकुलितनयनैर्मुखारविन्दैः । अनयो रूपयोः संसृष्टिः ॥ ६२ ॥

अधिकमिति । पुनः परिचितानां प्रणयिनां परिचुम्बनैरपि योगा-त्कर्णानादरगतकुङ्कुमरेणुभिः अतएव विकसन्ति हैमन्त्यातिरिक्तानि अशी-तमरीचेरंशोः रश्मिजालानि येषु तैः । असम्बन्धे सम्बन्धोक्त्यातिश-योक्तिः । अतएवाधिकमरुणिमानमुद्वहद्भिः कुङ्कुमा मायेऽप्यातपवद्भु-

द्दपगतकुङ्कुमरेणुभिः कपोलैः ॥ ६३ ॥

अवसितललितक्रियेण बाह्वो
र्ललिततरेण तनीयसा युगेन ।
सरसकिसलयानुरञ्जितैर्वा
करकमलैः पुनरुक्तरक्तभाभिः ॥ ६४ ॥

स्मरसरसमुरःस्थलेन पत्यु
र्विनिमयसङ्क्रमिताङ्गरागरागैः ।
भृशमतिशयखेदसम्पदेव
स्तनयुगलैरितरेतरं निघृष्टैः ॥ ६५ ॥

अतनुकुचभरानतेन भूयः
श्रमजनितानतिना शरीरकेण ।

मदतिलोद्भितैरित्यर्थः कपोलैरुपलक्षिते ॥ ६३ ॥

अवसितेति । पुनरवसिता अपि च परिसमाप्ता ललिता क्रिया सुकुमारचेष्टा अपि यस्य तेन ललिततरेण मृदुतरेण तनीयसा तनुतरेण च बाहुयुगेन पुनः सरसैरार्द्रैः किसलयैरनुरञ्जितैर्वा अनुरञ्जनं प्रापितैरिव पुनरुक्ताद्विगुणा रक्ताभासो येषान्ते पुनरुक्तरक्तभाभिः । एनि यवर्णा-मिति यकारलोपः । करकमलैः पाणिपद्मैः । पाणेः रक्तत्वं स्वभावतः पुनरुक्तरक्तत्व स्वाभाविकमेव तत्र किसलयरञ्जनप्रेक्षणमुत्प्रेक्षितं वर्णं वा शब्दः तद्गुणेत्यायामनुक्तम् ॥ ६४ ॥

स्मरेति । पुनः स्मरेण सरसं सानुरागं यथा तथा पत्युरुरःस्थलेन सह विनिमयेन व्यतिहारेण सङ्क्रमितोऽङ्गरागोऽनुलेपनं तेन रागो रञ्जनं येषु तैः अतिशयोऽतिशयितो यः खेदस्तत्सम्पदा अतिखेदेनेवेत्यर्थः इतरेतरमितरेतरं परस्परं घर्षितैः स्तनयुगलैः ॥ ६५ ॥

अनुचितगतिसादनिःसहत्वं
कलभकरोरुभिरूहमिह धानैः ॥ ६६ ॥
अपगतनवयावकैश्चिराय
क्षितिगमनेन पुनर्वितीर्णरागैः ।
कथमपि चरणोत्पलैश्चलद्भि-
र्भयविनिवेशवशात्परस्परस्य ॥ ६७ ॥
मुहुरिति वनविभ्रमाभिषङ्गा-
दतमि तदा नितरां नितम्बिनीभिः ।

अतन्विति । पुनः अतनुना महता कुचभरेणानतेन नम्रेण प्राग्-
वेति भावः । भूयः पुनश्च श्रमजनिता ग्लानिर्यस्य तेन शरीरकेण सुकु-
मारशरीरेण किञ्च अनुचिता अनभ्यस्ता । अभ्यस्तेऽप्युचितं न्याय्य-
मिति यादवः । तया गत्या पादचारेण यः सादः कार्श्यं तेन यन्निः
सहत्वं अक्षमत्वं तद्धाने गन्तुमसमर्थैरित्यर्थः । न सहन्त इति निःसहा
पचाद्यजन्तेनौपसर्गस्य समासे त्वप्रत्ययः । कलभकराः करिकलभहस्ता इवोरु-
वो महान्तस्तैरूरुभिः सक्थिभिः सक्थि क्लीबे पुमानूरुरित्यमरः ॥ ६६ ॥

अपगतेति । पुनश्चिराय चिरं क्षितिगमनेनापगतो नवयावको नववा-
लारागो येषां तैः पुनस्तेनैव वितीर्णरागैः सौकुमार्यादुत्पादितरागैः पर-
स्परस्य भयविनिवेशवशात् स्थिरन्यासवत्त्वात् एकं स्थिरं निवेश्य तदवष्ट-
म्भेनेतरचालनक्रमेणेत्यर्थः कथमपि महता प्रयत्नेन । कथमादि तथा-
त्वं यत्नगौरवभेदयोरित्युत्पलः । चरणोत्पलैः ॥ ६७ ॥

मुहुरिति । नितम्बिनीभिरुरुकुचभारापनचिताभिः स्त्रीभिर्मुहुरित्येवं
वनविभ्रमाभिषङ्गात् वनभ्रमणासङ्गात्तदा । नितरामतमि ग्लानम् । तमि-
धातोर्भावे लुङ् नोदात्तोपदेशस्य मान्तस्यानाचमेरिति वृद्धिप्रतिषेधः ।
युक्तं च तदित्याह । मृदुतरतनवोऽतिकोमलाङ्गयष्टयः स्त्रियः प्रकृत्या क-
लत्राः तदा. अथ विरमेऽपि प्रयासभाजश्चेत् किमुत पुनरायासदशाः सु-

मृदुतरतनवोऽलसाः प्रकृत्या
चिरमपि ताः किमुत प्रयासभाजः ॥ ६८ ॥

प्रथममलघुमौक्तिकाभमासीत्
श्रमजलमुज्ज्वलगण्डमण्डलेषु ।
कठिनकुचतटाग्रपाति पश्चा-
दथ शतशर्करतां जगाम तासाम् ॥ ६९ ॥

विपुलकमपि यौवनोद्धतानां
घनपुलकोदयकोमलं चकाशे ।

अत्र प्रकृतनैसर्गिकालस्यस्य कथनेनागन्तुकस्य कैमुत्यन्यायतः सिद्धत्ववर्णनादर्थापत्तिरलङ्कारः । एकस्य वस्तुनो भावाद्यत्र वस्त्वन्यदापतेत् । कैमुत्यन्यायतः सा स्यादर्थापत्तिरलङ्क्रियेति लक्षणात् । श्रमश्चात्र सञ्चारी ग्राह्यः । श्रमः खेदोऽध्वरत्यादेरिति लक्षणात् ॥ ६८ ॥

अथ श्रमानुभावं स्वेदं वर्णयति । प्रथममिति । अत्र तासां स्त्रीणां श्रमजलं प्रथममुज्ज्वलगण्डमण्डलेषु उज्ज्वलगण्डस्थलेषु अलघु मौक्तिकाभं स्थूलमुक्ताफलतुल्यमासीत् । पश्चात्कठिनतरकुचाग्रपाति सत् अथ पतनानन्तरं शतं शर्कराः शतशर्करम् । समाहारे द्विगुरेकवचनं वा टाबन्त इति नपुंसकत्वम् । तस्य भावस्तत्ता तां शतशर्करतां शतशकलत्वं जगाम । अत्रैकस्य श्रमजलस्य क्रमेणानेकाश्रयसम्बन्धनिबन्धनात्पर्यायालङ्कारभेदः क्रमेणैकमनेकस्मिन्नाधारे वर्तते यदि । एकस्मिन्नथवानेकम्पर्यायालङ्कृतिर्मतेति लक्षणात् ॥ ६९ ॥

अथोऽपि कुचमण्डलमविकलशोभमित्याह । विपुलकमिति । यौवनोद्धतानां कामिनीनां कुचयुगं विपुलकं पुलकरहितमपि घनपुलकोदयेन सान्द्ररोमोद्गमेन कोमलं कठिनमिति विरोधः विपुलं विस्तृतं तदेव विपुलकमित्यविरोधः प्रियैः प्रकाममरितो मलमस्येति मलिनं तत्कृतं मर्दितं मलिनीकृतं तथाप्युज्ज्वलं विमलमेव चकाश इति विरोधः परि-

परिमलितमपि प्रियैः प्रकामं
कुचयुगमुज्ज्वलमेव कामिनीनाम् ॥ ७० ॥
अविरतकुसुमावचायखेदा
न्निहितभुजालतयैकयोपकण्ठम् ।
विपुलतरनिरन्तरावलग्न
स्तनपिहितप्रियवक्षसा ललम्बे ॥ ७१ ॥
अभिमतमभितः कृताङ्गभङ्गा
कुचयुगमुन्नतिवित्तमुन्नमय्य ।

मलवत्कृत परिमलितमित्यविरोध. । मलवन्तं करोतीति णिचि कर्मणि क्तः आविष्ट वद्भावे विनुमतोर्लुक् । अपिर्विरोधे । विरोधाभासालङ्कारयोः संसृष्टिः ॥ ७० ॥

अथैकस्याः प्रियकण्ठावलम्बने श्रमानुभावमेकेनाह । अविरतेति । अविरतो यः कुसुमानामवचायो हस्तेन लवनम् । हस्तादाने चेरस्तेय इति घञ् । तेन यः खेदस्तस्माद्धेतोरुपकण्ठं कण्ठे । विभक्त्यर्थेऽव्ययीभावः । निहिते भुजालते यया तया । दोः प्रकोष्ठो भुजो बाहुर्भुजा च स्मृते बुधैरिति वैजयन्ती । विपुलतरौ निरन्तरमवलग्नौ सश्लिष्टौ च यौ स्तनौ ताभ्यां पिहितमाच्छादितं प्रियस्य वक्षो यया तयैकया स्त्रिया ललम्बे अवलम्बितम् । भावे लिट् ॥ ७१ ॥

अथापरस्याः अङ्गभङ्गाख्यमपरमनुभावमाह अभिमतमिति । तनुः काचित्तन्वी । वोतोगुणवचनादिति विकल्पादनीकारः । अभिमतमभितः प्रियमभीत्यर्थः उन्नतिवित्तं औन्नत्येन प्रतीतम् । विदेर्भावार्थादिह लोभोगप्रत्ययोगिति प्रत्ययार्थे निष्ठान्तत्वात्स निपातः । कुचयुगमुन्नमय्य उत्तुङ्गीकृत्य कृतोऽङ्गभङ्गो गात्रविजृम्भणं यया सा तथा वेल्लिते विपर्येष्टिते बाहुवल्ल्यौ भुजलते यया सा । मध्यतयेति कप् । इमञ्चलेन श्रमापनोदक चेष्टाव्याजेनेत्यर्थः अभिलषितमालिङ्गनाद्यभिलषितं व्यस्पष्टं प्रकटि-

तनुरभिलषितं क्लमच्छलेन
व्यवृणुत वेल्लितबाहुवल्लरीका ॥ ७२ ॥
हिमलवसदृशः श्रमोदबिन्दू
नपनयता किल नूतनोढवध्वाः ।
कुचकलशकिशोरकौ कथञ्चि
त्तरलतया तरुणेन पस्पृशाते ॥ ७३ ॥
गत्वोद्रेकं जघनपुलिने रुद्धमध्यप्रदेशः
क्रामन्नूरुद्रुमभुजलताः पूर्णनाभीह्रदान्तः ।

यतवी । इत्यौतिर्ङङ् । प्रौढेयमुक्ता च ॥ ७१ ॥

अथ कस्याश्चिन्मुग्धायाः प्रियचापल्योक्तिद्वारा स्वेदोद्गममुत्कटयति हिमेति । हिमलवसदृशो हिमकणनिभान् श्रमोदबिन्दून् स्वेदबिन्दूनित्यर्थः । मन्थौदनेत्यादिना उदकस्योदादेशः । अपनयता किल प्रमार्जता न तु वस्त्र तात्पर्यमिति भावः तरुणेन यूना नूतनोढवध्वाः कुचौ कलशाविव तौ च किशोरकाविव अश्वशावकाविव । किशोरः स्यादश्वशावः इत्यमरः । तौ कुचकलशकिशोरकौ । उभयत्राप्युपमितसमासः । कथञ्चित् क्लेशेन सप्रतिषेधमित्यर्थः तरलतया चपलतया उत्सुकतयेत्यर्थः पस्पृशाते स्पृष्टौ । स्पृशेः कर्मणि लिट् । कृत्प्रेयम् ॥ ७२ ॥

अथ सर्वासामेव स्वेदोद्रेकं वर्णयति गत्वेति । सुरतश्रमस्त्रीणां स्वेदोदपूरः प्रवाहः जघनमेव पुलिनं तत्रोद्रेकं गत्वा रुद्धमध्यप्रदेशोऽवलग्नभागः प्रवाहदेशश्च येन सः पूर्णनाभीह्रदान्तः । रेखान्तमकराणां वा । पूर्णेति पूरयेर्ण्यन्तात्कर्मणि क्तः वा दान्तेत्यादिना णि लुगिट् प्रतिषेधनिपातः । कुचौ उच्चतौ कूपाविव तटौ तयोर्मुख्यप्रदेशमुच्छ्रयन् रोमकूपान् रोमाणि रोमरन्ध्राणि तान्येव कूपान् प्लावयन् पूरयन् गण्डस्थलानि कपोलभागान् उपरिभूभागानिव प्राप । अत्र सुरतेषु स्वे-

उल्लङ्घ्योर्वीः कुचतटभुवं प्लावयन्रोमकूपान्
स्वेदापूरोयुवतिसरितां व्याप गण्डस्थलानि ॥७४॥
प्रियकरपरिमार्गादङ्गनानां यदाभू
त्पुनरधिकतरैव स्वेदतोयोदयश्रीः ।
अथ वपुरभिषेक्तुस्तास्तदाम्भोभिरीषु
र्वनविहरणखेदम्लानमम्लानशोभाः ॥ ७५ ॥
इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये
वनविहारोनाम सप्तम सर्गः ॥ ७ ॥

त्वत्र तदवयवेष्वारोपणानां च निरूपणात्समस्तवस्तुविषयसावयवरूपकं स्वेदा-
नुप्राणितम् । मन्दाक्रान्ता वृत्तम् । मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ
ताद्गुरू चेदिति लक्षणात् ॥ ७४ ॥

एवमध्वश्रमानुभावं स्वेदोद्रेकं वर्णयित्वा तत्फलभूतां जलविहारे-
च्छामासामाह दर्शयति । प्रियेति । यदा अङ्गनानां प्रियकर परिमार्गात्
प्रियकरस्पर्शात् । हलश्चेति घञ् प्रत्ययः । स्वेदतोयोदयश्रीः स्वेदोद्गम-
सम्पत् पुनर्भूयोऽप्यधिकतरैवाभूत्तदा अम्लान शोभा अक्षीणकान्तयः वपुषि
म्लानेऽपीति भावः ता अङ्गनावनविहरणखेदेन म्लानम् । म्लायतेः कर्त्तरि
क्तः संयोगादेरातोधातोर्यण्वत इति निष्ठानत्वम् । वपुरङ्गं अथ कात्-
स्न्र्येन । मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथेत्यमरः । अम्भोभिर-
भिषेक्तुं ईषुः इच्छन्ति स्म । इषेर्लिट् । अत्र पूर्ववाक्यार्थस्योत्तरवाक्या-
र्थसमर्थनहेतुकत्वेनोपनिबन्धाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः । मालिनी
वृत्तम् ॥ ७५ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघ
काव्यव्याख्याने सर्वङ्कषाख्ये सप्तमः सर्गः ॥ ७ ॥

स्त्रीलोकः परिकलयाञ्चकार तुल्यं
पल्यङ्कैर्विगलितहारचारुभिः स्वैः॥ ९॥
आघ्राय श्रमजमनिन्द्यगन्धबन्धुं
निश्वासश्वसनमसक्तमङ्गनानाम्।
आरण्याः सुमनस ईषिरे न भृङ्गै
रौचित्यं गणयति को विशेषकामः॥ १०॥
आयान्त्यां निजयुवतौ वनात्सभङ्गं
बर्हिण्यामपरशिखण्डिनी भरेण।

नद्यौ सिकतामयं सैकतं पुलिनम्। तोयोत्थितं तत्पुलिनं सैकतं सिकतामयमित्यमरः। सिकताशर्कराभ्यां चेत्यण्प्रत्ययः। विगलितै-र्विशीर्णैर्हारैः चारुभिः स्वैः पल्यङ्कैः शयनैः। शयनं मञ्चपर्यङ्कपल्यङ्काः खट्वया समा इत्यमरः। तुल्यं सदृशं परिकलयाञ्चकार मेने। पूर्वोप मेयम्॥ ९॥

आघ्रायेति। भृङ्गैः कर्तृभिः श्रमजमश्रमोत्थं अनिन्द्यगन्धस्य श्लाघ्यगन्धस्य बन्धुं सहचरं तद्वन्तमित्यर्थः। अङ्गनानां निश्वासश्वसनं निः-श्वासमारुतं असक्तमप्रतिषिद्धं आघ्राय अरण्ये भवा आरण्याः सु-मनसः पुष्पाणि नेषिरे नेष्टाः। इषु इच्छायां कर्मणि लिट्। ननु किमो-ऽयमकाण्डे परिचितपरित्याग इत्याह। विशेषं कामयते इति विशेष-कामः। शीलिकामिभक्ष्याचरिभ्यो ण इति णप्रत्ययः। क औचित्यं गण-यति न कोऽपीत्यर्थः। अर्थान्तरन्यासः॥ १०॥

आयान्त्यामिति। निजयुवतौ वनादायान्त्यामागच्छन्त्यां स्तनभ-ङ्गं सभयं अपरशिखण्डिनीं जारिणीं बर्हिणीं भरेण अशक्ततयाच्छा-दयन्तं मयूरं पुर आलोक्य कामिन्या विवेकनाशेन कौटिल्यं नष्ट-व्यधुरिवस्खलत्य कुटिला कुरला इति विविच्युरित्यर्थः। दधातेर्लिङि गातिस्थेत्यादिना सिचोलुक् चात इति झेर्जुसादेशः। मद्दलोरुप-

आलोक्य व्यवदधतं पुरोमयूरं
कामिन्यः श्रद्धुरनार्जवं नरेषु ॥ ११ ॥
आलापैस्खलितरवाणि माधवीनां
माधुर्यादमलपतत्रिणां कुलानि ।
अन्तर्धामुपययुरुत्पलावलीषु
प्रादुःष्यात्क इव जितः पुरः परेण ॥ १२ ॥
मुग्धायाः स्मरललितेषु चक्रवाक्या
निःशङ्कं दयिततमेन चुम्बितायाः ।
प्राणेशानभि विदधुर्विधूतहस्ताः
शीत्कारं समुचितमुत्तरं तरुण्यः ॥ १३ ॥

मनीषदुष्करिति श्रद्धध्य धातोः प्राक् प्रयोगः ॥ ११ ॥

आलापैरिति । माधवीनां वासन्तीनां आलापैः कण्ठध्वनिभिः माधुर्यात् स्खलितरवाणि तिरस्कृतरवाणि अमलपतत्रिणां हंसानां कुलानि उत्पलावलीष्वन्तर्धाम् । अन्तःशब्दस्य ... अन्तःशब्दस्योपसर्गसंज्ञत्वादातश्चोपसर्गे इत्यङ् प्रत्ययः । उपययुः । युक्तं चैतदित्याह । तथा हि परेण जितः क इव पुरोऽग्रतः प्रादुःष्यात् प्रादुर्भवेत् । उपसर्गप्रादुर्भ्यामस्तिर्यच्पर इति षत्वम् । अर्थान्तरन्यासः ॥ १२ ॥

मुग्धाया इति । दयिततमेन निःशङ्कं निर्विचारं चुम्बिताया मुग्धायाः चक्रवाक्याः स्मरललितेषु सुरतावसरेष्वपि शीत्कारादिविषयचेष्टितेषु ... तरुण्यः ... शीत्कारं ... उत्तरं ... प्राणेशान् ... विधूतहस्ताः ... इत्यर्थः ॥ १३ ॥

उत्क्षिप्तस्फुटितसरोरुहार्घ्यमुक्तैः
सस्नेहं विहगरुतैरिवालपन्ती।
नारीणामथ सरसी सफेनहासा
प्रीत्येव व्यतनुत पाद्यमूर्मिहस्तैः॥ १४॥
नित्याया निजवसतेर्निरासिरे य-
द्रागेण श्रियमरविन्दतः कराग्रैः।
व्यक्तत्वं नियतमनेन निन्युरस्याः
सापत्न्यं क्षितिसुतविद्विषो महिष्यः॥ १५॥
आक्रन्दन् कथमपि योषितो न याव
ह्रीमत्यः प्रियकरधार्यमाणहस्ताः।

उत्क्षिप्तेति। अथानन्तरमुत्क्षिप्तं स्फुटितसरोरुहं विकचारविन्दमेवार्घ्यमर्घद्रव्यं यस्मिंस्तथा सस्नेहं विहगरुतैरालपन्ती स्वागतादिवचनं व्याहरन्तीव स्थिता इत्युत्प्रेक्षा। फेन एव हासस्तेन सहिता सफेनहासा स्मितपूर्वाभिभाषिणीत्यर्थः। सरसी पुष्करिणी नारीणामूर्मिभिरेव हस्तैः पाद्यम्पादोदकम्। पादार्घाभ्यां चेति यत् प्रत्ययः। प्रीत्येवेत्युत्प्रेक्षा व्यतनुत रूपकानुप्राणितोत्प्रेक्षाद्वयस्य सापेक्षत्वात् संकरः॥ १४॥

नित्याया इति। क्षितिसुतविद्विषो नरकद्विषो हरेः महिष्यः कराग्रैः पाणिपल्लवैः करणैः रागेण रक्तवर्णेन इच्छया च श्रियं शोभां रमां च नित्याया सदातन्या निजवसतेः स्थानादरविन्दतोऽरविन्दादिराशिरे निरस्यामासुः निराकुर्वन्निति यावत्। उपसर्गादस्यत्यूह्योर्वा वचनमिति विकल्पादात्मनेपदम्। अनेन निरासेनास्याः श्रियः सापत्न्यं सपत्नीत्वम्। ब्राह्मणादित्वात् ष्यञ् प्रत्ययः। व्यक्तत्वं निश्चितत्वमित्यर्थः। अत्र श्रीशब्देन रमाशोभयोरभेदाध्यवसायेन श्रीनिरासस्य साप

औत्सुक्यात्त्वरितममूस्तदम्बु ताव
त्संक्रान्तप्रतिमतया द्विधाविविक्ताः ॥ १६ ॥
ताः पूर्वं सचकितमागमय्य गाधं
कृत्वाथो मृदुपदमन्तराविशन्त्यः ।
कामिन्योमन इव कामिनां सरागं
रङ्गैस्तज्जलमनुरञ्जयां बभुवुः ॥ १७ ॥
संक्षोभं पयसि मुहुर्महेभकुम्भ
श्रीभाजा कुचयुगलेन नीयमाने ।

त्वद्गतीरचार्यत्वोक्तेदयात् चेष्टप्रतिभोत्पादितातिशयोक्त्यनुप्राणितेयं ध्वन्योरपि चेति सङ्करः ॥ १५ ॥

औत्सुक्यादिति । मौग्ध्य॰ प्रवेशभीरवो योषितः प्रियकरैर्हृदयकाल-म्बन ः प्रियकरालम्बनाः सत्यः यावत् कथमपि न प्रान्दन् न प्राविशन् तावत्संक्रान्तप्रतिमतया संक्रान्तप्रतिबिम्बतया तदम्बु कर्तृ औत्सुक्याद्-दुत्कण्ठया त्वरितममूः तदन्तः प्रवेशय द्विधेत्यर्थः । प्रतिबिम्बसंक्रमणादन्तःप्रवेशोक्तेः नयात् क्रियानिमित्ता क्रियासङ्गोक्तेश्च ॥ १६ ॥

ता इति । ताः कामिन्यः कामिनः कामुकस्य मन इव तज्जलं पूर्वं सचकितं सभयं यथा तथा गाधमागमय्य गमनेन ज्ञात्वा पुरःप्रविष्टकामुकेन गाधं तदिति परामर्शेत्यर्थः । अन्यत्र दूतमुखेन ज्ञात्वेत्यर्थः । अथो अनन्तरं मृदु मन्दमन्दं कृत्वा पदं स्थानं अन्यत्र तु पदं व्यवसायादिकं ज्ञात्वेत्यर्थः । अन्तरभ्यन्तरमाविशन्त्यः प्रविशन्त्यः रङ्गैः सरागं रञ्जनम् [illegible] इत्यर्थः । सरागैः रङ्गैः रागैः कुङ्कुमादिभिः [illegible] अनुरञ्जयाम्बभूवुः तद्वर्णो मनो [illegible] अनुरक्तं चकुरित्यर्थः । उपमालङ्कारः ॥ १७ ॥

संक्षोभमिति । [illegible]

विश्लेषं युगमगमद्रथाङ्गनाम्नो-
रुद्वृत्तः क इव सुखावहः परेषाम् ॥ १८ ॥
आसीना तटभुवि सस्मितेन भर्त्रा
रम्भोरूरवतरितुं सरस्यनिच्छुः ।
धुन्वाना करयुगमीक्षितुं विलासान्
शीतालुः सलिलगतेन सिच्यते स्म ॥ १९ ॥
नेच्छन्ती सममुना सरोऽवगाढुं
रोधस्तः प्रतिजलमीरिता सखीभिः ।

एवमसम्भवद्वस्तुसम्बन्धो निदर्शनालङ्कारः । कुचयुगलेनोच्छ्रितेनेति भावः । पयसि मुक्तः संयोगं नीयमाने प्राप्यमाणे सति रथाङ्गनाम्नोर्युगं चक्रवाक-युगलं विश्लेषं वियोगमगमत् वियोगाशङ्कि अभूदिति भावः । तथाहि उद्वृत्त उन्नतोद्धतश्च उद्वृत्तं न यस्येति वा उद्वृत्तः अन्यतोद्धृत उन्मार्गवर्तीति यावत् स कइव कोवा परेषां स्वेतरेषां सुखावहः सुखकरः न कोऽपीत्यर्थः । अथवा श्लेषमूलातिशयोक्तिजीवितोऽर्थान्तरन्यासः ॥ १८ ॥

आसीनेति । शीतं न सहत इति शीतालुः शीतभीरुः । शीतोष्णाभ्यां तदसहने आलुच् वक्तव्यः । अतएव सरसि अवतरितुं प्रवेष्टुं अनिच्छुरनभिलाषुका अतएव तटभुवि आसीना उपविष्टा । आसेः कर्त्तरि शानच् ईदासः इतीकारः । रम्भे कदलीस्तम्भाविवोरू यस्याः सा रम्भोरूः स्त्री । 'ऊरूत्तरपदादौपम्ये' इत्यूङ् प्रत्ययः । सलिलगतेन स्वयं सलिलं प्रविष्टेन सस्मितेन भर्त्रा विलासानीक्षितुं करयुगं धुन्वाना कम्पयन्ती । धुनोतेः कर्त्तरि शानच् प्रत्ययः । सिच्यते स्म सिक्ता ॥ १९ ॥

नेति । अमुना समं अनेन भर्त्रा सह सरोऽवगाढुमवगाहितुम् । स्वरतिसूतिसूयतिधूञूदितो वेति विकल्पादिडागमः । नेच्छन्ती इच्छया अनिच्छन्ती । नञ्शब्दस्य नशब्देन सुप्सुपेति समासः नञ्समासो वा ।

आश्लिष्यद्भयचकितेक्षणा नवोढा
वोढारं विपदि न दूषितातिभूमिः ॥ २० ॥
तिष्ठन्तम्पयसि पुमांसमंसमात्रे
तद्घ्नन्तदवयती किलात्मनोऽपि ।
अभ्येतुं सुतनुरभीरियेष मौग्ध्या
दाश्लिष्य द्रुतममुना निमज्जतीति ॥ २१ ॥
आनाभेः सरसि नतभ्रुवावगाढे
चापल्यादथ पयसस्तरङ्गहस्तैः।

[illegible] । [illegible] इरिता नवोढा नववधू भयेन चकितदृक् सम्भ्रान्तदृष्टिः सती वोढारम्भर्तारमाश्लिष्यत् । आलिङ्गितवती । श्लिष आलिङ्गने इति धातोर्लङि [illegible] । न च धार्ष्ट्यदोषमापन्नेत्याह । विपदि विपत्तौ अतिक्रान्ता भूमि रतिभूमिरमर्यादा न दूषिता । आपत्काले नास्ति मर्यादेति न्यायादिति भावः । पर्यायोक्तमलङ्कारः ॥ २० ॥

तिष्ठन्तमिति । सुतनुः शुभाङ्गी स्त्री अंसः प्रमाणमस्येति अंसमात्रे अंसप्रमाणे । प्रमाणे द्वयसज्दघ्नञ्मात्रच इति मात्रच् प्रत्ययः । पयसि जले तिष्ठन्तं पुमांसं वीक्ष्येति शेषः । आत्मनोऽपि [illegible] [illegible] अवयती जानती । किल तथा [illegible] । [illegible] [illegible] । [illegible] [illegible] [illegible] । [illegible] मौग्ध्यविशेष । [illegible] [illegible] । अमुना पुंसा निमज्जतीति द्रुतम[illegible] आश्लिष्टा ॥ २१ ॥

आनाभेरिति । [illegible] [illegible] [illegible] । आङ् मर्यादाभिविध्योरिति विकल्पात्समासः । [illegible] प्रविष्टे सति । [illegible] [illegible] । अथ [illegible] । [illegible]

उच्छ्रायि स्तनयुगमध्यरोहि लब्ध-
स्पर्शानां भवति कुतोऽथवा व्यवस्था ॥ २२ ॥
कान्तानां कुवलयमप्यपास्तमक्ष्णोः
शोभाभिर्न मुखरुचाऽहमेकमेव ।
संहर्षादलिविरुतैरितीव गाय-
ल्लोलोर्मौ पयसि महोत्पलं ननर्त ॥ २३ ॥

भावात् ष्यञ् प्रत्ययः । तरङ्गैरेव हस्तैस्तरङ्गहस्तैरुच्छ्रायो ऽप्यासील्लु-
च्छ्रायि उन्नतिमत् स्तनयुगमध्यरोहि अधिरूढम् । भिक्षुकपादप्रसार-
न्यायादिति भावः । रोहतेः कर्मणि लुङ् । अथ वा तथाही-
त्यर्थः । लब्धस्पर्शानां लब्धप्रवेशानामित्यर्थः । कुत. कुत्र वा । सार्व-
विभक्तिकस्तसिल् । व्यवस्था मर्यादा भवति न कुत्रापीति भावः प्रायेण
सर्वेऽप्यधमप्रभमञ्जचारिण एवेति भावः । अत्र चापल्यादिति द्वयोरपि
लौल्ययोरभेदाध्यवसायमूलातिशयोक्त्या तरङ्गहस्तैरिति रूपकेण च
पयसि कामित्वप्रतीतेः समासोक्तिः तदुपजीवी चार्थान्तरन्यास इति
सङ्करः ॥ २२ ॥

कान्तानामिति । लोलोर्मौ चपलोर्मिणि । स्त्रीयादिषु भाषित-
पुंस्कं पुंवद्गालवस्येति विकल्पात्पुंवद्भावः । पयसि महोत्पलमरविन्द
कर्तृ । अरविन्दं महोत्पलमित्यमरः । कान्तानां मुखरुचा अयमेक-
मेव नापास्तं किन्तु तासामक्ष्णोः शोभाभिः कुवलयमप्यपास्तं इति
संहर्षात्सन्तोषादलिविरुतैर्गायत् अलिरुत रूप गानं कुर्वदिति रूप-
कम् । इत्थम्भूतलक्षणे तृतीया । ननर्तेव । न दुःसम्पद्भिः
सहेति न्यायादनृत्यत् च । चलोर्मि चलनहेतुके महोत्पलचलने नर्ति-
नादस्य हर्षहेतुकत्वाभानत्वयो रुपेक्षयाक्रिय निमित्तक्रियास्वरूपोत्प्रेक्षा-
दाच्या ॥ २३ ॥

त्रस्यन्ती चलशफरीविघट्टितोरु-
र्वामोरूरतिशयमाप विभ्रमस्य ।
क्षुभ्यन्ति प्रसभमहो विनापि हेतो-
र्लीलाभिः किमु सति कारणे रमण्यः ॥ २४

आकृष्टप्रतनुवपुर्लतैस्तरङ्गै-
स्तस्याक्षात्तदथ सरोमहार्णवस्य।
अक्षोभि प्रसृतविलोलबाहुपक्षै-
र्योषाणामुरुभिरुरोजगण्डशैलैः ॥ २५ ॥

त्रस्यन्तीति । चलाः शफर्यः चाञ्चल्यवन्तो मत्स्यः । प्रोष्ठी तु शफरी द्वयोरित्यमरः । ताभिर्विघट्टितौ ऊरू यस्याः सा अतएव त्रस्यन्ती बिभ्यती । त्रस्यतेत्यादिना विकल्पात् श्यन् प्रत्ययः । वामौ सुन्दरावूरू यस्याः सा वामोरूः स्त्री । संहितशफलक्षणवामादेश्चेत्यूङ् प्रत्ययः । विभ्रमस्य विलासस्यातिशयमाप तथा हि रमण्यो हेतोर्विनापि कारणं विनापि । पृथग्विनेत्यादिना विकल्पात् पञ्चमी । लीला-भिर्विलासैः प्रसभमत्यर्थं क्षुभ्यन्ति अहो निष्कारणक्षोभादाश्चर्यमि-त्यर्थः । कारणे सति किमु वक्तव्यम् । अत्र प्रकृतनिष्कारणक्षोभकथना-त्सकारणक्षोभस्य कैमुत्यन्यायेनार्थापत्त्या सिद्धेरर्थापत्तिरलङ्कारः । दण्डापूपि-कयार्थान्तरापतनमर्थापत्तिरिति लक्षणम् ॥ २४ ॥

आकृष्टेति । तदनन्तरमाकृष्टाः मदनेनेव यैः ... तस्याः सरो-... तस्याः प्रसृता आयता विलोला ... बाहव एव पक्षा यस्य ... ते । गिरिपक्षस्य ... वक्षोजादिभिरेव गण्डशैलैः ... उरुभिर्महद्भिः ... सरो महार्णवस्य ... अक्षोभि । ... ॥ २५ ॥

गाम्भीर्यन्दधदपि रन्तुमङ्गनाभिः
संक्षोभं जघनविघट्टनेन नीतः।
अम्भोधिर्विकसितवारिजाननोऽसौ
मर्य्यादां सपदि विलङ्घयाम्बभूव ॥ २९ ॥
आदातुन्दयितमिवावगाढमारा
दूर्मीणां ततिभिरभिप्रसार्यमाणः।

गाम्भीर्यमिति। गाम्भीर्यमगाधत्वं धैर्यमविकारित्वं च दधदपि गम्भीरः सन्नपि रन्तुं विहर्तुं मग्नाभिरङ्गनाभिर्जघनस्य विघट्टनेन सङ्घर्षेण संक्षोभं चलनं चित्तविकारञ्च नीतः अतएव विकसितवारिजाननः विकसितं वारिजमिव आननं यस्य स अम्भांसि धीयन्तेऽस्मिन्निति अम्भोधिर्जलाशयः कश्चिन्नायकस्तत्तुल्यो गम्यते। कर्मण्यधिकरणे चेति किप्रत्ययः। सपदि मर्यादां सीमानं स्थितिञ्च विलङ्घयाम्बभूव लङ्घितवान्। धीरोऽपि स्त्रीसन्निकर्षाद्विक्रियत इति भावः। अत्र गाम्भीर्यादिविशेषणसाम्यादप्रस्तुतविशेषप्रतीतेः समासोक्तिरलङ्कारः। सा च प्रतीयमानाभेदाध्यवसायमूलातिशयोक्त्यनुप्राणितेति सङ्करः॥ २९॥

आदातुमिति। तरङ्गितततयः महार्णवस्य ... अभ्यर्कत्तिशुल्लीयस्य सः। मद्य्नवेति कप्। लक्ष्मीवान् शोभावान्। मन्दुपगयाश्च मतोर्बोयञादिभ्य इति मतुशोभकारस्य वयस्। कस्यापि केचहस्तः केशपाशः। पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे इत्यमरः। ... इति कस्य ध्वन्यते। आरात्समीपे आराद्दूरसमीपयोरित्यमरः। अवगाढमन्तर्मग्नं दयितमादातुं गृहीतुमिव ऊर्मीणां ततिभिः समूहैरभ्यर्थ्यमानोऽभितो व्याप्यमानोऽब्धिः रराज। अम्भःमादातुमिव प्रसार्यमाण इति प्रसारणस्यादानार्थत्वोत्प्रेक्षणादियं क्रियाभिमता क्रियोत्प्रेक्षा। सा च चलच्छिद्धा [illegible]

कस्याश्चिद्विगलितचलच्छिखाङ्गुलीको
लक्ष्मीवान्सरसि रराज केशहस्तः ॥ २७ ॥
उन्निद्रप्रियकमनोरमं रमण्याः
संरेजे सरसि वपुः प्रकाशमेव ।
मुक्तानां विमलतया तिरस्क्रियायै
नाक्रामन्नपि हि भवत्यलं जलौघः ॥ २८ ॥
किन्तावत्सरसि सरोजमेतदारा
दाहोस्विन्मुखमवभासते युवत्याः ।

इति श्लेषमूलया भ्रान्त्या केशकलापस्य प्रतीयमानात्कराद्भेदे अभेदरूपा-
तिशयोक्त्या निर्व्यूढेति सङ्करः ॥ २७ ॥

उन्निद्रेति । उन्निद्रं यत् प्रियकं कदम्बकुसुमम् । [illegible]
कुसुमप्रियकजीविका इत्यमरः । तदिव मनोरमं कनकगौरमित्यर्थः ।
रमण्या वपुः सरसि प्रकाशमेव जलमग्नमपि वैमल्यादनावृतमिव संरेजे । तथा
हि । जलौघो जलपूरो जलौघो मूर्धजलौघ इत्यनयोरभेदात् । आक्रामन्ना-
वृण्वन्नपि अन्यत्र अधितिष्ठदपि विमलतया वैमल्येन मुक्तानां शुद्धानां
तिरस्क्रियायै तिरोधानाय परिभवाय च अलं समर्थो न भवति हि । श्ले-
षमूलया भेदेऽभेदरूपातिशयोक्त्यानुप्राणितोऽयमर्थान्तरन्यासः ॥ २८ ॥

किमिति । सरस्याराद्दूरादेतत् पुरोवर्ति सरोजं किं आहो-
स्वित् एतत् युवत्या मुखमवभासते इति सदृशं संशयं संदिग्ध । मोहः
[illegible]

संशय्य क्षणमिति निश्चिकाय कश्चि-
द्बिब्बोकैर्बकसहवासिनां परोक्षैः ॥ २९ ॥

शृङ्गाणि द्रुतकनकोज्ज्वलानि गन्धाः
कौसुम्भं पृथुकुचकुम्भसङ्गि वासः ।
माध्वीकं प्रियतमसन्निधानमासन्
नारीणामिति जलकेलिसाधनानि ॥ ३० ॥

उत्तुङ्गादनिलचलांशुकास्तटान्ता-
च्चेतोभिः सह भयदर्शिनां प्रियाणाम् ।

त्रिंशमगात् । सन्देहगावपदौ ख्यातौ सन्देहावहुलिय भीति वचनात् । सोऽयमन्ते निश्चयोक्तेर्निश्चयान्तः ॥ २९ ॥

अथ जलक्रीडासम्भारानाह । शृङ्गाणीति । द्रुतेन द्रवीभूतेन कनकेनोज्ज्वलानि दीप्तानीत्यर्थः । शृङ्गाणि क्रीडाम्बुयन्त्राणि । शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके इति विश्वः । गन्धाश्चन्दनादि-गन्धद्रव्याणि । अत एव पुंसि बहुत्वं च । गन्धस्तु सौरभे योगे गन्धके गर्वलेशयोः । स एव द्रव्यवचनो बहुत्वे पुंसि च ख्यात इत्यभिधानात् । पृथु विशालं कुचकुम्भसङ्गि कुचावरणं कुसुम्भेन रक्तं कौसुम्भम् । तेन रक्तं रागादित्यण् प्रत्ययः । वासोऽत्र जलक्रीडायां विलासोपयोगि रक्तवासः । माध्वीकं मधूकपुष्पोद्भवं मद्यम् । किं च प्रियतमसन्निधानं सन्निधानमासन्निति भावः । इत्येतानि नारीणां जलकेलिसाधनानि जलक्रीडोपकरणान्यासन् । प्रहर्षिणी वृत्तम् । अत्र शृङ्गादीनां जलक्रीडासाधनत्वेन समुच्चयात् समुच्चयालंकारः ॥ ३० ॥

उत्तुङ्गादिति । अनिलेन चेतनेन चलांशुका चञ्चलवसना काचि-दुत्तुङ्गादुन्नताद्भयदर्शिनां भयात् पश्यतां प्रियाणां चेतोभिः सह तटान्तात् पपातेत्यर्थः । गुर्वितिगुर्वीति । तेनै

श्रोणीभिर्गुरुभिरनूरुमुत्ततन्त्य
स्तोयेषु द्रुततरमङ्गना निपेतुः ॥ ३१ ॥
मुग्धत्वादविदितकैतवप्रयोगा
गच्छन्त्यः सपदि पराजयं तरुण्यः ।
ताः कान्तैः सह करपुष्करेरिताम्बु
व्यात्युक्षीमभिसरणग्लहामदीव्यन् ॥ ३२ ॥

गुरुभिरिति । [illegible] । श्रोणिभिर्गुरुभिः अनूरु मन्दमन्द-
मुत्पतन्त्यः द्रुततरं निपेतुः । गुरुत्वस्य पतनहेतुत्वादुत्पतनविरोधित्वाच
उत्पतने मन्दोत्पतनञ्चेति भावः । अत्र निपतने पतनोत्पतनयोः
कार्यकारणयोः [illegible] गुरुत्वलक्षणैककारणयोः पौर्वापर्य-
विपर्ययरूपातिशयोक्तिभेदः कार्यकारणयोरलङ्कारः । [illegible]
[illegible] । [illegible] अतिशयोक्तिरेवेति न-
व्यात् । [illegible] कार्यगताशुभाव प्रतीतेश्चमत्कार
इति रहस्यम् । [illegible]
समासोक्तिरिति केचित् ॥ ३१ ॥

मुग्धत्वादिति । मुग्धत्वान्मूढत्वादविदिताः कैतवप्रयोगाः कपटप्रयो-
गा याभिस्ताः तरुण्यः अत एव सपदि पराजयं गच्छन्त्यस्तरुण्यः ता-
रुण्य. कान्तैः सहाभिसरणं कान्तमभिगमनं ग्लहो द्यूतं पणो यस्यां तां-
ताम् । पणोऽस्त्रियां ग्लह इत्यमरः । अक्षेषु ग्लह इति पाणिनिसूत्रे
[illegible] । [illegible] यत्र [illegible] विहरन्ति केलिषु
[illegible] [illegible] [illegible]
[illegible] । करपुष्करैः [illegible] मिथो [illegible] व-
[illegible] [illegible] । [illegible] [illegible]
[illegible] [illegible] । [illegible] ।
[illegible] । [illegible]

योग्यस्य त्रिनयनलोचनानलार्चि-
र्निर्दग्धस्मरपृतनाधिराजलक्ष्म्याः।
कान्तायाः करकलशोद्यतैः पयोभि-
र्वक्त्रेन्दोः कृतमहाभिषेकमेकः ॥ ३३ ॥
सिञ्चन्त्याः कथमपि बाहुमुन्नमय्य
प्रेयांसं मनसिजदुःखदुर्बलायाः।

त्कर्मत्वम्। अत्राविदितकैतवप्रयोगस्य विशेषणगत्या पराजयहेतुत्वादर्थ-
हेतुकं काव्यलिङ्गमलङ्कारः ॥ ३२ ॥

योग्यस्येति। त्रिनयनस्त्र्यम्बकः। क्षुभ्नादिषु चेति णिषेधात्पूर्व-
पदात् संज्ञायामिति णत्वाभावः। तस्य लोचनानलार्चिषा निर्दग्धस्य स्मरस्य
याः पृतनास्तासामधिराज्यमाधिपत्यं तदेव लक्ष्मीस्तस्याः योग्यस्यार्हस्य
त्रैलोक्यविजयिनः स्मरस्याप्यहमेव स्थानमित्यादिति भावः। कान्ताया
वक्त्रेन्दोः स्मरत्वस्यादर्शनेति भावः। करावञ्जलिरेव कलशस्तेनोद्यतैस्त-
त्क्षिप्तैः पयोभिर्महाभिषेक सेकः कश्चित्कामी चकार कृतवान्। करोतेः
र्लोट् लङ् तस्मादिभ्यस्तथा योरिति तिपोलुक्। अत्र वक्त्रेन्दावेव
महाभिषेकलोत्सर्गो प्रतीयमानकरकलशेति रूपकानुप्राणितेति संकर॰ ३२

सिञ्चन्त्या इति। मनसिजदुःखेन स्मरपीडया दुर्बलाया अत एव
कथमपि बाहुमुन्नमय्योद्यम्य प्रेयांसं प्रियतमम्। प्रियस्थिरेत्यादिना
प्रादेशः। सिञ्चन्त्याः स्नपयन्त्याः अङ्गनायाः करात्प्रकोष्ठात् सौवर्णं हिरण्-
मयं वलयं कङ्कणम्। कटकोऽस्त्रियामित्यमरः। स्वयमेव वापवर्गं का-
न्तिविशेषं। चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् प्रत्ययः। अस्यो 'रसरकोऽ-
क्षिभेदेषु'इत्यमरः। एवं निरोति विशः। यद्वा एकाकारेषु छायायामाकार-
मितान्तरा। प्रतिभाति च हृदये तद्भावस्य निर्दोष्यते। तस्य गौः स-
. मेषमतिरिक्तं शरीरमन्यदवधिरिति यावत्। प्रेमः बहुर्व-

सौवर्णं वलयमवागलत्कराग्रा
ल्लावण्यश्रिय इव शेषमङ्गनायाः ॥ ३४ ॥
स्निह्यन्ती दृशमपरा निधाय पूर्वं
म्मूर्तेन प्रणयरसेन वारिणेव ।
कन्दर्पप्रवणमनाः सखीसिसिक्षा
लक्ष्येण प्रतियुवमञ्जलिञ्चकार ॥ ३५ ॥
आनन्दं दधति मुखे करोदकेन
श्यामाया दयिततमेन सिच्यमाने ।

पेऽमले ऽर्धयुक्तेऽन्यवदिति विश्वः । तदिवावागलदपतत् । शेषमिति गुणनिमित्तशालिखितोऽवेया ॥ ३४ ॥

स्निह्यन्तीति । कन्दर्पप्रवणमनाः स्मरपरवशचित्ता अतएव दृशं निधाय पूर्वं दृष्टिं कृत्वा स्निह्यन्ती दृष्टिविशेषेण स्नेहं प्रकाशयन्तीत्यर्थः । अपरा स्त्री सख्याः सिसिक्षा सेक्तुमिच्छा तस्याः लक्ष्येण व्याजेन यदाञ्जलिरेव सिञ्चती न तु सिञ्चतीति द्योतनाय सिसिक्षेतीच्छायां सनः प्रयोगः । प्रतियुवं युवानं प्रति । अव्ययीभावसमासान्तः । मूर्तेन मूर्तिमता प्रणयरसेनेवेत्युत्प्रेक्षा । पाठादर्थस्य बलीयस्त्वात् प्रियमुद्दिश्य अञ्जलिनैवाधयः वारिणा पूर्णमञ्जलिं चकार प्रार्थयामासेत्यर्थः ॥ ३५ ॥

आनन्दमिति । आनन्दं दधति प्रियसम्भाषणया हर्षं दधाने श्यामाया मध्यमयौवनायाः स्त्रियः । श्यामा यौवनमध्यस्थेत्युत्पलः । मुखे वदने दयिततमेन अतिशयेन दयितः प्रियः । अतिशायने तमप् प्रत्ययः । तेन कर्त्रा करोदकेनाञ्जलिजलेन सिच्यमानेऽपीति ईर्ष्यया अनङ्गमा-
नाया । परोक्षेऽपि तामेव स्मरादिति वचनात् । इतरस्याः सपत्न्याः व-
दनमनिच्छन्त्यपि प्रियेऽस्मिन् ईति शेषः । अमर्षेण खेदाम्बुना स्नपितं सिक्त-
मासीत् ईर्ष्याजनकोपकारकत्वात् खेदादीनामिति भावः । अतिक्र-

ईर्ष्यन्त्यावदनमसिक्तमप्यनल्प
स्वेदाम्बु स्नपितमजायतेतरस्याः ॥ ३६ ॥
उद्वीक्ष्य प्रियकरकुड्मलापविद्धै
र्वक्षोजद्वयमभिषिक्तमन्यनार्याः ।
अम्भोभिर्मुहुरसिचद्वधूरमर्षा
दात्मीयं पृथुतरनेत्रयुग्ममुक्तैः ॥ ३७ ॥
कुर्वद्भिर्मुखरुचिमुज्ज्वलामजस्रं
यैस्तोयैरसिचत वल्लभो विलासी ।
तैरेव प्रतियुवतेरकारिदूरा
त्कालुष्यं शशधरदीधितिच्छटाच्छैः ॥ ३८ ॥

अपि सिक्तमिति विरोधः । तस्य स्वेदाख्यकारणोक्तेराभासत्वम् ॥ ३६ ॥

उद्वीक्ष्येति । प्रियस्य करकुड्मलाभ्यां पाणिपुटाभ्यामपविद्धै-र्विक्षिप्तैरम्भोभिरभिषिक्तं अन्यनार्याः सपत्न्याः वक्षोजद्वयमुद्वीक्ष्य वधू-र्मानिनी अमर्षादीर्ष्यालक्षणकोपादात्मीयं वक्षोजद्वयं पृथुतरेण नेत्रयुग्मेन मुक्तैरम्भोभिरश्रुभिर्मुहुरसिचत् अभिषिक्तवती । तत्सत्वरादिवेति भावः । अतोऽत्रस्तुतालङ्कारध्वनिः । लिपिसिचिह्वश्चेति सिचेर्लुङि च्लेरङा-देशः ॥ ३७ ॥

कुर्वद्भिरिति । मुखरुचिं मुखकान्तिं उज्ज्वलां कुर्वद्भिर्यैस्तोयैर्वि-लासी विभ्रमशीलः कामी । वौ कषलसेत्यादिना घिनुण् प्रत्ययः । वल्लभमजस्रमसिचत सिक्तवान् । स्वरितेत्यादात्मनेपदं आत्मनेपदेष्वन्य-तरस्यामिति सिचेर्लुङि च्लेरङादेशः । शशधरदीधितिच्छटाच्छैः शशि-करनिकरस्वच्छैः तैरेव तोयैर्दूरात्प्रतियुवतेः सपत्न्याः कालुष्यं आविलत्वं वैवर्ण्यं चाकारि स्वच्छतोये कालुष्यं कृतमिति विरुद्धकार्योत्पत्तिरूपो वि-षमभेदः । तत्र न्याय्य इति । वैषम्यं कालुष्ययोरभेदाध्यवसायादति-

रागान्धीकृतनयनेन नामधेय
व्यत्यासादभिमुखमीरितः प्रियेण ।
मानिन्या वपुषि पतन्निसर्गमन्दो
भिन्दानो हृदयमसाहि नोदवज्रः ॥ ३९ ॥
प्रेम्णोरः प्रणयिनि सिञ्चति प्रियायाः
सन्तापं नवजलविप्रुषो गृहीत्वा ।
उद्भूताः कठिनकुचस्थलाभिघाता
दासन्नां भृशमपराङ्गनामधाक्षुः ॥ ४० ॥
संक्रान्तं प्रियतमवक्षसोऽङ्गरागं
सख्यस्याः सरसि हरिष्यतीऽधुनाम्भः । •

मयोक्तिमनुद्यापितेति स्वरः ॥ ३८ ॥

रागेति । रागेण विपक्षानुरागेणान्धीकृतनयनेन प्रियेण नामधेयव्यत्यासात् सपत्नीनामपूर्वकमभिमुखमीरितः निपतन्नपि पतन् निसर्गमन्दः स्वभावजडः तथापि हृदयं भिन्दानो विदारयन्नुदकमेव वज्रोऽशनिरुदवज्रः मयूरव्यंसकेत्यादिना विकल्पादुदादेशः । मानिन्या विपक्षनामग्रहणजनितकोपवत्या नायिकया नासाहि न सोढः । तीक्ष्णयोगादतीक्ष्णमपि तीक्ष्णं भवतीति भावः । उदवज्र इति वैधर्म्यनिरवयवरूपकम् ॥ ३९ ॥

प्रेम्णेति । प्रणयिनि प्रेम्णा प्रियाया उरः सिञ्चति सति कठिनकुचस्थलाभिघातादुद्भूता उत्पतिताः नवजलस्य विप्रुषो बिन्दवः । "पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियाम्" इत्यमरः । तस्याः सिक्तायाः सन्तापं गृहीत्वा आदायासन्नां समीपस्थामपराङ्गनां सपत्नीं भृशमधाक्षुः सन्तापयन्ति स्म । दहतेर्लुङि वदव्रजेत्यादिना सिचि वृद्धिः दह्यादिकार्यम् । तत्क्षिप्तादेवापरस्या नायिकायाः सन्तापस्यैवाधानमुक्तमिति सा च सम्बन्धयोगादुक्ता ॥ ४० ॥

दृष्ट्वैवं सपदि हृतेऽपि तत्र तेपे
कस्याश्चित् स्फुटनखलक्ष्मणः सपत्न्या ॥ ४१ ॥
हृतायाः प्रतिसखि कामिनान्यनाम्ना
ह्रीमत्याः सरसि गलन्मुखेन्दुकान्तेः ।
अन्तर्धिं द्रुतमिव कर्तुमश्रुवर्षै-
र्भूमानं गमयितुमीषिरे पयांसि ॥ ४२ ॥

संक्रान्तमिति । प्रियतमवक्षसः सकाशात्संक्रान्तं गाढालिङ्गनात्कुच-तटलग्नं यस्याः विलीनाया अङ्गरागमधुनैव सरसि अम्भः कर्तृ । साधु निःशेषं हरिष्यते प्रक्षालयिष्यतीति एवम्भूता इति बुद्ध्वा सपदि तत्र तस्मिन्नङ्ग-रागे हृतेऽपि स्फुटमत्यन्तं दृश्यमानं नखलक्ष्म यस्यास्तथोक्तायाः कस्याश्चिदपि तस्याः सम्बन्धिनि सपत्न्या तेपे तप्तम् । भावे लिट् । तदिदमातपार्त्तस्य छाया-भिलिप्यतोदाहपदवदङ्गनवेदनं यदङ्गरागमेव दृष्ट्वा सपत्न्या नखक्षतदर्शना-त्कार इति । अत्र सन्तापे शान्त्यर्थेन निमज्जनेनाङ्गरागक्षालनेन तद्वि-रुद्धस्योत्पादनादिष्टकार्योत्पत्तिरूपोऽविषमालङ्कारः ॥ ४१ ॥

हृताया इति । प्रतिसखि सख्याः समीपे सखीसमक्षमित्यर्थः । समीपार्थेऽव्ययीभावे नपुंसकत्वाद्ध्रस्वत्वम् । कामिना प्रियेणान्यस्याः सपत्न्या नाम्ना अन्यनाम्ना । सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः । हृतायाः अत एव गलन्मुखेन्दुकान्तेः ह्रीमत्याः लज्जितायाश्च कस्याश्चिदिति शेषः । सरसि द्रुतं शीघ्रमन्तर्धिं अन्तर्धानम् । कर्मण्यधिकरणे चेति किप्रत्ययः । अश्रुवर्षैः कर्तुमश्रुवर्षैः कर्तृभिः पयांसि सरो-जलानि भूमानं बहुत्वं गमयितुं प्रापयितुम् । गतिबुद्ध्यादिना कर्मत्वं प्राधान्याद्विधानञ्च । ईषिरे इव इष्टानि किल इत्युत्प्रेक्षा । अश्रुपात मिमिषा तथा महद्दुःखादपि दुःखं सपत्न्याः इत्युक्तमिति रसध्वनिः ॥ ४२ ॥

सिक्तायाः क्षणमभिषिच्य पूर्वमन्या
मन्यस्याः प्रणयवता वतावलायाः।
कालिम्ना समधित मन्युरेव वक्त्रं
प्रापाङ्गीर्गलदपशब्दमञ्जनाम्भः ॥ ४३ ॥
उद्वोढुं कनकविभूषणान्यशक्तः
सध्रीचा वलयितपद्मनालसूत्रः।

सिक्ताया इति। प्रणयवतांशप्रियेण क्षणं पूर्वमन्यां सपत्नीं समभिषिच्य पश्चात् सिक्तायाः अन्यस्याः अबलायाः स्त्रिया वक्त्रं कर्म मन्युः कोपएव कर्त्ता कालिम्ना कार्ष्ण्येन वैवर्ण्येन सहेति यावत् समधित सन्दधे यतो खेदे। सम्पूर्वाद्धधातेः कर्त्तरि लुङि तङ् स्थाघ्वोरिच्चेतीकारः किच्चित्वाच्च गुणः ह्रस्वादङ्गादिति सकारलोपः। गलत् स्रवदपाङ्गयोः सम्बन्धि अञ्जनाम्भः कज्जलोदकमपशब्दः पर्य्यासापवादस्माय कोपकालिमतिरोधानेन स्वकालिम्नएव प्रकाशनादिति भावः। पूर्वस्य वाक्यार्थेनोत्तरवाक्यार्थसमर्थनाद्वाक्यार्थहेतुकमिदं काव्यलिङ्गम् ॥ ४२ ॥

उद्वोढुमिति। कनकविभूषणान्युद्वोढुमशक्तः सौकुमार्य्यादिति भावः अतएव सहाञ्चतीति सध्रङ् तेन सहचरेण कर्त्रा। ऋत्विगादिना क्विन् प्रत्ययः सहस्य सध्रिरिति सहशब्दस्य सध्र्यादेशः अनिदितामिति नकारलोपः अच इत्यकारलोपे चाविति दीर्घः। वलयितानि वलयीकृतानि पद्मनालसूत्राणि मृणालतन्तवोयस्य सः मृणालमात्रकङ्कण इत्यर्थः। तथापि आक्तः आक्रमान् प्रतिवनितायाः सपत्न्याः कटाक्ष एव भारीयस्स सः तथा साक्ष्यस्तैव इत्यर्थः। अतएव तरुण्याभुजोभाङ्कः साधीयोबाढत इति क्रिया विशेषणम्। अन्तिकबाढयोर्नेदसाधाविति बाढशब्दस्य साधादेशः। गुरुभारत्वात् सायथाभवत्। अत्र कनकभूषणाभावेऽपि तनुकार्यगुरुत्वसर्गमाङ्गभावना सा च गुरुरिति सम्प्रतिभोत्पादित इत्युपमेयोपमानात् मितेति सङ्करः ॥ ४४ ॥

आरूढप्रतिवनिताकटाक्षभारः
साधीयोगुरुरभवज्जलस्तरुण्याः ॥ ४४ ॥
आबद्धप्रचुरपरार्ध्यकिङ्किणीको
रामाणामनवरतोदगाहभाजाम् ।
नारावं व्यतनुत मेखलाकलापः
कस्मिन्वा सजलगुणे गिरां पटुत्वम् ॥४५॥
पर्यङ्के सरसि हृतेऽंशुके पयोभि
र्लोलाक्षे सुरतगुरावपत्रपिष्णोः ।

आबद्धेति । उदकस्य गाहोऽवगाहनं उदगाहः । मन्थौदनेत्यादिना उदादेशः । तमनवरतमजस्रं भजन्ति यास्तासामनवरतोदगाहभाजां रामाणां स्त्रीणां सम्बन्धी आबद्धाः प्रोताः प्रचुरा भूयिष्ठाः परार्ध्याः श्रेष्ठाश्च किङ्किण्यो यस्मिन् स तथोक्तः । नद्यृतश्चेति कप् । मेखलाकलापः नारावं ध्वनिं न व्यतनुत । तथा हि जलेन सह सजलोऽत एव जडो गुणः सूत्रं यस्य सः तथा डलयोरभेदाज्जडगुणो जडधर्मो जाड्यलीन मन्दीत च जडगुणो जडश्च तस्मिन् कस्मिन् वा मेखलाकलापे पुंसि वा गिरां वाचां ध्वनीनाञ्च पटुत्वं सामर्थ्यञ्च कुत्रापीत्यर्थः । श्लेषमूलाभेदातिशयोक्त्यानुप्राणितोऽयमर्थान्तरन्यासः ॥ ४५ ॥

पर्यङ्क इति । परि परितोऽङ्कं स्वाङ्कं यस्य तत्पर्यङ्कं तस्मिंस्तथोक्ते सरसि पयोभिरंशुके स्त्रीपरिधाने हृते सत्यपहृतवस्त्रापहारिते सति सुरतगुरौ रमणे च लोलाक्षे लोलाक्षनशीले अपत्रपिष्णोः । लोलश्चञ्चलयोरित्यमरः । अपत्रपिष्णो लज्जाशीलायाः । अपात्त्रपेरिष्णुच्प्रत्ययः । लज्जा लज्जनमपत्रपेत्यमरः । अलङ्कृञ्निराकृञित्यादिना इष्णुच् प्रत्ययः । तस्याः सखियाः प्रस्तुतोचितनिर्देशोऽयं कामिनी वनिता करं वीचिभिरेव हस्तैर्नयनेन दृष्टं पर्यङ्कस्थैव वसनमेव तदा-

सम्भोगप्याद्दलवसनेन वीचिहस्त
न्यस्तेन द्रुतमकृताञ्जिनी सखीत्वम्॥ ४६॥
नारीभिर्गुरुजघनस्थलाहताना
मास्यश्रीविजितविकाशिवारिजानाम्।
लोलत्वादपहरतां तदङ्गरागं
संजज्ञे स कलुष आशयो जलानाम्॥ ४७॥
सौगन्ध्यं दधदपि काममङ्गनानां
दूरत्वाद्गतमहमाननोपमानम्।

मेनेत्यर्थः। सखीत्व चक्रत सखीकृत्यलुकारेत्यर्थः। चकाञ्जिन्यादिषु सखीत्वाद्यारोपात्समस्तवस्तुवर्त्ति सावयवरूपकम्॥ ४६॥

नारीभिरिति। नारीभिः कर्तृभिः गुरुजघनस्थलैराहतानां चास्यश्रीभिर्मुखशोभाभिः विजितानि विकाशीनि वारिजानि पद्मानि येषान्तेषां लोलत्वाच्चलत्वात्तरलत्वाच्च। लोलश्चलसतृष्णयोरित्यमरः। तासामङ्गरागमपहरतां चञ्चलयताञ्च जलानां तोयानां जडानाञ्च स आशयोऽन्तर्देशो हृदयञ्च कलुषोऽमलञ्च क्षुभितञ्च सञ्जज्ञे सञ्जातः। अपहर्तुः ताडन-स्वकरणादिभिराशयः कलुषो भवतीति ध्वनिः। अभिधायाः प्रकृतार्थे नियन्त्रणाच्च श्लेषः॥ ४७॥

सौगन्ध्यमिति। कामं यद्यपि सौगन्ध्यं सुरभिगन्धित्वं सुगन्धिस्य गन्धो गन्धकः चामोदे लेशे सम्बन्धिगर्वयोरिति विश्वः। दधदपि अह दूरत्वादूर्ध्वं दूरस्य त्वाद्गतं नासामाननोपमानं मुखसादृश्यं गतम्। दूरस्थाः पर्वताः रम्याः इति वदिति भावः। सम्प्रति पुनस्ताभ्यः नेदीयो नेदिष्ठमन्तिकतमं यतुः। अन्तिकवाढयोर्नेदसाधाविति अन्तिकशब्दस्य नेदादेशः। जितमरिभूतमभूदिति लक्ष्यदेश मत्तोत्पलसरविन्दं चाम्भोजे पद्मे पद्मिनि यथा दूरेऽसाम्येन दृश्यमानः सम्बन्धी सन्निधावपमानितः कश्चिल्लज्जया निलीयते तद्वदिति। अत्र पदकमलनत्वेऽजनमब्जने सम्भावितकमलमुखेऽत्र

नेदीयोजितमिति लज्जयेव तासा
मालोले पयसि महोत्पलं ममज्ज ॥ ४८ ॥
प्रभ्रष्टैः सरभसमम्भसोऽवगाह
क्रीडाभिर्विदलितयूथिकापिशङ्गैः ।
आकल्पैः सरसि हिरण्मयैर्वधूना
मौर्वाग्नेस्त्विषि शकलैरिव व्यराजि ॥ ४९ ॥
आस्माकी युवतिदृशामसौ तनोति
च्छायैव श्रियमनपायिनीं किमेभिः ।

इति शोभाभूतातिशयोक्त्युत्प्रेक्षयोः संसृष्टिः ॥ ४८ ॥

प्रभ्रष्टैरिति । सरभसं सवेगं अम्भसोऽवगाहा एव क्रीडास्ताभिः प्रभ्रष्टैर्जलावगाहक्रीडाभिरस्थानि च्युतैरिदं विदलिताविकसिता यूथिका पीतयूथिका हेमयूथिकाख्यपुष्पविशेषः यावि(?)शतिताः अन्यथा पिशङ्गत्वायोगात् । गणिका यूथिकाम्बष्ठा सा पीता हेमपुष्पिकेत्यमरः । तद्वत्पिशङ्गैः हिरण्मयैः सौवर्णैः । दाण्डिनायनेत्यादिना निपातः । वधूनामाकल्पैर्भूषणैः सरसि और्वाग्नेस्त्विषि शकलैस्त्वच्छायमयत्वादतएव मग्नैर्और्ववह्नेर्ज्वालाखण्डैरिवेत्युत्प्रेक्षा । व्यराजि विराजितम् । भावे लुङ् ॥ ४९ ॥

आस्माकीति । अस्माकमियमास्माकी अस्मदीया युष्मदादित्वात् युष्मदस्मदोरन्यतरस्यां खञ् चेति चकारादण्प्रत्ययः । तस्मिन्नणि च युष्माकास्माकाविति प्रकृतेरस्माकादेशः टिड्ढाणञित्यादिना ङीप् । असौ छाया कान्तिः स्वभावेनेति यावत् सैव युवतिदृशामनपायिनीं स्थायिनीं श्रियं तनोति अलङ्करणं, किं एतत् साध्यं किञ्चिदस्तीत्यर्थः । तथा च नेत्राञ्जनापेक्षया कारणस्यात् अतीया रत्युक्तं प्राक् । एवं मत्वा अञ्जनकारेणाञ्जनकेभ्यः निषिद्धमित्यर्थः । अत एव गम्योत्प्रेक्षेयम् । अनुगुण

मत्वैवं स्वगुणपिधानसाभ्यसूयैः
पानीयैरिति विदधाविरेऽञ्जनानि ॥ ५० ॥
निर्धौते सति हरिचन्दने जलौघै-
रापाण्डोर्गतपरभागयाङ्गनायाः ।
अह्नाय स्तनकलशद्वयादुपेये
विच्छेदः सहृदययेव हारयष्ट्या ॥ ५१ ॥

स्वाविष्करणात् इह नैर्मल्यगुणस्य पिधानं तिरोधानम् । अपिधानतिरोधान-पिधानाच्छादनानि चेत्यमरः । वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोरि-त्यकारलोपः । तेन साभ्यसूयैः ईर्ष्यैः पानमर्हैः प्राणीयैः । अम्भोऽ-र्णस्तोयपानीयनीरक्षीराम्बुशम्बरमित्यमरः । तव्यत्तव्यानीयर इति पिबते-रनीयर् प्रत्ययः । अञ्जनानि कज्जलानि इति अनेन स्वगुणप्रकाशनयो-ग्यतया विरचितेन प्रकारेण निर्धौतत्वरूपेणेत्यर्थः । विदधाविरे निर्धौ-तानि चालितानीत्यर्थः । धावु गतिशुद्ध्योरिति धातोः कर्मणि लिट् ॥५०॥

निर्धौतेति । हरिचन्दने रक्तचन्दने जलौघैर्निर्धौते क्षालिते सति । धावेः कर्मणि क्तः च्छ्वोः शूडनुनासिके चेति ऊकारः स्थोटादेश-एत्येधत्यूठ्स्विति वृद्धिरौकारः । आपाण्डोः पाण्डुवर्णादङ्गनायाः स्तनक-लशद्वयात् गतपरभागया सौवर्ण्यादिगततर्णोत्कर्षया । अतएव सामा-न्यालङ्कारः । सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकतेति लक्षणात् । हारयष्ट्या कर्त्र्या सहृदयया सचित्तयेवेत्युत्प्रेक्षा । निजपरभागहा-निपरिज्ञानवत्येत्यर्थः । अह्नाय सपदि । द्राक् झटित्यञ्जसाह्नाय स्राक् मङ्क्षु सपदि द्रुतेत्यमरः । विच्छेदस्तनुनपेदे प्राप्तः । हीनचित्र-माद्यैर्मनसा वर्तमिति भावः । उपपूर्वात्पदेः कर्मणि लिट् । विच्छे-दहेतुरस्य हारविच्छेदस्य सहृदयच्छेदत्वोत्प्रेक्षा तथा योतक मान्योत्प्र-क्षितेति सङ्करः ॥ ५१ ॥

नेदीयोजितमिति लज्जयेव तां श्रा
मालोक्ते पयसि महोत्पलं ममज्ज ॥ ४८ ॥
प्रश्चट्टैः सरभसमम्भसोऽवगाढ़
क्रीडाभिर्विदलितयूथिकापिशङ्गैः।
आकाल्यैः सरसि हिरण्मयैर्वधूना
मौर्वीभिस्त्रुटितगुणैरिव व्यराजि ॥ ४९ ॥
आस्माकी युवतिदृशामसौ तनोति
च्छायैव श्रियमनपायिनीं किमेभिः।

इति सूत्पलातिशयं निहेतूत्प्रेक्षयोः सङ्करः ॥ ४८ ॥

प्रश्चट्टैरिति। सरभसं सत्वरं यथाम्भसोऽवगाढ़ा एव क्रीडाभिः प्रश्चट्टैर्वनाशगाढ़योरादम्भसि च्युतैर्विदलितयूथिकाकलिका यूथिका पीतयूथिका हेमयूथिकापरपर्याया विदलिताः अन्यथापिशङ्गत्वायोगात्। गणिका यूथिकाम्बष्ठा सा पीता हेमयूथिकेत्यमरः। तद्वत्पिशङ्गैर्हिरण्मयैः कौशेयैः। दाण्डिनायनेत्यादिना निपात। वधूनामाकल्पैर्भूषणैः सरसि मौर्वीभिस्त्रुटितगुणैर्वंशमयत्वादलम्बन्धिभिरिवेति धानवज्ज्वालाधरगुणैरित्युत्प्रेक्षा। व्यराजि विराजितम्। भावे लुङ्॥ ४९ ॥

आस्माकीति। अस्माकमियमास्माकी अस्मदीया, अस्मत्कारितेत्यर्थः युष्मदस्मदोरन्यतरस्यां खञ्चेति चकारादणुप्रत्ययः। तस्मिन्नपि च युष्माकास्माकाविति प्रकृतेरस्माकादेश टिड्ढाणञित्यादिना ङीप्। असौ छाया कान्तिः शोभेति यावत् सैव युवतिदृशामनपायिनीं स्थायिनीं श्रियं तनोतीति एभिराकल्पैः किं एतत् साध्यं किञ्चिदस्तीत्यर्थः। तथा चाकल्पानां कारणत्वात् अक्षीया इत्युक्ता प्राक्। एवं मत्वा उत्पलकारणेषाकल्पनैष्फल्यं निश्चित्येत्यर्थः। अतः तासां नयेत्यम्। अनुपम

मत्वैवं स्रगुणपिधानसाध्यसूयैः
पानीयैरिति विदधाविरेऽञ्जनानि ॥ ५० ॥
निद्धौते सति हरिचन्दने जलौघै
रापाण्डोर्गतपरभागयाङ्गनायाः ।
अह्नाय स्तनकलशद्वयादुपेये
विच्छेदः सहृदययेव हारयष्ट्या ॥ ५१ ॥

व्यातिपूननद्द नैर्मल्यगुणस्य पिधानं तिरोधानम् । अपिधानतिरोध पिधानाच्छादनानि चेत्यमरः । अपि वायुरित्युपमानयोरुपसर्गयोरि- त्यकारलोपः । तेन साध्यसूर्यैः सिद्धैः पानपन्थैः पानीयैः । [illegible] पौराणपानीयनीरक्षीराम्बु शम्बरमित्यमरः । [illegible] इति [illegible] पानीयर् प्रत्ययः । अञ्जनानि कज्जलानि इति अनेन स्रगुणप्रकाशनयो- [illegible] विचित्रेण प्रकारेण निःशेषस्य दूरीकरणेत्यर्थः । विदधाविरे [illegible] धानि पानिनानीत्यर्थः । धातु [illegible] धातोः कर्मणि लिट् [illegible]

निर्धौते सति । हरिचन्दने रक्तचन्दने जलौघैर्निर्धौते क्षालिते सति । धावेः कर्मणि क्तः [illegible] इति [illegible] [illegible] इत्यौकारः । आपाण्डोः पाण्डुवर्णाङ्गनायाः [illegible] कलशद्वयात् गतपरभागया [illegible] । [illegible] [illegible] । [illegible] यत्र [illegible] इति [illegible] । हारयष्ट्या [illegible] सहृदयया [illegible] । [illegible] [illegible] । अह्नाय सपदि । [illegible] [illegible] । [illegible] । [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] । [illegible] ॥

अन्यूनं गुणममृतस्य धारयन्ती
सफुल्लस्फुरितसरोरुहावतंसा।
प्रेयोभिः सह सरसी निषेव्यमाणा
रक्तत्वं व्यधित वधूदृशां सुरेव ॥ ५२ ॥
स्नातानां बृहदमलोदबिन्दुचित्रौ
रेजाते रुचिरदृशामुरोजकुम्भौ।

अन्यूनमिति। अन्यूनं समग्रममृतस्य पीयूषस्य गुणं माधुर्यादिकं धारयन्ती। अमृतममृतकरसं शीतलं च तृष्णापहम्। स्वच्छं लघु च पथ्यं च तोयं गुणवदुच्यते इति। उक्तोदकगुणं धारयन्ती सरसीपक्षे। अमृतं यज्ञशेषे स्यात् पीयूषे सलिले घृते इति विश्वः। संफुल्लानि विकचानि। उत्फुल्लसम्फुल्लयोरुपसङ्ख्यानान्निष्ठातस्य लत्वम्। स्फुरितानि उज्ज्वलानि च यानि सरोरुहाण्येतान्यवतंसानि कर्णाभरणानि यस्याः विग्रहाणि तान्येव भूषणं यस्याः सा तथोक्ता। प्रेयोभिः सह निषेव्यमाणा स्नानपानाभ्यामिति भावः। सरसी पुष्करिणी वधूदृशां रक्तत्वमारुण्यं व्यधित विदधे स्म। तथा सुरा च। व्यधितेति धाञः कर्तरि लुङि तङ्। स्थाघ्वोरिच्चेत्यस्य सङ्गे सिच्चेत्याकृतिगणीति श्लोके सलिलक्रीडाप्रस्तावेऽपि माध्वीकमिति परिगणनात् सरसीसुरयोरपि प्रकृतत्वविवक्षायां तुल्ययोगिता। तदविवक्षायां तु दीपकं सुरेवेति पाठे प्रकृताप्रकृतविवक्षैव कार्या अन्यथा उपमानुपमा स्यात्। न च तुल्ययोगितापक्षे सुराशब्देन गम्यौपम्यलक्षणभङ्ग इति ॥ ५२ ॥

स्नातानामिति। स्नातानामवगाहमानानां रुचिरदृशां सुन्दरीणां बृहद्भिरमलैरुदबिन्दुभिश्चित्रौ। मन्थौदनेत्यादिना उदकशब्दस्योदादेशः। उरोजकुम्भौ उत्प्रेक्षाकारणात् मुक्ता हारार्थं म विनिर्गुटिकाभिरुपकल्पिते उपगम्यते दीप्यते वा उपमाव्याख्ययेति। इ रस्वयास्तपथाओदोति निपात। गुणवत्त्वौदार्यादिगुणवत्त्व स्य

हाराणां मणिभिरुपाश्रितौ समन्ता
दुत्सृष्टैर्गुणवदुपघ्नकाम्ययेव ॥ ५३ ॥
आरूढः पतित इति स्वसम्भवोऽपि
स्वच्छानां परिहरणीयतामुपैति ।
कर्णोभ्यश्च्युतमसितोत्पलं वधूनां
वीचीभिस्तटमनु यन्निरासुरापः ॥ ५४ ॥
दन्तानामधरमयावकं पदानि
प्रत्यग्रास्तनुमविलेपनां नखाङ्काः ।

गुणवदुपघ्नस्य काम्या आत्मन इच्छा गुणवदुपघ्नकाम्या तया गुणवदुपघ्नका-
म्यया आत्मनो गुणवदाश्रया काङ्क्षयेत्यर्थः । काम्यच्चेति काम्यच्प्रत्यया-
न्ताद्धातोरप्रत्ययादिति स्त्रियामप्रत्यये टाप् । समन्तादुपाश्रितौ संश्रिताविव
राजेते स्म । फणाश्च सप्तानामिति विकल्पादेकाराभ्यासलोपौ ।
गुणश्च शब्देन सूत्रशब्देन च सूत्रभेदे सूत्रान्तरमेवाश्रयत् इति प्रतीतेः
श्लेषानुप्राणितयातिशयोक्त्युपाश्रितेयमुत्प्रेक्षा ॥ ५३ ॥

आरूढ इति । स्वसम्भवोऽप्यात्मसम्भवोऽपि आरूढ उच्चस्थानगत-
उच्चस्थानात्पतितत्वात् पतिततया भ्रष्टत्वहेतोः आरूढपतितत्वादित्यर्थः ।
स्वच्छानां निर्मलानां परिहरणीयतां त्याज्यत्वमुपैति । प्रमदानामसितो-
त्पलोत्पलादानादाकारणाभिर्यतीति भावः । वीचीभिस्तटमनुतटं
प्रति निरासुर्निचिक्षिपुः । कुतः यस्मादापः वधूनां कर्णेभ्यश्च्युतमसितो-
त्पलं स्वस्थानपतितमिति भावः विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः
स्पर्शनवाच्यगततत्त्वसमूलातिशयोक्त्या सङ्कीर्णः ॥ ५४ ॥

दन्तानामिति । तोयैरपि धर्षितोऽयम् । विभक्त्यर्थेऽव्ययीभावः ।
अङ्गनानामधरमयावकं लाक्षारागं अधरदन्तानां पदानि दन्तक्षतानि
तथा अविलेपनां अङ्गरागरहितां तनुं शरीरं प्रत्यग्राः नवा नखाङ्काश्च-

आनिन्युः श्रियमधितोयमङ्गनानां
शोभायै विपदि सदाश्रिता भवन्ति ॥ ५५ ॥
कस्याश्चिन्मुखमनु धौतपत्त्रलेखं
व्यातेने सलिलभरावलम्बिनीभिः ।
किञ्जल्कव्यतिकरपिञ्जरान्तराभि-
श्चित्रश्रीरलमलकाग्रवल्लरीभिः ॥ ५६ ॥
वक्षोभ्यो घनमनुलेपनं यदूनां
मुक्तानामहरत वारि मूर्धजेभ्यः ।

आनिन्युः प्रापयामासुः । नीवह्योर्हरतेश्चेति वचनात् द्विकर्मकत्वम् । तथा हि सतः सज्जनात् सुन्दराश्चाश्रिताः सदैवाश्रिताः ये केचिदिति शेषः । विपदि विभवाभावकालेऽपि शोभायै भवाय भवन्ति । क्लृपेः सम्पद्यमाने चतुर्थी वक्तव्येति क्लृपेरर्थनिर्देशाच्चतुर्थी । अर्थान्तरन्यासः ॥ ५५ ॥

कस्याश्चिदिति । धौतपत्त्रलेखं क्षालितपत्त्ररचनाविशेषं कस्याश्चिन्मुखमनु मुखेन सम्बद्धं यथा तथा मुखे इति यावत् । तृतीयार्थे इत्यनोः कर्मप्रवचनीयत्वात् द्वितीया । सलिलभरेणावलम्बिनीभिः लम्बमानाभिः प्रालम्बमानाभिरित्यर्थः । किञ्जल्कव्यतिकरेण केसरमिश्रणेन पिञ्जराण्यन्तराणि मध्यभागा यासां ताभिः अलकाग्राणि वल्लर्यो मञ्जर्य इवेत्युपमितसमासः । वल्लरी मञ्जरी स्त्रियामित्यमरः । ताभिरलकाग्रवल्लरीभिः चित्रश्रीर्मकरिकापत्त्रशोभा अलं व्यातेने सम्पादिता । तनोतेः कर्मणि लिट् । अत्र चित्रस्य श्रीरिव श्रीरिति निदर्शनाभेदः ॥ ५६ ॥

अथ श्लोकद्वयेन पुंसामप्यवस्थाभेदं दर्शयति । वक्षोभ्य इत्यादि । वारिकर्तृ उदकं कर्तृ यदूनां यादवानां वक्षोभ्यो घनं सान्द्रमनुलेपनं अङ्गरागमहरत । स्वरितेत्त्वात्तङ् । अत्र यदूनामिति काकाक्षिवत् पाठः उभयो-

नेत्राणामदरुचिरत्नतैव तस्थौ
चक्षुष्यः खलु महतामपरैरलङ्घ्यः॥ ५७॥
योवाह्यः स खलु जलैर्निरासि रागो
यश्चित्ते स तु तदवस्थएव तेषाम्।
धीराणां व्रजति हि सर्वएव नान्तः
पातित्वादभिभवनीयताम्परस्य॥ ५८॥
फेनानामुरसिरुहेषु हारलीला
चेलश्रीर्जघनतलेषु शैवलानाम्।

जानुमेयस्य वचोमात्रनिर्देशादुत्तरश्लोके तेषामिति पुंलिङ्गपरामर्शाच्च न पाद्मः। मूर्द्धजेभ्यः शिरोरुहेभ्यः उत्तंसान् शेखरानहरत नेत्राणां मदरुचिर्मदरागोऽक्षतैव तथैव तस्थौ वारिविहारस्यापि रागजनकत्वा-दिति भावः। अतएव रागद्वयस्याप्यभेदाध्यवसायेन तदवस्थानिर्देशादति-शयोक्तिः। तथा हि महताञ्चक्षुषि भवश्चक्षुष्यः प्रियोऽविजय। प्रि-येऽविजे च चक्षुष्य इति विश्वः। शरीरावयवाच्चेति यत्। परैरलङ्घ्यो-दुर्द्धर्षः खलु। चक्षुष्य इति श्लेषमूलातिशयोक्तिः तया पूर्वोक्तया च सङ्कीर्णोऽयमर्थान्तरन्यासः॥ ५७॥

य इति। तेषां यदूनां वह्निर्भवोवाह्यः। वह्निर्यष्टिलोपोपयष्ट्-चेति वचनात् यञ् प्रत्ययः। यो रागोऽङ्गरागः स रागो जलैस्तोयै-र्जहैव निरासि निरस्तः खलु। अस्यतेः कर्मणि लुङ्। चित्ते यो रागः स तु सैवावस्था यस्य स तदवस्थ एव न निरस्त इत्यर्थः। अत्र रागयोरभेदाध्यवसायादतिशयोक्तिः। तथा हि सर्वोऽपि धीराणां महतामन्तःपातित्वादन्तर्गतत्वाद्देवेति यावत् परस्याभिभवनीयतां न व्रजति अन्यथा अन्तर्लय वेत्यर्थः, पूर्ववदलङ्कारः॥ ५८॥

फेनानामिति। बधूनां अलभूषणानामपीति भावः पयसि विभूषां

गण्डेषु स्फुटरचनाऽपत्रवल्लीः
पर्यास पयसि विभूषणं वधूनाम् ॥ ५९ ॥
भ्रश्यद्भिर्जलमभि भूषणैर्वधूना
मङ्गेभ्योगुरुभिरमज्जि लज्जयेव ।
निर्माल्यैरथ ननृतेऽवधीरिताना
मप्युच्चैर्भवति लघीयसां हि धार्ष्ट्यम् ॥६

नेत्राणाम्मदरुचिरक्तैव तस्थौ
चक्षुष्यः खलु महताम्परैरलङ्घ्यः ॥ ५७ ॥
योऽबाह्यः स खलु जलैर्निरासि रागो
यश्चित्ते स तु तदवस्थ एव तेषाम् ।
धीराणां व्रजति हि सर्व एव नान्तः
पातित्वादभिभवनीयताम्परस्य ॥ ५८ ॥
फेनानामुरसिरुहेषु हारलीला
चेलश्रीर्जघनतलेषु शैवलानाम् ।

आदृभेद्य इत्यर्मामिनिर्दिश्यादुत्तरश्लोके तेषामिति पुंलिङ्गपरामर्श इ-
त्याहुः । मूर्द्धजेभ्यः शिरोरुहेभ्यः उत्तंसान् शेखरानहरत नेत्राणा-
मदरुचिर्मदरागोऽरक्तैव तथैव तस्थौ वारिविहारस्यापि रागजनकत्वा-
दिति भावः । अतएव रागद्वयस्याप्यभेदाध्यवसायेन तदवस्थानिर्देशाद-
तिशयोक्तिः । तथा हि महतामपि महच्छब्दः प्रियोऽविरतश्च । प्रि-
येऽर्थेऽपि च चक्षुष्य इति शिवः । शरीरावयवाश्चेति यत् । परैरलङ्घ्योऽ-
दुर्द्धर्षः खलु । चक्षुष्य इति श्लेषमूलातिशयोक्तिः तथा पूर्वोक्त्या च
सङ्कीर्णोऽर्थान्तरन्यासः ॥ ५७ ॥

य इति । तेषां यदूनां बहिर्भवो बाह्यः । बहिर्यदिलोपोयञ्
चेति वक्तव्यात् यञ् प्रत्ययः । यो रागोऽङ्गरागः स रागो जलैस्तोयै-
र्जडैश्च निरासि निरस्तः खलु । अस्यतेः कर्मणि लुङ् । चित्ते यो
राग: स तु तेषामवस्था यस्य स तदवस्थ एव न निरस्त इत्यर्थः । अत्र
रागयोरभेदाध्यवसायादतिशयोक्तिः । तथा हि सर्वोऽपि धीराणां
महताम् ... नान्तः पातित्वात् परस्याभिभवनीयतां न व्रजति
... अर्थान्तरन्यासः ॥ ५८ ॥

फेनानामिति । ... इति भावः ...

गण्डेषु स्फुटरचनाः पत्रवल्ली
पर्यासं पर्यसि विभूषणं वधूनाम् ॥ ५९ ॥

अम्भस्यद्भिर्जलमपि भूषणैर्वधूना-
मङ्गेभ्यो गुरुभिरमज्जि लज्जयेव ।
निर्माल्यैरथ ननृतेऽवधीरितानां
मप्युच्चैर्भवति लघीयसां हि धार्ष्ट्यम् ॥ ६० ॥

पर्यासि समयमार्सीदित्यर्थः । कुत केनाना हिन्दोरादौ उदति रुच- नोत्पुरस्किरक्षा रुचा । क्षपीति योगविभागात्कप्रत्यय स्थलदन्तादित्य- लुक् । तेषु हारलीला मुक्तावलिश्री जातेति शेष । शैवलानां ज- घनतटेषु चेलश्रीर्वसनशोभा जाता । गण्डेषु कपोलेषु शैवलो इति वि- भक्तिविपरिणामादनुषङ्गः । स्फुटरचना व्यक्तविन्यासा पत्रवल्ली पत्त्र- लतता जातेति शेष । अत्र फेनानां हारलीलेव लीला शैवलानां चेल- श्रीरिव श्रीरिति निदर्शनाभ्यां शैवलाः पत्रवल्लीति रूपकेण च वाक्या- र्थैस्त्वथवाक्यार्थसमर्पणात्तेषामङ्गाङ्गिभावेन सङ्करः शाम्यार्थहेतुकञ्चास्थ्यिति क्रम ॥ ५९ ॥

अम्भस्यद्भिरिति । वधूनामङ्गेभ्योऽम्भस्यद्भिः पतद्भिर्गुरुभिः मौक्तिका- द्युक्तत्वयुक्तैर्भूषणैर्लज्जया भंगप्रयुक्तया ह्रियेवेत्युत्प्रेक्षा जलमपि अ- मज्जि जले मग्नम् । भावे लुङ् । क्षणानन्तरमेव न तु चिरेणेति भाव । निर्माल्यैर्भुक्तोज्झितमाल्यैर्ननृते जले क्षमर्हि अ शेऽपि निर्ल- ज्जैरित भाव । तथा हि अवधीरितानां तिरस्कृतानामपि लघीयसां- क्षुद्राणामुच्चैर्धार्ष्ट्यं निर्लज्जत्वमेवाधिकम्भवतीति अर्थान्तरन्यास । महान्तः परिभवे लज्जिताः कुत्रचिल्लीयन्ते तुच्छास्तु निर्लज्जा विजृम्भन्त इति भाव । अत्र तु गुरवोऽपि मज्जन्ति लघवोऽपि प्लवन्त इति परमार्थः ॥ ६० ॥

आमृष्टास्तिलकरुचः स्रजो निरस्ता
नीरक्तं वसनमपाकृतोऽङ्गरागः ।
कामः स्त्रीरनुशयवानिव स्वपक्ष
व्याघातादिति सुतरां चकार चारुः ॥ ६१॥
शीतार्तिं बलवदुपेयुषेव नीरै
रासेकाच्छिशिरसमीरकम्पितेन ।
रामाणामभिनवयौवनोष्मभाजो
राश्लेषि स्तनतटयोर्नवांशुकेन ॥ ६२ ॥
श्च्योतद्भिः समधिकमात्तमङ्गसङ्गा
ल्लावण्यन्तनमदिवाम्बुवा ससोऽन्तैः ।

आमृष्टा इति । तिलकरुचः पत्त्रशोभाः आमृष्टाः स्रजो माला निरस्ताः वसनं कौसुम्भं वासो नीरक्तमरक्तं निरस्तरागं वित्तवर्णं । इतमिति शेषः । अङ्गरागोऽपाकृतः मर्दितः जलैरित्यर्थः । इतीत्थं स्वपक्षव्याघातात् स्वपक्षस्यानुशयवाननुतापवानिवेत्युत्प्रेक्षा । कामः स्त्री. स्त्रियः । वाम्शसो रित्यौवडादेशविकल्पात्पक्षे पूर्वसवर्णदीर्घः । सुतरां चारुः पूर्वतोऽपि रमणीयाश्चकार स्त्रीणां काम एव भूषणमन्यद्भूषणमेवेति भावः ॥ ६१ ॥

शीतेति । नीरैस्तोयैरासेकादभिषेचनात् शीतार्तिं शीतव्यथां बलवत् भृशं उपेयुषेव प्राप्तवतेवेत्युत्प्रेक्षा । अतएव शिशिरसमीरकम्पितेन दन्तवातवेपितेन नवांशुकेन कर्त्रा अभिनवो यो यौवनोष्मा उष्णत्वं तद्भाजः रामाणां स्तनतटयोराश्लेषि आश्लिष्टं संसक्तम् । भावे लुङ् । पेतङ्गेदस्यांशुकस्यैषु शीतार्त्ति हेतुकस्तनश्लेषत इति गुणहेतूत्प्रेक्षा ॥ ६२ ॥

इत्थं ता जलक्रीडाजन्या लवाद्भुतत्वं वर्णयति । श्च्योतद्भिरिति ।

उत्तेरे तरलतरङ्गरङ्गलीला
निष्णातैरथ सरसः प्रियासमूहैः ॥ ६३ ॥
दिव्यानामपि कृतविस्मयां पुरस्ता
दम्भस्तः स्फुरदरविन्दचारुहस्ताम् ।
उद्वीक्ष्य श्रियमिव काञ्चिदुत्तरन्ती
मस्मार्षीज्जलनिधिमन्थनस्य शौरिः ॥६४॥
श्लक्ष्णं यत्परिहितमेनयोः किलान्त
र्ह्रीनार्थं तदुदकसेकसक्तमूर्वोः ।

अथ जलक्रीडानन्तरमङ्गनानां गात्रसम्पर्कात् आत्तमुपात्तं संक्रान्ति यावत् । समधिकमतिरिक्तमनुमत् मूर्तिमत् लावण्यमिव कान्तिसार- मिवेत्युत्प्रेक्षा भाव्युत्प्रेक्षालङ्कारः । भौमादिकत्वाद्बहुवचनम् । तरलाश्चञ्चलास्तरङ्गा एव रङ्गा नृत्यस्थानानि तेषु लीलानर्तितानि तासु निष्णातैः कुशलैः । निनदीष्ण्यां स्नातेः कौशल इति णत्वम् । प्रियाणां समूहैः स्त्रीसङ्घैः सरसो हृदादुत्तरे उत्तीर्णं निर्गतमित्यर्थः । तरतेर्भावे लिट् ॥ ६२ ॥

दिव्यानामिति । दिवि भवा दिव्यास्तेषामपि कृतविस्मयां सौन्दर्या- तिरेकेण जनिताश्चर्यां स्फुरदरविन्दाभ्यां चारू हस्तौ यस्यास्तां स्फु- रत्कमलामित्यर्थः पुरस्तादग्रतः अम्भसो जलात् । पञ्चम्यास्तसिल् । उत्तरन्तीं निष्क्रामन्तीं काञ्चित् स्त्रियं मथ्यमानात् समुद्रात् सद्यः प्रादुर्भ- वन्तीं श्रियमिव लक्ष्मीमिवोद्वीक्ष्य जलनिधिमन्थनस्य समुद्रमन्थनमित्यर्थः । अध्यक्षीगर्थदयेशां कर्मणि इत्यादिना कर्मणि षष्ठी । अ- स्मार्षीत् स्मृतवान् । अत्र समुद्रमन्थनस्य स्मृतिक्रियाविषयत्वेनोपमया साहाय्या- च्छ्रीः स्मृतेति स्मरणालङ्कारप्रतीतेरलङ्कारध्वनिः ॥ ६४ ॥

श्लक्ष्णमिति । एतयोर्ह्रीरन्तर्धानार्थं किल छादनार्थं श्लक्ष्णं सिग्धं -

नारीणां विमलतरौ समुल्लसन्त्या
भासान्तर्दधतुरूरू दुकूलमेव ॥ ६५ ॥
वासांसि न्यवसत यानि योषितस्ताः
शुभ्राभ्रद्युतिभिरहासि तैर्मुदेव ।
अत्याच्छ ; स्नपनगलज्जलानि यानि
स्थूलास्रस्रुतिभिररोदि तैः शुचेव ॥ ६६ ॥
आर्द्रत्वादतिशयिनीमुपेयिवद्भिः
संसक्तिं भृशमपि भूरिशोऽवधूतैः ।

यत् दुकूलं परिहितमाच्छादितमुदकसेकेन संसक्तं संसृष्टं तत् दुकूलं क
विमलतरौ नारीणामूरू पीवरौ जङ्घे एव कर्त्तारौ समुल्लसन्त्या स्फुरन्त्या
भासा निजकान्त्या अन्तर्दधतुः छादितवन्तौ तद्देतद्रूपमिति भावः ।
अत्र दुकूलस्योर्वाच्छादकत्वेऽपि तदभावोक्तेरसम्बन्धेऽपि सम्बन्धरूपातिश
योक्तिः । तद्रूपेणया चोर्वोर्दुकूलानां छादकयोराच्छादकत्वोक्तेरसम्ब
सम्बन्धरूपातिशयोक्त्यानुप्राणितेति सजातीयसङ्करः तदनुप्राणित
विषमालङ्कार इति विजातीयसंस्कारः तेन चोर्वोर्लोकोत्तरं लावण्य
व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः ॥ ६५ ॥

वासांसीति । ताः योषितो यानि वासांसि न्यवसत निवसितवत्यः
वस आच्छादन इति धातोः कर्त्तरि लुङ् । शुभ्राभ्राणां द्युतिरिव द्युति
र्येषां तैः वासोभिर्मुदा नारीनिवसनानन्देनाहासीव हसितमिव । भ
लुङ् । स्नपनेन गलज्जलानि स्रवत्तोयानि यानि वासांसि अत्याच्छ
त्यक्तवत्यः तैः शुचा स्थूला अस्रस्रुतिर्येषां तैः अरोदीव रोदनं कृतमिव
भावेलुङ् । अत्र धावल्यगुणजलगलन क्रियानिमित्तयोर्हासरोदनयो
र्योः सजातीययोरुत्प्रेक्षयोः सङ्करः ॥ ६६ ॥

आर्द्रत्वादिति । आर्द्रत्वाज्जलेन प्रेम्णा च सरसत्वादतिशयि

अङ्गेभ्यः कथमपि वामलोचनानां
विश्लेषो बत नवरक्तकैः प्रपेदे ॥ ६७॥
प्रत्यंसं विलुलितमूर्द्धजा चिराय
स्नानार्द्रं वपुरुदवापयत् किलैका ।

अतिशयवतीं सक्तिं संश्लेषं परिचयं चोपेयिवद्भिः प्राप्तवद्भिः अनल्प-
रूपं भूरिशो बहुशोऽवधूतैर्धुतैरपि अन्यत्र निक्षिप्तैरपि नवरक्त-
कैर्नवरक्तकैः नूतनरक्तवस्त्रैरनुरागिभिश्च वामलोचनानां सुदृशामङ्गे-
भ्यो विश्लेष बत खेदे कथमपि प्रपेदे प्राप्तः । एकत्रातिसक्तेरन्यत्रानुरक्ति-
परिचयाच्चेति भावः । अत्यासक्ताः कामिनोऽनपराधयुवतिभिः स्वैरवि-
धूताः कथञ्चिदुत्सृज्यन्तीत्यर्थान्तरप्रतीतिः इह विशेषणस्यापि श्लिष्टत्वा-
च्छब्दशक्तिमूलो ध्वनिरेव ॥ ६७ ॥

प्रत्यंसमिति । एका स्त्री प्रत्यंसमंसयोः । विभक्त्यर्थेऽव्ययीभावः ।
विलुलितमूर्द्धजा विकीर्णकेशा सती स्नानार्द्रं वपुः चिराय चिरमुदवापयत्
उदवापयत् अशोषयदिति यावत् वयतेर्ण्यन्ताल्लङ् । अर्त्तिह्रीत्यादिना
पुगागमः किल खलु पुनस्तत्र अभिमतप्रियमन्तिकेऽभिवीक्ष्य स्वेदाम्बु-
भिरार्द्रमार्द्रशब्दः शुक्लादिवत् गुणे पुंसि गुणिनि भेद्यलिङ्गः । आपो द्रवाः
आर्द्राणि द्रवाणि हृदयस्य मुखेन जुहोतीत्यादिप्रयोगात् । अथवा सरसार्द्रमित्येव-
मादिदर्शनः । तिष्ठतेति ततः क्रियेत्तिष्ठ्यादिना तिष्ठन्ताद्भावप्रत्ययः ।
क्रियार्थविभक्तिरव्ययत्वम् । नाजानात् वाक्यार्थः कर्म तद्वत्
तत्र नाज्ञासीदित्यर्थः अचिरतस्त्वार्द्रतामजानती स्नानार्द्रमेवेति मन्य-
माना पुनः पुनः वपुरुद्वापयन्त्येवास्तेति तात्पर्यार्थः । अत्र वपुः प्रत्य-
ङ्कस्य शोषणस्य वपुष्युपचारात् द्रवणक्रियायाः समानकर्तृकत्वात् वक्ता
तात्पर्यः एष च गर्वोत्सुक्यादिसञ्चारिसङ्कीर्णस्वेदरोमाञ्चादिसात्त्वि-
कप्रभा स्निग्धानुभावदर्शी चेत्यनुसन्धेयम् । अतोऽत्रापह्नवप्रकारत्वे-
ऽपि द्रवत्वमिश्रसङ्कराख्यामुत्पश्यत्वाद्भिन्न द्रवत्वप्रतिपादनरूपेणाभि-

नाजानादभिमतमन्तिकेऽभिवीक्ष्य
स्वेदाम्बुद्रवमभवत्तरां पुनस्तत् ॥ ६८ ॥
सीमन्तं निजमनुबध्नती कराभ्या
मालक्ष्यस्तनतटबाहुमूलभागा ।
भर्त्रान्या मुहुरभिलष्यता निदध्ये
नैवाहो विरमति कौतुकं प्रियेभ्यः ॥ ६९ ॥
स्वच्छाम्भः स्नपनविधौतमङ्गमोष्ठ

न द्वितीयोऽभिरलङ्कारः । तत्सामग्र्यामनुत्पत्तिर्विशेषोक्तिर्निगद्यत इति-
एकपात् ॥ ६८ ॥

सीमन्तमिति । निजमात्मीयं सीमन्तं मूर्द्धजमध्यपद्धतिम् । 'सी-
मन्तमस्त्रियां स्त्रीणां केशमध्ये तु पद्धतिः' इति वैजयन्ती । कराभ्याम-
नुबध्नती गृह्णती विरचयन्तीत्यर्थः । अतएव अत्र उन्नमनात् लक्ष्याविभा-
व्याः स्तनतटे बाहुमूले च तेषां भागाः प्रदेशा यस्याः सा अन्या स्त्री अभि-
लष्यता अभिलषता । 'वा भ्राशेत्यादिना वैकल्पिकः श्यन्प्रत्ययः । भर्त्रा
मुहुर्निदध्ये ध्याता तां निरीक्षितेत्यर्थः । 'निर्ध्यानं तु निध्यानं दर्शना-
लोकनेक्षणमित्यमरः । अहो आश्चर्यं कौतुकम् अभिलाषः प्रीयन्तीति
प्रियाः प्रियेभ्यः । इगुपधज्ञाप्रीकिरः क इति कः । तेभ्यो न विरमति
उपभोगेऽपि न निवर्त्तते इति आश्चर्यम् । न जातु कामः कामानामुप-
भोगेन शाम्यतीति भावः । जुगुप्साविराम प्रमादार्थानामुपसङ्ख्यानमिति
पञ्चमी व्याङ्परिभ्यो रम इति परस्मैपदम् । अर्थान्तरन्यासः ॥ ६९ ॥

स्वच्छेति । स्वच्छेनाम्भसा स्नपनेनाभिषेकेण विधौतं विमलितं अङ्गं
यदुक्तम् ताम्बूलरागेण विशदः उज्ज्वलः ओष्ठोऽधरः प्रतनु सूक्ष्मं
विविक्तं विमलं वासः अथवा विविक्तमेकान्तमस्त्वङ्गम् । 'विविक्तौ पूतविज-
नाविति अमरः । इत्थंभूत स्यानेतावानेव विलासिनीनामाकल्पो नेपथ्यमस्तु

स्नाम्बूलद्युतिविशदोविलासिनीनाम्।
वासश्च प्रतनु विविक्तमस्त्वितीया
नाकल्पो यदि कुसुमेषुणा न शून्य. ॥७०॥
इति धौतपुरन्ध्रिमत्सरान्सरसि मज्जनेन
श्रियमाप्तवतोऽतिशायिनीमपमलाङ्गभासः।
अवलोक्य तदैव यादवानपरवारिराशेः
शिशिरेतररोचिषाप्यपाम्पतिषु मङ्क्तुमीषे॥७१॥

विभूषणैरित्यर्थः। कुसुमेषुणा कामेन शून्यो यदि न स्यात्। अन्यथा अङ्गजितानामितर कनक भूषणमपि भारायत एवेति भावः। एतेन विच्छित्याख्य आलम्बन चेष्टारूप उद्दीपनविभाव उक्तः। स्तोकभूषणयोगेऽपि विच्छित्तिरिति गद्यतइति लक्षणात्। अत्र स्नानताम्बूलादिपदार्थान्वितविशेषणगत्या अङ्गरागादीनामाकल्पस्यप्रतिपादनार्थहेतुकहाव्यलिङ्गमलङ्कारः ॥७०॥

अथोत्तरसर्गं सूर्यास्तमयादिवर्णनं प्रस्तौति। इतीति। इतीत्थं सरसि मज्जनेन स्नानेन धौतपुरन्ध्रिमत्सरान् क्षालितमानिनीमात्सर्यान् अतिशेते अतिशायिनीम्। आभीक्ष्ण्ये णिनिः। श्रियमाप्तवतः अपमलाङ्गभासोऽविमलाङ्गकान्तीन् यादवानवलोक्य तदैव शिशिरेतररोचिषा उष्णांशुनाप्यपरवारिराशेः पश्चिमाब्धेः अपाम्पतिषु पूरेषु मङ्क्तुं प्रवेष्टुमीषे इष्टम्। भावे लिट्। परश्रेष्ठ्यासाक्षात्कारो विपर्यायिणां मात्सर्यविषयाभिलाषमनर्थकत्वमिति भावः। अत्र भानोः कालप्राप्तमज्जनस्य यादवमज्जनावलोकनहेतुकत्वमुत्प्रेक्ष्यते। अतिशायिनी इत्यत्र। सवज्ञाभङ्गतोऽतिशायिनी भवति गौ दिगन्तैरिति छन्दोलक्षणात्॥ ७१ ॥

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये
जलविहारवर्णनं नामाष्टमः सर्गः ॥ ८ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघ-
काव्यव्याख्याने सर्वङ्कषाख्येऽष्टमः सर्गः ॥ ८ ॥

नवमः सर्गः ।

अभितापसम्पदमथोष्णरुचि
निजतेजसामसहमान इव
पयसि प्रपित्सुरपराम्बुनिधे
रधिरोढुमस्तगिरिमभ्यपतत् ॥ १ ॥
गतया पुरः प्रतिगवाक्षमुखं

अथ सूर्यास्तमयं वर्णयति । अभितापेति । अथ निमज्जनानन्तर
मुष्णरुचिः सूर्यो निजतेजसामभितापसम्पदं सन्तापातिरेकमसहमान इव
पराम्बुनिधेः पश्चिमाब्धेः पयसि प्रपित्सुः पतितुमिच्छुः । पततेः
सन्यिडभावः सनि मीमेत्यादिना इसादेशः लोपोऽभ्यास इत्यभ्यासलोप
अस्तगिरिमस्ताद्रिम् । अस्तस्तु चरमक्ष्माभृदित्यमरः । अधिरोढुमभ्य
पतत् अभ्यधावत् । अत्र सहमान इवेति क्रियास्वरूपोत्प्रेक्षा पयसि प्रपातः
निजतेजोऽसहमानहेतुकत्वेनोत्प्रेक्ष्यते । अस्मिन् सर्गे प्रमिताक्षरा वृत्तम्
प्रमिताक्षरा सजससैरुदितेति लक्षणात् ॥ १ ॥

गतयेति । गतेन रवेर्दे । प्रतिलोमकाष्ठां हन्दीयाचेति स

दधती रतेन भृशमल्पकताम् ।
मुहुरन्तरालभुवमस्तगिरेः
सवितुश्च योषिदमिमीत दृशा ॥ २ ॥
विरलातपच्छविरनुष्णवपुः
परितो विपाण्डु दधदभ्रशिरः ।
अभवद्गतः परिणतिं शिथिलः
परिमन्दसूर्यनयनो दिवसः ॥ ३ ॥
अपराह्णशीतलतरेण शनैः
रनिलेन लोलितलताङ्गुलये ।

दधतीति । अवगमरूहवात्‌ कामाश्च रतव्याप्तीमन्तरवर्ती योषि‌ दोऽपि गता सुरवश्वादारभ्य गीतया अयमुक्तया दृशा अस्त-गिरेः सवितुश्चान्तरालभुवं मध्यावकाशं मुहुरमिमीत माति स्म । स्त्र- ... सन्दीपितम- ... । माङो मेह शब्दे इति धातोः ... । ... प्रेयोऽलङ्कारः ॥ २ ॥

विरलेति । परिणतिं परिवृत्तिं वार्धकं च गतः प्राप्तः अत एव विरला अल्पा आतपस्य छविर्यस्य सः अन्यत्र दीप्तिहीनः अनुष्णवपुः ... शीतोदयादौष्ण्यहानेः । ... परितो विपाण्डु ... शुभ्राभ्रपटलच्छन्नत्वादन्यत्र पलितैश्च पाण्डु ... शिरो दधत्‌ परिमन्दं ... सूर्य एव नयनं यस्य स दिवसः शिथिलः ... अभवत्‌ । ... ॥ ३ ॥

निलयाय शाखिन इवाह्वयते
ददुराकुलाः खगकुलानि गिरः ॥ ४ ॥
उपसन्ध्यमास्त तनु सानुमतः
शिखरेषु तत्क्षणमशीतरुचः ।
करजालमस्तसमयेऽपि सता
मुचितं खलूच्चतरमेव पदम् ॥ ५ ॥
प्रतिकूलतामुपगते हि विधौ
विफलत्वमेति बहुसाधनता ।

अपराह्णेति । अपरोऽपरभागोऽह्नोऽपराह्णो दिनान्तः । पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे इत्येकदेशिसमासः राजाहःसखिभ्यष्टच् अह्नोऽह्न एतेभ्य इत्यह्नादेशः अह्नोऽदन्तादिति णत्वम् । तस्मिन्नपराह्णशीतलतरेणानिलेन घनैर्धालिता चालिता लता एवाङ्गुलयो यस्य तस्मै एव निलयाय निवासायाह्वयते अङ्गुलिसञ्ज्ञया आह्वानं कुर्वाणाय स्थितायेवेत्युत्प्रेक्षा । शाखिने वृक्षाय खगकुलानि पक्षिवृन्दानि आकुलाः क्षुब्धाः गिरः इतः समागच्छत इति प्रत्युत्तराणि ददुरित्यनुषङ्गादुत्प्रेक्षा ॥

उपसन्ध्यमिति । उपसन्ध्यं सन्ध्यायाः समीपे । समीपार्थेऽव्ययीभावे नपुंसकत्वाद्ध्रस्वत्वम् । अशीतरुच उष्णांशोः तनु करजालं तत्क्षणं तस्मिन् क्षणे तत्कालेऽपीत्यर्थः अत्यन्तसंयोगे द्वितीया । सानुमतोऽद्रेः शिखरेष्वास्तातिष्ठत् । आसेः कर्तरि लङ् । सतामस्तसमये नाशसमयेऽप्युच्चतरमेव पदमुन्नतस्थानमेवोचितं खलु । अर्थान्तरन्यासः ॥

प्रतिकूलतामिति । विधौ दैवे प्रतिकूलतामुपगते सति बहुसाधनता अनेकसाधनवत्ता विफलत्वमेति महत्यपि साधनसम्पत्तिर्निष्फलैवेत्यर्थः । तथा हि पतिष्यत आसन्नपातस्य दिनभर्तुः करा अंशवो हस्ताश्च । ब हस्तांशवः कराः इत्यमरः । तेषां सहस्रमपि अवलम्बनायाल

दधती रतेन भृशमुत्सुकताम् ।
मुहुरन्तरालभुवमस्तगिरेः
सवितुश्च योषिदमिमीत दृशा ॥ २ ॥
विरलातपच्छविरनुष्णवपुः
परितो विपाण्डु दधदभ्रशिरः ।
अभवद्गतः परिणतिं शिथिलः
परिमन्दसूर्यनयनो दिवसः ॥ ३ ॥
अपराह्णशीतलतरेण शनैः
रनिलेन लोलितलताङ्गुलये ।

दधतीति । अगमस्तृङ्गाः आलाप स्वलत्तमवीतत्काम्दधती योषि दोऽपि गता वस्तुचन्द्रमालङ्कारमति गैतया अपसृतया दृशा अस्त- ई सवितुश्चान्तरालभुवं मध्यासारादेशं मुहुरमिमीत मातिस्म । उ- ।अमापितमरविपालमवविहमिव निमाकरमेन समयं प्रतीक्षि तत्- यर्थः । माङोलुङि मामिति हिर्भाव' भ्रमासिदित्याभ्यासस्येत्वम् । वालमयप्रतीक्षणमादोत्सुक्यानुभवान्तरोमवत्तयं अलौत्सुक्यभाव- गात् प्रेयोऽलङ्कारः ॥ २ ॥

विरलेति । परिणतिं परिवृत्तिं अन्यत्र जरावस्थाञ्च गत आग विरला अल्पा आतपस्य छविर्यस्य स. अन्यत्र चीणप्रभः अनुष्णवपु' न से शोद्दयादीमदुष्णदेहः । अन्यत्र यशमूरिति यतु अल्मार्थे नञ् न. । परितो विपाण्डु एकत्र शुभ्राभ्रपटलच्छन्नत्वादपरत्र पलितैश्च इ रवभ्रमाकाशमेव शिरोऽभ्रदुद्दहत् परिमन्दं प्रयान्तं अर्द्धदृष्टा- द्व सूर्य एव नयनं यस्य स दिवसः शिथिलः शिथिलाङ्गः शिथि- यानवत् । अत्राभ्रशिर इत्याद्यनयपरूपणाद्दिवसे पर स्थविर दत्व- प्रतिष्कृतिश्च समदपाद्दैवदिवतत्वदयक रूपानुप्रासितम् । ३ ॥

निलयाय शाखिन इवाह्वयते
ददुराकुलाः खगकुलानि गिरः ॥ ४ ॥
उपसन्ध्यमास्त तनु सानुमतः
शिखरेषु तत्क्षणमशीतरुचः ।
करजालमस्तसमयेऽपि सता-
मुचितं खलूच्चतरमेव पदम् ॥ ५ ॥
प्रतिकूलतामुपगते हि विधौ
विफलत्वमेति बहुसाधनता ।

अपराह्णेति । अपरोऽपरभागोऽह्नोऽपराह्णोऽहिनान्तः । पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे इत्येकदेशिसमासः राजाहःसखिभ्यः अह्नोऽह्न एतेभ्य इत्यह्नादेशः अह्नोऽदन्तादिति णत्वम् । तस्मिन्नपराह्णे शीतलतरेणानिलेन शनैर्लोलिता चालिता लता एवाङ्गुलयो यस्य तस्मै । एव निलयाय निवासायाह्वयते अङ्गुलिसंज्ञया आह्वानं कुर्वाणाय स्थितायेवोत्प्रेक्षा । शाखिने वृक्षाय खगकुलानि पक्षिवृन्दानि आकुला युक्ताः गिर इदमागम्यत इति प्रत्युत्तराणि ददुरित्यनुषङ्गादुत्प्रेक्षा ॥

उपसन्ध्यमिति । उपसन्ध्यं सन्ध्यायाः समीपे । समीपार्थेऽव्ययीभावे नपुंसकत्वाद्ध्रस्वत्वम् । अशीतरुच उष्णांशोः तनु करजालं तत्क्षणं तस्मिन् क्षणे तत्कालेऽपीत्यर्थः अत्यन्तसंयोगे द्वितीया । सानुमतोऽद्रेः शिखरेष्वास्तातिष्ठत् । आसेः कर्तरि लङ् । सतामस्तसमये नाशसमयेऽप्युच्चतरमेव पदमुन्नतस्थानमेवोचितं खलु । अर्थान्तरन्यासः ॥

प्रतिकूलतामिति । विधौ दैवे प्रतिकूलतामुपगते सति बहुसाधनता अनेकसाधनत्वं विफलत्वमेति महत्यपि साधनसम्पत्तिर्निष्फलैवेत्यर्थः । तथा हि पतिष्यतः भानुमतः पातस्य दिनभर्तुः करा अंशवो हस्ताश्च । बलिहस्तांशवः करा इत्यमरः । तेषां सहस्रमपि अवलम्बनायाऽलम्

अवलम्बनाय दिनभर्तुरभू-
न्न पतिष्यतः करसहस्रमपि ॥ ६ ॥
नवकुङ्कुमारुणपयोधरया
स्वकरावसक्तरुचिराम्बरया ।
अतिसक्तिमेत्य वरुणस्य दिशा
भृशमन्वरज्यदतुषारकरः ॥ ७ ॥
गतवत्यराजत जपाकुसुम-
स्तवकद्युतौ दिनकरेऽवनतिम् ।

ष्ठु यद्दैवमेव प्रबलमिति भावः । विशेषेण सामान्यसमर्थन-
रूपोऽर्थान्तरन्यासः ॥ ६ ॥

नवेति । अतुषारकर उष्णांशुः नवकुङ्कुमवदरुणपयोधरया नवकु-
ङ्कुमारुणमेघया अन्यत्र नवकुङ्कुमारुणकुचया स्वकरावसक्त रुचिराम्बरया
स्वकिरणाक्रान्तरुचिराकाशया अन्यत्र स्वहस्तावलम्बचारुवस्त्रया वरुणस्य
दिशा पश्चिमदिशा सहेत्यर्थः । वरुणसम्बन्धात्पराङ्गनात्वं च गम्यते ।
वृद्धो यूनेति सूत्रादौ सहार्थप्रयोगात्सहादीनामप्रयोगेऽपि सहयुक्तेऽ-
प्रधाने इति सहार्थे तृतीया । अतिसक्तिमति सन्निकर्षमत्यासक्तिञ्च
एत्य प्राप्य भृशमन्वरज्यत् लोहितरक्तश्चाभवत् । रञ्जेर्दैवादिकात्क-
र्त्तरि लङ् । कुषिरञ्जोः प्राचां श्यन् परस्मैपदञ्चेति कर्मकर्त्तरि
। अत्र वारुणीदिनकरयोर्विशेषणमहिम्ना तयोर्जारभावप्रतीतेः स-
मासोक्तिरलङ्कारः ॥ ७ ॥

गतवतीति । जपाकुसुमस्तवकद्युतौ लोहितवर्णे दिनकरेऽवनति-
मस्ताङ्गतिं गते सति लम्बमाने सतीत्यर्थः । दिग्वलयं दिङ्मण्डलं क-
[illegible] । मञ्जिष्ठारागैः सान्द्ररागैः कुरुविन्ददलैः पद्मरागखण्डै-
र्निबद्धं प्रत्युप्तमिवाराजत इत्युत्प्रेक्षा । कुरुविन्दस्तु

बहलानुरागकुरुविन्ददल
प्रतिबद्धमध्यमिव दिग्वलयम् ॥ ८ ॥
द्रुतशातकुम्भनिभमंशुमतो
वपुरर्द्धमग्नवपुषः पयसि।
रुरुचे विरिञ्चिनखभिन्नबृह
ज्जगदण्डकैकतरखण्डमिव ॥ ९ ॥
अनुरागवन्तमपि लोचनयो
र्दधतं वपुः सुखमतापकरम्।

मुस्तायां कुल्माषव्रीहिभेदयोः हिङ्गुले पद्मरागे च मुकुरेऽपि समीरित
इति विश्वः ॥ ८ ॥

द्रुतेति। द्रुतं द्रवं यत् शातकुम्भं तपनीयम्। तपनीयं शातकुम्भ-
मिति सुवर्णपर्यायेष्वमरः। तेन सदृशन्तन्निभमिति नित्यसमासः। पयसि
समुद्रोदके अर्द्धं यथा तथा मग्नं वपुर्यस्य तस्यांशुमतोऽर्कस्य मण्डलं
विरिञ्चेर्ब्रह्मणो नखेन भिन्नस्य द्वेधा विदारितस्य बृहतो महतो जगद-
ण्डस्य जगदाश्रयकोशस्य ब्रह्माण्डकस्यैकतरखण्डमन्यतरदलमिव रुरुचे
रराज। अत्रोपमानस्य पुराणप्रसिद्धत्वादुपमालङ्कारः ॥ ९ ॥

अनुरागवन्तमिति। अपरदिक् पश्चिमा सैव गणिका वेश्या अनु-
रागो लौहित्यमभिलाषश्च तद्वन्तमपि लोचनयोः सुखयतीति सुखं सुखकरं
शान्तत्वादाभिरूप्याच्च दर्शनीयं वपुर्दधतमपीति अतापकरमनौष्ण्यादस-
न्तापाच्चातापकारिणं सुखस्पर्शं वा तथाप्येतल्लक्ष्मीरहितं निर्धनञ्च।
देवभेदे नले रश्मौ वसुरत्ने धने यस्मिन्नमरः। रविः सूर्योऽस्तमिव गच्छति तं
निपराङ्मुखमेवाश्रयो ब्रह्मकल्पमाविरकामयत निष्कामितवती। धनपरा हि
वेश्या निर्गुणमपि धनिकमाढ्यं स्वहरणादनुरक्तवदनुवर्त्तते। गुणवन्तमपि
दुर्गतं निरस्यन्ति सदा एवेति भावः। अस्तङ्गतोऽर्क इति श्लोकार्थः।

निरकाशयद्रविमपेतवसुं
वियदालयादपरदिग्गणिका ॥ १० ॥
अभितिग्मरश्मि चिरमाविरमा
दवधानखिन्नमनिमेषतया ।
विगलन्मधुव्रतकुलाश्रुजलं
न्यमिमीलदब्जनयनं नलिनी ॥ ११ ॥
अविभाव्यतारकमदृष्टहिम
द्युतिबिम्बमस्तमितभानु नभः ।

अत्र, वियदालयादपरदिग्गणिकेत्येकदेशरूपणादेकदेशविवर्त्तिरूपणाद्गमादे-
कदेशवर्त्ति रूपकं स्त्रीयोऽपि तद्वद्यापितत्वादनुराग एवान्तरागोऽथवएवं च
वसुनोति रूपकपर्यवसित एवेत्याहुः ॥ १० ॥

अभीति । नलिनी अभितिग्मरश्मि सूर्याभिमुखञ्चिरमाविरमाद-
समयादनिमेषतया अपक्ष्मपाततया दल इव एव निमेषः । अवधा-
नेनाभिमुखावस्थाननिर्बन्धेन खिन्नमनः अतएव विगलन्ति मरन्धु
व्रतकुलमेवाश्रुजलं यस्य तदब्जमेव नयनं न्यमिमीलत् । मीलयति स्म ।
भ्राजभासेत्यादिना चङ्कुपधाह्रस्वः अतएव नाभ्यासे दीर्घः । अनु
रक्ता हि कान्ता कान्तमनिमेषं पश्यन्ती तदपाये सति निमीलिताक्षी
स्यादिति भावः । अत्राब्जनयनमित्यादावसमस्तरूपणादव्ययदिनो नलिनीति
समस्ताभ्रोर्नायिकानायकत्वरूपकमित्येकदेशविवर्त्ति रूपकम् ॥ ११ ॥

अविभाव्येति । अविभाव्यतारकमनुन्नतं अदृष्टं हिमद्युते-
रिन्दोर्बिम्बं यस्मिन् तत् अद्याप्यनुदितचन्द्रतारकमित्यर्थः । अस्तमितद-
र्शनेऽस्तमयम् । अस्तमितोऽस्तङ्गतो भानुर्यस्मिन् तत् यतोऽस्ता निर्गुणत्वम् ।
अथ निर्दिष्टमाह । अयच्छन्नाय अक्लिष्टमयाऽसधान्तधनाय अति-
तदितान्धकारं नभोऽन्तरीचमभात् भाति स्म । भातेर्लङ् । स

अवसन्नतापमतमिस्रमभा
दपदोषतैव विगुणस्य गुणः ॥ १२ ॥
रुचिधाम्नि भर्त्तरि भृशं विमलाः
परलोकमभ्युपगते विविशुः ।
ज्वलनं त्विषः कथमिवेतरथा
सुलभोऽन्यजन्म न स एव पतिः ॥ १३ ॥
विहिताञ्जलिर्जनतया दधती
विकसत्कुसुमकुसुमारुणताम् ।

निर्गुणस्य का शोभेति न वाच्यं निर्दोषताया अपि गुणत्वादित्यर्थान्तर-
न्यासेनाह । विगुणस्य गुणहीनस्यापदोषता निर्दोषत्वमेव गुणः अतो-
गुणवत्त्वाच्छोभा युक्तेति कारणेन कार्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ १२ ॥

रुचीति । रुचिधाम्नि तेजोनिधौ सूर्ये भर्त्तरि पत्यौ परलोकं
देशान्तरमभ्युपगते मृते च सति विमलाः शुद्धास्त्विषोज्वलनं विविशुः ।
अग्निं वावादित्यः सायम्प्रविशतीति श्रुतेरिति भावः । अन्यत्र मृते या
म्रियते पत्यौ सा स्त्री ज्ञेया पतिव्रतेति स्मरणादिति भावः । अग्निप्र-
वेशफलमाह । इतरथा ज्वलनाप्रवेशे अन्यजन्मनि जन्मान्तरे स एव
स सूर्य एव पतिः अन्यत्र तु योऽस्मिन् जन्मनि पतिः स एव कथं सुलभोन
कथञ्चिदित्यर्थः । उद्यन्तं वावादित्यमग्निरनुसमारोहतीति श्रुतेः ।
तेनैव सह मोदत इति स्मरणाद्देति भावः । अतोऽग्निप्रवेशो युक्त इति
समर्थनाद्वाक्यार्थहेतुकाव्यलिङ्गमलङ्कारः ॥ १३ ॥

अथ सन्ध्याप्रादुर्भावमाह । विहितेति । जनतया जनसमूहेन ।
पाशजनेत्यादिना समूहार्थे तल्प्रत्ययः । विहिताञ्जलिः कृतप्रणामे-
त्यर्थः विकसत्कुसुमकुसुमवदरुणतान्दधती रागवत्त्वादिति भावः । तदुक्तं
कर्पूरद रक्तं रजोपद हितमिति । प्रसूत इति पञ्चमीतान्तः । सर्वधर्मो–

प्रतिबिम्बरोपित इवाम्बुनिधौ।
अथनागयूथमलिनानि जग
त्परितस्तमांसि परितस्तरिरे ॥ १८ ॥
व्यसरन्नु भूधरगुहान्तरतः
पटलं बहिर्वहलपङ्करुचि।

अतएव उत्प्रेक्षा । सन्ध्यापि यदि व्यगमत् व्यगात् अगमदित्यर्थः । गमेः सार्वधातुकाङ्गावे लुङ् लिङ्गादेशः । अपगमनाद्यपशब्दैर्ना सङ्गे-प्रमिश्रमि । तस्मात् सार्धे पिशुमाद्यो निर्तो न्नमो यतोभवेत् । निगद-द्वाराक्तरोतीति केचित्तु इति केचित् ॥ १७ ॥

अथान्धकारं वर्णयति । अथेति । अथ सन्ध्यानन्तरं एव सागरादुं-संह इति रूपकसमासः । तत्सिसिजेन प्रतिबिम्बेन रोपिते कोपित-मेव्युत्प्रेक्षा । स्वप्रतिबिम्बे प्रतिबिम्बभ्रमादिति भावः । अतएवाम्बु-धौ पतिते इति तच्छिखायाः भावः । भावलक्षणसप्तमी । अथाम्बु-मानन्तरं नागयूथानि करिकुलानीव मलिनानि श्यामानि । उपमा-नानि सामान्यवचनैरिति समासः । तमांसि जगल्लोकस्य परितः परितस्त-रे व्याप्ताबभूवुः । स्तृणाते कर्तरि लिट् । अतश्च संयोगादेर्गुणः । यद्यपि नागयूथमलिनानीत्युक्तानुपमानपिङ्कोपमाहारीत्वात् पतङ्ग-रावलीत्वात्पमिव समासाश्रयवैलोपमैसोचिता तथापि तद्धर्मे-याः दलद्विरहात् स्पष्टे समासाश्च रूपकमेव दुष्टम् । तथा च तानुप्रासितो उपसर्गेति च सङ्करः । तत्रोपमा भवत्यादु-या रूपकस्य अङ्गत्व रूपकद्वारैवाङ्गाङ्गिभावनिर्माति सङ्कुचेत ॥ १८ ॥

व्यसरदिति । बहुलपङ्करुचि सान्द्रकर्दमवर्णं दिवसावसाने दि-ते पटलं समूहः तमसः पटलस्य भूधरगुहान्तरतोऽन्तरादेशा-र्ध्वं वहिर्दाघप्रदेशे व्यसरत् निष्कृतं वा वहिर्दीर्घादेशादेव गुहा अ-न्तर्गमनागमनाशङ्कते न किञ्चित् वेत्यर्थः । तमस्तेभ्यो तद्

दिवतावसानपटुनस्तमसो
बहिरेत्य चाधिकमभक्त गुहाः ॥ १९ ॥

किमलम्बताम्बरविलग्नमधः
किमवर्धतोर्ध्वमवनीतलतः ।
विससार तिर्यगथ दिग्भ्य इति
प्रचुरीभवन्न निरधारि तमः ॥ २० ॥

युग्मम् ।

स्थगिताम्बरक्षितितले परित-
स्तिमिरे जनस्य दृशमन्धयति ।
दधिरे रसाञ्जनमपूर्वमतः
प्रियवेश्मवर्त्म सुदृशो ददृशुः ॥ २१ ॥

भटीकरोति भजन्तोम । अत्र व्यापकत्वसाहश्यात्तमसोऽन्तर्बहिरभा-
दानेकत्वे सन्देहालङ्कारः ॥ १९ ॥

किमिति । प्रचुरीभवद्बहुलीभवत्तमः कर्तृ किमम्बरविलग्नमाका-
शस्थं सत् अधोभागतः अलम्बत अम्बरं सत् किमिव अवनीतलतो भूतलादू-
र्ध्वमुपरिप्रदेशेऽवर्धत किं त्वथ दिग्भ्यस्तिर्यग्विससार विसृतमिति न निर-
धारि अधोऽवलम्बनादीनामन्यतमत्वेनावधारितमित्यर्थः । धारयतेः कर्मणि
लुङ् । अत्रापि पूर्ववत्सन्देहालङ्कारः ॥ २० ॥

अ. स्थगितेति । स्थगिते तिरोहिते अम्बरक्षितितले येन तस्मिन् ति-
मिरे परितो जनस्य दृशमन्धयति अन्धां कुर्वति सति सुदृशः स्त्रियोऽपूर्व-
मतनं रसाञ्जनं रसं रागमेवाञ्जनं सिद्धाञ्जनं च दधिरे दधुः अतो-
ऽस्मात्तोः प्रियवेश्मवर्त्म ददृशुः । अत्र रसाञ्जनशब्दार्थेन प्रियवेश्मदर्श-
नसमर्थनात्काव्यलिङ्गमलङ्कारः । तेन रसः सिद्धाञ्जनमिवेत्यु-
पमाख्यनादलङ्कारेणालङ्कारध्वनिः ॥ २१ ॥

दुपनिद्रपाण्डुरसरोजरुचा ।
प्रथमप्रबुद्धनदराजसुता
वदनेन्दुनेव तुहिनद्युतिना ॥ ३० ॥
अथ लक्ष्मणाऽनुगतकान्तवपु
र्जलधिं विलङ्घ्य शशिदाशरथिः
परिवारितः परित ऋक्षगणै-
स्तिमिरौघराक्षसकुलं बिभिदे ॥ ३१ ॥
उपजीवति स्म सततं दधतः
परिमुग्धतां वणिगिवोडुपतेः ।

सुधां न दृश्यते इति भावः नदराजसुतायाः सिन्धुकन्यायाः श्रियो वदनेन्दु
रेवमुखं वा । कैटभजितो हरे शयनात्समुद्रादित्यर्थः । उत्प्रेक्षेयं
सम्भावनार्थमिव निर्देश । उदमज्जि उन्मग्नं उदितमित्यर्थः ॥ ३० ॥

अथेति । अथोदयानन्तरं लक्ष्मणा लाञ्छनेन लक्ष्मणेन सौमित्रिणा
चानुगतमनुसृतं कान्तं वपुर्यस्य स लक्ष्मणानुगतकान्तवपुरिति
शब्दश्लेष वस्तुतः शब्दभेदेनार्थद्वयाभावेऽपि लक्ष्मणपदैकशब्दप्रतीते ।
परितः समन्तात् ऋक्षगणैः नक्षत्रगणैः जाम्बवदादिभल्लूकसमूहैश्च इत्य-
र्थः एकनालायतवृन्तफलद्वयवदेकशब्दात् अर्थद्वयप्रतीतिः । नक्षत्र
ऋक्ष भल्लूकयोरिति । ऋक्षाच्छभल्लभल्लूका इति चामरः । परिवारितः
शशी एव दाशरथिः दाशरथिरामः । उपमा । जलधिं विलङ्घ्य ति-
मिरौघरूपं राक्षसकुलं बिभिदे बिभेदेत्यर्थः । भिदेः कर्मणि लिट् ।
अत्र शब्दश्लेषमूलः शशिदाशरथ्योरभेदरूपकालङ्कारः ॥ ३१ ॥

उपजीवतीति । उदधिनिधिः समुद्रः वणिगिव सततं परिमुग्धतां
सौन्दर्यं अन्यत्र मौग्ध्यं व्यवहारानभिज्ञतामिति यावत् । मुग्धः सुन्दरमू-
ढयोरिति विश्वः । दधतोऽधारयतः उडुपतेः चन्द्रस्य

वणिजीवीथिविथिमवतीर्णवतो
निधिरभ्यसामुपचयाय कलाः ॥ ३२ ॥
रजनीमवाप्य रुचमाप शशी
सपदि व्यभूषयदसावपि ताम् ।
अविलम्बितक्रममहो महता
मितरेतरोपकृतिमच्चरितम् ॥ ३३ ॥
दिवसं भृशोष्णरुचिपादहतां
रुदतीमिवानवरतालिरुतैः ।

वीथिः पण्यवीथिरिवेषु प्रमितधनासु ताः अवतीर्णवता प्रविशता उडुप-तेर्निचलनमात्रस्य कस्यचिद्वणिकश्चाणिजश्च कलाः षोडशांशान् मूलधनवृ-द्धीश्च कला स्यात्कुवरेद्धौ शिल्पादावंशमात्रके । षोडशांशेऽपि चन्द्रस्येति विश्वः । उपचयाय स्वाभ्युदयाय सम्बृद्धये चोपजीवति स्म सेवते स्म लब्ध्वा लभते स्मेत्यर्थः । यथा क्रियादिकुशलो द्रव्यवान्मनुष्याल्लाभमाप्नोति तद्वदिति भावः । श्लेषसङ्कीर्णेयमुपमा उपमासङ्कीर्णः श्लेष इत्यन्ये ॥२२॥

रजनीमिति । शशी रजनीमवाप्य रुचिं शोभामाप असौ शशाङ्कोऽपि तां रजनीं सपदि व्यभूषयत् महतां सतां चरितमविलम्बितक्रमं यथा तथा इतरेतरोपकृतिमत् अन्योन्योपकारवत् अहो इत्यविलम्बादाश्चर्यम् । अत्र रजनीशशिनोर्मिथः शोभाकरत्वादन्योन्यालङ्कारः । तदन्योन्यं मिथोऽवयोत्पाद्योत्पादकता भवेदिति लक्षणात् । तत्समर्थकतयार्थान्तरन्यासस्तस्याङ्गाङ्गिभावेन सङ्करः ॥ २२ ॥

दिवसमिति । सूर्यश्चन्द्रोदिवसचन्द्रिकयोरत्यये । कालाध्वनो-रत्यन्तसंयोगे द्वितीया । कथं उष्णरुचेः उष्णांशोः पादेन करेणाङ्घ्रिणा च । पादा रश्म्यङ्घ्रितुर्यांशा इत्यमरः । हतामाहतां अत एवानवरतैरविच्छिन्नैरलिरुतैः रुदतीं क्रन्दन्तीमिव स्थितां कुमुदिन्येव वनिता ताम् ।

मुहुरामृशन् मृगधरोऽग्रकरै-
रुदशिश्वसत् कुमुदिनीवनिताम् ॥ ३४ ॥
प्रतिकामिनीति ददृशुश्चकिताः
स्मरजन्मधर्मपयसोपचिताम् ।
सुदृशोऽभिभर्तृ शशिरश्मिगल-
ज्जलबिन्दुमिन्दुमणिदारुवधूम् ॥ ३५ ॥
अमृतद्रवैर्विदधदब्जदृशा

अग्राणि च ते कराश्च इत्यभेदेन समासः इति वामनः । तैरग्रकरै-
र्प्रांशुभिरग्रहस्तैर्मुहुरामृशन् स्पृशन् उदशिश्वसत् उच्छ्वासयति स्म ।
परामृष्टांशा पतिभिराश्वासनीयत्वादिति भावः । श्वसधातोर्णौ
चङ्युपधाया ह्रस्वः । अत्र यादवप्र यादस्तेन हृतासिनि हननगाधितसि
इत्युपकोत्याधिनेयमेकहस्तैरिति अधिकरणपरिणाम गर्भो रोदनोत्प्रेक्षेत्य
विजातीयसङ्करः । तथाकरैरेव करैः कुमुदिनीवनितेति श्लिष्टाश्लिष्ट
पद्यान्मृगधरे वल्लभत्वप्रतीतेरेकदेशवर्त्ति रूपकं तस्य पूर्वैर्यच्छदशिश्वसदिति
गम्योत्प्रेक्षेत्यपरोऽपि विजातीय सङ्करः । रोदनोत्प्रेक्षाया आश्वासोत्प्रेक्षो-
त्थेति सजातीयसङ्करोऽपि ॥ ३४ ॥

प्रतीति । सुदृशोऽङ्गनाः अभिभर्तृ भर्त्तारमभि । स येन आभि-
मुख्यो व्याभिमुख्ये इत्यव्ययीभावः । शशिरश्मिभिर्गलन्तः स्रवन्तो जल-
बिन्दवो यस्यास्तामिन्दुमणिचन्द्रकान्तशिला सैव दारुवधूः काष्ठयोषित्
स्त्रीप्रतिमा तां स्मराज्जन्म यस्य तेन स्मरजन्मना घर्मपयसा स्वेदाम्बुना
उपचितां व्याप्तां विप्रगामामित्यर्थः प्रति प्रतिकूला कामिनी सपत्नीति
भ्रान्त्येति शेषः चकिता भीता ददृशुः । अत्र चन्द्रशिलापुत्रिकाया सात्त्विक-
स्वेदसाम्यतया प्रतिकामिनीभ्रान्त्या भ्रान्तिमदलङ्कारः ॥ ३५ ॥

अमृतेति । योऽमृतद्रवैश्चन्द्रदशीयैर्धवलितैरंशुभिः विदधत

मपमार्गमोषधिपतिः स करैः ।
परितोविसर्पि परितापि भृशं
वपुषोऽवतारयति मानविषम् ॥ ३६ ॥
अमलात्मसु प्रतिफलन्नभित
स्तरुणीकपोलफलकेषु मुहुः ।
विससार सान्द्रतरमिन्दुरुचा
मधिकावभासितदिशां निकरः ॥ ३७ ॥
उपगूढवेलमलघूर्मिभुजैः
सरितामचुक्षुभदधीशमपि ।

ऋक्षतमिस्राक्षतमौषधिनिचयः । तैः दूरैरार्द्रैः करैः किरणैरेव करैः ह-स्तैः रक्तःशाखमपमार्गं मद्यपरिमार्जनं विदधत् कुर्वन् परितो विसर्पि सर्व-व्यापि भृशं परितापि सन्तापकारि मानः कोप एव विषन्तत् वपुषः श-रीरादवतारयति स्म अपारोपितवान् अत्र मानस्य रूपकेणौषधिपतिमा-न्त्रिकत्वकल्पनाद्विषमिव निशाकरकरस्पर्शादङ्गनानां वपुषि रोषो न स्थितवान् यथा व्यज्यते ॥ २६ ॥

अमलेति । अधिकमत्यन्तमवभासिता प्रकाशिता दिशो याभिस्तासा मिन्दु-रुचामिन्दुकरोऽमलात्मसु निर्मलमूर्तिषु तरुणीनां ये कपोलाः फलकानीव तेष्वभितो मुहुः प्रतिफलन् सङ्क्रामन् सान्द्रं तरं प्रचुरतरं विससार दर्पण-सङ्क्रमणादिवेति भावः । अत्रेन्दुरुचां कपोलसङ्क्रमेऽपि सङ्क्रमोक्तेरस-म्बन्धे सम्बन्धोक्तिरूपातिशयोक्तिः ॥ ३७ ॥

उपगूढेति । रजनीकरः चन्द्रः अलघुभिरूर्मिभिरेव भुजैरुपगूढा वेला येन तं सानन्दमिति भावः । सरितामधीशं समुद्रमपि स्वभावाद-क्षुभ्यन्तमपीति भावः । अचुक्षुभत् क्षोभयति स्म । क्षुभ्यतेर्ण्यन्तात् लुङि चौ

रजनीकरः किमिव चित्रमहो
यदुरागिणाङ्गमनङ्गलघुम् ॥ ३८ ॥
भवनोदरेषु परिमन्दतया
शयितोऽलसः स्फटिकयष्टिरुचः ।
अवलम्ब्य जालकमुखोपगता-
नुदतिष्ठदिन्दुकिरणान्मदनः ॥ ३९ ॥
अविभावितेषुविषयः प्रथमं
मदनोऽपि नूनमभवत्तमसा ।
उदिते दिशः प्रकटयत्यमुना
यदधर्मधाम्नि धनुराचकृषे ॥ ४० ॥

चन्द्रपक्षेऽलसः । अनङ्गेन लघुङ्कृतमारं यदरागिणां रागिणोऽङ्गमङ्गु-
लुभत् इत्यद किमिव चित्रं न किञ्चिदित्यर्थः । अत्राद्ये अकर्मकं कोप
यतश्चन्द्रस्य दण्डापूपिकन्यायादन्यकोपकारित्वोक्तेरर्थापत्तिरलङ्कारः ॥३८॥

भवनेति । परिमन्दतया एकान्तस्थितादसमर्थतया भवनोदरेषु गृहा-
भ्यन्तरेषु शयित इऽलसोऽतएवालसो मदनो जालकमुखोपगतान् गवाक्षविवरप्र-
विष्टान् अतएव स्फटिकयष्टीनां इव रुक् शोभा येषां तान् स्फटिकदण्ड-
सदृशान् इन्दुकिरणानवलम्ब्याश्रित्य उदतिष्ठत् उत्थितः । अत्रोद्बोधो-
त्थानयोरभेदविवक्षया यदोत्थानं कर्मणीति पूर्वस्मादपि सिद्धि । एतत्तदे-
वाभेदाध्यवसायमूलातिशयोक्तिः स्फटिकयष्टिरुचइत्युपमया च सापेक्ष-
त्वादलम्ब्यवेत्यत्र स्वाभाव्यावलम्बनहेतुकत्वोत्प्रेक्षा प्रत्याय्यतइत्येतासां
सङ्करः ॥ ३९ ॥

अविभावितेति । मदनोऽपि प्रथमं चन्द्रोदयात्प्राक् तमसा
अविभावितोऽलक्षित इषुविषयो लक्ष्यं येन सोऽभवत् नूनमित्युत्प्रेक्षा ।
यस्मादधर्मधाम्नि शीतकरे उदिते दिशः प्रकटयति सति अमुना

युगपद्विकाशमुदयाद्गमिते
शशिनः शिलीमुखगणोऽलभत
द्रुतमेत्य पुष्पधनुषो धनुषः
कुमुदेऽङ्गनामनसि चावसरम् ॥ ४१ ॥
ककुभां मुखानि सहसोज्ज्वलयन्
दधदाकुलत्वमधिकं रतये ।

मदनेन धनुराचकृषे आकृष्टं चन्द्र एव महानुद्दीपको मदनस्यामुदिति भाव ॥ ४० ॥

युगपदिति । पुष्पधनु पुष्पधन्वा । वा संज्ञायामिति विकल्पादानङादेश । तस्य धनु पुष्पचाप पुष्पान्तरं च तस्मा च्युतो नि सृत शिली शल्य मुख येषान्ते शिलीमुखा बाणा भ्रमराश्च । अलिबाणौ शिलीमुखाविल्यमर । तेषाङ्गण शशिन उदयाद्विकाशमौत्सुक्यमुन्मीलनञ्च युगपदेकदा गमिते प्रापिते अङ्गनाना सुन्धा मनसि हृदये कुमुदे चावसरमवकाशमाश्वाश लभत दम्पत्य प्रवेशं लब्धवानित्यर्थः । अत्र चन्द्रोदये कुमुद कामिनी हृदययोर्द्वयोरपि प्रकृतयो शिलीमुखप्रवेशलक्षणैकधर्म्म योगादौपम्यात्तुल्ययोगिता एकधर्म्मत्वं चात्र शिलीमुखेति श्लिष्टपदोपात्तयोरलिबाणयोरैक्याध्यवसायमूलातिशयोक्तिप्रसादादिति सङ्कर ॥ ४१ ॥

ककुभामिति । ककुभा दिशा मुखानि सहसा झटित्युज्ज्वलयन् उद्भासयन् रतये सुरताय अधिकमाकुलत्वमौत्सुक्यं दधत् यूनामिति शेष । अन्यत्र रतये कामदेव्यै आकुलत्व भयविह्वलत्व दधत् । अत्रेरत्रिमुनेर्नयनप्रभव अत्रिनेत्रसमुद्भव इति पुराणात् त्रिनयनप्रभवोन भवतीयत्रिनयनप्रभव अपरस्त्रिनयन प्रभवादन्योदहनोऽग्निरिन्दु कुसुमेषुकामप्रदिदीपत् दीपयति स्म । दीप्यतेर्णौ चङि भ्राजेत्यादिना विकल्पादुपधाह्रस्व । अत्र प्रकृते कुसुमेषोर्दीपन नाम प्रवर्द्धनस्य तत्र

अदिदीपदिन्दुरपरो दहनः
कुसुमेषुमत्रिनयनप्रभवः ॥ १२ ॥

इति निश्चितप्रियतमागतयः
सितदीधितावुदयवत्यबलाः ।
प्रतिकर्म कर्तुमुपचक्रमिरे
समये हि सर्वमुपकारि कृतम् ॥ १३ ॥

सममेकमेव दधतुः सुतनो-
रुरु हारभूषणमुरोजतटौ ।
घटते हि संहततया जनिता-
मिदमेव निर्विवरतां दधतोः ॥ १४ ॥

प्रतीयमानेन प्रज्वलनेनाभेदाध्यवसायाच्चार्चिमत्त्वमिन्दोर्दिदृक्षोस्तु कामादि-धर्म्मं स्वस्थादपरोऽयं दहनः स्वपरशब्दप्रयोगसामर्थ्याद्दहनत्वोत्प्रेक्षा न रूपकमिति रहस्यम् । चन्द्रोदयात्कामो ववृधे इति तात्पर्यम् ॥ १२ ॥

एवञ्चन्द्रोदयार्थं उद्दीपनविभावमुक्त्वा तत्कार्यमाह । इतीति । इत्थं सितदीधितावुदयवति सत्यबलाः स्त्रियो निश्चिता प्रियतमानामागतिरागमनं याभिस्ताः सत्यः प्रतिकर्म प्रसाधनं कर्तुं उपचक्रमिरे । प्रतिकर्म्म प्रसाधनमित्यमरः । चन्द्रोदयात्प्रिया गमनं निश्चित्य स्वस्वदूतीं क्रान्तावाक्यैः । तथा हि समये कार्यं काले कृतमनुष्ठितं सर्वं कर्म्म उपकार्युपकारकम्भवति अन्यथा विफलमेवेति भावः । अतो निश्चय प्रकिरात्मा युक्तेत्यर्थान्तरन्यासः ॥ १३ ॥

अथ प्रसाधनमेव प्रपञ्चयति । सममिति । सुतनोः स्त्रियाः उरोजतटौ उच्चस्तनौ एकमेव हारमेव भूषणं सममेकपद्येन दधतुः कुचयोः संहततया ऐकमत्येन च जनिता निर्विवरता निरन्तरता रन्ध्रराहित्यं च दधतोरिदं समभागित्वमेव घटते । अन्तर्भेदान्तरायादि

कदलीप्रकाण्डरुचिरोरुतरो
जघनस्थलीपरिसरे महति ।
रशनाकलापकगुणेन वधू
र्मकरध्वजद्विरदमाकलयत् ॥ ४५ ॥
अधरेष्वलक्तकरसः सुदृशां
विशदं कपोलभुवि लोध्ररजः ।
नवमञ्जनं नयनपङ्कजयो
र्विभिदे न शङ्कुनिहितात्पयसः ॥ ४६ ॥

विपर्ययिणां विषयोपभोगात्तदभावात्तत्समयोचितं हारधारणं युक्तमिति भावः ॥ ४४ ॥

कदलीति । वधूः कदलीप्रकाण्डरुचिरः रम्भास्तम्भसुन्दर ऊरुरेव तरुर्बन्धनवृक्षो यस्मिन् अत्र कदलीकाण्डस्य सौन्दर्यमात्रोपमानत्वाद्वन्धनयोग्यवृक्षवाचिना तरुशब्देन पुन रुक्तिः । महति जघनस्थल्येव परिसरः प्रदेशस्तस्मिन् रशनाकलापक एव गुणस्तेन मकरध्वजो मदनः स एव द्विरदस्तमाकलयदबध्नात् । रशनाबन्धेन जघनमतीव मदनोद्दीपकमासीदित्यर्थः । समस्तवस्तुवर्त्ति सावयवरूपकम् ॥ ४५ ॥

अधरेष्विति । सुदृशामधरेष्वोष्ठेषु अलक्तकरसो लाक्षाद्रवः तथा कपोलभुवि गण्डस्थले विशदं शुभ्रं लोध्ररजः तथा नयनपङ्कजयोर्नवमञ्जनञ्च शङ्कुनिहितात्पयसः क्षीरात् न विभिदे भिन्नं नाभूत् । कर्मकर्त्तरि लिट् । अधरादिनिहितं लाक्षारागादिकं शङ्कुनिहितक्षीरवत्स्वाश्रयादाश्रयतोऽभेदेन दुर्लक्ष्यमभूदित्यर्थः । अत्र यदधरालक्तकरसादिकं तच्छङ्कुनिहितं क्षीरमित्यैक्याध्यवसायो गुणाभावात् वाक्यार्थयोरभेदाध्यवसायो निदर्शनालङ्कारः तेनाधरालक्तकादीनां गुणतः एकरूपः सामान्यालङ्कारो गम्यते सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकतेति लक्षणात् ॥ ४६ ॥

स्फुरदुज्ज्वलाधरदलैर्विलस
द्दशनांशुकेशरभरैः परितः ।
धृतमुग्धगण्डफलकैर्विबभु
र्विकसद्भिरास्यकमलैः प्रमदाः ॥ ४७ ॥
भजते विदेशमधिकेन जित
स्तदनुप्रवेशमथवा कुशलः ।
मुखमिन्दुरुज्ज्वलकपोलमतः
प्रतिमाच्छलेन सुदृशामविशत् ॥ ४८ ॥

स्फुरदिति । प्रमदाः स्त्रियः स्फुरन्तश्चलन्त उज्ज्वलाः श्यामला अधरा ओष्ठा एव दलानि पत्राणि येषां तैः परितो विलसन्तो दशनांशवो दन्तकान्तय एव केशरभराः किञ्जल्कपुञ्जा येषां ते । धृतानि मुग्धानि गण्डा एव फलकानि कर्णिका येषां तैर्विकसद्भिरास्यकमलैर्विबभुः । अत्रास्यकमलैरिति रूपणात्प्रमदा एव सरस्य इति सिद्धेरेकदेशविवर्ति सावयवरूपकम् । आस्यकुमुदैरिति पाठे कुमुदस्य रक्तोपमानकत्वं कविसमयविरुद्धं ध्येयम् ॥ ४७ ॥

भजत इति । अधिकेन प्रबलेन जितो विदेशं देशान्तरं भजते अथवा कुशलः कार्यचतुरः तदनुप्रवेशं भजते तमेव परपक्षतया प्रविश्य सेवत इत्यर्थः । अतो हेतोरिन्दुरुज्ज्वलौ कपोलौ यस्य तदिति मुखस्य विशेषणयोग्यतोक्तिः पदार्थहेतुकं काव्यलिङ्गम् । सुदृशां मुखं प्रतिमाच्छलेन प्रतिबिम्बव्याजेन अविशत् प्रविष्टः । छायाचन्द्र एवायं न प्रतिमाचन्द्र इति अपह्नवप्रतीतेः छलशब्देनासत्यत्वप्रतिपादनादपह्नवोऽयं सापह्नवः । पूर्वोक्तकाव्यलिङ्गसापेक्ष इति सङ्करः । तेन कपोलयोर्निर्मलत्वं दर्पणोपमत्वं व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः ॥ ४८ ॥

भ्रुवमागताः प्रतिहतिङ्कठिने
मदनेषवः कुचतटे महति ।
इतराङ्गवन्न यदिदं गरिम
ग्लपितावलग्नमगमत्तनुताम् ॥ ४९ ॥
न मनोरमास्वपि विशेषविदां
निरचैट योग्यमिदमेतदिति ।
गृहमेष्यति प्रियतमे सुदृशां
वसनाङ्गरागसुमनःसु मनः ॥ ५० ॥

ध्रुवमिति । मदनेषवः कामशराः महति कठिने कुचतटे प्रतिहतिम्प्रतिघातमागताः प्राप्ता ध्रुवम् । यद्यस्माद्गरिम्णा निजभारेण ग्लपितङ्कर्शितं अवलग्नं मध्यं येन तदिदं कुचतटम् । इतराङ्गेन तुल्यमितराङ्गवत् । तेन तुल्यमिति वतिप्रत्ययः । तनुतां कार्श्यन्नागमत् नाभजत । पुषादित्वेन च्लेरङादेशः । तदा मदनेषुपातात्कुचातिरिक्तमङ्गानामङ्गं कृशमासीदित्यर्थः ॥ ४९ ॥

न मनोरमास्विति । प्रियतमे गृहमेष्यति आगमिष्यति सति विशेषविदामपि सुदृशां सम्यग्दर्शनीयानां स्त्रीणां मनः कर्तृ, मनोरमास्वपि वसनाङ्गरागसुमनःसु वस्त्रगन्धमाल्येषु इदमेतदिति इदं पुरोवर्ति वस्त्रे-तदिति वसनमिति अनुलेपनमिति सुमनस इति विशेषाकारेण तथा योग्यमवाकल्पारचनार्हमिति च न निरचैट न निरधारयत् प्रियागमनहर्षातिरेकादिति कर्तव्यतामूढमभूदित्यर्थः । चिनोतेर्लुङि तङि च्लेः सिच् सार्वधातुकार्धधातुकयोरिति गुणः । हर्षोऽत्र सञ्चारिभावः निरवयमस्योऽन्यसम्बन्धोक्तेरतिशयोक्तिः सुमन सुमन इति यमकविशेषश्चेति संसृष्टिः ॥ ५० ॥

वपुरन्वलिप्त परिरम्भसुख
व्यवधानभीरुकतया न वधूः।
घनमस्य वाढमिदमेव हि यत्
प्रियसङ्गमेष्वनवलेपमदः ॥ ५१ ॥
निजपाणिपल्लवतलस्खलना-
दभिनासिकाविवरमुत्पतितैः।
अपरा परीक्ष्य शनकैर्मुमुदे
मुखवासमास्यकमलश्वसनैः ॥ ५२ ॥
विघृते दिवा स वचसा च पुरः
परिपूर्णमण्डलविकाशभृति।

वपुरिति। वधूः काचित् परिरम्भसुखव्यवधानभीरुकतया आलिङ्गन-सुखविच्छेदभीरुत्वेन। भीरुकशब्दात् स्वार्थे कन्प्रत्ययः। वपुर्नान्व-लिप्त नानुलिप्तवती अङ्गरागमात्रव्यवधानमपि न सेहे इत्यर्थः। लि-म्पतेः कर्त्तरि लुङि तङ्। तथा हि अस्येदमेव, प्रियसङ्गमेषु अनवले-पमदनमदगर्व्वा इति यत्। अवलेपस्तु गर्व्वे स्यात्लेपने भूषणेऽपि चेति विश्वः। इदमत्र तात्पर्यमर्थस्य वस्तुनो बाढं भृशं सम्यक् युक्तम्। लेपा-नुपादानोऽवकाशानन्त्यात्तः ॥ ५१ ॥

निजेति। अपरा काचित् निजपाणिपल्लवतलस्य स्खलनादभिघातात् अ-भिनासिकाविवरं नासारन्ध्रमभि उत्पतितैरास्यकमलश्व-श्वसनैर्मुखमारुतै-र्मुखवासं मुखसौरभं शनकैः परीक्ष्य मुमुदे। इयं खण्डिताभिसारिका ना-यिका ॥ ५२ ॥

विघृत इति। दिवा आकाशेन वचसा वचनेन च पुरोऽग्रे विघृते विधारिते परिपूर्णमण्डलविकाशं बिम्बशोभाम्बिभर्त्तीति तद्-वत् तस्मिन् हिमधाम्नि चन्द्रे दर्पणतले च मृगदृशः स्त्रियः समुख बिंबं

हिमधाम्नि दर्पणतले च मुहुः
स्वमुखश्रियं मृगदृशोदद्दृशुः ॥ ५३ ॥
अधिजानु बाहुमुपधाय नम
त्करपल्लवार्पितकपोलतलम् ।
उदकण्ठि कण्ठपरिवर्त्ति कल
स्वरशून्यगानपरयापरया ॥ ५४ ॥
प्रणयप्रकाशनविदो मधुरा.

पूर्वे हिमधाम्नि [illegible] ॥ ५३ ॥

अधिजान्विति । नमति [illegible] अधिजानु जानुनि । [illegible] । उपधाय निधाय [illegible] । [illegible] । [illegible] ॥ ५४ ॥

[illegible] ।

सुतरामभीष्टजनचित्तहृतः।
प्रजिघाय कान्तमनु मुग्धतर
स्तरुणीजनोद्दृश इवाथ सखीः॥ ५५ ॥
न च मेऽवगच्छति यथा लघुतां
करुणां यथा च कुरुते स मयि।
निपुणन्तथैनमुपगम्य वदे
रभिदूति काचिदिति सन्दिदिशे ॥ ५६ ॥
दयिताय मानपरयापरया
त्वरितं ययावगदितापि सखी।

प्रयोजनं, प्रणयप्रकाशनविदोऽनुरागव्यञ्जनचतुरा इत्यर्थः। मधुराः मधुरभाषिणीः अन्यत्र रम्याकृतिः सुतरामभीष्टजनस्य चित्तहृतोमनोहारिणी सखीः दृश इव कान्तमनु प्रयोजनं प्रति प्रजिघाय प्रेषितवान्। हिनोतेर्लिट्। इवेन सह समासवचनात् दृश इवेति उपमासमासः। तथा सखीनामासन्नान्तरङ्गत्व कार्यदर्शित्वादिव्यञ्जनादलङ्कारेण वस्तुध्वनिः॥५५॥

तथा काचिन्नायिका दूतीं वाचिकमनुशास्ति। न चेति। स मे दयितो यथा मयि करुणां कुरुते यथा लघुतामल्पताञ्च नावगच्छति न मन्यते। एनन्दयितमुपगम्य प्राप्य तथा तेन प्रकारेण निपुणं वदेः। विध्यर्थे प्रार्थने वा लिङ्। इतीत्थं काचिन्नायिका अभिदूति। अभिलक्षणेऽव्ययीभावे नपुंसकह्रस्वत्वम्। सन्दिदिशे सन्दिष्टवती। कर्त्तरि लिट् स्वरितेत्त्वादात्मनेपदम्। नायिका तु कलहान्तरिता। कोपात्कान्तपराणुद पश्चात्तापसमन्वितेति लक्षणात्॥ ५६॥

दयितायेति। मानपरया अभिमानवत्या। अपरयापरया नायिकया अगदिता दयितमानयेत्यनुक्ता सखी दयिताय दयितं आनेतुम्। क्रियार्थोपपदस्य च कर्मणि स्थानिन इति चतुर्थी। त्वरितं शीघ्रं ययौ

किम चोदिताः प्रियहितार्थकृतः
कृतिनोभवन्ति सुहृदः सुहृदाम् ॥ ५७ ॥
प्रतिभिद्य कान्तमपराधकृतं
यदि तावदस्य पुनरेव मया ।
क्रियतेऽनुवृत्तिरुचितैव ततः
कलयेदमानमनसं सखि! माम् ॥ ५८ ॥
अवधीर्य धैर्यकलिता दयितं

अन्यदा भवत्येवेति भावः। तथा हि सु शोभनं हृदयं येषान्ते सुहृदो मित्राणि। सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातः। चोदिताः प्रेरिताः सन्तः सुहृदां मित्राणां प्रियं हितं चैवार्थं कुर्वन्तीति प्रियहितार्थकृतः कृतिनः कृतार्था भवन्ति किम्? किन्तु चोदनां विनैवेति भावः। अर्थान्तरन्यासः । मालिनी च वृत्तम् ॥ ५७ ॥

विदधे विरोधमथ तेन सह।
तव गोप्यते किमिव कर्त्तुमिदं
न सहास्मि साहसमसाहसिकी ॥ ५९ ॥
तदुपेत्य मास्म तमुपालभथाः
किल दोषमस्य न हि विद्म वयम्।
इति सम्प्रधार्य रमणाय वधू
र्विहितागसेऽपि विससर्ज्ज सखीम् ॥ ६० ॥
ननु सन्दिशेति सुदृशोदितया
त्रपया न किञ्चन किलाभिदधे।

दाव् । नास्मि । अत्र साहसिकत्वस्य विशेषणगत्या साहसासहनहेतु-
त्वोक्तेः पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ ५९ ॥

तर्हि किमत्र कार्यमत आह । तदिति । तत्तस्मात् वल्लभमुपेत्य-
मास्मोपालभथाः नोपालभस्व तद्दोषं न कथयेत्यर्थः । स्मोत्तरे लङ्
चेति चकारात् पूर्वोक्तो लङ् न माङ्योगे इत्यट् प्रतिषेधः । ननु सापराधः
कथं नोपालभ्यस्तत्राह । वयमस्य दोषमपराधं न विद्म किल अजा-
नाना इव स्थिताम इत्यर्थः । कार्यार्थिनः कुतो गर्व इति भावः । किलो-
ऽलीकेति यादवः । इति सम्प्रधार्य निश्चित्य वधूः नायिका विहिता-
गसेऽपि कृतापराधायापि रमणाय प्रेयसे । क्रियाग्रहणात् चतुर्थी । सखीं
विससर्ज प्रहितवती विरहासहिष्णुतयेति भावः । एषा कलहान्तरिता
प्रौढा च ॥ ६० ॥

नन्विति । ननु सन्दिश सन्देशं ब्रूहि इत्युदितया उक्तया कथितया
मुग्धया नायिकया कलत्र्या त्रपया हेतुना किञ्चन नाभिदधे किल नाभि-
हितं खलु । किन्तु निश्वसितैरधरोदरैरनङ्गभाषैरनिशं कथितं सखी-
तम् । तदपत्रपाकरोतीति त्रपत्नात्कर्मणि क्तः पाक्षिकद्वारे रक्ष-

निजमैच्छि मन्दमनिशं निशितैः
क्षपितं शरीरमशरीरशरैः ॥ ६१ ॥
ब्रुवते स्म दूत्य उपहृत्य नरा
न्नववत्प्रगल्भमतिगर्भगिरः ।
सुहृदर्थमीहितमजिह्मधियां
प्रकृतेर्विराजति विरुद्धमपि ॥ ६२ ॥
मम रूपकीर्त्तिमहरद्भुवि य
स्तदनुप्रसक्तहृदयेयमिति । •

[illegible] इत्याह । निजं शरीरं मन्दमैच्छि ईप्सि-
तम् । [illegible] । तथा निज[illegible]
निजशरीर[illegible] [illegible]निवेदनाय [illegible]
र्दिति । [illegible] पञ्चमी [illegible] । [illegible]
[illegible] ॥ ६१ ॥

[illegible] दूत्यः [illegible] आह । ब्रुवत इति
प्रगल्भाः [illegible] प्रतिभासारेण गिरोदारा ता दूत्यः नरान्
[illegible] नववत् [illegible] । तेन [illegible]
[illegible] । ब्रुवते [illegible]
[illegible] । सुहृदर्थमिति । [illegible]
[illegible] । [illegible]
[illegible] प्रकृतेर्विरुद्धमपि विराजति शोभते
[illegible] ॥ ६२ ॥

[illegible] । [illegible]
[illegible]
[illegible]
[illegible] । [illegible]

त्वयि मत्सरादिव निरस्तदयः
सुतरां चिणोति खलु तां मदनः ॥ ६३ ॥
तव सा कथासु परिघट्टयति
श्रवणं यदङ्गुलिमुखेन मुहुः ।
घनतां ध्रुवं नयति तेन भव-
द्गुणपूगपूरितमतृप्ततया ॥ ६४ ॥
उपताप्यमानमलघूष्णिमभिः
श्वसितैः सितेतरसरोजदृशः ।

काव्यलिङ्गमुक्तः । अत्र, साक्षात्प्रतिपक्षभूतनायकपीडासमर्थस्य मदनस्य तदीयनायिकापीडनोक्त्या प्रत्यनीकालङ्कारः । स च त्वयि मत्सरादि-ति हेतूत्प्रेक्षोत्थापित इति सङ्करः । बलिनः प्रतिपक्षस्य प्रतीकारे अ-शक्ये । यत्तदीयतिरस्कारः प्रत्यनीकमलङ्कृच्यते इति लक्षणात् ॥ ६३ ॥

तवेति सा त्वत्प्रिया तव कथासु गुणकीर्त्तनेषु सङ्करङ्गुलिमुखेनाङ्गु-लग्रेण श्रवणं श्रोत्रविवरं परिघट्टयति स्फालयतीति यत् ग्रहश्चयेति भः तेन परिघट्टनेन भवद्गुणपूगपूरितं श्रवणं व्याप्ततया सान्द्रगुणपद-निबिडसन्तुष्टतया घनतां नयति । सङ्कटस्य सम्पादनार्थमस्यादिसङ्घयोगुण-विधाय सं व्यतीत्यर्थः । ध्रुवमित्युत्प्रेक्षा घनता सम्यक् विनोदमार्थं मो-घट्टने घनतास्थवमनुत्प्रेक्ष्यते ॥ ६४ ॥

उपेति । अलघुरन्तःसन्तापोपाधिका वह्निमा उष्णत्वं येषां तैः-श्वसितैर्निश्वासैरुपताप्यमानं सितेतरसरोजदृशो नीलोत्पलाक्ष्या अधरं नव-पल्लवदलामालाम्बुजदलानां रागस्फोरटुमद्वोद्गमा माद्रतां नेतुं न शक्नोति । एतेन ज्वरावस्थोक्ता । अत्र द्वयस्य सम्बन्धे ऽप्यसम्बन्धो-

द्रवतां न नेतुमधरं क्षमते
नवनागवल्लिदलरागरसः ॥ ६५ ॥
दधति स्फुटं रतिपतेरिषवः
शिततां यदुत्पलपलाशदृशः ।
हृदयं निरन्तरबृहत्कठिन
स्तनमण्डलावरणमप्यभिदन् ॥ ६६ ॥
कुसुमादपि स्मितदृशः सुतरां
सुकुमारमङ्गमिति नापरथा ।
अनिशं निजैरकरुणः करुणां
कुसुमेषुरुत्तपति यद्विशिखैः ॥ ६७ ॥

[illegible]रतिशयोक्तिः । ६५ ।

दधतीति । रतिपतेरिषवः शिततां [illegible] दधति स्फुटमित्युत्प्रेक्षा-याम् । यदुत्पलाक्षिरन्तरं नीरन्ध्रं बृहत् कठिनञ्च यत् स्तनमण्डलं तदे-वावरणं वर्म तस्य [illegible] उत्पलपलाशदृशः उत्पलदलाक्ष्याः हृदय-मभिदन् भिन्दन्ति स्म । भिदेर्लुङि इरितो वेति च्लेरङादेशः । आवरण-मपि भिन्दन्ति [illegible] । तथा च र-[illegible]हतीति वस्तु द्योत्यते । ६६ ।

कुसुमादिति । स्मितदृशः [illegible] अङ्गं कुसुमादपि सुतरां सु-कुमारं [illegible] न किन्तु [illegible] । यद्यस्मात् कुसुमेषुर[illegible] निजैर्विशिखैः [illegible] । [illegible] । कुसुमैरेवेत्यर्थः । [illegible] तथा [illegible] [illegible] । [illegible] । [illegible] इति [illegible]

विपतां निषेवितमपक्रियया
समुपैति सर्वमिति सत्यमदः ।
अमृतस्रुतोऽपि विरहाङ्गवतो
यदमूं दहन्ति हिमरश्मिरुचः ॥ ६८ ॥
उदितं प्रियां प्रति सहार्दमिति
स्मदधीयत प्रियतमेन वचः ।

व्यञ्जकप्रयोगाद्वाच्या ॥ ६७ ॥

विपतामिति । अपक्रियया विपरीतप्रयोगेण निषेवितमुपयुक्तं सर्व वस्तु विपतामपैतीति भावः । विपता विपदङ्कितत्वं समुपैति इत्यदः इदं वि-गत्व सर्वं ध्रुवं यदाखात् अमृतस्रुतोऽपि । अमृतः क्षिपि तक् हिमर-श्मिरुचश्चन्द्रपादा भवतो विरहाङ्गितोऽस्वथा विना सेवनादित्यर्थः । अमूं वक्षियान्दहन्ति या पूर्वं त्वया सह सेवनादाह्लादयन्तीति भावः । तेन विषयद्वैधरूपा अपत्यरत्नोक्ता । अत्र विशेषेण सामान्यसमर्थनरू-पोऽर्थान्तरन्यासः ॥ ६८ ॥

उदितमिति । प्रियाम्प्रति प्रियामुद्दिश्य हृदयस्येदं हार्दमेव । का ना प्रियता हार्दमेव स्नेह इत्यमरः । तस्येदमित्यणुप्रत्यय । हृदयस्य हृल्लेखयदण्लासेष्विति हृदयस्य हृदादेशः । सहार्दं सस्नेहं उदितम् । वदे कर्मणि क्तः वचिस्वपीत्यादिना सम्प्रसारणम् । वचो-रीवाक्यं प्रियतमेन अदधीयत निश्चितम् । दधातेः कर्मणि लङ् इत्यत्रोदपसर्गेश्छन्दस्य प्राक् प्रयोगः । हि यस्मात् इह पूर्व । विदितेङ्गिते विदितपराभिप्राये जने । इङ्गितं हृद्गतो भावः । उक्तने रितीरिता गिरः सपदि लगन्ति सज्जन्ति खलु स्वयं प्रिया हृदयवेदि-त् । स्वबुद्धेः प्रसादेन दूतीकथितं प्रियाविरहदुःखं विश्वासेऽयं । न्तरन्यास । एषा कलहान्तरिता अतएव नानाख्योऽविप्रलम्भ शृङ्गार

विदितेङ्गिते हि पुरएव जने
सपदीरिताः खलु लगन्ति गिरः ॥ ६९ ॥
कुलकम् ॥
दयिताहृतस्य युवभिर्मनसः
परिमूढतामिव गतैः प्रथमम् ।
उदिते ततः सपदि लब्धपदैः
चरणादराकरैऽनुपदिभिः प्रयये ॥ ७० ॥
निपपात सम्भ्रमभृतः श्रवणा
दसितभ्रुवः प्रणदितालिकुलम् ।

[illegible] ॥ ६९ ॥

दयितेति । प्रथम[illegible] परिमूढतां [illegible] गतैः तत [illegible] उदिते इति [illegible] । [illegible] । [illegible] इति [illegible] । [illegible] । [illegible] ॥ ७० ॥

[illegible] । निपपातेति । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] ।

दयितावलोकविकसन्नयन
प्रसरप्रगुणत्वमिव वारिरुहम् ॥ ७१ ॥
उपनेतुमुन्नतिमतेव दिवं
कुचयोर्युगेन तरसा कलिताम् ।
रभसोत्थितामुपगतः सहसा
परिरभ्य कश्चन वधूमरुधत् ॥ ७२ ॥
अनुदेहमागतवतः प्रतिमां
परिणायकस्य गुणमुद्दहता ।

मुकुरेण वेपथभृतोऽतिभरात्
कथमप्यपाति न वधूकरतः ॥ ७३ ॥
अवनम्य वक्षसि निमग्नकुच
द्वितयेन गाढमुपगूढवता ।
दयितेन तत्क्षणचलद्रशना
कलकिङ्किणीरवमुदासि वधूः ॥ ७४ ॥
कररुद्धनीवि दयितोपगतौ
गलितं त्वराविरहितासनया ।
क्षणदृष्टहाटकशिलासदृश
स्फुरदूरुभित्ति वसनं ववसे ॥ ७५ ॥

पिदधानमन्वगुपगम्य दृशौ
ब्रुवते जनाय वद कोऽयमिति ।
अभिधातुमध्यवससौ न गिरा
पुलकैः प्रियं नववधून्यगदत् ॥ ७६ ॥

उदितोरुसादमतिवेपथुमत्
सुदृशोऽभिभर्त्तृ विधुरं त्रपया ।
वपुरादरातिशयशंसि पुनः
प्रतिपत्तिमूढमपि वाढमभूत् ॥ ७७ ॥

परिमन्थराभिरलघूरुभरा
दधिवेश्म पत्युरुपचारविधौ ।

पिदधानमिति । नववधूर्नवोढा अन्वक् पश्चादुपगम्य दृशौ पिदधानं छादयन्तं प्रियं दृष्टिच्छादकः कः वद इति ब्रुवते पृच्छते जनाय गिरा वाचा अभिधातुमध्यवससौ नोत्सेहे लज्जयेति भावः । अध्यवपूर्वात् स्यतेः कर्त्तरि लिट् । किन्तु पुलकैर्न्यगदत् । अत्र प्रियस्पर्शस्य लज्जया संवलितस्य पुलकैः प्रकाशनात् सूक्ष्मालङ्कारः । संलक्षितसूक्ष्मार्थ-प्रकाशः सूक्ष्म उच्यते इति लक्षणात् ॥ ७६ ॥

उदितेति । अभिभर्त्तृ भर्त्तृसमक्षम् । यद्योमाभिप्रती आभि-मुख्ये इत्यव्ययीभावः । उदित उत्पन्न ऊरुसादः ऊर्वोर्निश्चेष्टता यस्य तत् अतिवेपथुमत् अतिकम्पवत् । एतेन विशेषणद्वयेन प्रत्युत्थानादि-प्रतिरोधेन स्तम्भवेपथू सात्त्विकावुक्तौ । त्रपया विधुरं विकलम् । एतेन लज्जासञ्चारिणा प्रियशाक्यवलम्बितम् । एवं प्रतिपत्तिमूढमपि इति कर्त्तव्यतामूढमपि सुदृशोवपुर्वाढम् आदरातिशयशंसि सात्त्विकादि-चिह्नैरादरविशेषव्यञ्जकमभूत् मत्यादरे किमुपचारैरिति भावः ॥ ७७ ॥

परीति । प्रमदा अधिवेश्म निजवेश्मनि पत्युरुपचार विधौ प्रत्यु-

स्खलिताभिरप्यनुपदं प्रमदाः
प्रजयातिभूमिमगमन् गतिभिः ॥ ७८ ॥
मधुरोन्नतभ्रु ललितञ्च दृशोः
सकरप्रयोगचतुरञ्च वचः ।
प्रकृतिस्थमेव निपुणागमितं
स्फुटनृत्यलीलमभवत् सुतनोः ॥ ७९ ॥
तदयुक्तमङ्ग तव विप्रकृता
न कृतं यदीक्षणसहस्रतयम् ।

पिदधानमन्वगुपगम्य दृशौ
व्रुवते जनाय वद कोऽयमिति ।
अभिधातुमध्यवससौ न गिरा
पुलकैः प्रियं नववधूर्व्यगदत् ॥ ७६ ॥
उदितोरुसादमतिवेपथुमत्
सुदृशोऽभिभर्तृ विधुरं त्रपया ।
वपुरादरातिशयशंसि पुनः
प्रतिपत्तिमूढमपि बाढमभूत् ॥ ७७ ॥
परिमन्थरामिरलघूरुभरा-
दधिवेश्म पत्युरुपचारविधौ ।

पिदधानमिति । नववधूर्नवोढा अन्वक् पश्चादुपगम्य दृशौ पिदधानं छादयन्तं प्रियं दृष्टिच्छादकः क वद इति ब्रुवते पृच्छते जनाय गिरा वाचा अभिधातुमाख्यातुमसौ मोऽयं हे लज्जयेति भावः । अध्यवसद्यतेः कर्त्तरि लिट् । किन्तु पुलकैर्व्यगदत् । अत्र प्रियस्पर्शसुखार्थस्य लज्जया असंलक्षितस्य पुलकैः प्रकाशनात् सूक्ष्मालङ्कारः । अवसन्निसूक्ष्मार्थ-प्रकाशः सूक्ष्म उच्यत इति लक्षणात् ॥ ७६ ॥

उदितेति । अभिभर्तृ भर्तृसमक्षम् । अभिप्रती आभि-मुख्ये इत्यव्ययीभावः । उदित उत्पन्न ऊरुसादः ऊर्वोरवसादो यस्य तत् अतिवेपथुमत् अतिकम्पवत् । एतेन विशेषणद्वयेन प्रणयानुरागाभिव्य-ञ्जकस्तम्भवेपथू सात्त्विकावुक्तौ । त्रपया विधुरं विकलम् । एतेन लज्जाव्यभिचारिणा प्रियसाक्षात्कारजन्यत्वमुक्तम् । एवं प्रतिपत्तिमूढमपि इति कर्त्तव्यतामूढमपि सुदृशोऽवपुर्बाढं भृशं आदरातिशयशंसि पुरुषरागादि-विशेषादरविशेषव्यञ्जकमभूत् तस्यादरे किमुपचारैरिति भावः ॥ ७७ ॥

परीति । यमदा अधिवेश्म निजवेश्मनि पत्युरुपचार विधौ प्रत्यु-

स्खलिताभिरप्यनुपदं प्रमदाः
प्रणयातिभूमिमगमन् गतिभिः ॥ ७८ ॥
मधुरोन्नतभ्रु ललितञ्च दृशोः
सकरप्रयोगचतुरञ्च वचः।
प्रकृतिस्थमेव निपुणागमितं
स्फुटनृत्यलीलमभवत्सु तनोः ॥ ७९ ॥
तदयुक्तमङ्ग तव विश्वसृजा
न कृतं यदीक्षणसहस्रतयम्।

त्थानादिकर्मणि अवघोर्णित जडभरात् परिमन्थराभिरक्षमाभिः अनु-पदम्पदे पदे स्खलिताभिरपि गताभिः प्रणयाति भूमिं प्रेमप्रकर्षमगमन्। परं प्रेमास्पदीभूता इत्यर्थः। प्रत्युत्थानादपि स्खलितगमनमेव पत्युः प्रीतिकरमभूदिति भावः। स्त्रीणां स्खलनं पत्युः प्रीतिकरमिति विरोधाभासोऽलङ्कारः ॥ ७८ ॥

मधुरेति। मधुरं मनोहरं यथा तथोन्नते एव लते भ्रुवौ यस्मिन् तन्मधुरोन्नतभ्रु। "गोस्त्रियोरुपसर्जनस्य" इति ह्रस्वत्वम्। दृशोर्ललितं नयनचेष्टा च सकरप्रयोगं हस्ताभिनयसहितं तच्चतुरञ्च वचश्च सुतनोः स्त्रियाः प्रकृतिस्थमेव स्वाभाविकमेव यदपि निपुणेन निपुणाचार्येणा-गमितमभ्यासितम्। अतएव स्फुटं प्रकटितं नृत्यलीलं यस्य तत्तथोक्तमभवदिति निदर्शनालङ्कारः। तथा नर्त्तक्युपमा गम्यते ७९

अथ कस्याश्चित्क्षणदर्शनामप्रतृप्ततायाः कान्तोपालम्भं श्लोकद्वये-नाह। तदित्यादि। अङ्गेत्यामन्त्रणे। विश्वसृजा विधात्रा तव ईक्ष-णसहस्रतयं नेत्रसहस्रसमूहः। सहस्रावयवे तयप्। न कृतं न सृष्टमिति यत् तदयुक्तं युक्तं येन कारणेन मयि स्थिते स्फुटं प्रत्यक्षमेव गोत्रभिदा नामभेदिना च। गोत्रं नाम कुलेऽप्यासिति यादवः।

प्रकटीकृता जगति येन खलु
स्फुटमिन्द्रताद्य मयि गोत्रभिदा ॥ ८० ॥
न विभावयत्यनिशमक्षिगता
मपि मां भवानतिसमीपतया ।
हृदयस्थितामपि पुनः परितः
कथमीक्षते बहिरभीष्टतमाम् ॥ ८१ ॥
इति गन्तुमिच्छुमभिधाय पुरः
क्षणदृष्टिपातविकसद्वदनाम् ।

मयेति येन । अद्य इन्द्रता जगति प्रकटीकृता खलु । यत गोत्रभि-
दिति च नामप्राप्तिः स्वस्त्रासमक्षेऽस्मते ॥ ८० ॥

नेति । अनिशमक्षिगतामपि चक्षुःस्थामपि दृष्टयामिति च गम्यते ।
हे प्रेयः ! त्वं भवान् । माम् अतिसमीपतया भवान्न विभावयति । यत्ते
प्रथम इति प्रथमपुरुष । इन्द्रियवत्सन्निकृष्टमपि न लक्ष्यत इति विरोधा-
भासनाऽर्थोऽपि शब्द । परमार्थस्तु द्वेष्यत्वादनिशमीक्ष्यान्न सम्भावन
विस्मिति भाव । अभीष्टतमां पुनर्हृदयस्थितां हृदयान्वेता अन्त-
र्हितामिति च गम्यते । अतएव विरोधाभासकोऽपि शब्द । बहि
परित कथमधुना ईक्षते इदन्तु चित्रम् अतिसामीप्य व्यवधानस्यापि दर्श-
नप्रतिबन्धकत्वादिति भाव । प्रेमास्पद वस्तु परोक्षमप्यपरोक्षमीक्षते इत-
रदपरोक्षमपि परोक्षमेवेति तात्पर्यार्थ । विरोधाभासयो सङ्कर ॥८१॥

इतीति । इत्यभिधाय पुरोगन्तुमिच्छु पत्र इच्छो पातेन विकस-
द्वदना परस्परदृष्टिपातमात्रमत्तोपाधिमत्प्र । काचिन्नायिका नवपोढा
स्वकरावलम्बन प्रियकरेण धृत्वा तेन विरुद्धा रुद्धा गत्वना अतएव गत्वनो
अ यथाना कथा मधुरा काञ्ची यस्मिन् कर्माणि तद्यथा तथा अरुपत्

स्वकरावलम्बनविमुक्तगले
त्वकाञ्चि काञ्चिदरुणत्तरसा ॥ ८२ ॥

अपयाति सरोषया निरस्ते
कृतकङ्कामिनि चुक्षुवे मृगाक्ष्या ।
कलयन्नपि सव्यथोऽवतस्थे
ऽशकुनेन स्खलितः किलेतरोऽपि ॥ ८३ ॥

आलोक्य प्रियतममंशुके विनीवौ
यत्तस्थे नमितमुखेन्दु मानवत्या ।
तन्नूनं पदमवलोकयाम्बभूवे
मानस्य द्रुतमपयानमाश्रितस्य ॥ ८४ ॥

[illegible]रुणत् । रुधादिभ्यः श्नम् । [illegible] ॥ ८२ ॥

अपयातीति । सरोषया मृगाक्ष्या निरस्ते कामिनि भर्तरि अप-याति निर्याति सति कृतकं कृत्रिमं यथा तथा चुक्षुवे तद्विगमन प्रतिबन्धार्थं क्षुतं कृतमित्यर्थः । क्षौतेर्भावे लिट् । इतरोऽपि नायकोऽपि [illegible] कलयन्नपि अशकुनेन स्खलितः किल [illegible] स्थितः न गतवानित्यर्थः । उभयोरपि समानानुराग इति भावः । [illegible] ॥ ८३ ॥

आलोक्येति । मानवत्या कोपवत्या स्त्रिया । [illegible] प्रिये । प्रियतममालोक्य । स्त्रिया [illegible] । अंशुके विनीवौ [illegible] । [illegible] नमितमुखेन्दु यथा तथा तस्थे स्थितमिति यत् [illegible] । [illegible] मानस्य [illegible]

सदृशः सरसव्यलीकतप्त
स्तरसा श्लिष्टवतः सयौवनोष्मा ।
कथमप्यभवत् स्मरानलोष्णः
स्तनभारोन नखम्पचः प्रियस्य ॥ ८५ ॥
दधत्युरोजद्वयमुर्वशीतलं
भुवोगतेव स्वयमुर्वशी तलम् ।
बभौ मुखेनाप्रतिमेन काचन
श्रियाधिका ताम्प्रति मेनका च न ॥ ८६ ॥

अन्वेषितमित्यर्थः । लज्जामपि सा या कुरुते अन्येऽपार्थत्वमुपयाते नूनमिति मानमन्त्रोऽप्य इति भाव ॥ ८४ ॥

सदृश इति । सरसमार्द्रं नूतनमिति यावत् । तेन व्यलीकेन प्रियकृतनापराधेन तप्त तथा यौवनोष्मणा मदकर्तृं सहेति सयौवनोष्मा । किञ्च स्मरानलोष्णः काम निसन्तापः एवं त्रिविधानलतापादपि दुःसह स्तनभारस्तत्र पीनातिशयाद्दयायामेवेत्यर्थः । आश्लिष्टवत आलिङ्गितवतः प्रियस्य कथमपि कथं वा कुचोष्मेत्यर्थः । नखम्पचमिति नखं पचतीति नखम्पच । "मितनखे चेति खश् प्रत्ययः" "अरुर्द्विषदजन्तस्य मुमिति मुमागमः । नाभवत् तयोरुष्णत्वं पद्मोष्णोऽपि नाभूदित्यर्थः । प्रियासङ्गप्रतीकारः खलु कामिनां सर्वसन्ताप इति भावः । नायिकोष्णानुभवस्योष्णत्वस्यो-क्तेरतिशयोक्तिः ॥ ८५ ॥

दधतीति । उरू यस्याः सा ऊर्वशी उरवोऽभोगाभ्यामुरुशीतलं इव कुचद्वयं दधती भुवमागता स्वयं साक्षादुर्वशीव स्थितेत्युत्प्रेक्षा । काचन स्त्री अप्रतिमेन मुखेन बभौ तां प्रति मेनका मेनकाख्याप्सरश्च श्रिया सौन्दर्येणाधिका नेत्यतिशयोक्तिः । बभौ यमकेन सङ्कीर्णा । वंशस्थवृत्तम् ॥ ८६ ॥

इत्थं नारीर्घटयितुमलङ्कामिभिः काममासन्
प्रालेयांशोः सपदि रुचयः शान्तमानान्तरायाः ।
आचार्यत्वं रतिषु विलसन्मन्मथश्रीविलासा
ह्रीप्रत्यूहप्रशमकुशलाः शीधवश्चक्रुरासाम् ॥८७॥
इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये
प्रदोषवर्णनन्नाम नवमः सर्गः ॥ ९ ॥

इत्थमिति । इत्थमनेन प्रकारेण । इदमस्थमुरिति थमु प्रत्ययः । सपदि शान्तः शमितो मानः कोपएवान्तरायो याभिस्ताः । वा दान्तशान्तेत्यादिना शमेर्ण्यन्तात् शान्तेति निपातः । प्रालेयांशोश्चन्द्रस्य रुचयो भासः कामिभिर्घटयितुम् । मितां ह्रस्वः पर्याप्तिवचनेष्वलमर्थेष्विति तुमुन् प्रत्ययः । कामं प्रकामं अलमर्थाः आसन् दूत्यइवेति भावः विलसन्तो मन्मथश्रीविलासाः कामचेष्टितविकारादिमदनातिरेकविकारा याभिस्ताः ह्रीरेव प्रत्यूहोविघ्नस्तस्य प्रशमे निरासे कुशलाः चतुराः शीधवः मधुविशेषा इक्षुविकारादिकोत्पन्नाः । आसां रतिषु आचार्यं समुपदेष्टृत्वं चक्रुः । कर्मकरत्वं स्वीकृतमिति भावः । अत्र प्रथमार्धे प्रस्तुतचन्द्रभासां नायिकानां कामिघटनव्यापारविशेषणसाम्यादप्रस्तुतदूतीव्यापारप्रतीतेः समासोक्तिः द्वितीयार्धे तु शीधूनामाचार्यत्वारोपात् रूपकमिति संकरः । तयोश्च परस्परनिरपेक्षत्वात् संसृष्टिः । मदोपदेशेनाचार्यः दूतीकर्मप्रदर्शनात् दूतीसंयोगे मधुपानतोष्णक्षुत्तापादपि प्रस्तावः । मन्दाक्रान्ता वृत्तम् । मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद्गुरू चेदिति लक्षणात् ॥८७॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघ
काव्यव्याख्याने सर्वङ्कषाख्ये नवमः सर्गः ॥ ९ ॥

दशमः सर्गः ।

सञ्जितानि सुरभीण्यथ यूना
मुल्लसन्नयनवारिरुहाणि ।
आययुः सुघटितानि सुरायाः
पात्रतां प्रियतमावदनानि ॥ १ ॥
सोपचारमुपशान्तविचारं
सानुतर्षमनुतर्षपदेन ।

आपाथ्यंस्य रतिं धीमयस्कुरित्युक्तं तदपत्रपायाश्चिनुसर्गे मधुपानमावहसुर्यति । सञ्जितानीति । अथ पानगोष्ठीप्रस्तावानन्तरं सञ्जितानि यावकघानवादिना संस्कृतानि सुरभीणि यथायोगं स्वभाव-सौकाराभ्यां सुगन्धीनि नयनानि पारिरुहाणीव यत्र तानि नयनानीव वारि-रुहाणि यासनार्थं विन्यस्तानि तान्युल्लसन्ति येषु तानि तथोक्तानि सुघटितानि सुष्ठु सुघटितानि शोभनसंस्थानवत्तया निर्मितानि वा प्रियतमावदनानि यूनां कामिनां सुरायाः पात्रतां पानभाजनतां ययुः प्रियामुखसम्पर्कजनित रसास्वादलोभात्तासां मुखसुरामेव पपुरिति भावः । अत्र वदनेष्वा-रोप्यमाणायाः पात्रतायास्तादात्म्येन तेषां पानसाधनतापादनेन हृतवदनो-पयोगात्परिणामालङ्कारः । आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणा-म इति लक्षणात् । तेन स्वेनयङ्गोऽस्वेनोपमा व्यज्यते । अस्मिन्सर्गे स्वागता वृत्तम् । स्वागतेति रनभागुरुयुग्मम् ॥ १ ॥

सोपचारमिति । अथ पानीकरणानन्तरं ते युवानः सोपचारं सप्राधेन उपशान्तविचारं निःशङ्कं विवादेति पाठे समय व्यवेति पुष्पज्ञि पारङ्गारमित्यनुप्राणुरमभङ्गश्च स्यात् । सानुतर्षं सतृष्णं यथा तथा अनुतर्षंत्यनेनेत्यनुतर्षो मद्यम् । कदाऽनुतर्षं न्तपाने पात्रे तथाभिधा-ने इत्युभयत्रापि शिवः । तस्य पदेन व्याजेन पूर्तं मुञ्जिमत स्वा स्वीयावधू

ते मुहूर्त्तमथ मूर्त्तमपीप्यन्
प्रेम मानमवधूय वधूः स्वाः॥ २॥
कान्तकान्तवदनप्रतिबिम्बे
भग्नबालसहकारसुगन्धौ।
स्वादुनि प्रणदितालिनि शीते
निर्ववार मधुनीन्द्रियवर्गः॥ ३॥
कापिशायनसुगन्धि विघूर्ण-
न्नुन्मदोऽधिशयितुं समशेत।

ते मुहूर्तं अथानन्तरं कोप मवधूयामीप्यन् पाययन्ति स्म। पिबतेर्णौ चङि लोपः पिबतेरीच्चाभ्यासस्येति धातोराकारलोपः ईकारोऽभ्यासस्य। च मादयोत्या दिना निगरणार्थत्वमिति परस्मैपदनिषेधेऽपि णिचश्चेत्यात्मने पदविकल्पात्पाक्षिकं परस्मैपदम्। गतिबुद्धीत्यादिना वधूरित्यपि कर्त्तुः कर्मत्वम्। अनुतर्षपदेनेयत्तुतर्षशब्देन मूर्त्तमिमत्त्वोक्तेर्बलात् व्यञ्जका-प्रयोगाच्च प्रतीयमाना सापह्नवोत्प्रेक्षा॥ २॥

कान्तेति। कान्तं सद्यूनं कान्तवदनप्रतिबिम्बं यस्मिंस्तस्मिन् निर्देशिकरत्वर्थः। भग्नाः छिन्नाः बालसहकाराः चूतविशेषपल्लवा यत्र-मधुनोरसाश्च सहकारोऽतिसौरभश्चूतमरः। तैः सुगन्धौ सुरभिणि माध्वयदत्यर्थः। सुगन्ध्यादिषु भाषितपुंस्कं पुंवत् गालवस्येति पुंवद्भावः। स्वादुनि मधुरे रसनाकर्षिणीत्यर्थः। प्रणदितालिनि गुञ्जन्मधुकरे श्रुति-सुखदत्यर्थः। शीते स्पर्शसुखे इत्यर्थः एवम्पञ्चविषयकमदौ मधुनि मद्ये इन्द्रियवर्गश्चक्षुरादिपञ्चकं निर्ववार निर्वृतमभूत्। अत्र रूपरसादि-दायीनां मधुविशेषण भावेन निर्दिश्टत्वात्पदार्थहेतुकं काव्यलिङ्गम्॥ ३॥

कापिशायनेति। उन्मद उद्भिन्नमदः अतएव विघूर्णन् भ्रमन् कश्चित् षट्पदः कापिशायनेन सुगन्धि सुरभि। कश्यं कस्य मुदा दद्यं

फुल्लदृष्टि वदनं प्रमदाना
मब्जचारु चषकञ्च षडङ्घ्रिः ॥ ४ ॥
बिम्बितं भृतपरिप्लुति जानन्
भाजने जलजमित्यवलायाः ।
घ्रातुमभि पतति भ्रमरः स्म
भ्रान्तिभाजि भवति क्व विवेकः ॥ ५ ॥
दत्तमिष्टतमया मधु पत्यु
र्वाढमाप पिवतोरसवत्ताम ।

धेयेव कापिशायनमिति वैजयन्ती । फुल्लदृष्टि विकसितनेत्रं प्रमदानां वनितानां वदनं अधिवासनार्थेन ब्जेन चारु चषकं पानपात्रञ्च । चषकोऽस्त्री पानपात्रमित्यमरः । अघ्रिदयितुमभिप्रायात् समचेत इदमन्ना- मोदमजरामि वेत्युभयसौभाग्य दोलायमानमानसः आसीदित्यर्थः । अत्र प्रकृतयोरेव वदनचषकयोः षट्पदाभिलाषसदृशैकधर्मयोगाद्दीपकस्य गम्यतायात्तुल्ययोगिताभेदः ॥ ४ ॥

बिम्बितमिति । भृता परिप्लुतिरार्द्रता यस्मिन् तस्मिन् । दरिद्र इत्- यामरेऽमरः । भाजने पानपात्रे बिम्बितं प्रतिबिम्बितम् । अबलाया अपि जलजमिति जानन् भ्राम्यता तथा भ्रान्त्वेत्यर्थः । भ्रमरः घ्रात पतति स्म । तथा हि भ्रान्तिभाजि भ्रमे विपरीतज्ञानस्य तद्वति विवेको- विचारः क्व भवति न क्वापीत्यर्थः । अत्र भ्रमरस्य भ्रान्तिवर्णनाद्भ्रा- न्तिमदलङ्कारः तत्समर्थकत्वात् शेषमूलाति यथोक्तत्वादितोऽर्थान्तरन्यास । तेन सङ्कराङ्गिभावेन सङ्करः ॥ ५ ॥

दत्तमिति । इष्टतमया दत्तं मधु मद्यं कर्म पिबतः पत्युः रसव- त्तां प्रेमवशीकरत्वाद्रतिस्वादुतामाप । अधिवासने मतुप् । बाढ भृश- मित्यर्थोक्ता कृता । यद्यपास्त्रेण निरङ्कितैरर्दैतनै सुगन्धं स्वपःस्थितिरप्र प्रकृति न भाव । पीतं पीतवर्णं श्वेतस्वाधीद् । अत्र पीता

यत्सुवर्णमुकुटांशुभिरासी-
च्चेतनाविरहितैरपि पीतम् ॥ ६ ॥
स्वादनेन सतनोरविचारा
दोहतः समचरिष्ट रसोऽत्र ।
अन्यमन्य इव यन्मधु यूनः
स्वादमिष्टमतनिष्ट तदेव ॥ ७ ॥
बिभ्रती मधुरतामतिमात्रं
रागिभिर्गुणमदेव पपाते ।

[illegible] ॥ ६ ॥

स्वादनेनेति । [illegible] ॥ ७ ॥

[illegible]

विभ्रममथ मधुमदः प्रमदाना
न्यातुलीनमुपसर्ग इवार्थम् ॥ १५ ॥

सावशेषपदमुक्तमुपेक्षा
स्रस्तमाल्यवसनाभरणेषु
गन्तुमुत्थितमकारणतः स्म
द्योतयन्ति मदविभ्रममासाम् ॥ १६ ॥

मद्यमन्दविगलत्त्रपमीष
च्चक्षुरुन्मिषितपक्ष्म दधत्या ।
वीक्षितः स शनकैर्नववध्वा
कामिनोमुखमधोमुखयैव ॥ १७ ॥

रक्तमदादानन्दानादावनुस्रेयम् । उपमालङ्कारः ॥ १५ ॥

सावशेषेति ॥ सावशेषाण्यर्द्धोक्तानि पदानि यस्मिन् तत् उक्तं कु-
क्तिरीक्ता स्रस्तेषु माल्यवसनाभरणेषु उपेक्षा अनादरः अकारणतोऽक-
स्मादेव गन्तुमुत्थितमुत्थानञ्च आसां स्त्रीणां मदविभ्रमं मदविकारं द्यो-
तयन्ति स्म । एतैरनुभावैरासां मदसञ्चारोऽभूदित्यर्थः । अत्रार्द्धोक्ता-
दीनां खले कपोतिकया मदद्योतने प्रस्तुतत्वात्परस्परो द्वितीयसमुच्चयः ।
खले कपोतन्यायेन बहूनां कार्यसाधने । कारणानां समुच्चयः स द्वितीयः
समुच्चय इति लक्षणात् ॥ १६ ॥

मद्येति । मद्येन मद्यपानेन मन्दमल्पं विगलन्ती त्रपा यस्य तत् ।
अत एवेषदुन्मिषितानि पक्ष्माणि लोमानि यस्य तच्चक्षुर्दधत्या नववध्वा
नवोढया कामिनः प्रियस्य मुखमधोमुखयैव नमितवदनयैव । लज्जावेश-
वत्त्वादिति विवक्षादनीकारः । शनकैरधोमुखयैव वीक्ष्यते स्म तिर्य-
ग्वीक्षितमित्यर्थः । अत्रादि (मदत्रपाभ्याम्) दर्शन वर्जनयोरिति वीक्षणा-
दित्यर्थोऽपि । समुच्चयोक्त्या संध्या समासाद्विवक्षया ॥ १७ ॥

या कथञ्चन सखीवचनेन
प्रागभिप्रियतमम्प्रजगल्भे ।
व्रीडजाड्यमभजन्मधुपा सा
स्वाम्मदात्प्रकृतिमेति हि सर्वः ॥ १८ ॥

छादितः कथमपि त्वपयाऽन्त-
र्यः प्रियम्प्रति चिराय रमण्याः ।
वारुणीमदविशङ्कमथावि-
श्चक्षुषोऽभवदसाविव रागः ॥ १९ ॥

आगतानगणितप्रतियाता

येति । या स्त्री कथञ्चन कथमपि सखीवचनेन सखीप्रेरणया प्रा-
क् प्रथमं न अनिर्दिष्टतमं प्रियतमसङ्गमम् । अभिमुख्ये ऽव्ययीभावः ।
प्रजगल्भे प्रगल्भते स्म । सा स्त्री मधु पिबतीति मधुपा । आतोऽनुपसर्गे
कः । व्रीडं लज्जां जाड्यमभजत् [illegible] धर्मं स्वभावमभजत्-
देवेत्यर्थः तथा हि सर्वो जनो मदाद्धेतोः स्वां स्वकीयां प्रकृतिमेति स्वभाव-
मवलम्बते स्वाभाविकधर्मप्रकाशनं मदधर्मः । सामान्येन विशेषसमर्थन-
रूपोऽर्थान्तरन्यासः ॥ १८ ॥

छादित इति । रमण्या यः प्रियम्प्रति रागो विषयाभिलाषः चि-
राय त्रपया व्रीडयाऽन्तश्छादितः संवृत अवारयदेव रागोऽयाविश्व-
कार वारुणीमदविशङ्कं मद्यमदेन निःशङ्कमभेदेनाविरभवदित्यर्थ
एवं किम् । अत्र रागमदरागयोरभेदाध्यवसायात् [illegible]
प्रतिभोत्प्रेक्षित [illegible] ओष्ठमितीरितः न
तत्र विनिवृत्तः [illegible] चक्षुषो रक्तवर्णत्वं
प्रादुर्भवति । आविर्भावोऽत्र रागस्य कल्पितत्वात् ॥ १९ ॥

आगतानिति । आगतान् [illegible] प्रति-

न्वल्लभानभिसिसारयिषूणाम् ।
प्रापि चेतसि स विप्रतिसारे
सुभ्रुवामवसरः सरकेण ॥ २० ॥
सा पुनस्तमभिसीसरमाग
स्कारिणम्मदविमोहितचित्ता ।
योषिदित्यभिललाष न हाला
न्दुस्त्यजः खलु सुखादपि मानः ॥ २१ ॥

वारुणीति । स्नातानुलिप्त इतिवत् पूर्वकाले समासः । त्वल्लभा-नभिसिसारयिषूणां सम्प्रति चन्द्रोदये स्वयमेवाभिसारयितुमभिसर्तु-मिच्छूनाम् । अभिसारयते स्वार्थण्यन्तात्सन्नन्तादुप्रत्ययः । सुभ्रुवां स्त्रीणां चेतसि विप्रतिसारे कथमस्माभिः कार्यमिति पश्चात्तापयु-क्ते सति । पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपीष्यते । सरकेण मधुना मधुपानेन वा । सरकं शीधुपाने शीधुपात्रे च शीधुनीति विश्वः । अवसरः प्रापि प्राप्तः स्वयङ्गमनसौकर्याय मधुपानं प्रवृत्त-मित्यर्थः । अभिसारणस्य पश्चात्तापकारणकस्य मदयोगात्सौकर्योक्तेः समा-ध्यलङ्कारः । समाधिः सुकरं कार्यं कारणान्तरयोगत इति काव्यप्र-काशे ॥ २० ॥

सा पुनरिति । मदेन विमोहितचित्ता भ्रमितचित्ता सती काचि-दिति शेषः । आगस्कारिणमपराधकृतम् । अत एव कर्मण्यादिना णि-निर्णीतस्य सत्त्वम् । तं पुनर्भूयो नाभिसीसरं नाभिसारयामि । सर्तेः णौ चङ्युपधाया ह्रस्वः दीर्घो लघोरित्यभ्यासस्य दीर्घः । इति हालाशोऽप्यर्थः । गमनमार्थत्वादप्रयोगः । अन्यथा पौनरुक्त्यमित्याल-ङ्कारिकाः । योषित्काचित् स्त्री हालां सुराम् । सुरा हलिप्रिया हालेत्यमरः । न लिलाष तथा हि सुखादपि मानो दुस्त्यजः खलु अतो-ऽयमर्थान्तरन्यासः ॥ २१ ॥

ह्रीविमोहमहरद्दयिताना-
मन्तिकं रतिसुखाय निनाय ।
सप्रसादमिव सेवितमासी-
त्सद्य एव फलदम्मधु तासाम् ॥ २२ ॥
दत्तमात्तमदनन्दयितेन
व्याप्तमातिशयिकेन रसेन ।

ह्रीति । सप्रसादं मनःप्रसादपूर्वं सेवितं श्रेयस्करमिति भावना-पूर्वकमित्यर्थः । अन्यथा फलोदय एव न स्यात् । 'देवतां भजते गुरुमिति' वचनादिति भावः । सेवितमुपभुक्तमिति हेतोर्मधु तासां सद्य एव फलद-मासीत् । कुतः ह्रीविमोहं व्रीडामौढ्यं अहरत् रतिसुखाय सुरतसुखाय दयितानामन्तिकं निनाय । अत्र ह्रीहरणान्तिकनयनवाक्यार्थयोः फलदा-नवाक्यार्थसमर्थनादनेकवाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ २२ ॥

दत्तमिति । आत्तमदनमाहितमदनं यथा तथा दयितेन दत्तं अनल्पयातिशयिकेनातिशयप्रचुरेण । विनयादित्वाट्ठक् । रसेन स्वादेन व्याप्तं स्वादुतरमित्यर्थः । सुरा हलिप्रिया सुरभिः गण्डूष मद्यम् । विनाया हेनाहुराच्छायायामासानिपानामिति नपुंसकत्वम् । प्रकष्टोमदो-यासां ताभ्यः प्रमदाभ्यः स्त्रीभ्यः । रुच्यर्थानां प्रीयमाण इति सम्प्रदान संज्ञा । मम्नदे ररुचे प्रीतिकरमभूदित्यर्थः । कर्त्तरि लिट् । अतएव उद्रेक तासां मदकरत्वाजीर्दिति ह । मामिति । रुद्धं प्रागल्भ्यकर्पादिवदम्य-त्यक्त नाम ॥ प्रमदेति नामधेयस्य व्युत्पादि व्युत्पन्नं जातम् । यथा प्रकृष्टमदयोगात् अनवरेत्वमनुवर्तनमन्वर्थं भवेत् तथा तासां नामाऽऽसीदित्यर्थः । पद्यतेरपलनात्कर्त्तरि लुङ् चिण् ते पद इति चिण्प्रत्यये चिणो लुक् । प्रमदाभिरिति पाठे मम्नदे स्वदयाञ्चक्रे इत्यर्थः । 'स्वादन-मयममग्रणमाहारोभोजनं स्वदनमिति हलायुधे । स्वदिरयं चौरेकार्थे-ऽत्र णिचभावात् कर्मणि लिट् । अत्र पूर्ववाक्यार्थेऽप्युत्तरवाक्यार्थहेतु-

सस्वदे मुखसुरभ्यमदाख्यो
नाम रूढमपि च व्युदपादि ॥ २३ ॥
लब्धसौरभगुणो मदिराणा
मङ्गनास्यचषकस्य च गन्धः ।
मोदितालिरितरेतरयोगा
दन्यतामभजतातिशयन्तु ॥ २४ ॥
मानभङ्गपटुना सुरतेच्छां
तन्वता प्रथयता हृदि रागम् ।
लेभिरे सपदि भावयतान्त
र्योषितः प्रणयिनेव मदेन ॥ २५ ॥
पानधौतनवयावकरागं
सभ्रुवो निभृतचुम्बनदक्षाः ।

...काव्यलिङ्गम् ॥२३॥

लब्धेति । लब्धसौरभगुणः लब्धामोदोऽत एव मोदि-
तालिः आनन्दितभृङ्गः मदिराणां मद्यानाम् अङ्गनास्यचषकस्य च
गन्धो गन्धगुणः इतरेतरस्य योगात् अन्योन्यसम्पर्कात् अतिशयम् उत्-
कर्षं वा आभजत । मद्यगन्धेनास्यगन्धः आस्यगन्धेन मद्यगन्धः
इत्थं संयुक्त इति भावः । अत एव समालङ्कारः ॥ २४ ॥

मानेति । मानभङ्गपटुना कोपशमनसमर्थेन सुरतेच्छां तन्वता मद-
नोद्दीपकत्वेन हृदि रागमनुरागमाविष्कुर्वता प्रथयता प्रकाशयता ध्वनयता. अत एव
भावयता रञ्जयता मदेन प्रणयिनेव योषितः स्त्रियो लेभिरे प्राप्ताः । ए-
नभिर्लेभे ... स्मृत्यतिशयोक्तिसङ्कीर्णोपमा ॥ २५ ॥

पानेति । ... व्याख्याः इति ... ।

प्रेयसामधररागरसेन,
स्वङ्कितापरमुपालि ररञ्जुः ॥ २६ ॥
अर्पितं रसितवत्यपि नाम
ग्राहमन्ययुवतेर्दयितेन ।
उज्झति स्म मदमप्यपिबन्ती
वीक्ष्य मद्यमितरा तु ममाद ॥ २७ ॥
अन्ययान्यवनितागतचित्त
चित्तनाथमभिशङ्कितवत्या ।

सखी वयस्या चेत्यमरः । अतएव निभृतचुम्बनदक्षाः गूढचुम्बनचतुराः सुभ्रुवः पानधौतनयावकरागं मधुपानक्षालितलाक्षारागं स्वमधरं प्रेयसामधरेषु यो रागस्तत्ताम्बूलरागद्रवस्तेन ररञ्जुः किल । अन्ययुवत्यन्यत्वाधानमिह रञ्जेरर्थः । किलेत्यपरमार्थे तेन पानधौतरागेषु स्वाधरेषु प्रेयोऽधररागसङ्क्रमणं नाटितकेन सखीसमक्षमेव प्रियाचुम्बनद्वारमाहुरित्यर्थः । अत्रागन्तुना रञ्जनेन सहजचुम्बननिगूहनात्मीलनालङ्कारभेदः । मीलनं वस्तुना यत्र वस्त्वन्तरनिगूहनमिति लक्षणात् ॥ २६ ॥

अर्पितमिति दयितेनान्ययुवतेः सपत्न्याः नामग्राहं नाम गृहीत्वा नाम्न्यादिशिग्रहोरिति णमुल् प्रत्ययः । अर्पितन्दत्तं मद्यं रसितवती आस्वादितवत्यपि । रसतेरास्वादनार्थात् क्तवतु उगितश्चेति ङीप् । काचिदिति शेषः । मदमुज्झति स्म न ममादेत्यर्थः । इतरा तु सपत्नी तु मद्यमपिबन्त्यपि वीक्ष्य दृष्ट्वैव ममाद मत्ता । सपत्नी नेर्ष्यैव मदहेतुरिति भावः । अत्र पूर्वार्द्धे रसितवत्यपि न ममादेति विशेषोक्तिः उत्तरार्द्धे त्वपिबन्त्यपि ममादेति विभावना । कारणेन विना कार्यस्योत्पत्तिस्तु विभावना । तत्सामग्र्यामनुत्पत्तिर्विशेषोक्तिर्निगद्यते । तयोः सङ्करः ॥ २७ ॥

अन्ययेति । चित्तनाथम्भर्त्तारमन्यवनितागतचित्तं सपत्नीसङ्क्रान्त-

पीतभूरिसुरयापि न मेदे
निर्वृतिर्हि मनसो मदहेतुः ॥ २८ ॥

कोपवत्यनुनयानगृहीत्वा
प्रागथो मधुमदाहितमोहा ।
कोपितं विरहखेदितचित्ता
कान्तमेव कलयन्त्यनुनिन्ये ॥ २९ ॥

कुर्वता मुकुलिताक्षियुगाना
मङ्गसादमवसादितवाचाम् ।
ईर्ष्ययेव हरता ह्रियमासां
तद्गुणः स्वयमकारि मदेन ॥ ३० ॥

[illegible] पीत
भूरिसुरयापि न मेदे न मत्तम् । भावे लिट् । तथा हि मनसो
निर्वृतिर्निर्मदहेतुर्हि । सामान्येन विशेषसमर्थनादर्थान्तरन्यासः । यथा न
[illegible] । अन्यथा [illegible] ॥ २८ ॥

कोपवतीति । प्राक् प्रथमं कोपवती सरोषा अत एवानुनयान् प्रि
यप्रार्थनाव्यगृहीत्वा अनादृत्य । अथो [illegible] विरहखेदितचित्ता [illegible]
[illegible] मधुमदेनाहितमोहा [illegible] कान्तम्
कोपितमात्मना रोषितं कलयन्ती जानती अनुनिन्ये । [illegible]
[illegible] ॥ २९ ॥

कुर्वतेति । मुकुलिताक्षियुगानां अवसादितवाचां [illegible]
[illegible] कुर्वता [illegible] हरता [illegible]
[illegible] । तथा [illegible]
[illegible] स्वयमकारि [illegible] ॥ ३० ॥

गण्डभित्तिषु पुरा सदृशीषु
व्याञ्जि नाञ्चितदृशाम्प्रतिमेन्दुः ।
पानपाटलितकान्तिषु पश्चा
ल्लोध्रचूर्णतिलकाकृतिरासीत् ॥ ३१ ॥
उद्धतैरिव परस्परसङ्गा
दीरितान्युभयतः कुचकुम्भैः ।
योषितामतिमदेन जुघूर्णु
र्विभ्रमातिशयपुंषि वपूंषि ॥ ३२ ॥

गण्डेति । प्रतिमेन्दुः प्रतिबिम्बचन्द्रः सदृशीषु स्वच्छत्वात्तुल्यासु च स्थितया सदृशा गण्डभित्तिषु पुरा सुरापानात्पूर्वं न व्याञ्जि नाभिव्यक्तः तदेकतापत्त्या तद्विविक्ततया न गृहीत इत्यर्थः । अत एव सामान्यालङ्कारः 'सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकता' इति लक्षणात् । 'चिण्भावकर्मणोः' इति कर्मणि लुङ् । 'आडजादीनाम्' इत्याडागमः । पश्चात्पानानन्तरम् पानेन पानमदेन पाटलिता पाटलीकृता कान्तिर्यासां तासु गण्डभित्तिषु लोध्रचूर्णस्य लोध्रपरागस्य तिलकविशेषम् । 'तमालपत्रतिलकचित्रकाणि विशेषका द्वितीयञ्च तुरीयञ्च न स्त्रियाम्' इत्यमरः । तस्याकृतिरिवाकृतिर्यस्य स आसीत् । वैवर्ण्याद्विविक्त एवासीदित्यर्थः । तिलकाकृतिरिति निदर्शना पूर्वोक्तसामान्यसंसृष्टा ॥ ३१ ॥

उद्धतैरिति । उद्धतैः दृप्तैरिव कुचकुम्भैः परस्परसङ्गादन्योऽन्यसम्पर्कादुभयत ईरितान्याकृष्टानि तथा विभ्रमातिशयं विलासविशेषं पुष्णन्ति तानि । 'नपुंसकस्य झलचः' इति नुमागमः । योषितां वपूंषि । पूर्ववन्नुमागमः 'सान्तमहतः संयोगस्य' इति दीर्घः । अतिमदेन जुघूर्णुः चेलुः । इभकुम्भकाउत्पीडाकर· यथा इभकुम्भद्वयाद् व्यपादभङ्ग इति भावः

आहृता वपुरभूषयदासा
न्तामनूनमवयौवनयोगः ।
तम्पुनर्मकरकेतनलक्ष्मी
स्तां मदो दयितसङ्गमभूषः ॥ ३३ ॥
व्रीडितामुपगतास्तनुवेषं
तासु रोषपरितोषवतीषु ।
अग्रहीत् सशरन्धनुरज्ञा

आहृतेति । आसां स्त्रीणां वपुः आहृता सौन्दर्यमभूषयत् । तामाहृ-
तामनूनमवयौवनयोगः सम्पूर्णयौवनसम्बन्धोऽभूषयत् । तं पुनर्वयो-
दयोगन्तु मकरकेतनलक्ष्मीर्मदनसम्पत्तिरभूषयत् । तां मकरकेतनलक्ष्मी-
र्दयितसङ्गम एव भूषा यस्य स मदोऽभूषयत् । तं मदं तत्र दयितस-
ङ्गम एवार्थः प्रकर्षात् उत्तरोत्तरं मदनमपि बहुमनुते इति प्रयोक्तृषु नि-
र्मेयत्वेन प्रयोक्तौ मण्डनत्वेनाभासत इत्यर्थः । यथा भारवेः प्रयोगः इति
तृतीयादौ लोके च नयात्. स च [illegible] इति पञ्चमे [illegible]
[illegible] भूषण इति । अन्योन्यरोपरस पूर्वपूर्वविशेषणत्वादेकावली ।
अन्योन्यरोपरोपेण स्यात् पूर्वपूर्वस्याति क्रमात् । विशेषणत्वमनयमाने-
तो यतेति लक्षणात् ॥ ३३ ॥

व्रीडितामिति । व्रीडितां लज्जिताम् । अत्र भीतलोलुपयोः स्त्रीष-
दः । वीरं मदे स्वभावशालीरनुपमनीत् । मूढायीरसलीवता इति
[illegible] विरतित । उपगतास्तु अनुरागानुवेषमस्तितमं रोषपरितो-
षेषु तासु स्त्रीषु विषये कन्दर्पः सशरमनुरागवद्भिः सविलासविभ्रम-
तर्षि यदा तथा उपकारक तु [illegible] विषु । [illegible] दधा-
तु [illegible] । [illegible] सपुष्पे तथा परितुष्टासु चा-
[illegible] । [illegible] रोषात्मकं परितोषात्मकं
च न [illegible] भावः । रोषपरितोषयोर्हृदयं [illegible]

मास नोज्झितनिषङ्गमनङ्गः ॥ ३४ ॥

शङ्कयाऽन्ययुवतौ वनिताभिः
प्रत्यभेदि दयितः स्फुटमेव ।
न क्षमम्भवति तत्त्वविचारे
त्सरेण हतसंवृति चेतः ॥ ३५ ॥

आननैर्विचकसे हृषिताभि
र्वल्लभानभि तनूभिरभावि ।
आर्द्रतां हृदयमाप च रोषो
लोलति स्म वचनेषु वधूनाम् ॥ ३६ ॥

मद्वैरुपगम्यवाधयामङ्गानङ्गात्मेदः तेनोक्तं दयोदाहृभावेन ॥
॥ ३४ ॥

शङ्कयेति । वनिताभिरन्ययुवतौ सपत्न्यां शङ्कया [illegible] दयितः स्फुटमेव निश्चितवदेव प्रत्यभेदि निर्भर्त्सितः सोऽपराधित [illegible] नोऽयमविमृश्य मिथ्याभियोग इति शङ्कां परिहरति । नेति । मत्सरे [illegible] हता संवृतिर्गोपनं यस्य तच्चेतस्तत्त्वविचारे भूतार्थचिन्तायां क्षमं शक्तं न भवति मत्सरपरवशेष्वमेव स्वभाव इति भावः । [illegible] न्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ३५ ॥

आननैरिति । वल्लभानभि वल्लभसमक्षमित्यर्थः । [illegible] [illegible] [illegible] विकसितानि । वधूनामाननैर्विचकसे विकसितम् भावे लिट् । तनूभिर्हृषिताभिः पुलकिताभिः । [illegible] नम्रः । अभावि भूतम् । भावे लुङ् । हृदयमार्द्रतामाप कठिनत्वं [illegible] । वचनेषु रोषो लोलति स्म वर्तते स्म [illegible] [illegible] विकारादनेकक्रियायोगपद्यादकाङ्क्षं [illegible] । तुल्यक्रियायोगपद्यं समुच्चय इति लक्षणात् ॥ ३६ ॥

रूपमप्रतिविधानमनोज्ञं
प्रेम कार्यमनपेक्ष्य विकाशि ।
चाटु चाकृतकसंभ्रममासां
कार्मणत्वमगमन्रमणेषु ॥ ३७ ॥
लीलयैव सुतनोस्तुलयित्वा
गौरवाश्रयमपि लाघविकेन ।
मानवञ्चनविदा वदनेन

रूपमिति । अप्रतिविधानमप्रतियत्नमेव मनोज्ञं स्वभावसुन्दरमि-त्यर्थः । प्रेम प्रीतिः कार्यं प्रयोजनमनपेक्ष्य विकाशि वर्द्धमानं अनौपा-धिकमित्यर्थः । प्रेम अकृतकसंभ्रममकृत्रिमसंरम्भं चाटु प्रियवचनञ्चासां स्त्रीणां रमणेषु प्रियेषु कार्मणत्वं वशीकरणकर्मत्वम् । मन्त्रादिना संवदनं मूलकर्म तु कार्मणमित्यमरः । तद्युक्तात्कर्मणोऽण् । अगमन् प्रापन् । गमेर्लुङि च्लेरङादेशः । अत्र रूपादिष्वारोप्यमाणस्य कार्मणत्वस्य प्रकृतोपयोगात्परिणामालङ्कारः ॥ ३७ ॥

लीलयेति । लाघवमस्ति विशेषोऽस्यास्तीति लाघविकं लाघव्य-त् । अत इनठनाविति ठन्प्रत्यये ठस्येकः यस्येति चेत्यल्लोपे हलस-स्तद्धितस्येति यकारलोपः । अन्यत्र तु लघु गण्यमस्यास्तीति लाघवि-को लाघवप्रकारी । मत्वर्थाट्ठञ् प्रत्ययः । तेन लाघविकेन मानवञ्च-नविदा अहङ्कारहरणदक्षेण । अन्यत्र परिमाणप्रतारणपटुना । सु-तनोः स्त्रियाः वदनेन कर्त्रा गौरवाश्रयं गाम्भीर्यसम्पन्नमपि । अन्यत्र गुरुकमपि दयितस्य हृदयं लीलया विलासेनैव तुलयित्वा । आरो-पणात्मकेनैव उन्नाय गुरुरपि लघुतामानीतः सद्यः । क्रीतं वशीकृतमेव दासीकृतमेव । अत्र विशेषणमहिम्ना वदने वाणिजकत्व-स्य च प्रतीतेः समासोक्तिरलङ्कारः । हृदयमप्रतीयमा-

क्रीतमेव हृदयन्दयितस्य ॥ ३८ ॥
स्पर्शभाजि विशदच्छविचारा
कल्पिते मृगदृशां सुरताय।
सद्गतिन्दधति पीतुरजस्रं
दृष्टयः प्रियतमे शयने च ॥ ३९ ॥
यूनि रागतरलैरपि तिर्य्यक्
पातिभिः श्रुतिगुणेन युतस्य।

मदनाभेदेन क्रीतलोके रचीकिकहृदयामर्क्वने कौशिकवचन-॥ र-ना
रोप ॥ ३८ ॥

द्वे मदनमदं वर्णयित्वा सम्प्रति सुरतकेलिवर्णनं प्रकरोति।
तत्र सुरतं द्विविधं बाह्यमाभ्यन्तरञ्चेति। बाह्यं च प्रेक्षणभाषणा-
लिङ्गनचुम्बनादिनेकभेदभिन्नम्। तत्र दृष्टिविषयमादावाह। स्पर्शेति।
स्पर्शभाजि शुभस्पर्शं विशदा निर्मला शुभ्रा च या छविः कान्तिस्तया
चारी रम्ये सुरताय कल्पिते रतिसुखदानाय सृष्टे विहार योग्यतया
सज्जीकृते च स्वविषयानुकूल्य यात्रि साम्यञ्च दधति दधाने प्रियतमे
शयने च मृगदृशां दृष्टयः जगर्भसिद्धस्य पेत पतिता मुगन्धुमदानो-
कनादिनेवाथ यद्गमनमाहुरित्यर्थः। अत्र प्रियतमशयनयोः प्रकृतयो-
रेव धर्मसाम्यादीपकमलंकारोऽत्र द्वयोरपि ॥ ३९ ॥

यूनीति। रागेण तरलैश्चपलैरपि दर्शनेच्छुकैरपीत्यर्थः। यूनि
तिर्य्यक्पातिभिः वक्रमपाङ्गकटाक्षा दीर्घदर्शिनिरायतानि
चाथोक्तमाधारमर्थेरित्यर्थः। ... तिर्य्यक्
पातिभिः कुटिलपातिभिरपि दीर्घनेत्रैरागामिभिः कर्णान्तविश्रान्तैः
मनसि श्रुतिगुणेन शब्दगुणप्रमाणेनैव युतस्य। श्रुतिर्नेत्रेति शब्द या
तस्य तत्पुरुषविशेषो नासादिना यतः। अर्थान्तरं विन्यस्यति तु
र्इति भाष्यं ... ब्रवीति मात्रम्। तं गुणगुणेन युतस्य श्रुतम् इति

रूपमप्रतिविधानमनोज्ञं
प्रेम कार्यमनपेक्ष्य विकासि
चाटु चाकृतकसंभ्रममासां
कार्मणत्वमगमन्रमणेषु ॥ १३

लीलयैव सुतनोस्तुलयित्वा
गौरवाढ्यमपि लाघविकेन।
मानवञ्चनविदा वदनेन

रूपमिति। अप्रतिविधानमप्रतिसमाधानमेव मनोज्ञं रूपमाकारः सुन्दरमि-
त्यर्थः। रूपमाकृतिः कार्यमभीष्टजनमनपेक्ष्य विकासि वर्द्धमानं अनौपा-
धिकमित्यर्थः। प्रेम अकृतकसंभ्रममकृत्रिमसंभ्रमं चाटु प्रियवचनञ्चासां
स्त्रीणां रमणेषु प्रियेषु कार्मणत्वं वशीकरणकर्मत्वम्। मूलक्रिया संवदनं
मूलकर्म तु कार्मणमित्यमरः। तद्युक्तात्कर्मणोऽण्। अगमन् प्रापुः।
इरितो वा इति च्लेरङादेशः। अत्र रूपादिष्वारोप्यमाणस्य कार्मणस्य प्रक-
तोपयोगात्परिणामालङ्कारः॥ १३॥

लीलयेति। लाघवस्य निमित्तं लाघविकं लाघवि-
कम्। अत इनिठनाविति ठन्प्रत्यये ठस्येकः यस्येति चेति लोपे लाघव-
स्येति वकारलोपः। लाघवं तु लघुत्वं प्रायशस्त्रीति लाघवि-
कमपकर्षकारि। तस्मात् ठञ् प्रत्ययः। तेन लाघविकेन मानवञ्च-
नविदा अहङ्कारहरणदक्षेण। अन्यत्र परिमाणपरिच्छेद वदनेन। सु-
तनोः स्त्रियाः वदनेन कर्त्रा गौरवाढ्यं गाम्भीर्यसम्पन्नमपि। अन्यत्र
गुरुत्वयुक्तमपि दयितस्य हृदयं लीलया विलासेनैव तुलयित्वा। अत्र
मानावमानेन उन्नमय्य गुर्वपि लघुतया नीतमर्थः। ह्रीतं ह्रीणमेव
हृतं दानेनाङ्गीकृतमेव। अत्र विशेषणविशेष्ये वदने लाघविकत्वा-
वे प्रत्ययस्य च प्रतीतेः समासोक्तिरलङ्कारः। हृदयस्य प्रतीयमा-

शीतमेव हृदयन्दयितस्य ॥ ३८ ॥
स्वर्णभाजि विशदच्छविचारा
कल्पिते मृगदृशां सुरताय ।
सङ्गतिन्दधति पेतुरजस्रं
दृष्टयः प्रियतमे शयने च ॥ ३९ ॥
यूनि रागतरलैरपि तिर्य्यक्
पातिभिः श्रुतिगुणेन युतस्य ।

मनःप्रसादेन शीतलोऽभूत् इत्यौचित्यहृदयावर्जने कौशिकमन्यद् [illegible] रूपा-रोप ॥ ३८ ॥

एवं महानुभवं वर्णयित्वा सम्प्रति सुरतकेलिवर्णनं प्रस्तौति । तत्र सुरतं द्विविधं बाह्यमाभ्यन्तरञ्चेति । बाह्यं च प्रेक्षणभाषणालि-ङ्गनचुम्बनाद्यनेकभेदभिन्नम् । तत्र दृष्टिविशेषमाह । स्वर्णेति । स्वर्णभाजि सुवर्णमये विशदा विमला शुभ्रा च या छविः कान्तिस्तया चारौ रम्ये सुरताय कल्पिते रतिसुखदानाय क्लृप्ते विहार योग्यतया कल्पिते च सर्वतिमानुकूल्य [illegible] सङ्गतिं दधति दधाने प्रियतमे शयने च मृगदृशां दृष्टयोऽजस्रमविच्छिन्नं पेतुः पतिताः युगपदुभयादर्शो-कनादर्शनार्थं व्यङ्ग्यमाह [illegible] । अत्र प्रियतमशयनयोः प्रकृतयो-रेव धर्मसाम्यादौपम्यप्रतीति केवलप्रकृतगोचरा तुल्ययोगिता ॥ ३९ ॥

यूनीति । रागेण तरलैश्चपलैरपि दर्शनोत्सुकैरपीत्यर्थः । यूनि [illegible] तिर्यक्पातिभिश्चपया [illegible] दीर्घदर्शिभिरायतान्तैः आलोकनव्यापारपरैरित्यर्थः । [illegible] रागद्वेषचपलैः अतएव तिर्यक् पातिभिः कुटिलप्रान्तिभिरपि दीर्घदर्शिभिरागतैरपि [illegible] श्रुतिगुणेन मन्दपदत्वपाटवेन युतस्य । [illegible] नलस्य [illegible] नाकारि न चक्रे । [illegible] [illegible] मरणं प्रभाव इति यावत् । [illegible] युतस्य [illegible]

दीर्घदर्शिभिरकारि वधूनां
लङ्घनं न नयनैः श्रवणस्य ॥ ४० ॥
सङ्कुचेच्छुरभिधातुमनीशा
सम्मुखी न च बभूव दिदृक्षुः ।
स्पर्शनेन दयितस्य नतभ्रू
रङ्गसङ्गचपलापि चकम्पे ॥ ४१ ॥
उत्तरीयविनयात्त्रपमाणा
रुन्धती किल तदाश्रयमार्गम् ।
आचरिष्ट विकटेन विवोढु

अर्थं श्रोतुं तत्र चक्षुः नाकारि रागान्धपल्लवोऽपि श्रावणं करोति श्रावयति क्रमाद्विभेतीति भावः । वधूनां श्रवणान्तोपगमेषु रागान्ध-
दर्शित्वादि [illegible] इति समासोक्तिभेद [illegible]

वंचसैव कुचमण्डलमन्या ॥ ४२ ॥
अंशुकं हृतवता तनुबाहु
स्वस्तिकापिहितमुग्धकुचाग्रा ।
भिन्नशङ्खवलयम्परिवेत्रा
पर्यरम्भि रभसादचिरोढा ॥ ४३ ॥
सञ्जहार सहसा परिरब्ध
प्रेयसीषु विरहय्य विरोधम् ।
संहितं रतिपतिः स्मितभिन्न
क्रोधमाशु तरुणेषु महेषुम् ॥ ४४ ॥

वेमाविद्धनेत्रादिगूहनान्दोलनभेदः यथा लज्जावशव मध्यमा मध्यमा ॥ ४२ ॥

अंशुकमिति । अंशुकमुत्तरीयं हृतवता परिवेत्रा भर्त्रा तन्वोः कृशयोः बाह्वोः स्वस्तिकोबन्धविशेषः तेनापिहिते व्याच्छादिते मुग्धे सुन्दरे कुचाग्रे यस्याः सा तथोक्ता । अचिरोढा नवोढा भिन्नानि शङ्खस्य वलयानि यस्मिन् कर्मणि तद्यथा तथा रभसाद्वेगात्पर्यरम्भि गाढमालिङ्गितेत्यर्थः । रभेरवर्णान्तात्कर्मणि लुङ् । रभेरशब्लिटोरिति नुमागमः । अत्र तिरोहितद्वाभा ॥ ४३ ॥

सञ्जहारेति । तरुणेषु युवसु विरोधं प्रणयकलहं विरहय्य विहाय । रतिपतेः सार्वधात्वात् का तस्य स्यप् स्वदपि लघुपूर्वादित्ययादेशः । सहसा परिरब्धाः प्रेयसीर्येषु परिरब्धप्रेयसीषु व्यालिङ्गितवधूकेषु सत्सु । ईयसश्चेति कपोऽभावः ईयसोबहुव्रीहौ प्रतिषेधो वक्तव्य इत्युपसर्जनस्य ह्रस्वनिषेधः । रतिपतिः कामः संहितमारोपितं महेषुं महान्तं शरं स्मितभिन्नक्रोधं स्वसन्ततापत्वात् स्मितेनोद्भिन्नदूरोषं च यथा तथा आशु सञ्जहार । स्त्रियो ऽपि कामनामकामादिभिर्यैः परिरम्भन्ति यूनां विरहरति मानः ॥ ४४ ॥

स्रंसमानमुपयन्तरि वध्वाः
श्लिष्टवत्युपसपत्नि रसेन ।
आत्मनैव रुरुधे कृतिनेव
स्वेदसङ्गि वसनञ्जघनेन ॥ ४५ ॥
पीडिते पुर उरः प्रतिपेषं
भर्तरि स्तनयुगेन युवत्याः ।
स्पष्टमेव दलतः प्रतिनार्या
स्तन्मयत्वमभवद्धृदयस्य ॥ ४६ ॥
दीपितस्मरमुरस्युपपीडं
वल्लभे घनमभिष्वजमाने ।

स्रंसमानमिति । उपयन्तरि भर्तरि रसेन रागात्सदयेत्यर्थः । उपसपत्नि सपत्नीसमीपे । समीपार्थेऽव्ययीभावे नपुंसकह्रस्वत्वम् । श्लिष्यति आलिङ्गति सति स्रंसमानं सर्वाङ्गस्य पारवश्यात् भ्रश्यमानं तथापि स्वेदसङ्गि स्वेदेन सात्त्विकेन सङ्गं बध्नात् वसनं कृतिना कुशलेन ससेद हासमिति ज्ञानतेवेत्यर्थः । जघनेन कर्त्रा धात्वर्थेन स्वयमेव रुरुधे रुद्धम् । सा तु न वेत्तीति भावः स्वेदहेतुकस्य वसनरोधस्य ज्ञानपूर्वकत्वमुत्प्रेक्ष्यते ॥ ४५ ॥

पीडित इति । युवत्याः युवतेः स्तनयुगेन भर्तरि प्रतिनार्याः पुरो ऽग्रे समक्षमेव उरः प्रतिपिष्य । उर प्रतिपेषम् । परि क्लिश्यमाने चेति णमुल् कर्मोपपद इत्यव्ययसंज्ञा । वक्षः प्रतिपीड्येत्यर्थः; पीडिते सति दलत ईर्ष्यया दीर्यमाणस्य प्रतिनार्याः सपत्न्याः हृदयस्य तन्मयत्व भर्तृतादात्म्यं स्पष्टमभवदेव । अन्यथा कथमन्यपीडनादन्यदलनमिति भावः । अतएवेयमसङ्गत्यलङ्कारोपजीविनी तन्मयत्वोत्प्रेक्षेति सङ्कर का-

वक्रताम्न ययतुः कुचकुम्भौ
सुभ्रु वः कठिनतातिशयेन ॥ ४७ ॥
सम्प्रवेष्टुमिव योषित ईषुः
श्लिष्यतां हृदयमिष्टतमानाम्।
आत्मनः सततमेव तदन्त
र्वर्त्तिनो न खलु नूनमजानन् ॥ ४८ ॥
स्नेहनिर्भरमधत्त वधूना
मार्द्रतां वपुरसंशयमन्तः।

दीपितेति। वल्लभे दीपितस्मरं उद्दीपितकामं यथा तथा उरस्सु
मपीडम्। उरस्सुपपीड सप्तम्यां चोपपीडरुधकर्ष इति णमुल्। तत्-
पुरुषे सति वहुलमिल्लुक्। घनगाढमभिष्वजमाने परिरम्भमाणे सति
परिरम्भः परिष्वङ्गः संश्लेष उपगूहनमित्यमरः। सुभ्रुवः कुचकुम्भौ
कठिनतातिशयेन वक्रतामपि मनागपि नतां न ययतुर्न प्राप्तौ। अत्र गाढा-
लिङ्गनात् कुचकुम्भयोर्वक्रत्वसम्बन्धेऽप्यसम्बन्धोक्तेरतिशयोक्तिरलङ्कारः ॥ ४७

सम्प्रवेष्टुमिति। योषितः श्लिष्यतामालिङ्गतामिष्टतमानां हृदय
संप्रवेष्टुमीषुरिच्छन्ति स्मेव इति गाढालिङ्गननिमित्ता क्रियास्वरूपोत्प्रेक्षेव
गुणस्वरूपोत्प्रेक्षा वा विवक्षाभेदात्। अत एवात्मनः स्वात् सततमेव तद-
न्तर्वर्त्तिनस्तेषामिष्टतमानां अन्तर्हृदयेष्वेव स्थितावाजानन्नूनं अन्यथा
कथं पुनः प्रवेशेच्छेति भावः इयमज्ञानोत्प्रेक्षा पूर्वोत्प्रेक्षा सापेक्षेति स-
जातीयसङ्करः ॥ ४७ ॥

स्नेहेति। स्नेहनिर्भरमेमरसपूर्णं तैलादिद्रवद्रव्यपूर्णञ्च। स्नेहो
ऽस्त्री द्रवहार्दयोरिति वैजयन्ती। अत एव वधूनां वपुरन्तरार्द्रतान्तर्द्रवत्वम-
धत्त स्नेहद्रव्यसम्पूर्णमन्तरार्द्रम्भवतीति भावः। असंशयं संशयस्याभावः
अर्थाभावेऽव्ययीभावः। कुतोऽयदाभावन्नि पुंसि गाढम्परिरभत इति

यूनि गाढपरिरम्भिणि वस्त्र
क्नोपमम्बु ववृषे यत्नेन ॥ ४९ ॥
न स्म माति वपुषः प्रमदाना
मन्तरिष्टतमसङ्गमजन्मा ।
यद्बहुर्बहिरवाप्य विकाशं
व्यानशे तनुरुहाण्यपि हर्षः ॥ ५० ॥
यत् प्रियव्यतिकराद्वनिताना
मङ्गजेन पुलकेन बभूवे ।

परिरम्भिणि गाढालिङ्गिनि यूनि सति अनेन वपुषा कर्त्री वस्त्रं क्नोपयित्वा परिषिच्य वस्त्रक्नोपम् । क्नूयधातोर्ण्यन्ताद्र्त्ति क्नीयादिना पुगागमे चेले क्नोपेरिति णमुल् । अम्बु, ववृषे । वृषेः कर्मणि लिट् । अन्तरार्द्रस्य निर्मोचनाद्बहिरम्बु सात्त्विकभावात् तन्निमित्तो यमन्तरार्द्रत्वोत्प्रेक्षा वा प्रियाङ्गस-ङ्गात्ताः स्विन्ना इति सात्त्विकोदयोक्तिः ॥ ४९ ॥

न स्मेति । प्रमदानामिष्टतमसङ्गमेन जन्म यस्य सः । जन्माद्युत्तर-पदत्वाद्व्यधिकरणबहुव्रीहिरिति वामनः । बहुर्विपुलः । विपुलानेकयो-र्बहुरिति वैजयन्ती । हर्षो वपुषोऽन्तर्न माति स्म अत्युद्रेकान्नालं स-मित इत्युत्प्रेक्षा । कुतः यद्यस्माद्बहिर्वपुषो बहिर्विकाशं वृद्धिमवाप्य तनुरुहाण्यपि रोमाण्यपि आनशे व्याप । कर्तरि लिट् । अश्नोतेश्चेति नुडागमः । अत्र बहिर्विकाशस्य निमित्तान्तरसमासोत्प्रेक्षा वा आनन्द-रोमाञ्चयोः स्नेहमूलाभेदाध्यवसायातिशयोक्त्यनुप्राणितेति सङ्करः ॥ ५० ॥

यदिति । वनितानां स्त्रीणां प्रियस्य भर्तुर्व्यतिकरात्सम्पर्कादङ्गमा-ङ्गलेनाङ्गव्यापिना पुलकेन च पुलकेन बभूवे भूतमिति यत् । भावे लिट् । तेन पुलकोदयेन स्वेदोदयेन च नयसमुच्छ्रिताभिरुच्छ्रिताभिर्नीवा-ग्रैः प्रार्थिताभिव नीविभिः सत्वरया कटितटे घम्यया सम्भ्रमाद्देन

प्रापि तेन भृशमुच्छ्वसिताभि-
र्नीविभिः सपदि बन्धनमोक्षः ॥ ५१ ॥
ह्रीभरादवनतम्परिरम्भे
रागवानवटुजेष्ववकृष्य ।
अर्पितोष्ठदलमाननपद्मं
योषितोमुकुलिताक्षमधासीत् ॥ ५२ ॥
पल्लवोपमितिसाम्यसपक्षं
दष्टवत्यधरबिम्बमभीष्टे ।

पौनरुक्त्यात् । सपदि बन्धनमोक्षो ग्रन्थिभेदो निगडमोचनं च प्रापि प्राप्तः कर्मणि लुङ् । अभ्युदयेषु राजानो बद्धान् मोचयन्तीति भावः । अत्र प्रकृतपुलकनीविगतादृष्टत्वोच्छ्वसितत्वादिविशेषणसाम्याद्बन्धनमोचनसम्बन्धाच्च अप्रकृतपुलकारागतिप्रतीतेः समासोक्तिरलङ्कारः ॥५१॥

अथ चुम्बनक्रीडां वर्णयति । ह्रीति । परिरम्भे आलिङ्गने ह्रीभरात् लज्जाभारादवनतं भाराक्रान्तं नमतीति भावः । अर्पितं स्वमुखे निहितमोष्ठ एव दलं पत्रं यस्य तद्योषित आननमेव पद्मं रागवान् रागी अवटुजेषु घाटाशिरोरुहेषु अवटुर्घाटा कृकाटिकेत्यमरः । अवकृष्य अवटुजाकर्षणेनोन्नमय्येत्यर्थः । मुकुलिताक्षं निमीलितनेत्रं यथा तथा । बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षजिति षच् प्रत्ययः । अधासीत् पपौ । धेटो लुङ् आदेच इत्यात्वं अस्तिसिचोऽपृक्ते इतीडागमः । अत्राननोष्ठयोः पद्मदलत्वरूपणात्तस्यानुरागिणो मधुपत्वं च गम्यत इत्येकदेशविवर्ति रूपकम् ॥ ५२ ॥

पल्लवेति । पल्लवेन उपमित्या सादृश्येन यत्साम्यं तेन स-पक्षं उभयोरपि पल्लवैकोपमानसाधर्म्यात्सम्भूतं अधरो बिम्बमिव तदधरबिम्बं अभीष्टे प्रियतमे दष्टवति सति । दश दंशने क्तवतु । तेन

पर्यकूजि सरुजेव तरुण्या
स्तारलोलवलयेन करेण ॥ ५३ ॥
केनचिन्मधुरमुल्बणरागं
बाष्पतप्तमधिकं विरहेषु ।
ओष्ठपल्लवमपास्य मुहूर्तं
सुभ्रुवः सरसमक्षि चुचुम्बे ॥ ५४ ॥
रेचितम्परिजनेन महीयः
केवलाभिरतदम्पति धाम ।

पर्य्येति । बहुव्रीहिः पश्चस्य च । तेन सरुजेव सव्यथेनेव । स्त्रीरपुंसा लोमताय इत्यमरः । तारायमुच्चैः लोलानि कुतः लोलानि चलानि वलयानि कङ्कणानि यस्य तेन तरुण्याः करेण पर्यकूजि परिकूजितम् । भावे लुङ् । शब्ददुःखादुःखायतं शब्दद इति भावः । अत्र कङ्कणझारकस्य करकूजनस्य विधूनकहेतुकस्य सरुजेवेति रुग्हेतुकत्वमुत्प्रेक्ष्यते ॥ ५३ ॥

केनचिदिति । केनचिद्रागिणा मधुरं रसवत्सूल्बणरागमतिरक्तं तथापि विरहेष्वधिकं बाष्पेण विरहोष्मणा तप्तं सुभ्रुवः ओष्ठपल्लवमपास्य सरसं सान्द्रपीतं अक्षि चुचुम्बे चुम्बितम् । अत्र तप्तत्वरसवत्त्वयोर्विशेषणगत्याधरत्यागाक्षिचुम्बनहेतुकत्वात्काव्यलिङ्गद्वय सापेक्षत्वात्सङ्कीर्य्यते ॥ ५४ ॥

एवं मासद्वयरतसुखाभ्यन्तरसुरतवर्णनमभ्यधीति । रेचितमित्यादि परिजनेन रेचितं रिक्तीकृतम् । अतएव केवलाभिरतैकाकिना अभिरतौ दम्पती जायापती यस्मिन् तत् । दम्पती जम्पती जायापती भार्यापती समा इत्यमरः । राजदन्तादिषु जाया यन्त्रस्य जम्भावोदम्भावश्च विकल्पाभिदा- निदा । अशीतो महत्तरं धाम केलिगृहं कमलाहकेन कश्चो भजौ

साम्यमाप कमलासखविष्वक्
सेनसेवितयुगान्तपयोधेः ॥ ५५ ॥
आवृतान्यपि निरन्तरमुच्चै
र्योषितामुरसिजद्वितयेन ।
रागिणामिति इतोविमृशद्भिः
पाणिभिर्जगृहिरे हृदयानि ॥ ५६ ॥
कामिनामसकलानि विभुग्नैः
स्वेदवारिमृदुभिः करजाग्रैः ।

विष्वक्सेनेन जनार्दनेन विष्णुना सेवितस्याधिष्ठितस्य युगान्तपयोधेः साम्यमापेत्युपमालङ्कारः । युगान्तविशेषणं विविक्ततादयोतनार्थं एतेने-न्यासिद्धारतोक्ता ॥ ५५ ॥

अथ त्रिभिर्विहारानाह । आवृतानीति । उच्चैरुन्नतेनो-रसिजद्वितयेन निरन्तरं नीरन्ध्रमावृतानि संवृतान्यपि योषितां हृदयानि वक्षांसि चेतांसि च इत इतोविमृशद्भिरितस्ततः परामृशद्भिः रागिणां पाणिभिर्जगृहिरे गृहीतानि । निगूढं वस्तु हस्त परामर्शाल्लभ्यत इति प्रकल भावः अन्यत्र तत्क्षणः प्रियकरस्पर्शमात्रात् हृदयपाकोऽभूदिति भावः । नैरन्तर्येण प्रतिबध्नतोरपि कुचयोः कथञ्चिदन्तरं सम्पाद्य हृदयानि स्पृष्टान्येवेति वाक्यार्थः । अत्र द्वितयानामपि हृदयानां प्रकृतत्वात्केवलप्रकृतश्लेषः ॥ ५६ ॥

कामिनामिति । स्वेदवारिणा सात्त्विकेनाङ्गुलीस्वेदेन मृदुभिः को-मलताङ्गतैरतएव विभुग्नैर्विनम्रैः कामिनां करजाग्रैः नखाग्रैः कठिने-कामिनीकुचतटेषु असकलान्यसमग्राणि पदानि क्षतानि कथञ्चिदक्रियन्त कृतानि । कठिनेषु मृदूनां पदलाभो दुःसम्पाद्य इति भावः । नखक्रिय

अक्रियन्त कठिनेषु कथञ्चि
त्कामिनी कुचतटेषु पदानि ॥ ५७ ॥
सोष्मणस्तनशिलाशिखराग्रा
द्रात्तघर्मसलिलैस्तरुणानाम् ।
उच्छ्वसत्कमलचारुषु हस्तै
र्निम्ननाभिसरसीषु निपेते ॥ ५८ ॥
आत्मशङ्किरभिनीविविवीची
र्लोलमानविततांगुलिहस्तैः ।

प्रकृतोऽर्थः । अत्र कुचानामीदृक्काठिन्यासम्बन्धेऽपि तत्सम्बन्धोक्तेरति-
शयोक्तिः ॥ ५७ ॥

सोष्मण इति । सोष्मणो यौवनोष्मयुक्तात् स्तनावेव शिला शिखरे
तयोरग्रादुपरिभागादात्तघर्मसलिलैर्घर्मबिन्दुभिरुत्कारात् प्राप्तस्वेदे तरु-
णानां हस्तैरुच्छ्वसत्कमलवच्चारुषु निम्ननाभिष्वेव सरसीषु
निपेते निपतितम् । आर्द्रस्विन्नानां कुचयोरुत्थानात्पर्यवपातोऽयुक्त इति
भावः । प्रथमं कुचौ स्पृष्ट्वा ततो नाभिदेशमस्पृशन्नित्यर्थः । अत्र कुचयोः
शिलाशिखरत्वेन नाभीनां सरसीत्वेन च करपादानां कामपातिपुर-
स्वरूपणाकृत्य इति एकदेशविवर्त्ति रूपकम् ॥ ५८ ॥

आत्मशङ्किरिति । बलवीचीव इव बलिवीचीरभित आत्मशङ्किः
[illegible] । तात्स्थ्योस्तयोर्वचनपक्षिषु चानशिति चानश्
न तु शानच् लोलतेः परस्मैपदित्वात् । अतएव लोलमानादय-
इति वामनः । लोलमानाः विततः प्रसारिताश्चाङ्गुलयो येषां
[illegible] हस्ता येषां तैरभीष्टैः प्रियतमैः सुभ्रुवां मध्यं सहस्मैर्वारित
मात्रं सकामिनि अनुभावात्प्रत्यक्षेण सुभ्रा मानं सत्यैव प्रतिपेदे
न तु प्रतिषिद्धमात्रादिति भावः । आशङ्कितेऽपि शङ्कितेऽयत्तोक्ते-

सुभ्रुवामनुभवात् प्रतिपेदे
मुष्टिमेयमिति मध्यममीष्टैः ॥ ५९ ॥
प्राप्य नाभिनदमज्जनमाशु
प्रस्थितं निवसनग्रहणाय।
औपनीविकमरुन्ध किल स्त्री
वल्लभस्य करमात्मकराभ्याम् ॥ ६० ॥
कामिनः कृतरतोत्सवकाल
क्षेपमाकुलवधूकरसङ्गि।
मेखलागुणविलग्नमसुया
न्दीर्घसूत्रमकरोत्परिधानम् ॥ ६१ ॥

रतिशयोक्तिभेदोऽलङ्कारः ॥ ५९ ॥

प्राप्येति। नाभिरेव नदो ह्रद इति रूपकम्, तत्र मज्जनं प्राप्याशु निवसनग्रहणाय वस्त्राकर्षणायेत्यर्थं, प्रस्थितम्, अतस्य वसनग्रहणं कुर्वाणमिति भावः। प्रस्थितमाहृत्तम्। उपनीवि नीविसमीपे प्रायेण तत्र भवमौपनीविकम्, अध्यात्मादित्वाट्ठञित्यर्थः। उपजानूपकर्णोपनीवेष्ठक्। वल्लभस्य करं स्त्री आत्मकराभ्यामरुन्ध किल रोधं नाटितवतीत्यर्थः ॥ ६० ॥

कामिन इति। आकुले प्रियकरनिवारणव्यग्रे वधूकरे सङ्गि सक्तं मेखलैव गुणस्तत्र विलग्नं दीर्घसूत्रम् आततनन्तुकं आत्मायततत्वात् बहुधा वेष्टितमित्यर्थः। चिरक्रियञ्च। दीर्घसूत्रश्चिरक्रिय इत्यमरः। एवं कृतो रतस्योत्सवस्य कालक्षेपः कालविलम्बो येन तत्परिधानमधोंशुकं कामिनोऽसूयामकरोत्। इच्छाविघातादीर्ष्याऽभूदिति भावः। अत्र कृतरतक्षेपादिपदार्थानां विशेषणगत्या असूया हेतुत्वादनेकपदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ ६१ ॥

अम्बरं विनयतः प्रियपाणे-
र्योषितश्च करयोः कलहस्य ।
वारणामिव विधातुमभीक्ष्णं
कक्ष्यया च वलयैश्च शिशिञ्जे ॥ ६२ ॥

ग्रन्थिमुद्ग्रथयितुं हृदयेशे
वाससः स्पृशति मानधनायाः ।
भ्रूयुगेण सपदि प्रतिपेदे
रोमभिश्च सममेव विभेदः ॥ ६३ ॥

अम्बरमिति । अम्बरं विनयतोऽपसारयतः प्रियपाणेर्योषितः करयोश्च तस्मिन् रोधकयोरिति भावः । कलहस्य वारणां विधातुं निराकरणं कर्तुमिवेत्युत्प्रेक्षा । कक्ष्यया काञ्च्या । कक्ष्या कक्षे करेणुकायां काञ्च्यां गेहप्रकोष्ठयोरिति विश्वः । कक्ष्ययेति यान्तपाठे तु कक्षो-पहविककाकाञ्चीप्रकोष्ठगजरज्जुष्विति यान्तेषु विश्वः । वलयैः कङ्कणैश्च अभीक्ष्णं शिशिञ्जे शुकुचे । भावे लिट् । भूषणानां तु शिञ्जितमित्यमरः । द्वयोः कलहायमानयोः पार्श्वस्थाः साक्रोशं निवारयन्तीति भावः । शिञ्जतिरयमात्मनेपदी न त्वादिः । शिजि अव्यक्ते शब्दे इति स्मृतेः ॥ ६२ ॥

ग्रन्थिमिति । हृदयेशे प्रिये वाससोऽन्थिमुद्ग्रथयितुं विस्रंसयितुम् । ग्रथयतेश्चौरादिकात्तुमुन् । स्पृशति सति मानधनाया मानवत्याः कामिन्या इति शेषः । भ्रूयुगेण रोमभिश्च । कर्त्तरि तृतीयेति तृतीया । सपदि समं युगपदेव विभेदो भङ्गो हर्षश्च प्रतिपेदे प्राप्तः अत्र कामस्पर्शात्कामिनीविस्रंसर्षेषु युगपदमर्षहर्षयोरुदयात्तदनुभावयोरपि युगपदाविर्भाव इति भावः । अत्र भ्रूभङ्गरोमाञ्चक्रियायोः समुच्चयात् समुच्चयभेदः स च विभेद इति श्लेषप्रतिभोत्थापिताभेदाध्यवसायमूलातिशयोक्त्यनुप्राणित इति सङ्करः ॥ ६३ ॥

आशु लङ्घितवतीष्टकराग्रे
नीविमर्दमुकुलीकृतदृष्ट्या ।
रत्नवैणिकहताधरतन्त्री
मण्डलक्वणितचारु चुकूजे ॥ ६४ ॥
आहताङ्गुलिरभूदतिरिक्तः
सुभ्रुवां कृशिमशालिनि मध्ये ।
श्रोणिषु प्रियकरः पृथुलासु

आश्विति । इष्टस्य प्रियस्य कराग्रे नीविं वस्त्रग्रन्थिम् आशु हठात् लङ्घितवति अतिक्रान्तवति अवरोहति सतीत्यर्थः । अतएव मुकुलीकृतदृष्ट्या सुखपारवश्यादर्धनिमीलिताक्ष्या कयाचित् रत्नोरस्ककण्ठः स्वयत्नानुयत्नः शिल्पशिल्पस्य वैणिकोचितवाद्ये निपुणः । शिल्पमिति ठक् । रत्नेन वैणिकेन दन्तगानपदेन हतं वादितं यदधरतन्त्रीणां मण्डलं समूहः षड्जतन्त्र्योक्तस्वरमण्डलादिभेदः तस्य क्वणितमिव चारु यथा तथा चुकूजे कूजितम् । भावे लिट् । अधरपदोपन्नमाधुर्यातिशयात् । सर्वदृष्टातिरेकार्थतन्त्रीसङ्क्रमव्यतिकरमनोहरः कोऽपि रवविशेषोऽभूत्, वल्लकीकूजितविशेषः इव इत्यर्थः । अतएव रत्नवैणिकहतेति विशेषणं क्वणितमिवेति उपमालङ्कारः ॥ ६४ ॥

आयतेति । आयताः दीर्घाः अङ्गुलयो यस्य स प्रियकरः कृशस्य भावः कृशिमा कार्श्यम् । पृथ्वादिभ्य इमनिच् रऋतो हलादेर्लघोरिति रेफादेशः । तेन शालते शोभते तस्मिन् सुभ्रुवां मध्ये अतिरिक्तोऽधिकोऽभूत् । मध्यस्यातिकार्श्यादसङ्कीर्णोऽभूदित्यर्थः । पृथुलासु श्रोणिषु कटिषु । वर्हिरिदुदुरुगलेति उभयोः स्त्रियोः निम्नच्छदः । कठोरेन करतलेन तदेन अर्धमात्र दम्भादेव क्रमेण श्रोणिषु कर्मदित्यर्थः, अतएव मध्यातिरेकोक्तेर् मध्योक्तिः ॥ ६५ ॥

धैर्य्यमुल्बणमनोभवभावा
वामताञ्च वपुरर्पितवत्यः ।
व्रीडितं ललितसौरतधार्ष्ट्यै
स्तेनिरेऽभिरुचितेषु तरुण्यः ॥ ६८ ॥
पाणिरोधमविरोधितवाञ्छं
भर्त्सनाश्च मधुरस्मितगर्भाः ।

धैर्य्यमिति । तरुण्यः युवतयः उल्बण उद्रिक्तो मनोभवभावो रतिरागो यासां ता अपि अभिरुचितेषु प्रियेषु धैर्य्यमौदासीन्यं तेनिरे । वपुः स्वाङ्गमर्पितवत्योऽपि चेष्टकरणायेति दत्तवत्योऽपि वामतां वक्रताञ्च तेनिरे ललितं मनोहरं सुरतं सुरतसम्बन्धि धार्ष्ट्यं प्रागल्भ्यं यासां तास्तथापि व्रीडितं व्रीडां तेनिरे इह स्त्रीणां रहसि रागाद्वामध्यधार्ष्ट्यादि सुख स्वाभाविकतया सहज धैर्य्यकृतान्नीडितैः पुनः पुनः प्रतिबध्यत एवेति भावः । अत्र रागादीनां धैर्य्यादिभिः सह समावेशविरोधस्य सहजागन्तुकाभ्यामाभासीकरणाद्विरोधाभासोऽलङ्कारः धैर्य्यादिगुणसमुच्चयात् समुच्चयालङ्कारश्चेति सङ्करः ॥ ६८ ॥

पाणीति । मणिबन्धादाकनिष्ठं करस्य करभो बहिरित्यमरः । करभ इव ऊरू यस्याः सा करभोरूः स्त्री । ऊरूत्तरपदादौपम्ये इत्यूङ् प्रत्ययः । अविरोधितवाञ्छमनिवारितप्रियमनोरथं यथा तथा कामिनः पाणिरोधं नीविमोचने व्यापृतस्य प्रियपाणेर्निवारणं कुरुते स्म । तथा मधुरं मनोहरं स्मितगर्भं अन्तर्वर्त्ति यासु ता मन्दहासमिश्राः भर्त्सनाश्च कुरुते स्म । तथा सुखेऽपि अधरपीडनादौ सुखातिरेके सत्यपि हारि मनोहारि शुष्करुदितमश्रुरहितमार्द्रं क्रन्दितमरोदनञ्च कुरुते स्म । स्त्रीणामेव स्वभावोऽयमिति दर्शनीयतया निवारयन्त्य एव सुरतसुखमपि बुभुजत इत्यर्थः । अत्र सुखेऽपि दुःखानुभवादात्मनि दुःखितास्फोऽनुभावोद्भव्य । कोपाधरादिपक्षे मोदमानेऽपि गन्दे । दुःखितेव वहि.

कामिनः स्म कुरुते करभोरू
र्हारि शुष्करुदितञ्च सुखेऽपि ॥ ६९ ॥

वारणार्थपदगद्गदवाचा
मीर्ष्यया मुहुरपत्रपया च ।
कुर्वते स्म सदृशामनुकूल
मातिकूलिकतयैव युवानः ॥ ७० ॥

अन्यकालपरिहार्यमजस्र
न्तद्द्वयेन विदधे द्वयमेव ।

धृष्टता रहसि भर्तृषु ताभि
र्निर्दयत्वमितरैरविलासैः ॥ ७१ ॥
बाहुपीडनकचग्रहणाभ्या
माहतेन नखदन्तनिपातैः ।
बोधितस्तनुशयस्तरुणीना
मुन्मिमील विशदं विषमेषुः ॥ ७२ ॥
कान्तया सपदि कोऽप्युपगूढः
प्रौढपाणिरपनेतुमियेष ।
संहतस्तनतिरस्कृतदृष्टि
र्भ्रष्टमेव न दुकूलमपश्यत् ॥ ७३ ॥

इत्युपयोगिताभेदः ॥ ७१ ॥

बाह्विति । तनुशीनाम्नी शेते इति तनुशयः तनुषु शयः । अधि-
करणे शेतेरित्यच् प्रत्ययः । विषमेषुः कामः बाहुपीडनं निर्दयाश्लेषः
कचग्रहणं केशकर्षणं ताभ्यामाहतेन सुविघातेन । नपुंसके भावे क्तः ।
नखानां दन्तानाञ्च निपातैः क्षतैश्च बोधितः सन् विशदं निर्व्याजं यथा
तथा उन्मिमील उद्बुबुधे. तथैवैतत्कामस्योद्दीपकत्वमौचित्यमर्थः । अत्र प्रकृ-
तविषमेषु विषयव्यवहारसमारोपात् प्रस्तुत समासोक्तिरलङ्कारः । समासोक्तिरल-
ङ्कारः । एवमेव प्रबोध्यते खलु निद्रालुरित्यलौकिके वस्तुनि लौकिकव-
स्तुव्यवहारसमारोपः ॥ ७२ ॥

कान्तयेति । कान्तया सपदि सद्यः कश्चिदपि प्रौढपाणिः व्यापृतहस्तः कोऽ-
पि युवा कान्तां प्रौढपाणिरपनेतुमियेष । अथ अपनेतुं दुकूलमाक्रष्टुं मियेष ।
संहताभ्यां निरन्तराभ्यां स्तनाभ्यां तिरस्कृतदृष्टिः तिरोहितदृष्टिः सन्
भ्रष्टमेव प्रागेव स्खलद्दुकूलं नापश्यत् अत्र दृष्टितिरस्कारस्य निमित्तस्य
पूर्वमेव हेतुत्वात् काव्यलिङ्गमलङ्कारः । तत्र दृष्टेरन्तर्निरस्कारादस्य-

आहतङ्कुचतटेन तरुण्याः
साधु सोढममुनेति पपात ।
त्रुट्यतः प्रियतमोरसि हारा-
त्पुष्पवृष्टिरिव मौक्तिकवृष्टिः ॥ ७४ ॥
सीत्कृतानि मणितङ्करुणोक्तिः
स्निग्धमुक्तमलमर्थवचांसि ।
हासभूषणरवाश्च रमण्याः
कामसूत्रपदतामुपजग्मुः ॥ ७५ ॥

ऽपि सम्बन्धरूपातिशयोक्त्याऽपितमिति सङ्कर । तेन च कुचयोर्नै-
रन्तर्यसौन्दर्यं व्यज्यत इति अलङ्कारेण वस्तुध्वनिः ॥ ७३ ॥

आहतमिति । तरुण्या सम्बन्धिना कुचतटेनाहतमाहतिरमुना
रसा साधु सोढमिति हेतोस्त्रुट्यत शौर्यभाजो हारान्मौक्तिकवृष्टिः पुष्प-
वृष्टिरिव प्रियतमोरसि पपात इत्युत्प्रेक्षा । विक्रान्त पूज्यते पुष्पवृष्ट्येति
सिद्धि ॥ ७४ ॥

सीत्कृतानीति । तरुण्याः सीत्कृतानि सीत्काराः । दन्तनिष्पीड-
नार्थो सीदिति शब्दप्रयोग । मणित रतिकाले स्त्रीणां कण्ठकूजितवि-
शेष । मणितं रतिकूजितमित्यभिधानात् । करुणोक्तिः त्रायस्वेत्या-
दीनोक्ति । स्निग्ध स्नेहार्द्रमुक्तमुक्ति त्वं मे प्राणा इति प्रियशब्द
इत्यर्थः अलमर्थानि निषेधार्थानि वचांसि मा मेत्यादि निवारणव-
चनानि । हासाना भूषणाना च रवा स्वनाश्च काम शास्त्रस्य वात्स्याय-
नादिकामतन्त्रप्रतिपादकशास्त्रस्य पदताम्पद्यत इति पदमर्थं प्रमेयलक्ष-
णमिति यावत्तत्तामुपजग्मु इति गम्योत्प्रेक्षा । यद्वा कामिनैव सूत्र
सूत्र तस्य पदानि सुप्तिङन्तशब्दरूपाणि तस्य शास्त्रस्यैतान्येव पदानि
तत्तामुपजग्मुरित्युत्प्रेक्षैव ॥ ७५ ॥

उद्धतैर्निभृतमेकमनेकै-
र्च्छेदवन्मुहुरगद्दयामविरामः ।
श्रूयते स्म मणितं कलकाञ्ची-
नूपुरध्वनिभिरक्षतमेव ॥ ७६ ॥

ईदृशस्य भवतः कथमेत-
ल्लाघवं मुहुरतीव रतेषु ।
क्षिप्तमायतमदर्शयदुर्व्याः
काञ्चिदाम जघनस्य महत्त्वम् ॥ ७७ ॥

प्राप्यते स्म गतवित्तविकत्थै-

उद्धतैरिति । निभृतमव्यक्तं छन्नमित्यर्थः । एकमेकाकि [illegible] विच्छेदयुक्तम् । एतादृशं मणितं रतिकूजितं उद्धतैः स्थूलैरनेकैर्बहुभि-रविरामैरविच्छेदैः कलैरव्यक्तमधुरैः काञ्चीनां नूपुराणां च ध्वनिभिरक्षत-मविरत [illegible] श्रूयते स्म श्रुतं मणितस्य तिरोधायकशब्दान्तरसद्भावेऽपि तद्भ्यासात् [illegible] रतद्युत्कारः । [illegible] इति [illegible] ॥ ७६ ॥

ईदृशस्येति । रतेषु उर्व्याः क्षिप्तं रतिसम्भ्रमात् [illegible] आयतं दीर्घं-भूतं काञ्चिदाम रसनागुणः कर्तृ ईदृशस्येति काञ्चिदाम्नः [illegible] जघनविशाल [illegible] महत्तरस्यापि महत्त्वस्य जघनस्य रतेषु [illegible] मुहुः [illegible] मुहुः [illegible] इति भावः । इति जघनस्य महत्त्वदर्शनादिदं [illegible] इति [illegible] । [illegible] । [illegible] महत्का-ञ्चीदाम [illegible] जघनमहत्त्वं [illegible] ॥ ७७ ॥

प्राप्यत इति । [illegible] विकत्थितानि [illegible] [illegible] [illegible] इति [illegible]

श्लिष्टमार्द्रनखलक्ष्म कपोलैः ।
दधिरेऽथ रमणच्युतपुष्पाः
स्वेदविन्दुकुसुमान्यलकान्ताः ॥ ७८ ॥
यद्यदेव रुरुचे रुचिरेभ्यः
सुभ्रुवो रहसि तत्तदकुर्वन् ।
आनुकूलिकतया हि नराणा-
माक्षिपन्ति हृदयानि तरुण्यः ॥ ७९ ॥
प्राप्य मन्मथरसादतिभूमि-
न्दुर्वहस्तनभराः सुरतस्य ।

कथ्यते स्म प्राक्तम् । किञ्च रमणेन रतिसमयेषु च्युतपुष्पा अलका-
न्ताश्चूर्णकुन्तला अपि स्वेदविन्दूनेव कुसुमानीति रूपकं दधिरे दधुः ।
धरतेर्भौवादिकाल्लिटि जित्त्वा दात्मनेपदम् । स्वेदोऽत्र श्रमानुभावः ।
श्रमः खेदोऽध्वरत्यादेः श्वासखेदादिभूमिकृत् ॥ ७८ ॥

यद्यदेवेति । रुचिरेभ्यो रमणेभ्यो यद्यदेव चेष्टितं रुरुचे रोचते स्म
प्रियमभूदित्यर्थः । रुच दीप्तावभिप्रीतौ चेति धातोर्लिट् । रुच्यर्थानां
प्रीयमाण इति सम्प्रदानत्वम् । सुभ्रुवो रहसि तत्तदकुर्वन् । तथा हि
तरुण्यः अनुकूलं वर्त्तन्त इत्यानुकूलिकाः । तत्प्रत्यनुपूर्वमीपलोमकूलमिति
ठक् । तासां भावस्तत्ता तया आनुकूलिकतया अनुकूलवर्त्तितयैव नराणां
पुंसां हृदयान्याक्षिपन्त्यावर्जयन्तीत्यर्थान्तरन्यासः ॥ ७९ ॥

प्राप्येति । दुर्वहः स्तनभरो यासामिति एतेनोपरिसुरतं व्यज्यते ।
अन्यथा किमेतदर्थं स्यात् । अलिता आयताश्च केशा यासां ता आयतालिता-
यतकेशाः स्त्रियः । स्वाङ्गाच्चोपसर्जनादित्यादिना ङीप् । मन्मथरसात् स्मर-
रागात् सुरतस्यातिभूमिमपराद्धामासाद्य भ्रान्तं सुरतमाप्येत्यर्थः ।
श्रमजेन स्वेदाम्बुना आर्द्रे ललाटे छिन्नाः केशा यस्मिन् कर्मणि तद्यथा

ग्रथम् : श्रमजलार्द्रललाट
श्लिष्टकेशमसितायतकेश्यः ॥ ८० ॥

सङ्गताभिरुचितैश्चलितापि
प्रागमुच्यत चिरेण सखीव ।
भूय एव समगंस्त रतान्ते
ह्रीर्वधूभिरसहा विरहस्य ॥ ८१ ॥

प्रेषणीयकमिव क्षणमासन्
ह्रीविभङ्गुरविलोचनपाताः ।
सम्भ्रमद्रुतगृहीतदुकूल
च्छाद्यमानवपुषः सुरतान्ताः ॥ ८२ ॥

तथा इत्यतः इति धातुभावस्य समारोहिः भावनिबन्धनात् दोऽलङ्कार ॥ ८० ॥

अथ सुरतान्तकालं वर्णयति । सङ्गताभिरिति । उचितैः परि चितैः सह सङ्गताभिर्वधूभिः प्राक् सुरतादौ चलिता मन्तुं प्रचलिताऽपि ह्रीः सखीव चिरेणामुच्यत कृच्छ्रात् । न सहसेत्यर्थः । यथा सज्जनैः सखा । विरहस्यासहा विरहमसहमाना वधूभिः । कर्मकर्त्रोः कृतीति कर्मणि षष्ठी । रतान्ते भूय एव वधूभिः समगंस्त सङ्गता सखीवेत्युपमा । सम्भूयोर्भ्यो गमेरित्यात्मनेपदं समगस्तेति मध्ये विरामाभावाद्रसान्तरोदयाभावाद्विच्छेदो न । सुरतेन साके क्षीणां सखीव पुनरभिमित भावः । उपमालङ्कारः ॥ ८१ ॥

प्रेषणीयकमिति । ह्रिया विभङ्गुराः प्रवर्तिता विलोचनपाता दृष्टिपाता येषु ते सम्भ्रमेण द्रुतं गृहीतेन दुकूलेन छाद्यमानानि वपूंषि येषु ते सुरतान्ताः सुरतावसानानि क्षणं प्रेषणीयकं प्रहसनमिवासुः । यथा । नाटकादिदृश्यकाव्यार्थं सन्तु नट्यं प्रेषणीयकमिति

श्लिष्टमार्द्रनखलक्ष्म कपोलैः ।
दधिरेऽथ रभसच्युतपुष्पाः
स्वेदबिन्दुकुसुमान्यलकान्ताः ॥ ७८ ॥
यद्यदेव ररुचे रुचिरेभ्यः
सुभ्रुवो रहसि तत्तदकुर्वन् ।
आनुकूलिकतया हि नराणा-
माक्षिपन्ति हृदयानि तरुण्यः ॥ ७९ ॥
प्राप्य मन्मथरसादतिभूमि-
न्दुर्वहस्तनभराः सुरतस्य ।

क्रमाप्यते स्म प्राप्तम् । किञ्च रभसेन रतिसम्मर्देन च्युतपुष्पा अलका-न्ताश्चूर्णकुन्तलाग्राणि स्वेदबिन्दूनेव कुसुमानीति रूपकं दधिरे दधुः । धरतेर्भौवादिकाल्लिटि जित्त्वादात्मनेपदम् । स्वेदोऽत्र श्रमानुभव । श्रम स्वेदोऽध्वरत्यादे श्रामस्वेदातिभूमिकात् ॥ ७८ ॥

यद्यदेवेति । रुचिरेभ्यो रमणेभ्यो यद्यदेव चेष्टितं ररुचे रोचते स्म प्रियमभूदित्यर्थः । रुचदीप्तावभिप्रीतौ चेति धातोर्लिट् । रुच्यर्थानां प्रीयमाण इति सम्प्रदानत्वम् । सुभ्रुवो रहसि तत्तदकुर्व्वन् । तथा हि तरुण्यः अनुकूलं वर्त्तन्त इत्यानुकूलिकाः । तदस्यत्यनुपूर्व्वसीपलोमकूलमिति ठक् । तासां भावस्तत्ता तया आनुकूलिकतया अनुकूलवर्त्तितयैव नराणां पुंसां हृदयान्याक्षिपन्त्या वर्जयन्तीत्यर्थान्तरन्यासः ॥ ७९ ॥

प्राप्येति । दुर्वहः स्तनभरो यासामन्तारतेनोपरिसुरतं व्यज्यते । अन्यथा नियोपपत्त्यर्थात् । अबिला व्यायताश्च केशा यासान्ता अबिता यतश्चेद स्त्रिय । स्वाङ्गाच्चेत्यादिना ङीप् । मन्मथरसात् स्मर रागात् सुरतस्यातिभूमिमत्युद्रेकं प्राप्य मदन्ति सुरतमार्पिण्यर्थः । श्रमजलेन स्वेदाम्बुना आर्द्रे ललाटे श्लिष्टाः केशा यस्मिन् कर्म्मणि तद्यथा

शश्रमुः श्रमजलार्द्रललाट
श्लिष्टकेशमसितायतकेश्यः ॥ ८० ॥
सङ्गताभिरुचितैश्चलितापि
प्रागमुच्यत चिरेण सखीव ।
भूय एव समगंस्त रतान्ते
ह्रीवधूभिरसहा विरहस्य ॥ ८१ ॥
प्रेक्षणीयकमिव क्षणमासन्
ह्रीविभङ्गुरविलोचनपाताः ।
सम्भ्रमद्रुतगृहीतदुकूल
च्छाद्यमानवपुषः सुरतान्ताः ॥ ८२ ॥

तथा शश्रमुः इति सानुभावस्य श्रमस्योक्तिः भावनिबन्धनात्प्रेयोऽलङ्कार ॥ ८० ॥

अथ सुरतावसानं वर्णयति । सङ्गताभिरिति । उचितैः परि चितैः प्रियतमैः सह सङ्गताभिर्वधूभिः प्राक् सुरतादौ चलिता गन्तुं प्रवृत्तापि ह्री सखीव चिरेणामुच्यत त्यक्ता । न सहत इत्यसहा । पचाद्यजन्तेन समासः । विरहस्यासहा विरहमसहमाना इत्यर्थः । कर्तृकर्मणोः कृतीति कर्मणि षष्ठी । रतान्ते भूय एव वधूभिः समगंस्त सङ्गता सखीवेत्येव । समो गम्यृच्छिभ्यामित्यात्मनेपदं वा गम इति विभ. पक्षे सिच्यभावादनुदात्तोपदेशेत्यादिनानुनासिकलोपो न । सुरतान्ते स्त्रीणां लज्जैव भूयसीति भावः । उपमालङ्कारः ॥ ८१ ॥

प्रेक्षणीयकमिति । ह्रिया विभङ्गुराः स्खलिता विलोचनपाता दृष्टिपाता येषु ते सम्भ्रमेण द्रुतं गृहीतेन दुकूलेन छाद्यमानानि वपूंषि कान्ताङ्गानि येषु ते सुरतान्ताः सुरतावसानानि क्षणं प्रेक्षणीयकं दृश्यमिवासन् इत्युपमा । नाटकादिरूपकेष्वाहार्यकं यद्यत् तद्दृश्यं प्रेक्षणीयकमिति

श्लिष्टमार्द्रनखलक्ष्म कपोलैः ।
दध्रिरेऽथ रमणच्युतपुष्पाः
स्वेदबिन्दुकुसुमान्यलकान्ताः ॥ ७८ ॥
यद्यदेव रुरुचे रुचिरेभ्यः
सुभ्रुवो रहसि तत्तदकुर्वन् ।
आनुकूलिकतया हि नराणा
माक्षिपन्ति हृदयानि तरुण्यः ॥ ७९ ॥
प्राप्य मन्मथरसादतिभूमि
न्दुर्वहस्तनभराः सुरतस्य ।

कमाश्लिष्टे स्म प्राप्तम् । किञ्च रमणेन रतिसम्भ्रमेण च्युतपुष्पा अलका न्तायूर्धकुन्तलाग्राणि स्वेदबिन्दुनेव कुसुमानीति रूपक दध्रिरे दधु- । धरतेर्भ्वादिकाल्लिटि जित्त्वा दात्मनेपदम् । स्वेदोऽत्र श्रमानुभव । श्रम स्वेदोऽध्यरत्यादे श्वासस्वेदातिभूमिकात् ॥ ७८ ॥

यद्यदेवेति । रुचिरेभ्यो रमणेभ्यो यद्यदेव चेष्टितं रुरुचे रोचते स्म प्रियमभूदित्यर्थः । रुचदीप्तावभिप्रीतौ चेति धातोर्लिट् । रुच्यर्थानां प्रीयमाणइति सम्प्रदानत्वम् । सुभ्रुवो रहसि तत्तदकुर्वन् । तथा हि तरुण्य, अनुकूलं वर्त्तन्त इत्यानुकूलिका । तत्प्रत्यनुपूर्वमीपलोमकूलमिति ठक् । तासाम्भावस्तत्ता तया आनुकूलिकतया अनुकूलवर्त्तितयैव नराणां पुंसां हृदयान्याक्षिपन्त्या वर्जयन्तीत्यर्थान्तरन्यास ॥ ७९ ॥

प्राप्येति । दुर्वह स्तनभरो यासान्ताएतेनोपरिसुरत व्यज्यते । अन्यथा निर्वेपथर्थ्यर्थ्यात् । असिता आयताश्च क्षोमा यासान्ताऽसिता यतक्षोम स्त्रिय । स्वाङ्गाच्चेत्यादिना ङीप् । मन्मथरसात् स्मर रागात् सुरतस्यातिभूमिम्परकाष्ठाम्प्राप्य महान्त सुरतश्रमेऽर्थ । श्रमजलेन स्वेदाम्बुना आर्द्रे ललाटे [illegible]

ग्रश्रमुः श्रमजलार्द्रललाट
श्लिष्टकेशमसितायतकेश्यः ॥ ८० ॥
सङ्गताभिरुचितैश्चलितापि
प्रागमुच्यत चिरेण सखीव ।
भूयएव समगंस्त रतान्ते
ह्रीवधूभिरसहा विरहस्य ॥ ८१ ॥
प्रेक्षणीयकमिव क्षणमासन्
ह्रीविभङ्गुरविलोचनपाताः ।
सम्भ्रमद्रुतगृहीतदुकूल
च्छाद्यमानवपुषः सुरतान्ताः ॥ ८२ ॥

तथा घस्रतुः इति धातुभावस्य श्रमभावोक्तिः भावनिबन्धनात्स्वभावोक्त्यलङ्कारः ॥ ८० ॥

अथ सुरतावसाने दर्शयति । सङ्गताभिरिति । उचितैः यदि चिरं प्रियनर्मैः सह सङ्गताभिर्वधूभिः प्राक् सुरतादौ चलिता गन्तुं प्रचलितापि ह्री सखीव चिरेणाहमुच्यत मुक्ता । न बहुतरत्य सङ्गा । पश्चाद्यजन्ते ... समागः । विरहस्यासहा विरहमसह म ना गतोऽर्थः । कर्तृकर्मणोः कृतीति कर्मणि षष्ठी । रतान्ते भूयएव वधूभिः समगंस्त सङ्गता सखीवेत्यर्थः । सम्पूर्वो गुरोर्दुं ... समोगमृच्छिभ्यामित्यात्मनेपदं वागमहति विच. पक्षे क्रियाभावादनुदात्तोपदेशेत्यादिनानुनासिकलोपो न । सुरतेतर काले व्रीडा लज्जैव भूयसीति भावः । उपमालङ्कारः ॥ ८१ ॥

प्रेक्षणीयकमिति । ह्रिया विभङ्गुराः स्खलिता विलोचनपाता दृष्टिपाता येषु ते सम्भ्रमेण द्रुत गृहीतेन दुकूलेन च्छाद्यमानानि वपूंषि कल-त्राणि येषु ते सुरतान्ताः सुरतावसानानि क्षणं प्रेक्षणीयकं दृश्यमिवासुः दृश्यप्रथा । नाटकादिरूपकेष्वाहार्यकं खलु नटस्य प्रे

अप्रभूतमतनीयसि तन्वी
काञ्चिधाम्नि पिहितैकतरोरु ।
क्षौममाकुलकरा विचकर्ष
क्रान्तपल्लवमभीष्टतमेन ॥ ८३ ॥
स्पृष्टचन्दनविशेषकभङ्गि
भ्रष्टभूषणकदर्थितमाल्यं ।
सापराधइव मण्डनमासी-
दात्मनैव सदृशस्तुपभोगः ॥ ८४ ॥

चोच्यते इन्द्राभिभवतिरोधानादिना तत्तुल्यत्वम् ॥ ८२ ॥

अप्रभूतमिति । तन्वी कृशाङ्गी अभीष्टतमेन प्रेयसा क्रान्तपल्लवं स्पृष्टाञ्चलं अतएवातनीयसि महीयसि काञ्चिधाम्नि जघने अप्रभूतं स्थापयितुं अपर्य्याप्तं अतएव पिहितमाच्छादितमेकतरमेकोरुर्येन तत् क्षौमं दुकूलं आकुलकरा व्यग्रपाणि सती विचकर्ष स्तुत्याच्छादनार्थमाचकर्ष लज्जानुभावोऽयम् । अत्र क्षौमविशेषणानामाकर्षणहेतुत्वात्पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ ८३ ॥

स्पृष्टेति । स्पृष्टा प्रमृष्टाश्चन्दनानां विशेषकाणामलकालकानां च भङ्गीरचना येन स । तमालपत्रतिलकचित्रकाणि विशेषकं द्वयम् इत्यमरः । भ्रष्टानि भूषणानि यस्मिन् स भ्रष्टभूषणः कुत्सितोऽर्थः कदर्थः । लोकतो विशेष्यलिङ्गत्वम् । को कत्तत्पुरुषेऽचीति कुशब्दस्य कदादेशः । कदर्थीनि कृतानि कदर्थितानि दूषितानि माल्यानि यत्र स । ततस्तयोर्वैयधिकरण्येऽपि विशेष्यविशेषणभावात्त्रिपदो बहुव्रीहिः । एवम्भूत उपभोग सापराधइव पूर्वमण्डनापहारात्कृतापराधइव सदृशमात्मनैव स्वयमेव । प्रकृत्यादित्वात् तृतीया । मण्डनमासीत् । प्रतिनिधिकरणेन सापराधनिदानार्थमिवेत्युत्प्रेक्षा । स्त्रीणां सम्भोग एव मण्डनं तदभावे मण्डनमात्ररक्षायमण्डनत्वादिति भावः ॥ ८४ ॥

योषितः पतितकाञ्चनकाञ्ची
मोहनातिरभसेन नितम्बे ।
मेखलेव परितः स्म विचित्रा
राजते नवनखक्षतलक्ष्मीः ॥ ८५ ॥

भाति नाम सुदृशान्दशनाङ्कः
पाटलोऽधवलगण्डतलेषु ।
दन्तवाससि समानगुणश्रीः
सम्मुखोऽपि परभागमवाप ॥ ८६ ॥

सुभ्रुवामधिपयोधरपीठं
पीडनैस्त्रुटितवत्यपि पत्युः ।

योषिदिति । मोहनातिरभसेन सुरतसम्भ्रमेण पतिता काञ्चनकाञ्चनस्य विकारा काञ्चिर्यस्यास्तस्याः ... योषितो नितम्बे परितः सर्वतोऽविचित्रा विविधरचना नवनखक्षतलक्ष्मी मेखलेव राजते स्म उत्प्रेक्षालङ्कारः ॥ ८५ ॥

भातीति । सुदृशां सम्बन्धी पाटलोऽरुणोदय नाङ्कोदन्तक्षत अधवलगण्डतलेषु कपोलेषु भाति नाम वैवर्ण्याङ्केन प्रकाशतां नाम व्यङ्गीकारे । दन्तवाससि अधरे तु समानगुणश्रीस्तुल्यवर्णोऽपि तथा सम्मुखोऽपि सन् परभागं गुणोत्कर्षं तथा पश्चाद्भागञ्चावाप इति शाब्दस्येवार्थः ... सम्मुखपराङ्मुखत्वयोश्च विरोधः उपरिभागं ... परिहारादविरोधाभासमनुयर्त ... तत्रादौ ... निमित्ताभेदाध्यवसायमूलत्वादुत्प्रेक्षापि इति सङ्करः ॥ ८६ ॥

सुभ्रुवामिति । सुभ्रुवाम्पयोधरपीठे कुचतटे अधिपयोधरपीठम् । विभक्त्यर्थेऽव्ययीभावः । पत्युः पीडनैः परिरम्भादिविमर्दैः त्रुटितवती

मुक्तमौक्तिकलघुर्गुणशेषा
हारयष्टिरभवद्गुरुरेव ॥ ८७ ॥
विश्रमार्थमुपगूढमजस्रं
यत्प्रियैः प्रथमरत्यवसाने।
योषितामुदितमन्मथमादौ
तद्द्वितीयसुरतस्य बभूव ॥ ८८ ॥
आस्तृतेऽभिनवपल्लवपुष्पै
रप्यनारतरताभिरताभ्यः।

च्छेदङ्गतापि। अतएव मुक्तमौक्तिका सा च सा लघुश्च अतएव गुणशेषा सूत्रमात्रशेषापि हारयष्टिर्गुरुः श्लाघ्यैवाभवत्। लघुरपि गुरुरिति विरोधाभासोऽलङ्कारः ॥ ८७ ॥

विश्रमेति। योषितां प्रथमरत्यवसाने विश्रमार्थं श्रमापनोदार्थं। श्राम्यतेर्घञ्प्रत्ययः नोदात्तोपदेशस्य मान्तस्यानाचमेरिति वृद्ध्यभावः। अजस्रं प्रियैरुपगूढं उपगूहनम्। नपुंसके भावे क्तः न लोकेत्यादिना षष्ठीप्रतिषेधः। उदितमन्मथमुत्पादितकामं अतएव तदुपगूहनं द्वितीयसुरतस्यादौ बभूव। श्रमापनोदमन्मथोद्बोधाभ्यामुभयोपयोगादुभयार्थं अभूत् प्रयोग इत्यन्यायादित्यर्थः अत्र मध्यवर्त्तिन उपगूढलेशस्य पूर्वोत्तरसुरतयोरुपयोगेन त्रिविधफलतया विश्रमार्थमुदितमन्मथपदार्थयोर्हेतुत्वात् काव्यलिङ्गद्वयमङ्गाङ्गिभावेन सङ्कीर्य्यते ॥ ८८ ॥

आस्तृतेति। अनारतमश्रान्तं रते सुरते अभिरताभ्य आसक्ताभ्यो वधूभ्यः अक्षयत्वाच्चन्द्रदायिनीति क्षणदा रात्रिः तथापि अभिनवैः पल्लवैः पुष्पैश्चास्तृते आच्छादितेऽपि कुसुमशयनार्द्धेऽपीत्यर्थः। केतैःक्षितिरिति शयनीये तल्पे। कल्पद्रुमो मन्मथमधिकरोत्यभीप्सया। अधिकं शयनं कर्त्तुं अपरोऽल्पकालोऽपि न दीयते अत्र दत्तं किन्त्वाप्रभातमरम

ह्रीयते स्म शयितुं शयनीये
न क्षणं क्षणदयापि वधूभ्यः ॥ ८९ ॥
योषितामतितरान्नखलूनं
गात्रमुज्ज्वलतया न खलूनम्।
क्षोभमाशु हृदयन्नयदूनां
रागवृद्धिमकरोन्न यदूनाम् ॥ ९० ॥
इति मदमदनाभ्यां रागिणः स्पष्टरागा
ननवरतरतश्रीसङ्गिनस्तानवेक्ष्य।

यत् क्षणं दात्वाऽदैवेति भावः। क्षणदयापि क्षणो न दत्त इति विरोधस्तस्य रात्र्यर्थत्वेन परिहाराद्विरोधाभासोऽलङ्कारः। निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षण इत्यमरः ॥ ८९ ॥

योषितामिति। नखलूनं न खलु ऊनं नयत् ऊनां न यदूनां इति पदच्छेदः। अतितरामतितमाम्। अव्ययादाम्प्रत्ययः। नखैर्लूनं क्षतं नखलूनम्। स्वादिष्वसर्वेति निष्ठानत्वम्। तथाप्युज्ज्वलतया सदा औज्ज्वल्येन न ऊनं न न्यूनं किन्तु सम्पूर्णमेवेत्यर्थः। अत्र क्षतानां कामिनीनामलङ्करणत्वादिति भावः। अतएवाशु हृदयञ्चित्तं क्षोभं विकारं नयत् प्रापयत्। नयतेर्लटः शत्रादेशः। योषितां गात्रं यदूनां यादवानां रागवृद्धिं ऊनां न्यूनां नाकरोत् खलु किन्तु भूयोऽपि सम्पूर्णामकरोदित्यर्थः। अत्र यमकशब्दालङ्कारः औज्ज्वल्यस्य विशेषणगत्या रागवृद्धिहेतुत्वात् काव्यलिङ्गमर्थालङ्कारः ॥ ९० ॥

इतीति। इतीत्थं मदमदनाभ्यां स्पष्टरागान् व्यक्तरागान् रागिणोऽपि सदा ताभ्यामपि अङ्कितरागानित्यर्थः अनवरतरतश्रीसङ्गिन इति। अनवरतसम्भोगान् तान् रागिणो रागिणश्च रागिणश्च तान् रागिणः। तस्मात् क्लिष्टेऽप्यर्थेऽपि। अवेक्ष्य दृष्ट्वा रात्रिरवनतं सर्वतः परितो-

अभजत परिवृत्तिं साथ पर्यस्तहस्ता
रजनिरवनतेन्दुर्लज्जयाधोमुखीव ॥ ९१ ॥

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये
सुरतवर्णनोनाम दशमः सर्गः समाप्तः ॥ १० ॥

हस्तोनक्षत्रविशेष करश्च यस्याः सा। हस्तोनक्षत्रभेदे स्यात्करेभकर-
योरपीत्युभयत्रापि विश्व। अवनतेन्दु लम्बचन्द्रा एवंरूपा सा रजनि-
र्लज्जया पाश्चात्यपक्षदर्शनेनावनतशिरा इति भाव अधोमुखी नम्रमुखीवेत्यु-
त्प्रेक्षा। परिवृत्तिं निवृत्तिमुपगमनं भजत प्रभातप्रायाऽभूदित्यर्थ।
स्त्रियोहि परकीयपाश्चात्यचेष्टादर्शने त्रपावनतमुख्योहस्तेन हस्तमवधाय
द्रागपसरन्तीति भावः अतएवानन्तरसर्गे प्रभातवर्णनाय प्रस्ताव।
मालिनीवृत्तमेतत् लक्षणं तु वक्ष्यते चोत्तरसर्गादौ ॥ ९१ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघ
काव्यव्याख्याने सर्वङ्कषाख्ये दशम सर्ग समाप्त

समाप्तमिदम्पूर्वार्द्धम् ॥

एकादशः सर्गः ।

श्रुतिसमधिकमुच्चैः पञ्चमं पीडयन्तः
सततमृषभहीनं भिन्नकीकृत्य षड्जम् ।
प्रणिजगदुरकाकुश्रावकस्निग्धकण्ठाः
परिणतिमिति रात्रेर्मागधा माधवाय ॥ १ ॥

अथ प्रस्तुतप्रभातवर्णनं प्रारभते । श्रुतीति । नास्ति काकुर्दैन्यकाकुर्विकृतध्वनिः । काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेरित्यमरः । श्रावयतीति श्रावको दूरध्वनिः । स्निग्धो मधुरः कण्ठः स्वरो येषां तेऽकाकुश्रावकस्निग्धकण्ठाः स्तुतिपाठका इत्यर्थः । मागधा वैतालिकाः श्रुतयो नाम षड्जादिस्वरारम्भकावयवा शब्दविशेषाः । तदुक्तं प्रथमश्रवणाच्छब्दः श्रूयते ह्रस्वमात्रकः सा श्रुतिः संपरिज्ञेया स्वरावयवलक्षणेति ताभिः श्रुतिभिः समधिकमधिकं षड्जापेक्षया मध्यमापेक्षया वा उभयोरपि तदाधिक्यात् । तदुक्तं चतुश्चतुश्चतुश्चैव षड्जमध्यमपञ्चमाः । द्वे द्वे निषादगान्धारौ त्रिस्त्रीऋषभधैवताविति । षड्जो मयूरस्य ध्वनितानुकारी स्वरविशेषः । षड्जं मयूरो वदतीति वचनात् । तं षड्जं भिन्न एव भिन्नकस्तं कृत्वा भिन्नकीकृत्य [illegible] [illegible] स्वरान्तरसंकीर्णं कृत्वेत्यर्थः । पञ्चमो नाम कोकिलकूजितानुकारी स्वरविशेषः । पिकः कूजति पञ्चममिति वचनात् । तमुच्चैस्तारं, [illegible] इत्यर्थः । सततं वीप्सादिरत्यन्तसंयोगे द्वितीया । ऋषभोऽपि वृषभनर्दितानुकारी स्वरभेद

रतिरभसविलासाभ्यासतान्तन्न याव-
न्नयनयुगममीलत्तावदेवाहतोऽसौ ।
रजनिविरतिशंसी कामिनीनाम्भविष्य
द्विरहविहितनिद्राभङ्गमुच्चैर्मृदङ्गः ॥ २ ॥
स्फुटतरमुपरिष्टादल्पमूर्त्तेर्ध्रुवस्य
स्फुरति सुरमुनीनाम्मण्डलं व्यस्तमेतत् ।

एव । गाङ्गस्त्वपमधपरिषदिति लक्षणात् । तेन हीनं तथापि तत्काल-
निषिद्धत्वादित्यर्थः सततं क्रमभङ्गीनञ्च यथा तथा रातैः परिषदिति
प्रतिबुद्धिमित्यर्थः इति बध्यमानप्रकारेणोर्ध्वं यथा तथा माधवाय ह
स्त्राय । क्रियाग्रहणात् सम्प्रदानत्वम् । प्रणिजगदुर्गानेनावद्युरित्यर्थः ।
नेर्गदनदेत्यादिना णत्वम् । पञ्चमादिनिषेधे भरतः । प्रभाते सर्वतो-
भिन्नप्रत्ययः पञ्चमोऽपि च । जनयेत्सुधनं शुद्धा पञ्चमं पञ्चमोऽपि
च । पञ्चमस्य विशेषोऽयं कथितः पूर्वसूरिभिः । प्रगे प्रगीतो जनयेद्-
धनस्य विपर्ययमिति । स्वभावोक्तिरलङ्कारः । अस्मिन् सर्गे मालिनी
वृत्तम् । ननमयययुतेयं मालिनी भोगिलोकैरिति लक्षणात् ॥ १ ॥

अथ पूर्वश्लोके रतिमन्दरागृहान्तपरदारान्प्रत्युत्तरश्लोकात्(?) प्रभा-
भाविनः प्रभातसमयालापार्थसम्प्राप्य वर्णयन्नाह । रतीति । रतिर-
भसविलासानां सुरतक्रमलीलानां अभ्यासेनावर्त्तनेन तान्तं क्लान्तं,
नयनयुगं कर्तृ कामिनामिति शेषः । यावन्नामीलत् मुकुलीभवति
तावदेवासौ रजनिविरतिशंसी निशावसानसूचकश्चासौ मृदङ्गः कामिनीनां
भविष्यता भाविना विरहेण विहितः कृतो निद्राभङ्गो यस्मिन्
कर्मणि तद्यथा तथा आहतस्ताडितः । अत्र विरहपदेन पाक-
शक्तिना लभ्यते अन्यथा प्रथम(?) प्राभातिकनिद्राभङ्गहेतुत्वायोगा-
दिति । अत्र रतितान्तरजनिविरतिसमयोर्विशेषणगत्या नेत्रनिमील-
ननिद्राभङ्गहेतुत्वात्पदार्थहेतुकं काव्यलिङ्गम् ॥ २ ॥

शकटमिव महीयः शैशवे शार्ङ्गपाणे-
श्चपलचरणकाब्जप्रेरणोत्तुङ्गिताग्रम् ॥ ३ ॥
प्रहरकमपनीय स्वं निदिद्रासतोच्चैः
प्रतिपदमुपहूतः केनचिज्जागृहीति ।
मुहुरविशदवर्णां निद्रया शून्यशून्यां
दददपि गिरमन्तर्बुध्यते नो मनुष्यः ॥ ४ ॥

स्फुटेति । अल्पमूर्तेर्दूरत्वाद् लघुबिम्बस्य ध्रुवस्यौत्तानपादेः । ध्रुव औत्तानपादिः स्यादित्यमरः । उपरिष्टात् स्फुटतरं व्यक्ततरं [illegible] समेतम् सुरमुनीनां सप्तर्षीणां मण्डलं शार्ङ्गपाणेः केशवस्य [illegible] शैशवे [illegible] चपलस्य चरणकाब्जप्रेरण- [illegible] । प्रेरणया नोदनेनोत्तुङ्गितमुत्क्षिप्तमग्रं यस्य तत् विन्यासविशेषमित्यर्थः । महीयो महत्तरं शकटमिव शकटाकारं शकटासुरशरीरमिव स्फुरति दीप्यते । उपमालङ्कारः । पुरा किल बाल्ये हरिः शकटरूपधारिणं शकटासुरं पादघातेन पातयामासेति पौराणिकी कथात्रानुसन्धेया ॥ ३ ॥

प्रहरकमिति । स्वं स्वकीयं स्वपालनीयं प्रहरमेव प्रहरको यामः । द्वौ यामप्रहरौ समावित्यमरः । तमपनीय नीत्वा निदिद्रासता निद्रातुमिच्छता । निद्रातेः सन्नन्ताल्लटः शत्रादेशः । केनचित्पुरुषेण प्रहरकान्तरेणेत्यर्थः । जागृहि प्रबुध्यस्वेति प्रतिपदमुच्चैरुपहूतो मनुष्योऽनन्तरयामिकोऽद्य निद्रया अविशदवर्णामस्पष्टाक्षरामत एव शून्यशून्यां शून्यप्रायामर्थशून्यामित्यर्थः । प्रकारे गुणवचनस्येति द्विर्भावः [illegible] । [illegible] ददपि । [illegible] । [illegible] नो बुध्यते न जानाति । बुध्यते-

विपुलतरनितम्बाभोगरुद्धे रमण्याः
शयितुमनधिगच्छन् जीवितेशोऽवकाशम् ।
रतिपरिचयनश्यन्नैद्रतन्द्रः कथञ्चि-
द्गमयति शयनीये शर्वरीं किङ्करोतु ॥ ५ ॥
क्षणशयितविबुद्धाः कल्पयन्तः प्रयोगा
नुदधिमहति राज्ये काव्यवद्दुर्विगाहे ।
गहनमपररात्रप्राप्तबुद्धिप्रसादाः
कवय इव महीपाश्चिन्तयन्त्यर्थजातम् ॥ ६ ॥

क्षितितटशयनान्तादुत्थितन्दानपङ्क-
प्लुतबहुलशरीरं शाययत्येष भूयः ।
मृदुचलदपरान्तोदीरिताण्डूनिनाद-
ङ्गजपतिमधिरोहः पल्लकव्यत्ययेन ॥ ७ ॥
द्रुततरकरदक्षाः क्षिप्तवैशाखशैले
दधति दधनि धीरानारवान्वारिणीव ।

हिमकामाः सन्तः उदधिमहति गम्भीरे एकत्र रागादिभिरपरत्र रत्नभास्वरादिभिरेवेति भावः। अत एव दुर्विगाहे दुष्प्रवेशे शब्दे काव्ये इव काव्यतत्त्वं तत्र तद्ध्वेति मति मन्यन्ते। प्रयोगान् सामान्यप्रा-मातृस्थानानि। अन्यार्थगुणगाधु शब्दगुम्फान् अस्तदनलङ्कर्मनः। माद्ये उदर्के उच्चाय चिन्तयेदात्मनोऽहितमिति सत्यादिति मतिः। गम्भीरान्तःस्थापि मन्दत्वं दुर्बोधमर्थजातं पुरुषार्थजातं विमर्शैर्मन्दैः म-न्दव शब्दमस्मिन्नुद्घाटनमभिभेदनात् चिन्तयन्ति विचारयन्ति। एव-मद्भुतोपमन्यत्रात् काव्यदिति दर्शितत्वेऽप्यनेकशब्दार्थगता श्रौती पूर्णा शाब्दार्थोपमा काव्यवर्तिनि दर्शितगता कश्यदृति समासगता चेति सङ्कीर्णा ॥ ६ ॥

क्षितीति। क्षितितटमेव शयनं तस्मात् शयनस्थानान्तादु-त्थितं उन्नीलितमित्यर्थः। अत एव दानपङ्कप्लुतबहुलशरीरं मदकर्दमो-पलिप्तमहाकायं गजपतिमेषः अधिरोहोऽश्वारोहोऽधिरोहकः। मया-दयम्। मृदु मन्दं चलता अपरान्तेन पश्चिमभागेनोदीरित उत्थापि-तोऽण्डूनिनादः शृङ्खलारवो यस्मिन् कर्मणि तद्यथा तथा पल्लव पल्लव पार्श्वः। पल्लः पार्श्वं गजस्याधःशय्यायामवस्थितमिति वैज-यन्ती। तस्य व्यत्ययेन पार्श्वान्तरेणेत्यर्थः। भूयः शाययति शयनं कार-यति। गजनिद्रोत्सादिना अधिपस्तु कर्मेदम्। समासोक्तिरल-ङ्कारः ॥ ७ ॥

शशिनमिव सुरौघाः सारमुद्धर्तुमेते
कलशिमुदधिगुर्वीं वल्लवा लोडयन्ति ॥ ८ ॥
अनुनयमगृहीत्वा व्याजसुप्ता पराची
रुतमथ कृकवाकोस्तारमाकर्ण्य काल्ये ।
कथमपि परिवृत्ता निद्रयान्धा किल स्त्री
मुकुलितनयनैवाश्लिष्यति प्राणनाथम् ॥९॥
गतमनुगतवीणैरेकतां वेणुनादैः

द्रुतेति। द्रुततरकरा अतिलघुहस्तास्ते च ते दक्षाश्च वल्लवा गोपालाः। आभीरः स्यान्महाशूद्रो गोपालो वल्लवस्तथेति वैजयन्ती। विशाखाप्रयोजनमस्येति वैशाखो मन्थनदण्डः। वैशाखमन्थमन्थानमन्थानो मन्थदण्डके इत्यमरः। विशाखाषाढादण् मन्थदण्डयो रित्यण् प्रत्ययः। वैशाखः शैल इवेत्युपमितसमासः साहचर्य्यात्क्षिप्तो वैशाखशैलो यैस्ते धीरान् गम्भीरानारवान्दधति दधनि दध्नि। विभाषा ङिश्योरिति विकल्पादल्लोपाभावः। वारिणीव सुरौघाः शशिनमिव सारं नवनीतमुद्धर्तुं उदकुम्भमुदधिरिव गुर्वीम्। उपमानानि सामान्यवचनैरिति समासः। तां कलशिं कुम्भीं एते लोडयन्ति मथ्नन्ति। अथापि पूर्ववत्पूर्णा वाक्यार्थोपमा वाक्यसमाससङ्कीर्णा च ॥ ८ ॥

अनुनयमिति। अनुनयं प्रियप्रार्थनामगृहीत्वा नाङ्गीकृत्य पराची पराङ्मुखी व्याजेन कपटेन सुप्ता, स्त्री। अथ काल्ये प्रभाते। प्रत्यूषोऽहर्मुखं कल्यमित्यमरः। कृकवाकोः कुक्कुटस्य। कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुध इत्यमरः। कृके वचः कश्चेत्युण् प्रत्ययः। तारमुच्चैः रुतं कूजितमाकर्ण्य कथमपि गात्रजृम्भणादिव्याजेन परिवृत्ता सम्मुखीभूता निद्रयान्धा किल अजानतीव मुकुलितनयनैव मीलिताक्षी सत्येव प्राणनाथमाश्लिष्यति। एषा कलहान्तरिता ॥९॥

कलमविकलतालं गायकैर्बोधहेतोः ।
असकृदनवगीतं गीतमाकर्णयन्तः
सुखमुकुलितनेत्रा यान्ति निद्रां नरेन्द्राः ॥१०॥
परिशिथिलितकर्णग्रीवमामीलिताक्षः
क्षणमयमनुभूय स्वप्नमूर्ध्वज्ञुरेव ।
रिरसयिषति भूयः शष्पमग्रे विकीर्णं
पटुतरचपलौष्ठः प्रस्फुरत्प्रोथमश्वः ॥ ११ ॥

कलमिति । अनुगतैरविच्छिन्नैस्तन्त्रीस्वरैर्वीणावंशादिभिरनुगतैः वैतालिकैः दयितालिङ्गनसुखाद्भूतं कलमव्यक्तमधुरं अविकलौ अविसंवादी तालः कांस्यादितालो यस्य तत् बोधस्य हेतुस्तस्य बोधहेतोः बोधकारित्वेन बोधनार्थमित्यर्थः । अकस्मादपि वाद्यवर्तनिरूपा द्वारा सर्वाश्रित् अपदानस्य शब्दाद्यनर्थप्रसिद्धेहेतुत्वात् षष्ठी । गायकैर्वैतालिकैरनवगीतमगर्हितम् । अवगीतं तु निर्वादे मुहुर्दृष्टेऽपि गर्हिते इति विश्वः । लोकश्लाघ्यमानं वस्तु असकृदनवगीतं गीतवाद्यम् गीतगानं समाकर्णयन्तो नरेन्द्राः सुखेन गानसुखेन मुकुलितनेत्रा निमीलिताक्षाः सन्तः निद्रां यान्ति भजन्ति । स्वभावोक्तिरलङ्कारः ॥१०॥

परीति । अयमश्वः परिशिथिलितं सम्यक्शिथिलं कर्णद्वयं ग्रीवा च यस्मिन् कर्मणि तद्यथा तथा आमीलिताक्षः सन् ऊर्ध्वे जानुनी यस्य स ऊर्ध्वज्ञुः ऊर्ध्वजानुरित्यर्थः । ऊर्ध्वं दण्डं जानु इत्यमरः । अर्ध्वाद्विभाषेति जानुशब्दस्य ज्ञुरादेशः । एवं क्षणं निद्रामनुभूय उत्तमाश्वलक्षणमेतत् । भूयः पुनरपि पटुतरौ व्यापारदक्षतमौ चपलौ चञ्चलौ ओष्ठौ यस्य स तथा प्रस्फुरत् प्रोथस्फुरणकम्पितं यथा तथा । प्रोथा तु घोटकमुखप्रान्तः । अग्रे विकीर्णं क्षिप्तं शष्पम् । शष्पं बालतृणं घास इत्यमरः । रिर-

शशिनमिव सुरौघाः सारमुद्धर्तुमेते
कलशिमुदधिगुर्वीं बल्लवा लोडयन्ति ॥ ८ ॥
अनुनयमगृहीत्वा व्याजसुप्ता पराची
रुतमथ कृकवाकोस्तारमाकर्ण्य कल्ये ।
कथमपि परिवृत्ता निद्रयान्धा किल स्त्री
मुकुलितनयनैवाश्लिष्यति प्राणनाथम् ॥ ९ ॥
गतमनुगतवीणैरेकतां वेणुनादैः

द्रुतेति। द्रुततरकरा अतिलघुहस्तास्ते च ते दक्षाश्च बल्लवा
गोपालाः। आभीरः स्यान्महाशूद्रो गोपालो बल्लवस्तथेति वैजयन्ती।
विशाखस्थानप्रयोजनमस्येति वैशाखो मन्थनदण्डः। वैशाखमन्थमन्थान मन्था-
नो मन्थदण्डके इत्यमरः। विशाखाषाढादण् मन्थदण्डयोरित्यण्
प्रत्ययः। वैशाखः शैल इवेत्युपमितसमासः सामान्याप्रयोगात्। तैर्वैशा-
खशैलैः धीरान् गम्भीरानारवान् दधति दधनि दधि। विभाषा
ङिश्योरिति विकल्पादल्लोपाभावः। वारिणीव सुरौघाः शशिनमिव
सारं नवनीतमुद्धर्तुं उदधिरिव गुर्वीम्। उपमानानि सामा
न्यवचनैरिति समासः। तां कलशिं कुम्भीं एते लोडयन्ति मथ्नन्ति।
अत्रापि पूर्ववदर्थवत्पूर्णा वाक्यार्थोपमा वाक्यसमाससङ्करश्च ॥ ८ ॥

अनुनयमिति। अनुनयं प्रियप्रार्थनामगृहीत्वा नाङ्गीकृत्य पराची
पराङ्मुखी व्याजेन कपटेन सुप्ता स्त्री। अथ कल्ये प्रभाते। प्रत्यू-
षोऽहर्मुखं कल्यमित्यमरः। कृकवाकोः कुक्कुटस्य। कृकवाकुस्ताम्र-
चूडः कुक्कुटश्चरणायुध इत्यमरः। कृके वचः कश्चेत्युण् प्रत्ययः।
तारमुच्चैः रुतं कूजितमाकर्ण्य कथमपि गात्रजृम्भणादिव्याजेन परि-
वृत्ता सम्मुखीभूता निद्रयान्धा किल अजानतीव मुकुलितनयनैव
मीलिताक्षी सत्येव प्राणनाथमाश्लिष्यति। एषा कलहान्तरिता ॥ ९ ॥

कलमविकलतालं गायकैर्बोधहेतो-
रसकृदनवगीतं गीतमाकर्णयन्तः
सुखमुकुलितनेत्रा यान्ति निद्रां नरेन्द्राः ॥१०॥

परिशिथिलितकर्णग्रीवमामीलिताक्षः
क्षणमयमनुभूय स्वप्नमूर्ध्वज्ञुरेव ।
रिरसयिषति भूयः शष्पमग्रे विकीर्णं
पटुतरचपलौष्ठः प्रस्फुरत्प्रोथमश्वः ॥ ११ ॥

कलमिति । अनुगतश्रोत्रैरनुस्वरत्वीणावंशादिभिर्द्रुतादौ वैषम्यरहितः एकतालैकरूपताद्रूतं कलमव्यक्तमधुरं अविकलोऽविसंवादी तालः कांस्यादितालो यस्य तत् बोधस्य हेतुस्तस्य बोधहेतोः बोधकारित्वेन बोधनार्थमित्यर्थः । फलस्यापि कारणत्वमिच्छा द्वारा स्वर्गादिवत् फलरागस्य सर्वाधमप्रवृत्तिहेतुत्वात् षष्ठी । गायकैर्गाथिकैरनवगीतमगर्हितम् । अवगीतं तु निर्वादे मुहुर्दृष्टेऽपि गर्हिते इति विश्वः । गीतक्रियमाणं वस्तु आहत्तितो गीतशब्दस्य गीतद्वानं समाकर्ण्य नो नरेन्द्राः सुखेन गानसुखेन मुकुलितनेत्रा निमीलिताक्षाः सन्तः निद्रां यान्ति भजन्ति । स्वभावोक्तिरलङ्कारः ॥ १० ॥

परीति । अयमश्वः परिशिथिलितं प्रसारितं कर्णग्रीवं कर्णौ च ग्रीवा च यस्मिन् कर्मणि तद्यथा तथा आमीलिताक्षः ऊर्ध्वे जानुनी यस्य स ऊर्ध्वज्ञुः ऊर्ध्वजानुस्थित इत्यर्थः । ऊर्ध्वं तु ऊर्ध्व जानु स्यादित्यमरः । ऊर्ध्वाद्विभाषेति जानुशब्दस्य ज्ञुरादेशः । क्षणं निद्रामनुभूय स्वप्नावस्थामेतत् । भूयः पुनरपि पटुतरौ ग्रासग्रहणसमर्थौ चपलौ चञ्चलौ ओष्ठौ यस्य स तथोक्तः प्रस्फुरत् प्रोथमुत्स्फुरत्प्रोथं यथा तथा । प्रोथो तु घोणमित्यमरः । अग्रे विकीर्णं क्षिप्तं शष्पम् । शष्पं बालतृणं घासं इत्यमरः । रिर-

शशिनमिव सुरौघाः सारमुद्धर्तुमेते
कलशिमुदधिगुर्वीं वल्लवा लोडयन्ति ॥ ८ ॥
अनुनयमगृहीत्वा व्याजसुप्ता पराची
रुतमथ कृकवाकोस्तारमाकर्ण्य कल्ये।
कथमपि परिवृत्ता निद्रयाऽन्धा किल स्त्री
मुकुलितनयनैवाश्लिष्यति प्राणनाथम् ॥९॥
गतमनुगतवीणैरेकतां वेणुनादैः

द्रुतेति। द्रुततरकरा अतिलघुहस्तास्ते च ते दक्षाश्च वल्लवा गोपालाः। आभीरः स्यान्महाशूद्रो गोपालो वल्लवस्तथेति वैजयन्ती। विशाखाप्रयोजनमस्येति वैशाखो मन्थनदण्डः। वैशाखमन्थमन्थानमन्थानो मन्थदण्डके इत्यमरः। विशाखाषाढादण् मन्थदण्डयोरित्यण् प्रत्ययः। वैशाखः शैलस्तेनेत्युपमितसमासः। साहचर्यात्तिष्योरैशाखयोरेको यस्मिन् धीरान् गम्भीरानारवान् दधति दधनि दधि। विभाषा ङिश्योरिति विकल्पादल्लोपाभावः। वारिधाविव सुरौघाः शशिनमिव सारं नवनीतमुद्धर्तुं उदधिवदुदधिरिव गुर्वीम्। उपमानानि सामान्यवचनैरिति समासः। तां कलशिं कुम्भीं मेते लोडयन्ति मथ्नन्ति। अत्रापि पूर्ववदुत्तरार्धे शाब्द्यार्थोपमा वाक्यसमाससङ्करश्च ॥ ८ ॥

अनुनयमिति। अनुनयं प्रियप्रार्थनामगृहीत्वा नाङ्गीकृत्य पराची पराङ्मुखी व्याजेन कपटेन सुप्ता स्त्री। अथ कल्ये प्रभाते। प्रत्यूषोऽहर्मुखं कल्यमित्यमरः। कृकवाको कुक्कुटस्य। कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुध इत्यमरः। कृके वचः कश्चेत्युण् प्रत्ययः। तारमुच्चै रुतं कूजितमाकर्ण्य कथमपि गात्रजम्भणादिव्याजेन परिवृत्ता सम्मुखीभूता निद्रयान्धा किल अजानतीव मुकुलित नयनैव मीलिताक्षी सत्येव प्राणनाथमाश्लिष्यति। एषा कलहान्तरिता ॥९॥

कलमविकलतालं गायकैर्बोधहेतोः ।
असकृदनवगीतं गीतमाकर्ण्य यन्तः
सुखमुकुलितनेत्रा यान्ति निद्रां नरेन्द्राः ॥१०॥
परिशिथिलितकर्णग्रीवमामीलिताक्षः
क्षणमयमनुभूय स्वप्नमूर्ध्वज्ञुरेव ।
रिरसयिषति भूयः शष्पमग्रे विकीर्णं
पटुतरचपलौष्ठः प्रस्फुरत्प्रोथमश्वः ॥ ११ ॥

गतमिति । अनुगतवीणैरनुसृतवीणैर्वेणुनादैर्वंशध्वनिभिः एकतामैक्यमुपगतमनुस्यूतं कलमव्यक्तमधुरं अविकलोऽविसंवादी तालः कांस्यादितालो यस्य तत् बोधस्य हेतुस्तस्य बोधहेतोः बोधकार्येण बोधनार्थमित्यर्थः । फलस्यापि कारणत्वमिच्छा द्वारा स्वर्गादिवत् परम्परया तद्बोधप्रवृत्तिहेतुत्वात् षष्ठी । गायकैर्गायनैरनवगीतमगर्हितम् । अवगीतं तु निर्वादे मुहुर्दृष्टेऽपि गर्हिते इति विश्वः । गीतश्रीयमानं वस्तु श्राव्यत्वाद्गीतमत्रस्य गीतज्ञानं समाकर्ण्य नो नरेन्द्राः सुखेन गानसुखेन मुकुलितनेत्रा निमीलिताक्षाः सन्तः निद्रां यान्ति भजन्ति । स्वभावोक्तिरलङ्कारः ॥१०॥

परीति । अयमश्वः परिशिथिलितं श्लथीकृतं कर्णग्रीवं यस्मिन् कर्मणि तद्यथा तथा आमीलिताक्षः ऊर्ध्वे जानुनी यस्य स ऊर्ध्वज्ञुः ऊर्ध्वजानुर्निर्विकल्पः । ऊर्ध्वं दण्डवत् जानु यस्यादिशब्दः । अर्ध्वाद्विभाषेति जानुपदस्य ज्ञुरादेशः । स्वप्नं निद्रामनुभूय क्षणमात्रमनुभूयेतत् । भूयः पुनरपि पटुतरौ व्यापारपटुतमौ चपलौ चञ्चलौ ओष्ठौ यस्य स तथा प्रस्फुरत्प्रोथमुत्फुरत्प्रोथं यथा तथा । प्रोथस्तु प्रोथमस्त्रियामित्यमरः । अग्रे विकीर्णं क्षिप्तं शष्पम् । शष्पं बालतृणं घास इत्यमरः । रिर-

शशिनमिव सुरौघाः सारमुद्धर्तुमेते
कलशिमुदधिगुर्वीं वल्लवा लोडयन्ति ॥ ८ ॥
अनुनयमगृहीत्वा व्याजसुप्ता पराची
रुतमथ कृकवाकोस्तारमाकर्ण्य कल्ये।
कथमपि परिवृत्ता निद्रयाऽन्धा किल स्त्री
मुकुलितनयनैवाश्लिष्यति प्राणनाथम् ॥९॥
गतमनुगतवीणैरेकतां वेणुनादैः

दूरेति। दूरतरका अतिलघुश्रवास्ते च ते दधाव वल्लवा गोपालाः। आभीरः स्यान्महाशूद्रो गोपालो वल्लवस्तथेति वैजयन्ती। विशाखादयोऽजनमस्येति वैशाखो मन्थदण्डः। वैशाखमन्थमन्थान मन्थानो मन्थदण्डके इत्यमरः। विशाखाषाढादण् मन्थदण्डयो रित्यण् प्रत्ययः। वैशाखः यैरुद्वेल्युपमितसमासः साहचर्यात्सुपिप्रोशैमा-खयैरो यस्मिन् धीरान् गम्भीरानारवान्दधति दधनि दधि। विभाषा ङिश्योरिति विकल्पादल्लोपाभावः। वारिधौव सुरौघाः शशिनमिव सारं नवनीतमुद्धर्तुं उतकुम्भमुदधिमिव गुर्वीम्। उपमानानि सामान्यवचनैरिति समासः। तां कलशिं कुम्भीं एते लोडयन्ति मथ्नन्ति। अत्रापि पूर्ववत्पूर्णा वाक्यार्थोपमा वाक्यसमासगतोपमाद्वयं चेति च ॥ ८ ॥

अनुनयमिति। अनुनयं प्रियप्रार्थनामगृहीत्वा नाङ्गीकृत्य पराची पराङ्मुखी व्याजेन कपटेन सुप्ता स्त्री अथ कल्ये प्रभाते। प्रत्यूषोऽहर्मुखं कल्यमित्यमरः। कृकवाकोः कुक्कुटस्य। कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुध इत्यमरः। अके वचः कवद्दृत्यण् प्रत्ययः। तारस्वरैः रुतं कूजितमाकर्ण्य कथमपि गात्रजृम्भणादिव्याजेन परिवृत्ता सम्मुखीभूता निद्रयान्धा किल अजानतीव मुकुलितनयनैव मीलिताक्षी सत्येव प्राणनाथमाश्लिष्यति। एषा कलहान्तरिता ॥९॥

कलमविकलतालं गायकैर्बोधहेतोः ।
असकृदनवगीतं गीतमाकर्णयन्तः
सुखमुकुलितनेत्रा यान्ति निद्रां नरेन्द्राः ॥१०॥

परिशिथिलितकर्णग्रीवमामीलिताक्षः
क्षणमयमनुभूय स्वप्नमूर्द्धज्ञुरेव ।
रिरसयिषति भूयः शष्पमग्रे विकीर्णं
पटुतरचपलौष्ठः प्रस्फुरत्प्रोथमश्वः ॥ ११ ॥

कलमिति । अनुगत[illegible] वंशस्तैः
[illegible] कलमव्यक्तमधुरं अविकलोऽविसंवादी तालः
कांस्यादितालोपकरणं तत् बोधस्य हेतुरस्य बोधहेतोः बोधकारित्वेन
बोधनार्थमित्यर्थः । कलस्यापि कारणतामिच्छा द्वारा स्वर्गादिवत्
[illegible] हेतुत्वात् पञ्चमी । गायकैर्गायकवैरनवगी-
तमगर्हितम् । अवगीतं तु निर्वादे कुत्सितेऽपि गर्हिते इति विश्व-
[illegible] गीतस्य [illegible] आकर्णय-
न्तो नरेन्द्राः सुखेन गानसुखेन मुकुलितनेत्राः निमीलिताक्षाः सन्तः
निद्रां यान्ति प्राप्नुवन्ति । स्वभावोक्तिरलङ्कारः ॥ १० ॥

परीति । अयमश्वः परिशिथिलितं [illegible] कर्णं ग्रीवं
च [illegible] तथा [illegible] ऊर्ध्वे
जानुनी यस्य स ऊर्ध्वज्ञुः ऊर्ध्वजानुः [illegible] । ऊर्ध्व [illegible]
जानु [illegible] । [illegible] । स्व-
प्नं निद्रामनुभूय [illegible] एतत् । भूय पुनरपि पटुतरौ
[illegible] चपलौ ओष्ठौ यस्य स च प्रस्फुरत्
प्रोथम् [illegible] यदा तदा । प्रोथा तु [illegible] ।
अग्रे विकीर्णं क्षिप्तं शष्पम् । [illegible] । रि०-

उदयमुदितदीप्तिर्याति यः सङ्गतौ मे
पतति न वरमिन्दुः सोऽपरामेष गत्वा ।
स्मितरुचिरिव सद्यः साभ्यसूयम्प्रभेति
स्फुरति विशदमेषा पूर्वकाष्ठाङ्गनायाः ॥ १२ ॥
चिररतिपरिखेदप्राप्तनिद्रासुखानां
चरममपि शयित्वा पूर्वमेव प्रबुद्धाः ।
अपरिचलितगात्राः कुर्वते न प्रियाणा
मशिथिलभुजचक्राश्लेषभेदन्तरुण्यः ॥ २३ ॥

अयियति रसयितुमास्वादयितुमिच्छति । रसयते' सन्नन्ताल्लट् । स्वभा-वोक्तिरलङ्कारः । स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम् ॥ ११ ॥

उदयमिति । य इन्दुः मे मम सङ्गतादुदितदीप्तिः सञ्जातदीप्तिः सन् उदयमुदयाद्रिं अभ्युदयञ्च याति स इन्दुरेषोऽपराम्पश्चिमामाशामप-राङ्गनाञ्च गत्वा पतति अस्तमेति पातित्यञ्च गच्छति न वरमनर्थ-मित्यर्थः । इति सद्यः साभ्यसूयं यथा तथा पूर्वकाष्ठा प्राची सैवा-ङ्गना पूर्वनायिका च गम्यते तस्याः स्मितरुचिर्मन्द हासकान्तिरि-वैषा प्रभा विशदं निर्मलं स्फुरति प्रकाशते प्राच्या सौषसिदा प्रभा प्रादुरभूदित्यर्थः । अत्र प्राचीगतप्रभातिक प्रभायामिन्दोः परा-ङ्गनासङ्गपातित्यनिमित्ता चेतनधर्म्मस्मित रुचित्वोत्प्रेक्षा पूर्वकाष्ठाङ्ग-नाया इति रूढिव्यूढेत्यनयोरङ्गाङ्गिभावेन सङ्करः ॥ १२ ॥

चिरेति । चरममपि शयित्वा पश्चात् सुप्त्वापि पूर्वमेव प्रबुद्धाः । उत्तमे पश्चाच्च या शेते पूर्वमेव प्रबुध्यते । नान्यद्भावयते चित्ते सा स्त्री ज्ञेया पतिव्रतेति स्मरणादिति भावः । तथापि तरुण्यः अपरि-चलितगात्राः [illegible]
सुप्तानाम्प्रियाणाम् अशिथिलो गाढो यो भुजचक्रेण परस्पर भुजवलयेना-

क्षतघनतिमिरभेदैः कुङ्कुमेनेव किञ्चि-
न्मलयरुहरजोभिर्भूषयन् पश्चिमाशाम् ।
हिमरुचिररुणिम्ना राजते रज्यमानै-
र्जरठकमलकन्दच्छेदगौरैर्मयूखैः ॥ १४ ॥
दधदसकलमेकं खण्डितामानमद्भिः
श्रियमपरमपूर्णामुच्छ्वसद्भिः पलाशैः ।
कलरवमुपगीते षट्पदौघेन धत्तः
कुमुदकमलषण्डे तुल्यरूपामवस्थाम् ॥ १५ ॥

न्वेष· अस्य भेदं विशेषं विभ्रमं न कुर्वन्ति किन्त्वाविर्भावयन्ति स्थिताः
चन्द्रा तदिङ्गामङ्गः स्यात् । प्रयाणं च प्रबोधेर्देदिति विशेषाच्छ-
न्दमर्यादिति भावः । दक्षिणपोऽस्य वक्षारी तदनु मालो निद्रा ॥ १३ ॥

क्षतेति । हिमरुचिश्चन्द्रः अरुणिम्ना अरुणगुणेन हेतुना रज्य-
मानैर्लोहितायमानैः । रञ्जेर्दैवादिकात्कर्तरि शानच् 'अनिदिताम्' इति
नलोपः । लोहित लक्षिते राजति लोहितायते चाकाश इति मूर्धन्यः ।
जरठस्य परिणतस्य कमलकन्दस्य छेदा इव गौराः शुभ्राः । छेदप-
द्मस्याग्न्यादेः । गौरः पीते सिते अरुणे इति विश्वः । तैर्मयूखैः
कुङ्कुमेन किञ्चित् क्षतघनतिमिरभेदैः पश्चिमाशां मलयरुहरजोभिश्चन्दनरेणुभिरिव पश्चिमाशां प्रतीचीं दिशमिति भावः ।
भूषयन् राजते । उपमालङ्कारः ॥ १४ ॥

दधदिति । एकं कुमुदषण्डमानमद्भिर्मुकुलीभवद्भिः पलाशैः दलैः-
रसकलमपूर्णां श्रियं शोभामपचितैः बिभ्रत् अपरं कमल-
षण्डमुच्छ्वसद्भिः विकसद्भिः पलाशैरपूर्णां शोभां बिभ्रत्
षट्पदौघेन कलरवं यथा तथा उपगीते उभे षण्डे । कुमुद-
कमलषण्डे कुमुदानां कमलानां च षण्डे वृन्दे । षण्डो षण्डम-

मदरुचिमरुणेनोद्गच्छता लम्भितस्य
त्यजत इव चिराय स्थायिनीमाशु लज्जाम्।
वसनमिव मुखस्य स्रंसते सम्प्रतीदं
सितकरकरजालं वासवाशायुवत्याः ॥ १६ ॥
अविरतरतलीलायासजातश्रमाणा
मुपशममुपयान्तं निःसहेऽङ्गेऽङ्गनानाम्।
पुनरुपसि विविक्तैर्मातरिश्वावचूर्ण्य
ज्वलयति मदनाग्निं मालतीनां रजोभिः॥१७॥

स्त्रियामित्यमरः। तद्रूपामनस्याभ्रमः दधाति। अत्र प्रबन्धद्वयो-रधिकरणैककल्पकस्य भ्रमः कस्य वा इन्द्रिरिति दुर्वह मिति भावः। अतोऽभयविशेषणानान्तु धान्यसाधारणहेतुकत्वात् काव्यलिङ्गम्। तेन द्वयोः क्रमेणोपमानोपमेयभावरूपोपमेयोपमा व्यज्यते ॥ १५ ॥

मदेति। सम्प्रति सितकरस्येन्दोः इदं करजालं कर्तृ उद्गच्छता उद्यता अरुणेन अनूरुणा मदरुचिमत्तुल्यां रुचिं अरुणिमानमित्यर्थः अतएव निदर्शनालङ्कारः। लम्भितस्य प्रापितस्य। लभेर्ण्यन्तात्कर्मणि क्तः लभेश्चेति नुमागमः। अतएव चिराय स्थायिनीं लज्जामाशु त्यजत इव सुखप्रकाशना दियमुत्प्रेक्षा। वासवाशा प्राची तस्या एव युवत्यास्तस्य प्राग्भागस्याननस्य वसनमिवावगुण्ठनपट इव स्रंसते गलति रक्ताः स्त्रियः प्रौढमुग्धा निर्लज्जा कृतावगुण्ठनाद् भवन्तीति भावः। अत्र मुखस्येति प्राग्भागवदनयोरभेदाध्यवसायात् श्लेषमूलातिशयोक्तिः तया पूर्वोक्तनिदर्शनोत्प्रेक्षाभ्यां चानुगृहीता वसनमिवेत्युत्प्रेक्षेति सङ्करः ॥ १६ ॥

अविरतेति। अविरतरतलीलायासेनाविच्छिन्नसुरतक्रीडाप्रयासेन जातश्रमाणामङ्गनानां सम्बन्धिनि निःसहत इति निःसहे अक्षमे।

अनिमिषमविरामा रागिणां सर्वरात्रं
नवनिधुवनलीलाः कौतुकेनातिवीक्ष्य ।
इदमुदवसितानामस्फुटालोकसम्पन्-
नयनमिव सनिद्रं घूर्णते दैपमर्चिः ॥ १८ ॥
विकचकमलगन्धैरन्धयन् भृङ्गमालाः
सुरभितमकरन्दं मन्दमावाति वातः ।

पचाद्यच् । अङ्गे भ्रमणमनुपचारं भ्राम्यन्तं मदन एवाग्निस्तं पुन श्वसिति मातरि अन्तरिक्षे श्वयति वर्द्धते इति मातरिश्वा । श्वन्नुक्षन्-इत्यादिना औणादिको निपातः । विविक्तैरसंकीर्णैश्च मालतीनां जातीकुसुमानाम् । सुमना मालती जातिरित्यमरः । रजोभिः परागैः करीषैरिवेति भावः । अनुरूपं अवश्यं संधुक्षयतीति भावः । उद्दीपयति प्राभातिकमालतीवातस्पर्शात्पुनरुद्बुद्धो मदन इत्यर्थः ॥ १७ ॥

अनिमिषमिति । इदं पुरोवर्ति अस्फुटा सूर्यतेजोऽभिभवादसमाना आलोकसम्पत् प्रकाशसम्पत्तिर्यस्य तत् अन्यत्र निद्राभिभवादस्फुटबुद्धविषयावधानशक्तिकं दीपस्येदं दैपमर्चिः ज्वाला । ज्वालाभासोर्न पुंस्यर्चिरित्यमरः । सर्वस्यां रात्राविति सर्वरात्रम् । पूर्वकालेत्यादिना समासः अहः सर्वैकदेशेत्यादिना समासान्तः रात्राह्नाहाः पुंसीति पुंवि कृता अत्यन्तसंयोगे द्वितीया । अविरामाः अविच्छिन्नाः रागिणां कामिनां कामिनीनां च । पुमान् स्त्रियेत्येकशेषः । नवा निधुवनलीलाः सुरतविलासान् । व्यवायो ग्राम्यधर्मो वा रतं निधुवनञ्च इत्यमरः कौतुकेन न निमिषतीत्यनिमिषं यथा तथा । पचाद्यच् कुटादित्वात् गुणः । अतिवीक्ष्य अतएव सनिद्रं उदवसितानां गृहाणां सम्बन्धि गृहगेहोदवसितं वेश्म सद्म निकेतनमित्यमरः । नयनमिवेत्युत्प्रेक्षा घूर्णते भ्रमति ॥ १८ ॥

विकचेति । प्रमदमदनाभ्यां पूर्वमन्याभ्यां मादयन्तीनां यौव

प्रमदमदनमाद्यद्यौवनोद्दामरामा
रमणरभसखेदस्वेदविच्छेददक्षः ॥ १९ ॥
लुलितनयनताराः क्षामवक्त्रेन्दुबिम्बा
रजनय इव निद्राक्रान्तनीलोत्पलाक्ष्यः ।
तिमिरमिव दधानाः स्रंसिनः केशपाशा
नवनिपतिगृहेभ्यो यान्त्यमूर्वारवध्वः ॥ २० ॥

नेनोद्दामानां च रामाणां स्त्रीणां रमणरभसखेदेन सुरतसंरम्भश्रमेण यः स्वेदः तस्य छेदे हरणे दक्षो वातः प्रभातमारुतः विकचकमलगन्धैर्भृङ्गमालाः अन्धयन्नन्धाः कुर्वन्मोहयन् । अन्धयतेस्तत् करोतीति ण्यन्ताल्लटः शत्रादेशः । सुरभितः सुरभीकृतो मकरन्दो यस्मिन् कर्मणि तद्यथा तथा मन्दमाक्रान्ति प्रवर्तति । अत्र वृत्त्यनुप्रासोऽलङ्कारः । श्लेष प्रसादः समता माधुर्य सुकुमारता । अर्थव्यक्तिरुदारत्वमोजः कान्तिसमाधयइति आचार्योक्ताः दश गुणाः प्रायेणात्र सम्भवन्तीति निपुणैरूह्याः ॥ १९ ॥

लुलितेति । लुलितनयनताराः निद्राकलुषिताक्षिकनीनिकाः अ-न्यत्राप्रसन्ननक्षत्राः । तारा चाक्षिमध्ययोस्तारेति विश्वः । वक्त्राणीन्दुबिम्बानीवेत्युपमितसमासः । तिमिरमिवेत्यादिलिङ्गात् अन्यत्र वक्त्राणीवे-न्दुबिम्बानि तानि क्षामाणि सुरतप्रभाताभ्यां क्षामानि यासान्ताः निद्रया स्वप्नेन मुकुलीभावेन क्रान्तानि नीलोत्पलानि अक्षीणीव नी-लोत्पलानीव वाक्षीणि यासान्ताः स्रंसिनः केशपाशान् तिमिरमिवा-न्यत्र तु तानिव तिमिरन्दधानाः अतएव रजन्यइव स्थिताः । अमूर्वारवध्व वेश्याः । वारस्त्री गणिका वेश्येत्यमरः । अवनिपतिगृहेभ्यो-यान्ति । निर्यान्ति । श्लिष्टविशेषणेयमुपमेत्येके श्लेषएवायमुभयविषयः उपमा तु प्रतिभामात्रसारा इत्यन्ये ॥ २० ॥

शिशिरकिरणकान्तं वासरान्तेऽभिसार्य्य
श्वसनसुरभिगन्धिः साम्प्रतं सत्वरेव ।
व्रजति रजनिरेषा तन्मयूखाङ्गरागैः
परिमिलितमनिन्द्यैरम्बरान्तं वहन्ती ॥२१॥

नवकुमुदवनश्रीहासकेलिप्रसङ्गा-
दधिकरुचिरशेषामप्युषां जागरित्वा ।
अयमपरदिशोऽङ्के मुञ्चति स्रस्तहस्तः
शिशयिषुरिव पाण्डुं म्लानमात्मानमिन्दुः २२

शिशिरेति । एषा रजनिर्वासरान्ते रात्रौ शिशिरकिरणश्चन्द्रस्तमेव कान्तमभिसार्य्याभिसृत्य । स्वार्थे णिच् । साम्प्रतं श्वसनैः तत्कालवातैः निश्वासैश्च सुरभिगन्धि सुगन्धिः अनिन्द्यैः मनोहरैर्मयूखैरेवाङ्गरागैः परिमिलितं व्याप्तं वासितञ्चाम्बरान्तं नभःप्रान्तं वस्त्रान्तञ्च वहन्ती भजन्ती सत्वरेव व्रजति । अत्रेन्दुतन्मयूखादीनां कान्तत्वाङ्गरागत्वादिरूपणादेकदेशविवर्त्ति रूपकम् ॥ २१ ॥

नवेति । अधिकरुचिरयमिन्दुर्नवकुमुदवनश्रियो विकासः परिहासस्य स एव केलिस्तस्याः प्रसङ्गादासङ्गादशेषामप्युषां सकलामपि रात्रिम् । विभावरी नक्तमुषा शर्वरीति विश्वः । अत्यन्तसंयोगे द्वितीया । जागरित्वा जागरणं कृत्वा शिशयिषुः शयितुमिच्छुरिव । शेतेः सन्नन्तादुप्रत्ययः । स्रस्तो हस्तो नक्षत्रविशेषः करश्च यस्य स सन् अपरदिशः पश्चिमदिशोऽङ्के समीपे उत्सङ्गे च पाण्डुं पाण्डुवर्णं म्लानं क्लान्तमात्मानं स्वशरीरं मुञ्चति दक्षिणनायकः कयाचित्सह विहृत्य श्रान्तः कस्याश्चिदङ्के शेते तद्वदिति भावः । अत्र महासकेल्यङ्कसंस्रंसनादिव्यवहारादिन्दुकुमुदवनश्रीपश्चिमानां नायकत्वप्रतीतेः समासोक्तिरलङ्कारः । विशेषणसाम्यं तूपलक्षणमित्यलङ्कारसर्वस्वकारः सा चोत्प्रेक्षाङ्गी ॥२२

सरभसपरिरम्भारम्भसंरम्भभाजा
यदधिनिशमपास्तं वल्लभेनाङ्गनायाः ।
वसनमपि निशान्ते नेष्यते तत्प्रदातुं
रथचरणविशालश्रोणिलोलेक्षणेन ॥ २३ ॥

सपदि कुमुदिनीभिर्मीलितं हा क्षपापि
क्षयमगमदपेतास्तारकास्ताः समस्ताः ।
इति दयितकलत्रश्चिन्तयन्नङ्गमिन्दु-
र्वहति कृशमशेषं भ्रष्टशोभं शुचेव ॥ २४ ॥

व्रजति विषयमक्ष्णामंशुमाली न याव-
त्तिमिरमखिलमस्तं तावदेवारुणेन ।

सेति । अधिनिशं निशायाम् । विभक्त्यर्थेऽव्ययीभावः । सरभसः सत्वरः परिरम्भ एवारम्भो व्यापारस्तत्संरम्भस्तद्भाजा वल्लभेनाङ्गनायाः सम्बन्धि यद्वसनमपास्तं तद्वसनं निशान्ते प्रभातेऽपि रथचरणाङ्ककान्तद्विशालायाः श्रोण्यां लोलं सतृष्णमीक्षणं यस्य तेन वल्लभेन प्रदातुं नेष्यते । अत्र वसनाप्रतिदानस्य श्रोणीक्षणलौल्यहेतुकत्वात्काव्यलिङ्गम् ॥ २३ ॥

सपदीति । सपदि सद्यः कुमुदिनीभिर्मीलितम् । भावे क्तः । हा हन्त क्षपा रात्रिरपि क्षयमगमत् ताः समस्तास्तारका अपेता इति शुचा शोकेन चिन्तयन्निव दयितकलत्रः प्रियभार्य इन्दुः कृशमशेषं निःशेषं यथा तथा भ्रष्टशोभं नष्टप्रभमङ्गं वहति कलत्रप्रियस्य युगपत्सकलकलत्रनाशे महान् शोको भवतीति भावः । अत्रेन्दोः प्रभातप्रयुक्ताङ्गकार्श्यशोभाभ्रंशयोर्युगपत् कुमुदिन्यादिसकलकलत्रनाशनिमित्तकत्वमुत्प्रेक्ष्यते ॥ २४ ॥

परपरिभवि तेजस्तन्वतामाशु कर्तुं
प्रभवति हि विपक्षोच्छेदमग्रे सरोऽपि ॥२५॥

विगततिमिरपङ्कं पश्यति व्योम यावत्
धुवति विरहखिन्नः पक्षती यावदेव ।
रथचरणसमाह्वस्तावदौत्सुक्यनुन्ना
सरिदपरतटान्तादागता चक्रवाकी ॥ २६ ॥

भजतीति । अंशुमाली सूर्यः । व्रीह्यादित्वादिनिप्रत्ययः । यावदस्तां विषयभूमिं न भजति न स्पृशतीत्यर्थः तावदेवारुणेनानूरुणा अखिलतिमिरमस्तमपास्तं परेषां परिभवि तिरस्कारकम् । विप्रुहीत्यादिना इनिप्रत्ययः । तेजः प्रतापं तन्वतां प्रथयतां अग्रे सरतीत्यग्रेसरः पुरःसरोऽपि । पुरोऽग्रतोऽग्रेषु सर्तेरिति टप्रत्ययः । विपक्षस्य शत्रोरुच्छेदं कर्तुमाशु प्रभवति शक्नोति हि । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ २५ ॥

विगतेति । विरहेण खिन्नः रथचरणेन चक्रेण समाह्वस्तु-ल्याख्यः तस्यैव समाह्वा समाख्या यस्येति वा रथचरणसमाह्वश्चक्रवाक इत्यर्थः । कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयनामक इत्यमरः । तिमिरमङ्क-मिवेत्युपमितसमासः । तद्विगतं यस्मात्तद्व्योम यावत्पश्यति यावदेव पक्षती पक्षमूले । स्त्री पक्षतिः पक्षमूलमित्यमरः । पक्षात्तिरिति तिप्रत्ययः । धुवति कम्पयति धुनोति । धू विधूनन इति धातोस्तौदा-दिकत्वादुवङादेशः । तावदेवोत्पतनात् प्रागेव चक्रवाकी चक्रवाकस्य स्त्री । जातेरस्त्रीविषयादयोपधादिति ङीप् । औत्सुक्येनोत्कण्ठया तुन्ना प्रेरिता सती सरितोऽपरतटान्तात्परभूमेः सकाशादागता एतेनानयो-रनन्यमनस्कता समानानुरागत्वमुक्तम् । अत्र रागौत्सुक्ययोरसमभावयोस्ति-र्यक्तत्त्वेनाभासयोर्निबन्धनादूर्जस्वी नामालङ्कारः । रसभावतदाभासप्र-शमानां निबन्धने रसात् प्रेय ऊर्जस्वि समाहितानीति दण्डिवचनात् ॥ २६ ॥

मुदितयुवमनस्कास्तुल्यमेव प्रदोषे
स्रुचमदधुरुभय्यः कल्पिता भूषिताश्च ।
परिमलरुचिराभिर्व्यक्तास्तु प्रभाते
युवतिभिरुपभोगान्नीरुचः पुष्पमालाः ॥२७॥
विलुलितकमलौघः कीर्णवल्लीवितानः
प्रतिवनमवधूताशेषशाखिप्रसूनः ।
क्वचिदयमनवस्थः स्थास्नुतामेति वायु
र्वधुकुसुमविमर्दोद्गन्धिवेश्मान्तरेषु ॥ २८ ॥

मुदितेति। प्रदोषे रात्रौ मुदितानि यूनां मनांसि याभिस्ता मुदितयुवमनस्काः। उरःप्रभृतिभ्यः कप्। कल्पिताः उपभोगाय सम्पादिताः भूषिता मलयजस्नानादिभिरुपस्कृताश्च उभय्यः उभयविधाः युवतयः पुष्पमालाश्च। उभादुदात्तो नित्यमिति उभस्य अयजादेशः टिड्ढाणञित्यादिना ङीप्। तुल्यमेवाविशेषं यथा तथाहुः शोभामदधुरित्यर्थः। धाञो लिट्। प्रभाते तूपभोगान्नीरुचो निष्प्रभाः पुष्पमालाः परिमलेन विमर्दगन्धेन रुचिराभिरुपभोगादधिरुचिराभिर्युवतिभिर्व्यक्तास्त्यक्ताः अवधीरिताश्च। अत्र पुष्पमालाभ्यो युवतीनां साम्योक्तिपूर्वकं विमर्दसहत्वेनाधिक्योक्तेर्व्यतिरेकः॥ २७॥

विलुलितेति। वने वने प्रतिवनम्। यथार्थेऽव्ययीभावः। विलुलिता आलोलिताः कमलौघा येन सः कीर्णा विक्षिप्ता वल्लीनां माधव्यादीनां वितानाः विस्तारा येन सः अवधूतान्यशेषशाखिनां वकुलचम्पकादीनां प्रसूनानि येन स तथापि क्वचित् पुष्पोत्करकमलवनादौ स्थितोऽपि नावस्थितः स्थितिरहितोऽनवस्थः स्थितिमप्राप्तोऽयं वायुर्वधूनां कुसुमानां च विमर्देन सम्मर्देन उद्गन्धिषु उद्भूतगन्धेषु। गन्धस्येत्वम्। वेश्मान्तरेषु गृहान्तरेषु स्थास्नुतां स्थायित्वमेति पुष्पोक्त एवोद्गन्धसौरभलोभादिति

नखपदवलिनाभीसन्धिभागेषु लक्ष्यः
क्षतिषु च दशनानामङ्गनायाः सशेषः ।
अपि रहसि कृतानां वाग्विहीनोऽपि जातः
सुरतविलसितानां वर्णकोवर्णकोऽसौ ॥२९॥
प्रकटमलिनलक्ष्मा म्लिष्टपत्त्रावलीकै-
रधिगतरतिशोभैः प्रत्युषः प्रोषितश्रीः ।

भावः । ग्लाजिस्थश्चेति ग्स्नुच् प्रत्ययः मधुशब्दोऽत्रोकारान्तोऽप्यस्ति । यद्वा *मधुकुसुमेति पाठे मधुः सुक्तानि कुसुमानि तेषां विमर्द-नेत्यर्थः अत्र वायोरस्थायित्वेऽपि स्थायित्वसम्बन्धोक्तेरतिशयोक्तिः तथा विमर्दगन्धस्य कमलादि गन्धादाधिक्यरूपव्यतिरेकप्रतीतेरलङ्कारेणा-लङ्कारध्वनिः ॥ २८ ॥

नखपदेति । नखपदेषु नखक्षतेषु वलिषु त्रिवलिषु नाभ्यां सन्धि-भागेषु कूर्परादिदेहसन्धिस्थानेषु तथा दशनानां क्षतिषु दन्तव्रणेषु च सशेषः सावशेषः किञ्चिद्विद्यमानः अतएव लक्ष्यो दृश्यः अङ्गनायाः सम्बन्धी असौ वर्णयति वर्णं करोति रञ्जयतीति वर्णको अङ्गरागो वा-ग्विहीनो वागिन्द्रियरहितोऽपि सन् रहसि कृतानामपि सुरतविल-सितानां सुरतचेष्टितानां वर्णयति वक्तीति वर्णको वक्ता व्यञ्जक इत्यर्थः । वर्णयतेर्ण्वुल्प्रत्ययः । वर्णक्रियाया विस्तारे गुणोक्तौ वर्णनेष्यत इति भट्टमल्लः । जातनखक्षतादिष्वेव लक्ष्यमाणोऽङ्गरागोऽन्यत्र स्वविलो-पाच्चेष्टाविशेषानुमापको जात इत्यर्थः अत्र वाग्विहीनोऽपि रहस्यकृता-नामपि वर्णकोऽभूदिति विरोधस्य व्यञ्जकत्वलक्षणया परिहाराद्विरोधा-भासोऽलङ्कारः ॥ २९ ॥

प्रकटेति । उषसि प्रत्युषः । विभक्त्यर्थेऽव्ययी भावः । यद्वा प्रत्युषः प्रभातम् । उषः प्रत्युषसी अपीत्यमरः । तत्र प्रोषितश्रीर्भ्रष्टशोभः अतएव प्रकटमलिनलक्ष्मा स्पष्टकलङ्कोऽसौ चन्द्रमाः कृश. प्रमृदाः

उपहसित इवासौ चन्द्रमाः कामिनीना
म्परिणतशरकाण्डापाण्डुभिर्गण्डभागैः ॥२०॥
सकलमपि निकामङ्कामलोलान्यनारी
रतिरभसविमर्दैर्भिन्नवत्यङ्गरागे ।
इदमतिमहदेवाश्चर्य्यमाश्चर्य्य धाम्नः
स्तव खलु मुखरागो यन्न भेदम्प्रयातः ॥२१॥
प्रकटतरमिमम्मा द्राक्षुरन्या रमण्यः
स्फुटमिति सविशङ्कङ्कान्तया तुल्यवर्णः ।

पलावल्यः पलभङ्गायेषान्तै । नद्युतश्चेति कप् । तथाप्यधिगता रति-श्रेष्ठा सम्भोगमोदैर्येषान्तैः परिणताः परिपक्वाः शरकाण्डा बाणास्तम्बकाण्डकाः । शरो बाणे बाणतृणे इति शब्दार्णवे । तद्वदापाण्डुभिः कामिनीनाङ्गण्डभागैर्गण्डस्थलैरुपहसित इवेत्युत्प्रेक्षा पाण्डिमगुणनिर्जिता निष्कलङ्का सकलङ्कं समानं मानिनमुपहसन्तीति भावः ॥ २० ॥

अथ काचित् खण्डिता नायिका आगतम्प्रियमन्यासम्भोगतरागतम्भृ-भिद्मालभते । सकलमित्यादि । कामेन लोलाया अन्यनार्याः सपत्न्याः रतिरभसेषु सुरतसम्भ्रमेषु विमर्दैः पीडनैः रज्यतेऽनेनेति रागः अङ्गस्य रागोऽङ्गरागः विलेपनं अङ्गविकाशश्च तस्मिन्नङ्गरागे सकलमपि निःशेषं यथा तथा निकाममतिमात्रं भिन्नवति विश्लिष्टवति सति आश्चर्यधाम्नः आश्चर्यभूतनिधानस्य तव मुखरागो मुखविकाशो भेदं विश्लेषं न प्रयात इति यत् इदमेवातिमहदाश्चर्यं खलु मुखस्याप्यङ्गत्वेन तद्रागस्याप्यङ्गराग त्वादिति भावः । अत्र विलेपनविकाशाख्ययोरङ्गरागयोरैक्याध्यवसाये विरोधः भेदानुबन्धानत्वेनाविरोध इति श्लेषमूलातिशयोक्त्युत्थापितो विरोधाभासोऽलङ्कारः ॥ २१ ॥

प्रकटेति । किञ्च प्रकटतरमतिस्फुटमिममनेन नखविशेषं अन्याः रम

चरणतलसरोजाक्रान्तिसंक्रान्तयासौ
वपुषि नखविलेखो लाक्षया रचितस्ते ॥२२॥
तदवितथमवादीर्यन्मम त्वम्प्रियेति
प्रियजनपरिभुक्तं यद्दुकूलन्दधानः ।
मदधिवसतिमागाः कामिनाम्मण्डनश्री
र्व्रजति हि सफलत्वं वल्लभालोकनेन ॥ २३ ॥
नवनखपदमङ्गङ्गोपयस्यंशुकेन
स्थगयसि पुनरोष्ठम्पाणिना दन्तदष्टम् ।

यौ निजसपत्न्याः,स्फुटमा द्रष्टुः न पश्यन्तु । इयेर्लुङ् न इय
इति कुशाभावपक्षे सिचि इति । इति बुद्ध्या कान्तया कश्चिदर्द्धं
यथा तथा तुल्यवर्णेलाक्षासमानवर्णं विलक्षं स दुरपह्नवत्वादिति
भाव. । असौ ते तव वपुषि नखविलेखो नखव्रण चरण तलं सरोज-
मिवेत्युपमितसमास आक्रान्तिलिङ्गात्तस्याक्रान्त्या आघातेन सङ्क्रान्तया
लाक्षया रचितो युष्म' काच्छादित इत्यर्थ हन्त सा तु मापीयसी
लाक्षा स्वयमेव मम दुर्वृत्तपिशुनेति भाव । अत्र नखविलेखस्य लाक्षा-
सावर्ण्यात्तदेकतापत्तेः सामान्यालङ्कार' । सामान्य गुणसाम्येन यत्र
वस्त्वन्तरैकतेति लक्षणात् ॥ २२ ॥

तदिति । किन्तु मम त्वमेव प्रियेति यदवादीरवोच । वदे लुङि
वदव्रजेत्यादिना वृद्धि । तदवितथं सत्य कृत यद्यस्माद् प्रियजनेन
परिभुक्तं दुकूलन्तदीयमित्यर्थ' दधान धारयन्नित्यर्थः दधान इत्यत्र
वसान इति पाठे वसान आच्छादयन् । वस आच्छादनार्थाल्लट' शान-
जादेश' । स त्वं मदधिवसति मम निवासमागाः प्राप्त । इणो गा-
लुङि । युक्तञ्चैतदित्याह । कामिना मण्डन श्रीर्वल्लभानाम्प्रेयसीनामा-
लोकनेन सफलत्व व्रजति हि अन्यथा चेत्कथमीदृशो मे सभाग्नेति
भाव: । अर्थान्तरन्यास ॥ २३ ॥

प्रतिदिशमपरस्त्रीसङ्गशंसी विसर्प-
न्नवपरिमलगन्धः केन शक्यो वरीतुम् ॥२४॥
इति कृतवचनायाः कश्चिदभ्येत्य बिभ्य-
द्गलितनयनवारेर्याति पादावनामम्।
करुणमपि समर्थं मानिनां मानभेदे
रुदितमुदितमस्त्रं योषितां विग्रहेषु ॥२५॥ कुलकम्

भवेति। किञ्च नखानि नखपदानि यस्मिन् तदङ्गं वपुरंशुकेन गोपयसि छादयसि। गुपेश्चौरादिकात् स्वार्थे णिच्। दन्तेन दष्टमोष्ठस्य अधरोष्ठन्तु पाणिना स्थगयसि छादयसि। स्थगिरपि चौरादिकः। दिशि दिशि प्रतिदिशम्। विभक्त्यर्थेऽव्ययीभावः। अव्ययीभावे शरत्प्रभृतिभ्य इति समासान्तः टच्प्रत्ययः। विसर्पन् प्रसर्पन् अपरस्त्रीसङ्गशंसी अन्तरसङ्गसूचकः अन्याप्रभवत्वादस्येति भावः। नवः परिमलाख्यो गन्धः। परिमलगन्धः। विमर्दोत्थे परिमल इत्यमरः। केन केनोपायेन वरीतुमाच्छादयितुम्। इतोवेति इटो दीर्घः। शक्यः न केनापि शक्य इत्यर्थः। अत्र नखदन्तक्षतयोरङ्गौष्ठच्छादने विसर्पणस्य गन्धस्याच्छादने च विशेषणगत्या हेतुत्वात्काव्यलिङ्गद्वये सजातीयसङ्करः ॥२४॥

इतीति। इति पूर्वोक्तश्लोकचतुष्टयरीत्या कृतवचनायाः कृतोपालम्भायाः गलितनयनवारेरधैर्यात् स्रुताश्रोः प्रेयस्या इति शेषः कश्चिन्नायको बिभ्यत् त्रसन्। नाभ्यस्ताच्छतुरिति नुमभावः। अभ्येत्यागत्य पादयोरवनाममवनतिं याति प्रणामेन प्रसादयतीत्यर्थः। ननु कथमीदृङ्मार्दवमन्याहङ्कारिणस्तस्य रोदनमात्रेण तत्राह। करुणमिति। तथाहि विग्रहेषु प्रणयकलहेषु योषितां करुणं दीनमपि रुदितमश्रुमोचनं मानिनामहङ्कारिणामपि मानभेदे अहङ्कारनिरासे समर्थं प्रकृष्टमस्त्रं साधनमुदितमुक्तम्। वदेः कर्मणि क्तः वचिस्वपीत्यादिना

मदमदनविकाशस्पष्टधार्ष्ट्योदयानां
रतिकलहविकीर्णैर्भूषणैरर्चितेषु ।
विदधति न गृहेषूत्फुल्लपुष्पोपहारं
विफलविनययत्नाः कामिनीनां वयस्याः ॥२६॥

करजदशनचिह्नं नैशमङ्गेऽन्यनारी
जनितमिति सरोषामीर्ष्यया शङ्कमानाम् ।
स्मरसि न खलु दत्तं मत्तयैतत् त्वयैव
स्वियमनुनयतीत्थं व्रीडमानां विलासी ॥२७॥

सम्प्रसारणम् । दीने प्रणयिजने पुंसाङ्गोऽहङ्कारइति भावः । अर्थान्तरन्यासः । एषा च खण्डिता नायिका । नीतान्यत्र निशाम्प्रातरागते प्राणवल्लभे । अन्यासम्भोगचिह्नैस्तु कुपितेर्ष्याकषायितेति लक्षणात् । नायकस्तु धृष्टः । व्यक्तागा निर्भयो धृष्टइति लक्षणात् । नचेह विभ्रद्विशेषणविरोधः आगमनकालेऽतिनिर्भीकताया एव लक्षणोपयोगात् अन्यथा वैरं स्यादिति भावः अयञ्च सहृदयः अन्यथा रसाभास इत्याहुः ॥ २५ ॥

मदेति मदमदनयोर्विकाशेन विजृम्भणेन स्पष्टोधार्ष्ट्योदया-विर्भावो यासान्तासां कामिनीनां रतिरेव कलहस्तस्मिन् विकीर्णैरित-स्ततोविक्षिप्तैर्भूषणैरर्चितेषु गृहेषु वयस्याः स्निग्धपरिचारिकाः विनी-यन्तेऽनेनेति विनयोऽधिकारः तत्र यत्नो विफलो यासान्ताः विफल-विनययत्नाः निष्फलस्वाधिकारोद्योगाः सत्यः उत्फुल्लैः पुष्पैरुपहारं पूजां न विदधति न कुर्वन्ति । अत्र समृद्ध वस्तुवर्णनादुदात्तालङ्कारः । तदुदात्तम्भवेद्यत्र समृद्धं वस्तु वर्ण्यते इति लक्षणात् । तेन तासान्तेषु आभरणेषु मुक्तास्रङ्मालादिरचितमान्यत्वं ध्वन्यते ॥ २६ ॥

करजेति । विलसनशीलो विलासी । वौ कषलसेत्यादिना घिनुण्-प्रत्ययः । अङ्गे निशाङ्गे निशायाम्भवं नैशम् । निशाप्रदोषाभ्यां चेत्य-ण्प्रत्ययः । करजदशनचिह्नं नखदन्तक्षतं अन्यनारीजनितं सपत्नीकृ-

कृतगुरुतरहारच्छेदमालिङ्ग्य पत्यौ
परिशिथिलितगात्रे गन्तुमापृच्छमाने ।
विगलितनवमुक्तास्थूलबाष्पाम्बुबिन्दु
स्तनयुगमबलायास्तत्क्षण रोदितीव ॥ ३८ ॥
वद जगद् पुरस्तात्तस्य मत्ता किलाहं
च्चकार च किल चाटु प्रौढयोषिद्वदस्य ।
विदितमिति सखीभ्योरात्रिवृत्तं विचिन्त्य

तमिति मह्यमाना विज्ञपतीभतएवेर्य्यया अत्तमया सरोषा स्त्रियं निजबधूमत्तया मदमूढया त्वयैतद्वृत्तमेव कृत खलु न स्मरसि नाभि ज्ञानासि किमिति काकु इत्यमनेन प्रकारेण व्रीडमाना खलतल्प अभिज्ञानाङ्क्षिणा सतीमनुनयति अङ्गीकारयति स्वमौग्ध्यख्यापनात् निवेद्य लज्जया व्यज्यते ॥ ३७ ॥

कृतेति । कृतोगुरुतरस्य हारस्य च्छेदोयस्मिन् तत्तथा आलिङ्ग्य परिशिथिलितगात्रे शिथिलीकृताङ्गे पत्यौ भर्त्तरि गन्तुमापृच्छमान आमन्त्रयमाणे सति । आङि नुप्रच्छोरुपसङ्ख्यानादात्मने पद कर्त्तरि लट शानजादेश । तत्क्षण तस्मिन् क्षणे । अत्यन्त संयोगे द्वितीया । अबलाया स्तनयुगङ्कर्त् विगलिता निर्गता नवमुक्ता नूतनमौक्तिकान्येव स्थूलबाष्पाम्बुबिन्दवो यस्मिन् कर्म्मणि तत्तथा रोदितीव विरहार्त्तिदुःखतया रोदन करोतीवेत्युत्प्रेक्षालङ्कारः रुदादिभ्य सार्वधातुके इतीडागम ॥ ३८ ॥

वदेति । अह्नि दिवसे अपगतमदया मुग्धबध्वा सखीभ्या विदित रात्रौ त्वयेत्थ कृतमिति सखीभिराख्यातमित्यर्थ । रात्रिवृत्त रात्रौ कृत स्ववेष्टितमित्यर्थ । मत्ता मदमूढा अहन्तस्य प्रियस्य पुरस्तादग्रे बहु अनेकजगद किल गदामि स्म किलेति ऐतिह्ये । अतएव परोक्षे लिट चनुत्तमोयात पश्च ल्लिामरवाद् उद्भ्रमाव । च एव प्रौढयोषिता

व्यपगतमदराज्ञि व्रीडितमुग्धवध्वा ॥३९॥

अरुणजलजराजीमुग्धहस्ताग्रपादा
बहुलमधुपमालाकज्जलेन्दीवराक्षी ।
अनुपतति विरावैः पत्त्रिणां व्याहरन्ती
रजनिमचिरजाता पूर्वसन्ध्या सुतेव ॥४०॥

प्रतिशरणमशीर्णज्योतिरग्न्याहितानां
विधिविहितविरिब्धैः सामधेनीरधीत्य ।

तुल्यम् प्रौढयोषि इदित्युपमा तेन तुल्यमिति वतिप्रत्ययः । अस्य प्रि-यस्य चाटुप्रियवचनं चकार किञ्च स्वकार्याङ्कितं । लिङ्गादिपूर्वश्च गुणो विशेषः । इति विचिन्त्य विस्मयस्य व्रीडितं लज्जितम् । भावे क्तः । निजकार्यप्रकाशेन लज्जायाः सञ्चारी भावः । भावनिबन्धनात् प्रे-योऽलङ्कारः ॥३९॥

अरुणेति । अरुणजलजराज्येव रक्तकमलश्रेण्येव मुग्धं सुन्दरं हस्ताग्रपादं हस्तौ च अग्रपादौ च यस्याः सा बहुलं मधुपमालाः कज्जलमिव मधुपमाला ययोस्ते अक्षिणी इन्दीवरे इव यस्याः सा बहुलमधुपमालाकज्जलेन्दीवराक्षी पत्त्रिणां पक्षिणां विरावैर्व्याहरन्ती शब्दायन्ती । व्याहार उक्तिर्लपितमित्यमरः । अचिरजाता सद्यो-भवा बाला च पूर्वसन्ध्या प्रातःसन्ध्या सुतेव पुत्रीव रजनीमनुपतति अनुधावति जननीमिवेत्यर्थः । इह विरावैर्व्याहरन्तीति व्यधिकरणप-रिणामः । तत्सङ्कीर्णेयमुपमा ॥४०॥

प्रतीति । अग्निराहितो यैस्तेषामग्न्याहितानाम् । आहिताग्न्या-दिष्विति निष्ठायाः परनिपातः । प्रतिशरणम् तिष्ठद्गुः । शरणं गृहरक्षित्रोरित्यमरः । अशीर्णज्योतिरक्षताग्निरयमग्निराहवनीयः वि-धिना यज्ञकर्मण्यनपन्यस्तु शामित्यादिशास्त्रोक्तरीत्या विहिता यथायोगमुच्चारिता विरिब्धाः स्वरा एकश्रुत्यादयश्चारो यैस्तैः । सुब्रह्मा-

इतिगुरुदुरितौघध्वंसमध्वर्युवर्यै-
र्हुतमयमुपलीढे साधु सान्नाय्यमग्निः ॥४१॥

नेत्यादिना रेफप्रत्यये इति याते स्वरे विरिञ्चशब्दोनिष्ठान्तोऽभिरत्वेन निपातितः अध्वर्युवर्यैः ऋत्विक्श्रेष्ठैः ऋत्विग्विशेषवाचिना अध्वर्युशब्देन ऋत्विङ्मात्रलक्षणात्। यद्वा अध्वर्युर्यजुर्वेदी यस्मात् अध्वर्युं प्रत्येवदर्शपूर्णमासयोर्विधिरित्यर्थः। तस्मादर्शपौर्णमासयोर्यजुर्वेदत्वादृत्विजइति यथाह। दर्शस्याय सर्वत्रैव सान्नाय्यविधानादिति सामिधेनीः प्रशेशाग्ना इत्यादिका ऋग्निरभिमन्त्रणोर्हचोऽधीय पठिता। ऋक्सामिधेनी धाय्या च या स्यादग्निसमिन्धने इत्यमरः। सामिधेनीसम्बन्धं यस्या प्रवोवाजाद्यादिमन्त्रात्तस्याममुपलक्षणम्। ततो-गुरूणां दुरितानामोघस्य ध्वंसो यस्मिन् कर्मणि तद्यथा तथा साधु सम्यक् हुतमग्नेर्होतोद्देशेन त्यक्तं सन्नीयतइति सान्नाय्यं हविर्विशेषं ऐन्द्रंदध्यमावास्यायामैन्द्रं पयोऽमावास्यायामिति विहिते दधिपयसी इत्यर्थः पाय्यसान्नाय्यनिकाय्येत्यादिना हविर्विशेषे सम्पूर्वान्नयतेर्ण्यन्नादायादेशोपसर्गदीर्घनिपातः। उपलीढे आस्वादयति। लिह आस्वादनइतिधातोः स्वरितेत्वादात्मनेपदे लिटि ढत्वष्टुत्वढलोपदीर्घाः। अत्राग्नेः सान्नाय्योपलेहनस्योत्तरकालभावित्वेऽपि तदुपलक्षितस्य कर्मणउदिते आदित्ये पौर्णमासास्तन्त्रं प्रयुक्तं अतिप्रागुदयादमावास्यायादिति यास्काचार्य कालप्रक्रान्तस्य वर्त्तमानत्वात्तस्यापि वर्त्तमानताव्यपदेशः एतच्चाहिताग्नित्वमात्रेण कालविशेषानादरेणोक्तमिति पूर्वोक्तचन्द्रोदयाद्यविरोधः अथवा उदिते जुहोत्यनुदिते जुहोति प्रातर्जुहोत्यग्निहोत्रन्तु कालत्वात् सामिधेनीसान्नाय्यशब्दयोर्मन्त्रहविर्मात्रपरत्वमाश्रित्याग्निहोत्रपरत्वेन व्याख्येयम्। तस्याग्निहोत्रस्य यज्ञक्रतोरेकत्विग्भिरेकाध्वर्युकत्वे वर्यैरिति बहुवचनं यजमानबहुत्वादुपपद्यत इत्याहुरित्यत्र कान्दर्प गोष्ठीव्यसनेन। वृत्तमनुप्रासोऽलङ्कारः स्पष्ट एव ॥४१॥

प्रकृतजपविधीनामास्यमुद्रश्मिदन्त
म्मुहुरपिहितमोष्ठैरक्षरैर्लक्ष्यमन्यैः ।
अनुकृतिमनुवेलङ्घट्टितोद्घट्टितस्य
व्रजति नियमभाजाम्मुग्धमुक्तापुटस्य ॥ ४२ ॥

नवकनकपिशङ्गं वासराणां विधातुः
ककुभि कुलिशपाणेर्भाति भासां वितानम् ।
जनितभुवनदाहारम्भमम्भांसि दग्ध्वा
ज्वलितमिव महाब्धेरूर्ध्वमौर्वानलार्च्चिः ॥४३॥

प्रकृतेति । प्रकृतजपविधीनां प्रक्रान्तजपकर्म्मणां नियमभाजान्तप स्विनां सम्बन्धे ओष्ठे भवैरोष्ठ्यैः । शरीरावयवाच्चेति यत्प्रत्यय । अन्य रैरक्षरैः उपूपध्मानीयैरित्यर्थः । उपूपध्मानीयानामोष्ठा वित्यनुशासनात् । मुहुरपिहितमाहतमन्यैरनोष्ठ्यैरक्षरैर्लक्ष्यन्दर्शनीयं अतएवोद्रश्मय उद्ग तारश्मयो दन्ता यस्य तदास्यं मुखं अनुवेलं प्रतिक्षणं घट्टितोद्घट्टितस्य प्राप्तिलाद्घट्टितविघट्टितस्य । विशेषणसमास । मुग्धं सुन्दरं यन्मुक्तानां मुक्ता फलानां पुटं कोटिः शुक्तिरिति यावत तस्यानुकृति साम्यं व्रजति । उपमालङ्कार । एतेन श्लोकद्वयेन बहव कर्म्मनिष्ठा स्तपो निष्ठाश्च ब्राह्मणाभगवन्तमनुयन्तीति कथितम् ॥ ४२ ॥

नवेति । कुलिशं पाणौ यस्य स कुलिशपाणिरिन्द्र । प्रहरणा र्थेभ्य परे निष्ठासप्तम्यौ भवत इति पाणौ परनिपात । एतदेवाल व्यधिकरणबहुव्रीहेश्च ज्ञापकम । तस्य ककुभि प्राच्यां दिशि नवकन कवत्पिशङ्गं वासराणां विधातुर्दिनकरस्य भासां वितानं करजाल महाब्धेरम्भांसि दग्ध्वा जनितभुवनदाहारम्भं कृतजगद्दाहोद्योगं सदू र्ध्वमब्धेरुपरि ज्वलितमौर्वानलार्च्चिर्वडवानलज्योतिरिव भातीत्युत् प्रेक्षा । ४३ ॥

विततपृथुवरत्रातुल्यरूपैर्मयूखैः
कलश इव गरीयान् दिग्भिराकृष्यमाणः ।
कृतचपलविहङ्गालापकोलाहलाभि
र्जलनिधिजलमध्यादेष उत्तार्य्यतेऽर्कः ॥ ४४ ॥
पयसि सलिलराशेर्नक्तमन्तर्निमग्नः
स्फुटमनिशमतापि ज्वालया वाडवाग्नेः ।
यदयमिदमिदानीमङ्गमुद्यन्दधाति
ज्वलितखदिरकाष्ठाङ्गारगौरं विवस्वान् ॥४५॥
अतुहिनरुचिनासौ केवलन्नोदयाद्रिः
क्षणमुपरिगतेन क्ष्माभृतः सर्व्व एव ।

विततेति । विततामिः प्रसारिताभिः पृथुवरत्राभिर्महारज्जुभि स्तुल्यरूपैस्तुल्याकारैर्मयूखैः किरणैर्गरीयान् गुरुः कलश इवाकृष्यमाणः एषोऽर्कः कृतचपल चपलैर्विहङ्गालाप एव कोलाहलः कलकलो याभि-स्ताभिः दिग्भिर्जलनिधेर्जलमध्यादुत्तार्य्यते उद्ध्रियते। तरतेर्ण्यन्तात् कर्मणि लट् । यथा कश्चित्कूपात् कुम्भं पाशैरुद्धरति तद्वदत्र रज्जुभिः स्त्रीभिरुद्धृत इवेति भावः । अत्र यत्रास्तां तृणवदुपमा कलश इति कोलाहलाद् विहङ्गालापकोलाहलमिति रूपकेण कोला-हलाङ्गेन दिग्वर्गकोलाहलोपमेया सङ्कराद्योगात् मालिनी वृत्तम् ॥ ४४ ॥

नवकरनिकरेण स्पष्टबन्धूककान्त-
स्तवकरचितमेते शेखरं बिभ्रतीव ॥ ४६ ॥
उदयशिखरिशृङ्गप्राङ्गणेष्वेष रिङ्खन्
सकमलमुखहासं वीक्षितः पद्मिनीभिः ।
विततमृदुकराग्रः शब्दयन्त्या वयोभिः
परिपतति दिवोऽङ्के हेलया बालसूर्य्यः ॥ ४७ ॥
क्षणमयमुपविष्टः क्ष्मातलन्यस्तपादः
प्रणतिपरमवेक्ष्य प्रीतमह्नाय लोकम् ।

मथादुदयाद्रिः पूर्व्वाद्रिः । उदयः पूर्व्वपर्व्वत इत्यमरः । किन्त्वेते सर्व्व एव क्ष्माभृतः सर्व्वेऽपि शैलाः क्षणमपरिगतेनावस्थितेन नवकरनिकरेण स्पष्टैर्विकसितैर्बन्धूककान्तस्तवकैर्बन्धुजीवककुसुमगुच्छैर्विरचितम् । बन्धूको बन्धुजीवक इत्यमरः । शेखरं शिखामाल्यम् । शिखास्वापीडशेखरा इत्यमरः । बिभ्रतीवेत्युत्प्रेक्षा न केवलमेकोदयाद्रिरेव बन्धूकशेखरं बिभर्त्ति किन्तु तत्करजालेन सर्व्वेऽपि पर्व्वता इत्यर्थः ॥ ४६ ॥

उदयेति । एष बाल उदितमात्र बालश्चासौ सूर्य्यश्च बालसूर्य्यः उदयशिखरिशृङ्गस्य उदयाद्रिशिखरस्य प्राङ्गणेषु रिङ्खन् सञ्चरन् पद्मिनीभिर्नलिनीभिः स्त्रीविशेषैश्च । पद्मिनी स्त्री विशेषेऽपीति विश्वः । कमलान्येव मुखानि तेषां हासेन विकाशेन हास्येन च सह यस्मिन् कर्म्मणि तद्यथा तथा वीक्षितः सन् वयोभिः पक्षिभिः । वयः पक्षिणि बाल्यादाविति विश्वः । शब्दयन्त्याः शब्दं कुर्व्वत्याः आगच्छ आगच्छ वत्सेति व्याहरन्त्या इत्यर्थः । शब्द शब्दात्तत्करोतीति ण्यन्तात् लटः शतरि ङीप् । दिवोऽन्तरीक्षस्य मातुश्चाङ्के समीपे उत्सङ्गे च विततानि प्रसृतानि मृदूनि कराग्राणि किरणाग्राणि हस्ताग्राणि च यस्य स सन् हेलया लीलया परिपतति । श्लेषमूलातिशयोक्त्यनुगृहीतरूपकम् ॥ ४७ ॥

भुवनतलमशेषं प्रत्यवेक्षिष्यमाणः
क्षितिधरतटपीठादुत्थितः सप्तसप्तिः ॥४८॥
परिणतमदिराभम्भास्करेणांशुबाणै
स्तिमिरकरिघटायाः सर्वदिक्षु क्षतायाः।
रुधिरमिव वहन्त्योभान्ति बालातपेन
च्छुरितमुभयरोधोवारितं वारि नद्यः ॥४९॥
दधति परिपतन्त्योजालवातायनेभ्य

क्षणमिति। अयं सप्तसप्तिरर्कः क्षणमुपविष्टः क्षितिधरपीठमध्यासीनः क्ष्मातलन्यस्तपादः प्रणामस्वीकाराय भूतलप्रसारिताङ्घ्रिरित्यर्थः। प्रणतिपरं नमस्कारं कुर्वाणं प्रीतं प्रणामस्वीकारात्सन्तुष्टं लोकं जनमञ्जसा झटिति अवेक्ष्य। झटित्यञ्जसाह्नायेत्यमरः। करावलोकेन समग्रमशेषं भुवनतलं लोकस्वरूपं प्रत्यवेक्षिष्यमाणः अनुसन्धास्यमानः क्षितिधरस्य तटं पीठमिव सिंहासनमिव अन्यत्र तटमिव पीठं तस्मादुत्थितः उदयाद्रिमतिक्रान्त इत्यर्थः। यथा कश्चिन्महाराजः सिंहासनोपविष्टः क्षणं प्रणतजनमादृत्य अथ सकलस्वराष्ट्रप्रत्यवेक्षणाय सहसोत्थाय गच्छति तद्वदित्यर्थः। अत्र प्रस्तुतार्कविशेषणसाम्यादप्रस्तुतमहाराजप्रतीतेः समासोक्तिः ॥४८॥

परिणतेति। नद्यः बालातपेन छुरितं रूषितम्। अतएव परिणतमदिराभं सुपक्वसुरासन्निभं उभाभ्यां रोधोभ्यां वारितमवरुद्धम्। उभयरोधोवारितं। उभादुदात्तो नित्यमित्यत्र नित्यग्रहणसामर्थ्याद्वृत्तिविषये उभशब्दस्य स्थाने उभयशब्दप्रयोग इत्युक्तं प्राक्। वारि जलं भास्करेण। कस्कादित्वात् सत्वम्। अंशुभिरेव बाणैः सर्वदिक्षु क्षतायाः महत्तायाः तिमिरमेव करिघटा गजसङ्घः तस्याः रुधिरमिवेत्युत्प्रेक्षा। वहन्त्योभान्ति ॥४९॥

स्तरुणतपनभासो मन्दिराभ्यन्तरेषु ।
प्रणयिषु वनितानां प्रातरिच्छत्सु गन्तु
कुपितमदनमुक्तोत्तप्तनाराचलीलाम् ॥५०॥
अधिरजनि वधूभिः पीतमैरेयरिक्तं
कनकचषकमेतद्रोचनालोहितेन ।
उदयदहिमरोचिर्ज्योतिषाक्रान्तमन्त
र्मधुन इव तथैवापूर्णमद्यापि भाति ॥ ५१ ॥
सितरुचि शयनीये नक्तमेकान्तमुक्त

दधतीति । तानवातायनेभ्यः गवाक्षविवरेभ्यः मन्दिराणामभ्य-न्तरेषु परिपतन्त्यस्तरुणतपनभासो बालार्ककिरणाः वनितानां प्रणयिषु प्रातर्गन्तुमिच्छत्सु कुपितेन मदनेन मुक्तानामुत्तप्तानामग्निज्वलिततेजसां नाराचानां बाणविशेषाणां लीलां शोभान्दधति । अत्र लीलेव लीलेति सादृश्याक्षेपादसम्भवद्वस्तुसम्बन्धान्निदर्शना ॥ ५० ॥

अधीति । अधिरजनि रजन्याम् । विभक्त्यर्थेऽव्ययीभाव । वधूभिः पीत मैरेय मद्यं यस्य तत् अतएव रिक्तं पीतमैरेयरिक्तं एतत् कनकचषकं स्वर्णस्य पानपात्रम् । अवयवषष्ठ्याविकारार्थता । चषकोऽस्त्री पानपात्रमित्यमरः । रोचनालोहितेन गोरोचनारुणेन उद-यत उदीयमानस्याहिमरोचिषोऽर्कस्य ज्योतिषा तेजसा अन्तरभ्यन्तरे आक्रान्तं व्याप्तं सत् अद्यापि इदानीमपि तथैव पूर्ववदेव मधुनाऽऽ-पूर्णमिव । सामान्यप्रयोगेऽप्यविशेषपर्यवसाननियमात् षष्ठी शेषइति सम्बन्धसामान्ये षष्ठीकरणस्यापि कारकत्वादिति । भाति शोभते । अत्रा-तपाक्रान्ते मधुपूर्णत्वोत्प्रेक्षया आतपे मधुभ्रमात् भ्रान्तिमान् व्यज्यते ॥ ५१ ॥

सितेति । नक्तं रात्रौ शयनीये तल्पे । एकान्तमुक्तमत्यन्तत्यक्तं

भुवनतलमशेष प्रत्यवेक्षिष्यमाणः
क्षितिधरतटपीठादुत्थितः सप्तसप्तिः ॥४८॥
परिणतमदिराभम्भास्करेणांशुबाणै
स्तिमिरकरिघटायाः सर्व्वदिक्षु क्षतायाः ।
रुधिरमिव वहन्त्योभान्ति बालातपेन
च्छुरितमुभयरोधोवारितं वारि नद्यः ॥४९॥
दधति परिपतन्त्योजालवातायनेभ्य

अशेषमिति । अयं सप्तसप्तिरर्कः आसनमुपविष्ट क्षितिधरपीठमध्या सीन क्ष्मातलन्यस्तपाद प्रणामस्वीकाराय भुवनप्रसारिताङ्घ्रि, रित्यर्थः । प्रणतिपरं नमस्कारं कुर्व्वाणं प्रीतं प्रणामस्वीकारात्सन्तुष्टं लोकं जनमञ्जसा झटिति अवेक्ष्य । झटित्यञ्जसाह्नायेत्यमरः । कृपावलोकेन सम्भाव्याशेषं भुवनतलं लोकस्वरूपं प्रत्यवेक्षिष्यमाणं अनुसन्धास्य-मान क्षितिधरस्य तटं पीठमिव सिंहासनमिव अन्यत्र तटमिव पीठं तस्मादुत्थित उदयाद्रिमतिक्रान्त इत्यर्थः । यथा कश्चिन्महाराज सिं-हासनोपविष्ट प्रणतजनमादृत्य अथ सकलस्वराष्ट्रदर्शनेक्षणाय सहसोत्थाय गच्छति तद्वदित्यर्थः । अत्र प्रकृतार्कविशेषणवैभवादप्रकृत महाराजप्रतीतेः समासोक्तिः ॥४८॥

परिणतेति । नद्यः बालातपेन छुरितं रूषितम् । अतएव परि-णतमदिराभं सुपक्वसुरासन्निभं उभाभ्यां रोधोभ्यां वारितमवरुद्धम् । उभयरोधोवारितं उभादुदात्तो नित्यमित्यत्र नित्यग्रहणसामर्थ्याद् वृत्ति विषये उभशब्दस्य स्थाने उभयशब्दप्रयोग इत्युक्तं प्राक् वारि जलं भास्क-रेण । कस्कादित्वात् सत्वम् । अंशुभिरेव बाणैः सर्व्वदिक्षु क्षताया महतायाः तिमिरमेव करिघटा गजसङ्घः तस्या रुधिरमिवेत्युत्प्रेक्षा । वहन्त्योभान्ति ॥४९॥

स्तरुणतपनभासो मन्दिराभ्यन्तरेषु।
प्रणयिषु वनितानां प्रातरिच्छत्सु गन्तुं
कुपितमदनमुक्तोत्तप्तनाराचलीलाम् ॥५०॥
अधिरजनि वधूभिः पीतमैरेयरिक्तं
कनकचषकमेतद्रोचनालोहितेन।
उदयदहिमरोचिर्ज्योतिषाक्रान्तमन्त-
र्मधुन इव तथैवापूर्णमद्यापि भाति ॥ ५१ ॥
सितरुचि शयनीये नक्तमेकान्तमुक्त

दधतीति। जालवातायनेभ्यो गवाक्षविवरेभ्यो मन्दिराणामभ्य-
न्तरेषु पतितास्तरुणतपनभासो बालार्ककिरणा वनितानां प्रणयिषु
प्रातर्गन्तुमिच्छत्सु कुपितेन मदनेन मुक्तानामुत्तप्तानामग्निज्वलिततेजसां
नाराचानां बाणविशेषाणां लीलां शोभां दधति। अत्र लीलेव लीलेति
सादृश्याक्षेपादसम्भवद्वस्तुसम्बन्धो निदर्शना ॥ ५० ॥

अधीति। अधिरजनि रजन्याम्। विभक्त्यर्थेऽव्ययीभावः। वधूभिः
पीतं मैरेयं मद्यं यस्य तत् अतएव रिक्तं पीतमैरेयरिक्तं एतत्
कनकचषकं स्वर्णस्य पानपात्रम्। अवयवषष्ठ्याविकारार्थता। चष-
कोऽस्त्री पानपात्रमित्यमरः। रोचनालोहितेन गोरोचनारुणेन उद-
यता उदीयमानस्याहिमरोचिषोऽर्कस्य ज्योतिषा तेजसा अन्तरभ्यन्तरे
आक्रान्तं व्याप्तं सत् अद्यापि इदानीमपि तथैव पूर्ववदेव मधुनः
पूर्णमिव। सामान्यषष्ठ्यावैयर्थ्यं शेषपदार्थस्यानियमात् षष्ठी शेषे इति
सम्बन्धसामान्ये षष्ठीनाट्यस्यापि कारणत्वादिति। भाति शोभते। अत्रा-
तपाक्रान्ते मधुपूर्णत्वोत्प्रेक्षया आतपे मधुभ्रमात् भ्रान्तिमान्
व्यज्यते ॥ ५१ ॥

सितेति। नक्तं रात्रौ शयनीये तल्पे। एकान्तमत्यन्तमुक्तं

न्दिनकरकरसङ्गव्यक्तकौसुम्भकान्ति ।
निजमिति रतिबन्धोर्जानतीमुत्तरीय
म्परिहसति सखी क्षौममाददानान्दिनादौ ॥५२॥
शुतमिव शिशिरांशोरंशुभिर्यन्निशासु
स्फटिकमयमराजद्राजताद्रिस्थलाभम् ।
अरुणितमकठोरैर्वेश्म काश्मीरजाम्भः
स्नपितमिव तदेतद्भानुभिर्भाति भानोः ॥५३॥
सरसनखपदान्तर्दृष्टकेशप्रमोक्ष
म्प्रणयिनि विदधाने योषितामुल्लसन्त्यः ।

सितरुचि शुभ्रवर्णम् । किन्तु दिनादौ प्रभाते दिनकरकरसङ्गेनार्कांशु-व्यतिकरेण व्यक्ता कौसुम्भी कुसुम्भस्य रागद्रव्यस्य सम्बन्धिनी कान्तिर्यस्य तत्तथा भासमानं रतिबन्धोः प्रियस्योत्तरीयं निजमात्मीयमिति जानतीं अत एवाददानां स्त्रीं नायिकाम् । वामृषयोरितीयङ्भावपक्षे ध्वनि 'पूर्वैरति पूर्वरूपम् । सखी परिहसति । अत्र कौसुम्भे कौसुम्भसा-दृश्यनिबन्धनाद्भ्रान्तिमदलङ्कारः ॥ ५२ ॥

सुतमिति । राजताद्रिस्थलाभं सुधाधवलितत्वात्कैलासतटसन्निभं यद्वेश्म निशासु शिशिरांशोरिन्दोरंशुभिश्चन्द्रकान्तिभिः सुतं धौतं सत् स्फटिकमयं स्फटिकविकारं व्यराजत् रेजे तदेतद्वेश्म भानोः सूर्यस्याकठोरैः कोमलैः भानुभिररुणितमरुणीकृतं सत् काश्मीरे देशे जातं काश्मीरजं कुङ्कुमं तस्याम्भसा स्नपितं सिक्तमिव भाति । उत्-प्रेक्षयोः सङ्करः ॥ ५३ ॥

सरसेति । प्रणयिनि योषितां सरसनखपदानामार्द्रनखक्षतानामन्तर्मध्ये दृष्टानां लूनानां केशानां शिरोरुहाणां प्रकीर्णं प्रमोचनं

विदधति दशनानां सीत्कृताविष्कृताना-
मभिनवरविभासः पद्मरागानुकारम् ॥५४॥
अविरतदयिताङ्गासङ्गसञ्चारितेन
छुरितमभिनवास्रक्कान्तिना कुङ्कुमेन ।
कनकनिकषरेखाकोमलं कामिनीना
भवति वपुरवाप्तच्छायमेवातपेऽपि ॥ ५५ ॥
सरसिजवनकान्तिम्बिभ्रदभ्रान्तवृत्तिः
करनयनसहस्रं हेतुमालोकशक्तेः ।

विदधाने सति सीत्कृतैर्व्यथाविर्भूतसीत्कारैराविष्कृतानां दशनानां सङ्क्र-मन्तः वैमल्यात्तेषु प्रतिफलन्तः अभिनवरविभासः पद्मरागाणामनुका-रमनुकरणं विदधति । उपमालङ्कारः रविभासामारुण्यप्रतिपादकाभि-नवविशेषणपदार्थत्वादिति काव्यलिङ्गेन सङ्करः ॥ ५४ ॥

अविरतेति । अविरतेनाविच्छिन्नेन दयितानां प्रेयसामङ्गस्य आसङ्गेन शरीरसम्पर्केण सञ्चारितेन सङ्क्रामितेनाभिनवस्यासृजो रक्तस्येव कान्तिर्यस्य तेन कुङ्कुमेन छुरितं कनकस्य या निकषे निकषोपले रेखा राजिस्तद्वत् कोमलं मनोहरमित्युपमा । कामिनीनां वपुरातपेऽपि अवा-प्तच्छायं लब्धवर्णं तु कान्तिमेव भवति स्वतः सुवर्णवर्णस्य ततः कुङ्कुमाङ्कितस्य कामिनीगात्रस्य पुनर्बालातपच्छायाभिरिति महती वर्णोत्कर्षसम्पत्तिरिति भावः । आतपे छाया नातपश्चेति विरोधाभासोऽपि स्पष्टः । छाया-त्वनातपे कान्तावित्यमरः । अत्र सङ्क्रान्तकुङ्कुमच्छुरितत्वकनकनिकषरेखा-कोमलत्वयोरुपमापेक्षया छायावाप्तिहेतुत्वादुपमासङ्कीर्णं काव्यलिङ्गं तदातपेऽप्यवाप्तच्छायमित्यत्र विरोधेन एकवाचकानुप्रवेशेन सङ्कीर्यते ॥५५॥

सरसीति । सरसिजातानि सरसिजानि । सप्तम्यां जनेर्डः । तत्पु-रुषे कृति बहुलमित्यलुक् । तद्वनस्य कान्तं प्रियम् । अन्यत्र तद्वत्कान्तं

अखिलमतिमहिम्ना लोकमाक्रान्तवन्तं
हरिरिव हरिदश्वः साधु वृत्रं हिनस्ति ॥५६॥

अवतमसभिदायै भास्वताभ्युद्गतेन
प्रसभमुडुगणोऽसौ दर्शनीयोऽप्यपास्तः।
निरसितुमरिमिच्छोर्ये तदीयाश्रयेण
श्रियमधिगतवन्तस्तेऽपि हन्तव्यपक्षे ॥५७॥

रश्मिं आलोकशक्तेर्लोकलोचनानां विषयग्रहणशक्तेर्हेतुं आलोकान्त-रसहकृतानामेव तेषां तत्सामर्थ्यात् अन्यत्र आलोक शक्तेर्दर्शनव्या-पारस्य हेतुं दर्शनसाधनमित्यर्थः। करा नयनानीव अन्यत्र करा इव नयनानि तेषां सहस्रं करनयनसहस्रं बिभ्रत् अब्भ्रान्ते नभोमध्ये हरिर्यस्य सोऽब्भ्रान्तहरिः अन्यत्राब्भ्रान्ते मेघे हस्तिर्यस्य स। मेघ-वाहन इत्यर्थः। अब्भ्रमुः स्वर्गगजाङ्गनेति विश्वः। हरितो-ऽश्वा यस्य स हरिदश्वोऽर्कः हरिरिन्द्र इवाति महिम्ना अतिमहत्तया सर्वाङ्गेत्यर्थः। लोकमाक्रान्तवन्तं व्याप्तवन्तं एकत्र महत्त्वादन्यत्र स-र्वं मातुमिव मातुं मिष्मवर्द्धितं इमान् लोकानाक्रम्योदितामराद्रिति भावः। हन्तु ध्वान्तं दानवं च वृत्रं साधु हिनस्ति हन्ति। ध्वान्ता-रिदानवयोर्वृत्र इत्यमरः। उपमा श्लेषोत्था मतभेदात् ॥५६॥

अवतमसेति। अवततमसं तिमिरम्। 'अवसमन्धेभ्यस्तमसः' इति समा-सान्तः। यद्यपि चोभयोरवतमससन्तमसयोस्तुल्यं तथापीह विरोधाद्विशेष-मादरेण सामान्यमेव ग्राह्यमन्यस्य भिदायै भेदाय। भिदिदा छिदुर्गेऽङ्। अभ्युद्गतेनाभ्युदितेन च भास्वता सूर्येण दर्शनीयोऽप्युडुगणोऽसौ प्रसभं बलात् अपास्तः तथा हि अरिं निरसितुं इच्छोर्यो तदी-येनाश्रयणाश्रयणेन श्रियं सम्पदं शोभाञ्च। शोभा सम्पत्तिपद्मासु लक्ष्मीः श्रीरपि गद्यते इति विश्वः। अधिगतवन्तः प्राप्तवन्तस्तेऽपि हन्तव्यपक्षे वध्यकोटावेव अरिवदरिपक्षा अपि वध्या एवेत्यर्थः।

प्रतिफलति करौघे सम्मुखावस्थितायां
रजतकटकभित्तौ सान्द्रचन्द्रांशुगौर्याम् ।
बहिरभिहतमद्रेः संहतं कन्दरान्त
र्गतमपि तिमिरौघं घर्मभानुर्भिनत्ति ॥ ५८ ॥
बहिरपि विलसन्त्यः काममानिन्यिरे य
द्दिवसकररुचोऽन्तं ध्वान्तमन्तर्गृहेषु ।
नियतविषयवृत्तेरप्यनल्पप्रताप
क्षतसकलविपक्षस्तेजसः स स्वभावः ॥ ५९ ॥

,इन्दुरश्मयोऽपि तमसि शोभते यत्तथापि इति भावः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ५७ ॥

प्रतीति । घर्मभानुरुष्णांशुः सम्मुखावस्थितायां सान्द्रचन्द्रांशुवद्गौर्यां धवलायामित्युपमा । षिद्गौरादिभ्यश्चेति ङीष् । रजतकटक मेव भित्तिस्तस्यां करौघे स्वकिरणजाले प्रतिफलति सति अद्रेर्बहिरभिहतं कन्दरायां दर्यामन्तर्गतं संहतं तिमिरौघमपि भिनत्ति पुरोगतरजतभित्तिप्रतिहतस्य निजतेजसः कन्दरान्तः प्रवेशादिति भावः । अत्र करौघस्यान्तः सम्बन्धाभावेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ ५८ ॥

बहिरिति । बहिर्विलसन्त्योऽपि दिवसकररुचोऽर्कभासः अन्तर्गृहेषु गर्भागारेषु कामं यथेष्टं ध्वान्तमन्तं नाशमानिन्यिरे प्रापयामासुरिति यत् । नयतेर्द्विकर्मकात् कर्तरि लिट् । सोऽन्तर्गृहध्वान्तनिरासो नियतविषये नियतस्थाने वृत्तिर्यस्य तस्य नियतदेशवृत्तेरपीत्यर्थः । द्वितीयादिष्विति पुंवद्भावः । तेजसोऽनल्पेन प्रतापेन स्वप्रकाशेन स्वप्रभावेनेत्यर्थः । प्रतापौ पौरुषातपाविति वैजयन्ती । क्षतसकलविपक्षः निरस्तसमस्तप्रतिपक्षः । स्वभावः तेजस्विनामेष स्वभावोऽयत् प्रतापेनैव परोक्षे दनमतोयुक्तमर्कभासा मध्यन्तर्ध्वान्तहरणमित्यर्थः । अत्र समर्थ्यसमर्थकयोः सामान्यविशेषभावादर्थान्तरन्यासः ॥ ५९ ॥

चिरमतिरसलौल्याद्बन्धनं लम्भितानां
पुनरयमुदयाय प्राप्य धाम स्वमेव ।
दलितदलकपाटः षट्पदानां सरोजे
सरभस इव गुप्तिस्फोटमर्कः करोति ॥६०॥
युगपदयुगसप्तिस्तुल्यसङ्ख्यैर्मयूखै
र्दशशतदलभेदं कौतुकेनाशु कृत्वा ।
श्रियमलिकुलगीतैर्लालितां पङ्कजान्त
र्भवनमधिशयानामादरात्पश्यतीव ॥ ६१ ॥

चिरमिति । अयमर्कः पुनर्भूयोऽपि उदयाय स्ववृद्धये स्वं स्वकीयमेव धाम स्थानं तेजो वा प्राप्य अतिरसलौल्यादतिमात्राद्तृष्णया च लौल्यादासक्तेः सरोजे चिरं बन्धनं लम्भितानां प्रापितानां षट्पदानां सरभसः सत्वरो दलितं विघट्टितं दलमेव कपाटं येन स सन् गुप्तिस्फोटं बन्धनमोचं करोतीत्युत्प्रेक्षा यथा कश्चित् नरभटः पुनर्लब्धपदः पूर्ववदात्मबन्धूनागत्य स्वयमेव काराकपाटमुद्घाट्य मोचयति तद्वदिति भावः ॥ ६० ॥

युगपदिति । अयुगा विषमाः सप्तयोऽश्वा यस्य सः अयुग सप्तिः सप्ताश्वोऽर्कः युगपच्छब्दस्य युग्मशब्दस्य च विरोधं विघटनं यमन्त्वा । युगपदेकदैव तुल्यसङ्ख्यैः सहस्रसङ्ख्यैरित्यर्थः मयूखैः करैः दश शतानि दशशतानि सहस्राणीत्यर्थः । तेषान्दलानां भेदं विघट्टनं कौतुकेनाशु कृत्वा अलिकुलस्य गीतैर्लालितां सत्कृतां पङ्कजमेवान्तर्भवनं गर्भगृहं चाधिशयानाम् । अधिशीङ्स्थासां कर्मेति कर्मत्वम् । श्रियमादरात्पश्यतीवेत्युत्प्रेक्षा कश्चित्कान्तः कान्तामिवैकान्तगतामिति भावः ॥ ६१ ॥

अदयमिव कराग्रैरेष निष्पीड्य सद्यः
शशधरमहरादौ रागवानुष्णरश्मिः।
अवकिरति नितान्तं कान्तिनिर्यासमच्छं
स्रुतनवजलपाण्डुं पुण्डरीकोदरेषु॥ ६२॥
प्रविकसति चिराय द्योतिताशेषलोके
दशशतकरमूर्त्तावक्षिणीव द्वितीये।
सितकरवपुषासौ लक्ष्यते सम्प्रति द्यौ
र्विगलितकिरणेन व्यङ्गितैकेक्षणेव॥ ६३॥

अदयमिति। अहरादौ प्रभाते रागवानुदयरागवान् पुण्डरीकस्नेहरागवांश्च उष्णरश्मिरर्कः शशधरं चन्द्रं कराग्रैः रश्म्यग्रैः हस्ताग्रैश्च अदयं निर्दयं सद्यो निष्पीड्य अच्छात् भेदात् स्रुतं स्वच्छं नवजलमिव पाण्डुं शुभ्रं कान्तिनिर्यासं लावण्यसारं पुण्डरीकाणां सिताम्भोजानामुदरेष्वभ्यन्तरेषु नितान्तमवकिरतीव विक्षिपतीव। अत्र सूर्योदये चन्द्रस्य कान्तिक्षयात् पुण्डरीकाणां तत्प्रादुर्भावाच्च सूर्यश्चान्द्रीमेव कान्तिं पुण्डरीकस्नेहात्तदुदरेषु निक्षिपतीत्युत्प्रेक्षा। यथा द्विषन्तं प्रपीड्य तदीयं वसुसारं सुहृदे प्रयच्छति तद्वदिति भावः॥ ६२॥

प्रविकसतीति। द्योतितः प्रकाशितोऽशेषलोको येन तस्मिन् दश शतानि येषान्ते दशशतास्ते करा यस्याः सा दशशतकरा सहस्रकरा मूर्त्तिर्यस्य तस्मिन् दशशतकरमूर्त्तौ सूर्ये द्वितीयेऽक्षिणि चक्षुषीव चिराय प्रविकसति सति सम्प्रत्यसौ द्यौराकाशं स्त्री च लक्ष्यते विगलितकिरणेन निष्प्रकाशेन सितकरं शुभ्रकिरणं वपुर्यस्य तेन सितकरवपुषा चन्द्रेण व्यङ्गितं विकलीकृतमेकेक्षणमेकं नेत्रं यस्याः सा व्यङ्गितैकेक्षणा काणेव लक्ष्यते अत्र दिवः काणत्वमुत्प्रेक्ष्यते। तच्च काणत्वमक्षिणो ना-प्यर्थसितेन निष्प्रकाशितेन चन्द्रेणेति। तत्र येनाङ्गविकार इति तृतीया॥ ६३॥

रलूनपक्षाइव मेनिरे जनैः ॥ १७ ॥

उच्चैर्दधानैरवतत्य कन्धरा
सलावचूडाः कलघर्घरारवैः ।
भूमिर्महत्यप्यविलम्बितक्रमं
क्रमेलकैस्तत्क्षणमेव चिच्छिदे ॥ १८ ॥

तूर्णं प्रणेत्रा कृतनादमुच्चकैः
प्रणोदितं वेसरयुग्यमध्वनि ।
आत्मीयनेमिक्षतसान्द्रमेदिनी
रजश्छयाक्रान्तिभयादिवाद्रवत् ॥ १९ ॥

इवेति सविस्मयैर्जनैर्मेनिरे पूर्वं तरणाभावमपि यथा यावत् यथा-
कोऽपि कारणेन देवैः पक्षच्छेदं कारित इति मन्विदः ॥ १७ ॥

उच्चैरिति । उच्चैरवकाशचापचूडाः अधिमङ्कण्ठभूषणाः । शिरः-
शिखाभूषणेषु चूडेति यादवः । अवितत्य प्रसार्य वा कन्धराः
शिरोधराः उच्चैः वितत्य दधानैः कलघर्घरारवैः । 'घर्घरा क्षुद्र-
घण्टी स्यादिति कोशः' अथवा घर्घरारव इति मन्दार्थकरणम् । क्रमे-
लकैरुष्ट्रैरविलम्बितक्रमं क्रमः पदक्षेपः द्रुतपादक्षेपं यथा तथा
महत्यपि भूमिस्तत्क्षणमेव चिच्छिदे अतिक्रान्ता । स्वभावोक्तिः ॥ १८ ॥

तूर्णमिति । प्रणेत्रा सारथिना प्रणोदितं गमनाय प्रेरितम् ।
उच्चकैः उच्चैर्वेसरैः कृतनादं यथा तथा वेसरयुग्यम् । वेसरा
अश्वतराः । वेसराणां युग्यं शकटमात्मीयनेमिभिः चक्रधारा तया
क्षताः सान्द्रं मेदिनीरजश्छायेन समूहेन यदाक्रमणं तद्भयादिव
तिर्यगभूत्तेन धावत् । आत्मीयनेमिक्षतभूमिजातरजोभयेन हेतु द्रुत-
मद्रवदित्युत्प्रेक्षा ॥ १९ ॥

व्यावृत्तवक्त्रैरखिलैश्चमूचरै
र्व्रजद्भिरेव क्षणमीक्षिताननाः।
वल्गद्गरीयःस्तनकम्प्रकञ्चुकं
ययुस्तुरङ्गाधिरुहोऽवरोधिकाः॥२०॥
पादैः पुरः कूवरिणां विदारिताः
प्रकाममाक्रान्ततलास्ततो गजैः।
भग्नोन्नतानन्तरपूरितान्तरा
बभुर्भुवः कृष्टसमीकृता इव॥२१॥
दुर्दान्तमुत्प्लुत्य निरस्तसादिनं
सहासहाकारमलोकयज्जनः।

व्यावृत्तेति। व्यावृत्तवक्त्रैर्विवृत्तमुखैर्व्रजद्भिरेवाखिलैश्चमूचरैः क्षणमीक्षितानना: तुरङ्गाधिरुहस्तुरङ्गानधिरुहन्तीति क्विप्। तुरङ्गाधिरूढाः अवरोधिकाः अवरोधस्त्रियः वल्गद्भिश्चलद्भिः गरीयोभिर्गुरुतरैः स्तनैः कम्प्रः कम्पनशीलः कञ्चुकः कूर्पासो यस्मिन् कर्मणि तद्यथा तथा ययुः। नमिकम्पीत्यादिना रप्रत्ययः॥२०॥

पादैरिति। कूवरिणां रथानाम्। कूवरस्तु युगन्धरः। स एषामस्तीति ते रथास्तेषां पादैश्चक्रैः पुरः पूर्वं विदारिताः ततो गजैः प्रकाममाक्रान्ततलाः भग्नैरुन्नतप्रकारेण पूर्वं भग्नत्वादुच्चलैरनन्तरैरभ्यन्तरभागैः पूरितान्तराः समीकृतनिम्नप्रदेशाः यद्वा पूर्वं रथचक्रविदारितत्वाद्भग्नोन्नताः अनन्तरं गजपतिपरिक्रमणेन पूरितान्तरप्रदेशाः भुवः कृष्टसमीकृताः पूर्वं हलैः कृष्टा अनन्तरं बीजवपनार्थं समीकृता इव बभुः शुशुभिरे॥२१॥

दुर्दान्तमिति। उरोविदलितः पर्याणतः पल्ययनतस्त्वर्मव- एवोत्प्लुत्य निरस्तसादिनं स्वपृष्ठात्पातितारोहं एकदा दिशाद्रुतं

पर्य्याणतस्त्रस्तमुरोविलम्बिन
स्तुरङ्गमम्प्रद्रुतमेकया दिशा ॥ २२ ॥

भूभृद्भिरप्यस्खलिताः स्खलन्ती
रपह्नुवाना सरितः पृथूरपि ।
अन्वर्थसंज्ञैव परं त्रिमार्गगा
ययावसङ्गैः पथिभिश्चमूरसौ ॥ २३ ॥

त्रस्तौ समासन्नकरेणुसूत्कृता
न्नियन्तरि व्याकुलमुक्तरज्जुके ।
क्षिप्तावरोधाङ्गनमुत्पथेन गां
विलङ्घ्य लघ्वीं करभौ बभञ्जतुः ॥ २४ ॥

पलायितं दुर्दान्तं दुर्विनीतं तुरङ्गमं हासहेतुना हाकारेण सह यथा तथा जनोऽवलोकयत् अवलोकितवान् ॥ २२ ॥

भूभृद्भिरिति । उन्नतैरपि भूभृद्भिः भूधरैर्भूपैश्चास्खलिता अप्रतिहता पृथूर्महतीरपि सरितो यमुनाप्रभृतीर्नदीरपह्नुवाना स्वमहिम्ना छादयन्ती त्रिभिर्मार्गैर्गच्छतीति त्रिमार्गगा, गङ्गा परमत्यन्तमन्वर्था अनुगतार्था संज्ञा त्रिमार्गगेति नामधेयं यस्याः सैव खलु त्रिभिरेव मार्गैर्यातीति न चतुर्थेनेत्यर्थः । असौ चमूस्त्वसङ्गैः पथिभिर्ययौ अतो गङ्गाया अप्यधिका चमूरिति भावः । अतएव व्यतिरेकालङ्कारः । भेदप्राधान्ये साधर्म्ये उपमानोपमेययोः अधिकाल्पत्वकथनाद्व्यतिरेकः स उच्यते इति लक्षणात् ॥ २३ ॥

त्रस्ताविति । समासन्नस्य प्रत्यासन्नस्य करेणोर्हस्तिन्याः सूत्कृतात् सूत्काराच्छब्दात् त्रस्तौ करभौ वेसरौ । करभो वेसरेऽप्युष्ट्रे इति सज्जनः । नियन्तरि सारथौ व्याकुलं व्यग्रं यथा तथा मुक्तरज्जुके त्यक्तप्रग्रहे सति क्षिप्ता पातिता अवरोधाङ्गना यस्मिन् कर्मणि तद्यथा तथा उत्पथेनापथेन ।

स्रस्ताङ्गसन्धौ विगताक्षपाटवे
रुजा निकामं विकलीकृते रथे।
आप्तेन तक्ष्णा भिषजेव तत्क्षण-
मुपक्रमे लङ्घनपूर्वकः क्रमः ॥ २५ ॥

भूभङ्गसङ्क्षोभविदारितोष्ट्रिका
गलन्मधुप्लावितदूरवर्त्मनि।
स्थाणौ निषङ्गिण्यनसि क्षणात्पुरः
शुशोच लाभाय कृतक्रयो वणिक् ॥ २६ ॥

ध्वजभूरित्यादिना समासान्तः। गां भूमिं विलङ्घ्य दूरमतीत्य ऊर्ध्वं इत्यविवेकम्। ऊर्ध्वं सावरयुक्तादौ समेदे स्यन्दनस्य चेति हेमः। संरूढतः समस्तौ। अत्र साधस्य विवेचनकदा भङ्गनच्छेदनात्तदापदितं ह्याश्चर्यं समाशोक्ता ऊर्ध्वं इति ॥ २४ ॥

स्रस्तेति। स्रस्ताः शिथिला अङ्गसन्धयोऽङ्गानां कूबरचक्रादीनां च सन्धयः सन्धिभागा यस्य तस्मिन् विगतमक्षपाटवं चक्रधारकाष्ठस्याक्षाणामिन्द्रियाणां च पाटवं सामर्थ्यं यस्य तस्मिन् रथे स्यन्दने शरीरे च। रथः स्यात्स्यन्दने काय इति विश्वः। रुजा भङ्गेन रोगेण च निकामं विकलीकृते सति आप्तेन हितेन तक्ष्णा वर्धकिना आप्तेन भिषजा वैद्येनेव। तक्षा तु वर्धकिस्त्वष्टेत्यमरः। तत्क्षणं तत्कालमेव उपक्रमे। लङ्घन-पूर्वकः क्रमः। लङ्घनं पादेना क्रमणं उपवासश्च। लङ्घनं तूपवासे स्यादुल्लङ्घने च इति विश्वः। तत्पूर्वकः क्रमोऽविधिः प्रवृत्ते प्रक्रान्तः प्रायेण स्यादिति भावः। उपमालङ्कारः ॥ २५ ॥

भूभङ्गेति। स्थाणौ कीले। स्थाणु कीले स्थिरे हरे इति विश्वः। निषङ्गिणि सक्ते अनसि शकटे। क्लीबेऽनः शकटोऽस्त्री स्यादित्यमरः। भुवोऽभङ्गः भङ्गेन यः सङ्क्षोभो विचलितः तेन विदारिता भिन्ना या उष्ट्रिका मृद्भाण्डम्। उष्ट्रिका मृत्तिकाभाण्डभेदे करभयोषिति

भेरीभिराक्रुष्टमहागुहामुखो
ध्वजांशुकैस्तर्ज्जितकन्दलीवनः।
उत्तुङ्गमातङ्गजितालघूपलो
बलैः स पश्चात् क्रियते स्म भूधरः ॥२७॥

वन्येभदानानिलगन्धदुर्द्धराः
क्षणन्तरुच्छेदविनोदितक्रुधः।
व्यालद्विपायन्तृभिरुन्मदिष्णवः
कथञ्चिदारादपथेन निन्यिरे ॥ २८ ॥

गतीति विग्रहः। ततोगलता स्रवता मधुना मद्येन प्लावितं सिक्तं दूरवर्त्म दीर्घाध्वा येन तस्मिन् तथा सति पुरः पूर्वं लाभाय हतः क्रयः क्रयणं येन स वणिक् चणं शुशोच। अत्र मधुस्रावधनव्यययोर्विशेषणगत्या शोकहेतुत्वात्काव्यलिङ्गभेदः ॥ २६ ॥

भेरीभिरिति। भेरीभिराक्रुष्टानि निनादितानि महान्ति गुहा मुखानि येन सः भेरीभाङ्कारप्रतिध्वनितनितान्तवाचालमहागुहाद्वार इत्यर्थः। ध्वजांशुकैस्तर्ज्जितानि भर्त्सितानि कन्दली दलानि पुष्पपत्राणि येन सः उत्तुङ्गमातङ्गैर्जिताः अलघूपलाः स्थूलपाषाणा येन सः भूधरो रैवतकाद्रिः बलैः सैन्यैः पश्चात् क्रियते स्म पश्चात्कृतः स्वयं दूरगमनेन पृष्ठतः कृत इत्यर्थः उक्तविशेषणमहिम्ना अधरीकृत इति च प्रतीयते। लट् स्मे इति भूतार्थे लट्। आक्रुष्टेति क्रोशतेः कर्मणि क्तः, मयादित्वात् षत्वं ष्टुत्वम्। अत्र पश्चात्करणस्याक्रुष्टादिपदार्थहेतुकत्वात्काव्यलिङ्गं तयोश्च प्रतीयमानभेदाध्यवसायादिति शेषमूलातिशयोक्तिसङ्कीर्णम् तेन बलानां भूधरोपमर्दं गमयत इत्यर्थोऽलङ्कारेणालङ्कारध्वनिः ॥ २७ ॥

वन्येभेति। वन्येभदानानिलगन्धेन वनगजमदमारुतगन्धेन आघ्राण दुर्द्धराः क्रोधान्धाः दुर्वाराः। अतएव क्षणं तरुच्छेदेन विनोदितक्रुधः गमितक्रोधाः तरूणां भङ्गेनापनीतक्रोधाः उन्मदिष्णव उन्मदन-

तैर्वैजयन्तीवनराजिराजिभि
र्गिरिप्रतिच्छन्दमहामतङ्गजैः ।
वहुः प्रसभ्यं ज्जनतानदीशतै
र्भुवोवलैरन्तरयाम्बभूविरे ॥ २९ ॥
तस्थे मुहूर्त्तं हरिणीविलोचनैः
सहंशि दृष्ट्वा नयनानि योषिताम् ।

णीताः । अलङ्कर्मीणादिना दृष्टव्यम् । यावद्द्विपाः दुष्टगजाः अनृभि-
राधोरणैः कथञ्चिदारात् दूरादपयेनामार्गेण । पयोऽभिमायेति निषेध-
विकल्पाद्धकपूरित्यादिना समासान्तः । अपथं नपुंसकत्वम् । निन्दिरे
नीताः अत्रापि द्विपविशेषणानां तदुपमेयहेतुकत्वात् काव्यलिङ्गं भूतूप-
मारोपाः सङ्कीर्यन्ते ॥ २८ ॥

तैरिति । वैजयन्त्यः पताकास्तासां वनराजय इव ताभी राजन्तीति
तथोक्तैः गिरीणां प्रतिच्छन्दाः प्रतिनिधयस्तत्सदृशा इत्यर्थः । एतस्मा-
देव अटोपमाख्यिद्वादन्दवात्पुपमित समासाश्रयणम् । ते महामतङ्ग-
जा येषु तैः । जनता जनसमूहास्तानद्य इव तासां शतानि प्रसभंनि
प्रवहन्ति येषु तैर्वहैस्तथोक्तैः सैन्यैः । वहेर्शावहः । वह्यादिश्चेति
विकल्पाद्दीकारः । भुवोभूमयः अन्तरयाम्बभूविरे अन्तरादूराः कृता इति
अतिक्रान्ता इत्यर्थः । न केवलं सैन्यकाद्रि देवेति भावः । वर्णैर्पुल्या-
दाख्यादिना इत्यर्थः । उक्तविशेषणावगत साहश्यादत्यन्तभेदाः कृता
इति च गम्यते । एतेनाभेदाध्यवसायादेवाद्यामदलङ्कारान्तरोद्दपात्
प्रत्विशेषणागततादृस्य हेतुत्वात्तदङ्गतोपमाभावस्य यदार्थहेतुकं
काव्यलिङ्गं शेषमूलाभेदातिशयोक्त्युत्थापितमिति सङ्करः । अन्तरयन्तरा-
न्तरोऽतीति इत्यस्माद्धर्मर्थि लिटि कासूरलके प्रत्ययोऽनुप्रयोगः ॥ २९ ॥

तस्य इति । हरिण्योविलोचनैः सहंशि सहशानि । नपुंसकस्य झलच-
इति नुम् । योषितां नयनानि दृष्ट्वा । सर्गैः इतरसारैः कस्तूरिमृगैर्मुहूर्त्त-
मात्रम् । मुहूर्त्तं मध्यकाले त्वाह्ट्वाद्विचेऽपि चेत् विरा. ।

मत्वाथ सत्रासमनेकविभ्रम
क्रियाविकाराणि मृगैः पलाय्यत ॥ २० ॥
निम्नानि दुःखादवतीर्य सादिभिः
सयत्नमाकृष्टकशाः शनैः शनैः ।
उत्तेरुरुत्तालखुरारवन्द्रुताः
श्लथीकृतप्रग्रहमर्वतां व्रजाः ॥ २१ ॥
अध्यध्वमारूढवतैव केनचित्
प्रतीक्षमाणेन जनम्मुहुर्धृतः ।

हरिणीविलोचनवदेवेति भावः अथानन्तरमनेकविभ्रमक्रियाविलास-क्रिया एव विकारा येषां तानि मत्वा सविलासानि ज्ञात्वेत्यर्थः सत्रासं सभयं यथा तथा पलाय्यत पलायितम् । हरिणीदुर्लभैर्विलासैर्योषिद्भ्रमादिति भाव । अतएव निश्चयान्त संशयालङ्कारः । परापूर्वादयतेर्भावे लङ् । उपसर्गस्यायताविति लत्वम् ॥ २० ॥

निम्नानीति । अर्वतामश्वानाम् । वाजिवाहार्वगन्धर्वहयसैन्धवसप्तय इत्यमरः । अर्वणस्त्रसावनञ इति त्रादेश । व्रजा समूहाः । सादिभिरश्वारूढैः सयत्नमाकृष्टकशा दृढस्वीकृतवल्गा सन्तः । यद्य प्यश्वादेस्ताडिनी कशेत्यमरः तथाप्यत्र ताडिनीरज्ज्वो कशेति दर्शना दविरोधः । शनैः शनैर्दुःखात्कृच्छ्रान्निम्नानि निम्न भूप्रदेशानवतीर्य उत्तालखुरारवं उच्चतरघफणन्दं श्लथीकृत प्रग्रहं शिथिलितवल्गां च यथा तथा द्रुतं सत्वरं सन्त उत्तेरुः उत्पुप्लुविरे । निम्नेषु शनै-रवतीर्य दीर्घं धावन्तीत्यश्वानां स्वभाव इति भाव । अतएव स्वभावोक्ति ॥ २१ ॥

अध्यध्वमिति । रथस्य भारोदास्यं कोमलं मृदु फलदं कृतः यस्मादध्यध्वमध्वनि । विभक्त्यर्थेऽव्ययीभाव अनश्चेति समा सान्तो-

दार्ढ्यं हि सद्यः फलदं यदग्रत
श्चखाद दासेरयुवा वनावलीः ॥ २२ ॥
पौरैः प्रतापोपनतैरितस्ततः
समागतैः प्रश्रयनम्रमूर्त्तिभिः ।
एकातपत्रा पृथिवीभृताङ्गणे
रभूद्बहुच्छत्रतया पताकिनी ॥ २३ ॥
आगच्छतोऽनूचि गजस्य घण्टयोः
स्वनं समाकर्ण्य समाकुलाङ्गनाः ।

ण्यप्रत्ययः मलोपित इति टिलोपः । आरूढवतेव आरुह्येव स्थितेन । निष्ठेति क्ते क्तप्रत्ययः । शनैः शनैः यथादागच्छन्तं स्वजनं प्रतीक्षमाणेन केनचित्तु वेति शेषः । सुद्दृष्टेन स्वामिनोऽपि दासेरयुवा तदन्वोढः । विशेषणसमासः । वनावलीः वनोदयात् पुरः पितुमर्हादिशं भक्षयामास इत्यर्थः । न हि कृतघ्नो यथा कामं यापयतीति भावः । अत्र दार्ढ्यफलस्य सामान्यस्य तद्विशेषेण दासेरकौशलेन समर्थनाद्विशेषेण सामान्य समर्थनरूपोऽर्थान्तरन्यासः ॥ २२ ॥

पौरैरिति । पौरैः तस्य पताकिनी सेना । सौदामिनी दिवि । प्रतापेन स्फूर्तिजसा उपनतैर्नम्रैः विधेयैरित्यर्थः । अतएवेतस्ततः समागतैः पार्श्वद्वयादागतैः प्रश्रयनम्रमूर्त्तिभिः हरिसन्निधौ विनयनम्रविग्रहैः पृथिवीभर्ता राज्ञा सर्वैरेतना बहु उन्नतया अबहुच्छातपत्रत्वया निमित्तेन एकानि केवलानि आतपत्राणि यस्याः सा एकातपत्रा केवलातपत्रमयी अभूत् । अत्र पताकिनीत्वं न विरुद्ध्यतीत्यर्थः । एकं छत्रमन्येषामिवच्छत्रमः । बहुच्छत्राप्येकच्छत्रेति विरोधाभासः-विरोधाभासोऽलङ्कारः ॥ २३ ॥

आगच्छत इति अनुगच्छतीत्यनूचि अनूचि समीपे इत्येके । अनिगिमादिनापि क्विप्रत्ययः । आगच्छतोऽग्रस्य घण्टयोः स्वनं समा-

दूरादपावर्त्तितभारवाहणाः
पथोऽपसस्रुस्त्वरितञ्चमूचराः ॥ २४ ॥
ओजस्विवर्णोज्ज्वलवृत्तशालिनः
प्रसादिनोऽनुज्झितगोत्रसंविदः
श्लोकानुपेन्द्रस्य पुरः स्म भूयसो
गुणान्समुद्दिश्य पठन्ति वन्दिनः ॥ २५ ॥
निःशेषमाक्रान्तमहीतलाजलैः

कथं समाकुलाङ्गना सम्भ्रान्तवधूकाः चमूचराः दूरादेवापावर्त्तिता
अपसारिताभारक्लाम्यादेर्वाहनाभारवाहणा भारवाहिन उष्ट्रादयो यैस्ते
तथा सन्तः । वाहनमाहितादिति णत्वम् । वहेर्ण्यन्तात्कर्त्तरि ल्युट् ।
त्वरितं शीघ्रं पथोमार्गादपसस्रुरपजग्मुः । स्वभावोक्तिः ॥ २४ ॥

ओजस्वीति । वन्दिनः स्तुतिपाठकाः । वन्दिनस्तुतिपाठका इत्य-
मरः । ओजस्विवर्णस्य तेजस्विवर्णस्य क्षत्त्रजातेर्यदुज्ज्वलं उत्तमदम
व्यापारं विजयाख्यं तेन शालत इति ओजस्विवर्णोज्ज्वलवृत्तशाली
तस्य अन्यत्र ओजस्विवर्णैः समासभूयिष्ठाक्षरैरुज्ज्वलास्ते च ते वृत्त
शालिनो वसन्ततिलकादिच्छन्दोविशेषशालिनश्च । वृत्तं चरित्रे छन्दसो
ःपीति विश्वः । तान् प्रसादोऽस्यास्तीति प्रसादी तस्य प्रसादिनोऽ-
नुग्रहशीलस्य । अन्यत्र प्रसादगुणयुक्तान् । प्रसिद्धार्थपदत्वं यत्र प्रसा-
दो निगद्यत इति । अनुज्झितौ गोत्रसंविदौ कुलाचारौ येन तस्य याद-
वयोत्पन्नस्येत्यर्थः । अन्यत्र कुलनामभी यैस्तान् । वंशनामाङ्किता-
नित्यर्थः । संविद्युद्धे प्रतिज्ञायां सङ्केताचारनामसु इति वैजयन्ती । एव-
मृ तस्य उपेन्द्रस्य पुरो गुणानुद्दिश्याधिकृत्य भूयसोबहुलान् श्लोकान्
स्तुतिपद्यानि पुरोऽग्रे पठन्ति स्म । अत्रोपेन्द्रस्य तच्छ्लोकानां च वर्ण्य-
त्वेन प्रकृतानां श्लेषसाधर्म्यां दीपकगम्यतायां श्लेषप्रतिभोत्पत्तिः

श्चलन् समुद्रोऽपि समुज्झति स्थितिम् ।
ग्रामेषु सैन्यैरकरोदवारितः
किमव्यवस्थाञ्चलितोऽपि केशवः ॥ २६ ॥
कोशातकीपुष्पगुलुच्छकान्तिभि
र्मुखैर्विनिद्रोल्लणबाणचक्षुषः ।
ग्रामीणवध्वस्तमलक्षिताजन
श्चिरं वृतीनामुपरि व्यलोकयन् ॥ २७ ॥
गोष्ठेषु गोष्ठीकृतमण्डलासनान्
सनादमुत्थाय मुहुः स वल्गतः ।

निःशेषमिति । चलन् कल्पान्ते क्षुभितः समुद्रोऽपि जलैर्निःशे-
षमाक्रान्तमहीतलः सन् स्थितिं मर्यादां वेलालङ्घनलक्षणां समु-
ज्झति त्यजति । केशवस्तु चलितोऽपि प्रस्थितोऽपि अवारितैः स्वैरं च-
लितैः सैन्यैर्निःशेषमाक्रान्तमहीतलः सन् ग्रामेषु अव्यवस्थां अमर्यादां
किमकरोत् नाकरोदेवेत्यर्थः । अतो महतामप्युद्रेकेऽपि केशवस्य मर्या-
दानतिक्रमेणाधिक्यकथनाद्व्यतिरेकालङ्कारः । वंशस्थवृत्तम् ॥ २६ ॥
कोशातकीति । कोशातकीपुष्पगुलुच्छकान्तिभिः पटोलीपुष्पस्तबक-
च्छायैः अरपाण्डुरैरित्यर्थः । कोशातकी पटोली स्यादिति हलायुधः ।
मुखैरुपलक्षिता विनिद्रं विकसितं लवणबाणवत् विपुलं बाणकोश-
वैदेश्यादिव चक्षुर्यासां ताः । नीला झिण्टी द्वयोर्बाणा इत्यमरः ।
ग्रामे भवा ग्रामीणाः । ग्रामादयखञाविति खञ्प्रत्ययः । ताश्च
वध्वः स्त्रियः न दृष्टं ग्रामान्तरमिति भावः । अलक्षितमपरे-
रभिलक्षितैरभिरुपरोहिता इत्यर्थः चिरं वृतीनां कण्टकशाखावरणा-
नामुपरि तदवलोकनाय व्यलोकयन् । उदात्तालङ्कारः ॥
गोष्ठेष्विति । स गोपीनामिति गोष्ठीनां गोपानि ।

ग्राम्यानपश्यत्कपिशं पिपासतः
स्वगोत्रसङ्कीर्त्तनभावितात्मनः ॥ ३८ ॥
पश्यन् कृतार्थैरपि वल्लवीजनो
जनाधिनाथ न ययौ वितृष्णताम् ।
एकान्तमौग्ध्यानवबुद्धविभ्रमैः
प्रसिद्धविस्तारगुणैर्विलोचनैः ॥ ३९ ॥
प्रीत्या नियुक्तांल्लिहतीः स्तनन्धया
न्निगृह्य पारीमुभयेन जानुनीः ।

गोष्ठं गोस्थानकमित्यमरः । सुपि स्थ इति कप्रत्ययः ग्राम्यान्गोभू मीत्यादिना भवम् । गोष्ठीषु वार्त्तासु । गोष्ठी सभायां संलाप इति विश्वः । कृतानि मण्डलासनानि मण्डलाकारेणोपवेशनानि यैस्ता न्मुहुः सनादं स्वेलाट्टाट्टहासाद्यारावसहितं यथा तथोत्थाय भवमत उत्प्लवमानान् कपिशं मद्यम् । कश्यं मद्यं च मैरेयं कपिशं कापि शायनमिति हलायुधः । पिपासतो सुङ्क्ष्वेङ्क्तु पातुमिच्छत । पिबते सन्नन्ताल्लट शतरि शप् । स्वगोत्र सङ्कीर्त्तने स्वनामसङ्कीर्त्तने भावि तात्मनः प्रवर्त्तितचित्तान् स्वनामानि गायत इत्यर्थः । ग्रामेषु भवान् ग्राम्यान् घोषजनानित्यर्थः । ग्रामादयखञाविति यञ्प्रत्ययः । अप श्यदालोकितवान् स्वभावोक्तिः ॥ ३८ ॥

पश्यन्निति । एकान्तमौग्ध्येनात्यन्तमुग्धतया अनवबुद्धविभ्रमैरज्ञात विलासैः किन्तु प्रसिद्धो विस्तारः एव गुणो येषान्तैरतिविशालैरित्यर्थः । कृतार्थैरपि सकृद्दर्शनाल्लब्धविस्तारफलैरित्यर्थः । विलोचनैर्जनाधिनाथ कृष्णं पश्यन् वल्लवीजनो गोपाङ्गनाजनः वितृष्णतां तृप्ततां न ययौ भूयोभूयः पश्यन्नपि नालम्बुद्धिमवापेत्यर्थः । तृप्तिकारणे दर्शने सत्यपि तृप्तिकार्यानुत्पत्तेर्विशेषोक्तिः सा वक्ष्यमाणा मदनकौटिल्यात्यन्तकौ व्यञ्जयति ॥ ३९ ॥

वर्द्धिष्णुधाराध्वनि रोहिणीः पय-
श्चिरन्निदध्यौ दुहतः स गोदुहः ॥ ४० ॥
अभ्याजतोऽभ्यागततर्णतर्णका-
न्निर्याणहस्तस्य पुरो दुधुक्षतः ।
वर्गाद्गवां हुङ्कृतिचारु निर्यती-
मरिर्मधोरैक्षत गोमतल्लिकाम् ॥ ४१ ॥

मौल्येति । निबद्धान् दामभिः संयतान् स्तनन्धयानि[illegible]नीति स्तनन्धयान्वत्सान् नाडिन्धमस्तनन्धयौ चेति धेटः खश्प्रत्ययः । मौला बहून् विद्यतो[illegible]पाययन्तीः रोहिणीः गाः । रोहिण्यथ रोहिणी स्यादित्यमरः । पयः क्षीरं ... दोहनपात्रं पारीं दोहनपात्रीम् । पारी पात्रीपदार्थयोरिति विश्वः । निरुध्य निरुध्य । वर्द्धिष्णुधाराध्वनि वर्द्धमानक्षीरधारा शब्दं यथा भवति तथा दुहतः पुरतः । दुहेः लटः शतरि यक् । दुहतीति [illegible] । गां दुहन्तीति गोदुहः गोदोहकान् । सत्सूद्विषेत्यादिना क्विप् । स हरिश्चिरं निदध्यौ अवलोकयति स्म । निध्यानमवलोकनमिति वैजयन्ती । स्वभावोक्तिः ॥ ४० ॥

अभ्येति । अभ्याजतः दोग्धुमभिमुखमागच्छतः । अजेर्व्यघञपोः इति वीभावाभावः । निर्याणं पादबन्धनदाम । निर्याणं दाम संदानं पशूनां पादबन्धने इति वैजयन्ती । हस्ते यस्य तस्य निर्याणहस्तस्य दुधुक्षतो दोग्धुमिच्छतो गोदोग्धुरिति शेषः । दुहेः सन्नन्ताल्लटः शत्रादेशः अन्ययने । पुरोऽग्रेऽभ्यागततर्णकानभिमुखमागतवत्सान् तर्णको वत्सः ... । तर्णकोऽल्पतर्णकः । वर्गात् गवां यूथात् हुङ्कृतिचारु हुङ्कारमनोहरं यथा तथा निर्यतीं निर्गच्छन्तीम् । अयः पर्यादेः ... । मधोरिः गा गोमतल्लिकाम् । मतल्लिका मचर्चिकेति विग्रहः । मतल्लिका मचर्चिका प्रकाण्डमुद्घतल्लजौ

स व्रीहिणां यावदपासितुङ्गताः
शुकान्मृगैस्तावदुपद्रुतश्रियाम् ।
कैदारिकाणामभितः समाकुलाः
सहासमालोकयति स्म गोपिकाः ॥ ४२ ॥

व्यासेद्धुमस्मानवधानतः पुरा
चलत्यसावित्युपकर्णयन्नसौ ।
गीतानि गोप्याः कलमम्मृगव्रजो
न नूनमत्तीति हरिर्व्यलोकयत् ॥ ४३ ॥

प्रशस्तवाचकान्यमूनीत्यमरः । मधोररिर्मधुसूदन ऐक्षत ईक्षितवान् ।
ईक्षते र्वेञ्चाडआदीनामित्याट् आटश्चेति वृद्धिः । स्वभावोक्तिः ॥४१॥

स इति । यावच्छुकान् कीरानपासितुङ्गतास्तावन्मृगैरुपद्रुत श्रिया-
मुपद्रुतसम्पदां व्रीहिणां व्रीहिमताम् । व्रीह्यादिभ्यश्चेति इनि प्रत्ययः ।
कैदारिकाणां क्षेत्रसमूहानाम् । पुंनपुंसकयोर्वप्रः केदारः क्षेत्रमस्य तु ।
कैदारिकं स्यात्कैदार्यं क्षेत्रं कैदारिकं गणे इत्यमरः । ठञ् कवचि-
नश्चेति चकाराट्ठञ्प्रत्ययः । तद्योगात्कर्मणि षष्ठी । गोपिकाः
गोपीरभितः समाकुलाः व्यग्रा उभयतः समाकृष्यमाणाः सतीरि-
त्यर्थः । स हरिः सहासमालोकयति स्म । अत्र सहासावलोकनस्य
विशेषणगत्या समाकुलपदार्थहेतुकत्वात्काव्यलिङ्गभेदः ॥ ४२ ॥

व्यासेद्धुमिति । गोप्याः शालिगोप्त्र्याः । गौरादित्वात् ङीप् ।
गीतानि उपकर्णयन् शृण्वन् असौ मृगव्रजः नूनं निश्चितं कलमं
नात्ति न खादति इति किं कलमभक्षणे गीतश्रवणविशेष इत्युत
आह असौ गोपी अस्मान् व्यासेद्धुं निवारयितुं अवधानतो गीतै-
काग्र्यात् पुरा चलति चलिष्यति । यावत्पुरानिपातयोर्लडिति भवि-
ष्यदर्थे लट् । इत्यत्र वितर्कयमिति शेषः । हरिर्व्यलोकयत् । अत्र

लीलाचलत्स्त्रीचरणारुणोत्पल
स्खलत्तुलाकोटिनिनादकोमलः ।
शौरेरुपानूपमपाहरन्मनः
स्वनान्तरादुन्मदसारसारवः ॥ ४४ ॥
उच्चैर्गतामस्खलिताङ्गरीयसी
न्तदातिदूरादपि तस्य गच्छतः ।
एके समूहुर्बलरेणुसंहतिं
शिरोभिराज्ञामपरे महीभृतः ॥ ४५ ॥

स्मराणां कलमसादनमिषत्तो गीतार्थक्रिनमित्तायास्तदा कथं महाप्रभ-
ञ्जनहेतुकत्वमुत्प्रेक्ष्यते ॥ ४२ ॥

लीलेति । अनुगता आपो येषु ते अनूपा जलप्रायदेशाः । 'जल-
प्रायमनूपं स्यात् पुंसि कच्छस्तथाविधः' इत्यमरः । 'प्रादिभ्यो धातु-
जस्य वाच्यो वा चोत्तरपदलोपश्च' इति बहुव्रीहिः 'ऋक्पूरित्यादिना समा-
सान्त' 'ऊदनोर्देशे' इत्यूकारः । तेषां समीपे उपानूपम् । समीपा-
र्थेऽव्ययीभावः । लीलया चलति चलनशीले स्त्रियाश्चरणे अरुणो-
त्पले इव तयोः स्खलन्त्यौ ये तुलाकोटी नूपुरौ । 'पादाङ्गदं तुलाको-
टिर्मञ्जीरो नूपुरोऽस्त्रियाम्' इत्यमरः । तयोर्निनाद इव कोमलो मधुरः
उन्मदसारसारवः 'मत्तहंसकूजितम् । चक्राङ्गसारसौ हंस इति यादवः
र्षवे । शौरेर्मनः स्वनान्तरादपाहरत् । अत्र मनोहरत्वस्य सारसरवे
स्वादिविशेषणार्थहेतुकत्वादुपमासङ्कीर्णं काव्यलिङ्गम् ॥ ४४ ॥

उच्चैरिति । तदा तन्निनृकमदे अतिदूरादुद्गच्छतोऽपि तस्य हरेः
सम्बन्धिनीमुच्चैर्गतामत्यूर्ध्वं स्थिताम् । अन्यत्रोच्चैर्घोषमपि व्याप्ताम् ,
अस्खलितामभङ्गुरां महतीं च गरीयसीं बलरेणुसंहतिं सेनारजःसमूहं
सेनाबलसहितं एके वाहनके महीभृतः पर्वताः । अपरे राजान

प्रायेण नीचानपि मेदिनीभृतो
जनः समेनैव पथाधिरोहति ।
सेना मुरारेः पथएव सा पुनः
र्महामहीध्रान्परितोऽध्यरोहयत् ॥ ४६ ॥
दन्ताग्रनिर्भिन्नपयोदमुन्मुखाः
शिलोच्चयानारुरुहुर्महीयसः ।
तिर्य्यक्कटप्लाविमदाम्बुनिम्नगाः
विपूर्य्यमाणश्रवणोदरान्द्विपाः ॥ ४७ ॥

अपरे महीभृतोराजानश्च शिरोभिः मौलैः मौलैश्च समूहुः संवहन्ति स्म । वहेर्लिटि भेजुषि वचि स्वपीत्यादिना सम्प्रसारणम् । अत्र हरिमहिमवर्णनायामुभयेषामपि महीभृतां प्रकृतत्वात्केवलप्रकृतास्पदा तुल्ययोगिताश्लेष प्रतिभोत्थापिता चेति सङ्करः ॥ ४५ ॥

प्रायेणेति । प्रायेण प्राचुर्य्येण नीचान् क्षुद्रानपि मेदिनीभृतोऽद्रीन् जनोलोकः समेन कुगमेन पथा मार्गेणैवाधिरोहति । सा मुरारेः सेना पुनः पथोमार्गानिव महामहीध्रान् महाद्रीनुपरितोऽध्यरोहयत् । लोके हि सति सुखेऽध्वनि तेन शैलारोहणं दृष्टम् सेना सर्व्वपथातिरेकिण्यभूत् । पूर्वापरः सङ्कस्त पन्थानः स्वारोहणेन प्रवर्त्तिता इत्यर्थः । रोहतेर्गत्यर्थत्वाद्गतिबुद्धीत्यादिना पथामणिकर्तुः कर्म्मत्वम् । महीं धरन्तीति महीध्राः । मूलविभुजादित्वात्कः । अत्र सेनायाः पथां शैलाधिरोहणेनोपमानाज्जनादाधिक्यकथनाद्व्यतिरेकः ॥ ४६ ॥

दन्ताग्रेति । द्वाभ्यां पिबन्तीति द्विपाः । सुपीति योगविभागात् कप्रत्ययः । उन्मुखा उन्नमितमुखाः सन्तः दन्ताग्रैर्निर्भिन्ना विदारिताः पयोदा मेघा उद्गगता यस्मिन्कर्म्मणि तद्यथा तथा तिर्यगूर्ध्वं सृष्टा शिल-

श्च्योतन्मदाम्भःकणकेन केनचि
ज्जनस्य जीमूतकदम्बकद्युता ।
नागेन नागेन गरीयसोच्चकै
ररोधि पन्थाः पृथुदन्तशालिना ॥ ४८ ॥

भग्नद्रुमाश्चक्रुरितस्ततोदिशः
समुल्लसत्केतनकाननाकुलाः ।
पिष्टाद्रिपृष्ठास्तरसा च दन्तिन
श्चलन्निजाङ्गाचलदुर्गमाभुवः ॥ ४९ ॥

क्षौमं यथा तथा [illegible] मदाम्बु-
[illegible]
[illegible] । सभा-
सोक्तिः ॥ ४७ ॥

अरोधीति । श्च्योतन्तः चलन्तो मदाम्भःकणा यस्य तेन । केनचित् [illegible] । जीमूतकदम्बकस्येव द्युतिः [illegible] तेन । पृथुभ्यां दन्ताभ्यां शालते इति तच्छालिना । गरीयसा गुरुतरेणोच्चकैः उन्नतेन । केन-चिन्नागेन गजेन जनस्य पन्था मार्गः यथा अरोधि । नगेनाचलेन न तथारोधि [illegible] । [illegible] भावः । [illegible] ॥ ४८ ॥

भग्नेति । दन्तिनश्चलन्तो [illegible] दिशः [illegible] । तथा तरसा बलेन [illegible] भुवः [illegible] चक्रुः । [illegible]

आलोकयामास हरिर्महीधरा
नधिश्रयन्तीर्गजताः परःशताः।
उत्पातवातप्रतिकूलपातिनी
रुपत्यकाभ्योबृहतीः शिलाइव ॥ ५० ॥
शैलाधिरोहाभ्यसनाधिकोद्धुरैः
पयोधरैरामलकीवनाश्रिताः।
तम्पार्व्वतीयप्रमदाश्चचायिरे
विकाशविस्फारितविभ्रमेक्षणाः ॥ ५१ ॥

संस्कारेण रूपान्तरप्रवर्त्तनरूपं लोकोत्तरं सामर्थ्यं गमयत इत्यल-ङ्कारेण वस्तुध्वनिः ॥ ४९ ॥

आलोकेति। हरिर्महीधरान् अधिश्रयन्तीः परःशताः शतात् पराः असङ्ख्याता इत्यर्थः। परःशताद्यास्ते येषां परा सङ्ख्या शताधिकेत्यमरः। पञ्चमीति योगविभागात्समासः राजदन्तादित्वादुपसर्ज्जनस्यापि शतशब्दस्य परनिपातः पारस्करादित्वात्सुडागमः। गजताः गजसमूहान्। गजाच्चेति वक्तव्यमिति सामूहिकस्तल् प्रत्ययः। उपत्यकाभ्य आसन्नभूमिभ्यः। उपत्यकाद्रेरासन्ना भूमिरित्यमरः। उपाधिभ्यां त्यकन्नासन्नारूढयोरिति त्यकन्प्रत्ययः। उत्पातवातेन। तत्प्रतिकूलं पतन्तीति तत्पातिनीरूर्ध्वगामिनीरित्यर्थः। बृहतीः शिला इवेत्युत्प्रेक्षा। आलोकयामास ॥ ५० ॥

शैलेति। शैलाधिरोहाभ्यसनेन पर्वतारोहणाभ्यासेनाधिकोद्धुरैरत्युन्नतैः पयोधरैः स्तनैरुपलक्षिताः आमलकीवनाश्रिताः धात्रीवन-गताः। पर्व्वतोनिवासोयेषान्ते पर्व्वतीयाः किरातादयः। पर्व्वता-च्चेति छप्रत्ययः। तेषां प्रमदाः। विकाशेन विस्मयकृतविस्तारेण विस्फा-रिता विवर्त्तिताः विभ्रमा विलासायेषान्तानीक्षणानि यासान्तास्तथा सत्यः

सावज्ञमुन्मील्य विलोचने सकृत्
क्षणम्मृगेन्द्रेण सुषुप्सुना पुनः ।
सैन्यान्न यातः समयापि विव्यथे
कथं सुराजम्भवमन्यथाथवा ॥ ५२ ॥

उत्सेधनिर्धूतमहीरुहां ध्वजै
र्जनावरुद्धोद्धतसिन्धुरंहसाम् ।
नागैरधिक्षिप्तमहाशिलम्महु
र्वलम्बभूवोपरि तत्महीक्षिताम् ॥ ५३ ॥

त हरिं चचायिरे ददृशुः । चाय पूजानिशामनयोरिति धातोः क-
र्त्तरि लिट् । निशामन दर्शने निरीक्षणनिशामने इति दर्शनपर्य्यायेषु
भट्टमल्ल । एतेन हरेर्लोकोत्तर लावण्य व्यज्यत इति वस्तुना वस्तुध्वनिः
स्वभावोक्तिरत्यनुप्रासयो सङ्करः ॥ ५१ ॥

सावज्ञमिति । सावज्ञमनादर यथा तथा विलोचने सकृदेकवारम् ।
एकस्य सकृदिति सकृदर्थे निपात । क्षणमुन्मील्योन्मिष्य । पुन सुषुप्सुना
स्वप्तुमिच्छुना । स्वपे सन्नन्तादुप्रत्यय । रुदविदेत्यादिना सन क्रित्वा-
द्वचिस्वपीत्यादिना सम्प्रसारणम । मृगेन्द्रेण सिंहेन समया समीपे ।
समयानिकषाशब्दौ समीपे सम्प्रकीर्त्तिताविति हलायुध । यातोगच्छतो
ऽपि । यातेर्लट शत्रादेश । सैन्यात्सेनात । भीत्रार्थानां भयहेतु
रित्यपादानत्वम । न विव्यथे न बिभ्ये । व्यथ भयसञ्चलनयोरिति धातो
र्भावे लिट् । अथवा तथाहीत्यर्थ । अन्यथा भीतत्वे कथं सुराजम्भवं
सुखेन राज्ञा भूयत न कथमपीति भाव । राजा चायं मृगाणामिति
भाव । कर्तृकर्म्मणोश्च भूकृञोरिति कर्त्तरीषदादौ चोपपदे
खल्प्रत्यये मुमोपसमागमौ । अर्थान्तरन्यास ॥ ५२ ॥

 उत्सेधेति । नागैर्गजैरधिक्षिप्तास्तिरस्कृता महाशिला ...

असूयमाणे मधुजालके तरो
र्गजेन गण्डं कषता विधूनिते।
अक्षुद्रतराभिराकुलं
विदश्यमानेन जनेन दुद्रुवे ॥ ५४ ॥
नीते पलाशिन्युचिते शरीरवद्
गजान्तकेनान्तमदान्तकर्म्मणा।
सञ्जातरात्मानदवापरं क्षणा-

उत्सेधश्चोच्छ्रयश्च स इत्यमरः। शनैरवरूढं प्रतिबद्धमुद्धत एकैकं शिखरं-शृङ्गेण दीर्घगोत्रैर्दीर्घैस्तेषां महीभृतां पर्वतानाम् उपरि ऋद्धत्वं भूय मार्ग-वशाद्भूयसो भूधरान्मुद्धराद्धरोहेत्यर्थः। हयौघरुद्ध इति पाठे हयौघेन घोटकसमूहेन रुद्धमित्यादि पूर्ववत्। अत्रावरोहणपदनुकर्षणोपरिभावो-विशेषणवशात् प्रतीयते इति तद्भेदेनोपरिभावस्य शक्यभूधरविशेषण-पदार्थहेतुकत्वाच्चोपपत्तिभोत्थापितकाव्यलिङ्गविशेष ॥ ५३ ॥

असूयेति। तरोर्वृक्षस्य असूयमाणे असूयदाचरति तद्वदा लम्ब-मान इत्यर्थः। उपमालङ्कारः। असूयशब्दादाचारे क्यङन्ताल्लटः शान-जादेशः अकृत्सार्वधातुकयोर्दीर्घः। गण्डं कपोलं कषता तस्कन्धे कण्डूयमानेन गजेन मधुजालके क्षौद्रपटले विधूनिते कम्पिते सति। धूञोऽण्यन्तात्कर्मणि क्तः धूञ्प्रीञोर्नुग्वक्तव्य इति नुगागमः। अक्षुद्र-तराभिरतिस्थूलाभिः। क्षुद्राभिः सरघाभिः। क्षुद्रा व्यङ्गा नटी वेश्या सरघा कण्टकारिकेत्यमरः। विदश्यमानेन चञ्चुभिर्विद्धमानेन जनेन समाकुलं व्यग्रं यथा तथा दुद्रुवे पलायितम्। भावे लिट्। स्वभावो-क्तिरुक्तोपमासंसृष्टा ॥ ५४ ॥

नीत इति। उचिते परिचिते पलाशिनि द्रुमे। पलाशी द्रुद्रुमा-इत्यमरः। शरीरवत् पूर्वशरीरवत्। तत्र तस्येवेति वतिप्रत्ययः।

स्त्वामारुहन्देहमिव प्लवङ्गमाः॥ ५५॥
प्रह्वानतीव क्वचिदुद्धतिश्रितः
क्वचित्प्रकाशानथ गह्वरानपि।
साम्यादपेतानिति वाहिनी हरे
स्तदातिचक्राम गिरीन् गुरूनपि॥ ५६॥
स व्याप्नुवत्या परितोऽपथान्यपि

साहचर्यात्। तेन गजानीकेनात्तं नाथं भीते गमिते सति प्लवेन गच्छ-न्तीति प्लवङ्गमाः कपयः। गमेश्चेति खच्प्रत्यये मुमागमः। आत्मानो-ऽपीशा इत्यापदं समारुहन् देहमिव यथात् संवेशः सम्प्रविष्टा इत्यर्थः। अनेकेषामेकशाखार्थोपमा सा च दरीत्ववदिति तद्धितगता चान्यत्र समास-गतेति सङ्करः॥ ५५॥

प्रह्वानिति। क्वचिदतीव नितान्तं प्रह्वान् नम्रान्। अन्यत्रातिनम्रान् क्वचिदुद्धतिं श्रयन्तीत्युद्धतिश्रितः औन्नत्यभाजः औद्धत्यभाजश्च। श्रयतेः क्विप् तुक्। क्वचित्प्रकाशान् प्रकटाननवगूढवृत्तींश्च। क्वचिदति-गह्वरानपि। अपिशब्दार्थे। अप्रकाशान् अन्यत्र गूढांश्च। इतीत्थं साम्यादपेतान् विषमरूपान्विषमवृत्तांश्च। अतएव गुरून् महतोऽपि पूज्यानपि गिरीन्तदा हरेर्वाहिनी सेना अतिचक्रामातीत्य गता उल्लङ्घिता च। गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः, उत्पथप्रति-पन्नस्य परित्यागो विधीयते इति स्मरणादिति भावः। गुरुत्वाक्रम-णिक्रम इति विरोधे पिधानः यथोक्तरूपस्य दोषोद्घाटनेन परिहृत-इति विरोधाभासः स च गुरूनिति शाब्द श्लेषमूलातिशयोक्त्युत्थापित इति सङ्करः॥ ५६॥

स इति। स हरिः परितः समन्तादपथान्यमार्गानपि। पथो

खसेनया सर्व्वपथीनया तया ।
अम्भोभिरुल्लङ्घिततुङ्गरोधसः
प्रतीपनाम्नीः कुरुते स निम्नगाः ॥ ५७ ॥
यावद्व्यगाहन्त न दन्तिनाङ्घटा
स्तुरङ्गमैस्तावदुदीरितं खुरैः ।
क्षिप्तं समीरैः सरिताम्पुरः पत
ज्जलान्यनैषीद्रजएव पङ्कताम् ॥ ५८ ॥
रन्तुं ततोत्तुङ्गनितम्बभूमयो

योगः । तत्सर्व्वादेरित्यादिना खप्रत्ययः । तया सर्व्वपथीनया तया खसेनया निमित्तेन अम्भोभिरुल्लङ्घितानि युगपदखिलसैन्यप्रवेशेन प्रतीपगमनादुपर्याक्रान्तानि तुङ्गरोधांसि यासान्ता निम्नं गच्छन्तीति निम्नगा नदीः प्रतीपनाम्नीः कुरुते स्म । प्रतिगता उत्तानगा आपो यासान्ताः प्रतीपाः । ऋक्पूरित्यादिना समासान्तः । द्व्यन्तरुपसर्गेभ्योऽप ईदितीकारः । अथ वा प्रतीपं निम्नगानामविरुद्धं नाम उत्तानगा इति नामधेयं यासान्ताः प्रतीपनाम्नीः । अन उपधालोपिनोऽन्यतरस्यामिति ङीप् । तास्तथा चकारेत्यर्थः । अत्र निम्नगानां प्रतीपनामासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ ५७ ॥

यावदिति । दन्तिनां घटा गजघटा यावद्व्यगाहन्त न व्यलोडयन् तावत्तुरङ्गमैः कर्तृभिः खुरैः करणैः उदीरितं उत्थापितम् । अथ समीरैर्मारुतैः क्षिप्तं विकीर्णम् । अत एव पुरोगजप्रवेशात् प्रागेव पतद्रजोधूरेणुरेव सरितां जलानि पङ्कतामनैषीदगमयत् । नयतेर्द्विकर्म्मकत्वात् लुङि वृद्धिः । अत्रापि सरितां पङ्कासम्बन्धे-

मुहुर्व्रजन्तः प्रमदं मदोद्धताः ।
पङ्कं करापाकृतशैवलांशुकाः
समुद्रगाणामुदपादयन्निभाः ॥ ५९ ॥
रुग्णोरुरोधःपरिपूरिताम्भसः
समस्थलीकृत्य पुरातनीर्नदीः ।
कूलङ्कषौघाः सरितस्तथापराः
प्रवर्त्तयामासुरिभा मदाम्बुभिः ॥ ६० ॥

विदलिता उत्तुङ्गा नितम्बभूमयो रोधोभागाः श्रोणिभागाश्च यैस्ते । नितम्बो रोधसि स्कन्धे गिरेरपि कटीरके इति विश्वः । उद्धः प्रमदं हर्षं व्रजन्तः मदेन दानेन दर्पेण चोद्धताः । करैः शुण्डैरपाकृतानि शैवलानि च अंशुकानीवांशुकानि यैस्ते इभाः समुद्रं गच्छन्तीति समुद्रगाणां समुद्रपत्नीनां नदीनाम् । एकाजुत्तरपदे णः इति णत्वम् । पङ्कं कर्दमं कलुषं चोदपादयन् । पङ्कोऽस्त्री कर्दमैनसोरिति विश्वः । यथा परोद्धताः पराङ्गनानां दोषमुत्पादयन्ति तद्वदिति भावः । अत्र प्रस्तुतेभविशेषणसाम्यादप्रस्तुतस्त्रीसंग्रहणव्यवहारप्रतीतेः समासोक्तिः स्त्रीपङ्कयोरभेदाध्यवसायादिति श्लेषमूला तिशयोक्त्युत्थापितेति सङ्करः ॥ ५९ ॥

रुग्णेति । इभा रुग्णैर्भग्नैरुरुभिर्महद्भी रोधोभिस्तटैः परिपूरिताम्भसो निम्नत्वेपरोधिताम्भस इत्यर्थः । पुराभवाः पुरातनीः । सायंचिरम्-इत्यादिना ट्युप्रत्यय तुडागमश्च टिड्ढाणञित्यादिना ङीप् । नदी समस्थलीकृत्य स्थलसमाः कृत्वा । मदाम्बुभिः समदोदकैः कूलङ्कषन्तीति कूलङ्कषाः ओघा यासां ताः उभयकूलप्रवाहिन्योऽपरा अन्या सरित प्रवर्त्तयामासुः । एतेन गजसम्पत्तिरुक्ता । अत्र नदीनां समस्थलत्वासम्बन्धे मदाम्बूनाञ्च सरित्त्वासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिरिति सजातीयसङ्करः ॥ ६० ॥

पद्मैरनन्वीतवधूमुखद्युतो
गता न हंसैः श्रियमातपत्रजाम् ।
दूरेऽभवन् भोजबलस्य गच्छतः
शैलोपमातीतगजस्य निम्नगाः ॥ ६१ ॥

स्निग्धाञ्जनश्यामतनूभिरुन्नतै-
र्निरन्तराला करिणां कदम्बकैः ।
सेना सुधाक्षालितसौधसम्पदां
पुरां बहूनामपरभागमाप सा ॥ ६२ ॥

प्रासादशोभातिशयालुभिः पथि

पद्मैरिति । पद्मैरनन्वीता अप्राप्ता वधूमुखस्य द्युतयः शोभा याभिस्ताः वधूमुखशोभाजितपद्मा इत्यर्थः । अन्वीतेति इङ् गताविति धातोः कर्मणि क्तः । हंसैरातपत्रजां छत्रजन्यां श्रियं न गता अगताः आतपत्रजितहंसशोभा इत्यर्थः । निम्नगा नद्यः शैलोपमामतीताः शिलासाम्यमतिक्रान्ता गजा यस्मिन् तस्य गच्छतो भोजबलस्य यादवसैन्यस्य दूरेऽभवन् अतिव्यवहिता इत्यर्थः । अपकर्षाच्चेति गम्यते तद्भेदाध्यवसायेनैव निम्नगानां दूरभवनस्य तद्विशेषणपदार्थहेतुकत्वात् श्लेषमूलातिशयोक्तिसमुत्थापितः काव्यलिङ्गभेदः ॥ ६१ ॥

स्निग्धेति । स्निग्धाञ्जनमिव श्यामाभिस्तनूभिरुन्नतैः करिणां कदम्बकैर्निरन्तराला नीरन्ध्रा सा सेना सुधया लेपनविशेषेण क्षालिता धवलिताः सौधसम्पदो यासां तासाम् । लेपभेदेऽमृते सुधेति वैजयन्ती । बहूनां पुरां पुरीणां परभागं विप्रकृष्टदेशमाप दूरमतीत्य गतेत्यर्थः । वर्णोत्कर्षश्च परभागः । तद्भेदाध्यवसायेन परभागाप्तौ विशेषणगत्या श्यामकरिकदम्बकनैरन्तर्यस्य हेतुत्वात् पूर्ववदुक्तकाव्यलिङ्गभेदः ॥ ६२ ॥

प्रासादेति । पथि मार्गे प्रभोः कृष्णस्य शिबिराः सेनानिवेशाः

प्रभोर्निवासाः पटवेश्मभिर्बभुः ।
नूनं सवानेन वियोगविक्लवा
पुरः पुरश्रीरपि निर्ययौ तदा ॥ ६३ ॥
वर्णं द्विपानां विरुवन्तउच्चकै
र्वनेचरेभ्य श्चिरमाचचक्षिरे ।
गण्डस्थलाघर्षगलन्मदोदक
द्रवद्रुमस्कन्धनिलायिनोऽलयः ॥ ६४ ॥
आयामवद्भिः करिणां घटाशतै
रथ.क्षताट्टालकपङ्क्तिरुच्चकैः ।

प्रासादशोभामतिशयालुभिरतिशायकैः । आलुचि शीङ्ग्रहणमपि कर्तव्यमित्यालुच्प्रत्ययः । पटवेश्मभिः पटमण्डपैर्बभुः । तेनोत्प्रेक्ष्यते । तदा द्वारकानिर्याणकालेऽनेन कृष्णेन सह वियोग विक्लवा विरह भीरुः पुरश्रीर्द्वारकानगरलक्ष्मीरपि पुरोऽग्रे निर्ययौ निर्गता । नून द्वारकातो न भिद्यन्ते यस्य निवासाः शोभयेति भावः ॥ ६३ ॥

वर्णमिति । गण्डस्थलानामाघर्षेण सङ्घर्षेण गलता स्रवता मदोदकेन द्रवेषु आर्द्रेषु द्रुमस्कन्धेषु ,निलीयन्त इति निलायिनस्थितिशालिन उच्चकैर्विरुवन्तो गुञ्जन्तोऽलय द्विपानां सेनागजानां वर्णं प्रमाणम् । वर्णं रेखाप्रमाणयोरिति विश्व । वनेचरेभ्य किरातेभ्य चिरमाचचक्षिरे दयन्तो गजा इत्यर्थः । गजवर्णानुमापकत्वमलिषु शिरस्त्वयोगा दाक्षामस्तुतप्रशंसा । वाचकाभावोगाद्यम्योत्प्रेक्षा ॥ ६४ ॥

आयामेति । आयामो दैर्घ्यं सोऽस्ति येषां तद्वद्भिरायततैरित्यर्थः । करिणां सम्बन्धिभिर्घटाशतैर्यूथशतैः । करिणां घटना घटेत्यमरः । रथ क्षताक्षिरस्कृता अट्टालकपङ्क्तिरट्टालकपङ्क्तिर्यया सा । उच्च स्थान इति वैजयन्ती । सा चमूरुच्चकैरुच्चैर्द्रुमे.

दूष्यैर्जितोदग्रगृहाणि सा चमू
रतीत्य भूयांसि पुराण्यवर्त्तत ॥ ६५ ॥
उद्धूतमुच्चैर्ध्वजिनीभिरंशुभिः
प्रतप्तमभ्यर्णतया विवस्वतः ।
आह्लादिकह्लारसमीरणाहतं
पुरः पपाताम्भसि यामुने रजः ॥ ६६ ॥
या घर्म्मभानोस्तनयापि शीतलैः
स्वसा यमस्यापि जनस्य जीवनैः ।

जितान्युदग्राणि गृहाणि यैस्तानि भूयांसि पुराणि अतीत्याव-र्त्तत अतिक्रम्य गतेत्यर्थः शोभया अतिशय्य स्थितेति च गम्यते । तद्भेदाध्यवसायेन श्लेषमूलातिशयोक्त्युत्थापितं पूर्ववत् पदार्थहेतुकं काव्यलिङ्गम् ॥ ६५ ॥

अथ हरिसेना कालिन्दीं प्रत्यासेदुरित्याह । उद्धूतमिति । ध्वजि-नीभिः सेनाभिरुद्धूतं ऊर्द्ध्वं क्षिप्तम् । अतएव उच्चैस्तया अनिक-तया । उपकण्ठान्तिकाभ्यर्णमित्यमरः । विवस्वतोंऽशुभिः । प्रतप्तं सन्तप्तमित्यर्थः । अतएव सन्तापयोगादुग्रतीतप्रेक्षा । आह्लादिन आह्लादकारिणः कह्लारसमीरणाः सौगन्धिकमारुताः । सौगन्धिकं तु कह्लारमित्यमरः । तैराहते कम्पिते यामुने यमुनासम्बन्धिन्यम्भसि पुरो-ऽग्रे रजोधूलिः पपात । सन्तप्ता हि सन्तापमसहमानाः पुरोधाविता कृत्स्नं शिशिरे पयसि पतन्तीति भावः ॥ ६६ ॥

अथ चतुर्भिर्यमुनां वर्णयति । येत्यादि । या यमुना घर्म्मभानो-स्तनयापि सती शीतलैरपि धर्म्मविरोधे सत्योष्ण जातायाः शैत्यानुपपत्तेरिति भावः । यमस्यान्तकस्य स्वसापि जनस्य जीवनैरु-दकैः असाध्यकोदराया भिन्नक्रियानुपपत्तेर्विरोधः । कालिन्दी

कृष्णापि शुद्धेरधिकं विधातृभि
र्विहन्तुमंहांसि जलैः पटीयसी ॥ ६७ ॥
यस्यामहानीलतटीरिव द्रुताः
प्रयान्ति पीत्वा हिमपिण्डपाण्डुराः ।
कालीरपस्ताभिरिवानुरञ्जिताः
क्षणेन भिन्नाञ्जनवर्णतां घनाः ॥ ६८ ॥
व्यक्तं बलीयान्यदि हेतुरागमा
दपूरयत्सा जलधिं न जाह्नवी ।

अर्यमतनया यमुना शमनस्वसेत्युभयत्राप्यमरः। किञ्च। कृष्णा कृष्णवर्णा मलिना च तथापि शुद्धैर्निर्मलैस्तथाधिकं विधातृभिः सम्पादकैर्जलैरंहांसि पापानि विहन्तुं पटीयसी समर्थतरा। अत्र यमुनात्वजलगतत्वेन निर्दिष्टयोर्गुणक्रिययोर्विरोधेन त्रिषु विरोधेषु संसृष्टेषु तृतीयः कृष्णेति श्लेषप्रतिभोत्थापित इति सङ्क्षेपः ॥ ६७ ॥

यस्या इति। हिमपिण्डपाण्डुरा हिमखण्डशुभ्राः घना मेघाः द्रुता द्रवीभूताः महानीलतटीः इन्द्रनीलस्थलानीव कालीः कृष्णवर्णाः। जानपदेत्यादिना ङीप्। यस्याः कालिन्द्याः अपः पीत्वा ताभिः पीताभिरद्भिरनुरञ्जिता इव क्षणेन भिन्नाञ्जनवर्णतां स्नेहमर्दितकज्जलवर्णतां प्रयान्ति। अत्र तटीरिवानुरञ्जिता इवेति चोत्प्रेक्षया सङ्कीर्णेयं घनानामञ्जनोपमेति सङ्करः ॥ ६८ ॥

व्यक्तमिति। हेतुर्युक्तिरनुमानमिति यावत्। आगमाद्गङ्गा सागरपूरणीत्यागमप्रमाणात्। बलीयान् यदि प्रबलश्चेत् सा यस्या जलधिमपूरयत्। जह्नोरपत्यं स्त्री जाह्नवी नापूरयत्। व्यक्तं सत्यं इत्युत्प्रेक्षा। कुतः। अन्यथा विपर्यये अस्य जलधेः तत्प्रसिद्धमर्णो-ऽम्भः। अर्णोऽर्णस्तोयपानीयमित्यमरः। गाङ्गेन गङ्गासम्बन्धिना तोयेन

गाङ्गौघनिर्भिन्नितशम्भुकन्धरा ।
सवर्णमर्णः कथमन्यथास्य तत् ॥ ६९ ॥
अभ्युद्यतस्य क्रमितुं जवेन गां
तमालनीला नितरान्तनायतिः ।
सीमेव सा तस्य पुरः क्षणम्बभौ
बलाम्बुराशेर्महतीमहापगा ॥७०॥ कलापकम्
लोलैररित्रैश्चरणैरिवाभितो
जवाद्व्रजन्तीभिरसौ सरिज्जनैः ।
नौभिः प्रतेरे परितः प्लवोदित
भ्रमीनिमीलत्स्खलनावलम्बितैः ॥ ७१ ॥

प्रवाहेन निर्भिन्नतया: निर्भक्तोलितायाः शम्भुकन्धराया हरकण्ठस्य सवर्णं समानवर्णं कृष्णवर्णमित्यर्थः । ज्योतिर्जनपदेत्यादिना समानस्य सभावः । अन्यथा गङ्गौघस्य धावल्याद्धवलमेव स्यात् । तथा च यावाह्लवनवाक्यवदागमोऽप्यन्यथा नेय इति कवेराशयः ॥ ६९ ॥

अभीति । तमालवत् नीला कृष्णा नितरां पृथायति रत्यन्तं तत-दैर्घ्या सा महापगा महानदी यमुना । जवेन गां भुवं क्रमितु-माक्रमितुम् । अभ्युद्यतस्योद्युक्तस्य तस्य महतो बलाम्बुराशेः सेना-समुद्रस्य पुरोऽग्रे क्षणं सीमेव वेलेव बभाविल्युत्प्रेक्षा । क्षणमिति क्षणमात्रनिरोधिकाऽभवदनन्तरमेव तरणादिति भावः ॥ ७० ॥

लोलैरिति । अभितः उभयतो लोलैश्चलद्भिररित्रैः केनिपातक-दण्डैः । नेपथ्ये स्यादरित्रं केनिपातक इत्यमरः । चरणैः पादै-रिवेत्युत्प्रेक्षा । जवात् व्रजन्तीभिर्गच्छन्तीभिर्नौभिः साधनैरसौ सरि-ज्जनो कर्म प्लवेनोदिता नौवेगेनोत्पन्ना भ्रमी भ्रान्तिः तस्याभ्रा-

तत्पूर्व्वमंसद्वयसन्द्विपाधिपाः
क्षणं सहेलाः परितोजगाहिरे ।
सद्यस्ततस्तेरुरनारतस्रुत
स्वदानवारिप्रचुरीकृतम्पयः ॥ ७२ ॥
प्रोथैः स्फुरद्भिः स्फुटशब्दमुन्मुखै
स्तुरङ्गमैरायतकीर्णवालधि ।
उत्कर्णमुद्ग्राहितधीरकन्धरै
रतीर्य्यताग्रे तटदत्तदृष्टिभिः ॥ ७३ ॥

द्विमीलन्तीभिर्भयादक्षिनिमीलनं कुर्व्वतीभिर्वल्लभाभि रवलम्बितैर्जनैः कण्ठैभिः परितः सर्व्वतः । सर्व्वोभयार्थे वर्तमानाभ्यां पर्य्यभिभ्यां तसिविधानात् । प्रतेरे प्रतीर्णा ॥ ७१ ॥

तत्पूर्व्वमिति । द्विपाधिपा महागजाः । पूर्वं प्रथमं अंसौ प्रमाणं यस्य अंसद्वयसं अंसदघ्नं तेषां तथोन्नतत्वादिति भावः । प्रमाणे द्वयसज्जिति द्वयसच्प्रत्ययः । तत्पयोऽगम्भीरं पयोयमुनाजलं सहेलाः सावज्ञाः । परितो जगाहिरे प्रविशन्ति स्म । ततः प्रवेशानन्तरं सद्यः अविलम्बेन अनारतमविच्छिन्नं स्रुतेन स्रवता स्वदानवारिणा स्वमदोदकेन प्रचुरीकृतं बहुलीकृतं तत्पयस्तेरुः तरन्ति स्म । अत्राति-गम्भीरस्याप्यम्भसोऽसदगाधत्वातिशयोक्त्या गजानामौन्नत्यं पुनस्तस्यैव तत्क्षणमुत्कर्षेदतात्पर्य्यात्मना तेषां मदातिरेकश्च व्यज्यते ॥ ७२ ॥

प्रोथैरिति । स्फुटशब्दं सशब्दं यथा तथा स्फुरद्भिः चलद्भिः प्रोथैर्घोणाभिरुपलक्षितैः । घोणा तु प्रोथमस्त्रियामित्यमरः । उन्मुखैरूर्ध्वमुखैस्तया उत्कर्णं समुत्थितकर्णं यथा तथा उद्ग्राहिताः उद्धृताः धीरा निश्चलाः कन्धरा ग्रीवा येषां तैः अग्रे पुरः तटे दत्तदृष्टि-भिस्तुरङ्गमैरायताः प्रसारिताः कीर्णा विक्षिप्ता वालधयो यस्मिन् कर्मणि

गाङ्गौघनिर्भर्त्सितशम्भुकन्धरा
सवर्णमर्णः कथमन्यथास्य तत् ॥ ६९ ॥
अभ्युद्यतस्य क्रमितुं जवेन गां
तमालनीला नितरान्भृतायतिः ।
सीमेव सा तस्य पुरः क्षणम्बभौ
बलाम्बुराशेर्महतीमहापगा ॥७०॥ कलापकम्
लोलैररित्रैश्चरणैरिवाभितो
जवाद्व्रजन्तीभिरसौ सरिज्जनैः ।
नौभिः प्रतेरे परितः प्लवोदित
भ्रमीनिमीलत्सलिलनावलम्बितैः ॥ ७१ ॥

प्रवाहेन निर्भर्त्सितया निर्भर्त्सितायाः शम्भुकन्धराया हरकण्ठस्य सवर्णं समानवर्णं कृष्णवर्णमित्यर्थः । ज्योतिर्जनपदेत्यादिना समानस्य सभावः । अन्यथा गाङ्गौघस्य धावल्याद्धवलमेव स्यात् । तथा च ग्रावाप्लवनवाक्यवदागमोऽप्यन्यथा नेय इति कवेराशयः ॥ ६९ ॥

अभीति । तमालवत् नीला कृष्णा नितरां भृतायतिरत्यन्तं कृतदैर्घ्या सा महापगा महानदी यमुना । जवेन गां भुवं क्रमितुमाक्रमितुम् । अभ्युद्यतस्योद्युक्तस्य तस्य महतो बलाम्बुराशेः सेनासमुद्रस्य पुरोऽग्रे क्षणं सीमेव वेलेव बभावित्युत्प्रेक्षा । क्षणमिति क्षणमात्रनिरोधिकाऽभवदनन्तरमेव तरणादिति भावः ॥ ७० ॥

लोलैरिति । अभितः उभयतो लोलैश्चलद्भिररित्रैः केनिपातकदण्डैः । क्षेपणी स्यादरित्रं केनिपातक इत्यमरः । चरणैः पादैरिवेत्युत्प्रेक्षा । जवात् मज्जन्तीभिर्गच्छन्तीभिर्नौभिः साधनैरसौ सरिद्यमुना कर्म प्लवेनोदिता नौवेगेनोत्पन्ना भ्रमी भ्रान्तिः तस्या भया-

तत्पूर्वमंसद्वयसं द्विपाधिपाः
क्षणं सहेलाः परितो जगाहिरे ।
सद्यस्ततस्तैरनारतस्रुत
स्वदानवारिप्रचुरीकृतम्पयः ॥ ७२ ॥
प्रोथैः स्फुरद्भिः स्फुटशब्दमुन्मुखै
स्तुरङ्गमैरायतकीर्णवालधि ।
उत्कर्णमुद्ग्रीवितधीरकन्धरै
रतीर्यताग्रे तटदत्तदृष्टिभिः ॥ ७३ ॥

छिन्नोद्धन्तीभिर्भयाच्छिन्निमीलनं कुर्वतीभिर्वडवाभि रवलम्बितैरूर्मिभिः वर्त्मभिः परितः सर्वतः । सर्वोभयार्थे वर्तमानाभ्यां पर्यभिभ्यां वसिविधानात् । प्रतेरे प्रतीर्णाः ॥ ७१ ॥

तत्पूर्वमिति । द्विपाधिपा महागजाः । पूर्वं प्रथमं अंसौ प्रमाणमस्य अंसद्वयसं अंसप्रमाणं तेषां तथोन्नतत्वादिति भावः । प्रमाणे द्वयसजिति द्वयसच्प्रत्ययः । तत्पयोऽगम्भीरं पयो यमुनाजलं सहेलाः सावज्ञाः । परितो जगाहिरे प्रविशन्ति स्म । ततः प्रवेशानन्तरं सद्यः अविलम्बेन अनारतमविच्छिन्नं स्रुतेन स्रवता स्वदानवारिणा स्वमदोदकेन प्रचुरीकृतं बहूकृतं तत्पयस्तैः तरन्ति स्म । अत्रातिगम्भीरस्याप्यम्भसोऽसद्भावातिशयोक्त्या गजानामौन्नत्यं पुनस्तस्यैव तद्दानाम्बुभिर्दुस्तरत्वोक्त्या तेषां मदातिरेकश्च व्यज्यते ॥ ७२ ॥

प्रोथैरिति । स्फुटशब्दं स्पष्टध्वानं यथा तथा स्फुरद्भिः चलद्भिः प्रोथैर्घोणाभिरुपलक्षितैः । प्रोथा तु प्रोथमस्त्रियामित्यमरः । उन्मुखै रूर्ध्वमुखैस्तथा उत्कर्णमूर्ध्वीकृतकर्णं यथा तथा उद्ग्रीवितं ऊर्ध्वीकृता धीरा निश्चलाः कन्धरा ग्रीवा येषां तैः तथाग्रे पुरः तटे दत्ता दृष्टिर्यैस्तैस्तथोक्तैस्तुरङ्गमैरायताः प्रसारिताः कीर्णा विक्षिप्ता वालधयो वालहस्ता

गाङ्गौघनिर्भर्त्सितशम्भुकन्धरा-
सवर्णमर्णः कथमन्यथास्य तत् ॥ ६९ ॥
अभ्युद्यतस्य क्रमितुं जवेन गां
तमालनीला नितरान्धृतायतिः ।
सीमेव सा तस्य पुरः क्षणम्बभौ
बलाम्बुराशेर्महतीमहापगा ॥७०॥ कलापकम्
लोलैररित्रैश्चरणैरिवाभितो
जवाद्व्रजन्तीभिरसौ सरिज्जनैः ।
नौभिः प्रतेरे परितः प्लवोदित
भ्रमीनिमीलल्ललनावलम्बितैः ॥ ७१ ॥

गङ्गौघेन निर्भर्त्सितया निर्भर्त्सीकृतायाः शम्भुकन्धरायाः हरकण्ठस्य सवर्णं समानवर्णं कृष्णवर्णमित्यर्थः । ज्योतिर्जनपदेत्यादिना समानस्य सभावः । अन्यथा गङ्गौघस्य धावल्याद्धवलमेव स्यात् । तथा च यावाप्लवनवाक्यवदागमोऽप्यन्यथा नेय इति कवेराशयः ॥ ६९ ॥

अभीति । तमालवत् नीला कृष्णा नितरां धृतायति रत्यन्तं दत-दैर्घ्या सा महापगा महानदी यमुना । जवेन गां भुवं क्रमितु-माक्रमितुम् । अभ्युद्यतस्योद्युक्तस्य तस्य महतो बलाम्बुराशेः सेना-समुद्रस्य पुरोऽग्रे क्षणं सीमेव वेलेव बभावित्युत्प्रेक्षा । क्षणमिति लङ्घनात्मनिरोधिकाऽभवदनन्तरमेव तरणादिति भावः ॥ ७० ॥

लोलैरिति । अभितः उभयतो लोलैश्चलद्भिररित्रैः केनिपातक-दण्डैः । अरित्रं स्यादरित्रं केनिपातक इत्यमरः । चरणैः पादैरिवेत्युत्प्रेक्षा । जवात् व्रजन्तीभिर्गच्छन्तीभिर्नौभिः साधनैरसौ सरि-द्यानं कर्म प्लवेनोदिता नौवेगेनोत्पन्ना भ्रमी भ्रान्तिः तस्याभया-

तत्पूर्वमंसद्वयसन्द्विपाधिपाः
क्षणं सहेलाः परितोजगाहिरे ।
सद्यस्ततस्तेऽरनारतस्रुत
स्वदानवारिप्रचुरीकृतम्पयः ॥ ७२ ॥
प्रोथैः स्फुरद्भिः स्फुटशब्दमुन्मुखै
स्तुरङ्गमैरायतकीर्णवालधि ।
उत्कर्णमुद्ग्राहितधीरकन्धरै
रतीर्य्यताग्रे तटदत्तदृष्टिभिः ॥ ७३ ॥

निमीलन्तीभिर्भयादक्षिनिमीलनं कुर्वतीभिर्ललनाभि रवलम्बितैर्जनैः कण्ठैभिः परितः सस्रे । सर्त्तेर्भयार्थे वर्त्तमानाभ्यां पर्य्यभिभ्यां वसिविधानात् । सर्त्तेरे प्रतीक्ष्ये ॥ ७१ ॥

तत्पूर्वमिति । द्विपाधिपा महागजाः । पूर्वं प्रथमं अंसौ प्रमाणमस्य अंसद्वयसं अंसप्रमाणं तेषां तथोन्नतत्वादिति भावः । प्रमाणे द्वयसज्दघ्नति द्वयसच्प्रत्ययः । तत्तथाऽगम्भीरं पयोयमुनाजलं सहेलाः सावज्ञाः । परितो जगाहिरे प्रविशन्ति स्म । ततः प्रवेशानन्तरं सद्यः अविलम्बेन अनारतमविच्छिन्नं स्रुतेन स्रवता स्वदानवारिणा स्वमदोदकेन प्रचुरीकृतं बहुलीकृतं तत्पयस्तेरुः तरन्ति स्म । अत्रातिगम्भीरस्याप्यम्भसोऽसदृशत्वातिशयोक्त्या गजानामौन्नत्यं पुनस्तस्यैव तन्मदाम्बुसम्भेदतात्पर्य्यात्मना तेषां मदातिरेकश्च व्यज्यते ॥ ७२ ॥

प्रोथैरिति । स्फुटशब्दं सशब्दं यथा तथा स्फुरद्भिः चलद्भिः प्रोथैर्घोणाभिरुपलक्षितैः । घोणा तु प्रोथमस्त्रियामित्यमरः । उन्मुखैरूर्ध्वमुखैस्तया उत्कर्णमुद्गमितकर्णं यथा तथा उद्ग्राहिता धीरा निश्चलाः कन्धरा ग्रीवा येषान्तै स्तटे दत्तदृष्टिभिस्तुरङ्गमैरायताः प्रसारिताः कीर्णा विक्षिप्ता

तीर्त्त्वा जवेनैव नितान्तदुस्तरां
नदीम्प्रतिज्ञामिव ताङ्गुरीयसीम् ।
शृङ्गैरपक्षीणमहत्तटीभुवा
मशोभतोच्चैर्नदितङ्ककुद्मताम् ॥ ७४ ॥
सीमन्त्यमाना यदुभूभृताम्बलैः
बभौ तरङ्गिर्गवलासितद्युतिः ।
सिन्दूरितानेकपकङ्कयाङ्किता
तरङ्गिणी वेणिरिवायता भुवः ॥ ७५ ॥

तद्यथा तथा व्यतीयत व्यतारि हरिरिति शेषः । कर्म्मणि लुङि यक् । स्वभावोक्तिः ॥ ७३ ॥

तीर्त्त्वेति । नितान्तदुस्तरामतिमहत्तया अत्यन्तायासतरणां तां नदीं नदीयसीमतिदुस्तरां प्रतिज्ञामिव जवेन वेगेनैव तीर्त्त्वा । शृङ्गैर्विषाणैरपक्षीणा अक्षोभितामहत्यस्तटीभुवस्तीरप्रदेशा येषाम् । अपाकृतमात्स्यनिपातेषाम इति विरतैः कात्पूर्वतः एकागमः । ककुद्मतामुच्चैर्महत् नदितं नादः अशोभत । उपमालङ्कारो स्वभावोक्तिः ॥ ७४ ॥

सीमन्त्यमानेति । तरङ्गैर्यदुभूभृतां यादवभूपानामश्वैः सैन्यैः सीमन्त्यमाना सीमन्तवतीक्रियमाणा । सीमन्तशब्दात्तत्करोतीति ण्यन्तात् कर्म्मणि लटः शानजादेशः आविष्टवद्भावाद्विन्मतोर्लुक् । गवलासितद्युतिः माहिषविषाणवदसितप्रभा । गवलं माहिषं शृङ्गमित्यमरः । सिन्दूरिताः सिन्दूरवत्कृताः । सिन्दूरवच्छब्दात्तत्करोतीति णिजन्तान्निष्ठा आविष्टवद्भावाद्विन्मतोर्लुक् । तैरनेकपैर्द्विपैः कङ्कपैः बहुभिः अङ्किता चिह्निता । बहुत्वं सैन्यरे कृष्णाद्यमनत्वोत्पोति

अव्याहतक्षिप्रगतैः समुच्छ्रिता
ननुज्झितद्राघिमभिर्गरीयसः ।
नाव्यम्पयः केचिदतारिषुर्भुजैः
क्षिपद्भिरूर्मीनपरैरिवोर्म्मिभिः ॥ ७६ ॥
विदलितमहाकूलामुग्रां विषाणविघट्टनै
रलघुचरणाकृष्टग्राहां निपादिभिरुन्मदैः ।
सपदि सरितं सा क्षोभर्त्तुर्बृहद्रथमण्डलैः
स्खलितसलिलामुल्लङ्घ्यैनाञ्जगाम वरूथिनी ७७

विस्तृ॰ । तरङ्गिणी यमुना नदी आयता दीर्घा भुवो वेणिरिव बभौ इत्युत्प्रेक्षा ॥ ७५ ॥

अव्याहतेति । अव्योर्म्मीणां भुजानां विशेषणान्युभयविशेषणत्वेन योज्यानि । केचिज्जनाः नावा तार्यं नाव्यम् । नाव्यं त्रिलिङ्गं नौ तार्यमित्यमरः । नौवयोधर्म्मेत्यादिना यत्प्रत्ययः । पयोजलं अव्याहत क्षिप्रगतैरप्रतिहतशीघ्रगमनैरनुज्झितो द्राघिमा दैर्घ्यं यैस्तै रतिदीर्घैरित्यर्थः । समुच्छ्रितानुन्नतान् गरीयसो गुरुतरान् ऊर्म्मीन् क्षिपद्भिराकुलीकुर्वद्भिरतएवापरैरूर्म्मिभिरिव स्थितैरित्युत्प्रेक्षा । भुजै र्बाहुभिरतारिषुरतार्षुः । तरतेर्लुङि सिचि वृद्धिरिडागमः ॥ ७६ ॥

विदलितेति । सा महता क्षोभर्त्तुः क्षपस्य वरूथिनी सेना उग्राम-महतीं विषाणविघट्टनैः शृङ्गाघातैर्विदलितानि महाकूलानि यस्यास्तां उन्मदैरुद्भूतमदैर्निपादिभिरलघुभिर्गुरुभिः चरणैः पादैराकृष्टा बहिर्नीताः ग्राहा जलग्राहा यस्यास्ता बृहद्भी रथमण्डलैः रथसमूहैः स्खलितानि व्याकुलीकृतानि सलिलानि यस्यास्तामेनां सरितं यमुनां सपदि उल्लङ्घ्य जगाम तीर्णवतीत्यर्थः । नद्योवेति समासे विवक्षायामर्थात् । अत्र अत्रस्य विशेषणता कुञ्जरचरणादिहेतुकस्याक्षोभ्यस्य बहु-

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये
प्रयाणवर्णनं नाम द्वादशः सर्गः ॥ १२ ॥

भेद । हरिणी वृत्तम् । भवति हरिणी न्सौ म्रौ स्लौ गो रसा-म्बुधिरितुभिरिति लक्षणात् ॥ ७१ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां माघ-काव्यव्याख्यायां सर्वङ्कषाख्यायां द्वादशः सर्गः ॥ १२ ॥

त्रयोदशः सर्गः ।

यमुनामतीतमथ शुश्रुवानमुं
तपसस्तनूज इति नाधुनोच्यते ।
स यदाऽचलन्निजपुरादहर्निशं
नृपतेस्तदादि समचारि वार्त्तया ॥ १ ॥

यमुनामिति । अथ यमुनोत्तरणानन्तरं तपसस्तनूजो धर्मनन्दनः । अधुना यमुनामतीतं यश्च हरिं शुश्रुवान् । भाषायां सदवसश्रुव इति क्वसुप्रत्ययः । इति नोच्यते किन्तु स हरिर्यदा निजपुरादचलत् तत्क्षण-मादिर्यस्मिन् कर्म्मणि तत्तदादि तत्प्रभृति । अहश्च निशा च अहर्निशम् । सुप् द्वारे द्वन्द्वैकवद्भावे अत्यन्तसंयोगे द्वितीया । नृपतेर्धर्मराजस्य वार्त्तया इह निविष्ट इतोऽनिर्गत इति वृत्तान्तेन समचारि संवृत्तित मज्ञातमिति यावत् । भावे लङ् । [illegible] [illegible] वृत्तान्तो निजनगरप्रस्थानात्प्रभृति प्रतिक्षणमागत

अपदान्तरञ्च परितः चितिचिता
मपतन् द्रुतभ्रमितहेमनेमयः ।
अनिलावनाञ्चितपरस्परोपम
चितिरेणुकेतुवसनाः पताकिनः ॥ ४ ॥
द्रुतमध्वनन् परियाणिवृत्तयः
पणवा इवाश्वचरणक्षता भुवः ।

अपदेति । द्रुतं शीघ्रम् । भ्रमिताः परिवर्त्तिताः हेमनेमयः कनकचक्रान्तायेषान्ते । चक्रधारा प्रधिर्नेमिरिति हलायुधः । अत एव अनिलेन वेगवता मारुतेनाञ्चितानि कम्पितानि परस्परं सुपमानीति परस्परोपमानि अन्योन्यसदृशानि चितिरेणुकेतु वसनानि खोत्थापितभूरेणवः स्वारोपितध्वजपटाश्च येषान्ते चितिं चियन्तीयते इति चितिचितः । चितौशाः चि ऐश्वर्ये वासे इति धातोस्तौदादिकात् क्विप् तुक् । चितिपतिश्चैवाशौ चितिचित् इति भट्टमल्लः । तेषां सम्बन्धिनः पताकाः सन्तीति पताकिनो रथाः । ब्रीह्यादित्वादिनिः । परितः सर्व्वतः नास्ति पदस्यान्तरमवकाशो यस्मिन् कर्म्मणि तदपदान्तरं संसक्तं यथा तथा । संसक्ते त्वव्यवहितमपदान्तरमित्यमरः । अपतन्नधावन् । अत्र राज्ञ वर्णने रेणूनां केतूनां च प्रकृतत्वात् केवलप्रकृतास्पदा तुल्ययोगिता । तथा च परस्परोपमेति विशेषणाद्रेणुवत्केतवः केतुवच्च रेणव इति उपमेयोपमया के रेणवः के केतवः इति संशयश्च व्यज्यते इत्यलङ्कारेणालङ्कारध्वनिः ॥ ४ ॥

द्रुतमिति । अश्वचरणक्षताः तुरगखुरघट्टिताः भुवः उपरि पृष्ठभागे पाणिवृत्तयः पाणिताडनानि येषान्ते उपरि पाणिवृत्तयः पणवा वाद्यविशेषा इवेत्युपमा । द्रुतं द्रुततरमेवाध्वनन् ध्वनन्ति स्म । द्रुतं शीघ्रमित्यमरः । वादित्ररवाद्येन तद्गर्जितं लक्ष्यते । तद्गम्भीरैर्भीरणध्वनिभिर्मन्दहर्षेर्द्ध्वनिभिः अत एव कूजितकक्षा कूजिता इत्यर्थः ।

ननृतुश्च वारिधरधीरवारण
ध्वनिहृष्टकूजितकलाः कलापिनः ॥ ५ ॥
व्रजतोरपि प्रणयपूर्वमेकतां
कुकुराधिनाथ कुरुनाथसैन्ययोः ।
रुरुधे विषाणिभिरनुक्षणम्मिथो
मदमूढबुद्धिषु विवेकिता कुतः ॥ ६ ॥
अवलोक एव नृपतिः स्म दूरतो
रभसाद्रथादवतरीतुमिच्छतः ।
अवतीर्णवान् प्रथममात्मना हरि

र्तो विशेषणसमासः । कलापाः येषां सन्तीति कलापिनो बर्हिणश्च ननृतुर्नृत्यन्ति स्म । अत्रोपमयोः संसृष्टिः वारिधरोपमया कलापिना गजबृंहितेषु घनगर्जितभ्रान्तिमन्तरेण नृत्यासम्भवात् भ्रान्तिमदलङ्कारो व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः ॥ ५ ॥

व्रजतोरिति । तदा तस्मिन्समये कुकुराधिनाथकुरुनाथसैन्ययोः हरिपार्थसैन्ययोः प्रणयपूर्वं स्नेहपूर्वकमेकतामैक्यं व्रजतोर्गच्छतोः सतोरपि विषाणिभिरुभयसेनाश्रितैर्गजैरनुक्षणं प्रतिक्षणं मिथः परस्परं रुरुधे रुरुधे । भावे लिट् । तथाहि मदेन मूढबुद्धिषु विपरीतमतिषु विवेकिता कार्याकार्यविचारिता कुतः नास्त्येवेत्यर्थः । अत एषां स्वामिसौहार्देऽपि स्वयं विरोधिता न दोषायेति भावः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ६ ॥

अवलोक इति । दूरतो दूरदेशावलोके हरेर्दर्शन एव रभसाद्धर्षाद्रथादवतरीतुमवरोढुम् । वृतो वेति विकल्पाद्दीर्घः । इच्छतोऽपि नृपतेर्धर्मराजात् प्रथमं तदवतरणात्पूर्वमेवेत्यर्थः । आत्मना स्वयमेव प्रकृत्यादित्वात्तृतीया । अवतीर्णवान् रथादवरूढः सन् । मिथेति

विनयं विशेषयति सम्भ्रमेण सः ॥ ७ ॥
वपुषा पुराणपुरुषः पुरः क्षितौ
परिपुञ्ज्यमानपृथुहारयष्टिना ।
भुवनैर्नतोऽपि विहितात्मगौरवः
प्रणनाम नाम तनयम्पितृष्वसुः ॥ ८ ॥
मुकुटांशुरञ्जितपरागमग्रतः
स न यावदाप शिरसा महीतलम् ।

तद्ते त्वावतुमत्यय । क्त रद्धातोरितीत्व धौरूपधाशादीर्घं रदाभ्या मिति निष्ठानत्वे रदाभ्यामिति णत्वम् स हरि सम्भ्रमेण त्वरा विशेषेण विनय मानौद्धत्य विशेषयति स्म । अतिशाययति स्म । एतेन हरे पूज्यविषयोरत्यादरोभावोऽभिव्यज्यते ॥ ७ ॥

वपुषेति । पुराणपुरुष हरि । सर्वलोकवन्द्योऽपीति भाव । तथा भुवनैर्नतोनमस्कृतोऽपि विहित सम्पादितमात्मनोगौरव सत्क येन स सन् पूज्येषु नमस्काया औचित्यहेतुत्वादिति भाव अतएवात्र विचित्रालङ्कार । विचित्र स्वविरुद्धस्य फलस्य स्यात्समुद्यम इति लक्षणात् । पुर क्षितावग्रभूमौ परिपुञ्ज्यमाना परित पुञ्जीक्रिय माणा पृथु स्थूलोहारोमुक्तावलिर्यष्टिरिव यस्य तेन वपुषा शरीरेण । न त्वङ्गविभागेन तथास्य पूज्यत्वादिति भाव । पूज्यत्व हेतुमाह । पितृष्वसुस्तनयमिति पितृभगिनीपुत्त धर्म्म राजमित्यर्थ । विभाषा स्वसृपत्योरित्यलुक षोपदेशस्येति षत्वम । अतएवाप पूर्व ज भाव श्च । भुवनैर्नतोऽपि हरिर्लोकयात्रात्तु वर्त्ती सत्यमेव नता नीति विरोधाभासोऽलङ्कारोविचित्रेषोक्तेन सङ्कीर्ण नामनामेति सम्प्रदानार्थमेदय अङ्ग इत्याद्यूहम् ॥ ८ ॥

मुकुटेति । स हरिर्मुकुटांशुभि रञ्जित स्वरूपमापादितः परागो

क्षितिपेन तावदनपेक्षितक्रम
भुजपञ्जरेण रभसादगृह्यत ॥ ९ ॥
न ममौ कपाटतटविस्तृतन्ततो
सुरवैरिवक्ष उरसि क्षमाभुजः ।
भुजयोस्तथापि युगलेन दीर्घयो
र्विकटीकृतेन परितोऽभिषस्वजे ॥ १० ॥
गतया निरन्तरनिवासमध्युरः
पद्मनाभि नूनमवमुच्य वारिजम् ।

रेणुयेस्य तदपन्तं पुरतोमहीतञ्च शिरसा यावन्नाम नास्मृदिदि-
त्यर्थं तावत् क्षितिपेन धर्मराजेनानपेक्षितक्रमं अनपेक्षितः क्रमः
परिपाटी यस्मिन् कर्मणि तत्तथा । भुजाभ्यामेव पञ्जरेण इति
रूपकं रभसाद्वेगादगृह्यत गृहीतः प्रणामक्रियासमाप्तेः प्रागेवा-
लिङ्ग्याश्लिष्यदित्यर्थः ॥ ९ ॥

नेति । कपाटतटविस्तृतं सुरवैरिणो हरेर्वक्षः स्तनान्तरं । क्षमा-
भुजो धर्मराजस्योरसि न ममौ न परिमितमित्यर्थः तथापि विक-
टीकृतेन विपुलीकृतेन दीर्घयोर्भुजयोर्युगलेन परितः समन्तात् अभि-
षस्वजे आलिङ्गितं वक्षसा भुजाभ्यां च कथञ्चिदाश्लेषमभूत् न तु
समग्रमेवार्थः । सदिन्द्राणो परस्य विटोऽति धातुसकारस्य सत्वनिषे-
धात् स्वादिष्वभ्यासस्य च पत्वम् । अत्र ह्रस्वरूपसीवैपुल्यादतिश-
योक्तानया यदस्य संमानेऽप्यसम्मानोक्तिः सम्बन्धे असम्बन्धरूपाति-
शयोक्तिः । उभयोश्च मत विद्वद्वर्षिप्रोटोक्तिसिद्धयोरप्यतिशययोरभेदो-
ध्यवसायादुपादानमिति रहस्यम् ॥ १० ॥

गतयेति । नाभ्या पद्मनाभि । विभक्त्यर्थेऽव्ययीभाव । वारिजं
नाभिकमलमित्यर्थः । अवमुच्य विहाय मधुर एर्वम । विभक्त्यर्थे

कुरुराजनिर्दयनिपीडनाभया-
न्मुखमध्यरोहि मुरविद्विषः श्रिया ॥ ११ ॥
शिरसि स जिघ्रति सुरारिवञ्चने
छलवामनं विनयवामनन्तदा ।
यशसेव वीर्य्यविजितामरद्रुम
प्रसवेन वासितशिरोरुहे नृपः ॥ १२ ॥

ऽव्ययीभावः । निरन्तरं सततं गतया प्राप्तया श्रिया शोभया रमया च नाभिसरोजत्यागेनास्य निवासेन तस्मादपहृतमिति ध्वनितं कुरुराजस्य या निर्दयनिपीडना गाढाश्लेषरूपा ततोभयान्मुरवैरिणोमुरद्विषोर्मुखमध्यरोहि अधिरूढम् । भीता ह्युच्चमारोहन्तीति लोकवेदयोः प्रसिद्धमिति भावः । नूनमित्युत्प्रेक्षा । अत्र वाच्यायाः सुहृदाश्लेषप्रभवायाः शोभायाः श्रियेति श्लेषमहिम्ना प्रतीयमानया रमया सहाभेदाध्यवसायात् क्रमेण नाभिमुखकमलाधारसम्बन्धाभिधानात् श्लेषमूलातिशयोक्त्युत्थापितः पर्यायभेदः । क्रमेणैकमनेकस्मिन्नाधारे वर्त्तते यदि । एकस्मिन्नथ वानेकम्पर्यायालङ्कृतिर्मतेति लक्षणात् तदुपजीविता श्रीमुखा रोहणस्य भयहेतुकत्वकथनादुत्प्रेक्षेति अनयोरङ्गाङ्गिभावेन सङ्करः ॥ ११ ॥

शिरसीति । नृपो धर्म्मराजः सुरारिवञ्चने पुरा बलिवञ्चने छलवामनं कपटवामनं तदा प्राप्तोपपत्तिसमये तु विनयवामनं विनयनम्रमित्यर्थः । तं हरिमिति शेषः वीर्य्यविजितामरद्रुम प्रसवेन पारिजातहरणे वीर्य्यलब्धपारिजातकुसुमेन यशसेव पारिजातविजयप्रसूतेन कीर्त्त्येत्युत्प्रेक्षा वासितशिरोरुहे सुरभितकेशे शिरसि जिघ्रति स्म । घ्राणादेव मूर्द्धन्यवघ्राणमिति स्मरणात् । पुरा किल भगवान् सत्यभामाप्रीतये स्वर्गादिन्द्रलोकादपहृत्य पारिजातं विजयकीर्त्त्या रोपितवानिति कथात्रानुसन्धेया ॥ १२ ॥

सुखवेदनाहृषितरोमकूपया
शिथिलीकृतेऽपि वसुदेवजन्मनि ।
कुरुभर्तुरङ्गलतया न तत्यजे
विकसत्कदम्बनिकुरम्बचारुता ॥ १३ ॥
इतरानपि क्षितिभुजोऽनुजन्मनः
प्रमनाः प्रमोदपरिफुल्लचक्षुषः ।
स यथोचितं जनसभाजनोचितः
प्रसभोद्धृतासुरसभोऽसभाजयत् ॥ १४ ॥

सुखेति । वसुदेवाज्जन्म यस्य तस्मिन्वसुदेवजन्मनि वासुदेवे । जन्मो-त्तरपदत्वाद्व्यधिकरणो बहुव्रीहिर्गमकत्वादित्युक्तं प्राक् । शिथि-लीकृतेऽपि विश्लेषितेऽपि सुखवेदनया आलिङ्गनसुखानुभवेन हृषिता हृष्टा रोमकूपा रोममूलानि यस्या तया । हृषेर्लोमसु इतीडा-गमः । कुरुभर्तुर्धर्मराजस्य अङ्गलतया विकसत कदम्बनिकुरम्बस्य कदम्बकुसुमसमूहस्य चारुता कामनीयकं न तत्यजे न त्यक्ता किन्तु स्वीकृतैवेत्यर्थः । आश्लेषापगमेऽपि तज्जन्य सुखानुवृत्त्या तत्कार्यस्य रोमहर्षस्यानुवृत्तिरिति तात्पर्यार्थः । अतएव शिथिलीकृते हृषितरो-मकूपत्वेऽप्यकारणकार्योत्पत्तेर्विभावना तदपेक्षया चेयमुपमा कदम्बनि-कुरम्बचारुतानिदर्शना तया सङ्कीर्णेन सङ्कीर्यते ॥ १३ ॥

इतरानिति । समसभाजनोचितः सर्वसमसंभावनार्हः प्रसभेन बलात् हृता असुरसभा असुरसङ्घो येन स प्रमनाः हृष्टचित्तः स हरिः प्रमो-दपरिफुल्लचक्षुषो हर्षोत्फुल्लनेत्रान् इतरान् भीमादीन् क्षितिभुजो अनु-जन्मनः यथाक्रमं तेषां तान् अनुजन्मनः अनुजान् यथोचितं यथा-र्हमसभाजयत् सभाजयति स्म आलिङ्गनादिभिः सम्भावयामासेत्यर्थः । सभाजनं सभाजने दर्शने च । सभाज प्रीतिदर्शनयोरिति धातोश्चौ-रादिकाल्लङ् ॥ १४ ॥

समुपेत्य तुल्यमहसः शिलाघनान्
घनपक्षदीर्घतरबाहुशालिनः ।
परिशिश्लिषुः क्षितिपतीन् क्षितीश्वराः
कुलिशात्ययेण गिरयोगिरीनिव ॥ १५ ॥

इभकुम्भतुङ्गघटितेतरेतर
स्तनभारदूरविनिवारितोदराः ।
परिफुल्लगण्डफलकाः परस्पर
म्परिरेभिरे कुकुरकौरवस्त्रियः ॥ १६ ॥

रथवाजिपत्तिकरिणीसमाकुल

समिति । तुल्यमहसः समतेजस्कान् शिला इव शिलाभिरिव घनान् दृढान् घनं पर्वारि दीर्घतरबाहुभिः बाहुभिरेव पक्षैर्वा शालन्त इति तथोक्तान् एवम्भूतान् क्षितिपतीन् एवम्भूता क्षितीश्वराः समुपेत्य आगत्य । आङ्पूर्वादिण क्त्वायपि तुक् । कुलिशात्ययेण परत कुलिशच्युते पूर्वमित्यर्थः । सम्प्रत्यसम्भवादिति भावः । परेणेति निमित्तकर्मव्ययम । गिरयो गिरीनिव परिशिश्लिषुः आलिङ्गितवन्तः । उपमा ॥ १५ ॥

इभेति । इभकुम्भा इव ये तुङ्गा घटिताश्च इतरेतरासां स्तन-भारास्तैर्दूरे विनिवारितायतिकार्श्यादस्फुटतया, स्थापितान्युदराणि, याभिस्ताः । स्वाङ्गाच्चेति विकल्पाद्ङीकारः । परिफुल्लगण्डफलकाः हर्षपुलकितगण्डस्थलाः कुकुरकौरवस्त्रियो यादवपाण्डवाङ्गनाः पर स्परं परिरेभिरे । आलिलिङ्गुरित्यर्थः । परिरम्भः परिष्वङ्ग आश्लेष उप-गूहनमित्यमरः । परिफुल्लेति । फुल्लते पचाद्यजन्त न तु फल्लेति निष्ठान्तं व्यनुपसर्गादिति कयत्वविरोधात् ॥ १६ ॥

रथेति । रथवाजिपत्तिकरिणीभिः समाकुलं सङ्कीर्णं करिणी ग्रहणं मृदुङ्गजव्यावृत्त्यर्थम् । अतीवशामर्हतया तासामनेनाङ्गत्वात्

स्तदनीकयोस्समगत इवमिथः ।
दधिरे पृथक्करिणएव दूरतो
महतां हि सर्व्वमथवा जनातिगम् ॥ १७ ॥
अधिरुह्यतामिति महीभृतोदितः
कपिकेतुनार्पितकरोरथं हरिः ।
अवलम्बितैलविलपाणिपल्लवः
अयति स्म मेरुमिव मेघवाहनः ॥ १८ ॥
रथमास्थितस्य च पुराभिवर्त्तिन

इव समगमत । तदनीकयोः सैन्ययोः । ध्वजिनी वरूथिनी सेनाङ्गं चमूः
समस्त्रियामित्यमरः । इव मिथ्यान्योऽन्यं समगत सङ्गतम् ।
समेमुँ हि समोगमृच्छेत्यादिनात्मनेपदं वा गम इति सिचः किच्चा
दनुदात्तोपदेशेत्यादिना अनुनासिकलोपः ह्रस्वादङ्गादिति सकारलोपः ।
करिणः पृथक्जाः दूरत एव पृथगवस्थं दधिरे धृताः स्थापिता
इत्यर्थः क्व वा किमत्र चित्रमिति भावः । महतां महासत्वानां
सर्वमपि सर्वं चेष्टितमिति भावः । जनानतिगच्छतीति जनातिगमति-
क्रान्तं लोकोत्तरचरितमिति भावः । सामान्येन विशेषसमर्थनरूपो-
ऽर्थान्तरन्यासः ॥ १७ ॥

अधीति । हरिरधिरुह्यतां रथ इत्यारुह्यतामित्येवं महीभृता
धर्मराजेनोदितः उक्तः सन् । वदेः कर्मणि क्तः वचिस्वपीत्यादिना
सम्प्रसारणम् । कपिकेतुनार्जुनेनार्पितकरोऽदत्तहस्तः सन् । अवलम्बि-
तोऽवलम्बः ऐलविलस्य कुबेरस्य पाणिपल्लवेन स मेघवाहन इन्द्रो
मेरुमिव रथं अयति स्म आरुरोहेत्यर्थः । उपमा ॥ १८ ॥

रथमिति । स्थितेति चार्थे अथ रथारोहणानन्तरं रथमास्थितस्य
कृष्णस्य पुराभिवर्त्तिनः पुरस्थस्याभिवर्त्तिनः त्रिपुराभिवर्त्तिनमिव सारथो-

त्रिसृणामुरामिव रिपोर्मुरद्विषः ।
अथ धर्म्ममूर्त्तिरनुरागभावितः
स्वयमादित प्रवयणम्प्रजापतिः ॥ १९ ॥
घनकैरथास्य तनुजालकान्तर
स्फुरितत्त्वपाकरकरोत्कराकृति ।
पृथुफेनकूटमिव निम्नगापते
र्मरुतश्च सनुरधवत्प्रकीर्णकम् ॥ २० ॥
विकसत्कलायकुसुमासितद्युते

कृत्वेसिख्यां पुरां रिपो. त्रिपुरान्तकस्येव । न तिसृचतसृ इति नामि दीर्घप्रतिषेधः । धर्म्ममूर्त्तिर्धर्म्मात्मा प्रजापतिर्जनेश्वरः धर्म्मराजो ब्रह्मा च अनुरागभावितः सन् । प्रवीयते प्रेर्य्यतेऽनेनेति प्रवयणं प्राजनं प्रतोद इति यावत् । अतएव प्रवयणोदण्डः प्राजनोदण्ड इति काशिका । अजेः करणे ल्युट् वा याविति विकल्पादजेर्वीभावः पूर्वपदात् संज्ञायामिति णत्वम् । स्वयमादित स्वीकृतवान् सारथ्यं कृतवानित्यर्थः । ददातेः कर्त्तरि लुङि तङ् स्थाघ्वोरितीकारे सिचः कित्त्वे च ह्रस्वादङ्गादिति लोपः । अत्र त्रिपुरहरणे ब्रह्मा हरस्येव हरेरयं सारथ्यं चकारेत्युपमा तस्याः प्रजापतिरिति राजब्रह्मणोः श्लेषमूलाभेदाध्यवसायादति शयोक्तिनिर्व्यूढेति सङ्करः ॥ १९ ॥

घनकैरिति । किञ्चेति चार्थः अथास्य हरेस्तनुषु सूक्ष्मेषु जालकान्तरेषु गवाक्षरन्ध्रेषु स्फुरितस्य प्रसृतस्य क्षपाकरोत्करस्य शशिकिरणपुञ्जस्याकृतिरिवाकृतिर्यस्य तत्प्रकीर्णकं चामरं निम्नगापतेः समुद्रस्य पृथु विपुलं फेनकूटं फेनपुञ्जमिव मरुतः सूनुर्भीमसेनः [घनकैरधुवत् धुवति स्म] धुवनिरयं कौटादिक कुटादित्वम् । उपमालङ्कारः ॥ २० ॥

विकसदिति । विकसत्कलायकुसुमं काचपुष्पम् । कलायः स्यात्

रलचूडपाण्डु जगतामधीशितुः ।
यमुनाह्रदोपरिगहंसमण्डल
द्युतिजिष्णुजिष्णुरभृतोष्णवारणम् ॥ २१ ॥
पवनात्मजेन्द्रसुतमध्यवर्त्तिना
नितरामरोचि रुचिरेण चक्रिणा ।
दधतेव योगमुभयग्रहान्तर
स्थितिकारितं दुरुधराख्यमिन्दुना ॥ २२ ॥

व इति वैजयन्ती । तद्दन्तिद्युतेर्नीलस्य जगतामधीशितुर्जगन्नाथस्य जिष्णुरर्जुनः रलचूडपाण्डु स्यूतनधवलम् । अतएव यमुनाह्रदस्योपरिगमुपरिगतम् । अन्यत्रापि दृश्यते इति डप्रत्ययः । तस्य हंसमण्डलस्य द्युतिं शोभां जिष्णुं जयनशीलम् । ग्लाजिस्थश्चेति ग्स्नुच् । उष्णवारणमातपत्रमभृत भृतवान् । भृञः कर्त्तरि लुङ् स्वरितञित इत्यात्मनेपदं ह्रोः सिचः किस्वादगुणत्वाद्ध्रस्वादङ्गादिति सकारलोपः । अत्राप्युपमालङ्कारः ॥ २१ ॥

पवनेति । पवनात्मजेन्द्रसुतमध्यवर्त्तिना भीमार्जुनमध्यगतेन रुचिरेण चक्रिणा हरिणा उभयोरन्योन्यपक्षयोर्ग्रहयोरन्तरे मध्ये स्थित्या हेतुना कारितं सम्पादितम् । वृत्तिविषये उभशब्दस्थानेऽप्युभयशब्दस्यैव प्रयोगो भाष्यात् । दुरुधुरेत्याख्या यस्य तत् दुरुधुराख्यं योगं दधता ग्रहद्वयमध्यगतेनेन्दुनेवेत्युपमा । नितरामतिशयेन । अव्ययादाम्प्रत्यये इत्याम्प्रत्ययः । अरोचि अशोभि । रोचतेर्भावे लुङ् । भास्करमपहाय चन्द्रात्सदसमायोगाद्योभाऽतिशयो जायते स्व-व्ययोरर्थेऽपि भाव्यः । तथा भगवतामाचार्यमिहिरः । "हित्वार्कं सुनफाऽनफा दुरुधुराः स्वान्त्योभयस्थैर्ग्रहैः शीतांशोरिति । एतदेव व्याहृतं वराहमिहिरेण रविवर्जं द्वादशस्थैरनफा चन्द्राद्द्वितीयगैः सुनफा उभयस्थितैर्दुरुधुरा केमद्रुमसंज्ञितोऽन्यथेति ॥ २२ ॥

वशिनं क्षितेरयनयाविवेश्वर
न्नियमौयमश्च नियतं यतिं यथा ।
विजयश्रिया वृतमिवार्कमारुता
वनुसस्रतुस्तमथ दस्रयोः सुतौ ॥ २३ ॥
मुदितैस्तदेति दितिजन्मनां रिपा
वविनीयसम्भ्रमविकाशिभक्तिभिः ।

वशिनमिति । अथ भीमार्जुनोपवेशनानन्तरं वशिनमिन्द्रियजय-वन्तम् । अव्यसनिनमिति यावत् । क्षितीश्वरं भूपतिं नयः शुभावहो-विधिर्नीतिर्नयस्ताविव दैवपुरुषकाराविवेत्यर्थः । नियतं साचारनियतं यतिञ्जितेन्द्रियम् । यतिनो यतयश्चेत्यमरः । नियमः शरीरातिरिक्तदेश-कालादिसाधनापेक्षः सन्ध्योपासनजपादिः । यमः शरीरमात्रसाधना-पेक्षोऽहिंसादिः शरीरसाधनापेक्षं नित्यं यत्कर्म तद्यमः । नियमस्तु स यत्कर्म नित्यमागन्तुसाधनम् । स च यथा यमनियमाविवेत्यर्थः । इव-वद्वायथाशब्दा इति दण्डिन्यभिधानात् । विजयश्रिया युतं आरब्धविजय विजिगीषुं रिपुमित्यर्थं अर्कमारुताविव दस्रयोरश्विनोः सुतौ नकुलसह-देवौ । नासत्यावश्विनौ दस्रावित्यमरः । तं हरिमनुससृततुः चेरतुः पृष्ठतोऽपसर्पणं चक्रतुरित्यर्थः । इह सर्वकार्यमनोरथानुकूलव्यापार-वत्त्वमनुसरणम् । इयं मालोपमा ॥ २३ ॥

मुदितैरिति । तदा तस्मिन् समये इति मुदितैर्हृष्टैरविनीयोऽक-ल्कोऽकपट इति यावत् स सम्भ्रम आदरस्तेन विकाशिनी स्फुटी-भवन्ती भक्तिर्येषां तैः । विपूयविनीयजित्या मुञ्जकल्कहलिष्विति कल्कार्थे निपातः । अथ संकपूर्वपदः सोऽसिद्धपूर्वे पदोया बहुव्रीहिः । अवि-नीतं शासनीयविनीतयाचिभिः दुष्ट शिष्यकैः पाण्डवैः दितिजन्मनां रिपौ कृष्णविषये उपसमीपे सीदन्ति अभिनिसत्पसेदिवांसोऽन्तेवासिनः । भाषायां सदवसश्रुवः इति सदेर्लिटः क्वसुरादेशः । तैरुपसेदिवद्भिरु-

उपसेदिवद्भिरुपदेष्टरीव ते
र्ववृते विनीतमविनीतशासिभिः ॥ २४ ॥
गतयोरभेदमिति सैन्ययोस्तयो
रथ भानुजह्नुतनयाम्भसोरिव ।
प्रतिनादितामरविमानमानकै
र्नितरामुदा परमयेव दध्वने ॥ २५ ॥

पदेष्टरि गुराविवेत्युपमा । विनीतमनुद्धतञ्च वर्तते वृत्तम् । भावे क्तः ।
ननु शिवाभिः भक्तिभिरिति यत्र कथं पूर्वपदस्य पुंवद्भावः भक्तिशब्दस्य
प्रियादिपाठात् स्त्रियाः पुंवदिति पुंवद्भावसूत्रे प्रियादिष्विति निषे-
धादिति शिवाभिमन्यथाशिवाभिनिवृत्तिमात्रपरतयाऽस्त्रीत्वस्य विवक्षि-
तत्वादपुंवत्पूर्वपदो बहुव्रीहिरिति केचित् तदेतदभिप्रेत्योक्तं वृत्ति-
कारेण दृढभक्तिरित्येवमादिषु स्त्रीपूर्वपदस्याविवक्षितत्वान्सिद्धिरिति यत
एव व्याख्यातं गणव्याख्याने । दृढं भक्तिर्यस्येति नपुंसकं पूर्वपदम्
भावार्थविशेषमात्रपरे दृढशब्दे लिङ्गविशेषस्यानुपकारत्वात् स्त्रीत्वमवि-
वक्षितमिति । भोजराजस्तु भक्तौ कर्मसाधनायां मित्यनेन सूत्रेण
भज्यते सेव्यते इति कर्मार्थत्वेन दृढा भक्तिरित्यादि भवति । भाव-
साधनायां तु दृढभक्तिर्भरत्येवेत्याह । तदेतत्सर्वमस्माभिः कालिदासस्य
रघुवंशे दृढभक्तिरिति ज्येष्ठे इत्यादिषु विवेचितं तस्माच्छिवाभि
र्भक्तिभिरित्यत्रापि मतभेदेन पूर्वपदस्य स्त्रीत्वे नपुंसकत्वे च रूपसिद्धिर
स्तीति स्थितम् ॥ २४ ॥

गतयोरिति । इति इत्थं गतयोः सैन्ययोः भानुजह्नुतनये यमुना-
जाह्नव्यौ तयोरम्भसी पयसी तयोरिव अभेदमैक्यं गतयोः सतोः ।
यस्य च भावेन भावलक्षणमिति सप्तमी । एतेन सैन्ययो रत्यावेश
उक्तम् । अथ संश्लेषानन्तरं आनकैर्पटहदुन्दुभिभिः परमया
मुदेव हर्षेणेव दध्वने ध्वनितम् । प्रतिनादितानि प्रतिध्वनितानि अमर

वशिनं चितेरयनथाविवेश्वर-
न्नियमौ यमश्च नियतं यतिं यथा ।
विजयश्रिया वृतमिवार्कमारुता
वनुसस्रतुस्तमथ दस्रयोः सुतौ ॥ २२ ॥
मुदितैस्तदेति दितिजन्मनां रिपा-
वविनीयसम्भ्रमविकाशिभक्तिभिः ।

वशिनमिति । अथ भीमार्जुनोपवेशनानन्तरं वशिनमिन्द्रियजय-वन्तम् । अव्यसनिनमिति यावत् । क्षितीश्वरं भूपतिं अयः शुभावहो-विधिर्नीतिर्नयस्तावित्र दैवपुरुषकाराविवेत्यर्थः । नियतं साचारनिष्ठं यतिं जितेन्द्रियम् । यतिनो यतवरेत्यमरः । नियमः शरीरातिरिक्तदेश-कालादिसाधनापेक्षः सन्ध्योपासनजपादिः । यमः शरीरमात्रसाधना-पेक्षोऽहिंसादि शरीरसाधनापेक्षं नित्यं यत्कर्म तद्यमः । नियमस्तु स यत्कर्म नित्यमागन्तुसाधनम् । स च यथा यमनियमाविवेत्यर्थः । इव-वद्वायथामन्दा इति दण्डिन्यभिधानात् । विजयश्रिया युतं आरब्धविजयं विजिगीषुं रिपुमित्यर्थः अर्कमारुताविव दस्रयोरश्विनोः सुतौ नकुलसह-देवौ । नासत्यावश्विनौ दस्राविसमरः । तं हरिमनुससृतुरनु सेरतुः पृष्ठोपसर्पणं चक्रतुरित्यर्थः । इह सर्वंकर्तृभनोरथानुकूल व्यापार-वत्त्वमनुसरणम् । इयं मालोपमा ॥ २२ ॥

मुदितैरिति । तदा तस्मिन् समये इति मुदितैर्हृष्टैरवि नीयोऽक-ल्कोऽकपट इति यावत् यः सम्भ्रम आदरस्तेन विकाशिनी स्फुटी-भवन्ती भक्तिर्येषां तैः । विपूय विनीय जित्यासज्ञकल्क हलिखिति कल्कार्थे निपातः । नपुंसकपूर्वपदः स्त्रीलिङ्गपूर्वे पदोवा बहुव्रीहिः । अवि-नीतं शासतीत्यविनीतशासिभिः दुष्टशिक्षकैः पार्थिवैः दितिजन्मनां रिपौ तस्याविषये उपसमीपे सीदन्ति अधिविधाप्यपसेदिवांसोऽन्तेवासिनः । भाषायां सदवसश्रुवः इति सदेर्लिटः कसुरादेशः । तैरुपसेदिवद्भिः

उपसेदिवद्भिरुपदेष्टरीव तै
र्ववृते विनीतमविनीतशासिभिः ॥ २४ ॥
गतयोरभेदमिति सैन्ययोस्तयो
रथ भानुजह्नुतनयाम्भसोरिव ।
प्रतिनादितामरविमानमानकै
र्नितरां मुदा परमयेव दध्वने ॥ २५ ॥

पदेष्टरि गुराविवेत्युपमा । विनीतमनुद्धतञ्च वृत्ते वृत्तम् । भावे क्तः । ननु विकारैः भक्तिभिरिति वत् कथं पूर्वपदस्य पुंवद्भावः भक्तिशब्दस्य प्रियादिपाठात् स्त्रियाः पुंवदिति पुंवद्भावस्य प्रियादिष्विति निषेधादिति विकारमियत्वस्याविकारिनिवृत्तिमात्रपरतयाऽस्त्रीत्वस्य विवक्षितत्वात् पुंसकपूर्वपदोऽयं दोषो इति केचित् तदेतदभिप्रेत्योक्तं वृत्तिकारेण दृढभक्तिरित्येवमादिषु स्त्रीपूर्वपदस्याविवक्षितत्वान्सिद्धिरिति एतदेव स्पष्टीकृतं न्यासव्याख्याने । दृढं भक्तिर्यस्येति नपुंसकं पूर्वपदम् । भावार्थं विशेषणमात्रपरे दृढशब्दे लिङ्गविशेषस्यानुपकारकत्वात् स्त्रीत्वमविवक्षितमिति । भोजराजस्तु भक्तौ कर्मसाधनतया भिन्नत्वेन स्त्रीत्वं च भज्यते सेव्यते इति कर्मार्थत्वेन दृढा भक्तिरित्यादि भवति । भावसाधनायां तु दृढभक्तिर्भवत्येवेत्याह । तदेतत्सर्वमस्माभिः कालिदासकृतरघुवंशसञ्जीविन्यां दृढभक्तिरिति श्लोके इत्यादिषु विवेचितं तस्माद्विकारभक्तिभिरित्यत्रापि मतभेदेन पूर्वपदस्य स्त्रीत्वे नपुंसकत्वे च रूपसिद्धिरस्तीति स्थितम् ॥ २४ ॥

गतयोरिति । इति इत्थं गतयोः सैन्ययोः भानुजह्नुतनये यमुनाजाह्नव्यौ तयोरम्भसी प्रवाहौ तयोरिव अभेदमैक्यं गतयोः सैन्ययोः । यस्य च भावेन भावलक्षणमिति सप्तमी । एतेन सैन्ययो रसावैलक्षण्यम् । अत्र सैन्यमेलनानन्तरं आनकैर्मङ्गलदुन्दुभिभिः परमया मुदेव हर्षेणेव दध्वने इत्युत्प्रेक्षा । प्रतिनादितानि प्रतिध्वनितानि अमर-

मदयन्द्विजान् जनितमीनकेतनः ।
अभवत्प्रसादितसुरोमहोत्सवः
प्रमदाजनस्य स चिराय माधवः ॥ २८ ॥
धरणीधरेन्द्रदुहितुर्भयादसौ
विषमेक्षणः स्फुटममूर्न पश्यति ।
मदनेन वीतभयमित्यधिष्ठिताः
क्षणमीक्षते स्म स पुरोविलासिनीः ॥ २९ ॥

रुचिर । अन्यत्र तेन रुचिर पद्मेन पद्मया च सह वर्त्तत इति सपद्म स एव सपद्मकः । पद्म हस्त अम्भोज । शैषिक स्वार्थिको वा कप्प्रत्यय । अन्यत्र सपङ्कज । शैषिक कप्रत्यय । द्विजान् ब्राह्मणान् अन्यत्र पक्षिगणान् कोकिलादीन् मदयन् हर्षयन् जनितमीनकेतन प्रद्युम्नजनक अन्यत्र मदनोद्दीपक । प्रसादिता अनुगृहीता सुरा देवा येन । अन्यत्र प्रसादिता निर्मलीकृता सुरा मदिरा यस्मिन् स माधवो हरिर्वसन्तश्च । माधवस्तु वसन्ते स्याद्वैशाखे गरुडध्वजे इति विश्व । प्रमदैव जनस्तस्य प्रमदाजनस्य । जाता वेकवचनम् । चिराय महोत्सवोऽभवत् । तद्वदानन्दकरोऽभूदित्यर्थ । इहानन्दकरत्वसाम्येन माधवे महोत्सवरूपणात् रूपकसिद्धि । श्लेषस्तु प्रकृतयोरिह नाश्लेष । प्रकृता प्रकृतत्वे विधेयश्लेषायोगात् । किन्तु शब्दशक्तिमूलो ध्वनिरेव ॥ २८ ॥

धरणीति । असौ रुद्राक्षकोऽपि विषमेक्षणस्त्र्यक्ष धरणीधरेन्द्रदुहितु पार्वत्या सपत्नीशङ्किन्या इति भाव । भीत्रार्थानां भयहेतुरिति पञ्चमी । भयात् स्फुट अमूः पौरयोषित न पश्यतीति हेतोरिति विश्वासादित्यर्थ । अत एव गम्योत्प्रेक्षा । मदनेन वीतभयमधिष्ठिता आक्रान्ता अत्याकृष्टमदना इत्यर्थ पुरोविलासिनी स हरिः क्षणमीक्षते स्म सविभ्रममिति भाव ॥ २९ ॥

विपुलेन सागरशयस्य कुक्षिणा
भुवनानि यस्य पपिरे युगक्षये ।
मदविभ्रमासकलया पपे पुनः
स पुरस्त्रियैकतमयैकया दृशा ॥ ४० ॥
अधिकोन्नमद्घनपयोधरं मुहुः
प्रचलत्कलापिकलमञ्जुकस्वना ।
अभिलक्ष्यमङ्गुलिमुखेन काचन
द्रुतमेककर्णविवरं व्यघट्टयत् ॥ ४१ ॥

विपुलेति । युगक्षये कल्पान्ते सागरे शेते इति सागरशयस्य । अधिकरणे शेतेरित्यच्प्रत्ययः शयवासवासिष्वकालादिति विकल्पात् अलुगभावः । यस्य हरेर्विपुलेन कुक्षिणा भुवनानि पपिरे पीतानि । पिबतेः कर्मणि लिट् । स हरिरेकतमया पुरस्त्रिया पुनः कयाचित्पौराङ्गनया मदविभ्रमेण मदविकारेणासकलया असमग्रया एकया दृशा पपे पीतः सतृष्णं दृष्ट इत्यर्थः । कुक्षिकोणे निविष्टनिखिलविष्टपस्य हरेर्महतः आधेयस्यात्यल्पतरैककान्ताकटाक्षकोणाधारत्वोक्त्या चमत्कारादधिकालङ्कारः । आधाराधेययोरानुरूप्याभावोऽधिको मत इति लक्षणात् । अयञ्च तात्कालिकविकारात्मा विलासाख्यो भावो यत्कटाक्षवीक्षणम् । तात्कालिकविकारः स्याद्विलासोऽङ्गक्रियादिभिरिति दशरूपकात् ॥ ४० ॥

अधिकेति । काचन कान्ता अभिलक्ष्यं लक्ष्याभिमुखम् । आभिमुख्येऽव्ययीभावः । अधिकं मुहुरुन्नमनाद्दूरमुन्नमन् घनः कठिनः पयोधरः स्तनो यस्याः सा तथा । प्रचलतो नृत्यतः कलापिनो बर्हिण इव कलो मधुरः मञ्जुकस्वनो वलयध्वनिर्यस्याः सा सती । मञ्जुकं वलये कम्बाविति विश्वः । अङ्गुलिमुखेनाङ्गुल्यग्रेणैकस्य कर्णस्य विवरं रन्ध्रं द्रुतं शीघ्रं व्यघट्टयत् । कण्डूविनोदार्थमभिताडयत् । [illegible]

मदयन्द्विजान् जनितमीनकेतनः ।
अभवत्प्रसादितसुरो महोत्सवः
प्रमदाजनस्य स चिराय माधवः ॥ ३८ ॥
धरणीधरेन्द्रदुहितुर्भयादसौ
विषमेक्षणः स्फुटममून्न पश्यति ।
मदनेन वीतभयमित्यधिष्ठिताः

विपुलेन सागरशयस्य कुक्षिणा
भुवनानि यस्य पपिरे युगक्षये ।
मदविभ्रमासकलया पपे पुनः
स पुरस्त्रियैकतमयैकया दृशा ॥ ४० ॥

अभिकोमलमद्गुनपयोधरम्मुहुः
प्रचलत्कलापिकलगद्गदस्वना ।
अभिकृष्णमङ्गुलिमुखेन काचन
द्रुतमेककर्णविवरं व्यघट्टयत्

स्थिरदृष्ट्या विस्मयादराभ्यां

विपुलेति । युगक्षये कल्पान्ते सागरे शयानस्य सागरशयस्य संज्ञायां समान-स्थे चेतीत्यच्प्रत्ययः शयवासवासिष्वकालादिति सप्तम्या अलुक् । यस्य हरेर्विपुलेन कुक्षिणा भुवनानि पपिरे पीतानि । तेषां प्रमाणि बैकुण्ठोक्ता सान्दी-पिट नन्दः ... रोमराजिर्यस्य तेन चरणक्रमेण दधे धृतम् । ... तात्कालिकं गम्भीरलावण्यविलासः । अतीन्द्रनीलप्रभया रोमाव-लीकुचोभ्यो च रोमराजिलघुतीतेर्भ्रान्तिमदलङ्कारो-ऽत्र व्यज्यते इति वस्तुनालङ्कारध्वनिः ॥ ४१ ॥

निजेति । काचित् स्त्री निजेनात्मीयेन सौरभेण सौगन्ध्येन भ्रमि-तान् भ्रमरं भ्रमयं कारितानां भृङ्गाणां पङ्क्तयः पद्ममूलानि । स्त्री पङ्क्तिः पद्ममूलमित्यमरः । पत्रावलिरिति तिलकस्य: । ता एव व्यज-नानि इति रूपकं स्वेदहरत्वलिङ्गात् । तासामनिलेन क्षयितं नाशितं घर्मशारि स्वेदोदयं तेन पत्रिणौरिति पौरैरभिहितम् । अभिमुखं कौर-व्यौभावः । अनिमेषया दृष्ट्यैव तेन वपुषा निमित्तेन पुरदेवीव इन्द्रस्याधिदेवतेव स्वभावत विभाविता तर्कितेति भावः । अनिमेष-त्वस्वेदस्पर्शनजन्यजाड्यादस्त्रार्थ्यतभावः । अमति पतिसंश्रेष्ठता स्यादिदानी-ं दर्शनस्तुतिभिः । अनिमिषनयनभिवीक्षण तूष्णीम्भावादयस्तदेति अञ्च-नात् दृष्टाङ्कपौरभामिमेषलाभ्रौ पुराधिवासाश्च पुराधिदेवतादिलक्षण-

मदयन्द्विजान् जनितमीनकेतनः ।
अभवत्प्रसादितसुरोमहोत्सवः
प्रमदाजनस्य स चिराय माधवः ॥ ३९ ॥
धरणीधरेन्द्रदुहितुर्भयादसौ

विपुलेन सागरशयस्य कुक्षिणा
भुवनानि यस्य पपिरे युगक्षये।
मदविभ्रमासकलया पपे पुनः
स पुरस्त्रियैकतमयैकया दृशा॥ ४०॥
अधिकोन्नमद्घनपयोधरं मुहुः
प्रचलत्कलापिकलभर्धिकस्वना।
अभिकृष्णमङ्गुलिमुखेन काचन ४१॥
द्रुतमेककर्णविवरं व्यघट्टयत् [illegible]

विपुलेति। युगक्षये कल्पान्ते सागरे [illegible] विनिर्मितः चिन्त-
रणे शेतेरित्यच्प्रत्ययः [illegible] विदित विस्मयभावोऽर्थः। सम-
यस्य हरेर्विपुलेन कुक्षिणा [illegible] अतः न्यूनतातुभावाद्विस्मयो गम्यते।
विर [illegible] न्यूनताख्यापदादिति दशरूपके। अतो-
[illegible] तिशयोक्तिरलङ्कारः॥ ४०॥

अधिकेति। काचन अधिकं प्रचारितैर्विलोचनैरेवाभिनिर्दिष्टं
मनसम्। अथ छिन्नमरं द्रुतमित्यर्थः। पीतो यो माधवोऽहरिरेव रसो-
न्मत्तं श्यामल मधु मद्यं तत्सम्बन्धि रसोमाधुर्यं माधवरसः। रसोरागे
विषे वीर्ये तिक्तादौ मादे द्रवे रेतस्यास्वादने हेम्नि निर्यासेऽमृतपारदयो-
रितिवैजयन्ती। तस्यैव समूहस्तेन निर्भरैर्भरैः गुरुभिरिति यावत् अतएव
महेभावसैर्द्वन्द्वैः मरीरम्भाणमलसरीराधीत्यर्थः। अद्य इति परिभावे
अनुप्रत्ययः। तैरुपलक्षिताः इत्यर्थः। शनैः शनैः स्तम्भात् प्रतिबद्धः
प्रतिनिवेशाः स्वयं सम्पूर्णापि द्रव्याणि रसद्वयपरया दुर्गुणमस्तीति
भावः। अत्र माधव रसौघनिर्भरत्वविशेषणगत्या शनैःशनैः प्रतिदान-
हेतुत्वात्काव्यं हेतुकाव्यलिङ्गन्तु माधवरसेनेति श्लेषमूलातिशयोक्त्य-
नापत्तमिति सङ्करः॥ ४१॥

नवेति। अथ दरावेशानन्तरं काचित्पुर पूर्वमदनस्य मारभि-
र्मदाधिकोद्रेकैः विरचितता अरिरकसौविरलैः सम्भ्रमतामाः कृता।

विपुलेन सागरशयस्य कुक्षिणा
भुवनानि यस्य पपिरे युगक्षये ।
मदविभ्रमासकलया पपे पुनः
स पुरस्त्रियैकतमयैकया दृशा ॥ ४० ॥

अधिकोन्नमद्घनपयोधरम्मुहुः
प्रचलत्कलापिकलशङ्कस्वना ।
अभिकृष्णमङ्गुलिमुखेन काच[illegible]
द्रुतमेककर्णविवरं व्यघट्टय[illegible]गा इव ॥ ५२ ॥

विपुलेति । युगक्षये कल्पान्ते सागरे [illegible] रस्य शेतेरित्यच्प्रत्ययः यस्य सागर[illegible] सभाजस्य नाकृत्वे नाक्तु नपयचरित- यस्य हरेर्विपुलेन कुक्षिणा [illegible]तृप्यचित्तत्वं चेति सूक्तम् ॥ ५० ॥
[illegible] वर्णयति । अधीत्यादि । अधिरात्रि रात्रिषु । [illegible] । यत्र सभायां नभोविहारमभ्रं विहाय । किम् । [illegible] रौप्यम् । कलधौतं रूप्यहेम्नोरित्यमरः । तद्धौताः धवलाः शिलायेषान्तानि वेश्मानि स्फटिकभवनानीत्यर्थः तेषां रुचौ सभायां निपतन् प्रविशन् अनिदाघदीधितिरनुष्णरश्मिः हिमांशुः पुनरपि दुग्ध- वारिधौ क्षीराब्धौ [illegible] गर्भवासं न तु मथनात्प्रागिव चिरगर्भ- वासमिति भावः अवाप्य प्रापदित्युत्प्रेक्षा । तथा वेश्मनां चन्द्र- मण्डलाविकलोक्त्यते ॥ ५१ ॥

[illegible]मिति । [illegible] रश्मिति वचनानि तेषु [illegible] शिति- रत्नानां नीलमणीनां रश्मिभिर्हरितीकृतानि हरितवर्णीकृतान्यन्तराणि मध्यानि यासां ताः लोहितमणयो लोहितकाः पद्मरागाः । लोहितान्मणाविति कन्प्रत्ययः । तैर्निर्मिताः भुवो भूमौ शिलाः शैवला- याश्च ता जमदग्निसूनोः परशुरामस्य पितृणां तर्पणैः क्षत्रियशरीरप्र- स्रवेतरपथा वा सभा वहति स्म । जामदग्न्यः क्षत्रियास्रैः पञ्चप्रो-

करवालकोमलरुचावुपेक्षितैः ।
उदकर्षि यत्र जलशङ्कया जनै-
र्मुहुरिन्द्रनीलभुवि दूरमम्बरम् ॥ ६० ॥
अभितस्सदोऽथ हरिपाण्डवौ रथा-
दमलांशुमण्डलसमुल्लसत्तनू ।
अवतेरतुर्नयननन्दनौ नभः
शशिभार्गवावुदयपर्वतादिव ॥ ६१ ॥
तदलक्ष्यरत्नमयकुड्यमादरा-
दभिधातरीत इत इत्यथो नृपे ।
धवलाश्मरश्मिपटलाविभावित

असिश्यामा रुचिर्यस्यास्तस्यामिन्द्रनीलभुवि स्थितं परेण ज्ञानसाम्येन जनेनोपेक्षितैः 'स्थलमेतत् न जलमिति' उपदिष्टैरप्यपरैरागन्तुकजनैर्जलशङ्कया जलभ्रान्त्या मुहुर्दूरमम्बरं वस्त्रमुदकर्षि ऊर्ध्वमाकृष्टम् । अत्रेन्द्रनीलस्थलस्य सादृश्यात्सलिलभ्रान्तेर्भ्रान्तिमदलङ्कारः ॥ ६० ॥

अभित इति । अथामलेनांशुमण्डलेन तेजःपुञ्जेन समुल्लसन्त्यौ भासमाने तनू मूर्ती ययोस्तौ नयननन्दनौ नेत्रानन्दकरौ हरिपाण्डवौ सदोऽभितः सभाभिमुखम् । अभितः परि इति द्वितीया । रथात् शशिभार्गवौ अमलेत्यादिविशेषणविशिष्टौ चन्द्रशुक्रौ नभोऽभितो नभोऽभिमुखं उदयाख्यात्पर्वतादुदयाचलादिवावतेरतुः अवतीर्णवन्तौ । तरतेर्लिट् तॄफलभजत्रपश्चेति एत्वाभ्यासलोपौ । उपमा ॥ ६१ ॥

तदिति । अथो रथावतरणानन्तरं नृपे युधिष्ठिरे आदरादित इत इत्यभिधातरि सति इत इत आगम्यतामित्यभिदधाने सतीत्यर्थः । तदलक्ष्यरत्नमयकुड्यं अलक्ष्यरत्नभित्तिकम् । अल-

प्रतिहारमाविशदसौ सदः शनैः ॥ ६२ ॥
नवहाटकेष्टकचितन्ददर्श सः
क्षितिपस्य वस्त्रमथ तत्र संसदि ।
गगनस्पृशामणिरुचोच्चयेन य
त्सदनान्युदस्मयत नाकिनामपि ॥ ६३ ॥
उदयाद्रिमूर्द्ध्नि युगपच्चकासतो
र्दिननाथपूर्णशशिनोरसम्भवाम् ।
रुचिमासने रुचिरधाम्नि बिभ्रता

तेन सान्द्रेण रश्मिपटलेन मणिप्रभापुञ्जेन विभावितप्रतिहारमव-
भासितद्वारम् । स्त्री द्वाद्वारं प्रतीहार इत्यमरः । सदः सभां शनैरा-
विशत् प्रविष्टवान् । अत्र कुड्यपतो द्वारयोरसम्बन्धेऽपि तत्-
सम्बन्धोक्तेरतिशयोक्तिः ॥ ६२ ॥

नवेति । अथ प्रवेशनानन्तरं स हरिस्तत्र संसदि सभायां नव-
भिर्हाटकेष्टकाभिः हिरण्येष्टकाभिश्चितम् । हिरण्यं हेम हाटक-
मित्यमरः । इष्टकेषीकामालानां चिततूलभारिष्विति ह्रस्वः । पक्षे स्त्रीत्व-
काविशेषवाचकस्येष्टकाशब्दस्य तादर्थ्ये सुवर्णविकारे । सुवर्णं घटवदुप-
चारात् प्रयोगः । क्षितिपस्य युधिष्ठिरस्य वस्त्रं सदनम् । निशान्तवस्त्र-
सदनमित्यमरः । ददर्श । यत् सदनं गगनस्पृशा उच्चैस्तराणां मणि-
रुचां चयेन समूहेन नाकिनां देवानामपि सदनानि उदस्मयत अप-
हसत् । स्मयतेरुत्पूर्वात्कर्मणि लङ् । अत्रापि नृपसदनस्य सुरसदनादा-
धिक्यासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः ॥ ६३ ॥

उदयाद्रीति । अथ नृपसदनदर्शनानन्तरं उदयाद्रेर्मूर्द्ध्नि शिखरे
युगपच्चकासतो प्रकाशमानयोः । चकासृ दीप्ताविति धातोर्लट् शत्रा-
देशः । दिननाथपूर्णशशिनोः सूर्यपूर्णचन्द्रमसोरसम्भवां असम्भाव्य-

करवालकोमलरुचावुपेक्षितैः ।
उदकर्षि यत्र जलशङ्कया जनै
र्मुहुरिन्द्रनीलभुवि दूरमम्बरम् ॥ ६० ॥
अमितस्सदोऽथ हरिपाण्डवौ रथा
दमलांशुमण्डलसमुल्लसत्तनू ।
अवतेरतुर्नयननन्दनौ नभः
शशिभार्गवावुदयपर्वतादिव ॥ ६१ ॥
तदलक्ष्यरत्नमयकुड्यमादरा
दभिधातरीत इत इत्यथो नृपे ।
धवलाश्मरश्मिपटलाविभावित

यस्यां पुर्यां करवालरुचास्तृतां इन्द्रनीलभुवि क्वचित् प्रदेशे जानताप्येन जनेनोपेक्षितैः 'स्थलमेतत् न जलमिति' उपदिष्टैर्जनैरन्तरागन्तुकज-नैर्जलशङ्कया असम्भ्रान्त्या मुहुर्दूरमम्बरं वस्त्रं उदकर्षि नितम्बादु-द्धृतम् । अत्रेन्द्रनीलस्थलस्य जलत्वभ्रान्त्या भ्रान्तिमदलङ्कारः ॥ ६० ॥

अमित इति । अथामलांशुमण्डलेन तेजः पुञ्जेन उपलक्षितौ भासमाने तनू मूर्ती ययोस्तौ नयननन्दनौ नेत्रानन्दकरौ हरि-पाण्डवौ सदोऽभितः सभाभिमुखम् । अभितः परितः इति द्वितीया । रथात् शशिभार्गवौ अमन्दाद्यादिविशेषणविशिष्टौ चन्द्रशुक्रौ नभोऽभितो-नभोऽभिमुखं उदयपर्वतादुदयाचलादिवावतेरतुः अवतीर्णवन्तौ । मत्तेभमिदं [illegible] एवाम्यारोपो । उपमा ॥ ६१ ॥

तदिति । अथो रथावतरणानन्तरं नृपे युधिष्ठिरे आद-रादित इत इत्यभिधातरि सति इत इत आगम्यतामित्युक्त्वा दर्शयति सतीत्यर्थः । तद्रत्नमयमन्दरं रत्नमयकुड्यं सदः सभामभिजितम् । बहु-

प्रतिहारमाविशदसौ सदः शनैः ॥ ६२ ॥
नवहाटकेष्टकचितन्ददर्श सः
क्षितिपस्य वस्तरमथ तत्र संसदि ।
गगनस्पृशा मणिरुचाञ्चयेन य
त्सदनान्युदस्मयत नाकिनामपि ॥ ६३ ॥
उदयाद्रिमूर्द्ध्नि युगपच्चकासतो-
र्दिननाथपूर्णशशिनोरसम्भवाम् ।
रुचिमासने रुचिरधाम्नि बिभ्रता

शेन सान्द्रेण रश्मिपटलेन मणिप्रभापुञ्जेन विभावितप्रतिहारमेव द्वारम् । 'स्त्री द्वार्द्वारं प्रतीहारः' इत्यमरः । 'सदः सभा' शनैरा विशत् प्रविष्टवान् । अत्र कुञ्जप्रती द्वारयोरसम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः ॥ ६२ ॥

नवेति । अथ प्रवेशनानन्तरं स हरिस्तत्र संसदि सभायां नव-भिर्हाटकेष्टकाभिः हिरण्मयेष्टकाभिश्चितम् । 'हिरण्यं हेम हाटक'-मित्यमरः । इष्टकेषीकामालानाञ्चिततूलभारिष्विति ह्रस्वः । पक्ष स्त्रि-काभिधेयवाचकस्य इष्टकाशब्दस्य तादृशेऽपि सुवर्णविकारे । सुवर्णं घटवदुप-चारात् प्रयोगः । क्षितिपस्य युधिष्ठिरस्य सद्म सदनम् । निशान्तवस्त्य-सद्मेत्यमरः । ददर्श । यत् सदनं गगनस्पृशा उच्चैस्तरां मणि-रुचां चयेन समूहेन नाकिनां देवानामपि सदनानि उदस्मयत अप-घत् । स्मयतेरन्तपूर्वात्कर्तरि लङ् । अत्रापि नृपसदनस्य सुरसदनादि-भिर्व्यासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः ॥ ६३ ॥

उदयाद्रीति । अथ नृपसदनदर्शनानन्तरं उदयाद्रेर्मूर्ध्नि शिखरे युगपच्चकासतोः प्रकाशमानयोः । चकास्तृ दीप्ताविति धातोर्लट् शत्रा-देशः । दिननाथपूर्णशशिनोः सूर्यपूर्णचन्द्रमसोरसम्भवां असम्भवरहि-

अलघुन्यथ न्यषदतां नृपाच्युतौ ॥ ६४ ॥

सुतरां सुखेन सकलक्लमच्छिदा
सनिदाघमङ्गमिव मातरिश्वना ।
यदुनन्दनेन तदुदन्वतः पयः
शशिनेव राजकुलमाप नन्दथुम् ॥ ६५ ॥

अनवद्यवाद्यलयगामि कौशलं
नवगीतमप्यनवगीततां दधत् ।

तान्तयोस्तथाभूतयोर्युगपद्योगादभूतपूर्वाभिरित्यर्थः रुचिं शोभां बिभ्रतो नृपाच्युतौ रुचिरधाम्नि उज्ज्वलतेजसि । अलघुनि विपुले आसने सिंहासने न्यषदतामुपविष्टौ । सदेर्लुङि पुषादित्वात् च्लेरङादेशः सदिरप्रतेरिति षत्वम् ॥ अत्र सम्भावनया अर्कपूर्णेन्दुयोरसम्बन्धे सम्बन्धरूपातिशयोक्तिः ॥ ६४ ॥

सुतरामिति । तद्राजकुलं कुरुकुलम् । सकलक्लमच्छिदा सकलदुःखहारिणा यदुनन्दनेन कृष्णेन सनिदाघं ससन्तापमङ्गं मातरिश्वा वायुनेव उदकान्यस्य सन्तीति उदन्वान् उदधिः । उदन्वानुदधौ चेति निपातः । तस्य पयो जलं शशिनेव सुतरामत्यन्तम् । अव्ययादाम्द्रव्य इति आम्प्रत्ययः । सुखेनाक्लेशेन नन्दथुमानन्दमाप । स्यादानन्दथुरानन्द इत्यमरः । ट्वितोऽथुजित्यथुच्प्रत्ययः । मालोपमा ॥ ६५ ॥

अनवद्येति । सविलासो विलासयुक्तो लासिकविलासिनीजनः नर्त्तकीजनः सविलासलासिकविलासिनीजनः । नर्त्तकीलासिके समे इत्यमरः । अनवद्यमगर्ह्यं वाद्यं वंशादि तस्य लयः साम्यग्रहीतस्य समागतत्वं तद्गामि द्रुतविलम्बितादिमानानुवर्त्तीत्यर्थः । तालः कालक्रियामानं लयः साम्यमित्यमरः । नवगीतं यस्य तन्नवगीतं तथाप्यनवगीततां दधदिति विरोधेऽपि शब्दः अगर्हितत्वं दधदित्यविरोधाद्विरोधाभासः । अवगीतं तु निर्वादे मुहुर्गीते च गर्हिते इति विश्वः ।

स्फुटसात्त्विकाङ्गिकमनृत्यदुज्ज्वलं
सविलासलासिकविलासिनीजनः ॥ ६६ ॥
सकले च तत्र गृहमागते हरौ
नगरेऽप्यकालमहमादिदेश सः।
सततोत्सवन्तदिति नूनमुन्मुदो
रभसेन विस्मृतमभून्महीभृतः ॥ ६७ ॥
हरिराकुमारमखिलाभिधानवित्

सत्त्वमन्तःकरणं तेन निर्वृत्तं नृत्यं सात्त्विकं अङ्गं हस्तादि तेन निर्वृत्तमाङ्गिकम्। निर्वृत्ते त्वङ्गसत्त्वाभ्यां द्वे त्रिष्वाङ्गिकसात्त्विके इत्यमरः। ते स्फुटे यस्मिंस्तत्तथोक्तम्। वाचिकस्याप्युपलक्षणमेतत्। यथाह भगवान् भरतः। पदार्थाभिनयो नाम सोऽयं शाखाङ्गसत्त्वज इति। अतएव कालिदासोऽपि अङ्गसत्त्ववचनाश्रयं मिथः स्त्रीषु नृत्यमुपधाय दर्शयन्निति। कोमलं मधुरं नृत्यमुज्ज्वलमुद्धतं चानृत्यत्। तथोक्तं दशरूपके। भावाश्रयन्तु नृत्यं स्यान्नृत्तं ताललयाश्रयम्। आद्यं पदार्थाभिनयो मार्गो देशी तथापरः। मधुरोद्धतभेदेन तद्द्वयं द्विविधं पुनः। लास्यताण्डवरूपेण नाटकाद्युपकारकमिति ॥ ६६ ॥

सकल इति। क्लिष्टेति चार्थः। स राजा हरौ कृष्णे गृहमागते सकले तत्र नगरे इन्द्रप्रस्थे। अकाले प्रसिद्धवसन्तादिव्यतिरिक्ते काले। महमुत्सवम्। महः उद्धव उत्सव इत्यमरः। आदिदेश आज्ञापयामास। नूनमुत्प्रेक्ष्यते उन्मुदः कृष्णागमनादुत्कटानन्दस्य महीभृतो धर्मनन्दनस्य तन्नगरं सततं उत्सवा यस्मिन् तत् सततोत्सवमिति इत्येतत् रभसेन त्वरया विस्मृतमभूत् अन्यथा कथं कृतकरणोपदेश इति भावः ॥ ६७ ॥

हरिरिति। क्लिष्टेति चार्थः। अखिलान्यभिधानानि नामानि वेत्तीति अखिलाभिधानवित् सकलनामप्रपञ्चाभिज्ञः। नामधेये व्याकर-

स्वजनस्य वार्त्तमयमन्वयुङ्क्त च।
महतीमपि श्रियमवाप्य विस्मयः
सुजनो न विस्मरति जातु किञ्चन। ६८ ॥
मर्त्यलोकदुरवापमवाप्तरसोदयं
नूतनत्वमतिरिक्ततयानुपदन्दधत्।
श्रीपतिः पतिरसाववनेश्च परस्परं
सङ्कथामृतमनेकमसिस्वदतामुभौ ॥ ६९ ॥

भाषीतिश्रुतेरिति भावः। आख्याह्वे अभिधानं च नामधेयं च नाम चेत्यमरः। अथ हरिः कृष्णः कुमारमारभ्येत्याकुमारम्। आङ्मर्यादाभिविध्योरित्यभिधानादव्ययीभावः। स्वजनस्य बन्धुजनस्य। बन्धुस्वस्वजनाः समा इत्यमरः। वार्त्तमनामयं आरोग्यमित्यर्थः। वार्त्तं फल्गुन्यरोगे चेत्यमरः। ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयमिति मनुस्मरणात्। अन्वयुङ्क्त अपृच्छत्। प्रश्नोऽनुयोगः पृच्छा चेत्यमरः। युजेः कर्तरि लङ्। तथा हि महतीं श्रियं सम्पदमवाप्यापि विस्मयं निरहङ्कारः सुजनः अतएव जातु कदाचिदपि किञ्चन किमपि न विस्मरति। सुजनः सम्पन्नोऽप्यहङ्कारं न करोतीति भावः। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ६८॥

मर्त्येति। उभौ श्रीपतिः कृष्णः अवनेः पतिः धर्मसुतश्च परस्परं मर्त्यलोकैर्मनुष्यलोकैर्दुरवापं दुर्लभं अवाप्तरसोदयं प्राप्तरसोत्कर्षं स्वादुभवदित्यर्थः अतिरिक्ततया अतिशयिततया अनुपदमनुक्षणं प्रतिवाक्यं च नूतनत्वमपूर्वतां दधत् अनेकं बहुलं सङ्कथा सम्भाषणं चेदिराजजरासन्धादिकार्यचिन्तारूपं तदेवामृतं तदसिस्वदतां स्वादितवन्तौ। आदरः स्वपरनृपकथानां प्रायशो हि सुहृदो सहरापदमिति भावः। स्वदतेर्णौ चङ्युपधाया ह्रस्वः। सङ्कथामृतमिति रूपकालङ्कारः। स्वादर्मविह्वाम् ॥ ६९ ॥

इति श्रीशिशुपालवधे महाकाव्ये श्रीमद्दा
लङ्कृतसर्गान्ते श्रीकृष्णसमागमोनाम
त्रयोदशः सर्गः ॥ १३ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघ काव्य
व्याख्याने सर्वङ्कषाख्ये त्रयोदशः सर्गः ॥ १३ ॥

चतुर्दशः सर्गः।

तमगाद् गिरमुद्गिरन्निति
स्वेदमाहितविकाशया दृशा।
यज्ञकर्म्मणि मनः समादध
द्वाग्विदांवरमकद्वदोऽन्तपः ॥ १ ॥

तमिति। वदतीति वदः। पचाद्यच्। कुत्सितस्य वदः कद्वदः गर्ह्य-
वाक्। गर्ह्यवादी तु कद्वद इत्यमरः। रथवदयोश्चेति कोः कदादेशः।
स न भवतीत्यकद्वदः साधुवादी नृपो युधिष्ठिरः यज्ञ कर्म्मणि दीक्षानुष्ठाने
मनः समादधत् समाधायन् तदेव हृदि निधायेत्यर्थः। स्वेदाहितविका-
सया हर्षप्रसादया दृशा दृष्ट्या स्नेह परिप्लुतमवलोकयन्नित्यर्थः। आहित-
विकासयाः सकण्टकस्नेहः संश्लेषयं। वाचोविदन्ति वक्तुं विदं च
जानन्तीति वाग्विदः वाचा कोविदाः। सत्सूद्विषेत्यादिना क्विप्।
तेषां वरं श्रेष्ठं तं हरिं गिरं जगाद। ब्रूतेरपिदकर्मकत्वात् दुहादौ

लज्जते न गदितः प्रियम्परो
वक्तुरेव भवति त्रपाधिका
व्रीडमेति न तव प्रियं वदन्
ह्रीमतात्रभवतैव भूयते ॥ २ ॥
तोषमेति वितथैः स्तवैः पर-
स्ते च तस्य सुलभाः शरीरिभिः ।
अस्ति न स्तुतिवचोऽनृतन्तव
स्तोत्रयोग्य न च तेन तुष्यसि ॥ ३ ॥

त्यादिना गदेर्द्विकर्मकत्वम् । अत्रोत्प्रेक्षावृत्त्यनुप्रासयोः संसृष्टिः । अस्मिन् सर्गे रथोद्धता वृत्तं रान्नराविह रथोद्धता लगौ इति लक्षणात् ॥ १ ॥

गिरं जगादेत्युक्तामेव गिरं दशभिः प्रपञ्चयति । लज्जत इत्यादिभिः । परं अन्यं कश्चित्पुमान् प्रियं गदितः प्रियवाक्यमुक्तः सन्नित्यर्थः । गदेर्द्व्यादित्वादप्रधाने कर्मणि क्तः । अप्रधाने दुहादीनामिति वचनात् । न लज्जते तस्योत्तमत्वादिति भावः किन्तु वक्तुः स्तोतुरेवाधिका त्रपा भवति । असदादिना मिथ्यावाचकत्वादिति भावः । प्रकृते तु नैवमित्याह । तव प्रियं वदन् त्वां स्तुवन्नित्यर्थः व्रीडां न एति अनन्तगुणाधारे त्वयि बह्वोरपि प्रियस्य अमिथ्यात्वादिति भावः । किन्तु स्तवनेन अत्रभवता पूज्येनैव ह्रीमता भूयते प्रस्तुत त्वमेवात्र जिह्रेषीत्यर्थः महतामनुद्धतत्वादिति भावः । पूज्यस्तत्रभवानिति सज्जनः । इतराभ्योऽपीति सार्वविभक्तिकस्तसिल्प्रत्यये सुप्सुपेति समासः ॥ २ ॥

तोषमिति । परस्त्वदन्यः वितथैरसत्यभूतैः स्तवैः स्तोत्रैः । स्तवः स्तोत्रं नुतिः स्तुतिरित्यमरः । तोषं तुष्टतामेति ते च तस्य परस्य ते मिथ्यास्तवाः शरीरिभिः प्राणिभिः सुलभाः असम्बद्ध प्रलापा नाम निर-

बह्वपि प्रियमयन्तव ब्रुव
न्न व्रजत्यन्ततवादितामृजनः ।
सम्भवन्ति यददोषदूषिते
सार्व्व सर्व्वगुणसम्पद् स्त्वयि ॥ ४ ॥

सा विभूतिरनुभावसम्पदा
भूयसी तव यदायतायति ।
एतदूढगुरुभारभारतं
वर्षमद्य मम वर्त्तते वशे ॥ ५ ॥

गंभीरत्वादिति भाव । त्वयि तु नैवमित्याह । अवश्लोति । हे लोकत्रयीश ! गुणाकरादिति भावः । अतएव तव सम्बन्धि स्तुतिवचोऽन्तं नार्हति न भवति तेन स्तुतिवचसा न तृप्यसि न महोदधि गम्भीरत्वादिति भावः अत्र लोकद्वये प्रत्याख्यानादुपमानभूतादाधिक्यकथनाद्व्यतिरेकालङ्कार ॥ ३ ॥

बह्वपीति । ऋजुजनः स्वयमिथ्यर्थः परानुभूतं बह्वपि तव प्रियं ब्रुवन् सन् अनृतवादितां मिथ्यावादित्वं न व्रजति न गच्छति यद्यस्मात् हे सार्व ! सर्वहितत्वात्सार्वः तत्सम्बोधने । अदोष दूषितो न भवतीत्यदोषदूषिते सर्वगुणवर्जिते त्वयि सर्वगुणसम्पदः सम्भवन्ति । अनारोपितगुणवादोऽभूतार्थपि न विपर्येतीति भावः । अत्रोत्तरवाक्यार्थेन पूर्ववाक्यार्थ-समर्थनाद्वाक्यार्थहेतुकं काव्य लिङ्गम् ॥ ४ ॥

सेति । हे ऊढगुरुभार ! विश्वम्भरत्वादिति भावः एतत् भरतस्य राज्ञ इदं भारतम् । भारतनामाख्यं वर्षम् । वर्षोऽस्त्री भारतादौ चेति हेमः । सोऽयं भारतं वर्षमित्यर्थः । अद्येदानीमायतायति स्थिरतरोत्तरकालम्बितं यदा मद्धेतवः । एषतः नाम आयतिरुत्तरः । मम वशे आयत्ततायां वर्तत इति यावत् । तत्र आयत्ततायाहेतुमिति विदर । सा भवदर्शनं विशेषप्राधान्यात् कीर्तिकृता । तवानुभावसम्पदा

सप्ततन्तुमधिगन्तुमिच्छतः
कुर्व्वनुग्रहमनुज्ञया मम ।
मूलतामुपगते खलु त्वयि
प्रापि धर्म्ममयवृन्तता मया ॥ ६ ॥
सम्भृतोपकरणेन निर्म्मलां
कर्त्तुमिष्टिमभिवाञ्छता मया
त्वं समीरण इव प्रतीक्षितः
कर्षकेण वलजामुपूषता ॥ ७ ॥

साम्राज्यातिशयानां भूयसी महती विभूतिर्महिमा कार्यमिति यावत्। त्वत्प्रसादलब्धमिदमैश्वर्यमित्यर्थः । अत्र निजैश्वर्यस्य भगवदनुभावसम्बन्धं विना सम्बन्धेऽप्यसम्बन्धोक्तेरतिशयोक्तिः ॥ ५ ॥

तदेव स्तुत्वा हरिमभिमुखीकृत्य सन्धामावेदयति। सप्तेति। सप्त तन्तवः संस्था यस्य तं सप्ततन्तुं क्रतुम। सप्ततन्तुर्मखः क्रतुरित्यमरः । अधिगन्तुम्प्राप्तुमिच्छतोमममानुज्ञयातद्दानेनानुग्रहं प्रसादं कुरु याज्य कुर्वित्यर्थः स्वत समर्थस्य किं मदनुग्रहेणेत्याह हे प्रभो त्वयि मूलतां मुख्यकारणतामङ्घ्रित्व चोपगते सति। मया धर्म्ममयवृन्तता धर्म्मात्मकवृन्तता प्रापि प्राप्ता। प्राप्नोतेः कर्म्मणि लुङ्। प्रागपि त्वदनुग्रहादेव धर्ममर्जयन् धर्म्मराजोऽहमभवमिति भावः। अत्र त्वमस्य धर्म्मवृन्तत्वेन कृतेनानुकूलत्वेन रूपणात् सावयवरूपकं तेन त्वदनुग्रहं सर्व्वथा प्रार्थनीयो मया धर्म्मार्थिनेति तात्पर्य्यं व्यज्यते ॥ ६ ॥

सम्भृतेति निर्म्मलां निर्द्दोषां इष्टिं यागम। यजेः स्त्रियां क्तिन् यजि स्वपीत्यादिना सम्प्रसारणम। कर्त्तुमभिवाञ्छता अतएव सम्भृतोपकरणेन सम्पादितसाधनेन मया वलजान् धान्यराशीन्। वलजो धान्यराशि रित्यमरः। उपूषता पवित्र्य धान्यमिव निस्तुषीकर्त्तुं इच्छता।

वीतविघ्नमनघेन भाविता
सन्निधेस्तव मखेन मेऽधुना।
कोविदन्तुमलमाश्रितोदये
वासरश्रियमशीतदीधितौ ॥ ८ ॥
स्वापतेयमधिगम्य धर्म्मतः
पर्य्यपालयमवीवृधञ्च यत्।
तीर्थगामि करवै विधानत
स्तज्जुपस्व जुहवानि चानले ॥ ९ ॥

इनाते· यज्ञन्तात्कटः यज्ञादेश अनियद्ग्रुहोश्चेति चकारादिट् प्रति-षेधः। कर्पकेण कृषीवलेन समीरणोवायुरिव प्रतीक्षितः। प्रवाते स्वर्म्मादिना धान्यशोधने पवनं तद्वातं विभेव त्वां विना समाहृत-सम्भारेणापि मया यागो दुष्कर इति भावः ॥ ७ ॥

वीतविघ्नमिति। अधुना तव सन्निधेर्हेतोर्मे मखेन क्रतुना कर्त्रा वीत-विघ्नमविघ्नं अनघेन निर्दोषेण भाविता भविष्यत इत्यर्थः। भावे लुट् स्यसिच्सीयुट्तासादिना लुटि चिरवद्भावात् इट्। तथा हि अशीत-दीधितावुष्णांशावाश्रितोदये प्राप्तोदये सति कोवासरश्रियन्दिनशोभां विहन्तुमलं शक्तः न कोऽपीत्यर्थः। अत्र रविमरीचिमालिनोर्वाक्य-भेदात् विम्बप्रतिविम्बतया सन्निहित द्योतितया समानधर्म्मतया निर्द्दे-शादृष्टान्तालङ्कारः। यत्र वाक्यद्वये विम्बप्रतिविम्बतयोच्यते सामान्यधर्म-वाक्योक्तिः स दृष्टान्तो निगद्यत इति लक्षणात् ॥ ८ ॥

स्वापतेयमिति। यत् स्वपतौ स्वामिनि साधु स्वापतेयं वित्तमृच पथ्यतिथिवसतिस्वपतेर्ढञ्। द्रव्यं वित्तं स्वापतेयमित्यमरः। धर्म्मतः क्षत्रियस्य विजितमिति शास्त्रोक्तप्रकारादित्यर्थः अधिगम्य लब्ध्वा। यत्नेन पर्य्यपालयं पालितवान् अवीवृधं वृद्धिं च प्रापितवान्। तत्तीर्थ-

पूर्वमङ्ग जुहुधि त्वमेव वा
स्नातवत्यवभृथे ततस्त्वयि ।
सोमपायिनि भविष्यते मया
वाञ्छितोत्तमवितानयाजिना ॥ १० ॥

किं विधेयमनया विधीयतां
त्वत्प्रसादजितयार्थसम्पदा ।
शाधि शासक जगत्त्रयस्य मा
माश्रवोऽस्मि भवतः सहानुजः ॥ ११ ॥

तानि विधाधीनं करवै करिष्यामि । विधानतः । पाण्डितं यद्देवेभ्यो ऽहं पार्थेषु निवेदयेदिति स्मरणात् । तच्च पालं त्वमेवेत्याह । तत्त्वं जुषस्व सेवस्व सदैव भुङ्क्ष्वेत्यर्थः जुषी प्रीतिसेवनयोरिति धातोर्लोट् । अनले जुहवानि च जुहूया तन्मुखेनापि तवैव भोक्तृत्वादिति भावः । जुहोतेः संप्रश्नलोटि मेर्निरादेशः ॥ ९ ॥

पूर्वमिति । वेति पक्षान्तरे व्यवस्थेत्यर्थः अङ्ग हे कृष्ण ! अथ सम्बोधनार्थकाः स्युः अङ्ग हे है भो इत्यमरः । पूर्वं त्वमेव जुहुधि यजस्वेत्यर्थः । हुझल्भ्यो हेर्धिरिति हेर्धिरादेशः । सोमपायिनि त्वयि अवभृथे यज्ञे । दीक्षान्तोऽवभृथो यज्ञे इत्यमरः । स्नातवति सति ततोऽनन्तरं मया वाञ्छितः उत्तमो वितानः राजसूयाख्यः । क्रतुविस्तारयोरस्त्री वितानं त्रिषु तुच्छके इत्यमरः । तेन तथा याजिना भविष्यते । भावे लृट् । त्वयि इष्टवति पश्चादहं यक्ष्ये इत्यर्थः । अत्र श्लोकद्वयेन हर्योगासम्बन्धे तत्सम्बन्धोक्तेरतिशयोक्तिः ॥ १० ॥

किमिति । अथवा त्वत्प्रसादेन त्वदनुग्रहेण जितया लब्धया अनयार्थसम्पदा धनसम्पदा किं विधेयं किमनुष्ठेयं विधीयतां त्वयैव क्रियतां अहं तु परतन्त्र इत्याह । हे जगत्त्रयस्य शासक ! मत भवेति मां शाधि

तं वदन्तमिति विष्टरश्रवाः
श्रावयन्नथ समस्तभूभृतः ।
व्याजहार दशनांशुमण्डलं
व्याजहारशबलन्दधद्वपुः ॥ १२ ॥

सादिताखिलनृपम्महन्मह
सम्प्रति स्वनयसम्पदैव ते
किम्परस्य स गुणः समश्नुते
पथ्यवृत्तिरपि यद्यरोगिताम् ॥ १३ ॥

यिव्यदेत्यर्थः । शासिवसीति इण्कत्योः ह्रेढंरिति षिरादेशः झलोझलीति सकारलोपः । सहानुज । मातुजः, सन् । वोपसर्जनस्येति सहशब्दस्य सभावविकल्पः । भवत. तवाश्वरोविभेयोऽस्मि । विधेयो विनयग्राही वचने स्थित आश्रवः इत्यमरः । अत्तानामवसाश्वत्तस्वम्बोक्ते रतिप्रयोक्तिरिति । दयालोश्या भावार्यनतेऽतिप्रियतराख्यानात् प्रेयोऽलङ्कारः । प्रियः प्रियतराख्यानमिति लक्षणात् आधुनिकास्तु भावनिबन्धे प्रेयोऽलङ्कार इति वदन्ति । सचोऽन्नीतस्तत तत्नोर्दीप्यते च ॥ ११ ॥

तमिति । कथान्तरं विष्टराविव श्रवसी यस्य स विष्टरश्रवाः । विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवा इत्यमरः । इति एतादृशं तं वदन्तं त्वदर्थं । समस्तभूभृत सर्वान् नृपान् श्रावयन् दशनांशुमण्डलमिति व्याजोऽपदेशोयस्य तेन हारेण मुक्ताहारेण शबलं श्यामं वपुर्दधत् व्याजहार व्याहृतवान् । अत्र दशनांशुमण्डलस्य व्याजशब्देनासत्यत्वप्रतिपादनात् अपह्नुतिभेदः ॥ १२ ॥

यदुक्तं सा विभूति रेष्वादि तत्नोत्तरमाह । सादितेति । सम्प्रति ते तव मखन्नकृत्येऽत्र रत्नप्रसम्पदैव निजनीतिसम्पत्त्यैव सादिताखि-लम्पं विजितसकलराजक न तु मदनुभावादिति भावः तथा हि

तत्सुराज्ञि भवति स्थिते पुरः
कः क्रतुं यजतु राजलक्षणम्।
उद्धृतौ भवति कस्य वा भुवः
श्रीवराहमपहाय योग्यता॥ १४॥
आसनेऽपि गुरुणि व्यवस्थितं
कृत्यवस्तुषु नियुङ्क्ष्व कामतः।

अथवा हिता हविरन्नपानादिक्रिया यस्य सोऽपि अरोगिता आरोग्यं समश्नुते यदि प्राप्नोतीति चेत् सोऽपि तदारोग्यमित्यर्थः भिषजमाधा स्यात्तु विडम्बना। तस्य भिषजस्य गुणः किं नेत्यर्थः। पथ्यसेरा-रोग्यमौषधसाध्यत्वाद्भिषजो गुणोऽस्तु हितमेध्याधिनो न तथेत्यर्थः स्व-यमनर्थः पराधीनसिद्धिरितरप्रयत्नात् इति भावः। दृष्टान्तालङ्कारः युगम्॥ १२॥

यदुक्तं पूर्वमङ्ग सुहृधि त्वमेवेति तत्राप्याह। तदिति तत्तस्मा दुष्करीया तदैवाधिकारित्वादित्यर्थः। सुराज्ञि। विजयप्रकारत्वादि-गुणयोगात् सुराज्ञीति। न पूजनादिति समासान्तप्रतिषेधः। भवति त्वयि पुरः स्थिते सति कन्वस्यः कः इत्यर्थः। राज्ञः क्षत्रियस्य समर्थं धिकृतसाधारणं यस्य तं क्रतुं राजसूयमित्यर्थः यजतु न कोऽपी-त्यर्थः। राजा राजसूयेन यजेतेति राजाधिकारत्वाच्छ्रवणात्त्वया त्व-यैवेति भावः। संभावनायां लोट्। अत्र दृष्टान्तमाह। भुव उद्धृतौ भुव उद्धरणे श्रीवराहं आदिवराहं अपहाय कस्य पुनर्योग्यता सा-मर्थ्यं भवति न कस्यापीत्यर्थः। योगाय प्रभवतीति योग्यः। योगा-द्यच्चेति यत्प्रत्ययः। अत्र राजवराहयोः वाक्यभेदेन प्रतिबिम्बकर-णाद्दृष्टान्तालङ्कारः॥ १३॥

यदोक्तं धनुर्वीणाधरत्वेनैतद्दिशा तदाह। आसन इति। गुरुष्व-पि गुरुतरेऽपि आसने सिंहासने अवस्थितं तदाधारमित्यर्थः। गी

त्वत्प्रयोजनधनन्धनञ्जया-
दन्य एष इति माञ्च मावगाः ॥ १५ ॥
यस्तवेह सवने न भूपतिः
कर्म कर्मकरवत्करिष्यति ।
यस्य नेष्यति वपुः कबन्धता
मन्धुरेष जगतां सुदर्शनः ॥ १६ ॥

स्वतन्त्रस्तु कर्तव्यार्थेषु कामतो यथेच्छं नियुङ्क्ष्व प्रेषय। अनुचितमे-तद्विषयत्करोति सङ्कोचं वारयन्नाह। त्वदिति। त्वत्प्रयोजनमेव धनं यस्य तं त्वदेकैकनिष्ठकिङ्कर्यं। धनं जयतीति धनञ्जयोऽर्जुनः। संज्ञायां भृतृवृजिधारिसहितपिदमः इति खच्प्रत्यये मुमागमः। तस्मादेषोऽन्यः अन्य इति मां मावगाः मावेहि च। नियोगसङ्कोचाभावार्थश्चकारः। अवपूर्वादिणो माङि लुङ्। इणो गा लुङीति गादेशः न माङ्योग इत्यडागमप्रतिषेधः। उभयोस्तत्कार्यनिबन्धनादर-भाराबन्धात्मत्वाच्च नावयोर्भेदप्रतिपत्तिः कार्येत्यर्थः तथा च तद्-द्वेव नियोगेऽप्यसङ्कोच उचित इति भाव अतएवानयोर्वैधर्म्येऽहे-तुकहेतुमद्भावादाकार्यहेतुकं काव्यलिङ्गमलङ्कारः स च श्लेषयोर्भेदाभेद-रूपातिशयोक्त्यनुप्राणित इति अनयोरङ्गाङ्गिभावेन सङ्करः ॥ १५ ॥

यच्चोक्तं वीतविघ्नमित्यादि तत्राभयदानप्रतिजानीते स इति। यो-भूपतिः त्वदिहाध्वरे सवने यज्ञे। सवनं यजने स्नाने सोमे निर्दलनेऽपि चेति विश्वः। कर्मकरवद्भृत्यवत् कर्म न करिष्यति तस्य भूपते-र्वपुः जगतां बन्धुः क्षेमङ्करत्वादिति भावः एष सुदर्शनो मच्चक्रम्। शङ्खो लक्ष्मीपते पाञ्चजन्यश्चक्रं सुदर्शन इत्यमरः। कबन्धतां शिरः-शून्यतां नेष्यति प्रापयिष्यति छेत्स्यामि चक्रेणास्य शिर इत्यर्थः। 'कबन्धं सलिले प्रोक्तमपमूर्धकलेवर' इति विश्वः। अतो विघ्नशङ्का न कार्येति भावः। अत्र सुदर्शने बन्धुत्वरूपणाद्रूपकालङ्कारः ॥ १६ ॥

इत्युदीरितगिरन्तपस्त्वयि
श्रेयसि स्थितवति स्थिरा मम ।
सर्वसम्पदिति शौरिमुक्तवा
नुद्वहन्मुदमुदस्थित क्रतौ ॥ १७ ॥
आननेन शशिनः कलान्दध
द्दर्शनक्षयितकामविग्रहः ।
आप्लुतः स विमलैर्जलैरभू-
दष्टमूर्त्तिधरमूर्त्तिरष्टमी ॥ १८ ॥

इतीति । इतीत्थं उदीरितगिरमुक्तवन्तमुवाच शौरिं नृपो युधिष्ठिरः त्वयि श्रेयसभ्युदये विषये स्थितवति त्वयि क्षेमङ्करे सतीत्यर्थः मम सर्वसम्पत् स्थिरेत्यब्रवीत् । मुदं उद्वहन् सन्तोषाय सम्यक्त्वा सन्तुष्यन् सन् । क्रतावुद-स्थित क्रतुं कर्त्तुं उद्युक्तवानित्यर्थः । तिष्ठतेर्लुङि उदोऽनूर्द्धकर्म्मणि इत्यादिनात्मनेपदं स्थाघ्वोरिच्चेति सिचः कित्त्वादिकारः ह्रस्वादङ्गा-दिति सकारलोप ॥ १७ ॥

अथ पञ्चविंशता श्लोकैरनेकधा क्रतुं वर्णयति । आननेनेत्यादि । आननेन शशिनः कलामिव कलां कान्तिं दधत् । निदर्शनालङ्कारः । शशिधरस्य इत्यर्थः । अन्यत्र शशिखण्डधरेत्यर्थः । दर्शनेन क्षयितौ ना-शितौ कामविग्रहौ कामक्रोधौ येन सः । अन्यत्र दृष्टिं दग्धकामशरीरः विमलैर्जलैराप्लुतः स्नातः मद्यां स्नातीति दीक्षायां स्नानविधानादिति भावः । अन्यत्र गङ्गोदकसिक्ता गङ्गाधरीत्यर्थः । स नृपः । अष्टानां पूरणी अष्टमी । तस्य पूरणे डडिति डट् प्रत्यय मान्तादसङ्ख्यादेर्मडिति मडागमः टिड्ढाणञिति [illegible] । ङीप् । अष्टानां मूर्त्तीनां समाहारो-ऽष्टमूर्त्ति । तद्धितार्थ इ [illegible] नपुंसकत्व । तस्य धरो धारयिताऽष्ट [illegible] अष्टमी मूर्त्तिरभूद् सोम

तस्य साङ्ख्यपुरुषेण तुल्यतां
बिभ्रतः स्वयमकुर्वतः क्रियाः।
कर्तृता तदुपलम्भतोऽभव-
द्वृत्तिभाजि करणे यथर्त्विजि ॥ १९ ॥
शब्दितामनपशब्दमुच्चकै-
र्वाक्यलक्षणविदोऽनुवाक्यया।

दीक्षितोऽभूदित्यर्थः। तस्याप्यागमे शिवमूर्त्तित्वप्रसिद्धेः। अत्र महतामर्क तयोर्नृपशिवयोः विषयविषयिभावसम्बन्धात् श्लेषालङ्कारः ॥ १८ ॥

तस्येति। क्रियाः कर्माणि होमादीनि। अन्यत्र पुण्यपापकर्माणि स्वयमकुर्वतोऽननुतिष्ठतः अन्यत्र उदासीनस्य। अतएव साङ्ख्यपुरुषेण साङ्ख्यशास्त्रोक्तेनात्मना तुल्यतां बिभ्रतस्तस्य राज्ञः करणे अन्तःकरणे यथा बुद्धाविवेत्यर्थः। ऋतौ यजतीति ऋत्विक् याजकः। ऋत्विजो याजकाश्च ते इत्यमरः। ऋत्विग्दधृगिति निपातः। तस्मिनृत्विजि वृत्तिभाजि होमादिव्यापारं कुर्वतीत्यर्थः। अन्यत्र पुण्यपापकारिणि सति तदुपलम्भतः तस्य ऋत्विग्वृत्तेरुपलम्भात्स्वभेदमित्यत्र स्वाध्यासादेः कर्तृता क्रियानुष्ठातृत्वमभवत्। तथैव विधिसामर्थ्यादिति भावः। अत एवाह भगवान् जैमिनिः अन्यो वा स्यात्परिक्रियाम्नानात्स्वल्पात्मनेपद इति। अन्यत्र तदुपलम्भतस्तस्या बुद्धिवृत्तेरुपलम्भात्सान्निध्येनानुसन्धानादेव कर्तृत्वमभवत् स्वयं क्रियाभोगरहितोऽपि आत्मा बुद्धेः सन्निधानात् स्फटिकवत्तथा भवतीत्यर्थः। उपमालङ्कारः ॥ १९ ॥

शब्दितामिति। वाक्यलक्षणविदो मीमांसकास्तस्य। यत्र कर्मणि ओवजनव्यापारवन्तः ऋत्विजः। औद्गात्रादि निमन्त्र्य। अनूच्यत इति अनुवाक्या तया अनुवाक्यया। अनूचया याज्यया जुहोतीति श्रुतेः सा च प्रयाजानुयाजा तदभावे होतृपाठ्या देवताह्वानी ऋक्। वचेः ऋहलोर्ण्यत् चजोः कु घिण्ण्यतोरिति कुत्वं यद्वंशत्वाद्वचोपपद्ये याजा-

इत्युदीरितगिरन्नृपमव्ययि
श्रेयसि स्थितवति स्थिरा मम ।
सर्वसम्पदिति शौरिमुक्तवा
नुद्वहन्मुदमुदस्थित क्रतौ ॥ १७ ॥
आननेन शशिनः कलान्दध
द्दर्शनक्षयितकामविग्रहः ।
आप्लुतः स विमलैर्जलैरभू-
दष्टमूर्त्तिधरमूर्त्तिरष्टमी ॥ १८ ॥

इतीति । इतीत्थं उदीरितगिरमुपन्यस्तवाचं शौरिं नृपो युधिष्ठिरः त्वयि श्रेयसाभ्युदये विषये स्थितवति त्वयि क्षेमङ्करे सतीत्यर्थः मम सर्वसम्पद् स्थिरेत्युक्तवान् । मुदं उद्वहन् सहाय सम्मदात् सन्तुष्यन् सन् । क्रतावुद-स्थित क्रतुं कर्त्तुं उद्युक्तवानित्यर्थः । तिष्ठतेर्लुङि उदोऽनूर्द्ध्वकर्मणि इत्यादिनात्मनेपदं स्थाघ्वोरिच्चेति सिचः किच्चादिकारः ह्रस्वादङ्गा-दिति सकारलोप ॥ १७ ॥

अथ पञ्चविंशत्या श्लोकैरनेकधा क्रतुं वर्णयति । आननेनेत्यादि । आननेन शशिनः कलामिव कलां कान्तिं दधत् । निदर्शनालङ्कारः । शशिसदृश इत्यर्थः । अन्यत्र शशिखण्डधरेत्यर्थः । दर्शनेन क्षयितौ ना-शितौ कामविग्रहौ कामक्रोधौ येन सः । अन्यत्र दृष्टिं दग्धस्मरशरीरः विमलैर्जलैराप्लुतः स्नातः नद्यां स्नातीति दीक्षायां स्नानविधानादिति भावः । अन्यत्र गङ्गोदकसिक्तः गङ्गाधरेत्यर्थः । स नृपः । अष्टानां पूरणी अष्टमी । तस्य पूरणे डडिति डट् प्रत्ययः नान्तादसङ्ख्यादेर्मडिति मडागमः टिड्ढाणञित्यादिना ङीप् । अष्टानां मूर्त्तीनां समाहारो-ऽष्टमूर्त्ति । तद्धितार्थ इत्यादिना समाहारे द्विगुरेकवचनं नपुंसकत्वं । तस्य धरोधारयिताऽष्टमूर्त्तिधरः शिवः तस्य अष्टमी मूर्त्तिरभूत् सोम

तस्य साङ्ख्यपुरुषेण तुल्यता
म्बिभ्रतः स्वयमकुर्व्वतः क्रियाः ।
कर्तृता तदुपलम्भतोऽभव
द्वृत्तिभाजि करणे यथर्त्विजि ॥ १९ ॥
शब्दितामनपशब्दमुच्चकै-
र्वाक्यलक्षणविदोऽनुवाक्यया ।

दीक्षितोऽभूदित्यर्थः । तस्याध्वरागमे शिवमूर्त्तित्वमभिव्यक्तिः । अत्र महतामप्य-
मयोर्न्द्रियवशोः शिवयज्ञमानत्वाभ्यासात् श्लेषालङ्कारः ॥ १८ ॥

तस्येति । क्रियाः कर्माणि होमादीनि । अन्यत्र पुण्यपापकर्माणि
स्वयमकुर्व्वतोऽननुतिष्ठतः अन्यत्र उदासीनस्य । अतएव साङ्ख्य पुरु-
षेण साङ्ख्यशास्त्रोक्तेनात्मना तुल्यतां बिभ्रतस्तस्य राज्ञः करणे अन्तः-
करणे यथा बुद्धाविवेत्यर्थः । ऋतौ यजतीति ऋत्विक् याजकः । ऋत्वि-
जोयाजकाश्च ते इत्यमरः । ऋत्विग्दधृगिति निपातः । तस्मिन्नृत्वि-
भाजि होमादिव्यापारं कुर्व्वतीत्यर्थः । अन्यत्र पुण्यपाप कारिणि
सति तदुपलम्भतः तस्य ऋत्विग्वृत्तेरुपलम्भात्सम्भेदमित्यत्र तत्स्थानादेव
कर्तृता क्रियानुष्ठातृत्वमभवत् । तथैव विधिसामर्थ्यादिति भावः । अत
एवाह भगवान् जैमिनिः अन्यो वा स्यात्परिक्रिया स्थानात्तदर्थात्मनेपदं
इति । अन्यत्र तदुपलम्भतस्तस्या बुद्धिवृत्तेरुपलम्भात्साक्षित्वेनानुसन्धा-
नादेव कर्तृत्वमभवत् स्वयं क्रियाभोगरहितोऽपि आत्मा बुद्धेः सन्निधाना-
द्रक्तस्फटिकवत्तथा भवतीत्यर्थः । उपमालङ्कारः ॥ १९ ॥

शब्दितामिति । वाक्यलक्षणविदो मीमांसाशास्त्रज्ञाः । यज्ञ कर्मि-
णोयजनव्यापारवन्तः ऋत्विजः । मीमांसादिशास्त्रनिपुणाः । अनूच्यत
इति अनुवाक्या तया अनुवाक्यया । अनूच्यया याज्यया जुहोतीति श्रुतेः
सा च प्रशास्तृपाठ्या तदभावे होतृपाठ्या देवताह्वानी ऋक् । वचे ऋच्
कोऽर्ष्यन्तु वचोः कु घिण्यतोरिति कुत्वं यस्याहोमाद्युपमर्द्दसंग्रामा-

याज्यया यजनकर्मिणोऽत्यजन्
द्रव्यजातमपदिश्य देवताम् ॥ २० ॥
सप्तभेदकरकल्पितस्वरं
साम सामविदसङ्गमुज्जगौ ।
तत्र सूनृतगिरश्च सूरयः
पुण्यमृग्यजुषमध्यगीषत ॥ २१ ॥

मिति न प्रतिषेधः । उच्चैः अनपशब्दं यथा तथा शब्दिता मन्त्रास्तैः घोषैः । यज्ञाशितामित्यर्थं उच्चैः ऋचा क्रियत इति विधानात् । शब्द संशब्दने इति धातोश्चौरादिकात्कर्मणि क्तः । देवतामिन्द्रादिकामपदिश्य द्रव्यजातं पशुपुरोडाशादि हविः समूहं इज्यतेऽनयेति याज्या सा च होतृपाठ्या यागाङ्गसाधनभूता ऋक् याज्यया जुहोतीति श्रुतेः । पूर्ववत् ऋहलोर्ण्यदिति करणे यत् यजयाचरुचप्रवचर्चश्चेति कुत्वप्रतिषेधः । तथा अत्यजन् अयजन्नित्यर्थः । देवतोद्देशेन द्रव्यत्यागो याग इति लक्षणात् । स च त्यागः सामान्यतः आहवनीये जुहोतीति तदा हवनीय इति सामान्यन्यायात् विधानादग्नावेवेति ध्येयम् । द्रव्यत्यागस्याध्वर्युमात्रकर्तृकत्वेऽपि याज्या पुरोऽनुवाक्यद्वारा होतृप्रयोक्तृत्वेऽपि साहित्यादत्यजन्निति बहुत्वव्यपदेशः । तथाच मैत्रावरुणेन पुरोऽनुवाक्यायामनूक्तायां तत्प्रकाशितदेवतोद्देशेनाध्वर्युर्होतृपठितयाज्यान्ते वषट्कारेण सोमादिकं हविरग्नावत्याक्षीदित्यर्थः । स्वभावोक्तिरलङ्कारः ॥ २० ॥

सप्तेति । तत्र क्रतौ । सामानि वेत्तीति सामविदुद्गाता । सप्तभेदं सप्तप्रकारं यथा तथा करेण हस्तेन कल्पिताः सम्पादिताः स्वराः निषादादयः यस्य तत् करविन्यासभेदादिभिर्व्यञ्जित सप्तस्वरमित्यर्थः । निषादर्षभगान्धारषड्जमध्यमधैवताः पञ्चमश्चेत्यमी सप्तैव स्वराः । यद्वा स्वराः क्रुष्टादयः । क्रुष्टः प्रथमो द्वितीयो मन्द्रोऽनीच इत्यादयः । साम इष्टद्रव्यस्तरादिकमसङ्गमस्खलितं उज्जगौ उदगायत् । किञ्च सूनृतगिरः प्रिय

बद्धदर्भमयकाञ्चिदामया
वीक्षितानि यजमानजायया।
शुष्मणि प्रणयनादिसंस्कृते
तैर्हवींषि जुहवाम्बभूविरे॥ २२॥
नाञ्जसा निगदितुं विभक्तिभि

सत्यवाच. । प्रियं सत्यञ्च सूनृतं इत्यमरः। सूरयो विद्वांसो होतृप्रभृत्योऽदयं पुण्यं श्रेयस्करम्। ऋचश्च यजूंषि च तत् ऋग्यजुषमग्निमीळे इषे त्वेत्यादिकम्। द्वन्द्वैकवद्भाव अचतुरेत्यादिना द्वन्द्वे समासान्तनिपात.। अध्यगीषत। इङो लुङि विभाषा लुङ्लृङोरिति गाङादेशः पक्षे कुटादित्वात् सिच. ङित्त्वे घुमेत्यादिना ईत्वम्। अत्र धाम शुद्धेत्यादौ वृत्त्यनुप्रासभेदो द्रष्टव्य॥ २१॥

बद्धेति। बद्धं दर्भमयं दर्भविकारं काञ्चिदाम रशनागुणो यया तया। दामेति डाबुभाभ्यामन्यतरस्यामिति डाप्प्रत्ययः। यजमानो यष्टा। पूङ्यजोः शानन्निति यजेः शानच्प्रत्ययः। तस्य जायया पत्न्या वीक्षितानि दृष्टानि हवींषि आज्यानि पत्न्यवेक्षणं कृतम् पत्न्यवेक्षणसंस्कारविधानात् अर्थप्रधानत्वात् सर्वेषां साज्यादीनां प्राधान्यभावेन वीक्षितत्वव्यपदेशः प्रणयनं नाम गार्हपत्यादुद्धृत्य मन्त्रेणायतने स्थापनं आदिशब्दात्परिस्तरणपरिधानसमार्गादिसंस्कारपक्षः तैः प्रणयनादिभिः संस्कृते आहिताग्निविषये शुष्मणि वह्नौ। वर्हिः शुष्मा कृष्णवर्त्मेत्यमरः। अत्राध्याहवनीये जुहोतीति हूयमाने अध्वर्युः कर्ता। जुहूमात्रव्यापृततया स्रुवाहवनीय प्रधानमिति न्यायवचनात्। तैः ऋत्विग्भिः जुहवाम्बभूविरे। जुहोतेः कर्मणि लिट् भीह्रीभृहुवां श्लुवच्चेति विकल्पादाम्प्रत्ययः। अत्र विषयस्य योग्यत्वाद्युपादानेन निर्णयस्य. वाक्यगुणस्य तदभेदेन निर्दिष्टत्वे अभेदरूपातिशयोक्तिरनुप्रासेन सङ्कर॥ २२॥

नेति। तत्र नादिनु कर्तृष्वपि यष्टकर्मण्यपि। अन्यथानुतस्य सन्दसा-

व्यक्तिभिश्च निखिलाभिरागमे ।
तत्र कर्म्मणि विपर्य्ययेणेनमन्
मन्त्रमूहकुशलाः प्रयोगिणः ॥ २३ ॥
संशयाय दधतोः सरूपतां
दूरभिन्नफलयोः क्रियाम्प्रति ।

यथाविकृतवचनादिभेदेन विपरिणमनमूहः तत्र कुशलाः । प्रयोग एषा-मस्तीति प्रयोगिणः प्रयोक्तार ऋत्विजः आगमे आम्नाये निखिलाभिर्विभ-क्तिभिः प्रथमादिभिः सुब्विभक्तिभिस्तिङ्विभक्तिभिश्च विभक्तिग्रहणं वच-नोपलक्षणम् । व्यक्तिभिर्लिङ्गैश्चाञ्जसा सुखेन निगदितं पठितं न भवत्य-वगुप्तादिति आञ्जसानिगदितम् । अञ्जस उपसङ्ख्यानमिति । अलुक् नञर्थस्य नशब्दस्य सुप्सुपेति समासः । अथवा अञ्जसेति तृतीयान्तप्रति-रूपकमव्ययं तत्त्वार्थे । अञ्जसा तत्त्वतूर्णयोरिति विश्वः । अञ्जसा तत्त्वत इत्यर्थः । अस्मिन् पक्षे नैकपदानियमः । तं मन्त्रम् । कर्म्माङ्गदेवताद्रूप याख्यं विपर्य्ययेणानमन् विपरिणमन्ति स्म विपरिणमितवन्त इत्यर्थः । विपरिपूर्व्वकात् णमतेः लङ् अनमन् नमतेः तत्त्वान्ते लङ् इत्यभ्यास दीर्घो लघोरिति दीर्घः । उपसर्गादसमासेऽपि णोपदेशस्येति णत्वम् । अत्र आञ्जसेति पाठविशेषणगत्या मन्त्रविपरिणमनहेतुत्वात्पदार्थहेतुकं काव्य-लिङ्गम् ॥ २३ ॥

संशयायेति । संशयाय सन्देहोत्पादनाय सरूपतां सादृश्यं दधतो-रुभयत्र रूपसाम्यादयं समासोऽयं वेति संशयं कुर्व्वतोरित्यर्थः । यथेन्द्र-शत्रुरित्यत्रेन्द्रस्य शत्रुः घातयिता हन्तेति षष्ठीतत्पुरुषः उतेन्द्रः शत्रु-र्यस्येति बहुव्रीहिरिति सारूप्यसंशयः तत्रानियमे दोषमाह । क्रिया प्रकृतं कर्म्म तां प्रति तामुद्दिश्येत्यर्थः दूरभिन्नमत्यन्तविलक्षणं फलं ययोर्दूरभिन्नफलयोस्तयोरर्थभेदात्फलभेदः फलभेदं प्रतिपादयतोरि-त्यर्थः यथेन्द्रशत्रुरित्यस्यैव षष्ठी समासस्येत्येतत्समासेन्द्रहन्तृत्वं बहुव्रीहौ

शब्दशासनविदः समासयो
विग्रहं व्यवससुः स्वरेण ते ॥ २४ ॥
लोलहेतिरसनाशतप्रभा
मण्डलेन लसता हसन्निव ।
प्राज्यमाज्यमसकृद्वषट्कृत
न्निर्मलीमसमलीढ पावकः ॥ २५ ॥

तु तस्येन्द्रेण वध्यत्वमिति फलभेद इति भावः। समासयोरेवंविधयोः प्रसक्तयोः सतोरित्यर्थः। भावलक्षणे सप्तमी। शब्दशासनविदः शब्दशास्त्रज्ञाः अन्येषामनधिकारादिति भावः ते महता ऋत्विजः स्वरेण तत्समासविहितस्वरयोगेन विग्रहं वाक्येन समर्थाभिधानं व्यवससुः निश्चिक्युः कस्मिन् स्वरेण समासं तस्मात् विग्रह इति अन्यतरपक्षावधारणं चक्रुः। यथेन्द्रशत्रुरित्यत्रैव पूर्वपदे उदात्तत्वेन बहुव्रीहिस्वरेण बहुव्रीहिसमासनिश्चयः इन्द्रः शत्रुर्यस्येति विग्रहावधारणमित्यर्थः। व्यवपूर्वस्य स्यतेर्लिटि आदेच इत्यात्वे द्विर्वचनादिकार्येभ्योऽभ्यासादेशः। अत्र संशयजनकतत्फलभेदप्रतिपादकपदार्थयोर्विशेषणगत्या सन्दिग्धे न्यायं प्रवर्तते इति न्यायेन विग्रहस्य व्यवसायहेतुत्वात्पदार्थहेतुकं काव्यलिङ्गमलङ्कारः॥ २४॥

लोलेति। लसता प्रकाशमानेन लोलाश्चला हेतयोर्ज्वाला एव रसना रसनाः। अङ्केदर्योर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियामिति रसना रसना जिह्वेति चामरः। तासां शतानि तेषां प्रभामण्डलेन हसन्निवेति रूपकसङ्कीर्णोत्प्रेक्षा। पावकोऽग्निः वषट् कृतं वषट्कारेण दत्तं हुतमित्यर्थः। कृतं लिङ्ग वषट्कृतमित्यमरः। निर्मलीमसमकलिलं शुद्धमित्यर्थः। मलीमसं तु मलिनमित्यमरः। ज्योत्स्ना तमिस्रेत्यादिना मलिनशब्दान्मत्वर्थे इमनिच् प्रत्ययान्तो निपातः। प्राज्यं

व्यक्तिभिश्च निखिलाभिरागमे ।
तत्र कर्म्मणि विपर्य्यणीनमन्
मन्त्रमूहकुशलाः प्रयोगिणः ॥ २३ ॥
संशयाय दधतोः सरूपतां
दूरभिन्नफलयोः क्रियाम्प्रति ।

अथाविकृतवचनादिभेदेन विपरिणमनमूहः तत्र कुशलाः । प्रयोग एषा-मस्तीति प्रयोगिणः प्रयोक्तार ऋत्विजः आगमे आम्नाये निखिलाभिर्विभ-क्तिभिः प्रथमादिभिः सुब्विभक्तिभिस्तिङ्विभक्तिभिश्च विभक्तिग्रहणं वच-नोपलक्षणम् । व्यक्तिभिर्लिङ्गैश्चाञ्जसा सुखेन निगदितं पठितं न भवत्य-नुस्तादिति नाञ्जसानिगदितम् । अञ्जस उपसङ्ख्यानमिति । अलुक् नञर्थस्य नशब्दस्य सुप्सुपेति समास । अथवा अञ्जसेति तृतीयान्तप्रति-रूपकमव्ययं तत्त्वार्थे । अञ्जसा तत्त्वतूर्णयोरिति विश्वः । अञ्जसा तत्त्वत इत्यर्थः । अस्मिन् पक्षे नैकपद्यनियमः । तं मन्त्रम् । कर्म्माङ्गदेवताद्युप-पाद्यं विपर्यणीनमन् विपरिणमन्ति स्म विपरिणामितवन्त इत्यर्थः । विपरिपूर्व्वकात् ण्यन्तात् नमधातो लुङ् चङ्युपधायाः ह्रस्वः सन्वत इत्यभ्यास इत्वं दीर्घो लघोरिति दीर्घः । उपसर्गादसमासेऽपि णोपदेशस्येति णत्वम् । अत्र नाञ्जसेति पाठविशेषणगत्या मन्त्रविपरिणमनहेतुत्वात्पदार्थहेतुकं काव्य-लिङ्गम् ॥ २३ ॥

संशयायेति । संशयाय सन्देहोत्पादनाय सरूपतां सादृश्यं दधतो . रूपसाम्यादयं समासोऽयं वेति संशयं कुर्वतोरित्यर्थः । यथेन्द्र-शत्रुरित्यत्रेन्द्रस्य शत्रुं घातयिता हन्तेति षष्ठीतत्पुरुषः उतेन्द्रः शत्रु-र्यस्येति बहुव्रीहिरिति वाक्यद्वयस्य तत्रानियमे दोषमाह । क्रिया मतं कर्म तां प्रति तामुद्दिश्येत्यर्थः दूरभिन्नमत्यन्तविलक्षणं फलं ययोर्दूरभिन्नफलयोस्तयोरर्थभेदात्कर्म्मणः फलभेदं प्रतिपादयतोरि-त्यर्थः यथेन्द्रशत्रुरित्यत्रैव षष्ठी समासस्येष्टत्वेऽन्यस्येन्द्रहन्तृत्वं बहुव्रीहौ

शब्दशासनविदः समासयो
र्विग्रहं व्यवससुः स्वरेण ते ॥ २४ ॥
लोलहेतिरसनाशतप्रभा
मण्डलेन लसता हसन्निव।
प्राज्यमाज्यमसकृद्वषट्कृत
न्निर्मलीमसमलीढ पावकः ॥ २५ ॥

तु तत्रेन्द्रेण बध्यत्वमिति फलभेद इति भावः। समासयोरेवंविधयोः प्रसक्तयोः सतोरित्यर्थः। भावलक्षणे सप्तमी। शब्दशासनविदः शब्दशास्त्रज्ञाः अन्येषामनधिकारादिति भावः ते प्रकृता ऋत्विजः स्वरेण तत्पुरुषसमास विहितस्वरविशेषेण विग्रहं वाक्येन समर्थाभिधानं व्यवससुः निश्चिक्युः अस्मिन् स्वरेऽयं समासः तस्मादयं विग्रह इति अन्यतरपक्षावधारणं चक्रुः। यथेन्द्रशत्रुरित्यत्रैव पूर्वपदे उदात्तेन बहुव्रीहिस्वरेण बहुव्रीहिसमासनिश्चयः इन्द्रः शत्रुर्यस्येति विग्रहावधारणमित्यर्थः। व्यवपूर्वस्य स्यतेर्लिटि आदेच इत्यात्वे द्विर्वचनादिकार्येऽभ्यासादेशः। अत्र संशयजनकत्वफलभेदप्रतिपादकपदार्थयोर्विशेषणगत्या सन्दिग्धे न्यायं प्रवर्तते इति न्यायेन विग्रहस्य व्यवसायहेतुत्वात्पदार्थहेतुकं काव्यलिङ्गमलङ्कारः॥ २४॥

लोलेति। लसता प्रकाशमानेन लोलाश्चला हेतयो ज्वाला एव रसना रसनाः। वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियामिति रसना रसना जिह्वेति चामरः। तासां शतानि तेषां प्रभामण्डलेन हसन्निवेति रूपकसङ्कीर्णोत्प्रेक्षा। पावकोऽग्निः वषट् कृतं वषट्कारेण त्यक्तं हुतमित्यर्थः। हुतं त्रिषु वषट्कृतमित्यमरः। निर्मलीमसममलिनं शुद्धमित्यर्थः। मलीमसं तु मलिनमित्यमरः। ज्योत्स्ना तमिस्त्रेत्यादिना मलिनशब्दान्मत्वर्थे ईमसच् प्रत्ययान्तो निपातः। प्राज्यं

व्यक्तिभिश्च निखिलाभिरागमे ।
तत्र कर्म्मणि विपर्य्ययेणनमन्
मन्त्रमूहकुशलाः प्रयोगिणः ॥ २३ ॥
संशयाय दधतोः सरूपतां
दूरभिन्नफलयोः क्रियाम्प्रति ।

प्रयादिकृत्वचनादिभेदेन विपरिणमनमूहः तत्र कुशलाः । प्रयोग एषा-
मस्तीति प्रयोगिणः प्रयोक्तार ऋत्विजः आगमे आम्नाये निखिलाभिर्वि-
भक्तिभिः प्रथमादिभिः सुप्तिङ्विभक्तिभिस्तद्विभक्तिभिश्च विभक्तिग्रहणं वच-
नोपलक्षणम् । व्यक्तिभिर्लिङ्गैः साकल्येन सुखेन निगदितं पठितं न प्रत्य-
क्षश्रुत्यादिति साक्षान्निगदितम् । अत्र च समवकृत्वानमिति । अनुक्त-
मज्ञेयस्य मन्त्रस्य सुपूहेति समास । अथवा अक्लेशेति तृतीयान्तप्रति-
रूपकमव्ययं तत्त्वार्थे । अक्लेशा तत्त्वतर्थयोरिति विश्वः । अक्लेशा तत्त्वत
इत्यर्थः । अस्मिन् पक्षे नैकपदानियमः । तं मन्त्रम् । कर्माङ्गदेवताद्य-
भावं विपर्ययेणानमन् विपरिणमन्ति स्म विपरिणमितवन्त इत्यर्थः ।
विपरिपूर्वकात् नमतेः लङि अडभावो लुङ् छन्दस्यपि इत्यभ्यास इति
दीर्घोऽणोऽरिति दीर्घः । उपसर्गादसमासेऽपि णोपदेशस्येति णत्वम् । अत्र
भाक्तेति पाठविशेषणत्वा मन्त्रविपरिणमनहेतुत्वात्पदार्थहेतुकं काव्य-
लिङ्गम् ॥ २३ ॥

संशयायेति । संशयाय सन्देहोत्पादनाय सरूपतां सादृश्यं दधतो
रुभयत्र रूपसाम्यादयं समासोऽयं वेति संशयं कुर्वतोरित्यर्थः । यथेन्द्र-
शत्रुरित्यत्रेन्द्रस्य शत्रुः घातयिता इन्द्रेति षष्ठीतत्पुरुषः उतेन्द्रः शत्रु
र्यस्येति बहुव्रीहिरिति सादृश्यमस्त्य· तत्राभिधये दोषमाह । क्रिया
यज्ञं कर्म वा प्रति तामुद्दिश्येत्यर्थः दूरभिन्नमत्यन्तविलक्षणं फलं
ययोर्दूरभिन्नफलयोस्तयोरर्थभेदात्कर्मणः फलभेदं प्रतिपादयतोरि-
त्यर्थः यथेन्द्रशत्रुरित्यत्रैव षष्ठी समासस्येन्द्रस्य शत्रुत्वं बहुव्रीहौ

शब्दशासनविदः स मासयो
विग्रहं व्यवससुः स्वरेण ते ॥ २४ ॥
लोलहेतिरसनाशतप्रभा
मण्डलेन लसता हसन्निव ।
प्राज्यमाज्यमसकृद्वषट्कृत
न्निर्मलीमसमलीढ पावकः ॥ २५ ॥

तु तस्येन्द्रेण वध्यत्वमिति फलभेद इति भावः । समासयोरेवंविधयोः प्रसक्तयोः सतोरित्यर्थः । भावलक्षणे सप्तमी । शब्दशासनविदः शब्द-शास्त्रज्ञाः अन्येषामनधिकारादिति भावः ते प्रकृता ऋत्विजः स्व-रेण तत्समासविहितस्वरवशेन विग्रहं वाक्येन समर्थाभिधानं व्यवससुः निश्चिक्युः किन्नु स्वरोऽयं समासः तत्रायं विग्रह इति अन्यतरपक्षावधारणं चक्रुः । यथेन्द्रशत्रुरित्यत्रैव पूर्वपदे उदात्त-त्वेन बहुव्रीहिस्वरेण बहुव्रीहिसमासनिश्चयः इन्द्रः शत्रुर्यस्येति विग्र-हावधारणमित्यर्थः । व्यवपूर्वस्य स्यतेर्लिटि आदेच इत्यात्वे द्विर्वच-नादिकार्ये झेर्जुसादेशः । अत्र संशयजनकफलभेदप्रतिपादकपदार्थयो-र्विशेषणगत्या सन्दिग्धे न्यायः प्रवर्त्तते इति न्यायेन विग्रहस्य व्यव-सायहेतुत्वात्पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ २४ ॥

लोलेति । लसता प्रकाशमानेन लोलाश्चला हेतयो ज्वाला एव रस-ना रसनाः । वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियामिति रसना रसना जिह्वेति चामरः । तासां शतानि तेषां प्रभामण्डलेन हस-न्निवेति रूपकसङ्कीर्णोत्प्रेक्षा । पावकोऽग्निः वषट् कृतं वषट्कारेण त्यक्तं हुतमित्यर्थः । हुतं त्रिषु वषट्कृतमित्यमरः । निर्मलीमसम-मलिनं शुद्धमित्यर्थः । मलीमसं तु मलिनमित्यमरः । ज्योत्स्ना तमि-स्रेत्यादिना मलिमसशब्दान्तत्वे इमनिच्प्रत्ययान्तो निपातः । प्राज्यं

व्यक्तिभिश्च निखिलाभिरागमे।
तत्र कर्म्मणि विपर्य्यणीनमन्
मन्त्रमूहकुशला: प्रयोगिणः॥ २३॥
संशयाय दधतोः सरूपतां
दूरभिन्नफलयोः क्रियाम्प्रति।

यथालिङ्गवचनादिभेदेन विपरिणमनमूहः तत्र कुशलाः। प्रयोग एषामस्तीति प्रयोगिणः प्रयोक्तारः ऋत्विजः आगमे आम्नाये निखिलाभिर्विभक्तिभिः प्रथमादिभिः सुब्विभक्तिभिस्तिङ्विभक्तिभिश्च विभक्तिग्रहणं वचनोपलक्षणम्। व्यक्तिर्लिङ्गं साञ्जसा सुखेन निगदितं पठितं न भवत्यकुत्वादिति नाञ्जसानिगदितम्। अञ्जस उपसङ्ख्यानमिति अलुक्। नञर्थस्य नशब्दस्य सुप्सुपेति समासः। अथवा अञ्जसेति तृतीयान्तप्रतिरूपकमव्ययं तत्त्वार्थे। अञ्जसा तत्त्वतूर्णयोरिति विश्वः। अञ्जसा तत्त्वत इत्यर्थः। अस्मिन् पक्षे नैकपद्यनियमः। तं मन्त्रम्। कर्माङ्गदेवतारूपभाव्यं विपर्यणीनमन् विपरिणमन्ति स्म विपरिणमितवन्त इत्यर्थः। विपरिपूर्वकात् णमन्तात् णमधातोः लुङ् सन्वद्भावे सन्यत इत्यभ्यास इत्वे दीर्घो लघोरिति दीर्घः। उपसर्गादसमासेऽपि णोपदेशस्येति णत्वम्। अत्र नाञ्जसेति पादविशेषणगत्या मन्त्रविपरिणमनहेतुत्वात्पदार्थहेतुकं काव्यलिङ्गम्॥ २३॥

संशयायेति। संशयाय सन्देहोत्पादनाय सरूपतां सादृश्यं दधतो, उभयत्र रूपसाम्यादयं सत्योऽयं वेति संशयं कुर्वतोरित्यर्थः। यथेन्द्रशत्रुरित्यत्रेन्द्रस्य शत्रुः शातयिता हन्तेति षष्ठीतत्पुरुषः उतेन्द्रः शत्रुर्यस्येति बहुव्रीहिरिति सारूप्यसंशयः तत्रानियमे दोषमाह। क्रिया प्रकृतं कर्म तां प्रति तामुद्दिश्येत्यर्थः दूरभिन्नमत्यन्तविलक्षणं फलं ययोर्दूरभिन्नफलयोस्तयोरर्थभेदात्कर्मणः फलभेदं प्रतिपादयतोरित्यर्थः यथेन्द्रशत्रुरित्यत्रैव षष्ठीसमासस्वरे इन्द्रहन्तृत्वं बहुव्रीहौ

शब्दशासनविदः स मासयो
विंग्रहं व्यवससुः स्वरेण ते॥ २४॥
लोलहेतिरसनाशतप्रभा
मण्डलेन लसता हसन्निव।
प्राज्यमाज्यमसकृद्वषट्कृतं
निर्मलीमसमलीढ पावकः॥ २५॥

न तु तत्सेन्द्रेण मध्यत्वमिति फलभेद इति भावः। समासयोरेकविधयोः प्रसक्तयोः सतोरित्यर्थः। भावलक्षणे सप्तमी। शब्दशासनविदः शब्द-शास्त्रज्ञाः अन्यथा अनधिकारादिति भावः ते प्रकृता ऋत्विजः स्व-रेण तत्तत्समासविहितस्वररूपेण विग्रहं वाक्येन समर्थाभिधानं व्यवससुः निश्चिक्युः कस्मिन् स्वरेऽयं समासः तत्रायं विग्रह इति अन्यतरपक्षाश्रयणं चक्रुः। यथेन्द्रशत्रुरित्यत्रैव पूर्वपदे उदात्त-त्वेन बहुव्रीहिस्वरेण बहुव्रीहिसमासनिश्चयः इन्द्रः शत्रुर्यस्येति विग्र-हाश्रयणमित्यर्थः। व्यवपूर्वस्य स्यतेर्लिटि आदेच इत्यात्वे द्विर्वच-नादिकार्येऽभेदेनादेशः। अत्र संशयजनकत्वफलभेदप्रतिपादकपदार्थयो-र्विशेषणगत्या सन्दिग्धे न्यायः प्रवर्तते इति न्यायेन विग्रहस्य व्यव-सायहेतुत्वात्पदार्थहेतुकं काव्यलिङ्गमलङ्कारः॥ २४॥

लोलेति। लसता प्रकाशमानेन लोलाश्चला हेतयो ज्वाला एव रस-ना रसनाः। वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियामिति रसना रसना जिह्वेति चामरः। तासां शतानि तेषां प्रभामण्डलेन उप-लक्षितः हसन्निवेत्युत्प्रेक्षा। पावकोऽग्निः असकृत् वषट् कृतं वषट्कारेण प्राज्यं प्रभूतमित्यर्थः। कृतं त्विह वषट्कृतमित्यमरः। निर्मलीमसम-लिनं शुद्धमित्यर्थः। मलीमसं तु मलिनमित्यमरः। अलीढ लेह्यादिना सकृदास्वादनार्थं इत्यनेन प्रत्ययान्तोऽभिमातः।

अत्यशेरत परस्परन्श्रियः
सत्त्रिणां नरपतेश्च सम्पदः ३२ ॥
दक्षिणीयमवगम्य पङ्क्तिशः
पङ्क्तिपावनमथ द्विजव्रजम् ।
दक्षिणः क्षितिपतिर्व्यशिश्रण
द्दक्षिणाः सदसि राजसूयकीः ॥ ३३ ॥
वारिपूर्व्वमखिलासु सत्क्रिया

रप्रयोगविज्ञानानि। तदुक्तं व्यावहार्यत्कर्म्म योऽन्ते समीक्षितेदं करि-ष्यामीति । तथा नरपतेराज्ञः सम्पदः पदार्थसम्पदश्च परस्परं अत्य-शेरत अतिशयितवत्यः उभयेऽप्यतिसम्पन्ना इत्यर्थः ज्ञानद्रव्ये हि क्रिया-साधनं तत्सम्पन्नस्य कुतः क्रियापचार इति भावः। अत्रानपदार्थवा-क्यार्थेषु साधनसम्पत्तिः वाक्यार्थहेतुकत्वाद्वाक्यार्थहेतुकङ्काव्यलिङ्गं तस्य परस्परातिशयक्रिया रूपधर्म्मसाम्यगम्यौपम्यलेशप्रकृतधीसम्पदोचरया तुल्ययोगितया व्यवस्थितेत्यनयोरङ्गाङ्गिभावेन सङ्करः ॥ ३२ ॥

दक्षिणीयमिति । अथानन्तरं दक्षिणः औदार्यवान्। दक्षिणः सरलोदारयोरित्यमरः। क्षितिपतिः राजा। दक्षिणामर्हतीति दक्षिणीयः। दक्षिणीयो दक्षिणार्हः तत्र दाक्षिण्य इत्यपीत्यमरः। कडङ्गरदक्षिणाच्छ चेति छप्रत्ययः तं पङ्क्तेः स्वाधिष्ठितायाः पावनं पावयितारं पङ्क्ति-पावनम्। पावयतेः कर्त्तरि ल्युट् द्विजव्रजं ऋत्विग्वर्गमित्यर्थः. पङ्क्तिशः पङ्क्त्यनुसारेण अधिगम्य प्राप्य सदसि राजसूयकीः। राजसूयकाण्डोक्ता इत्यर्थः। दक्षिणाधनं स्फुटार्थे। राजसूयेन त्व दक्षिणार्थस्य दक्षो-विधानात्। व्यशिश्रणत् विश्राणयति स्म वितीर्णवानित्यर्थः। विश्रा-णनं वितरणं मित्यमरः। श्रण दाने इति धातोर्लुङ्णौ चङ्युपधाया ह्रस्वः। वृत्त्यनुप्रासोऽलङ्कारः॥ ३३ ॥

लब्धशुद्धिषु धनानि बीजवत् ।
भावि बिभ्रति फलं महद्द्विज
क्षेत्रभूमिषु नराधिपोऽवपत् ॥ २४ ॥
किं नु चित्रमधिवेदि भूपतिं
दर्शयन्द्विजगणानपूयत ।
राजतः पुपुविरे निरेनसः
प्राप्य तेऽपि विमलं प्रतिग्रहम् ॥ २५ ॥

वारीति । नराधिपो राजा सत्क्रियाभिरभिषेकसंस्कारैर्लब्धा शुद्धि निर्दोषता याभिस्तासु अखिलासु । द्विजा एव क्षेत्रभूमयः केदारभूमयः तासु : क्षेत्रं मेढ्रे पुरे देहे केदारे योनिभार्ययोरिति वैजयन्ती । भावि भविष्यत् महत्फलं स्वर्गादिकं धान्यादिकं च बिभ्रति बिभ्राणानीत्यर्थः । वा नपुंसकस्येति विकल्पान्नुमागमप्रतिषेधः । धनानि बीजवत् बीजैस्तुल्यं वारिपूर्वं सोदकं दानपूर्वकमवपत् अप्रयान् दत्तवानित्यर्थः । अत्र बीजवत् इत्युपमागमः । तेन तुल्यमिति तुल्यार्थे वतेर्विधानात् तथापि वाप क्रियायोगात् द्विजक्षेत्रेति रूपकसमासोपमितसमासः किन्तु रूपकसाङ्कर्यमुपमा तद्दृष्टान्तत्वादिति सङ्करः ॥ २४ ॥

किमिति । भूपतिरधिवेदि वेद्यां सप्तवेद्यामित्यर्थः । अत्र विभक्त्यर्थेऽव्ययीभावः । द्विजगणान्नृत्विग्गणान् दर्शयन् स्पर्शयन् दक्षिणा प्रतिपद्यैव सदक्षिणान् कुर्वन् प्रतिपादयन्नित्यर्थः । तद्वचने दक्षिणायां प्रतिष्ठितेति स्मृतिदर्शनात् । दश मैदृश्ये इति धातोर्ण्यन्तात् शतृप्रत्ययादेशः । अतएव निष्पाते दक्षिणे चापि मैदृश्ये निपुणेऽपि चेति भट्टः । अपूयत पूतोऽभवदिति । कर्मकर्तरि लङ् । किञ्चिन्मं दाता पूत इति न चित्रमित्यर्थः किन्तु प्रतिग्रहीतारोऽपि पूता इति

स स्वहस्तकृतचिह्नशासनः
पाकशासनसमानशासनः ।
आशशाङ्कतपनार्णवस्थिते
विप्रसादकृत भूयसीर्भुवः ॥ २६ ॥

शुद्धमश्रुतिविरोधि बिभ्रतं
शास्त्रमुज्ज्वलमवर्णसङ्करैः ।

ते द्विजगणा अपि निरेनसो निष्पापात् राजनीरोगाः । पञ्चम्यास्तसिल् । विमलं शुद्धं प्रतिग्रहं प्राप्य पुपुविरे पूतांबभूवुः । विशुद्धात् प्रतिग्रह-द्रव्यमिश्रानादिति भावः । अत्रापि पूङो कर्मकर्त्तरि लिट् । प्रति-ग्रहीतारपि शुद्ध इति विरोधः स एव वाक्यार्थभूतेष्विमलनिरोधहेतु-रिति विरोधवाक्यार्थहेतुककाव्यलिङ्गयोरङ्गाङ्गिभावेन सङ्करः ॥ २५ ॥

स इति । पाको नाम कोऽपि दानवस्तस्य शासनः शासकोऽन्ता पाकशासनः इन्द्रस्तेन समानं शासनं इत्याज्ञा यस्य स इत्यर्थः सराजा स्वहस्तेन कृतं लिखितं चिह्नं स्वनामलेखनादिकाव्ह्वनं येषु तानि शासनानि नियमपत्राणि यस्य सः इत्यस्वहस्तलेखाङ्कित शासनः सन्नित्यर्थः । आशशाङ्कतपनार्णवस्थिते शशाङ्कतपनार्णवानभिव्याप्य आस्तत्त्वमित्यर्थः । अभिविधावाङ् । आङ्मर्यादाभिविध्योरिति विकल्पा-दसमासः । भूयसीर्भुवोदेयभूमीः विप्रसात् विप्राधीनाः । देये त्रा चेति चकारात्सातिप्रत्ययः । अकृत कृतवान् इत्यत्रार्थः । कृञोऽलुङि लङ् च्लेरिति सिचः किल्वात् ह्रस्वादङ्गादिति सकारलोपो गुणाभा-वश्च । पाकशासनसमानशासन इत्यनुप्रासानुप्रासयोः संसृष्टिः ॥ २६ ॥

शुद्धमिति । असौ नृपः शुद्धमाचारपूतम् । अन्यत्र विभक्ति विप-र्यासाभेन दुष्टैरकलङ्कः । श्रुतिविरोधि वेदविरुद्धं न भवतीत्यश्रुति-विरोधि शास्त्रं बिभ्रतं आत्मनि धारयन्तं सकलवेदिकशास्त्राभिज्ञमि-त्यर्थः । नाव्ययात्कृदन्तादिति तुम्प्रतिषेधः । अन्यत्र छन्दो विरोधिभिः

पुस्तकैः सममसौ गणम्मुहु
र्वाच्यमानमशृणोद्द्विजन्मनाम् ॥ ३७ ॥
तत्प्रणीतमनसामुपेयुषा
न्द्रष्टुमाहवनमग्रजन्मनाम् ।
आतिथेयमनिवारितातिथिः
कर्तुमाश्रममगुरुः स नाश्रमत् ॥ ३८ ॥

पुरासादिभिः। वाच्यमानं अन्वयगुणादिक्रमेण प्रस्तूयमानमन्यत्र, वा-च्यमानैर्द्विजगणेन व्याख्यायमानैरित्यर्थः। वचेर्णौरादिकात्कर्मणि लटः शानजादेशः। द्विजन्मनां ब्राह्मणानां गणं समस्तैः पुस्तकैरुपल्ली-क्षितैः अन्यत्र आतिसङ्गर्राङ्कृतमिति विपरिणामः। पुस्तकैः सम' पुस्तकावहरैर्लक्ष्यैः सह अशृणोत् दानकाले प्रत्येकं ब्राह्मणानां गुणान् गोत्रोंश्च श्रुतवानित्यर्थः। मुखस्थविद्यानामपि पुस्तकधारणविलक्षण-त्वेनोक्तमित्यदोषः अन्यत्र पुस्तकैः समं द्विजगणं अशृणोदिति। सम्ब-न्धिभेदे भिन्नयो स्वरूपयोरभेदाध्यवसायमेदे अभेदरूपातिशयोक्तिचमत्का-रियो द्विजानां प्रस्तुतत्वात् पुस्तकानीव द्विजानिति वैधर्म्यौपम्यानोप-मेयभावपर्यवसायिनी श्लेषहेतुर्वक्रोक्तिरलङ्कारः। वक्रार्थे नान्वयो-ऽत्र भवेदतिशयोक्तितः कल्पितौपम्यपर्यवसाना वा वक्रोक्तिरिष्यते इति लक्षणात्। क्वचित् पुस्तकैः समं वाच्यमानमिति योजयित्वा पुस्तकेषु द्विजगणेन। वेदोपाध्यायमानामिति व्याचक्षते। तैः पुस्त-केषु वाचकतयोपन्यासादर्थवद्गुरोः लिट् विशेषणाद्गतार्थत्वेन प्रवृत्तेः पुस्तकानां वाचनकरणत्वात्मना दिग्भ्रंशैर्दध्यर्थंचमत्कारोक्ता वक्रा-रम्भं यदेति एतमादयोदोषाद्रष्टारः इत्युक्तं विस्तरेण॥ ३७॥

तदिति। अनिवारिताः अप्रत्याख्याता अतिथयो येन सः कादम्बरीं मङ्गलार्थांदीनां गर्हणीयक्रमा सदाज्ञा। का कमला व्याहृतारिवि-न्याहवनं यागम्। जुहोतेर्ल्युट्। द्रष्टुमुपेयुषामागतानाम्। अतएव

मृग्यमाणमपि यद् दुरासद्
भूरिसारमुपनीय तत्स्वयम् ।
आसनावसरकाङ्क्षिणोवहि
स्तस्थु रत्नमुपदीकृतं नृपाः ॥ ३९ ॥

एक एव वसु यद्ददौ नृप
स्तत्समापकमतर्क्यत क्रतोः ।
त्यागशालिनि तपःसुते ययुः
सर्वपार्थिवधनान्यपि क्षयम् ॥ ४० ॥

यथोऽभवत्सत्कर्मदर्शनात् हृष्टचित्तानां ब्राह्मणानाम् । कस्मिंश्चित् बाध्यातिथेयमतिथिसत्कारम् । पथ्यतिथीश्वादिभ्यो ढञ्प्रत्ययः । कर्तुं नाशकत् । न श्रान्तः । शम्यते पुषादित्वाल्लुङि च्लेरङादेशः । अत्रा-तिथ्यातिथिसत्कारस्य विशेषणगत्या श्रमनिषेधहेतुत्वात् काव्यलिङ्गं तद-नुप्रासेन संसृज्यते ॥ ३८ ॥

मृग्यमाणमिति । यद्रत्नं मृग्यमाणं अन्विष्यमाणमपि दुरासदं दुर्लभम् । भूरिसारं महासारं उपदीकृतमुपायनीकृतं मनसा यथासङ्कल्पितमित्यर्थः । उपायनमुपग्राह्यमुपहारस्तथोपदेत्यमरः । तद्रत्नं श्रेष्ठवस्तु रत्नं स्वे स्वे भवतीति विश्वः । नृपाः स्वयमुपनीय तस्य राज्ञोऽवसरका-ङ्क्षिणः सेवावसरं प्रतीक्षमाणा बहिरासत स्थिता इत्यौद्धत्यवीति गम्योक्तिः । अत्र रत्नं उपदात्वस्य रोमाञ्चस्य महतीपर्याप्तिरित्यभा-वालङ्कारः ॥३९॥

एक इति । एक एव नृपो यद्वसु धनं ददौ उपायनमिति भावः । तदनन्तरमेव क्रतोः समापकं सम्पूरकं अतर्क्यत दक्षिणादाना दिषु सर्व-क्रतुव्ययपर्याप्ततया तर्कितमित्यर्थः । तपःसुते धर्मपुत्रे त्यागशालिनि सति सर्वपार्थिवधनान्यपि क्षयं व्ययं ययुः । अत्रैव पार्थिवधनस्य

प्रीतिरस्य ददतोऽभवत्तथा
येन तत्प्रियचिकीर्षवो नृपाः ।
स्पर्धितैरधिकमागमन्मुदं
नाधिवेश्म निहितैरुपायनैः ॥ ४१ ॥
यं लघून्यपि लघूकृताचितः
शिष्यभूतमशिषत्स कर्म्माणि ।

अनुष्ठमापकतासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः । तयोश्चाप्रि-
सजातीयसङ्करः ॥ ४० ॥

प्रीतिरिति । ददतो दानं कुर्वतोऽस्य राज्ञस्तथा तेनैव प्रकारेण राज्ञोपायनानां स्पर्धिसानुकरणेनैव प्रीतिरभवदासीत् न तु लोभ-प्रकर्षेणेत्यर्थः । कुतः येन प्रकारेण तस्य राज्ञः प्रियं चिकीर्षवः प्रियं कर्तुमिच्छवः । मधुपिपासुप्रभृतित्वात् द्वितीयासमासः । नृपाः स्पर्धितैः प्रतिपादितैः । स्पर्शनं प्रतिपादनमित्यमरः । उपायनैरुप-हारैरधिकं यथा तथा मुदमागमन्प्रापुः । तथैव प्रभुप्रीतिविशेषैः लोभावनामां सिद्धिनियोगलाभाश्चेति भावः । अधि वेश्म वेश्मनि निहितैरुपायनैर्मुदं नागमन् तथोक्तप्रयोजनासिद्धेरिति भावः । येनैव राज्ञां मोदः स्वस्य च महान् धर्मलाभः तेनोपायनानामर्पितत्वा-देवाद्य राज्ञः प्रीतिरासीत् न लोभ स्पृहाप्रभावादित्यर्थः । अतएव दानकर्तृकयोः प्रकृतयोः प्रीतेः सङ्कुचपरिहारेण दान एव नियम-नात्परिसङ्ख्यालङ्कारः । एतस्या नैकस्य मात्रायितत्वे नियमनं परिसङ्ख्येति लक्षणात् । एतेन सर्वस्व दानं प्रच्छते ध्वनकारेण प्रकृष्टध्वनिः ॥ ४१ ॥

यमिति । लघूकृता अल्पीकृता अर्चिताः प्रभवो येन सः । स राजा शिष्येण तुल्यं शिष्यभूतम् । भूतं प्रकृतौ पिशाचादौ न्याय्ये समानयोरिति विश्वः । लघुपेति निवृत्तसमासः । [illegible]

समुदन्नृपतिभिर्नृपोऽपरै
र्गौरवेण ददृशेतरामसौ ॥ ४२ ॥
आद्यकोलतुलिताम्बुकम्पनैः
कम्पिताम्बुधरनीदृगात्मनि ।
ञाचि रोपितवतामुना मही
राजकाय विषयाविभेजिरे ॥ ४३ ॥

ऽपि अतीयमनुरम्यपादिकर्मणि अयिवत् आत्मापितवान् । कर्त्तरि
कर्मव्यतिहारेति लुङि च्लेरङादेश भास दृश्‌धातो रितोकारः ।
असौ कर्म करोत्वय अपरैरन्यतोऽन्यैर्नृपतिभि समुद् यज्ञोऽसमान इति
साभिप्राय गौरवेण दृष्टेतरा अतिशयेन दृष्ट । दृशे कर्मणि लिट
लिङ्येति तरप्प्रत्यये किमेत्तिङव्ययघादाम्व द्रव्यप्रकर्षे इत्यामुप्रत्यय
तद्धितयाथार्थ वमत्तिरित्यव्ययसंज्ञा । अत्र कर्मकरन्यपदेतरत्वपकर्षक
विशिष्टदर्शनकर्मत्वात्सम्बन्धेऽपि सम्बन्धोक्ते रतिशयोक्ति तया राज्ञो
निरङ्कुशत्वस्य व्यज्यत इत्यलङ्कारेण वस्तुध्वनि ॥ ४२ ॥

आदीति । आद्यकोल आदिवराहः । वराह सूकरोऽघृष्टि कोल
पोत्री किरि किटिरित्यमर । तेन तुलिता बलादौ उद्धृताम
तथापि प्रकम्पने प्रक्षोभकैर्हिरण्याक्षप्रमुखै कम्पिता क्षोभिता म
होम । अनीदृगात्मनि अनेवरूपाया केनाप्यकम्पितायामतुलितायां
धाचि रोपितवता स्थापितवता स्थिरेण रोपणेन स्थिरी कुर्वतेत्यर्थः ।
अमुना राज्ञा राजकाय राज्ञां समूहाय । गोत्रोक्षेत्यादिना वुञ
प्रत्यय । विषयाः देश नीवृज्जनपदो देशविषयौ तूपवर्त्तनमित्यमर ।
विभेजिरे अभ्यायमिति विभक्ता । प्राक विजयोद्धृतान् राज्ञ पुन
पदेषु स्थापयामासेत्यर्थ । अत्रादिवराहोपमहो उद्धृतयानेव धार्द्धमासी
त निरातङ्क स्थापितवानेति उपमानादुपमेयस्य प्रकर्षकथनाद्व्यति
रेकालङ्कार ॥ ४३ ॥

आगताद्व्यवसितेन चेतसा
सत्त्वसम्पदविकारिमानसः।
तत्र नाभवदसौ महाहवे
शात्रवादिव पराङ्मुखोऽर्थिनः॥ ४४॥
नैच्छतार्थिनमवज्ञया मुहु-
र्याचितस्तु न च कालमाक्षिपत्।

आगतादिति। सत्त्वसम्पदा गुणाधिक्येन अविकारिमानसो लोभा-
भिभवाभ्यां अनुपप्लुतचित्त इत्यर्थः। सत्त्वं गुणे पिशाचादौ बले
द्रव्यस्वभावयोरिति विश्वः। असौ राजा तत्र तस्मिन् आ समन्तात्
जुह्वति अस्मिन्नित्याहवो यागः। ऋदोरबिति जुहोतेरप्प्रत्यये गुणा-
वादेशौ। आहूयन्ते अस्मिन् योद्धार इत्याहवो युद्धम्। आङि युद्धे इति
ह्वयतेरप्पूर्वोद्ग्रमश्च सम्प्रसारणम्। आहवः यागयुद्धयोरिति
विश्वः। महांश्चासौ स च महाहवस्तस्मिन्महाहवे व्यवसितेन निश्चि-
तेन यद्वा निश्चितवता। अन्यत्र गत्यर्थाकर्मकेति निश्चित वते-
त्यर्थः। व्यवपूर्वात् स्यतेः अकर्मकत्वादर्थानिश्चिते कर्मकर्तरि क्तः। मति-
हेरविवक्षातः कर्मणोऽकर्मिका क्रियेति वचनात्। चेतसा आगतात्
चेतसा सर्वं निश्चित्यागतादित्यर्थः। अर्थिनो याचकात्। शत्रुरेव शात्रवः।
प्रज्ञादित्वादण्। तस्मादिव पराङ्मुखो नाभवत्। आह-
वेष्वनिवर्तित्वं प्रजानां चैव पालनं शुश्रूषा ब्राह्मणानां च राज्ञां
नैःश्रेयसं परमिति मनुस्मरणात् इति भावः। रथोद्धतैव वृत्तम्॥ ४४॥

नैच्छतेति। स राजा अर्थिनं याचकं सङ्कल्पदा अनादरेण
नैच्छत। तर्हि किं विलम्बितं किं नेत्याह। याचितस्तु प्रार्थित एव कालं
नाक्षिपत् न यापयामास याचकवचनसमकालदाता नेत्याह। अस-
र्थितमर्थितं न ददौ किं तु यथार्थितमिति भावः। इदाने-
र्थिक तर्हि स्याद्दोषेरिति लोभारः तुलादसार्थित ववोधः। तर्हि

नादिताल्पमथ न व्यकत्थय
द्दत्तमिष्टमपि नान्वशेत सः ॥ ४५ ॥
निर्गुणोऽपि विमुखो न भूपते
र्दानशौण्डमनसः पुरोऽभवत् ।
वर्धुकस्य किमपः कृतोन्नते
रम्बुदस्य परिहार्यमूषरम् ॥ ४६ ॥

विकत्थनं किमित्याह । न व्यकत्थयत् आत्मश्लाघां न चकार । कत्थ श्लाघायाम् । किञ्च इष्टं प्रियमपि दत्तं वस्तु नान्वशेत नानुतप्तवान् । दत्त्वानुतापस्यातिमलिनत्वाय हेतुत्वादिति भावः । अत्रार्थिसन्दोहयाद्ञ्चार्थदानादिलक्षणकारणसामग्र्येऽपि विकत्थनादिकार्यानुत्पत्तेर्विशेषोक्तिरलङ्कारः । तत्सामग्र्यां तदनुत्पत्तिर्विशेषोक्तिर्निगद्यते इति लक्षणात् । तथा दातुः सात्त्विकत्वं व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः ॥ ४५ ॥

निर्गुण इति । दानशौण्डमनसो दानशूरचित्तस्य बहुप्रदस्येत्यर्थः । स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे मत्ते शौण्डोत्कटक्षीबा इत्यमरः । भूपतेः पुरोऽग्रे निर्गुणस्तपोविद्यादिगुणहीनोऽपि विमुखो निष्फलो नाभवत् किन्तु पूर्णकाम एवाभवत् भूरिदाने सर्वस्यापि पात्रत्वादिति भावः । अतएव तेनापात्रवर्षदोषोऽपि न कल्प्य इत्याशयेन दृष्टान्तमाह । वर्धुकस्येति । अपो जलानि । न लोकेत्यादिना षष्ठीप्रतिषेधः । वर्धुकस्य वर्षणशीलस्य । लषपतेत्यादिना उकञ्प्रत्यये वर्धूपधगुणः । कृतोन्नतेः कृतोदयस्याम्बुदस्य अम्बुदेनेत्यर्थः । कृत्यानां कर्तरि वेति षष्ठी । स्यादूषः क्षारमृत्तिकेत्यमरः । तद्वत्क्षेत्रमूषरम् । ऊषवानूषरो द्वावप्यन्यलिङ्गौ स्थलं स्थलीत्यमरः । ऊषसुषिमुष्कमधो र इति रप्रत्ययः । परिहार्यं त्याज्यं किं नेत्यर्थः । अत्र पर्जन्यभूपालयोर्वाक्यभेदेन बिम्बप्रतिबिम्बतया समानधर्माभिधानात् दृष्टान्तालङ्कारः ॥ ४६ ॥

प्रेम तस्य न गुणेषु नाधिकं
न स्म वेद न गुणान्तरञ्च सः ।
दित्सया तदपि पार्थिवोऽर्थिनं
गुण्यगुण्य इति न व्यजीगणत् ॥ ४७ ॥
दर्शनानुपदमेव कामतः
स्वं वनीयकजनेऽधिगच्छति ।
प्रार्थनार्थरहितं तदाभव

प्रेमेति । तस्य राज्ञो गुणेषु अधिकं प्रेम नेति न किन्तु अस्त्ये वेत्यर्थः । राजा गुणान्तरं गुणविशेषं न वेद न वेत्तीति न च किन्तु वेदैवेत्यर्थः । लट् स्मे इति भूतार्थे लट् विदो लटो वेति णला देशः संभाव्यनिषेधनिवर्त्तने द्वौ प्रतिषेधौ इति वामनः । संभावित-योरविमर्शादेवागुणप्रीतिगुणाज्ञानयोर्निषेध इति भावः । तदपि तथापि । पृथिव्या ईश्वरः पार्थिवः । सर्वभूमिपृथिवीभ्यामणञाविति अञ् प्रत्ययः । दित्सया दातुमिच्छया सनन्तात् दानकौतुकेनेत्यर्थः । सनि मीमेत्यादिना इसादेश अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः । अर्थिनं याचकं गुणी गुणवान् अगुणो वायं गुणवानिति न व्यजीगणत् न गणयति स्म । गुणप्रियोऽपि गुणज्ञोऽपि दानशौण्डोऽर्थितया गुणान् न गणयामासे-त्यर्थः । गणेर्णौ चङि ई च गण इत्यभ्यासस्य विकल्पादीकारः । अत्र गुणप्रियत्वगुणज्ञत्व रूपकारणसामग्र्येऽपि गुणागुणविमर्शरूपका-र्यानुत्पत्तेः दित्सयेत्युक्त निमित्ता विशेषोक्तिरलङ्कारः ॥ ४७ ॥

दर्शनेति । वनीयकजने अर्थिजने । दर्शनानुपदं राजविलोकनान-न्तरमेव प्रार्थनासकृत्येत्यर्थः । वनीयको याचनको मार्गणो याचकार्थिनौ इत्यमरः । कामतो यथेच्छं स्वं धनमधिगच्छति लभमाने सति । तदा दीयतामिति वचो दीयतामित्येतत्पदं प्रार्थनावाच्या भग्नं दीयतामिति

शौरिरित्यभिनयादिवोच्चकैः ।
यूपरूपकमनीनमद्भुजं
भूचषालतुलिताङ्गुलीयकम् ॥ ५२ ॥
इत्थमत्र विततक्रमे क्रतौ
वीक्ष्य धर्ममथ धर्मजन्मना ।
अर्घदानमनु चोदितोवचः
सभ्यमभ्यधित शन्तनोः सुतः ॥ ५३ ॥
आत्मनैव गुणदोषकोविदः

प्रतिक्षेपः । एष शौरिरेक एवेत्यभिनयादिव तदङ्गुलिचेष्टां कृतेनेत्युत्प्रेक्षा । अङ्गुल्यभिनयो वर्णाविन्यास इत्यमरः । भूरेव यज्ञभूमिः । चषालेन यूपकटकेन । चषालो यूपकटक इत्यमरः । तेन तुलितं समीकृतमित्यर्थः । तुलयतेस्तत्करोतीत्यर्थे ण्यन्तात्कर्मणि क्तः । तदङ्गुलीयकमूर्मिका यस्य तं अङ्गुलीयकोपमानचषालमित्यर्थः । अङ्गुलीयकमूर्मिकेत्यमरः । जिह्वामूलाङ्गुलेश्छ इति भावे छप्रत्ययः । उच्चैरुन्नतं यूपं पशुबन्धनदारुविशेषो रूपकं स्वरूपं यस्य तं भुजं अनीनमत् उन्नमितवती । नमेर्णौ चङि सन्वत्कार्यम् । अत्र सापेक्षत्वादुपमोत्प्रेक्षयोः सङ्करः ॥ ५२ ॥

इत्थमिति । इत्थमत्र क्रतौ विततक्रमे विस्तृतानुष्ठाने सति अथानन्तरं धर्मात्जन्म यस्य तेन धर्मजन्मना धर्मात्मजेन । जन्माद्युत्तरपदो बहुव्रीहिर्व्यधिकरण इति वामनः । धर्मं वीक्ष्य धर्मशास्त्रमनुसृत्येत्यर्थः

किं न वेत्सि कारणीयवस्तुषु ।
यत्तथापि न गुरून् न पृच्छसि
त्वत्क्रमोऽयमिति तव कारणम् ॥ ५४ ॥
स्नातकङ्गुरुमभीष्टमृत्विजं
संयुजा च सह मेदिनीपतिम् ।
अर्घभाजइति कीर्त्तयन्ति षट्
ते च ते युगपदागताः सदः ॥ ५५ ॥

अथासर्गसमाप्तेः भीष्मवचः प्रपञ्चमेव सकलं दर्शयति । स्नातकेति । तत्राकनोवद्धमानकरणात् प्रीतस्त्वमभवान् भीष्मो राजानं तावत् उक्ता-र्धमेकेनोपश्लोकयति । वेत्तीति विदो ज्ञाता । इगुपधलक्षणः कप्रत्ययः । कार्येविद्यास्थानस्य विदः । कोविदः गुणदोषयोः कोविदो विवेक्ता । कारणीयवस्तुषु कर्तव्यार्थेषु स्वात्मनैव स्वयमेव परोपदेशानपेक्षयैवेत्यर्थः । प्रकृत्यादित्वात् तृतीया । किन्तु वेत्सि सर्वं जानासीत्यर्थः तथापि त्वं ज्ञातापि गुरून् पृच्छसीति न किन्तु पृच्छस्येवेति यत् । मानपरत्वं न पृच्छसीति वाक्यार्थे नञ्द्वयम् । तत्र गुर्वनुयोगे त्वयं क्रम इति न्यायः सदाचारपरिपाटीत्येतदेव कारणं न त्वज्ञानमित्यर्थः । अत्र कर्त्तं-व्यार्थे प्रश्नस्याज्ञानहेतुकत्व सारस्येनापरहेतुकत्वे निबन्धनात्पूर्वोक्त-वस्त्वपरिसङ्ख्यालम् ॥ ५४ ॥

एवं राजानं उपश्लोक्य प्रश्नस्योत्तरमाह स्नातकमिति । स्नातको-ऽध्ययनसमाप्तिपूर्वकं गुरुं पित्रादिकं अभीष्टमित्यनुमतमृत्विजं याजकं संयुज्यत इति संयुक् सम्बन्धी जामाता तेन सह मेदिनीपतिं राजानं च तं च मेदिनीपतिं चेत्यर्थः । षट् षडेतान् अर्घभाजः पूजार्हा इति । इति शब्देनाभिहितत्वात् कर्मण्यपि द्वितीया । यथाह वामनः निपाते-नाभिहिते कर्मणि न कर्मविभक्तिः परिगणनस्य प्रायिकत्वादिति ॥

शोभयन्ति परितः प्रतापिनो
मन्त्रशक्तिविनिवारितापदः ।
त्वन्मखम्मुखभुवः स्वयम्भुवो
भूभुजश्च परलोकजिष्णवः ॥ ५६ ॥

आभजन्ति गुणिनः पृथक्पृथक्
पार्थ सत्कृतिमकृत्रिमाममी
एकएव गुणवत्तमोऽथ वा

कीर्त्तयन्ति कथयन्ति हृष्टा इति शेषः । न च ते दूरस्थाः । ते च यदपि ते तव सदः सभां युगपदागताः प्राप्ताः । अत्र स्नातकादीनां प्रकृतानामेवार्थभाक्त्वसाधर्म्याद्दीपकापरनामतुल्ययोगिताभेदः ॥ ५५ ॥

शोभयन्तीति । किञ्च प्रतापयितुं शीलं येषां ते प्रतापिनः सन्तापकाः । ताच्छील्ये णिनिः । अन्यत्र तेजस्विनः । स प्रतापः प्रभावश्च यत्तेजः कोषदण्डजमित्यमरः । अतएव तन्नुनाविति द्वन्द्वः प्रत्ययः । मन्त्रशक्त्या वेदसंहितया अन्यत्र विचारसामर्थ्येन विनिवारिताः आपदो दैवमानुषविपत्तयो यैस्ते । वेदभेदे गुप्तवादे मन्त्र इत्यमरः । परलोकस्य लोकान्तरस्य शत्रुजनस्य च जिष्णवो जयशीलाः । स्वयं भुवो ब्रह्मणो मुखभुवो मुखजाता ब्राह्मणाः । ब्राह्मणोऽस्य मुखमासीदिति श्रुतेः । भूभुजो राजानश्च । त्वन्मखं तव क्रतुं परितः शोभयन्ति परिष्कुर्वन्ति सर्वेऽप्यागत्य वसन्तीत्यर्थः । अत्र राज्ञां ब्राह्मणानां च प्रकृतानामेव प्रतापादिसाधर्म्यौपम्यगमनात्तुल्ययोगिताभेदः साधर्म्यं च श्लेषनिबन्धनमिति सङ्करः ॥ ५६ ॥

आभजन्तीति । हे पार्थ ! पृथापुत्र ! तस्येदमित्यण् सामान्यस्य विशेषपर्यवसाननियमादपत्यार्थलाभः अन्यथा स्त्रीभ्यो ढगिति ढक् स्यात् । गुणिनो गुणवन्तः अमी-पूर्वश्लोकद्वयोक्ताः स्नातकादयः पृथक् पृथक्

पूज्य इत्ययमपीष्यते विधिः ॥ ५७ ॥
अत्र चैष सकलेऽपि भाति मा
म्प्रत्यशेषगुणबन्धुरर्हति ।
भूमिदेवनरदेवसङ्गमे
पूर्व्वदेवरिपुरर्हणां हरिः ॥ ५८ ॥
सर्व्वमात्रमवदीधरद्भवान्
मैनमानभितदैत्यदानवम् ।

प्रत्येकमञ्जलिमामकपटां सत्कृतिं सत्कारं आभजन्ति अर्हन्ति । सर्वेषां प्रत्येकं पूजा कार्य्येत्यर्थः । अथ स्वाभिमतं पक्षान्तरमाह । अथवेति । अथ वा गुणवत्तमोऽतिगुणवानेक एव पूज्य इत्ययमपि विधिः शास्त्रमनुष्ठानं वेष्यते इष्टैरिति शेषः । अत्र स्नातकादीनां पूज्यत्वे गुणोऽविशेषणगत्या हेतुरिति काव्यलिङ्गभेदः । तदपेक्षया गुणवत्तमत्वमेकस्यैव पूज्यत्वे तत्रैव हेतुरिति काव्यलिङ्गान्तरमिति सजातीयसङ्करः ॥ ५७ ॥

अत्र कस्तथा सर्वगुणाधारः पुमानस्तीत्याकाङ्क्षायां कोऽन्यो हरिं विनेत्याह । अत्रेति । अत्रास्मिन् कालेऽपि भूमिदेवा ब्राह्मणाः नरदेवा राजानस्तेषां सङ्गमे ब्राह्मणक्षत्रियसमवाये इत्यर्थः । अशेष गुणानां बन्धुः सुहृत्सर्वगुणाश्रय इत्यर्थः । असाधारणगुणाश्रयमाह । पूर्वेति पूर्वदेवाः सुरद्विषस्तेषां रिपुर्हन्ता एषः हरिः कृष्णः अर्हणां पूजां अर्हति प्राप्नोतीति मामधिकृत्य भाति मम प्रतिभातीत्यर्थः अन्ये तु नार्हन्तीत्यर्थापि सिद्धमिति भावः । अत्र तत्रान्येषु च प्रसक्तायां पूजायां हरावेव नियमात्परिसङ्ख्यालङ्कारः । एकस्य वस्तुनः प्राप्तानेकत्रै-कथा यदा । एकत्र नियमः सा हि परिसङ्ख्या निगद्यत इति लक्षणात् ॥ ५८ ॥

अंशएष जनतातिवर्त्तिनो
वेधसः प्रतिजनङ्कृतस्थितेः ॥ ५९ ॥
ध्येयमेकमपथेस्थितन्धियः
स्तुत्यमुत्तममतीतवाक्पथम् ।
आमनन्ति यमुपास्यमादरा
द्दूरवर्त्तिनमतीव योगिनः ॥ ६० ॥

ननु तस्मिन् ब्राह्मणक्षत्रियसमूहे कथमस्यैव पूज्यत्वमित्याशङ्क्य सर्वो-त्तमत्वादित्याशयेनाऽसर्गसमाप्तेरेनं स्तौति । मर्त्येत्यादि । आनमिताः प्रह्वीकृताः दैत्याः दितिसुताः दानवाः दनुसुताश्च येन तमेनं हरिं भवान् मर्त्यमात्रं मनुष्यमात्रं माऽवदीधरत् न जानीयात् । एवे प्रथम इति प्रथमपुरुषः । कुतः एषः कृष्णो जनतातिवर्त्तिनः सर्वलो-कातीतस्य प्रतिजनं कृतस्थितेश्च सर्वभूतान्तर्यामिण इत्यर्थः वेधसः परमात्मनोऽशः कला अतो न मर्त्त्यमात्रमित्यर्थः । अत्रापि वाक्य हेतुकं काव्यलिङ्गम् ॥ ५९ ॥

पुनरप्यमानुषत्वमेव व्यनक्ति । ध्येयमिति । योगिनो नारदादयः । एकमद्वितीयं उत्तमं सर्वोत्तमं यमेनं ध्येयं ध्यातव्यम् । एकार्थगो-चरात्मधारणं ध्यानमर्हमित्यर्थः । तथापि धियो ज्ञानस्यापथे-ऽमार्गे स्थितं तदगोचरमित्यर्थः । पथाविभाषेति समासान्त अपथं नपुंसकमिति नपुंसकम् । आमनन्ति कथयन्ति । यो पुंस्त्वादिनाम्नाया-दोर्भिवादेन । स्तुत्यं स्तोतुमर्हम् । तथापि अतीतो वाक्पथो येन तं अवाङ्मनसगोचरमित्यर्थः । यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सहे-त्यश्रुतेः । आमनन्ति आदरादास्थया उपास्यं सेव्यम् । तथापि अतो वीतदूरम् । अतीवेति निपातसमुदायोऽत्यन्तार्थेऽव्ययम् । दूरवर्त्तिनं आमनन्ति यमेनमचिन्त्यरूपमामनन्ति तमेनं मर्त्त्यमात्रं माऽवधार

पद्मभूरिति सृजन् जगद्रजः
सत्त्वमच्युत इति स्थितिं नयन् ।
संहरन् हर इति श्रितस्तम-
स्त्रैधमेष भजति त्रिभिर्गुणैः ॥ ६१ ॥

सर्ववेदिनमनादिमास्थित-
न्देहिनामनुजिघृक्षया वपुः ।
क्लेशकर्म्मफलभोगवर्जित-
म्पुंविशेषममुमीश्वरं विदुः ॥ ६२ ॥

वेदेति पूर्ववदन्वयः अवाङ्मनसगोचरत्वदूरवर्त्तित्वानां ध्येयत्वस्तु-त्यत्वोपास्यत्वैः सह विरोधस्य हरेरचिन्त्यमहिमत्वेन समाधानाद्विरो-धाभासोऽलङ्कारः ॥ ६० ॥

ननु हरिहरहिरण्यगर्भादयस्त्रयोऽप्येते सर्वोत्तममहिमानः स्वन्येन न जानीमः इत्यत आह । पद्मभूरिति । एष हरिः रजः रजोगुणं श्रितः जगत् सृजन् पद्मभूर्ब्रह्मेति सत्त्वं सत्त्वं गुणं श्रितः जगत् स्थितिं नयन् स्थापयन् अच्युतो विष्णुरिति । तमस्तमोगुणं श्रितः जगत् संहरन् हर इति त्रिभिर्गुणैः सत्त्वरजस्तमोभिस्त्रैधं त्रैविध्यं भजति । द्वित्र्यो-श्च धमुञिति विधार्थे धमुञ्प्रत्ययः । अत एव गुणभिन्नात्मास्त्रिलोऽपि मूर्त्तय इत्ययमेव सर्वोपास्य इति भावः । अत्र सत्त्वादिगुणयोगस्य स्रष्ट्रादिगुणयोगस्य च विशेषणगत्या त्रैविध्यहेतुत्वात् पदार्थहेतुकं काव्यलिङ्गम् ॥ ६१ ॥

तर्हि कीदृगस्य स्वरूपं यतो यो मायोपाधिक इत्यपेक्षायामुभयं निरूपयन्नाह । सर्वेति । अयं अमुं सर्ववेदिनं सर्वज्ञमित्यर्थः । स्व-स्यानादिमादिरहितं अनादिनिधनमित्यर्थः । तथापि देहिनां प्रा-णिनां अनुजिघृक्षया अनुग्रहीतुमिच्छया वपुराश्रितं तत्त्वार्थमित्यर्थः

प्रत्ययानिव न जातु कर्म्मणि ।
धातवः सृजतिसंहृशास्तयः
स्तौतिरत्र विपरीतकारकः ॥ ६६ ॥
पूर्व्वमेष किल सृष्टवानपः
स्तासु वीर्य्यमनिवार्य्यमादधौ ।

सृज विसर्गे हृञ् हरणे सम्पूर्वोऽयं शासु अनुशिष्टौ इतेष्वते तथो-क्तार्थः इक्श्तिपौ धातुनिर्देशे इतिवचनादेवं निर्देशः । धातवो भुवादयो धातव इत्यन्वर्थाः शब्दविशेषाः । इत्थम्भूते भ-गवति विषये केवलमन्ययोगव्यवच्छिन्नं यथा तथा कर्तृवाचिनः कर्तृकारकवाचकान् दधति । तदन्ता एव भवन्तीत्यर्थः । जातु कदा-चित् कर्म्मणि प्रत्ययान् कर्म्मार्थे विहितान् यगादीन् न दधति न तद-न्ता भवन्तीत्यर्थः । सर्व्वकर्तृत्वान्नियन्तृत्वाच्च सृजति स्रष्टा संहरति हर्त्ता शास्तीति शासितेत्यादिभिः कर्तृत्वेन निर्दिश्यते न कदाचित् सृज्यते संह्रियते शिष्यते इत्यादिभिः कर्म्मत्वेन अनादिनिधनत्वाद-नियम्यत्वाच्चेति भावः । किन्तु अत्र भगवति स्तौतिः । ष्टुञ् स्तुताविति धातुः । विपरीतं कारकं यस्य सः विपरीतकारकः स्तूयते स्तुत्य इत्यादिकर्म्मप्रत्ययान्त एव न तु कदाचित् स्तौति स्तोता इत्यादिक-र्तृप्रत्ययान्तः । सकललोकस्तुत्यस्य तस्य स्तुत्यान्तराभावादित्यर्थः । अत्र शब्दानां कर्म्मकर्तृप्रत्ययविधिनिषेधद्वारा विभक्त्यन्तरेण सर्व्वकर्तृत्व-सर्व्वोपास्यत्वादि वस्त्वर्थबोधपरत्वाच्छ्लेषप्राप्तोगुणः । अतः संकल-द्रूपत्वं शब्दानां भोक्तृत्वस्य इति वचनात् । अत्र भगवतः स्रष्टृत्वा-दिकर्तृकर्म्मत्वोभयप्राप्तावेकस्यैव नियमात्परिसङ्ख्या । तत्र जातु कर्म्म-णीति शब्दादेव कर्म्मत्व निषेधादितरनिवृत्तिः शब्दात् स्तुतौ कर्तृत्व-निवृत्तिरार्थीति भेद इत्यसंसर्गः अनया च भगवतः पुरुषान्तराधिक्य-प्रतीतेर्व्यतिरेकश्च प्रतीयत इत्यलङ्कारेणालङ्कारध्वनिः ॥ ६६ ॥

तच्च कारणमभूद्धिरण्मयं
ब्रह्मणोऽसृजदसाविदं जगत् ॥ ६७ ॥
मत्कुणाविव पुरा परिप्लवौ
सिन्धुनाथशयने निषेदुषः ।
गच्छतः स्म मधुकैटभौ विभो
र्यस्य नैद्रसुखविघ्नतां क्षणम् ॥ ६८ ॥

पूर्वमिति । एष हरिः पूर्वं प्रथममपः सृष्टवान् । किंविशिष्टं तासु अनिवार्यं वीर्यं रेतः । शुक्रं तेजोरेतसी च बीजं वीर्येन्द्रियाणि चेत्यमरः । आदधावाहितवान् तद्वीर्यन्तु हिरण्मयं सुवर्णस्य विकारः हिरण्मयम् । दाण्डिनायनेत्यादिना निपातः ब्रह्मणश्चतुर्मुखस्य कारणमभूत् । ब्राह्ममण्डं जातमित्यर्थः । असौ तदुत्पन्नो ब्रह्मा ब्रह्माण्डमिदं जगदसृजत् सर्वस्यापि प्रपञ्चस्यायमेव मूलकारणमिति भावः । अत्र मनुः । अप एव ससर्जादौ तासु बीजमवासृजत् । तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् । तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामह इति । अत्र वीर्यमनिवार्यमिति वृत्त्यनुप्रासः ॥ ६७ ॥

अथैनं त्रिभिर्विशिनष्टि । मत्कुणाविवेत्यादिना । पुरा पूर्वं परिप्लवौ चञ्चलौ सङ्कुचितगात्रवन्तावित्यर्थः । चञ्चलं तरलं चैव परिप्लवपरिप्लवे इत्यमरः । मधुकैटभाख्यासुरविशेषौ मत्कुणौ सुप्तस्य रक्तपायिनौ मञ्चोद्भवौ कीटविशेषौ ताविवेत्युपमा । सिन्धुनाथः समुद्रः स एव शयनं तत्र निषेदुषो निषण्णस्य समुद्रशायिन इत्यर्थः । भाषायां सदवसश्रुव इति लिटः क्वसुरादेशः । विभोः प्रभोः यस्य हरेः क्षणं निद्रायाः सम्बन्धिनः आगतं वा नैद्रं यत्सुखं तस्य विघ्नतां विघातं कर्त्तुं गच्छतः स्म गतौ तादृशावपि महान्तौ हरौ मत्कुणाविव क्षणमात्रेण प्रनष्टाविति भगवतः प्रभावातिशयोक्तिः । एषां त्रयाणां पूर्वेणान्वयः ॥ ६८ ॥

श्रौतमार्गसुखगानकोविद-
ब्रह्मषट्चरणगर्भमुज्ज्वलम् ।
श्रीमुखेन्दुसविधेऽपि शोभते
यस्य नाभिसरसीसरोरुहम् ॥ ६९ ॥

सत्यवृत्तमपि मायिनञ्जग-
द्वृद्धमप्युचितनिद्रमर्भकम् ।
जन्म बिभ्रतमजन्नवम्बुधा
यम्पुराणपुरुषम्प्रचक्षते ॥ ७० ॥

श्रौतेति । श्रौतमार्गस्य सुखं सुखकरं यद्गानं तस्य कोविदोऽभिज्ञः । कोविदो व्याख्यातः । स चासौ ब्रह्मा च स एव षट्चरणः स गर्भे यस्य तत् उज्ज्वलं निर्मलम् । यस्य हरेर्नाभिरेव सरसी सरः कासारः । कासारः सरसी सर इत्यमरः । तस्यां सरोरुहं पद्मं श्रियो मुखमेवेन्दुस्तस्य सन्निधौ समीपेऽपि शोभत इति विरोधः । स च मुखस्येन्दुत्वरूपणायत्त इत्यनयोरङ्गाङ्गिभावेन सङ्करः ॥ ६९ ॥

सत्येति । यं हरिं सत्यवृत्तं अकपटचरितं अपि मायिनं मायाविनं कपटवन्तमिति विरोधः । माया नाम शक्तिः तद्वन्तमित्यविरोधः । व्रीह्यादित्वादिनिप्रत्ययः । जगद्वृद्धं सर्वलोकपितामहत्वात् स्थविरमपि । प्रवयाः स्थविरो वृद्ध इत्यमरः । उचिता निद्रा यस्य तमुचितनिद्रं अर्भकं डिम्भम् । वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं समया पराभीतागमवचनादिति भावः । पोतः पाकोऽर्भको डिम्भ इत्यमरः । न जायत इत्यजो जन्मरहितः । अन्येभ्योऽपि दृश्यते इति डप्रत्ययः । तमपि जन्म बिभ्रतं कारणवशात् कृष्णादिजन्मभाजमित्यर्थः । नवं दृश्यमानत्वादभिनवं तथापि पुराणं प्राचीनमनादिं च पुरुषं प्रचक्षते बुधाः । इति साम्यं सर्वत्र सङ्गच्छते । सर्वेऽपि

स्कन्धधूननविसारिकेसर-
क्षिप्तसागरमहाप्लवामयम् ।
उद्धृतामिव मुहूर्त्तमैक्षत
स्थूलनासिकवपुर्वसुन्धराम् ॥ ७१ ॥

दिव्यकेसरिवपुः सुरद्विषो
नैव लब्धप्रशमामायुधैरपि ।
दुर्निवारणकण्डु कोमलै-
र्वक्ष एष निरदारयन्नखैः ॥ ७२ ॥

वारिधेरिव कराग्रवीचिभि –

विरोधाद्धरेरचिन्त्यमहिमत्वेनाभासः इति विरोधाभासचतुष्टयसं-सृष्टिः ॥ ७० ॥

अथ षोडशभिरवतारान् वर्णयिष्यन् वराहावतारं तावद्द्वयेनाह । स्कन्धेति । स्थूलनासिकवपुर्वराहमूर्त्तिरयं हरिः । स्कन्धस्य कन्धरायाः धूननेन कम्पनेन विसारिभिर्विसर्पिभिः केसरैः सटाभिः क्षिप्तोऽव-कीर्णः सागरस्य महाप्लवो महापूरं यया तां अनायासेन प्रकाशिता-मित्यर्थः । वसुन्धरां भुवं मुहूर्त्तं क्षणमात्रम् । मुहूर्त्तमल्पकालेऽपीति यादवः । उद्धृतां अगाधत्वात् सागरादुत्क्षिप्तामिव ऐक्षत प्रेक्षितवान् । वस्तूत्प्रेक्षा । ईक्षतेर्लङि अजादीनामाटश्चेति वृद्धिः ॥ ७१ ॥

द्वाभ्यां नृसिंहावतारमाह । दिव्येति । दिव्यकेसरिवपुर्दिव्यसिंह-मूर्त्तिः । हरेरायुधैश्चक्रादिभिरपि नैव लब्धप्रशममप्रशान्तिं दुर्निवारां दुर्जेयां रणकण्डूं यस्य तत् रणव्यसनीत्यर्थः । गोस्त्रियोरुपसर्जनस्येति ह्रस्वः । सुरद्विषो हिरण्यकशिपोर्वक्षः कोमलैर्नखैः निरदारयत् अभि-नत् । वज्राद्यभेद्यस्य कोमलनखविदारणं असम्भवादिति विरो-धाभासोऽलङ्कारः ॥ ७२ ॥

दिङ्मतङ्गजमुखान्यभिघ्नतः ।
यस्य चारुनखद्युतयः स्फुर-
न्मौक्तिकप्रकरगर्भतां दधुः ॥७३॥ युग्मकम् ॥

दीप्तिनिर्जितविरोचनादयं
द्रागविरोचनसुतादभीप्सतः ।
आत्मभूरवरजाखिलप्रजः
स्वम्पतेरवरजत्वमाययौ ॥ ७४ ॥

वारिधेरिति । कराग्राणि दीर्घय इवेतदुपमितसमासः । वारिधे-
रिवेति विग्रहात् । तानि करायतैर्विभिर्दिगन्तविततामिरिति भावः ।
अतएव दिङ्मतङ्गजानां मुखान्यभिघ्नतोऽयतोयातिरेकात् मग्नतोयस्य
सिन्धुमूर्तेर्हरेर्वारिधेरिव चारुनखाः शुक्तय इव । पूर्ववदुपमितसमासः ।
स्फुरन्मौक्तिकप्रकरो दिग्गजकुम्भसम्भूतमुक्ता मातोगर्भेऽन्तर्गतो यासां तासां
भावस्तत्तां तां दधुः एव निरदारयदिति पूर्वेणान्वयः । एतेन सरस-
त्यिक्षोभस्य महाग्रहेऽपि न यथोक्तमिति ध्वन्यते इति वस्तुना वस्तु-
ध्वनि रुपमालङ्कारः ॥७३॥

अथ चतुर्भिर्वामनावतारमाह । दीप्तीत्यादि । आत्मना भवतीति
आत्मभूः स्वयम्भूरपि । अवरजा अवमजा अखिलाः प्रजा यस्य यस्य
सोऽपि सर्वश्रेष्ठोऽप्ययं । अयं हरिः दीप्तिनिर्जितविरोचनात् ज्योति-
निर्जितमार्तण्डात् । विरोचन प्रह्लादपुत्रः । विरोचनोऽर्के दहने
चन्द्रे प्रह्लादनन्दने इत्युभयत्रापि विश्वः । तस्य सुताद्बलेर्भुव क्ष्मी
इव प्राप्तुमिच्छतोऽभ्याकाङ्क्षितुमिच्छत । शकारादागमेऽभेद मस्तारेदः ।
स्वम्पतेरवरजत्वमनुजत्वं ययौ । बलिभ्य उपार्जयितेति । भोजार्थेप
कारिणः किमु कर्मणीति भावः । अत्रात्मभूरवरजत्वमाप्तवान्
विरोधो भगवत्प्रभावादाभासीकृत इति विरोधाभासोऽलङ्कारः ॥७४॥

किङ्क्रमिष्यति किलैष वामनो
यावदित्यमहसन्न दानवाः ।
तावदस्य न ममौ नभस्तले
लङ्घितार्कशशिमण्डलक्रमः ॥ ७५ ॥

गच्छतापि गगनाग्रमुच्चकै-
र्यस्य भूधरगरीयसाङ्घ्रिणा ।
क्रान्तकन्धर इवाबलो बलिः
स्वर्गभर्त्तुरगमत् सुबन्धताम् ॥ ७६ ॥

क्रामतोऽस्य ददृशुर्दिवौकसो

किञ्चिदिति । एष वामनः खर्वः । खर्वो ह्रस्वश्च वामन इत्यमरः । किं क्रमिष्यति । इत्थं अनेन प्रकारेण दानवा यावदहसन् । तावत् तत प्रागेव लङ्घिते अतिक्रान्ते अर्कशशिमण्डले येन सोऽस्य हरेः क्रमः पादविक्षेपो नभस्तले न ममौ न परिमाणं गतवान् यथा मतिस्तथा ववृधे इत्यर्थः । अत्राधारान्नभस्तलादाधेयस्य क्रमस्याधिक्यकथनादधिकालङ्कारभेदः । आश्रयाश्रयिणोराधिक्यमधिकमिति लक्षणात् ॥ ७५ ॥

गच्छतेति । गगनाग्रं गगनोपरिभागं गच्छतापीति विरोधः । भूधरवद्गरीयसेत्युपमा । यस्य वामनस्योच्चकैरुन्नतेनाङ्घ्रिणा क्रान्तकन्धरोऽवष्टब्धकण्ठ इवाबलो दुर्बलो बलिर्वैरोचनिः स्वर्गभर्तुरिन्द्रस्य सुखेन बध्यते इति सुबन्धः । ईषद्दुःसुष्वित्यादिना खल्प्रत्ययः । तत्तामगमत् । गुरुद्रव्यावष्टब्धकण्ठोऽपि सुखेन बध्यते इति भावः । न लोकेत्यादिना कृद्योगलक्षणाया एव षष्ठ्या निषेधात्स्वर्गभर्तुरिति शेषे षष्ठी । क्रान्तकन्धर इवेत्युत्प्रेक्षाया भूधरगरीय इत्युपमासापेक्षत्वात्सङ्करः । विरोधेन त्वनपेक्षिता संसृष्टिः ॥ ७६ ॥

दूरमूर्ध्वमलिनीलमायतम् ।
व्योम्नि दिव्यसरिदम्बुपद्धति
स्पर्द्धयेव यमुनौघमुत्थितम् ॥ ७७ ॥
यस्य किञ्चिदपकर्तुमक्षमः
कायनिग्रहगृहीतविग्रहः ।
कान्तवक्त्रसदृशाकृतिं कृती
राहुरिन्दुमधुनापि बाधते ॥ ७८ ॥
सम्प्रदायविगमादुपेयुषी
रेष नाशमविनाशिविग्रहः ।

आयत इति । आयत पादे विक्षिपतोऽस्य यस्याङ्घ्रेः दूरमायतं मलिनीलं भृङ्गश्यामं च ऊर्ध्वं यस्य दिवौकसो देवा व्योम्नि दिव्य सरितो मन्दाकिन्या अम्बुपद्धत्या जलमार्गेण स्पर्द्धया उत्थितम् ऊर्ध्वतः ... यमुनौघं यमुनाप्रवाहमिव ददृशुरित्युत्प्रेक्षेयमुपमा सङ्कीर्णा ॥ ७७ ॥

अवतारान्तरमाह । यस्येति । कायनिग्रहे भागकाले देहच्छेदेन गृहीतविग्रहो बद्धवैरः सन् कृपणो राहुर्यस्य हरेः किञ्चिदपकर्तुम् अक्षमः सन् कान्तं रम्यं यद्वक्त्रं हरिमुखं तेन सदृशी आकृतिर्यस्य तं तत्सदृशमित्यर्थः । इन्दुमधुनापि बाधते पीडयति उपरागमिषेणेति भावः । अत्र साक्षात् तिरस्कर्तुरनिग्रहणाक्षमस्य राहोस्तदीयेन्दुनिग्रहोक्त्या प्रत्यनीकालङ्कारः । तथा च सूत्रम् । प्रतिपक्षप्रतीकाराशक्तौ तदीयतिरस्कारः प्रत्यनीकमिति ॥ ७८ ॥

दत्तात्रेयावतारमाह । सम्प्रदायेति । अविनाशि विग्रहोऽस्य स्वरूपः अतएव अमतिकृता श्रुतिः अरण्यप्रक्रियेस्य स एष हरिः सम्प्रदाय. उपदेशपरम्परा तस्य विगमादभावात् कालदोषादध्ययन-

स्मर्त्तुमप्रतिहतस्मृतिः श्रुती
दत्त इत्यभवदत्रिगोत्रजः ॥ ७९ ॥
रेणुकातनयतामुपागतः
शातितप्रचुरपत्रसंहतिः ।
लूनभूरिभुजशाखमुज्झित
च्छायमर्ज्जुनवनं व्यधादयम् ॥ ८० ॥

विच्छेदमुपेयुषोः प्राप्तयोः । उगितश्चेति ङीप् । श्रुती वेदान् । 'श्रुतिः स्त्री वेद आम्नाय' इत्यमरः । स्मर्त्तुं श्रुतिसम्प्रदायं प्रवर्त्तयितुमित्यर्थः दत्त इति विख्यात इति शेषः अत्रिगोत्रे जातोऽत्रिगोत्रजोऽभवत् । दत्तात्रेयोऽभूदित्यर्थः । अत्रानपायित्वस्त्वप्रतिघातयोर्विशेषणगत्या स्मृतिस्मृतिहेतुत्वोक्त्या काव्यलिङ्गम् ॥ ७९ ॥

परशुरामावतारमाह । रेणुकेति । अयं हरिः रेणुकातनयतां परशुरामत्वमुपागतः सन् । अर्ज्जुनः कार्त्तवीर्य्यार्ज्जुनः । अर्ज्जुनः ककुभे पार्थे कार्त्तवीर्य्यमयूरयोरित्यनेकार्थेऽपि रेणुकेयविरोधित्वाद्विषयः । तदुक्तं हरिणा संयोगो विप्रयोगश्च साहचर्य्यं विरोधिता । अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः । सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः । शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव इति । स एव वनं तत्, शातिता छिन्ना प्रचुरा प्रभूता पत्रसंहतिर्वाहनसमूहः पर्णसङ्घातश्च यस्य तत् । पत्रं स्याद्वाहने पर्णे इति विश्वः । लूनाश्छिन्ना भूरयः प्रचुरा भुजा एव शाखा यस्य तत् । उज्झिता छाया कान्तिरनातपश्च यस्य तत्तथा व्यधात् विहितवान् । दधातेर्लुङि गातिस्थेत्यादिना सिचो लुक् । छाया सूर्य्यप्रिया कान्तिः प्रतिबिम्बमनातपः, इत्यमरः । अत्र समस्तवस्तुविषयं सावयवं रूपकं व्यक्तं तच्च छायेति पत्रेति च श्लेषप्रतिभोत्थापिताभेदातिशयोक्त्यनुप्राणितमिति सङ्करः ॥ ८० ॥

एष दाशरथिभूयमेत्य च
ध्वंसितोद्धतदशाननामपि।
राक्षसीमकृत रक्षितप्रजः
स्तेजसाधिकविभीषणां पुरीम्॥ ८१॥

निष्प्रहन्तुममरेशविद्विषा-
मर्थितः स्वयमथ स्वयम्भुवा।
सम्प्रति श्रयति सूनुतामयं
कश्यपस्य वसुदेवरूपिणः॥ ८२॥

रामावतारमाह। एष इति। किञ्चेति चार्थः। रक्षितप्रजः एष हरिर्दशरथस्यापत्यं पुमान् दाशरथी रामः। अत इञ्। तस्य भावः दाशरथिभूयं रामत्वम्। भुवो भावे इति क्यप्। एत्य प्राप्य। ध्वंसितोद्धत उद्धतो दशोद्यताननो रावणो यस्यां तामपि राक्षसीं रक्षःसम्बन्धिनीं पुरीं लङ्कां तेजसा स्वपौरुषेण अधिकविभीषणां अत्यन्तभीषणां अकृतेति विरोधः अपहेतो रक्षसः रावणस्य ध्वंसनात् अधिकोत्कर्षान् विभीषणो रावणानुजो यस्यां तामित्यविरोधः। अतएव विरोधाभासोऽलङ्कारः॥ ८१॥

अथ पञ्चभिः प्रस्तुतं कृष्णावतारमाह। निष्प्रहन्तुमिति। अथ रामावतारानन्तरं अयं हरिः अमरेशविद्विषां निष्प्रहन्तुं चैद्यादीन् दन्दशूकान् हन्तुमित्यर्थः। जासिनिप्रहणेत्यादिना कर्मणि षष्ठी। स्वयम्भुवा ब्रह्मणा स्वयमात्मनैवार्थितः प्रार्थितः सन् सम्प्रतीदानीं वसुदेवरूपिणो वसुदेवमूर्तिधरस्य कश्यपस्य सुततां श्रयति सम्प्रति त्वदग्रमस्तीति भावः। अत्र स्वयम्भूप्रार्थनाया विशेषणगत्या वसुदेवसुततापत्तिहेतुत्वात्पदार्थहेतुकं काव्यलिङ्गम्॥ ८२॥

न नोदधिविलोडनस्मृति
िन वयमुत्सहामहे ।
: सुरैरिति सुरौघवल्लभो
वैच जगदे जगत्पतिः ॥ ८३ ॥

तागन्वमवधूय शत्रुभि
ायया च प्रमितारव्यमम ।
ानिमानमिव वृत्तविद्विषः
ारिजा . ुदमनयद्दिवः ॥ ८४ ॥

। सुरौघवल्लभ सुरगणप्रिय जगत्पतिर्योऽहरिः सुरैर्देवै-
तात जनक नेति छेदे उदधिविलोडनं समुद्रमथनस्मृति
दे ,दधिविलोडनं दधिमन्थनं च प्रति तद्विना त्वा वि-
पृथक्त्विनेत्यादिना विकल्पात्तृतीया। अथ वयं न नो
न उत्सहामहे इति जगदे गदितम्। अत्र हरिवर्णना
वक्तृणां च प्रकृतानामेव नोदधिशब्दमूलाभेदाध्यव-
　　चमत्कारसाम्यादौपम्यत्वात्तुल्ययोगिता-
हरेर्दधिमन्थनकालावदुदधिमन्थनमपीति वस्तु व्यज्यत
॥ ८३ ॥

भति । किञ्चेति चार्थः । यो हरिः शत्रुभिरवधूता
　　। आत्तगर्वोऽभिभूतः स्या
मयन्द्रस्य सुपसुपेति समासः । छायया कान्तात
। छाया स्यादातपाभावे प्रतिबिम्बार्कयोषितोः
कान्तिसत्कोभापङ्क्तिषु स्त्रियामिति विश्व । प्रमिता-
ख्येयं पारिजातं स्वर्लोकात् स्वकान्ताभिमानमङ्-

यं समेत्य च ललाटलेखया
विभ्रतः सपदि शम्भुविभ्रमम् ।
चण्डमारुतमिव प्रदीपवच्
चेदिपस्य निरवाद्विलोचनम् ॥ ८५ ॥

यः कौलतां वल्लवतां च बिभ्रद्
दंष्ट्रामुदस्थाप्भुजां च गुर्वीम् ।
मग्नस्य तोयापदि दुस्तरायां
गोमण्डलस्योद्धरणं चकार ॥ ८६ ॥

ह्वारीमिव दिवः स्वर्गादुदमूलयत् उन्मूलितवानिति पारिजातहरणोक्तिः । श्लेषविशेषणोपमेति केचित् । श्लेषस्त्वन्ये ॥ ८४ ॥

यमिति । किञ्चेति चार्थः । ललाटमेव लेखा तया ललाटलेखया ललाटदेशेन शम्भोर्विभ्रमं सौन्दर्यं बिभ्रतः ललाटलोचनमित्यर्थः । चेदिपस्य शिशुपालस्य लोचनं तृतीयनेत्रं कर्तृ यं हरिमेव चण्ड-मारुतं चण्डमारुतमिव समेत्य प्रदीपवत् प्रदीपेन तुल्यम् । तेन तुल्यमिति वतिप्रत्ययः । निरवात् निर्वाति स्म नष्टमित्यर्थः । निर पूर्वाद्वाधातोर्लङ् । निरवापेति क्वचित्कपाठः स न सम्यक् वाते-रक्रियाविरोधादाप्तोतेरसङ्गतार्थत्वादिति । अनेकार्थोपमा ॥ ८५ ॥

य इति । यो हरिः कौलतां वराहत्वम् । वराहः सूकरो घृष्टिः कोलः पोत्री किरिः किटिरित्यमरः । वल्लवतां गोपालत्वं च बिभ्रत् । आसु गुर्वीं दंष्ट्रां भुजां च यथासङ्ख्यमिति भावः । उदस्थापयत् दुस्तरायां तोयापदि जलकष्टे एकत्र समुद्रजतायां अन्यत्र वर्षजतायां च मग्नस्य गोमण्डलस्य भूगोलस्य धेनुवृन्दस्य चोद्धरणं चकार । अत्र कौलत्वल्लवतयोः प्रकृतयोरेव श्लेषमूला भेदाध्यवसायेन गोमण्डलो-

धन्योऽसि यस्य हरिरेष समक्ष एव,
दूरादपि क्रतुषु यज्वभिरिज्यते यः ।
दत्त्वार्घमत्रभवते भुवनेषु याव-
त्संसारमण्डलमवाप्नुहि साधुवादम् ॥ ८७ ॥
भीष्मोक्तन्तदिति वचो निशम्य सम्यक्

हरणस्य दंष्ट्राग्रोद्वहनस्य च साम्या दीपकगम्यतायां तुल्ययोगिता सती श्लेषाङ्गेन सङ्कीर्यते । इन्द्रवज्रा वृत्तम् । स्यादिन्द्रवज्रा यदि तौ जगौ गः इति लक्षणात् ॥ ८६ ॥

एवं देवं स्तुत्वानन्तरं कर्तव्यमुपदिशति । धन्योऽसीति । धनं लब्धो धन्यः पुण्यवानसि । सुकृती पुण्यवान् धन्य इत्यमरः । धनगणं लब्धा इति यत्प्रत्ययः । यस्य ते एषः हरिः समक्ष एव अक्ष्णोः समीपे एव पुरत एवेत्यर्थः स्थित इति शेषः । सामीप्येऽव्ययीभावः अव्ययीभावे शरत्प्रभृतिभ्य इति समासान्तः अतएव तृतीयासप्तम्यो-र्बहुलमिति सप्तम्या अमभावः । अन्यत्र को विशेषः तत्राह । यो हरि-र्दूरादपि परोक्षेऽपि क्रतुषु यागेषु यज्वभिर्विधिवदिष्टवद्भिः । यज्वा तु विधिनेष्टवानित्यमरः । सुयजोर्ङ्वनिबिति ङ्वनिप्प्रत्ययः । इज्यते पूज्यते यते मत्यच इति धन्यत्वमित्यर्थः । फलितमाह । अत्रभवते पूज्यायेत्यर्थः । पूज्य अत्रभवानिति सज्जनः इतरेभ्योऽपि दृश्यते इति साव्विभक्तिके त्रल्प्रत्यये सुप्सुपेति समासः । अर्घम्पूजां दत्त्वा याव-त्संसार मण्डलं वर्तते तावदिति शेषः । भुवनेषु साधुवादः सत्कृतं साधुवादं साधुसमाख्यां अवाप्नुहि लभस्वेत्यर्थः । अत्र राज्ञो धन्यो-ऽसीति विशेषणगत्या यस्येत्यादिवाक्यार्थहेतुत्वात्पदार्थहेतुकं काव्यलिङ्ग-मलङ्कारः । वसन्ततिलका वृत्तम् ॥ ८७ ॥

भीष्मेति । येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः । शास्ति यश्चाज्ञया राज्ञः स सम्राडित्यमरः । सम्राजोभावः साम्राज्यं तदेव श्रीस्तां श्रियं

न्टपगणमसावकम्पयत् ।
लोलमुकुटमणिरश्मि शनै-
रशनैः प्रकम्पितजगत्त्रयं शिरः ॥ ३ ॥
स वमन् रुषाम्बु घनघर्म-
विगलदुरुगण्डमण्डलः ।
स्वेदजलकणकरालकरो
व्यरुचत्प्रभिन्न इव कुञ्जरस्त्रिधा ॥ ४ ॥
सनिकाममर्षितमभीक्ष्ण-

असौ चैद्यः । समस्तन्टपगणमभितर्जयन्निवेत्यर्थः । तर्जिभर्त्सिने चौरादिकस्यानुदात्तत्वेन मात्मनेपदस्य चक्षिङः देशस्य स्वाङ्ग-स्यानिवङ्गायानादरेण पुनर्जितकरणधामर्थ्यादनित्यत्वज्ञापनात्परस्मैपदम् अतएव तर्जयतीत्यपि दृश्यते कविभिरिति भट्टमल्लः । अशनैरतिमात्रं प्रकम्पितं जगत्त्रयं येन तत् त्रैलोक्यभीषणं । शिरः शनैर्लोलाश्चपला मुकुटमणिरश्मयो यस्मिन् कर्मणि तद्यथा तथा अकम्पयत् क्रोधाति-रेकादिति भावः ॥ ३ ॥

स इति । रुषा रोषेणाम्बु वमन् सृजन् । घनेन सान्द्रेण घर्मेण क्रोधोष्णणा विगलत् स्रवदुरु महत् गण्डमण्डलं यस्य सः स्विद्यत्कपोल इत्यर्थः । स्वेदजलकणैः स्वेदबिन्दुभिः करालकरो दन्तुर हस्त स चैद्यः त्रिधा नेत्रकपोलप्रदेशैः प्रभिन्नो मदस्रावी मत्तः । प्रभिन्नो-मत्तः स्यादिति वैजयन्ती । कुञ्जर इव व्यरुचत् । रुचेर्लुङ्गोतुङ्गीति विकल्पात् । परस्मैपदम् । एतेन स्वेदाख्यः सात्त्विकभाव उक्तः । उप-मालङ्कारः ॥ ४ ॥

स इति । राज्ञां समूहो राजकम् । गोत्रोक्षेत्यादिना वुञ्प्रत्ययः । तदवधूतमभिभूतं येन स तथोक्तः स चैद्योऽनिकामं मर्षितं सञ्जात-

मधुवद्वधूतराजकः ।
क्षिप्तबहुलजलबिन्दु वपुः
प्रलयार्णवोत्थित इवादिसूकरः ॥५॥
क्षणमाश्लिष्टघटितशैल
शिखरकठिनांसमण्डलः ।
स्तम्भमुपह्वितविधूतिमसा
वधिकावधूनितसमस्तसंसदम् ॥ ६ ॥
कनकाङ्गदद्युतिभिरस्य
गमितमरुच्चातिपिशङ्गताम् ।

घर्म्मोद्गमत् स्वेदमित्यर्थः । घर्म्मः स्यादातपे ग्रीष्मे उष्णस्वेदाम्भसो-रपीति विश्वः । तारकादित्वादितच्प्रत्ययः । वपुः प्रलये अर्णवस्तस्मा-दुत्थितः आदिसूकर इव क्षिप्ताः प्रेरिता बहुलाः सान्द्रजलबि-न्दवो यस्मिन् कर्म्मणि तद्यथा तथा अभीक्ष्णमधुवत् क्रोधादकम्पत च । धूञ् विधूनन इति धातोः लौटादिकाल्लङ् । अत्रापि स्वेदः सात्त्विक एवोक्तः । उपमालङ्कारः ॥ ५ ॥

क्षणमिति । घटितं सुसंहितं यच्छैलशिखरवत्कठिनमंसमण्डलं यस्य सोऽसौ चैद्यः उपह्विताऽवगाहिता आरोपितेत्यर्थः विधूतिः कम्पो यस्मिंस्तं अधिकमत्यन्तमवधूनिता कम्पिता समस्ता सकला संसत् सभा येन तं स्तम्भं क्षणं कालमियत् स्थितवान् तेनांसमण्डलेनाहतवानित्यर्थः अत-एव कठिनांसमण्डल इति विशेषणं च । धुञादित्वात् चुरडादेशः । आ-लिङ्गनार्थत्वे तु श्लिषआलिङ्गन इति क्सादेशः स्यात् । क्रोधान्धाः किं न कुर्वन्तीति भावः । अत्रास काठिन्यस्य विशेषणगत्या स्तम्भक्षेपहेतुत्वात् काव्यलिङ्गं यथासङ्ख्योपमया सङ्कीर्य्यते ॥ ६ ॥

कनकेति । कनकस्याङ्गदयोः केयूरयोः द्युतिभिः पिशङ्गतां पिङ्गवर्ण-

यदपूपुजस्त्वमिह पार्थ !
मुरजितमपूजितं सताम् ।
प्रेम विलसति महत्तदहो
दयितञ्जनः खलु गुणीति मन्यते ॥ १४ ॥
यदराज्ञि राजवदिहार्घ्य
मुपहितमिदम्मुरद्विषि ।
ग्राम्यमृग इव हविस्तदयं
भजते ज्वलत्सु न महीशवह्निषु ॥ १५ ॥

वाचमवददित्युक्तं अथ तामेव प्रपञ्चयन् पञ्चभिः पाण्डवोपालम्भमाह । यदित्यादि । हे पार्थ ! पृथा पुत्रेति मातृप्राधान्येनामन्त्रणं मर्म्मोद्घाटनार्थम् । सतामपूजितं सद्भिरपूज्यमानमित्यर्थः । मति बुद्धिपूजार्थेभ्यश्चेति वर्त्तमाने क्तः क्तस्य च वर्त्तमाने इति षष्ठी । मुरजितं कृष्णं इह सदसि यदप्राप्तादपूपुजः पूजयसि स्म । णौ चङ्युपधाया ह्रस्वः । तत्तस्मात् महत्प्रेम विलसति स्फुरति । अन्यथा कथमपूज्ये पूज्यत्वाभिमान इत्यभिप्रेत्याह । जनो लोकः दयितं प्रियं जनं गुणीति मन्यते खलु अगुणिनमपीत्यर्थः अहो आश्चर्यं कृष्णः प्रेम्णा पूजितो न गुणादिति भावः । अत्र प्रेमविलसितस्योत्तरवाक्यार्थहेतुकत्वात् काव्यलिङ्गम् ॥१४॥

यदिति । अराज्ञि अभिषेकादि राजगुणविरहिणीत्यर्थः । नञस्तत्पुरुषादिति समासान्तप्रतिषेधः । इहास्मिन् मुरद्विषि कृष्णे । अपात्रद्योतनार्थमसम्प्रदानविभक्तिनिर्देशः । राजानमर्हतीति राजवत् राजार्हम् । तदर्हमिति वतिप्रत्ययः । तद्धितश्चासर्वविभक्तिरित्यव्ययत्वम् । यदिदमर्घ्यं अर्घार्थं द्रव्यं अर्हणमित्यर्थः । उपहितमर्पितं तदर्घ्यमयं कृष्णः महीशा अवनीपा वह्नय इव इत्युपमितसमासः । तेषु महीशवह्निषु ज्वलत्सु सत्सु अन्यत्र महीशा इव वह्नयः तेषु ज्वलत्सु सत्स्वित्यर्थः ।

अनृताङ्गिरन्नगदसीति
जगति पटहैर्विघुष्यसे ।
निन्द्यमथ च हरिमर्चयत
स्तवकर्मणैव विकसत्यसत्यता ॥ १६ ॥

तव धर्मराज इति नाम
कथमिदमपष्ठु पठ्यते ।
भौमदिनमभिदधत्यथवा
भृशमप्रशस्तमपि मङ्गलञ्जनाः ॥ १७ ॥

यदि वार्च्य नीयतमएप

च्युतस्य शुनको हविरिव न भजते । न प्राप्नोति । उपमालङ्कारः ॥१५॥

अनृतामिति । हे पार्थ । अनृतामसत्याङ्गिरं न गदसि न वदसीति जगति लोके पटहैर्वाद्यविशेषैः कर्त्तृभिर्विघुष्यसे उद्घोष्यसे अथ च तथापि । निन्द्यं हरिमर्चयतस्तव कर्मणा अपूज्यपूजाकरणेनैवासत्यता सत्यहीनता विकसति प्रकाशते । अत्रासत्यमविद्यमानत्याचरणयोर्विरुद्धयोर्घटनाद्विरुद्धघटनारूपो विषमालङ्कार ॥ १६ ॥

तवेति । हे पार्थ । तवेदं धर्मराज इति नाम कथमपष्ठु अन्याय्यमेव पठ्यते । अपष्ठु शब्द स्वरूत्योणादिक कुप्रत्यय । अव्ययं मभूतीत्यादिना ण्यप् । यद्वा युक्तमेव तदित्याह । अथ वा जना भृशमप्रशस्तमपि भौमदिनमङ्गारकवारं मङ्गलम् अभिदधति व्यपदिशन्ति तद्वदिदमपीत्यर्थः । लोकैरप्रशस्तमप्रशस्तत्वेन विरुद्धार्थेनापि व्यपदिश्यते तद्व्यवहारदर्शनात् । तद्वद्धर्मराजस्यापि ते धर्मराजव्यपदेश इति भाव । अत्र धर्मराजभौमदिनयोर्निरपेक्षवाक्यद्वये प्रतिबिम्बकरणात् दृष्टान्तालङ्कार ॥१७॥

यदि । वेति । हे पृथात्मज । कौन्तेय । एष शौरिर्यो शौरिरेवेत्यर्थः ।

किमपि भवताम्पृथासुताः ।
शौरिरवनिपतिभिर्निखिलै
रवमाननार्थमिह किन्निमन्त्रितैः ॥ १८ ॥
अथवा न धर्म्ममसुबोध
समयमवयात बालिशाः ।
काममयमिह वृथापलितो
हतबुद्धिरप्रणिहितः सरित्सुतः ॥ १९ ॥

वा स्त्रादिस्त्लोपमयोरेवार्थे च समुच्चय इति विश्वः । किमपि कथमपि भवतामर्च्चनीयतमोऽयमिति पृच्छ्यतां तद्ब्रूतेति शेषः अवमानस्तिरस्कारः तस्मै तदर्थमेव । अर्थेन सह नित्य समासः सर्वलिङ्गता च वक्तव्या । क्रियाविशेषणम् । निमन्त्रितै राहूतैर्निखिलैरवनिपतिभिरिह किं कोऽर्थः साध्य इत्यर्थः । अत एव साधनक्रियापेक्षया करणत्वे तृतीया । अत्र गम्यमानक्रियापेक्षयापि कारकविभक्तिरिति न्यायद्योतते । अत्र सकलराजनिषेधस्य पूर्ववाक्यार्थहेतुकत्वात्काव्यलिङ्गभेदः ॥ १८ ॥

अथ विभ्रमीभीयानमाह । अथेत्यादि । अथ वा बालिशाः मूर्खाः यूयमिति शेषः । सुबोधेन भवतीति सुबोधोऽदुर्बोधः समय आचारो यस्य तं धर्म्मं नावयात न जानीत । अवपूर्वाद्याधातोर्लोट् लोटस्तस्थमिथामित्यादिना यस्य तादेशः । किन्तु वृथा निष्फलं पलितं यस्य स वृथापलितः वृथापरिणत इत्यर्थः । पलितं जरसा शौक्ल्यमित्यमरः । इयाते हेतुः हतबुद्धिर्नष्टमतिरयं सरित्सुतो भीष्मोऽपि काममयमिह हितोऽनवहितः प्रमत्तः बालाः प्रायेण जानन्तु अन्तवृद्धोऽपि न जानातीति चित्रमित्यर्थः । अतएव सत्यपि कारणे कार्यानुदयाद्विशेषोक्तिरलङ्कारः तथा बालिशत्वधर्म्मदुर्बोधत्वयोर्विशेषणगत्या धर्मज्ञानाहेतुत्वात्काव्यलिङ्गञ्चेत्यनयोः सापेक्षत्वात्सङ्करः ॥ १९ ॥

स्वयमेव शान्तनुतनूज !
यमपि गणमर्घ्यमभ्यधाः ।
तत्र सुररिपुरयं कतमो
यमनिन्द्रवन्दिवदभिष्टुषे वृथा ॥२० ॥

अवनीभृतां त्वमपहाय
गणमतिजडः समुन्नतम् ।
नीचि नियतमिह यच्चपलो
निरतः स्फुटं भवसि निम्नगासुतः ॥ २१ ॥

स्वयमिवेति । हे शान्तनुतनूज ! भीष्म ! स्वयमेव त्वमेवेत्यर्थः । यमपि गणं यं गणं मर्घ्यमर्घार्हं पूज्यम् । दण्डादिभ्यो यदिति यत्प्रत्यय । अभ्यधाः अवोचः स्नातकं गुरुमित्यादिश्लोक इति भावः । धाधातोर्लुङि गातिस्थेत्यादिना सिचोलुक् । तत्र स्नातकादिगणे अयं सुररिपुः कतमः न कोऽपीत्यर्थः । अस्तु अस्तुया असदुपालम्भे को हेतुरत आह यमिति । यं सुररिपुमनिन्द्रवन्दिवत् प्रगल्भवैतालिकवदित्युपमा अभिष्टुषे मिथ्यास्तौषि । अतस्त्वमेवोपालम्भ्य इति भावः । उपसर्गात्सुनोतीत्यादिना षत्वम् ॥ २० ॥

अवनीति । अतिजडोऽतिमूढोऽतिशीतश्च चपलोऽस्थिर मत्वरश्च । त्वम् । समुन्नतम् उन्नतमवनीभृतां राज्ञां भूधराणां च गणं मपहाय । न्यञ्चतीति न्यङ्, तस्मिन् नीचि नीचजने निम्ने च । अत्र इत्य कारलोपे चाविति दीर्घः । इत्थंविधम् लक्ष्यं यद्याप्याश्रियतं नित्यं निरतोऽनुरक्तः आसक्तश्च इति शेषः । निम्नं नीचं गच्छतीति निम्नगा नदी । डोऽन्यत्रापि दृश्यते इति डप्रत्यय । तस्याः सुतो असि स्फुटं व्यक्तं नीचनिरतत्वादिधर्मसाम्यादिति भावः । उक्तं च । न पितरमनुवर्तन्ते मातरं द्विपदा इति अत्र [illegible] [illegible] ॥ २१ ॥

प्रतिपत्तुमङ्ग घटते च
न तव नृपयोग्यमर्हणम् ।
कृष्ण ! कलय ननु कोऽहमिति
स्फुटमापदाम्पदमनात्मवेदिता ॥ २२ ॥
असुरस्त्वया न्यवधि कोऽपि
मधुरिति कथम्प्रतीयते ।
दण्डदलितसरघः प्रथसे
मधुसूदनस्त्वमिति सूदयन्मधु ॥ २२ ॥

अथ सप्तदशभिः कृष्णोपालम्भं करोति । प्रतिपत्तुमिति । हे अङ्ग ! तव नृपयोग्यं राजार्हमर्हणं पूजनं प्रतिपत्तुं स्वीकर्तुं न च घटते न युज्यते । नन्वहमपि राजैव कथमर्हणं मे न युक्तं तत्राह कृष्णेति । हे कृष्ण ! अहं क इति कलय अहं राजा न वेति निजस्वरूपमालोचयेत्यर्थः । अनालोचनेऽनर्थमाह । अनात्मवेदिता अनात्मज्ञत्वं आपदां पदं स्थानं स्फुटं खलु सत्यमित्यर्थः । आत्मा च कंसकिङ्करस्तस्य पशुपालकत्वादिति भावः । अतोनिजस्वरूपं चिन्त्यमिति हेतुमद्भावात्काव्यलिङ्गमिति ॥ २२ ॥

असुर इति । मधुरिति कोऽप्यसुरस्त्वया न्यवधि हतः । आत्मनेपदेष्वन्यतरस्यामिति हन्तेर्लुङि विकल्पाद्वधादेशः । इति कथं प्रतीयते विश्वस्यते न कथञ्चिदित्यर्थः । प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुष्वित्यमरः । किन्तु दण्डेन दलिता ध्वस्ता सरघा मधुमक्षिका येनेदृशस्त्वम् सरघा मधुमक्षिकेत्यमरः । अतएव मधु क्षौद्रं सूदयन् पीडयन् मधुसूदन इति प्रथसे प्रथितोऽसि । मक्षिकासूदनमेव मधुसूदनसंज्ञाप्रवृत्तिनिमित्तं न तु मधुनाम्नो दैत्यस्य सूदनमित्यर्थः । अत्र मधुसूदनसंज्ञायां प्रसिद्धार्थनिषेधस्योत्तरवाक्यस्यान्यथा उपपादनहेतुत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गम् ॥ २३ ॥

अभियत्नु संयति कदाचि-
दविहितपराक्रमोऽपि यत्।
व्योम्नि कथमपि चकर्थ पदं
व्यपदिश्यसे जगति विक्रमीत्यतः ॥ २८ ॥

पृथिवीम्बिभर्थ यदि पूर्व-
मिदमपि गुणाय वर्त्तते।
भूमिहृदिति परहारितभू-
स्त्वमुदाह्रियस्व कथमन्यथा जनैः ॥ २९ ॥

अस्मिन्नाभिषेकसंस्कारेऽपि त्वं शक्यप्रतिज्ञापकस्य हरेरेव सकलराज्य-श्रीधुरन्धरत्वसम्बन्धेऽप्यसम्बन्धोक्तेरतिशयोक्तिः ॥ २७ ॥

अभीति। संयति युद्धे कदाचित् कदापि अभियत्नं यत्नमभिव्याप्य। आभिमुख्येऽव्ययीभावः। अविहितपराक्रमोऽकृतपौरुषोऽपि यद्यस्मात्कथमपि महता प्रयत्नेन व्योम्नि पदं पादन्यासं चकर्थ कृतवानसि। अतो भारद्वाजस्येति इट्प्रतिषेधः पित्त्वाद्गुणः। अतो जगति विक्रमी विक्रमवानिति व्यपदिश्यसे व्यवह्रियसे न तु पराक्रमयोगादित्यर्थः। अत्रापि पराक्रमसम्बन्धेऽप्यसम्बन्धोक्तेरतिशयोक्तिः ॥ २८ ॥

पृथिवीमिति। पूर्वं प्रागपि, सम्प्रत्यभावेऽपीति भावः। पृथिवीं बिभर्थ यदि भर्तासि चेत्। भृञोऽपीति भारद्वाजोक्तेरिट्प्रतिषेधः पित्त्वाद्गुणः। इदं भूधारणमपि गुणायोत्कर्षाय वर्त्तते भूतपूर्वगत्यापि व्यपदेशला-त्तदपि नाप्नोतीति भावः प्रत्युत परैः शत्रुभिः ह्रारितभूः परह्रापितभूमिकः जरासन्धेन मथुरानगराच्चिरं स्फाजितत्वादिति भावः। यत्र ह्रतं इव ह्रारणमत्यन्तमेव ह्रारयितव्यमिति विलक्षणमत्र भक्तिः। जनैः कथमन्यथा अर्थान्तरोत्तरेण भूमिहृदिति उदाह्रियस्व उदाह्रियेथाः। संभावनायां लोट्। अयं भावितमेवेत्यर्थः। अत्रापि भूधरणसम्बन्धेऽप्यसम्बन्धो-क्तिः ॥ २९ ॥

तव धन्यतेयमपि सर्व्वं
नृपतितुलितोऽपि यत्त्वयाम् ।
क्लान्तकरतलधृताचलकः
पृथिवीतले तुलितभूभृदुच्यसे ॥३०॥

त्वमशक्नुवन्न शुभकर्म्म
निचितपरिपाकदारुणम् ।
जेतुमकुशलमतिर्नरकं
यशसेऽधिलोकमजयः सुतभुवः ॥ ३१ ॥

तवेति। तवेयं धन्यता पुण्यवत्ता यत्त्वं सर्व्वैर्नृपतिभिस्तुलितोऽप्यभूतोऽपि तिरस्कृतोऽपीत्यर्थः स्वयं क्लान्ते भारवत्तयेव श्रान्ते करतले धृतः अचलकोऽल्पार्थबोधेन सः "सर्वं पृथिवीतले तुलितभूभृदुन्नतराजकत्व उच्यसे इति यत् इयमप्यपरा ते धन्यतेत्यर्थः। गोवर्द्धनाख्यचुद्रभूधरतोलनात्तु लितभूभृत्त्वं भवति न महाशानिव महामेरुतितुलनादिति भावः। अत्र सर्वैर्नृपतितुलितोऽपि तत्तोलक इति विरोधो भूभृदिति श्लेषमूलाभेदाध्यवसायोत्थापित इति विरोधातिशयोक्त्योः सङ्करः तेन गोवर्द्धनोद्धरणमपि नातीवाद्भुतं शौड़वलभाविनामिति वस्तु व्यज्यते ॥ ३० ॥

त्वमिति। हे अशुभकर्मन्निरत। पापाचारपर! अतएव अशुभवत्विदुर्द्धिन्यं परिपाके फलकाले दारुणं विचित्रपापयातनामयत्वात्कष्टकरमित्यर्थः नरकं निरयं स्याबारकस्तु नरको निरयोदुर्गतिः स्त्रियामित्यमरः। जेतुमशक्नुवन् पापिष्ठेर्दुर्जयत्वादिति भावः। अधिलोकं लोके। विभक्त्यर्थेऽव्ययीभावः। यशसे नरकविजयीति प्रसिद्धये भुवः सुतनरकाख्यं अजयः जितवानसि परलोक प्रतारकत्वात्परो न परलोकबाध्योसीति भावः। अत्र निरयामरास्यनरकविजयायसंविधेयत्वगत्या तस्कयस्ता-

सकलैर्वपुः सकलदोष
समुदितमिदङ्गुणैस्तव।
त्यक्तमपगुण! गुणत्रितय
त्यजनप्रयासमुपयासि किम्मुधा ॥ २२ ॥
त्वयि पूजनञ्जगति जाल्म!
कृतमिदमपाकृते गुणैः।
हासकरमघटते नितरां
शिरसीव कङ्कतमपेतमूर्द्धजे ॥ २३ ॥

र्थेनोहरेर्नरकासुरविजय मकृतिहेतुकत्वात्पदार्थहेतुकं काव्यलिङ्गम्। तच्च नरकयोः श्लेषमूलाभेदात्तदुत्थापितमिति सङ्करः ॥ २१ ॥

सकलैरिति। हे अपगुण! निर्गुण! सकलैः सर्वैर्दोषैः समुदितं युक्तं तवेदं वपुः सकलैर्गुणैः शौर्यादिभिस्त्यक्तं सर्वगुणनिवर्तितमेवेत्यर्थः। एवं च सति गुणत्रयस्य त्यजने त्यागे यः प्रयासः तं मुधा वृथा किं किमर्थमुपयासि प्राप्नोषीति भावः यत्र सकलगुणस्य त्यागस्तत्र गुणत्रयस्य त्यागोऽर्थलभ्यत्वात् सिद्ध एव अन्यथा साकल्यव्याघातादित्यर्थः। स्वभावतो निर्गुणस्य परवस्तुनः कुतो गुणत्रयचिन्तेति ध्वनिः। गुणत्रयत्यागनिषेधस्य सकलैरित्यादिवाक्यार्थहेतुकत्वात्काव्यलिङ्गभेदः ॥ २२ ॥

त्वयीति हे जाल्म! असमीक्ष्यकारिन्! जाल्मोऽसमीक्ष्यकारी स्यादित्यमरः। गुणैरपाकृते निरस्ते गुणहीने त्वयि पूजनं कृतं जगति हासकरं परिहासजनकं इदं पूजनम्। अपेतमूर्द्धजे अपगतकेशे शिरसि कङ्कतं दारुदन्तादिमयं केशप्रसाधनविशेषः। प्रसाधनं कङ्कतिकेति विश्वामरौ। कङ्कतोऽथ कङ्कतिका। कङ्कतमिति [illegible] कङ्कतं [illegible] स्य मण्डनयोरपीति विश्वः। तदिव नितरामघटते न सङ्गच्छते इत्यर्थः।

मृगविद्विषामिव यदित्थ
मजनि मिषताम्पृथासुतैः।
अस्य वनभुनद्वयापचितिः
परिभावएष भवताम्भुवोऽधिपाः ॥ ३४ ॥
अवधीज्जनङ्गमइवैष
यदि हतवृषो वृषन्ननु।
सर्पिमशुचिवपुरर्हति न
प्रतिमाननान्तु नितरान्नृपोचिताम् ॥ ३५ ॥

मञ्जोनलोपश्चिण्डि चेपे इत्युपसङ्ख्यानमिति निन्दायां तिङ्, योगेऽपि मलोपः। उपमालङ्कारः॥ ३३॥

सम्प्रति राज्ञां रोषमुत्पादयन्नाह। मृगेति। हे भुवोऽधिपाः! राजानः! मृगविद्विषां सिंहानामिव भवतां मिषतां पश्यतां भवत्सु मिषत्सु मिषतो युष्मान् अनादृत्येत्यर्थः। षष्ठी चानादरे इति विकल्पाद्भावलक्षणे षष्ठी। इत्थम्पृथासुतैः कौन्तेयैः पितरमेतेषां न वेद्मीति भावः। तस्य हरणस्य वनभुवोऽवनभुजकस्येव जम्बुकस्येवेति यावत् अपचितिः पूजा अजनि जनिता कृतेति यत्। जनेर्यन्तात्कर्मणि लङ्। एष भवतां परिभावः परिभवः। परौ भुवोऽवज्ञाने इति विभाषया घञ्प्रत्ययः॥३४॥

अवधीदिति। हतवृषो हतवृषभः। सुकृतं वृषभे वृषे इति विश्वः। एष कृष्णो जनङ्गमश्चाण्डाल इव। चाण्डालप्लवमातङ्ग दिवाकीर्त्तिजनङ्गमा इत्यमरः। गमश्चेति संज्ञायां जनपूर्वाद्गमधातोः खच्प्रत्ययः अरुर्द्विषदित्यादिना मुमागमः। एवं वृषभरूपिणं अरिष्टाख्यमसुरमवधीद्यदि हतवांश्चेत्। लुङि चेति हनो वधादेशः। अतएव अशुचिवपुरशुद्धकायः सर्पिर्माईति नृपोचितां राजार्हां प्रतिमाननां पूजां तु नितरां नार्हति सर्वथा योग्योऽयोग्यः कथं पूज्य इत्यर्थः। उपमा॥३५॥

यदि नाङ्गनेति मतिरस्य
मृदुरजनि पूतनाम्प्रति ।
स्तन्यमघृणमनसः पिबतः
किल धर्म्मतोभवति सा जनन्यपि ॥ २६ ॥

शकटव्युदासतरुभङ्ग
धरणिधरधारणादिकम् ।
कर्म्मयदयमकरोत्तरलः
स्थिरचेतसां क इव तेन विस्मयः ॥ २७ ॥

यदीति । अस्य कृष्णस्य मतिः पूतनानाम बालग्रहविशेषः तां प्रति अङ्गना इति हेतोर्मृदुः कृपाटया नाजनि यदि न जाता चेत् मास्त्विति शेषः । जनेः कर्त्तरि लुङ् दीपजनेत्यादिना चिण् प्रत्ययः । अघृणमनसो निर्घृणचित्तस्य । स्तनेभवं स्तन्यं पयः । शरीरावयवाच्चेति यत् प्रत्ययः । पिबतोऽस्य सा पूतना धर्म्मतः शास्त्रतो जनन्यपि माता च भवति खलु स्त्रीति कृपाऽभावेऽपि मातेति जुगुप्साप्यस्य नासीदित्यर्थः न केवलं स्त्रीहन्ता किं तु मातृहन्ता चायं स्तनप्रदायाः । [illegible]दिति भावः । अत्र स्तनपानस्य विशेषणगत्या जननीत्वहेतुत्वात्काव्यलिङ्गम् ॥ २६ ॥

शकटेति । तरलश्चपलोऽयं कृष्णः शकटव्युदासः शकटासुरमर्द्दनं तरुभङ्गो यमलार्जुनभञ्जनं धरणिधरधारणं गोवर्द्धनोद्धरणमित्याद्यं यस्य तत्तथोक्तं यत्कर्म्म अकरोत् । तेन कर्म्मणा स्थिरचेतसां धीरचित्तानां कस्य विस्मयो न कोऽपीत्यर्थः । अत्र स्थिरचेतस्कतायाः विशेषणगत्या विस्मयनिषेधहेतुत्वात्काव्यलिङ्गं [illegible] संसृज्यते ॥ २७ ॥

अयमुग्रसेनतनयस्य
नृपशुरपरः पशूनवन्।
स्वामिवधमसुकरं पुरुषैः
कुरुते स्म यत्परममेतदद्भुतम्॥ ३८॥

अयमिति। अपरोऽन्यः ना पशुरिवेति नृपशुरित्युपमित समासः। कार्याकार्यविवेकशून्यत्वादेवेत्यर्थः अयं कृष्ण उग्रसेनतनयस्य कंसस्य पशून् अवन् गाः पालयन् 'पुरुषैरसुकरं' लोकवेदविगीतत्वात् दुष्करं स्वामिवधं यत् कुरुते स्म चकारेति यावत्। एतत्परममद्भुतं अभूतपूर्वादिति भाव। अत्र पशुजनस्याविशेषणगत्या कंसकृष्णयोः स्वामिभृत्यभावद्योतनात् काव्यलिङ्गम्॥ ३८॥

एते प्रक्षिप्ताः।

ननु सर्व एव समवेक्ष्य कमपि गुणमेति पूज्यताम्।
सर्वगुणविरहितस्य हरेः परिपूजया कुरु नरेन्द्र को गुणः॥ १॥
न महानयं न च बिभर्त्ति गुणसमतयाप्रधानाम्।
स्वं कथयति चिराय पृथगजनताङ्गतस्त्वनभिमानतान्दधत्॥ २॥
रहितं ह्यनाभिरखिलाभिरङ्गनरसभावनविदम्।
चेलविदस्य मदियन्ति जनाः पुरवाघ्रणेनमगतं विदग्धताम्॥ ३॥
अतिभूयसापि सुकृतेन दुरुपचर एष शक्यते।
भक्तिशुचिभिरुपचारपरैरपि न ग्रहीतुमभियोगिभिर्नृभि॥ ४॥
भजति स्वतामनुचितोऽपि खविनयस्य पारितोजने.।
नित्यमपरिचितचित्ततया परएव सर्वजगतस्त्वघाम्ययम्॥ ५॥
उपकारिणं विरुपकारमनरिमरिमप्रियं प्रियम्।
साधुमितरमनुबन्धुमभिन्नविशेषतः सततमेष पश्यति॥ ६॥
उपकारकस्य दधतोऽपि बहुगुणतया प्रधानताम्।
दुःखमविषममवाप्नुवतोन परस्य किञ्चिदुपकर्त्तुमिच्छति॥ ७॥

इति वाचमुद्धतमुदीर्य्य
सपदि सह वेणुदारिणा ।
सोढरिपुबलभरोऽसहनः
स जहास दत्तकरतालमुच्चकैः ॥ ३९ ॥

कटुनापि चैद्यवचनेन
विकृतिमगमन्न माधवः ।
सत्यनियतवचसं वचसा
सुजनञ्जनाश्चलयितुङ्क ईशते ॥ ४० ॥

न च तन्तदेति शपमान
मपि यदुनृपाः प्रचुक्रुधुः ।

इतीति । सोढः क्षान्तो रिपूणां बलभरो वीर्य्यातिशयो येन सः न सहत इति असहन असहिष्णुः स चैद्य इतीत्थं उद्धतं निष्ठुरं यथा तथा वाचं उदीर्य्य सपदि वेणुदारिणा नरकात्मजेन सह दत्तः करतालः परस्परपाणितालनं यस्मिन् कर्म्मणि तद्यथा तथा उच्चैस्तारं जहास । कृष्णदोषोद्घाटनरूपादट्टहासं चकारेत्यर्थः । स्वभावोक्तिः ॥ ३९ ॥

कटुनेति । माधवः कटुनापि चैद्यवचनेन विकृतिं नागमत् गमेर्लुङि पुषादिना च्लेरङादेशः । तथाहि सत्ये नियतवचसं अस्खलितवचसं सत्यसन्धं सुजनं के जना वचसा चालयितुमीशते शक्नुवन्ति न केऽपीत्यर्थः । प्रतिज्ञाभयादक्षुब्धे इति भावः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ४० ॥

न चेति । किञ्चेति चार्थः । तदा तत्काले इतीत्थं शपमान मा-

शौरिसमयनिगृहीतधियः
प्रभुचित्तमेव हि जनोऽनुवर्त्तते ॥ ४१ ॥
विहितागसो मुहुरलङ्घ्य
निजवचनदामसंयतः ।
तस्य कतिथ इति तत्प्रथमं
मनसा समाख्यदपराधमच्युतः ॥ ४२ ॥
स्मृतिवर्त्म तस्य न समस्त
मपकृतमियाय विद्विषः ।

क्रोधन्तमपि । शपतेराक्रोश इति भट्टमल्लः । तं चैद्यम् । यदुवृद्धाः यादवाः शौरेः कृष्णस्य समयेन सङ्केतेन निगृहीत धियो निरुद्धबुद्धयः सन्तोऽन प्रचुक्रुधुः । क्रुधद्रुहोरुपसृष्टयोः कर्मेति कर्मत्वम् । तथाहि जनो लोकः प्रभुचित्तमेव अनुवर्त्तते । शौरिसङ्केतनिरुद्धबुद्धे-र्यदुविशेषणतया क्रोधाभावहेतुत्वात् काव्यलिङ्गमर्थान्तरन्यासेन संकीर्यते ॥ ४१ ॥

विहितेति । अलङ्घ्येन निजवचनदाम्ना स्वप्रतिज्ञापाशेन संयतो बद्धोऽच्युतः मुहुर्विहितागसः पूर्वं शतशः कृतापराधस्यापि तस्य चैद्यस्यापराधं स एव प्रथमोऽयंकिम् कर्म्मणि तत्प्रथमं यथा तथा कतिथः । कतीनां पूरण इति तस्य पूरणे डडिति डट्प्रत्ययः षट्-कतिपयचतुरां थुगिति थुगागमः । मनसा समाख्यत् गणनां चकार । अस्यतिवक्तिख्यातिभ्योऽङिति च्लेरङादेशः । अत्र प्रतिज्ञापाशबन्धनस्य विशेषणगत्या प्राचीनापराधानन्त्येऽपि तात्कालिकापराधगणनाहेतुत्वा-त्काव्यलिङ्गभेदः ॥ ४२ ॥

स्मृतीति । विद्विषश्चैद्यस्य सर्व्वमपि समस्तमपकृतमपकारजातम् । नपुंसके भावे क्तः । तस्य हरेः कृष्णस्य स्मृतिपथं नेयाय न प्राप ।

स्मर्त्तुमधिगतगुणस्मरणाः
पटवो न दोषमखिलं खलूत्तमाः ॥ ४३ ॥
नृपतावधिक्षिपति शौरि
मथ सुरसरित्सुतोवचः ।
स्माह चलयति भुवम्मरुति
क्षुभितस्य नादमनुकुर्वदम्बुधेः ॥ ४४
अथ गौरवेण परिवाद
मपरिगणय्यस्तमात्मनः ।
प्राह मुररिपुतिरस्करण
क्षुभितः स्म वाचमिति जाह्नवीसुतः ॥ ४५ ॥

न तमपकारं स्मरन्तीत्यर्थः । अर्थान्तरं न्यस्यति । अधिगतगुण स्मरणाः परिचितोपकारस्मृतय उत्तमाः सज्जनाः अखिलं दोष मपकारं स्मर्तुं न पटवो खलु नावस्मयन्तीत्यर्थः । पर्य्याप्तिवचनेष्वल मर्थेष्विति तुमुन् प्रत्ययः । उपकारमेव स्मरन्ति साधवो नापकारमित्यर्थः ॥ ४३ ॥

नृपताविति । अथ नृपतौ चैद्ये शौरिं हरिं अधिक्षिपति सति सुरसरित्सुतो भीष्मः मरुति प्रलयमारुते भुवं चलयति कम्पयति सति क्षुभितस्योद्वेलस्याम्बुधेर्नादमनुकुर्वत्तद्गम्भीरं वचः आह स्म उवाच । लटः स्मेति भूतार्थे लट् ब्रुवः पञ्चानामादित आहो ब्रुव इति णल्याद्यादेशः । यद्यपि न पादादौ स्वरादय इत्याह वामनः त-थापि कविप्रौढ्या स्वच्छन्दस्य पादादौ प्रयोगः । उपमालङ्कारः ॥ ४४ ॥

उक्तमेवार्थं वक्तुरापद्याविष्कारार्थमाह । अथेति । अथ शिशुपाल-प्रलापानन्तरं मुररिपुतिरस्करणेन हरिनिन्दया क्षुभित कलुषमनाः जाह्नवीसुतो गाङ्गेयः गौरवेण धैर्य्येण तमात्मनः परिवादं कामभयं

विहितमयाद्य सदसीद-
मपमृषितमच्युतार्चनम् ।
यस्य नमयतु स चापमयं
चरणः कृतः शिरसि सर्वभूभृताम् ॥ ४६ ॥

इति भीष्मभाषितवचोऽर्थ-
मधिगतवतामिव क्षणात् ।
क्षोभमगमदतिमात्रमथो
शिशुपालपक्षपृथिवीभृतां गणः ॥ ४७ ॥

यथार्पितेत इत्यादि स्वनिन्दामपि गणयन् इति वक्ष्यमाणप्रकारेण माम् माह स भीष्मवान् गतमेतत् । धीराः स्वनिन्दामेव सहन्ते न गुरुदेवादिनिन्दामिति भावः । अत्र क्षोभस्य विशेषणगत्या वचन-हेतुत्वात् काव्यलिङ्गभेदः ॥ ४५ ॥

विहितमिति । मया अद्य सदसि सभायां विहितं कृतं इदं अच्यु-तार्चनं यस्यामर्षितमतितितिक्षितमसोढमित्यर्थः । क्षम तितिक्षाया-मिति धातोः कर्मणि क्तः उपसर्गवशाद्विपरीतार्थता । अतएव क्षम तितिक्षायामेव किन्त्वनिषेधादितितिक्षार्थत्वाच्च गुणः मतिबुद्धिपूजार्थे-भ्यश्चेति चकाराद्वर्त्तमानार्थता क्तस्य च वर्त्तमाने इति षष्ठी । सो-ऽमर्षणः पुरुषचापं नमयतु आरोपयतु सर्वभूभृतां शिरसि निहितामिति भाव । शिरस्ययञ्चरणः कृतः न्यस्तः । अयमिति मूर्ध्नि पात्यमानस्य चरणस्य हस्तेन निर्देशः । अयं कोपामर्षं इत्यनुसन्धेयम् ॥ ४६ ॥

इतीति । इतीत्थं भीष्मेण भाषितस्योक्तस्य वचसोऽर्थम् अभिधेयं शिरसि पादन्यासरूपं क्षणात् अधिगतवतां प्राप्तवतामिव सतामि-त्यर्थः शिशुपालस्य पक्षा ये पृथिवीभृतो राजानः तेषां गणोऽति-मात्रं क्षोभं क्रोधं विकारमगमत् । एतेनैषां आत्मविनाशावधायी रौद्रस्थायी क्रोधः प्रादुरभूदित्युक्तम् । उत्प्रेक्षा ॥ ४७ ॥

शितितारकानुमितताम्र
नयनमरुणीकृतं क्रुधा ।
बाणवदनमुददीपि भिये
जगतः सकीलमिव सूर्य्यमण्डलम् ॥ ४८ ॥

प्रविदारितारुणतरोग्र
नयनकुसुमोज्ज्वलः स्फुरन् ।
प्रातरहिमकरताम्रतनु
विपजद्रुमोऽपरइवाभवद्द्रुमः ॥ ४९ ॥

अनिशान्तवैरदहनेन

अथैषां दमघोषसुतादीनां क्रोधानुभावानाह । शितीत्यादि । क्रुधा क्रोधेन अरुणीकृतमतएव शिती श्यामे ये तारके कनीनिके ताभ्यां अनुमिते अनुमापिते ताम्रे नयने यस्य तत् । तारकाक्ष्णः कनी-निकेत्यमरः । सर्वस्यास्य रक्तत्वादिति भावः । बाणो नृपस्तस्य वदनम् । सकीलं कीलाकारच्छायासहितं परिधियुक्तमिति यावत् । सूर्य्यमण्डलमिव जगतो भिये भयाय उददीपि प्रजज्वाल । दीप्यतेः कर्तरि लुङीति दीपजनेत्यादिना चिण्प्रत्यये तलुक् । अत्र नयनयोः स्वाभाव्यत्यागेनारुणस्वीकारात्तद्गुणः तन्नामेचत्वर दीप्तातिसूर्य्यमण्डलो-पमालङ्कारः ॥ ४८ ॥

प्रवीति । प्रविदारिते अतिविकासिते अरुणतरे क्रोधादतिरक्ते अतएवोग्रे भयङ्करे ये नयने ते एव कुसुमे ताभ्यामुज्ज्वलो दीप्तः स्फुरन् स्वतेजसा दीप्यमानः प्रातरहिमकरताम्रतनुः प्रभाताकार्कइव विपत्त प्रविद्धोद्रुमोद्रुमाख्योऽन्यः अपरो विपजद्रुम इवाभवत् इत्युपमेयः रूपकसङ्कीर्णो ॥ ४९ ॥

अनिशान्तेति । अनिशान्तोऽनिर्वाणोवैरदहनोविरोधाग्निर्यस्य तेन

विरहितवनान्तरार्द्रताम् ।
कोपमरुदभिहतेन भृशं
नरकात्मजेन तरुणेव जज्वले ॥ ५० ॥
अभिधित्सतः किमपि राहु
वदनविकृतं व्यभाव्यत ।
ग्रस्तशशधरमिवोपलस
त्सितदन्तपङ्क्ति मुखमुत्तमौजसः ॥ ५१ ॥
कुपिताकृतिप्रथममेव
हसितमशनैरसूचयत् ।
क्रुद्धमशनिदलिताद्रितट

वनदवान्तरभ्यन्तरे आर्द्रतां सारस्यं विरहितवता त्यक्तवता । रघु
पतेः क्रतुभुजः । कोपोमरुदिव तेनाभिहतः प्रज्वलितः तेन नर-
कात्मजेन वेणुदारिणा तरुणा द्रुमेणेव भृशं जज्वले ज्वलितम् । भावे
लिट् । उपमालङ्कारः ॥ ५० ॥

अभीति । किमप्यभिधित्सतोऽभिधातुमिच्छतः । दधाते सन्नाद्धटः
गत्वादेशः । दैत्यमौलिमणीनाम राज्ञः सम्बन्धि राजवदनविकृतं व्या-
त्तताद्राजवक्त्रवत् करालं उपलसन्ती लक्ष्यमाणा सिता दन्तपङ्क्तिर्यस्य
तत्कथं प्रसभमधरमिव सन्दष्टचन्द्रमिव व्यभाव्यतातर्क्यत । वृत्त-
वृत्तेचा ॥ ५१ ॥

कुपितेति । प्रथमं प्रागेवाकुपितावस्थायामपीत्यर्थः । कुपितस्येवा-
कृतिर्यस्य रागोदयस्तु पश्चात् । अरिचक्रभीषणं परबलमदहरं दन्तवक्त्रं
दन्तवक्त्रनामानं राजानम् । अशनिदलितस्य वज्राहतस्याद्रितटस्य ध्व-

शितितारकानुमितताम्र
नयनमरुणीकृतं क्रुधा ।
बाणवदनमुददीपि भिये
जगतः सकीलमिव सूर्य्यमण्डलम् ॥ ४८ ॥

प्रविदारितारुणतरोग्र
नयनकुसुमोज्ज्वलः स्फुरन् ।
प्रातरहिमकरताम्रतनु
र्विपक्षद्रुमोऽपरइवाभवद्द्रुमः ॥ ४९ ॥

अनिशान्तवैरदहनेन

अथैषां दर्पनिर्गतारम्भानु क्रोधानुभवानाह । शितीत्यादि । क्रुधा क्रोधेन अरुणीकृतमतएव शिती श्यामे ये तारके कनीनिके ताभ्यां अनुमिते अनुमापिते ताम्रे नयने यस्य तत् । तारकाक्ष्णः कनीनिकेत्यमरः । सर्वस्यस्य रक्तत्वादिति भावः । बाणोत्पतस्य वदनम् । सकीलं कीलाकारच्छायालाञ्छितं परिवियुक्तमिति यावत् । सूर्य्यमण्डलमिव जगतोभिये भयाय उददीपि प्रज्वलिताम् । दीप्यतेः कर्तरि लुङि दीपजनेत्यादिना चिण्प्रत्यये तलुक् । अत्र नयनयोः स्वभावत्यागेनान्यस्वीकारात्तद्गुणः तत्सापेक्षत्वात् दीप्तातिसूर्य्यमण्डलो-पमासङ्करः ॥ ४८ ॥

प्रवीति । प्रविदारिते अतिविकाशिते अरुणतरे क्रोधादतिरक्ते अतएवोग्रे भयङ्करे ये नयने ते एव कुसुमे ताभ्यामुज्ज्वलो दीप्तः स्फुरन् स्वतेजसा दीप्यमानः प्रातरहिमकरताम्रतनुः प्रभातार्क इव विग्रहः प्रसिद्धाद्द्रुमादन्यः अपरो विपक्षद्रुम इवाभवत् इत्यु-त्प्रेक्षा रूपकसङ्कीर्णा ॥ ४९ ॥

अनिशान्तेति । अनिशान्तोऽनिर्वाणो वैरदहनो विरोधाग्निर्यस्य तेन

विरहितवतान्तरार्द्रताम्।
कोपमरुदभिहतेन भृशं
नरकात्मजेन तरुणेव जज्वले ॥ ५० ॥
अभिधित्सतः किमपि राहु
वदनविकृतं व्यभाव्यत।
ग्रस्तग्रासधरमिवोपलस
त्सितदन्तपङ्क्ति मुखमुत्तमौजसः ॥ ५१ ॥
कुपिताकृतिप्रथममेव
हसितमघनैरसूचयत्।
क्रुद्धमशनिदलिताद्रितट

अतएवान्तरभ्यन्तरे आर्द्रतां सारस्यं विरहितवता त्यक्तवता। रह-यतेः क्तवतुप्रत्ययः। कोपो मरुदिव तेनाभिहतः प्रज्वलितः तेन नर-कात्मजेन वेणुदारिणा तरुणा वृक्षेणेव भृशं जज्वले ज्वलितम्। भावे लिट्। उपमालङ्कारः ॥ ५० ॥

अभीति। किमप्यभिधित्सतोऽभिधातुमिच्छतः। दधातेः सन्नन्ताल्लटः शत्रादेशः। उत्तमौजसो नाम राज्ञः सम्बन्धि राहुवदनविकृतं व्या-त्ताद्वाङ्गवत्त्वात् कैरावं उपलसन्ती लक्ष्यमाणा सिता दन्तपङ्क्तिर्यस्य तत्तथोक्तं ग्रस्तग्रासधरमिव सन्दष्टचन्द्रमिव व्यभाव्यतातर्क्यत। स्रस्त-वृत्ते वा ॥ ५१ ॥

कुपितेति। प्रथमं प्रागेवाकुपितावस्थायामपीत्यर्थः। कुपितस्येवा-कृतिर्यस्य सरागोऽयमित्युपमा। अरिचक्रभीषणं परबलभयङ्करं दन्तवक्रं दन्तवक्रनामानं राजानम्। अशनिर्दलितस्य वज्राहतस्याद्रितटस्य ध्व-निरिव ध्वनिर्यस्य तदित्युपमा। न घनैरघनैः उच्चैर्हसित महाहासः

ध्वनि दन्तवक्त्रमरिचक्रभीषणम् ॥ ५२ ॥
प्रतिघः कुतोऽपि समुपेत्य
नरपतिगणं समाश्रयत्
यामिहरणजनिताऽनुशयः
समुदाचचार निजएव रुक्मिणः ॥ ५३ ॥
चरणेन हन्ति सुबलः स
शिथिलितमहीध्रबन्धनाम् ।
तीरतरलजलराशिजला

स्तद्गुणमसूचयत् । सर्वदा सुखरागस्य विशेषणादद्भुभावान्तरवैद्य' मुखं इत्यर्थः । अत्र कोपव्यञ्जकस्यान्येऽप्यसम्बन्धेऽतिशयोक्तिरुपमा-सङ्कीर्णा ॥ ५२ ॥

प्रतिघ इति । प्रतिघ कोपः । कोपक्रोधामर्षरोषप्रतिघा इत्यमरः । कुतोऽपि समुपेत्यागत्य नरपतिगणं राजमण्डलं समाश्रयत् समाविशत् । रुक्मिणस्तु यामि. स्वसा । यामि स्वसृकुलस्त्रियोरित्यमरः । तस्यारुक्मिण्याहरणेन जनितोऽनुशयो द्वेषः कष्टमापन्नं कदा निर्यात-यामीति पश्चात्तापो यस्मिन्नुप: । अथानुशयो दीर्घद्वेषानुतापयोरित्यमरः । निजोऽनित्यएव प्रतिघः । निजमात्मीयनित्ययोरिति विश्वः । समुदाच-चार समुद्दिदीपे । भीष्मवाक्यमन्येषां कोपोत्पादकमासीत् रुक्मिणस्तु प्रागेवारूढकोपस्योद्दीपकमासीदित्यर्थः । अत्रानुशयस्य विशेषणगत्या कोपोद्दीपनहेतुत्वात्काव्यलिङ्गभेदः ॥ ५३ ॥

चरणेनेति । सुबलोनाम राजा महीं धारयन्तीति महीध्राः पर्वताः । कर्मण्यणे मूलविभुजादिभ्य उपसङ्ख्यानमिति कप्रत्ययः । शिथिलितानि विश्लेषितानि महीध्राणां बन्धनानि रुन्ध्यो यस्या-स्ताम् । तीरेषु तरलानि मुक्तमर्यादानि जलराशेरम्बुधेर्जलानि

नवभग्नभोगिफणमण्डलाम्बुजम् ॥ ५४ ॥
कुपितेषु राजसु तथापि
रथचरणपाणिपूजया ।
चित्तकलितकलहागमनो
मुदमाहुकिः सुहृदिवाधिकान्दधौ ॥ ५५ ॥
गुरुकोपरुद्धपदमाप
दलितयवनस्य रौद्रताम् ।
व्यात्तमशितुमिव सर्वजग
द्विकरालमास्यकुहरं विवक्षतः ॥ ५६ ॥

बलाब्जाम् । नवभुग्नं कुटिलं कलितमारादित्यर्थः भोगिनां फणिनां फणमण्डलं फणसमूहोऽम्बुजानां तुल्यं चरणेन छलितं स्म लङ्घितम् । नट् चेति सूत्रार्थे लट् । अत्र पादाघाताद्भुवः कम्पासम्बन्धेऽपि तदसम्बन्धोक्तेरतिशयोक्तिः ॥ ५४ ॥

कुपितेष्विति । रथचरणपाणेश्चक्रपाणेः पूजया राजसु तथा कुपितेष्वपि चित्ते कलितं निश्चितं कलहागमनं युद्धलाभो येन सः आहुकिः आहुकेरपत्यं राजा मोहनं हृदयं यस्य स सुहृत् मित्र-मिव दर्शनसुखप्रातीतिवदर्थः । सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातः । अधिकां मुदमन्वभौ स्तोत्रं धृतवान् । दुःखहेतोरपि सुखोत्कर्षः कलहकण्डूलत्वाद्योद्धृत्वमोदहेतुत्वादित्यर्थः उपमालङ्कारः ॥ ५५ ॥

गुर्विति । विवक्षतः किमपि वक्तुमिच्छतः । वचेः सन्नन्ताल्लटः शत्रादेशः । दलितयवनस्य कालयवनस्य राज्ञः सम्बन्धि सर्वजगदशि-तुमत्तुमिव व्यात्तं विवृतं अतएव विकरालं अतिविस्तृतम् । करालो-दन्तुरे तुङ्गे विशाले विकृतेऽपि चेति वैजयन्ती । गुरुणा कोपेन रुद्ध-

विवृतोरुबाहुपरिघेण
सरभसपदन्निधित्सता ।
हन्तुमखिलनृपतीन्वसुना
वसने विलम्बिनि निजे विचस्खले ॥ ५७ ॥

इति तत्तदा विकृतरूप
मभजत्तदभिन्नचेतसम् ।
मारबलमिव भयङ्करतां
हरिबोधिसत्त्वमभि राजमण्डलम् ॥ ५८ ॥

यद् प्रतिभटवचनं व्यालकुहरं वक्त्रविवरं रौद्रताम्भयङ्करतामगात् । अक्षाप्सुमिवेति फलोत्प्रेक्षा व्यादानक्रिया निमित्ता ॥ ५६ ॥

विवृतेति । अखिलनृपतीन् हन्तुं विवृत प्रसारित उरु बाहुरेव परिघ आयुधविशेषो येन तेन । परिघः प्रतिघातेऽस्त्री त हेमः । सरभसं सत्वरं यत्पदं तन्निधित्सता निधातुमिच्छता । दधातेः सन्नन्तात् शत्रादेश । वसुना तदाख्येन राज्ञा विलम्बिनि उत्पातवेगात् विस्रंसिनि निजे वसने स्वाम्बरे विचस्खले स्खलितं तद्वासस्य दुर्निमित्तमिति भावः । भावे लिट् । अत्र वस्त्रसंसनस्य विशेषणगत्या स्खलनहेतुत्वात्काव्यलिङ्गं तच्चाङ्गपरिघेति रूपकेण संसृज्यते ॥ ५७ ॥

इतीति । इतीत्थन्तदा तस्मिन् काले विकृतरूपं रोषभीषणाकारं तद्राजमण्डलं मारबलमिव मदनसैन्यमिव । मदनो मन्मथो मार इत्यमरः । अभिन्नचेतसमविकृतचित्तं बोधिसत्त्वो बुद्धः । बुद्धस्तु श्रीघन-शास्ता बोधिसत्त्वो विनायक इति वैजयन्ती । स हरिरिवेत्युपमित समासः । तं हरिबोधिसत्त्वमभि तल्लक्षणीकृत्येत्यर्थः । अभिरभागे इत्यभेः कर्मप्रवचनीयत्वात्तद्योगे द्वितीया । भयङ्करोतीति भयङ्करः । मेघ-र्तिभयेषु कृञ इति खच्प्रत्यये मुमागमः । तस्य भावस्तामभजत् ।

रभसादुदस्थुरथ युद्ध
मनुचितभियोऽभिलाषुकाः ।
सान्द्रमुकुटकिरणोच्छलित
स्फाटिकांशवः सदसि मेदिनीभृतः ॥ ५९ ॥

स्फुरमाणनेत्रकुसुमोष्ठ
दलमभ्यत भूभृदङ्घ्रिपैः ।
धूतपृथुभुजलतञ्ज्वलितै
र्द्रुतवातपातवनविभ्रमं सदः ॥ ६० ॥

उपमालङ्कारः । तेन भगवतोऽधुना सभाविभङ्गाद् महत्त्वं मा रचैव यथा तेन भग्नं तथा राजमण्डलमपि हरिणा भक्ष्यत इति वस्तु व्यज्यते ॥ ५८ ॥

रभसादिति । अथानन्तरं अनुचितभियोऽनभ्यस्तसाध्वसाः । अभ्यस्तोऽप्युचितमिति यादवः । अतएव युद्धमभिलाषुकाः युद्धार्थिनः । लषपतेत्यादिना उकञ्प्रत्ययेन न लोकेत्यादिना षष्ठी प्रतिषेधः । सदसि मेदिनीभृतः सदसि स्थिताः चैद्यपक्षीया राजानः । सान्द्रैर्मुकुटकिरणैरुच्छलिताः स्फटिकांशवः सभाभित्तिस्फटिकमणि मयूखाः येषां ते तथोक्ताः सन्तो रभसाद्वेगात् उदस्थुरुत्थिताः । अत्रोर्ध्वकर्मणो-न्यस्य मतुपादावश्यम्भवत् । अत्र युद्धाभिलाषुकस्य विशेषणगत्योत्थान-हेतुत्वात् काव्यलिङ्गभेदः ॥ ५९ ॥

स्फुरमाणेति । स्फुरमाणानि नेत्राण्येव कुसुमान्योष्ठा एव दलानि च यस्मिन् कर्मणि तद्यथा तथा धूताः कम्पिताः पृथवो भुजा एव लताः शाखा यस्मिन् कर्मणि तत् यथा तथा ज्वलितैः कुपितो राजानस्त एव अङ्घ्रिपाः पादपास्तैः सदः सभामण्डपं द्रुतः शीघ्रो वातपातो वायुप्रचारोऽस्य तस्य वनस्य विभ्रमं शोभाम् । विभ्रमः संशये

किमहो नृपाः सममभीभि
रुपपतिसुतैर्न पञ्चभिः ।
वध्यमभिहत भुजिष्यममुं
सह चानया स्थविरराजकन्यया ॥ ६२ ॥
अथवाऽस्यमेव खलु यूय
मगणितमरुद्गणौजसः ।
वस्तु कियदिदमयन्न मृधे

विच्छिन्ना दंशनक्रिया अभिनवा इव यस्य स तथा सन् वचो विष-मिव तद्वचोविषं विससर्ज विषप्रायं वच उज्जगारेत्यर्थः । अत्र फण-वानिवेति व्यस्तोपमालिङ्गात्सर्वत्रोपमितसमासाश्रयणम् ॥ ६१ ॥

अथैतद्वचोविषमेव चतुर्भिराह । किमित्यादि । हे नृपाः ! अमीभिः पञ्चभिरुपपतिसुतैः समं जारजैः सह पाण्डवाना क्षेत्रजत्वादियं मलाप । अनया स्थविरराजकन्यया वलियाङ्गनया च सह । कन्या कुमारिकानार्योरिति विश्व । भीष्मस्योर्ध्वरेतस्त्वेन निन्दा । वध्य-स्ववाहं अराजोऽराजाहणपूजापराधादिति भाव । अराजत्वं व्य-नक्ति । अमुं भुजिष्यं किङ्करं कंसदत्तगोपालनादिति भाव । भुजिष्यः किङ्करो भट इति हलायुध । किं नाभिहत किमिति न मारयत किन्तु अभिहतेत्यर्थः । हन्तेर्विध्यर्थे लोट लोटो लङ्वदिति यस्य तादेशः अनु-दात्तोपदेशेत्यादिनानुनासिकलोप । अहो अतिवध्योऽपि न हन्यत इत्याश्चर्यम् । अत्रामर्षानुभावो वागारम्भ । क्रोधः कृतापराधेषु स्थि-रोऽमर्ष इतीर्यते ॥ ६२ ॥

अथवेति । अथवा अगणितमरुद्गणौजस अवधीरितसुर सङ्घसत्त्वाः यूयमास्यमेव तूष्णीं तिष्ठतैव खलु । आस्तेर्लोटि थ चेति सकारलोपः । इदं कृष्णहननं कियद्वस्तु कियत्कार्यं स्वल्पमित्यर्थः । कुत. अयं कृष्णो मृधे युद्धे । मृधमास्कन्दनं सङ्ग्राममिति युद्धपर्यायेष्वमरः । केन-

मम केवलस्य मुखमीक्षितुङ्क्षमः ॥ ६४ ॥
विदतुर्यमुत्तममशेष
परिषदि नदीजधर्मजौ ।
यातु निकषमधियुद्धमसौ
वचनेन किम्भवतु साध्वसाधु वा ॥ ६५ ॥
अचिरान्मया सह गतस्य
समरमुरगारिलक्ष्मणः ।
तीक्ष्णविशिखमुखपीतमसृक
पतताङ्गणैः पिबतु साङ्गमुर्वरा ॥ ६६ ॥

कस्यैकाकिनो ममैव मुखमीक्षितु न त्वन्य युष्माकं का वार्त्तेति भाव । एतेनास्य बलगर्वो व्यज्यते आत्मनोत्कर्षोऽन्यन्यक्कारो लावण्यविभूतिभि रिति व्याख्यात ॥ ६४ ॥

विदतुरिति । किञ्च नदीजधर्मजौ भीष्मयुधिष्ठिरौ अशेष परि षदि समस्तसदि । परिषत् सभेति विश्व । य कृष्णमुत्तमं विद तुर्वेदितवन्तावित्यर्थ । विदो लटो वेति तसोऽतुसादेश । असौ कृष्ण अधियुद्धं युद्धे । विभक्त्यर्थेऽव्ययीभाव । निकषं निकषस्य परीक्षता मित्यर्थ यातु । तत साधूत्कर्षोऽसाध्वनुत्कर्षो वा भवतु व्यक्तमस्मि न्नर्थे । वचनेन किं वृथा वाग्वादेनेत्यर्थ अत्रापि गर्वातिशयो व्यज्यते ॥ ६५ ॥

अचिरादिति । किञ्च मया सह समरं गतस्योरगारिलक्ष्मणो गरु डध्वजस्य सम्बन्धि तीक्ष्णैर्विशिखमुखै पीत महाशोणितमित्यर्थ । असृक् रक्तमुर्वरा भूमि । उर्वरा सर्वसस्याढ्यभूमौ स्याद्भूमि मात्रके इति विश्व । पतता गणै पक्षिसमूहै । पतत्पतत्रथाण्डजा इत्य

अभिधाय रूक्षमिति मा स्म
गम इति पृथासुतैरिताम्।
वाचमनुनयपरां स ततः
सहसावकर्ण्य निरियाय संसदः॥ ६७॥

गृहमागताय कृपया च
कथमपि निसर्गदक्षिणाः।
क्षान्तिमहितमनसो जननी
स्वसुरात्मजाय चुकुपुर्न पाण्डवाः॥ ६८॥

मरः। सार्द्धमचिरात् दिवम्। अद्यैवाहमेनं हनिष्यामीत्यर्थः अत्रापि क्षमध्वं एवेति भावः॥ ६६॥

अभिधायेति। स चैद्य इतीयं रूक्षं परुषमभिधाय ततः पृथासुतैः पार्थैरीरितामुक्तामनुनयपरां मास्म गमोन गच्छेति वाचम्। स्मोत्तरे लङ् चेति चकाराद्भेराशिषि लुङि पुषादित्वात् च्लेरङादेशः नमाङ्योगे इत्यड भाव। अवकर्ण्य अनादरेण श्रुत्वा सहसा संसदः सदसो निरियाय निर्ययौ अमर्षादिवेति भावः॥ ६७॥

गृहमिति। निसर्गदक्षिणाः स्वभावतो दाक्षिण्यसम्पन्नाः परच्छन्दानुवर्तिन इत्यर्थः। त्रिषु वाक्पन्दाशामपरच्छन्दानुवर्तिषु दक्षिणा इति वैजयन्ती। किञ्च क्षान्त्या क्षमया महितमनसः पूजितचित्ताः क्षमावन्तः पाण्डवाः किञ्च गृहमागतायाभ्यागतायेत्यर्थः। किञ्च जननीस्वसुर्मातृस्वसुरात्मजाय शिशुपालाय कृपया च कथमपि कथञ्चिदपराधेऽपीत्यर्थः न चुकुपुः न चुक्रुधुः। सद्यो वध्यस्यापि तस्याभ्यागतत्वात् मातृबन्धुत्वात् स्वयं शान्तत्वात् दाक्षिण्यात् कृपया च कथमपि हिंसां न चक्रुरित्यर्थः। क्रुधद्रुहेत्यादिना सम्प्रदानाच्चतुर्थी। अत्राभ्यागतत्वादि-

चलितस्ततोऽनभिहतेच्छ
मवनिपतियज्ञभूमितः ।
तूर्णमथ ययुमिवानुययु
र्दमघोषसूनुमवनीशसूनवः ॥ ६९ ॥
विशिखान्तराण्यतिपपात
सपदि जवनैः स वाजिभिः ।
द्रष्टुमलघुरभसापतिता
वनिताश्चकार न स कामचेतसः ॥ ७० ॥

विशेषणानां साभिप्रायत्वादकोपहेतुत्वाच्च परिकरः काव्यलिङ्गं चेति सापेक्षत्वात्सङ्करः कीर्त्यते ॥ ६८ ॥

चलितमिति । अथ चैद्यनिर्याणानन्तरं अवनीशसूनवः तं, पराज पुत्रास्ततस्ततः अवनिपतेर्युधिष्ठिरस्य यज्ञभूमितो यज्ञभूमेर्देशयज्ञभागात् । पञ्चम्यास्तसिल् । अनभिहतेच्छमप्रतिहतमनोरथं यथा तथा चलितं प्रस्थितं दमघोषसूनुं शिशुपालम् । याति परलोकमिति ययुं परलोकप्रयाणकोऽश्वमेधीयोऽश्वः । ययुरश्वोऽश्वमेधीयइत्यमरः । योद्दे चेति यातेरौणादिकउप्रत्ययः द्वित्वञ्च । तं ययुमिव, तूर्णमन्वययुः ययुरपि राजकैराजपुत्रैरन्वीयत । चरतः प्रतार्चन्तीति श्रुतेः अश्वमेधाश्वोपमया चैद्यस्य वध्यत्वं व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः ॥ ६९ ॥

विशिखान्तराणीति । स चैद्यः सपदि जवनैर्वेगवाद्भिर्वाजिभिरश्वैर्विशिखान्तराणि रथ्यान्तराणि । रथ्या प्रतोली विशिखेत्यमरः । अतिपपात अतिचक्राम । अतएव द्रष्टुमलघुरभसेनातिवेगेनापतिता आधावन्तीर्वनिता, सकामानि साभिलाषाणि चेतांसि चित्तानि यासां ताः सकामचेतसः सफलमनोरथा इत्यर्थः । न चकार अतियोगमङ्गु-

क्षणमीक्षितः पथि जनेन
किमिदमिति जल्पता मिथः ।
प्राप्य शिबिरमविशङ्कमनाः
समनीनहद्द्रुतमनीकिनीमसौ ॥ ७१ ॥
त्वरमाणशाङ्खिकसवेग-
वदनपवनाभिपूरितः ।
शैलकटकतटभिन्नरवः
प्रणनाद सान्नहनिकोऽस्य वारिजः ॥ ७२ ॥

नास्य दर्शनावकाशस्तासामासीदित्यर्थः । अतएव वाक्यार्थहेतुकं काव्यलिङ्गम् ॥ ७० ॥

क्षणमिति । असौ चैद्यः पथि किमिदमिति मिथः जल्पता कोऽयमनर्थः संवृत्त इति परस्परमालपता जनेन क्षणमीक्षितः सन् शिबिरं स्वकटकं प्राप्याविशङ्कितमना निःशङ्कचित्तः द्रुतं शीघ्रमनीकिनीं सेनां समनीनहत् सन्नाहयति स्म । नह्यतेः सम्पूर्वात्ण्यन्तात् लुङि चङ्युपधाया ह्रस्वः अभ्यासदीर्घश्च । शिबिरं मकटमिति केचित् । एतेनास्य रौद्रस्थायिनः कोपस्य प्रकटत्वं वेदितव्यम् ॥ ७१ ॥

त्वरमाणेति । शङ्खः शिल्पमस्येति शाङ्खिकः । तदस्य शिल्पमिति ठक् । त्वरमाणस्य जवमानस्य शाङ्खिकस्य यः सवेगो वदनपवनो मुखमारुतः तेनाभिपूरितः सध्मातः शैलानां कटकतटेषु नितम्बप्रदेशेषु भिन्नरवो मूर्च्छितप्रतिध्वनिरस्य चैद्यस्य सम्बन्धि सन्नहनं प्रयोजनमस्येति सान्नहनिको योधानां रणसन्नाहप्रवर्तक इत्यर्थः । तदस्य प्रयोजनमिति ठक् । वारिजः शङ्खः । वारिजः शङ्ख-पद्मयोरिति विश्वः । प्रणनाद दध्वान । सन्नहनमयं दध्मावित्यर्थः । उपसर्गादसमासेऽपि णोपदेशस्येति णत्वम् । एतेनास्य महानुत्साहो वीररसस्थायी व्यज्यते ॥ ७२ ॥

जगदन्तकालसमवेत-
विषदविषमेरितारवम्।
धीरनिजरवविलीनगुरु
प्रतिशब्दमस्य रणतूर्य्यमावधि ॥ ७३ ॥
सहसा ससम्भ्रमविलोल
सकलजनतासमाकुलम्।
स्थानमगमदथ तत्परित-
श्चलितोडुमण्डलनभःस्थलोपमाम् ॥ ७४ ॥
दधतोभयानकतरत्व

जगदिति। जगदन्तकाले कल्पान्ते समवेता मिलिता ये विषदाः तोयदाः पुष्करावर्त्तकादयो मेघाः (विषं तु गरले तोये इति विश्वः।) तैर्विषमं दारुणं यथा तथेरितः उत्पादितो य आरवः स इवारवो यस्य तम्। धीरे गम्भीरे निजरवे विलीना अन्तर्गता गुरवः प्रतिशब्दाः शब्दान्तराणि यस्य तत् तस्य चैद्यस्य रणतूर्य्यं रणदुन्दुभिरावधि आहतम्। आहन्तेः कर्मणि लुङ् आत्मनेपदेष्वन्यतरस्यामिति हनो वधादेशः। एतावता क्षोभ उच्यते। उपमालङ्कारः ॥ ७३ ॥

सहसेति। अथ रणदुन्दुभिताडनानन्तरं सहसा झटिति ससम्भ्रमं सत्वरं यथा तथा विलोलया चलन्त्या सकलया समग्रया जनतया जनसमूहेन समाकुलं सङ्कीर्णं तत् स्थानं परितश्चलितं प्रस्थितं उडुमण्डलं ज्योतिश्चक्रं यस्मिन् तस्य नभःस्थलस्योपमा सादृश्यमगमत्। अत्रोडुमण्डलस्य चलनासम्बन्धेऽपि सम्भावनया तत्सम्बन्धोक्तेरतिशयोक्तिः उपमा तु तदुज्जीविता प्रतीतिमात्रसारा तदङ्गं नत्वेव चमत्कारस्फुरणात्। पुष्पं प्रवालोपहितं यदि स्यादित्यादिवत् ॥ ७४ ॥

दधत इति। मेदिनीभृतो राजानः। धूमपटलेन पिहितस्य क्ष्मादि-

सुपगतवतः सुमानताम् ।
धूमपटलपिहितस्य गिरेः
समवर्मयत्सपदि मेदिनीभृतः ॥ ७५ ॥
परिमोहिणा परिजनेन
कथमपि चिरादुपाहृतम् ।
वर्म करतलयुगेन महत्
तनुचूर्णपेषमपिषदुपापरः ॥ ७६ ॥
रणसम्मदोदयविकासि-
बलकलकलाकुलोत्क्षते ।

तस्य अतएव भूदानतरत्वं अतिशयहृद्यत्वं उपगतवतो गिरेः समानतां सादृश्यं दधतो दधानः सपदि समवर्मयत् संवर्मितमकरोत् । सम्यग्वर्म यथा नद्धमित्यर्थः । सत्यापपाशेत्यादिना णिच् । उपमालङ्कारः ॥ २५ ॥

परिमोहिणेति । परोऽन्योन्यम् परिमुह्यतीति परिमोही । सम्पूर्वाच्चेत्यादिना इनुप्रत्ययः । तेन वेपथुमतेत्यर्थः । परिजनेन सेवकजनेन कथमपि कृच्छ्रेण करस्थस्थात् चिरादुपाहृतं आनीतं महद्वर्म सन्नाहं करतलयुगेन पाणितलद्वयेन तनुचूर्णपेषं तनुचूर्णं पिष्ट्वा । शुष्कचूर्णरूक्षेषु पिष इति णमुल्प्रत्ययः । अपिषत् चूर्णितवान् तस्य लिङ्गिनोऽङ्गनिमित्तमिति भावः । कषादिषु यथा विध्यनुप्रयोग इत्यनुप्रयोगः । पिषेर्लुङि पुषादिना च्लेरङादेशः । अत्र संभवः पेषणासम्भवेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः । तथा च समावरणवीर्यमस्य सूच्यते ॥ २६ ॥

रणेति । रणेन रणारम्भेण यः सम्मदो हर्षः । प्रमदसम्मदौ हर्षे इति निपातः । तस्योदयेन जन्मना विकासिभिर्विस्तारिभिर्बलकलकलैः

आरिमथकदधिरोपयितु-
न्द्विरदे मदच्युति जनः कथञ्चन ॥ ७७ ॥
परितश्च धौतमुखरुक्म
विलसदहिमांशुमण्डलाः ।
तेनुरतनुवपुषः पृथिवी
स्फुटलब्धतेजस इवात्मजाः श्रियः ॥ ७८ ॥
प्रधिमण्डलोद्धतपराग-
घनवलयमध्यवर्त्तिनः ।

सैन्यकोलाहलैराकुलीकृते सक्षोभिते । अतएव मद श्चोततीति मदच्युति मदस्राविणि । क्विप् । द्विरदे गजे । जन परिजन आरि मर्य्यायम । ना पर्य्याणे विहङ्गे स्त्री आरि धूतगुडेन पुंसिति वैजयन्ती । आरिर्नाऽश्वोपकरणे स्त्रिया शकुनिकान्तरे । युद्धार्थे गजपर्य्याणे व्यव हारोऽस्ते क्वचिदिति विश्वप्रकाशश्च । अधिरोपयितु आरोपयितु कथञ्चन सच्छादयकृत् सुशाक ।। शके र्तुं हि तुमादिना चुरङादेश । अत्र विशेषणगत्या सेनाकोलाहलस्य मदहलत्वात्मदस्य आरिदुरारोपत्वहेतुत्वाच्च काव्यलिङ्गद्वय तत्सापेक्षत्वात्सङ्कीर्यते ।। ७७ ।।

परित इति । किञ्चेति चार्थ । धौतेषु शोधितेषु सुवर्णरुक्मेषु सुवर्ण रुक्माभरणेषु विलसत्सूर्य्येक प्रतिफलदाहिमांशुमण्डल अर्कबिम्ब येषा ते तथोक्ता । अतएव स्फुटलब्धप्रमत्तगत्या वह्नि स्फुरितस्तेजोऽन्त र्याद्येषा ते इव स्थितादत्युत्त्पा । तेजोव्याख्यात पञ्चमे तेजोनिरोधे ष्यत । अतनुवपुषोमुदाकाया श्रिय आत्मजा अभवा । अश्वोऽपतोऽश्वकाये चेति वैजयन्ती । परित पृथिवी तेनु व्याप्नवन्त ॥ ७८ ॥

प्रधीति । चक्रधारा प्रधिर्नेमिरिति हलायुध । प्रधिमण्डलै नेमि वलयैरुद्धता उत्थापिता पराणा पासवएव घनाभिषाभोषां वलयानि

पेतुरशनय इवाशनकै-
र्गुरुनिखनव्यथितजन्तवो रथाः ॥ ७९ ॥

दधतः शशाङ्कितशशाङ्क-
रुचि लसदुरश्छदं वपुः।
चक्रुरथ सह पुरन्ध्रिजनै-
र्यथार्थसिद्धि सरकम्महीक्षितः॥

दयिताय सासवमुदस्त-
मपतद्वशादिनः करात्।

अश्वयानि तेषां मध्यवर्त्तिभिः गुरुभिर्निखनैः स्वपीडैः व्यथिता भीषिता जन्तवः प्राणिनो यैस्ते रथा अशनयः वज्राणीव अशनैः पेतुः पतितवन्त-
भावत्। अत्र रथानामशनित्वेनोत्प्रेक्षा महाशब्दत्वात् अनलक्षणसाम्ये-
नेति भावः॥ ७९ ॥

दधत इति। लसदुरश्छदः कवचोऽस्मिन् कर्मणि तद्यथा तथा।
उरश्छदः कङ्कटकोऽजगरः कवचोऽस्त्रियामित्यमरः। अतएव शशाङ्कि-
तोऽङ्कितः शशाङ्कः इन्दुस्तस्य रुचिरिव रुचिर्यस्य तदुपमा।
तद्वद्देदीप्यमानं वपुर्दधतो महीक्षितः पुरन्ध्रिजनैः स्त्रीजनैः सह।
यथार्थसिद्धि [illegible] तद्यथार्थसिद्धि [illegible]
[illegible] सरकं मधुपानं चक्रुः। [illegible]
[illegible] भावः। शर्मी, शीधु शीधुपाने सरकं मधुभाजनमिति
वैजयन्ती॥ ८० ॥

अथ मद्यपानादेः [illegible] भटा-
नामाकारविशेषाः [illegible] वर्ण्यन्ते। दयितायेत्यादि।
दयिताय [illegible] पानार्थमुत्क्षिप्तं सासवं चषकं
[illegible] निहिते करोऽपि पतत् [illegible] भारत्वेन गुरु

कांस्यमुपचितसरोजपत्र-
भ्रमरौघभारगुरु राजयोषितः ॥ ८१ ॥
भ्रममङ्गसादमरुणत्व-
मविशददृश कपोलयो ।
वाक्यमसकलमपास्य मद
विदधुस्तदीयगुणमात्मना शुचः ॥ ८२ ॥
सुदृशः समीकगमनाय

गुरुस्तु वाक्पतौ श्रेष्ठे गुरौ पितरि दुर्भर इति यन्दार्णव। कांस्यं पान भाजनम्। कांस्योऽस्त्री पानभाजनमित्यमरः। वृतृवदिहनिकमिकषिभ्य स इति कमेर्धातोरौणादिकः सः प्रत्ययः। तस्मै हितं कंसीयं लोहविशेष। प्राक्क्रीताच्छ इति छप्रत्ययः। तस्य विकारः कांस्यं पानपात्रम्। कंसीयपरशव्ययोर्यञञौ लुक्चेति यञ्प्रत्यये छस्य लुक्। राजयोषितः कस्याश्चिद्राजवध्वा पानेन पानकादिना शैथिल्यभाजः करात् पतत् तस्य दुर्निमित्तमिति भाव। एतेनास्या भाविविरहशोकादेशः प्रसञ्जन्वद्वाचिह्निना व्यज्यते। अत्रावमादभारगौरवयोर्विशेषण गत्या पात्रपात हेतुत्वात् काव्यलिङ्गम् ॥ ८१ ॥

भ्रममिति। शुचो भाविविरहभाविनाः शोका, अविशददृश शोकादेशप्रसङ्गे कस्याश्चिदिति शेष। मदमपास्य तदुत्पत्तिं प्रतिरुध्य तदीयं गुणं तद्धर्मं मदकार्यभूतमित्यर्थः। भ्रमं भ्रान्तिमङ्गसादमङ्गशैथिल्यं कपोलयोररुणत्वं असकलमसमाप्तं वाक्यं चात्मना स्वयम्। प्रकृत्यादिभ्य उपसंख्यानात् तृतीया। अत्र विदधुः करणेन तद्गुणालङ्कारः, सदस्यार्थं अत्र मदाभावेऽपि तत्कार्योदयात् तत्कार्यशोकनिमित्तकशोकात्मा उक्त निमित्तात्शोऽभिभवाभेद ॥ ८२ ॥

सुदृश इति। अथाधिकरसमरे सुरभि धर्मकगमनाय युद्ध गम

युवभिरथ सम्बभाषिरे ।
शोकविहितगलरुद्धगिर-
स्तरसा तदाश्रुजलकेवलोत्तराः ॥ ८३ ॥
विपुलाचलस्थलघनेन
जिगमिषुभिरङ्गनाः प्रियैः ।
पीनकुचतटनिपीडदल-
द्वरवारबाणमुरसा सिष्वञ्जिरे ॥ ८४ ॥
न मुमोच लोचनजलानि

माद । समीकं साम्परायिकमित्यमरः । सुदृशः शोकविहिते शोकाहते गले कण्ठे रुद्धगिरः प्रतिबद्धोत्तरवाचस्तथापि तरसा वेगेनागतमश्रुजल-मेव केवलं निर्वर्तितमुत्तरं यासां ताः । निर्वर्तितं केवलं शोकमिति शेषः । सम्बभाषिरे संभाषिताः । योद्धुं गच्छाम इत्यामन्त्रिता इत्यर्थः कष्टमेतदानिमदर्शनमिति वाक्यभेदेऽप्यश्रुपातेनैवानन्तरं दत्तोत्तरा-णामित्यर्थः अश्राव्यश्रुपातोऽनिमित्तमिति भावः एतेन गन्तव्यं चेत् गच्छत स्वस्थ युष्मत्प्रत्यागमनम् [illegible] इत्यनिष्टविषयाभासरूपाक्षेपालङ्कारो व्यज्यते । अनिष्टविध्याभासरूपेऽपि शब्दवैशद्यनिषेधार्थाभावदत्राऽपि तत् स्यात् ॥ ८३ ॥

विपुलेति । जिगमिषुभिर्युद्धाय गन्तुमिच्छुभिः । प्रियैः कान्तैः अङ्-गनाः विपुलं यदचलस्थलं तद्वद्घनेन दृढेन उरसा निजवक्षसा कर्तृ-भूतेन पीने कुचतटे निपीडो नितरां पीडनं तेन दलन्तो विदीर्यमाणा वरा श्रेष्ठा वारबाणाः कञ्चुका यस्मिन्कर्मणि तद्यथा तथा । कञ्चुको वारबाणोऽस्त्रीत्यमरः । परिषस्वजिरे आलिङ्गिताः । अत्र वारबाणानां दलनाद्युत्पत्तोऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः ॥ ८४ ॥

नेति । दयितस्य प्रयाणदर्शं तदर्शनमङ्गलमित्यर्थः । अवरोधादि

दयितजयमङ्गलैषिणी।
यातमवनिमवसन्नभुजा-
न्न गलद्विवेद वलयं विलासिनी॥ ८५॥
प्रविवत्सतः प्रियतमस्य
निगडमिव चक्षुरक्षिपत्।
नीलनलिनदलदामरुचि
प्रतिपादयुग्ममचिरोढसुन्दरी॥ ८६॥
व्रजतः क्व तात व्रजसीति
परिचयगतार्थमस्फुटम्।

वकृदर्थे षष्ठीसमासः। तदिच्छतीति तदैषिणी विलासिनी काचिदङ्गना बोधमलत्वान्यथ् पि न मुमोच अश्रुपातस्यामङ्गलत्वादिति भावः। अ मङ्गलं तदन्यत मङ्गलमेतस्मात् यातमिति। अवसन्ना भुजा शोकशैथि ल्यात्कारात् गलद्भ्रंशदेवावनिमुर्वीं यातं प्राप्तं वलयं कङ्कणं न विवेद। अवश्यभाविनां को निवारक इति भावः। एषा च दैवचिन्तकेति। अ त्वावसादस्य विशेषणगत्या वलयपातहेतुत्वात्काव्यलिङ्गम्॥ ८५॥

प्रेति। अचिरोढसुन्दरी काचिन्नवोढा स्त्री प्रविवत्सतः प्रवासं क र्तुमिच्छतः। वसेः सन्नन्तात्शतृ प्रत्ययः। प्रियतमस्य प्रतिपादयुग्मं पादयुग्मे। विभक्त्यर्थेऽव्ययीभावः। नीलनलिनदलदामरुचि नीलो त्पलमाला सच्छायमित्युपमा। निगडमिव शृङ्खलमिव चक्षुर्नेत्रमक्षि पत् प्रेरयदित्यर्थः। चक्षुषोदूरे पदमपि गन्तुं समर्थोऽसीत्यर्थः तच्च दुर्नि मित्तमिति भावः प्रयाणे स्त्रीणामशोकनिषेधात्। अत्रोपमामाहात्म्या चक्षुषो निगडत्वोत्प्रेक्षेति सङ्करः॥ ८६॥

व्रजत इति। जनन्या अपशकुनभीताया मातुर्निभर्त्सनादिव भृशं मन्युना महाकोपेन पित्रा बालकेन हे तात! जनक! तातस्तु जनक

धैर्य्यमभिनदुदितं शिशुना
जननीनिभर्त्सनविवृद्धमन्युना ॥ ८७ ॥
शठ! नाकलोकललनाभि
रविरतगतं रिरंससे ।
तेन वदसि मुदमित्यवद
द्रणरागिणं रमणमीर्ष्ययाऽपरा ॥ ८८ ॥
म्रियमाणमप्यगलदसु

मित्यमरः । [illegible] वदतिस्म ॥ [illegible] ॥ [illegible]
[illegible] । [illegible]
[illegible] तदापि [illegible] ।
[illegible] । [illegible] धैर्य्य
[illegible] । [illegible]
[illegible] । [illegible]
[illegible] । [illegible]
[illegible] । [illegible]
[illegible] ॥ ८७ ॥

[illegible] । [illegible]
[illegible] । [illegible]
[illegible] । [illegible]
[illegible] । [illegible]
[illegible]
[illegible]
[illegible] ॥ ८८ ॥

[illegible] । [illegible]

गमति दयिते नतभ्रुवः ।
स्नेहमकृतकरसं दधता
मिदमेव युक्तमतिमुग्धचेतसाम् ॥ ८९ ॥
सह कज्जलेन विरराज
नयनकमलाम्बुसन्ततिः ।
गण्डफलकमभितः सुतनोः
पदवीव शोकमयकृष्णवर्त्मनः ॥ ९० ॥
क्षणमात्ररोधि चलितेन

अपि प्रियमाणमसह्यमिव धार्यमाणमपि । धरते कर्मणि लट् शानजादेशः । अगाधदुःखत शोकातिरेकाद्धारयितुमशक्य मासीदित्यर्थः । तथाहि अकृतकरसमकृत्रिमरागं स्नेहं प्रेम दधता अत एव अतिमुग्धचेतसां अत्यन्तासमर्थबुद्धीनां इदमेवाश्रुवरणं युक्तम् । अन्यथा स्नेहव्याघातेन तत्कालविरहासहत्वमोचनं नानुचितमिति भावः । रसस्नेहयोरागश्चेमायरनाम्नाद्रसस्य भङ्गात् भव रागस्नेहभ्यन्या प्रेम अस्नियोगाद्वाह्यवृत्तेरिति रससारे । सामान्येन विशेषसमर्थनरूपोऽर्था न्तरन्यासः ॥ ८९ ॥

सहेति । सुतनोः शुभाङ्ग्याः गण्डफलकमभितो गण्डस्थलयोरित्यर्थः । अभितः परितः इत्यादिना द्वितीया । नयनकमलाम्बुसन्ततिरश्रुधारा कज्जलेनाञ्जनेन सह शोक इव शोकमयस्तस्य कृष्णवर्त्मनः शोकाग्नेः पदवी निःसरणमार्ग इव विरराज शुशुभे येन वर्त्मना अग्निर्गच्छति तत् कृष्णं भवतीति कृष्णवर्त्मा अतोऽप्यश्रुपात एव दुर्निमित्तमिति भावः ॥ ९० ॥

क्षणेति । कतिपयं च तत्पदं च तत् । जातावेकवचनम् । कतिपयपदानीत्यर्थः । पदशब्दस्य तदवच्छिन्नदेशवाचित्वादत्यन्तसंयोगे द्वि

कतिपयपदनन्तमुवः ।
स्तस्तभुजयुगगलद्वलय
स्तनितम्रति चुतमिवोपघुङ्ग्रुवे ॥ ९१ ॥
अभिवर्त्म वल्लभतमस्य
विगलदमलायतांशुका ।
भूमिनमसि रभसेन यतो-
विरराज काचन समम्महोल्कया ॥ ९२ ॥
समरोन्मुखे नृपगणेऽपि

[illegible] । [illegible] [illegible] [illegible]
[illegible]कम् । [illegible] प्रत्यधिकं स्यात्तुमनी
[illegible]दिति भावः । [illegible] [illegible] झटिति प्रकोष्ठापे
पतितानां भुजयुगलद्वलयानां [illegible] स्तनितं रणत्-
कारं [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible]
[illegible] पुंसीत्यमरः । रणत्कारे [illegible] निहतं [illegible] [illegible]
[illegible] । [illegible] [illegible] [illegible]लङ्कारः दैन्यविशदाख्या-
[illegible] ॥ ९१ ॥

अभीति । वल्लभतमस्य प्रियतमस्याभिवर्त्माभिमार्गे विगलद्वशादात्
[illegible] [illegible] यस्याः [illegible] विगलन्तो [illegible]
[illegible] अमला [illegible] आयता दीर्घीभूता [illegible] यस्याः
सा । [illegible] [illegible] । [illegible] [illegible] तस्मिन् भूमिनभसि रभसेन
वेगेन यतो [illegible] । [illegible] [illegible] [illegible] । काचनाङ्गना महो-
ल्कया सह [illegible] विरराज । [illegible] [illegible] [illegible]
[illegible] दुर्निमित्तमिति भावः [illegible] ॥ ९२ ॥

समरेति । [illegible] समरोन्मुखेऽपि [illegible] नृपगणस्यानुसरणे [illegible]-

तदनुभरणोद्यतैकधीः।
दीनपरिजनहृताम्बुजलो
न भटीजनः स्थिरमनाविचक्रमे ॥ ९३ ॥
विदुषीव दर्शनममुष्य
युवतिरतिदुर्लभम्पुनः।
यान्तमनिमिषमविलम्बमनाः
पतिमीक्षते स्म भृशमाढ़शः पथः ॥ ९४ ॥
सम्प्रत्युपेयाः कुशलो पुनर्युधः
सस्नेहमाशीरिति भर्त्तुरीरिता।

भरणे उद्यतोद्युक्ता अतएवैका मुख्या धीर्यस्य सः। दीनेनार्त्तेन परिजनेन हृताम्बुजलो मुक्ताश्रुजलो दासीमुक्ताश्रुबिन्दु रित्यर्थः। तथापि स्वयं स्थिरमना अचलितचित्तो भटीजनो भटस्त्रीलोकः। नानाविक-वदनं पुंसोऽनवरतमार्गमिव भोगेच्छुक्। न विचक्रमे न गतवान् अन्यतायिशयानां कृतं एतावत इति भावः। अत्र भरणोद्योगस्य विशेषणगत्या अक्षोभहेतुत्वात् काव्यलिङ्गभेदः ॥ ९३ ॥

विदुषीति। युवतिः काचिदङ्गना अमुष्य पत्युर्दर्शनं पुनः पश्चादतिदुर्लभम् अस्याः पुनरदर्शनमिति भावः। विदुषी जानती वेत्तेः शतृ-प्रत्ययः। विदेः शतुर्वसुरिति वस्वादेशः उगितश्चेति ङीप्। अविलम्ब-मना अविलम्बचित्ता सती यान्तं योद्धुं गच्छन्तं पतिं भर्त्तारं आढ़-शःपथः आदृष्टिपथात् दृष्टिपथातिक्रमपर्यन्तमित्यर्थः आङ्मर्यादाभि-विध्योरिति। विभक्त्यादावव्ययीभावः। अनिमिषं निमेषरहितं यथा तथा ईक्षते स्म ॥ ९४ ॥

सम्प्रतीति। सम्प्रतीदानीमेव कुशली भद्रः सन् युधोयुद्धात्पुन-रुपेयाः प्रत्यागच्छेति सस्नेहं भर्तुरीरिता भर्त्रे प्रयुक्ता आशी-

सद्यः प्रसह्य द्वितयेन नेत्रयोः
प्रत्याचचक्षे गलता भटस्त्रियाः ॥ ९५ ॥

काचित्कीर्णा रजोभिर्दिवमनुविदधे भिन्नवक्त्रेन्दुलक्ष्मी-
रश्रीकाः काश्चिदन्तर्दिश इव दधिरे दाहमुद्भ्रान्तसत्त्वाः ।
भ्रेमुर्वात्या इवान्याः प्रतिपदमपरा भूमिवत्कम्पमापुः

रागोद्रेकः सद्यः प्रसह्य बलात् प्रबन्धमाणा स्रवद्रूपा तया भट-स्त्रियाश्रुधारया लङ्घ्या एव। अस्तीति प्रतिषेधार्थकीयत्वादडागमः। नेत्रयो-र्द्वितयेन प्रत्याचचक्षे प्रत्याख्याता निराकृतेत्यर्थः अमङ्गलेनाश्रुपातेन निष्फलीकृतेत्यवश्यं भवितव्यं भवत्येवेति भावः। चा क्षिङीति विक-ल्पात् चक्षिङः ख्याञादेशः। अत्राश्रुपातस्य नेत्रद्वितयस्य द्वारा यथोः प्रत्याख्याने हेतुत्वात् काव्यलिङ्गभेदः ॥ ९५ ॥

काचिदिति। काचित् स्त्री रजोभिरार्त्तवैरङ्गसंस्कारत्यागात् पांसु-भिश्च कीर्णा। स्यादजः पुष्पमार्त्तवमिति। पांसुर्ना न द्वयोरज इति चामरः। दिवमपीत्यातिकषांशुर्व्याकुलः कीर्णता। वक्त्रमिन्दुरिव कस्याश्च वक्त्रमिवेन्दुर्भिन्नास्य लक्ष्मीर्यस्याः सा भिन्नवक्त्रेन्दुलक्ष्मीः। सह्यवचनान्तो बहुव्रीहिः। एवमपि एकवचनान्तस्येव लक्ष्मीशब्दस्यो-रःप्रभृतिषु पाठात् तद्भिन्नः कप्रत्ययः शेषिकस्तु वैभाषिकः इत्य-विरोधः। कांचिदाशो दिवमनु विदधे अनुचकार। काश्चिदपराः दिश इवाश्रीका शीतशोभा। उद्भ्रान्तसत्त्वा उद्भ्रान्तं चित्तं उद्भ्रान्तजन्तुकाश्च सत्त्वः। अन्तरात्मनि मध्ये च दाहं सन्तापम्। अन्तर्नीत्यात्मिकं दाहं दधिरे दधुः। अन्याः काश्चिद् वात्या इव वातसमूहा इव। पाशा-दिभ्यो य इति यत्प्रत्ययः। प्रतिपदं पदेपदे। अव्ययीभावे शर-त्प्रभृतिभ्यः टच् इति समासान्तः टच्प्रत्ययः। भ्रेमुर्भ्रान्ताः। वा जॄ-भ्रमुत्रसामिति विकल्पादेत्वाभ्यासलोपौ। अपरा नार्यो भूमिर्भुवं भू-मिवत् कम्पमापुः इतीदं पादितानां प्रस्थाने प्रवाहे नार्यो भाव-

प्रस्थाने पार्थिवानामशिवमिति पुरोभावि नार्य्यः शशंसुः

इति श्रीमाघकृते शिशुपालवधे
महाकाव्ये पञ्चदशः सर्गः ॥ १५ ॥

शुभं पुरः पूर्वं शशंसुः सूचयामासुरित्यर्थः । अत्र नारीणां मार्ग-शुभसूचनस्य रजोदाहादिवाक्यार्थहेतुकं काव्यलिङ्गं तत्र नारीणां पुं-स्त्रिया उपमाभिस्तद्रजोदाहादिवत्सारीरजोदाहादीनां अशुभसूचकत्व-मित्युपमाकाव्यलिङ्गयोरङ्गाङ्गिभावेन सङ्करः । सङ्घारिषश्च पूर्ववद्विषादा-दयः सुगमाः । अत्र काश्चित्स्त्रीशरीरजोभिर्दिवमहविरहभिन्नवक्त्रेन्दु-लक्ष्मीभिर्श्चीकाः काश्चिदिति पाठे काश्चित्स्त्रीष्वित्येकवचनप्रक्रमभङ्गे दोषो नास्ति न चैवमुपमानोपमेययोर्भिन्नवचनत्वं दोषः लोकेषु चन्द्रादिष्वेकत्व-नियतेषु दोषबुद्ध्यनुदयात् । यथाह दण्डी । न लिङ्गवचने भिन्ने न हीनाधिकतापि वा । उपमा दूषणायालं यत्रोद्वेगो न धीमतामिति । स्रग्धरावृत्तम् । म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेय-मिति लक्षणात् ॥ ८६ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघ काव्य-व्याख्याने सर्वङ्कषाख्ये पञ्चदशः सर्गः ॥ १५ ॥



षोडशः सर्गः ।

दमघोषसुतेन कश्चन
प्रतिशिष्टः प्रतिभानवानथ ।
उपगम्य हरिं सदस्यदः
स्फुटभिन्नार्थमुदाहरद्वचः ॥ १ ॥

अभिधाय तदा तदप्रियं
शिशुपालोऽनुशयं परं गतः ।

अथास्मिन्सर्गे हरेर्दूतसंवादं वर्णयति । दमघोषेत्यादि । अथ चैद्यकोपानन्तरं दमघोषसुतेन शिशुपालेन प्रतिशिष्टः प्रेषितः प्रतिभानवान् [illegible] । कश्चन [illegible] हरिं सदस्युपगम्य प्राप्य सदसि सभायां स्फुटौ भिन्नावर्थौ [illegible] स्फुटभिन्नार्थं युगपत्प्रियाप्रियार्थाभि[illegible] [illegible] वचः उदाहरत् व्याहरत् । [illegible] ॥ १ ॥

[illegible]

भवतोऽभिमनाः समीहते
सरुषः कर्त्तुमुपेत्य माननाम् ॥ २ ॥
विपुलेन निपीड्य निर्दयं
मुदमायातु नितान्तमुन्मनाः ।
प्रचुराधिगताङ्गनिर्वृति
मपरित्यक्तवाङ्गलु विग्रहेण सः ॥ ३ ॥

अनुनयं केवलं न सहायः किन्तु हन्तव्यति दीर्घदर्शितः प्राज्ञः ।
रक्षेत् अन्देऽपातुगयोर्दीर्घदेर्घातुतामयोरित्युभयत्राप्यमरः । अतएव
भाक्तिमीयैरुक्षेत्यामि निर्भीकं मनोयस्य सोऽभिमनाः निःशङ्कचित्तः सन्
उपेत्य स्वयमागत्य सरुषः सकोपस्य भवतोमाननां क्षमभं कर्त्तुं समी-
हते । माननां क्षमने मरणे इत्युभयत्रापि केशवः । भङ्क्तुं हन्तुमिच्छ-
तीत्यर्थः । मनक्षमे इति धातोर्णौरादिकात् ल्युट् णिचोलुक् । अत्र
महर्दयसोक्यां परहृदयपरीक्षापरायां दूतामप्रियाप्रिये द्वे अपि
वक्तव्ये चमत्काराय तु श्लेषभङ्ग्याभिधीयेते इति प्रियाप्रिययोर्द्वयोरपि
प्रकृतत्वाऽभिधेयत्वाच्छब्दमात्र साधर्म्याश्च केवलप्रकृतगोचरः श्लेषः । प्रस-
माप्रकृतोभयगतमुक्तत्वेच्छब्दमात्रसाधर्म्यं श्लेषोऽयमिति लक्षणात् । न
चोभयगत भिन्नार्थतुल्योरभ्यनरगम्यतया तदुत्थापनात् इह उभय शुग-
पत्पयोर्दिन खरया मानुत्वमधैतरस्य ते इति वक्ष्यमाणलिङ्गादुभयोर्वर्
ण्यचावगमादित्यलं प्रपञ्चेन ॥ २ ॥

विपुलेनेति । उन्मनाः उत्सुकचेताः स चैद्यः परित. प्रचुरं प्रभूतं
यथा तथा अधिगता प्राप्ता अङ्गनिर्वृतिः शरीरसुखं कृतमङ्गलत्वं येन तं
त्वां विपुलेन विविधपुलकेन । पुलः स्यात्पुलकेनापि पुलस्तु विपुलेऽन्य-
वदिति विश्वः । विपक्षेण वपुषा निर्दयं गाढं निपीड्यालिङ्ग्य नितान्तं
मुदमायातु खलु । परपक्षे । उन्मना मनस्वी स चैद्यः प्रचुरेणाधिना
मनोव्यथया गताङ्गनिर्वृतिं विगत शरीरसौख्यं त्वां विपुलेन महता

प्रणतः शिरसा करिष्यते
सकलैरेत्य समन्धराधिपैः ।
तव शासनमाशु भूपतिः
परवानद्य यतस्त्वयैव सः ॥ ४ ॥

अधिवह्निपतङ्गतेजसो
नियतस्वान्तसमर्थकर्म्मणः ।
तव सर्व्वविधेयवर्त्तिनः
प्रणतिं बिभ्रति केन भूभृतः ॥ ५ ॥

विग्रहेण समरेण । विग्रहः समरे काये इति विश्वः । निर्दयं निष्कृपं नि-
पीड्य हत्वा सदमायात ॥ ३ ॥

प्रणत इति । भूपतिः चैद्यः सकलैर्धराधिपैः समं सह एत्यागत्य
शिरसा प्रणतः प्रणामं कृतवान् । कर्त्तरि क्तः । आशु तवशासनमाज्ञा
करिष्यते तदाज्ञाकरो भविष्यति । कुतः यतः स चैद्योऽस्मिन् समरे
त्वयैव परवान् त्वदेकशरणत्व । पक्षस्तु । शिरसा प्रणतोऽनमस्कृतो धराधि-
पैरिति भावः । कर्म्मणि क्तः । भूपतिस्तवशासनं शासितं शिक्षां करिष्यते
यतस्त्वयैव परवान् प्रभुमान् त्वमेक एवास्य प्रभुर्दण्डक इति भावः ।
समन्तपम् दाधन राजदत्तोऽक्षे । लेखाज्ञायाञ्च शासनमिति विश्वः ॥ ४ ॥

प्रणामे हेतुमाह । अधीति । अधिगतं वह्निपतङ्गयोरग्निसूर्य्यो-
रिव तेजो येन तस्य तत्तुल्यतेजस इत्यर्थः नियतस्वान्तो नियतचित्तः स
चासौ समर्थकर्म्मा च । खञ्जकुब्जादिवत्समासः । तस्य यथोक्तस्य सर्व्वे
र्विधेयवर्त्तिनोऽवशवर्त्तिनः कर्म्मकरा यस्य तस्य तव के भूभृतः प्रणतिं नतिं
न बिभ्रति सर्व्वेऽपि बिभ्रतीत्यर्थः । पक्षस्तु । प्रणामे हेतुमाह । अधि-
वह्नि वह्नौ पतङ्गस्य शलभस्येव तेजः पौरुषं यस्य तस्य । पतङ्गः शलभे
भानाविति विश्वः । नियते अव्यभिचारे स्वान्ते स्वविनाशे समर्थं हेतुभूतं

जनताभयशून्यधीः परै
रभिभूतामवलम्बसे यतः ।
तव कृष्ण ! गुणास्ततोनरै
रसमानस्य दधत्यगण्यताम् ॥ ६ ॥
अहितादनपत्रपस्त्रस
न्नतिमात्रोज्झितभीरनास्तिकः ।

कर्म यस्य तस्य सर्वेषां विधेये वर्त्तते विधेय मर्त्तं यति वा सर्वविधेयवर्त्तिन सर्वकिङ्करस्य निष्पौरुषस्य तव केन गुणेन भूयते मर्यातिस्थिमति न केनापीत्यर्थः ॥ ५ ॥

जनतामिति । हे कृष्ण । हे हरे । भयशून्यधीर्निर्भीकचित्तः सन् परैः शत्रुभिरभिभूतां जनतां जनसमूहम् । ग्रामजनेत्यादिना समूहे तल् प्रत्ययः । यतोऽवलम्बसे परिरक्षसि रक्षसीत्यर्थः । ततो हेतोर्नरैर् असमानस्य सर्वोत्कृष्टस्य तव गुणाः आर्त्तभूभरणादयः अगण्यतामसङ्ख्यतां दधति । परपक्षे तु । हे मलिनात्मक । भयशून्यधीर्दृढबुद्धिः परैरन्यैः दर्भैः पर दूरान्यसख्येषु परोऽरिपरमात्मनोरित्युभयत्रापि वैजयन्ती । अभिभूता अवधीरितां जनतामनुपालनपारतन्त्र्यादिना दुर्गतजनत्वम् । भावेऽर्थे तल्प्रत्ययः । यतोऽवलम्बसे आश्रयसि । ततो नरैरसमानस्य ततोऽपि हीनस्येत्यर्थः । तव गुणाः केऽपि न स्वभावतोऽपीति भावः अगण्यतामनादरणीयतान्दधति ॥ ६ ॥

अहितादिति । त्वया सदृशोऽन्यो गुणवान् गुणाढ्यः कुत्र न कुत्रापीत्यर्थः । कुतः अहितादनर्थात् त्रसन् अधर्मभीरुरित्यर्थः । अपत्रपोऽनित्रपो न भवतीति अनपत्रपस्त्रपावान् अकार्यजुगुप्सुरित्यर्थः । अतिमात्रमत्यन्तमुज्झितभीस्त्यक्ताऽरिभयः इत्यर्थः । न अस्तिमतिरस्येति नास्तिपरलोकः । अस्तिनास्तिमतिरिति ठक् । स न भवतीत्यनास्तिक आस्तिक इत्यर्थः । विनयेनाभोद्यमेनोपहितो विशिष्ट विनयवानित्यर्थः ।

विनयोपहितस्त्वया कुतः
सदृशोऽन्यो गुणवानविस्मयः ॥ ७ ॥
कृतगोपवधूरतेर्घ्नतो
वृषमुग्रे नरकेऽपि सम्प्रति ।
प्रतिपत्तिरधः कृतैनसो
जनताभिस्तव साधु वर्ण्यते ॥ ८ ॥

विक्रमोऽविस्मयश्चैव न भवतीति कविस्मयोऽगर्वः । परत्र[illegible] । तथा त्वद-न्योऽन्यो गुणवान् भवतीत्यगुणवान् निर्गुण इत्यर्थः कुतः [illegible] न कुत्रापीत्यर्थः । कृतः [illegible] भीरः नास्ति [illegible] विशेषोऽयमल-[illegible] निर्वेदः । [illegible] इत्यर्थः । नतिमात्रेण प्रणामेनै-वोपभीतभीरपराधतारिमव न तु पराक्रमेणेति भावः । [illegible]-[illegible] । पूर्ववत् [illegible] । स न भवतीत्यर्थाक्षिप्तः ना-[illegible] विनयेनयातीत [illegible] हितोऽहितादपैतः [illegible] भवतीति अविक्रमोऽगर्वो गर्वयुक्त इत्यर्थं अत्राहितादित्यर्थे[illegible] [illegible] [illegible] ॥ ७ ॥

कृतेति । गोपस्य वधूर्गोपवधूः । स्त्रियाः पुंवदित्यादिना पुंव-द्भावः । तासु रतिः कृता येन तस्य गोपीजनवल्लभस्येत्यर्थः । उग्रं वृषभ-रूपिणं दैत्यमरिष्टासुरं घ्नतो मारयतः । [illegible] । अधः-कृतैनसो निरस्तपापस्य तवोग्रे महति नरके नरकासुरे प्रतिपत्तिः प्र-वृत्तिः [illegible] इति यावत् सम्प्रति जनताभिर्जनसमूहैः साधु वर्ण्यते । [illegible] । परमार्थस्तु । गोपानां वधूषु रतिः कृता येन तस्य पारदारिकस्य [illegible] वृषभं वा घ्नतः । [illegible] इति [illegible] । [illegible] तेन [illegible] नरके निरये [illegible] । प्रतिपत्तिः [illegible]
[illegible]

यदुपुङ्गव ! बन्धुसौहृदा-
त्त्वयि पाता ससुरो न वासवः ॥ १२ ॥
चलितानकदुन्दुभिः पुरः
सबलस्त्वं सह सारणेन तम् ।
समितौ रभसादुपागतः
सगदःसम्प्रतियत्तुमर्हसि ॥ १३ ॥

चारुलोचनानि यस्य स । सह सुरया माध्व्या गौड्या वा ससुरः । गौडी पैष्टी च माध्वी च विज्ञेया सा सुरा त्रिधेति वचनात् । अत्र राजन्यवैश्ययोः पैष्ट्यामेव निषेधः । नवासवीनमसदं नालिकेरादि-कमिति सुरासवयोर्न पौनरुक्त्यम् । बन्धुसौहृदात् बन्धौ त्वयि स्नेहात् पाता पास्यते त्वदुत्सङ्गे सह पानं करिष्यते सम्प्रति ते सवप्रतिपक्ष-त्वादिति भाव । पिबतेः कर्मणि लुट् । यद्वा तु । हे यदुपुङ्गव ! यादवश्रेष्ठ ! वैदेहेन सह घटा उपेयुषः समराभियोगङ्गतस्य तव विक-चोत्पलचारुलोचनः । ससुरं सदेवो वासवोऽपि बन्धुसौहृदात् उपेन्द्रे त्वयि सौभ्रात्रादित्यर्थः । पाता त्राता न किं पुनर्भवका भीष्मादय इति भावः । पातेस्तृच् । सुहृदयस्य भावः सौहृदमिति विग्रहः युवा-दित्वादण्प्रत्ययः हृदयस्य हृल्लेखेति हृद्भावविधानसामर्थ्यान्न हृद्भगे-त्युभयपदवृद्धिः अतएव सौहृददौर्हृदयशब्दाभ्यामपि हृद्भावाविति वाम-नः सुहृदस्तु सौहार्दमेव । शब्दार्थालङ्कारः ॥ १२ ॥

चलितेति । रभसाद्धर्षादुपागतं प्राप्तं चैद्यं त्वं पुरश्चलिता-नकदुन्दुभिः पुरोगतवसुदेवः । वसुदेवोऽस्य जनकः स एवानकदुन्दु-भिरित्यमरः । सबलो बलभद्रसहितः । सारणेन सारणाख्येन भ्रात्रा सह सगदः गदाख्येन अनुजेन सहितः समितौ सभायां सम्प्रतियत्तुं सम्प्र-तियत्तुं अर्हसि सर्वबन्धुसमेतः प्रत्युद्गन्तुमर्हसीत्यर्थः । [illegible]

समरेषु रिपून्विनिघ्नता
शिशुपालेन समेत्य सम्प्रति ।
सुचिरं सह सर्वसात्वतै-
र्भव विश्वस्तविलासिनीजनः ॥ १४ ॥
विजितक्रुधमीक्षितास्त्वसौ
महतां त्वां महितं महीभृताम् ।
असकृज्जितसंयतस्पृशो

समासामपि सङ्कुलेऽप्यमयत्वापि जितः। तं चैद्यं पुरतः चलिता आनकाः पटहाः दुन्दुभयो भेर्यश्च यस्य सः। आनकः पटहोऽस्त्री आङ्गे रो स्त्री दुन्दुभिः पुमानित्यमरः। सवन्तः ससैन्यः। सगदः गदया कौमोदक्या सहितः सन् सहसा झटिति। एकेन युद्धेन हन्तुं निपातुमभियोक्तुमर्हसि। अत्रापि पदार्थश्लेषोऽलङ्कारः ॥ १३ ॥

समरेष्विति। हे विष्णो समरेषु रिपून् विनिघ्नता अभिघ्नतैवमेत्यर्थः। शिशुपालेन समेत्यैक्यं प्राप्य सम्प्रति सुचिरं बहुकालं सात्वतः अपत्यानि पुंमांसः सात्वता यादवाः। उत्सादिभ्योऽञ्। तैः सर्वैः सर्वसात्वतैः सह विश्वस्तविलासिनीजनः शिशुपालभयनिर्वृत्तिविश्रब्धविलासिनीजनो भव। समौ विश्रम्भविश्वासावित्यमरः। परत्र तु। रिपुघातिना शिशुपालेन सह समरेषु समेत्य सङ्गत्य सम्प्लेव सर्वसात्वतैः सह विध्वस्तविलासिनीजनो भव। विश्वस्ता विधवा समे इत्यमरः। आदित्यत्वेति चकारादनुक्तसमुच्चयार्थात् कृद्भिभिन्नादिप्रतिषेधः। शिशुपालसहन्तामेवाय सार्धं हता मोढतामापि तव सर्वथा यादवानां च न विनङ्क्ष्यतीति भावः ॥१४॥

विजितेति। असौ महीपतिश्चैद्यः सुचिरं सन् विजितक्रुधं मैत्री सम्प्रतिरक्षकोपं महतामपि भूभृतां राज्ञां महितं पूजितम्। मति बुद्ध्यर्थादिना वर्तमाने क्तः मद्योगे षष्ठी। असकृद्बहुशो जिताः संयताः बाहवो येन स तम्। एकद्रायः क्षितौ संयतामित्यादिनाभिटाभ ...

मुदितः सप्रमदश्चेदीपतिः ॥ १५ ॥
इति जोषमवस्थितं द्विषः
प्रणिधिं गामभिधाय सात्यकिः ।
वदति स्म वचोऽथ चोदित
श्चलितैकभ्रु रथाङ्गपाणिना ॥ १६ ॥
मधुरं बहिरन्तरप्रिय
ङ्कृतिनाऽवाचि वचस्तथा त्वया ।
सकलार्थतया विभाव्यते

र्द । सप्रमद सहर्षं त्वा त्वाम । द्वितीयाया इति त्वादेश । पुरोऽग्रे ईक्षिता पश्यतु । परन्तु विजितमृध सङ्ग्रामोध सङ्गता सञ्जीभूता चैद्यादीनामङ्कितमरिभयकृज्जितवानौ भयतव । समासात्तिप्रमतपूर्वकालेति समास । चट्टोनट्टय भयत इति वैजयन्ती । सप्रमद सखाक त्वामिति पदच्छेद असङ्गतिताम ॥ १५ ॥

इतीति । इतीत्यम्भूता गा वाच अर्जुनो नैतदिगवायभूयास्वारिपु गोभिरेति विश्व । अभिधाय जोषमवस्थितम । तूष्णीं जोष भवेन्मौन इति वैजयन्ती । द्विष प्रणिधि दूत सात्यकि शैनेय अथ दूतवाक्यानन्तर रथाङ्ग चक्र पाणौ यस्य तेन रथाङ्गपाणिना हरिणा । प्रहरणार्थेभ्य परे निष्ठासप्तम्यौ भवत इति पाणे परनिपात । चलिता प्रेरिता एका भ्रूर्येनित् कर्मणि तत । गोस्त्रियोरुपसर्जनस्येति ह्रस्व । चोदित अस्योत्तर देहीति भ्रूसञ्ज्ञया प्रेरित सन्निदं वचोऽवदत अभाषीत ॥ १६ ॥

किन्तद्वचस्तदेकविंशतिश्लोकैराह । मधुरमित्यादि । कृतिना कुशलेन त्वया बहि प्रकाशे मधुर प्रिय अन्तर्गर्भे अप्रिय वचस्तथा तत्प्रकारेणावाचि उक्तम् । वचे कर्मणि लुङ् चिणि वृद्धि । यथा येन

प्रियमन्तर्बहिरप्रियं यथा ॥ १७ ॥

अतिकोमलमेकतोऽन्यतः
सरसाम्भोरुहवृन्तकर्कशम् ।
वहति स्फुटमेकमेव ते
वचनं शाकपलाशदेश्यताम् ॥ ८ ॥

प्रकटम्मृदु नाम जल्पतः
परुषं सूचयतोऽर्थमन्तरा ।

यथार्थेन वक्त्रार्थतया स्वस्फूर्त्याभासार्थतया हेतुना अन्तः प्रियं बहिः प्रियं विभाति ते वचः पार्थतेऽप्रियार्थं प्रियं तदुक्तं तदन्तर्वर्त्यं तु प्रियं मर्ममप्रियमेव प्रतीयते । इदमुक्तं भावार्थं तवैवेत्यभिप्रेत्योक्तं कतिभेदि [illegible] बहिरप्रियं यथ इति भाव ॥ १७ ॥

अथवा बहिरेव प्रियं अन्तरेवाप्रियं तथापि न माधुर्यमित्याह अतीति । एकतो बहिरतिकोमलं अन्यतः अन्तः सरसमार्द्रं यदम्भोरुहं तस्य वृन्तं प्रसवबन्धनं तद्वत् कर्कशं परुषं एकमेव ते तव वचनं ईषदसमाप्तं शाकपलाशं शाकपलाशदेश्यं तस्य भावस्तत्ता ताम् । शाकं पत्रपुष्पादि [illegible] । शाकपलाशो महापत्रो महाशाकः .शिरटावर्दुनी इव इत्यभिधानरत्नमालायाम् । ईषदसमाप्तौ कल्पब्देश्यदेशीयरः इति देश्यप्रत्ययः कल्पदेश्यदेशीयानि सादृश्यवाचकानीति दण्डी । तस्य भावस्तत्ता तां स्फुटं वहति । अन्तः परुषत्वं बहिर्माधुर्यं शाकपलाशवदित्यर्थः । अत्र शाकपलाशोपमायाः प्रत्यन्तोपमावाचकत्वात् [illegible] ॥ १८ ॥

मर्मभिदमर्थमपि वाक्ये गुप्तमर्थं कृत्वा प्रियमेव अलपता त्वया श्री-[illegible] । प्रकटमिति । प्रकटं प्रकाशं मृदु नाम मृदुवत् [illegible] । अन्तरा मध्ये परुषमप्रियमर्थं सूचयतः [illegible]

शकुनादिव मार्गवर्त्तिभिः
पुरुषादुद्विजितव्यमीदृशात् ॥ १९ ॥
हरिमर्चितवान्स भूपति
र्यदि राज्ञस्तव कोऽत्र मत्सरः ।
न्यसनाय ससौरभस्य कः
स्तबकस्य शिरस्यसूयति ॥ २० ॥
सुकुमारमहो लघीयसां
हृदयन्तद्गतमप्रियं यतः ।

यदिदं युधिष्ठिरगृहयात पुरुषादीदृशः शकुनादिव वहि शुभङ्कर क्रूरेता उत्तरा पुरुष सूचयत पिङ्गलादिपक्षिभ्यइव मार्गवर्त्तिभि रध्वगैश्च उद्विजितव्य मेवायतोऽपि याह्यं विमधशक्तामवदखिलक्षाणर्थहेतुत्वा दितिभाव । विजडीतीट् कित्त्वाद्ग गुण ॥ १९ ॥

--एवं दूत निर्भर्त्स्य अथ चैद्यं तद्दोषोद्घाटनपूर्वकं भर्त्सयते । ह-रिमित्यादि । स भूपतिर्युधिष्ठिरो हरिमर्चितवान् यदि पूजित वाश्चेत् । अत्र हर्यर्चनेन तव राज्ञश्चैद्यस्य मत्सर कः निर्बन्ध इत्यर्थः । स सौरभस्य परिमलयुक्तस्य तत्स्तबकस्य । तत्स्तबकं गुच्छस्य माधारण तादीनार्थस्य । शिरसि न्यसनाय स्थापनाय कोऽसूयति न कोऽपीत्यर्थः । क्रुधद्रुहेर्ष्यादिना सम्प्रदानसंज्ञा । सर्वेन गुणवत्स्तु गुणवत्त्वेनैव मन्यते तदस्याभा किमत्र तथा यत्नाभिर्नेति भाव । अत्र हरिस्तबकयोर्वा-क्यद्वये विम्बप्रतिविम्बभावेनार्थां विरोधारयहुपमानधर्म्म निर्देशाव दृष्टान्तालङ्कार ॥ २० ॥

अथ कथ मह्यान् महता पूजा कृत इत्याशङ्का हरिचैद्ययो र्महदन्तरं मनसि निधाय सामान्य सुलभदूर्जनयोरन्तरं .पर्य्यभि दाह ।, सुकुमारमित्यादि । अयीयसामल्पानां हृदयं सुकुमारं तत्

सहसैव समुद्गिरन्त्यमी
क्षपयन्त्येव हि तन्मनीषिणः ॥ २१ ॥
उपकारपरः स्वभावतः
सततं सर्वजनस्य सज्जनः ।
असतामनिशन्तथाप्यहो
गुरुहृद्रोगकरी तदुन्नतिः ॥ २२ ॥
परितप्यत एव नोत्तमः
परितप्तोऽप्यपरः सुसंवृतिः ।

कुतः यतोऽमी लघीयांसस्त्वादृशाः हृदयगतं अप्रियं सहसैव झटित्येव बहिरुद्गिरन्ति प्रकाशयन्ति मनीषिणस्तु तदप्रियं क्षमयेव सम्भाव्यमानमपीति शेषः अन्तरेव क्षपयन्ति जरयन्ति न तूद्गिरन्तीत्यर्थः। अहो दूतप्रायो चैद्यस्योद्गार इति मैवं हरिरिति अहो महदन्तरमनयोरिति भावः। अतएवाप्रस्तुतात् सामान्यात् प्रस्तुतविशेषप्रतिपत्तिरूपोऽयमप्रस्तुतप्रशंसाभेदः। अप्रस्तुतस्य कथनात्प्रस्तुतं यत्र गम्यते। अप्रस्तुतप्रशंसेयं सारूप्यादिनियन्त्रितेति लक्षणात्। वाक्ये सामान्यविशेषसङ्करः। एवमुत्तरश्लोकद्वयेऽपि द्रष्टव्यं विशेषस्तु दृष्टान्तः ॥ २१ ॥

उपकारेति। किञ्च सज्जनः स्वभावतः सततं सर्वजनस्योपकाररतो भवति तत्स्वाभाव्यात् कदाचिदपकारं चिकीर्षतीति भावः। तथापि सर्वोपकारित्वेऽपि तदुन्नतिरसतां दुर्जनानामनिशं गुरुहृद्रोगकरी अत्यन्तहृदयसन्तापकारिणी अहो आश्चर्यम्। ननु हेतिप्रभृतिना ताडिता इत्यादिना कोप… स्वभावेनैव तापिनीति सेयमप्रस्तुतप्रशंसा ॥ २२ ॥

परितप्यत इति। किञ्च उत्तमः परवृद्धिभिः

परवृद्धिभिराहितव्यथः
स्फुटनिर्भिन्नदुराशयोऽधमः ॥ २३ ॥
अनिराकृततापसम्पद
म्फलहीनां सुमनोभिरुज्झिताम् ।
खलताङ्खलतामिवासती
म्प्रतिपद्येत कथम्बुधोजनः ॥ २४ ॥

एव उत्तमस्यापरगुणद्वेष एव नास्तीत्यर्थः । अपरो मध्यम एवैतद्दर्शं परितप्तोऽपि शोभना संवृतिः परितापगोपनं यस्य स सुसंवृतिः सन्नपि परगुणद्वेषं न प्रकाशयतीत्यर्थः । अधमस्तु परवृद्धिभिराहितव्यथ उत्पादितसन्तापः तथा स्फुटं निर्भिन्नः प्रकाशितो दुराशयः परगुणद्वेषलक्षणो दुरभिप्रायो यस्य स परगुणद्वेषं प्रकाशयतीत्यर्थः । चैद्यस्त्वधमोऽहन्तूत्तम इति प्रतीतेः पूर्वोक्त एवालङ्कारः ॥ २३ ॥

ननु मानिना परोत्कर्षे द्वेषोऽभ्युपगम्य एवेत्याशङ्क्य नेत्याह । अनिराकृतेति । अनिराकृता अनिवारिता तापसम्पत्तापातिशयो यया ताम् एकत्र सन्तापजननं स्वभावादपरत्र तत्कारणाविरहाच्चेति भावः । तथा फलहीनां एकत्र दृष्टादृष्टोपकारशून्यां प्रत्युतोपयक्षाप्यनर्थकरीं चेति भावः । अन्यत्र सस्यविरहितां सुमनोभिर्बुधैरुज्झितां अन्यत्र पुष्पैर्वर्जिताम् । सुमनाः पुष्पमालत्योः स्त्रियां देवबुधयोः पुमानिति वैजयन्ती । असतीं दुष्टाम् अन्यत्र निन्द्यामसतीं खलस्य भावः खलता तां खलतां दुर्जनत्वम् । खल्वशिरस्कता खलता गगनगतिकामिव बुधो जनः सदसद्विवेकज्ञो जनः कथं प्रतिपद्येतावलम्बेत न कथमपीत्यर्थः । दृष्टा मत्सरेण पराभिभवः इति भावः । तथापि च खलतां प्रतिपद्यते न चैद्यं दुर्जन इति प्रतीते चैद्यः खलताभाक् खलतामिवेत्युपमया सङ्कीर्यते । तत्र न कस्यापि मानभङ्गं करोति कोऽपि न्यायादसत्या अपि प्रवृत्तिकारणं प्रतीतिमलिनतया वस्तुतोऽसत्यप्रसिद्धिः ॥ २४ ॥

प्रतिवाचमदत्त केशवः
शपमानाय न चेदिभूभुजे ।
अनु हुङ्कुरुते घनध्वनिं
न हि गोमायुरुतानि केशरी ॥ २५ ॥
जितरोषरया महाधियः
सपदि क्रोधजितो लघुर्जनः ।
विजितेन जितस्य दुर्मते
र्मतिमद्भिः सह का विरोधिता ॥ २६ ॥
वचनैरसतां महीयसो

नन्वेवं महानुभावो हरिः किमर्थं तदा ष्ठदवि शपा निर्भर्त्स्यमानो मौनमास्थित इत्याशङ्क्य तथाभावादरात् तु कातर्यादित्याह । प्रतीति । केशवः शपमानाय क्रोशते । शपतेरात्मनेपदम् । चेदिभूभुजे । क्रियाग्रहणात् सम्प्रदानत्वम् । प्रतिवाचं प्रत्युत्तरं नादत्त । केशरी सिंहो घनध्वनिमनु हुङ्कुरुते प्रतिगर्जति गोमायुरुतानि शिवारुतानि नानुहुङ्कुरुते । स्त्रियां शिवा भूरिमाय गोमायुमृगधूर्तका इत्यमरः । महतामधमैः स्पर्धैव नास्तीति भावः । दृष्टान्तालङ्कारः ॥ २५ ॥

किञ्च रोषोऽस्य हरेर्विरोधोऽपि न योग्य इत्याह । जितेति । महाधियः पृथिवीजितो रोषवेगा यैस्ते तथोक्ताः । लघुरल्पो जनस्तु सपदि क्रोधजितः एवं विजितेन जितक्रोधेन जितस्य क्रोधेनैव जितस्य दुर्मतेर्मूर्खस्य मतिमद्भिः सह का विरोधिता स्पर्धा वा । दुर्मतिर्विजितयोर्मैत्रीव वैरमपि न घटतेऽर्थः । मूर्खप्रायं चेद्यः इति अस्मद्भावात् हेतुतोऽधिर-न्यूनदर्शनाभेदः ॥ २६ ॥

न खलु व्येति गुरुत्वमुद्धतैः।
किमपैति रजोभिरौर्वरै-
रवकीर्णस्य मणेर्महार्घता ॥ २७ ॥
परितोषयिता न कश्चन
स्वगतो यस्य गुणोऽस्ति देहिनः।
परदोषकथाभिरल्पकः
स्वजनं तोषयितुं किलेच्छति ॥ २८ ॥
सदसज्ज्ञान्धदृशः खदुर्नये
परदोषेक्षणदिव्यचक्षुषः

उद्धतैर्निष्ठुरैरसतां दुर्जनानां वचनैर्महीयसो महत्तमस्य गुरुत्वं गौरवं न व्येति नापैति खलु। और्वरैर्भौमैः। उर्वरा सर्वसस्याढ्या भूमिः इत्यमरः। रजोभिरवकीर्णस्य च्छन्नस्य मणेर्महार्घता महामूल्यत्वम्। मूल्ये पूजाविधावर्घ इत्यमरः। अपैति किं नापैत्येवेत्यर्थः। अत्र मणिमहीयसोरौपम्यभेदेन प्रतिबिम्बकरणाद्दृष्टान्तालङ्कारः। महीयस इति सामान्याद्वैरिदिति विशेषप्रतीतेरप्रस्तुतप्रशंसा चेति सङ्करः। हरि-
मसदोक्षमाध्वनिश्च ॥ २७ ॥

गुणार्थं तत्पारुष्यं दुरात्मनामित्याह। परीति। यस्य देहिनो जन्तोः परितोषयिता परेषामानन्दयिता स्वगतो गुणः कश्चन कश्चिदपि नास्ति स्वल्पक तुच्छः स इति शेषः। यत्तदोर्नित्यसम्बन्धात्। परदोषकथाभिर-
न्यजनदोषोक्तिभिः स्वजनं न तु मध्यस्थमिति भावः। तोषयितुमिच्छति किल इच्छते खलु। चैद्यस्यापि निर्गुणत्वादरकृष्णदूषणं युक्तमिति अप्रस्तुत-
प्रशंसाभेदः ॥ २८ ॥

सम्प्रत्यात्मनो निर्दोषत्वाभिमानादिकं विजृम्भयितुमित्याह। सद-
सीति। सदसद्विषयान्धाः स्वदुर्नये स्वदोषे मन्दगतिर्भवतीति भावः। दृष्टा

स्वगुणोच्चगिरो मुनिव्रताः
परवर्णग्रहणेष्वसाधवः ॥ २९ ॥
प्रकटान्यपि नैपुणं महद्
परवाच्यानि चिराय गोपितुम्।
विवरीतुमथात्मनो गुणान्
भृशमाकौशलमार्य्यचेतसाम्॥ ३० ॥
किमिवाखिललोककीर्त्तित

[illegible] ते [illegible]। परदो-
षाणां [illegible] भावः। [illegible] दर्शने दिव्यचक्षुषोऽप्रतिहत
इत्यर्थः। [illegible] स्वगुणेषूच्चगिरः [illegible]
परवर्ण [illegible] वचनेषु। [illegible]। मुनि-
व्रता मौनव्रताः। [illegible]। [illegible] इति प्रतीतेर प-
[illegible] ॥ २९ ॥

[illegible]। प्रकटानीति। आर्य्यचेतसां [illegible] प्रक-
टान्यपि परवाच्यानि [illegible] चिराय गोपितुं गोपायितुं [illegible]
[illegible]। [illegible] विकल्पादायप्रत्ययाभावः।
[illegible]। [illegible]। अथात्मनो गुणान् विवरीतुं
प्रकटयितुं [illegible] साध-
वो न [illegible]। [illegible]
[illegible] भावः। [illegible]
[illegible]
[illegible] ॥ ३० ॥

किमिति। [illegible]। [illegible]लोककीर्त्तितं [illegible]
[illegible]

कथयत्यात्मगुणान्महामनाः ।
वदिता न लघीयसोऽपरः
स्वगुणांस्तेन वदत्यसौ स्वयम् ॥ ३१ ॥
विसृजन्त्यविकत्थिनः परे
विषमाशीविषवन्नरा रुषम् ।
दधतोऽन्तरसाररूपतां
ध्वनिसाराः पटहा इवेतरे ॥ ३२ ॥
नरकच्छिदमिच्छतीति तु

कीर्त्तिमानत्वादित्यर्थः । लघीयसस्तुच्छस्य तु स्वगुणवदिता वक्ता । वदेस्तृच्प्रत्ययः । अतएव न लोकेत्यादिना षष्ठीप्रतिषेधः । अपरोऽन्यो नास्ति तेन कारणेनासौ लघीयान् स्वगुणं स्वयमेव वदति न केवलं निषेधात् किन्तु प्रयोजनाभावादपि महान् आत्मप्रशंसां न करोति तुच्छस्तु वक्त्रन्तरासम्भवात् स्वयमेव तां प्रलपतीत्यर्थः । पूर्वार्द्धे पदार्थहेतुकं काव्यलिङ्गम् उत्तरार्द्धे वाक्यार्थहेतुकं बोध्यम् । लक्षणैक्यं चैव विधाविति विशेषप्रतीतेरप्रस्तुतप्रशंसा चेत्यनयोः सङ्करः ॥ ३१ ॥

किञ्च महात्मानः क्रुद्धाः काले पराक्रमन्ति दुरात्मानस्तु केवलं प्रलपन्तीत्याह । विसृजन्तीति । परे नराः खलु दुष्टाः विषमाशीविषवत् क्रूरसर्पवदित्युपमा । अविकत्थिनोऽश्लाघमानाः सन्त एव रुषं क्रोधं विसृजन्ति वमन्ति पराक्रमन्तीत्यर्थः । इतरे त्वन्तरे असाररूपतां निःसाररूपतां दधतो दधानाः । नाभ्यस्ताच्छतुरिति नुमभावः । इतरे जना दुर्जनाः पटहा इव ध्वनिरेव सारो बलं येषां ते ध्वनिसाराः वाक्शूरा एव न तु बाहुबलशालिन इति भावः । अत्रापीदृशो लक्षणैक्याविशेषप्रस्तुतसामान्यात् प्रस्तुतविशेषप्रतीतेरप्रस्तुतप्रशंसाभेदः ॥ ३२ ॥

अभिधाय तदा तदप्रियमित्यादिना यदूतेन युगपत्प्रियाप्रिये अभि

विधिना येन स चेदिभूपतिः ।
द्रुतमेतु न चापयिष्यते
सदृशन्तस्य विधातुमुत्तरम् ॥ ६३ ॥
समनह्य किमङ्ग ! भूपति
र्यदि सन्धित्सुरसौ सहामुना ।
परिराक्रमणेन सन्नति
र्किल विभीत भियेत्यसम्भवः ॥ ६४ ॥
महतस्तरसा विलङ्घ्य

यदुदीरितमप्यदः परै

र्न विजानाति तदद्भुतं महत् ॥ ३९ ॥

विदुरेष्यदपायमात्मना

परतः श्रद्दधतेऽथ वा बुधाः ।

न परोपहितन्न च स्वतः

प्रमिमीतेऽनुभवादृतेऽल्पधीः ॥ ४० ॥

'कुशलङ्खलु तुभ्यमेव त-

द्वचनङ्कृष्ण ! यदभ्यधामहम् ।

उपदेशपराः परेष्वपि

त्वेव परोपदेशं विनैवात्महितं न विविनक्ति तद्युक्तमेवेति भावः । किन्तु परैरुदीरितं उपदिष्टमप्यदो हितं न विजानातीति यत् तन्म-हदद्भुतम् । यतः सूक्तं न गृह्णातीति भावः ॥ ३९ ॥

अथ किमद्भुतं मूर्खैरित्याशयेनाह । विदुरिति । बुधाः बुद्धिमन्तः एष्यन्तमागामिनं अपायमनर्थमात्मना स्वयमेव । प्रकृत्यादिभ्य उप-सङ्ख्यानात्तृतीया । विदुर्विदन्ति । विदो लटो वेति विकल्पाज्झुसादेशः । अथ वा परतोऽन्यस्मादाप्तात् श्रद्दधते विश्वसन्ति आप्तोक्तं गृह्णन्ती-त्यर्थः । श्रदन्तरोरुपसङ्ख्यानमिति उपसर्गसंज्ञोपसङ्ख्यानाद्धातोः प्राक् प्रयोगः । अल्पधीर्मूढस्तु अनुभवादृते स्वानुभवं विना । अन्यारादि-तरर्त्ते इति पञ्चमी न प्रमिमीते न जानाति अधमस्तु स्वानुभवैकप्र-माण इत्यर्थः अधमस्त्वमिति भावः । अत एव प्रस्तुतधर्मान्वयादप्रस्तुतविशे-षप्रतीतेरप्रस्तुतप्रशंसाभेदः ॥ ४० ॥

अत प्रस्तुते किमायातं तत्राह । कुशलमिति । हे कृष्ण ! अहं यद्वचनमभ्यधां अभिधायेत्यादिना राज्ञां सन्धिगुणाय विग्रह

स्वविनाशाभिमुखेषु साधवः ॥ ४१ ॥

उभयं युगपन्मयोदितं
त्वरया सान्त्वनमेतदस्य ते ।
प्रविभज्य पृथङ्मनीषया
स्वगुणं यत्किल तत्करिष्यसि ॥ ४२ ॥

अथ वाचि निविष्टबुद्धिषु
व्रजति व्यञ्जकतां समापितम् ।
रविरागिषु शीतरोचिषः
करजालस्फुटताकरेष्विव ॥ ४३ ॥

[illegible] ॥ ४१ ॥

[illegible] ॥ ४२ ॥

अनपेक्ष्य गुणागुणौ जनः
स्वरुचिन्निश्चयतोऽनुधावति ।
अपहाय महीशमार्च्चिच
त्वदसि त्वान्नु भीमपूर्व्वजः ॥ ४४ ॥
त्वयि भक्तिमता न सत्कृतः
कुरुराजा गुरुरेव चेदिपः ।
प्रियमांसमृगाधिपोज्झितः
किमवद्यः करिकुम्भजो मणिः ॥ ४५ ॥

ननु अभिनिविष्टोऽपि दुर्जनैर्बलादपि हिते प्रवर्त्तयितव्य इत्याशङ्क्य न शक्यत इत्याह । अनपेक्ष्येति । जनस्तावत् पृथग्जनः । गुणागुणौ गुणदोषौ । विमतिप्रतिषेधानधिकरणवाचीति विभाषया न द्वन्द्वैकवद्भावः । अनपेक्ष्याविमृश्य निश्चयतः स्वमत्यादेव स्वरुचिं स्वेच्छामनुधावति न तु सर्व्वहितकरगुणदोषविचारैः । तत्र पार्थ एव प्रमाणमित्याह । भीमपूर्व्वजः भीमाग्रजो युधिष्ठिरः मूर्खाग्रणीरिति भावः । महीशं चेदिपं अपहाय यदसि त्वामार्च्चिचत् अर्च्चितवान् खलु । अर्च्चयतेर्णौ चङि अत्रादेर्द्वितीयस्य न न्द्राः संयोगादय इति रेफवर्जितस्यैकाचो द्विर्भावः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥४४॥

पार्थानादरादेव राज्ञोऽनादरं चैद्यस्याशङ्क्य परिहरति । त्वयीति । हे कृष्ण ! त्वयि भक्तिमता प्रेमवता । कुरूणां राट् । सत्सूद्विषेत्यादिना क्विप् । तेन कुरुराजा कुरुराजेन पार्थेन न सत्कृतो नार्च्चितः चेदिपो गुरुरेव पूज्य एव । तथा हि प्रियं मांसं यस्य तेन मांसलुब्धेन मृगाधिपेन सिंहेनोज्झितस्त्यक्तः । करिकुम्भजो मणिर्गजमाणिक्योऽमर्घः किं अवद्यो गर्ह्यः सूक्तो नादरोऽस्य महतां किन्त्विल्लाघवमित्यर्थः । कुप्यकुत्सितावद्यखेट गर्ह्याणकाः समा इत्यमरः अवद्यपण्येत्यादिना निपातः । दृष्टान्तालङ्कारः ॥ ४५ ॥

क्रियते धवलः खलूच्चकै-
र्धवलैरेव सितेतरैरधः ।
शिरसैवमधत्त शङ्करः
सुरसिन्धोर्मधुजित्तमङ्घ्रिणा ॥ ४६ ॥
अबुधैः कृतमानसंविदः
स्तव पार्थैः कुत एव योग्यता ।
वहसि ह्यवगैरुपासितं
न हि गुञ्जाफलमेति सोम्यताम् ॥ ४७ ॥

विदुषां स पूज्य एव नेतर इत्याशयेनाह । क्रियत इति । धवलो निर्मलो धवलैर्निर्मलैरेव उच्चकैरुन्नतः क्रियते खलु । सितेतरैर्मलिनै- रधः क्रियते । तथा हि शङ्कर शिवः सुरसिन्धोरम्भः मन्दाकिनीपयः शिरसा अधत्त उभयोर्निर्मल्यादिति भावः मधुजित् मधुसूदनस्तु तमोघं अङ्घ्रिणा अधत्त स्वयं मलिनत्वादिति भावः । अतो विशेष- विदुषां राजा पूज्य एवेति भावः विशेषेण सामान्यसमर्थनरूपोऽर्था- न्तरन्यासः ॥ ४६ ॥

किञ्च यथा पार्थानादराद्धानी न किञ्चिदावयोः तथा तदादराच्च न किञ्चिद्गौरवमित्याह । अबुधैरिति । अबुधैरज्ञैः पार्थैः कृतमान- संविदो पूजासोपायो यस्य तस्य । संवित् स्त्रियां प्रतिज्ञायां सङ्केताचा- रनामसु । सम्भाषणे तोषणे चेति विश्वः तव योग्यता कुत एव न कुतो- ऽपीत्यर्थः । तथा हि वहसि मार्गमेघे मार्गशीर्षे सहामार्ग इत्यमरः । अवगैरुपासितं सेवितं गुञ्जाफलं काकफलानि । जातावेकवचनम् । काक- चिञ्चीगुञ्जे तु कृष्णलेत्यमरः । सोम्यता सुभगतां नैति न हि गुंसा मूल्य- रोपणार्पादिपदो गौरवागौरवयोः प्रयोजकाविनर्थः अत्र कृष्णगुञ्जा- फलयोर्विशेषयोरेव वाक्यभेदेन प्रतिबिम्बकरणात् दृष्टान्तालङ्कारः ॥ ४७ ॥

अपराधशतक्षमं नृपः
क्षमयात्येति भवन्तमेकया ।
हृतवत्यपि भीष्मकात्मजां
त्वयि चक्षाम समर्थ एव यत् ॥ ४८ ॥

गुरुभिः प्रतिपादितां वधू-
मपहृत्य स्वजनस्य भूपतेः ।
जनकोऽसि जनार्दन ! स्फुटं
हतधर्मार्थतया मनोभुवः ॥ ४९ ॥

यदप्युक्तमित्यादिना श्लोकद्वयेनापि भवतापराधशतक्षमत्वमुक्तं तत्रोत्तरमाह । अपराधेति । नृपश्चैद्यः अपराधस्य शतक्षमं राज्ञः शतापराधसहिष्णुं भवन्तम् । एकया क्षमया एकापराधसहनेनेत्यर्थः । अत्येति अतिक्रामति । अपराधकोटीनामपि तदेकेनापि क्षम्यत्वादिति भावः । तामेव क्षमां दर्शयति । त्वयि भीष्मकात्मजां रुक्मिणीं हृतवत्यपि समर्थः प्रतीकारक्षम एव सन्नपि चक्षाम क्षाम्यति स्मेति यत् तया क्षमयेत्यर्थः ॥ ४८ ॥

राक्षसः क्षत्रियस्यैवमिति स्मरणात् राक्षसोद्वाहस्य क्षात्रधर्मतया रुक्मिणीहरणे कोऽस्माकमपराधः इत्याशङ्क्य कामुकतामाह । गुरुभिरिति हे जनार्दन ! गुरुभिः पित्रादिभिः प्रतिपादितां दत्तां स्वजनस्य बन्धोर्भूपतेः चैद्यस्य वधूं जायाम् अपहृत्य । हतौ धर्मार्थौ येन तस्य भावस्तत्ता तया हेतुना हतधर्मार्थतया स्फुटं मनोभुवः कामस्य जनकोऽसि हत धर्मार्थतया कामकात्मजनकोऽसी-त्यर्थः । नायं राक्षसोविवाहः । हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं तथा । प्रसह्य कन्या हरणं राक्षसोविधिरुच्यते इति कन्याहरणस्य राक्षसत्वस्मरणात् । भवता तु परदारापहरणे बन्धुद्रोहोऽप-

स्वनिर्व्वापितरूपमन्मद-
स्तनमीवान्यमृतस्य दृक्कवेः ।
तव सर्व्वगतस्य सम्प्रति
क्षितिपः क्षिप्नुरसौऽभिमानिव ॥ ५० ॥

क्षुभितस्य महीभृतस्त्वयि
प्रशमोपनयनं कृथा मम ।
प्रलयोर्मिलतस्य वारिधेः
परिवाहोऽनुगतः करोति किम् ॥ ५१ ॥

प्रहितः प्रधनाय माधवा
नहमाकारयितुम्महीभृता ।
न परेषु महौजसश्छला
दपकुर्व्वन्ति मलिम्लुचा इव ॥ ५२ ॥
तदयं समुपैति भूपतिः
पयसाम्पूर इवानिवारितः ।
अविलम्बितमेधि वेतस
स्तरुवन्माधव ! मा स्म भज्यथाः ॥ ५३ ॥

वारिभिः कृतः परिवाहो जलनिर्गमनमार्गः किं द्रवतीति न किञ्चिदित्यर्थः । दृष्टान्तालङ्कारः ॥ ५१ ॥

तर्हि त्वत्स्वामिना राज्ञा किमर्थं भवानिह प्रहितस्तत्राह । प्रहित इति । प्रधनाय युद्धाय माधवान् यादवानाकारयितुमाह्वातुम् । युद्धमायोधनं जन्यं प्रधनं प्रविदारणम् । हूतिराकारणाह्वानमिति चामरः । महीभृता राज्ञाहं प्रहितः प्रेरितः । ननु रन्ध्रे हन्तव्याः यत्नो नाह्वातव्यास्तत्राह । नेति । महौजसो महावीराः परेष्वपि शत्रुष्वपि मलिम्लुचाः पाटच्चराइव । पाटच्चरमलिम्लुचावित्यमरः । छलात् कपटात् नापकुर्व्वन्ति । तस्मादाह्वानं कर्त्तव्यमिति वाक्यार्थहेतुकत्वात् काव्यलिङ्गमुपमासङ्कीर्णम् ॥ ५२ ॥

तदेवागमनप्रयोजनमुक्त्वा हितमुपदिशति । तदयमिति । तत्तस्मात् युद्धार्थित्वादयं भूपतिश्चैद्यः पयसाम्पूरः प्रवाह इवानिवारितः समुपैति हे माधव । अविलम्बितं शीघ्रं वेतस एधि भव नम्रत्वमाचरेत्यर्थः । अस्तेर्लोट् सिपि हेर्धिः ध्वसोरेद्धावभ्यासलोपश्चेति एत्वं श्नसोरल्लोपश्चेति सकारलोपः । माधव त्वं तरुवत् महावृक्षवत् मा स्म भज्यथाः मा भज्यस्व अतः आत्मानं न विनाशयेत्यर्थः । भञ्जेः कर्मणि यगपि लिङः

परिपाति स केवलं शिशू-
निति तन्नामनि मा स्म विश्वसीः ।
तरुणानपि रक्षति क्षमी
स शरण्यः शरणागतान्द्विषः ॥ ५४ ॥

न विदध्युरशङ्कमप्रिय-
म्महतः स्वार्थपराः परे कथम् ।
भजते कुपितोऽप्युदारधी-
रनुनीतिन्नतिमात्मकेण सः ॥ ५५ ॥

स्मोत्तरे लङ् चेति लङ् न माङ्योगे इत्यडभावः । उपमालङ्कारः ॥ ५३ ॥

ननु तर्हि शिशुपाले सूनामफलमित्याशङ्क्याह । परिपातीति । स शिशुपालः केवलमित्यवधारणे क्रियाविशेषणम् । शिशून् परिपातीति शिशूनेव पालयतीति तन्नामनि तस्य शिशुपाल संज्ञायां मास्म विश्वसीः मा विश्वासं कुर्वित्यर्थः । श्वसेः स्मोत्तरे लङ् चेति लङि रुदश्च पञ्चभ्य इति ईडागमः । चकाराल्लुङि वा तत्र चस्ति सिचोऽपृक्ते इति ईडागमः ह्मन्तक्षणश्वसजागृणिश्व्येदितामिति वृद्धिप्रतिषेधः न माङ्योगे इत्यडभावश्चोभयत्र । किन्तु क्षमी क्षमावान् । शीलादित्वादिनिः । शरणे रक्षणे साधुः शरण्यः रक्षणक्षमः । तत्र साधुरिति यत्प्रत्ययः स शिशुपालः शरणं रक्षितारमागतान् प्राप्तान् । शरणं गृहरक्षित्रोः शरणं रक्षणे गृहे इत्युभयत्रापि विश्वः । द्विषः शत्रून् तरुणान् यूनोऽपि रक्षति अतोऽभिःपद्यं शरणमागच्छेत्यर्थः ॥ ५४ ॥

ननु यद्यं द्रोणकारः सोऽप्यतिक्षुभितः किन्न कथं नः पालयेदित्याशङ्क्याह । नेति । स्वार्थपराः स्वार्थनिष्ठाः परे अल्पको महतोऽधिकस्य कथं अप्रियं अपकारं अशङ्कं यथा तथा न विदध्युः कुर्युरेव कार्यवशादित्यर्थः । किन्तु उदारधीर्महामतिः । उदारो दातृमहतोरित्यमरः । स

हितमप्रियमिच्छसि श्रुतं
यदि संधत्स्व पुरा न नश्यसि ।
अनृतैरथ तुष्यसि प्रियै
र्जयताज्जीव भवावनीश्वरः ॥ ५६ ॥
प्रतिपक्षजिदप्यसंशयं
युधि चैद्येन विजेष्यते भवान् ।
ग्रसते हि तमोपहं मुहु
र्ननु राह्वाह्वमहर्पतिन्तमः ॥ ५७ ॥

राज्ञाँ कुपितोऽपि नतिमात्रकेण प्रणतिमात्रकेण अनुनीतिं अनुनयं भजते अनुगृह्यत इत्यर्थः । प्रणिपातः प्रतीकारः संरम्भो हि महात्मनामिति भावः ॥ ५५ ॥

किं बहुना तवायं हितोपदेशश्च इत्याशयेनाह । हितमिति श्रुतं अप्रियं हितमिच्छसि यदि अप्रियं हितं श्रुतमाप्तादाकर्णितं ग्रहीतुमिच्छसि चेदित्यर्थः । संधत्स्व तथा सन्धिं हि पुरा न नश्यसि अन्यथा विनङ्क्ष्यसीत्यर्थः । यावत्पुरानिपातयोर्लडिति भविष्यदर्थे लट् । स्वस्थेति पाठान्तरे । अनृतैरसत्यैः प्रियैस्तुष्यसि यदि जयतात् जयतु । तुह्योस्तातङाशिष्यन्यतरस्यामिति तोस्तातङादेशः । जीव अवनीश्वरः सार्वभौमो भव । ततः किमेभिः प्रियालापैः अप्रियमपि प्रियमेव स्वी-कार्येति भावः ॥ ५६ ॥

ननु कंसादनेकविजयी कृष्णः कथं विजेष्यते राज्ञेत्याशङ्क्याह । प्रतिपक्षेति । प्रतिपक्षजिदनेकारिहन्तापि भवान् असंशयं संशयो नास्ति । अर्थाभावेऽव्ययीभावः युधि संग्रामे चैद्येन शिशुपालेन विजेष्यते । जयतेः कर्मणि लृट् शेषे प्रथमः । तमांसि पहन्तीति तमोपहं सर्वतमोपहारिणम् । अपे क्लेशतमसोरिति हन्तेर्डप्रत्ययः । अर्कं प्रति

अचिराज्जितमीनकेतनो
विलसन्नृषिगणैर्नमस्कृतः ।
क्षितिपः क्षयितोद्धतान्धको
हरलीलां स विडम्बयिष्यति ॥ ५८ ॥

निहतोन्मददुष्टकुञ्जरो
दधतोभूरियशः क्रमार्ज्जितम् ।
न बिभेति रणे हरेरपि
क्षितिपः का गणनास्य वृष्णिषु ॥ ५९ ॥

[illegible]

[illegible]

[illegible]

न तदद्भुतमस्य यन्मुखं
युधि पश्यन्ति भियान्न शत्रवः ।
द्रवतामनु पृष्ठमीक्षते
वदनं सोऽपि न जातु विद्विषाम् ॥ ६० ॥

प्रतनूल्लसिताचिरद्युतः
शरदम्भाप्यविखण्डितायुधाः ।
दधतेऽरिभिरस्य तुल्यतां
यदि नासारभृतः पयोभृतः ॥ ६१ ॥

दधत इति हरेरभ्यासात् सिंहात् चेति ध्वनिः । रणे न बिभेति । अर्हैताह
यश्चैदारस्य वृष्णिषु यादवेषु मेषेषु च । वृष्णिस्तु यादवे मेषे इति विश्वः ।
का गणना कण्ठमगणयतो यादवा के इत्यर्थः अत्र कुञ्जरघातिनः सि
हस्य का कथा मेषे भिल्यर्थान्तरप्रतीतिध्वानरेव न श्लेषः हरेर्वृष्णिपर्यायेष
स्यापि श्लिष्टत्वात्पकृता प्रकृतश्लेषे तदनङ्गीकारादित्युक्तं प्राक् ॥ ५९ ॥

हरेरपि न बिभेति इत्युक्तं तदेव समर्थयितुं तस्य पराक्रमात्
सर्गं समाप्तेर्दर्शयति । नेति । युधि शत्रवो भियाऽस्य मुखं न पश्यन्तीति
यत्तदद्भुतं अत्र ज्ञातं सोऽपि द्रवतां भयात्पलायमानानां विद्विषां
पृष्ठं कायपश्चार्द्धं ईक्षते । जातु कदाचित् वदनं न ईक्षते नहु खलु
द्वयोरन्यतरमुखेऽन्योन्यस्य मुख विलोकनासम्भवात्स्वयं विद्विषां अभि
मुखस्थाप्यस्य मुखादर्शनादद्भुतमित्यर्थः अतएव वाक्यार्थहेतुकं काव्यलि
ङ्गम ॥ ६० ॥

प्रतन्विति । शरदं स्वतु प्राप्य विखण्डितायुधाः खण्डितेन्द्रचापा
अन्यत्र वरान् ददातीति वरदस्तं वरदं वरदर्थिपं प्राप्य खण्डितपक्षा
प्रतनूल्लसिताचिरद्युतोऽल्पस्फुरितविद्युतः अन्यत्र प्रतनूल्लसिता स
स्तोकसिताल्पशाचिरद्युतोऽस्थिरद्युतः । पयोभृतो मेघा आसारभृत

मलिनं रणरेणुभिर्मुहु-
र्द्विषताङ्क्षालितमङ्गनाम्बुभिः।
नृपमौलिमरीचिवर्णकैः
खलु यस्याङ्घ्रियुगं विलिप्यते॥ ६२॥

समराय निकामकर्कश-
ङ्क्षणमाकृष्टमुपैति यस्य च।
धनुषा सममाशु विद्विषा-
ङ्कुलमाशङ्कितभङ्गमानतिम्॥ ६३॥

हरिमन्तः न यदि यदि हरिमूल्यत्वादिति भावः। ह्रस्वकमूर्व्या इत्यर्थः। आधारः प्रवरे वेतण्डो ह्युद्वह इति वैजयन्ती यस्यारिभि-स्तुल्यमो दृश्यते। अत्र पयोस्तनाद्युपमानोपमेयभावोक्तेः प्रतीपालङ्कारः तेषामाधारत्वम्भेऽपि संभावनया तदसम्बन्धोक्तेरतिशयोक्ति-भेदश्चेति सङ्करः॥ ६१॥

विशेषकमाह। मलिनमित्यादि। युग्मकम्। रणरेणुभिर्मलिनम् अत एव द्विषताङ्गनाम्बुभिः क्षालितं नाहुलादीनु रणाभिवर्तिन इति भावः। यस्याङ्घ्रियुगं चरणयुगलं। अथ रेणुक्षालितानां नृपाणां प्रणतानां राज्ञां मौलिमरीचयो मुकुटमणिरश्मयस्तैरेव वर्णकैर्विलेपनै-श्चन्दनैः। चन्दने चापि वर्णकमिति विश्वः। विलिप्यते विशेष्यते। य-स्याङ्घ्रियुगस्य विशेषणमहिम्ना स्नातानुलिप्त पुरुषसाम्यप्रतीतेः समा-सोक्तिः॥ ६२॥

समरायेति। किञ्चेति चार्थः। निकामकर्कशमतिकठिनं दुर्धर्षमित्यर्थः। समराय समुद्धारायाकृष्टमाहतमावर्जितं च यस्य आशङ्कित भङ्गं भग-बौत्युचित स्वपराजयं अन्यत्रातिकर्षात्सम्भावितदलनं यस्य विद्विषां कुलं चापि धनुषा सममानतिं नम्रतामुपैति। अत्र धनुर्नमनकार्यस्य द्वि-

तुहिनांशुममुं सुहृज्जनाः
कलयन्त्युष्णकरं विरोधिनः ।
कृतिभिः कृतदृष्टिविभ्रमाः
स्रजमेके भुजगं यथापरे ॥ ६४ ॥

दधतोऽसुलभक्षयागमा
स्तनुमेकान्तरतामभानुषीम् ।
भुवि सम्प्रति न प्रतिष्ठिताः
सदृशायस्य सुरैररातयः ॥ ६५ ॥

पतनस्य तत्सहभावोक्तेः कार्यकारणयोः पौर्वापर्यविपर्ययनिमित्त-रूपातिशयोक्तिमूला वक्रोक्तिरलङ्कारः ॥ ६३ ॥

तुहिनेति । अमुमेवंविधं चैद्यं सुहृज्जनाः तुहिनांशुं कलयन्ति आह्लादकत्वाच्चन्द्रं मन्यन्ते विरोधिनः उष्णकरं तपनं कलयन्ति । एकस्यानेकप्रतीतिरुपमिमीते । कृतिभिरिति । कृतिभिः कुशलैरैन्द्रजालिकादिभिः कृतदृष्टिविभ्रमाः जनितदृष्टिविपर्यया एके नराः यथा स्रजं मालां कलयन्ति अपरे तु भुजगं कलयन्ति एकमेव रज्ज्वादिकमिति शेषः । उपमालङ्कारः सचैकस्य निमित्तवशादुल्लेखीतेनेदन्तोदस्तानेकधा ग्रहणात्मकनोल्लेखेन सङ्कीर्यते ॥ ६४ ॥

दधत इति । असुलभक्षयागमाः दुर्लभमृत्युप्राप्तयः अन्यत्र अमरत्वात् दुर्लभनाशयोगाः । निलयापचयौ क्षयावित्यमरः । एकान्तरतां भूयाद्विजनस्थाने निरतां अमानुषीं मार्त्समालिन्यादिना पिशाचादिवदुपलक्षणीयमानाम् । अन्यत्र एकान्तरतां नियतसुरतां नित्यभोगामानुषीं दिव्यां तनुं दधतो दधानाः भुवि सम्प्रति क्वापि न प्रतिष्ठिताः रान्ध्रभ्रंशात् क्वापि स्थितिमप्राप्ता अन्यत्र च भुवं न स्पृशन्तीत्यर्थः।

अतिविस्मयनीयकर्म्मणो
नृपतेरस्य विरोधि किञ्चन ।
यदमुक्तनयो नयत्यसौ
अहितानाङ्कुलमक्षयं क्षयम् ॥ ६६ ॥

चलितोर्द्धकबन्धसम्पदो
मकरव्यूहनिरुद्धवर्त्मनः ।
अतरत्स्वभुजौजसा मुहु-
र्महतः सङ्गरसागरानसौ ॥ ६७ ॥

दैवतात् । यस्मादस्य हृदं महयां वत्सायमस्मिन्निति पूर्वेण सम्बन्धः सितिर्विशेषश्चेयमुपमा श्लेष एवेत्यन्ये ॥ ६५ ॥

अतीति । अतिविस्मयनीयकर्म्मणः अत्यन्तविस्मितपौरुषस्य । स्मय-तेरनीयर्प्रत्ययः । अस्य नृपतेर्यस्य विरोधि चेष्टितं द्वेषिरूपं न किञ्चिदस्तीत्यर्थः यस्मादमुक्तनयोऽत्यक्तनीतिमार्गोऽसौ अक्षयमविनाशि पूर्वं केनापि क्षयं न नीतमित्यर्थः अहितानां कुलं शत्रुजातं क्षयं नाशं नयति । नीतिपौरुषाभ्यां द्विषच्छिन्नं जयितुरस्य का विरोधितेति भावः अक्षयमपि क्षयं नयतीति विरोधस्य नेदभेदेन परिहाराद्विरोधाभासोऽलङ्कारः ॥ ६६ ॥

चलितेति । असौ चैद्यबलितः महान्तो ऊर्द्धं उच्छ्रिताः कबन्ध-सम्पदः शिरोहीनकलेवरसमूह एव कबन्धसम्पदः उदकसमूहश्च येषु तान् । श्लिष्टरूपकम् । कबन्धं सलिले प्रोक्तमपमूर्द्धकलेवरे इति वैजयन्ती । मकरव्यूहाः मकराकारसैन्यविन्यासाः त एव मकरव्यूहा इति श्लिष्टरूपकम् । व्यूहौ समूहविन्यासाविति वैजयन्ती । निरुद्धवर्त्मनो निरुद्धप्रवेशमार्गान् । अतएव महतोद्भुतरान् सङ्गरसागरान् समरसमुद्रान् स्वभुजौजसा निजभुजबलेनैव मुहुः बहुवारं अतरत् भुजेनाश्चितरत्त

न चिकीर्षति यः स्मयोद्धतो
नृपतिस्त्वच्चरणोपगं शिरः ।
चरणं कुरुते गतस्मयः
स्वमसावेव तदीयमूर्द्धनि ॥ ६८ ॥
स्वभुजद्वयकेवलायुध-
श्चतुरङ्गामपहाय वाहिनीम् ।
बहुशः सह शक्रदन्तिना
स चतुर्दन्तमगच्छदाहवम् ॥ ६९ ॥

प्रहरणपरमलङ्घनमिति भावः । अत्र कबन्धा एव कबन्धाः मकरव्यूहा एव चक्रपद्मादिव्यूहा इति श्लिष्टरूपकस्य यद्वेषु सागररूपणहेतुत्वात्केवलं श्लिष्ट-परम्परितरूपकम् ॥ ६७ ॥

नेति । स्मयोद्धतो गर्वेण दुर्विनीतो नृपतिः शिरो निजोत्तमाङ्गं तव शिशुपालस्य चरणमुपगच्छतीति तच्चरणोपगं तस्मादनतं यो न चिकीर्षति कर्तुं नेच्छति तदीये तस्य नृपतेः सम्बन्धिनि मूर्द्धनि गतस्मयो विगर्वोऽसौ शिशुपाल एव स्वं चरणं कुरुते निधत्त इत्यर्थः अनम्रान् सद्यो नमयति नम्रानवतीति तात्पर्यम् ॥ ६८ ॥

स्वेति । स चैद्यश्चत्वार्यङ्गानि हस्त्यादीनि यस्यास्तां चतुरङ्गां वाहिनीं सेनामपहाय स्वभुजद्वयं केवलमेकमायुधं यस्य सः सन् शक्रदन्तिना ऐरावतेन सह । चत्वारो दन्ता यस्मिन् तं चतुर्दन्तं व्याहवं रणं बहुशोऽगच्छत् चतुर्दन्तेन शक्रदन्तिना दोर्द्वयेन योद्धुं चेदीशं विना कोऽन्यः शक्त इति भावः दन्तिनोराहवश्चतुर्दन्त इत्युक्तं न तु मनुष्यदन्तिनो-रिति विरोधः स च शक्रदन्तिनेति परिहृतः तस्य चतुर्दन्तत्वादिति वि-रोधाभासः ॥ ६९ ॥

अविचालितचारुचक्रयो
रनुरागादुपगूढयोः श्रिया ।
युवयोरिदमेव भिद्यते
यदुपेन्द्रस्त्वमतीन्द्र एव सः ॥ ७० ॥

भृतभूतिरहीनभोगभा
ग्विजितानेकपुरोऽपि विद्विषाम् ।
रुचिमिन्दुदले करोत्यजः
परिपूर्णेन्दुरुचिर्महीपतिः ॥ ७१ ॥

अविचालितेति । अविचालितं परैरचालितं अतएव चारु शोभनं चक्रं सुदर्शनं राष्ट्रं च ययोस्तयोः । चक्रं राष्ट्रयाङ्गयोरिति विश्वः । श्रिया कमलया सम्पदा चानुरागादुपगूढयोराश्लिष्टयोर्युवयोस्तव तस्य च । त्यदादीनि सर्वैर्नित्यमित्येकशेषः । इदमेव भिद्यते विशेष्यते । कर्मकर्त्तरि लट् । किं तदित्यत आह । त्वमिन्द्रमुप गत उपेन्द्र इन्द्रानुजः तदनुचर इति यावत् । स तु इन्द्रमति क्रान्तः अतीन्द्रः इन्द्रविजयीति यावत् इदमेव भिद्यते इति सम्बन्धः । इन्द्रकिङ्करेन्द्रजयिनोः का साम्यकथेति भावः । अत्रोपमानात् उपमेयस्य चैद्यस्याधिक्याद्भेद प्राधान्यसाधर्म्योक्तिर्व्यतिरेकालङ्कारः ॥ ७० ॥

किञ्च त्वत्तोऽप्यधिकोऽराजेत्यवान्योऽप्यमर्थः यदीश्वरादप्यधिक इत्याह । भृतेति । भृता भूतिर्भस्म सम्पच्च येन स भृतभूतिः । भूतिर्भस्मनि सम्पदीत्यमरः । अहीनां भोगिनामिनोऽहीनः शेषः तस्य भोगं कायं भजतीत्यहीनभोगभाक् शेषभूषण इत्यर्थः । अन्यत्र अहीनमन्यूनं भोगं सुखानुभवं भजतीति अहीन भोगभाक् । भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोरित्यमरः । विद्विषां विजितानेकपुरः विजितानेकविद्विट्पुर इत्यर्थः एकत्र त्रिपुरविजयादन्यत्र शत्रुनगरविजयाच्चेति भावः । वामेक्ष-

नयति द्रुतमुद्धतिश्रितः
प्रसभभङ्गमभङ्गुरोदयः ।
गमयत्यवनीतलस्फुर
द्भुजशाखभृशमन्यमुन्नतिम् ॥ ७२ ॥
अधिगम्य च रन्ध्रमन्तरा
जनयन्मण्डलभेदमन्यतः ।
खनति क्षतसन्तति घ्नणा

ऽर्थे शब्दकत्वात्समास । एवम्भूतोऽपत्रोपर । यज्ञादिभ्यश्चरस्तासा इत्यमर । इन्दुरिव चन्द्रखण्ड इव विषये रुचिमभिलाष करोति इन्दुरिव या रुचि शोभा ता करोति दधातीति चाथ सामान्य शब्देन विशेष लक्षणा । महीपतिस्तु परिपूर्णेन्दोरुचिरिव रुचि शोभा यस्य स तस्मिन् रुचिरभिलाषोऽयस्येति च परिपूर्णेन्दुरुचि । रुचिर्मयूखे शोभायामभिषङ्गाभिलाषयोरिति विश्व । अत्र हर खण्डेन्दुरुचि राजा पूर्णेन्दुरुचिरिति व्यतिरेक स च रुच्योर भेदाश्रयादिति श्लेष मूलाभेदातिशयोक्त्या सङ्कीर्ण ॥ ७१ ॥

अथ कलापकमाह । नयतीत्यादि । य सटद्रुमे सरिता सदकस्य पूरइव भूभृता गणे क्रीडतीति चतुर्थे वक्ष्यति तत् क्रीडाप्रकार त्रिभि र्वर्णयति । अभङ्गुरोदय स्थिरवृद्धि, य उद्धतिश्रित औद्धत्यभाज अनम्रा निति यावत । नयते किप । रूपात् द्रुमाद्यर्थ । द्रुत शीघ्र प्रसभ प्रसह्य भङ्ग नयति । अवनीतले स्फुरन्त्यौ भुजौ शाखे इव भुजशाखे यस्य स भुजौ प्रसार्य भुवि निपतितमित्यर्थ अन्य नम्र द्रुम च वेतसादिक मुन्नतिमुन्नतिं गमयति ॥ ७२ ॥

अधिगम्येति । किञ्चेति चार्थ । अन्तरा मण्डलमध्ये आलवाल मध्ये च रन्ध्रमवकाश शुषिर चाधिगम्य । अन्यत मण्डलस्यामात्यादिच क्रस्य भेदमुपजाप जनयन् अन्यत्र मण्डलस्याधारदेशस्य भेद विदारण

दपि मूलानि महान्ति कश्चित् ॥ ७३ ॥

घनपल्लवतोऽनुगामिन

स्तरसाकृष्य करोति कांश्चन ।

दृढमप्यपरम्प्रतिष्ठित

म्प्रतिकूलन्नितरान्निरस्यति ॥ ७४ ॥

इति पूर इवोदकस्य यः

सरिताम्प्रावृषिजस्तटद्रुमैः ।

क्वचनापि महानखण्डित

प्रसरः क्रीडति भूभृताङ्गणैः ॥७५॥कलापकम् ॥

कुर्वन्नित्यर्थः । यथा संहतिरैकमत्यं मूलानामासीदेव सकिन् कर्माणि तद्यथा तथा क्षणात्कश्चिद्राज्ञः द्रुमस्य च महान्ति मूलानि सुस्थान् जनानपि खनति तापयति अन्यस्माद्दीनमपि खनत्युद्दारयति ॥ ७३ ॥

घनेति । घनानि सान्द्राणि पल्लवानि वाहनानि पर्णानि च विद्यन्तेऽस्येति घनपल्लवस्ततः कांश्चन नृपान् द्रुमांश्च । तरसा बलेन वेगेन च । तरसी बलरंहसी इति विश्वः । आकृष्यानु गामिनोऽनुचरान् करोति । दृढं यथा तथा प्रतिष्ठितं प्रविष्टं गतमपि । प्रतिकूलं प्रातिकूल्यभाजम् । अपरं नृपं द्रुमं च नितरां निरस्यति उत्खायान्यतः क्षिपति द्रुमपक्षे प्रतिकूलकूले क्षिपतीति चार्थः । ७४ ॥

इतीति । इतीत्थं क्वचनाप्यखण्डितप्रसरः सर्वत्राखण्डित प्रवृत्तिरित्यर्थः । महान् यः प्रावृषि जातः प्रावृषिजः । सप्तम्यां जनेर्ड इति डप्रत्ययः । प्रावृट्शरत्कालदिवां जे इत्यलुक् । प्रावृषिक इति पाठे तत्र जात इत्यर्थे प्रावृषः ठगिति ठक्प्रत्ययः ठक्षेकः । सरितामुदकानां पूरस्तटद्रुमैरिव भूभृतां राज्ञां गणैः साधनैः क्रीडति । महतः कुरुते-

अलघूपलपङ्क्तिशालिनीः
परितोरुद्धनिरन्तराम्बराः ।
अधिरूढनितम्बभूमयो
न विमुञ्चन्ति चिराय मेखलाः ॥ ७६ ॥

कटकानि भजन्ति चारुभि
र्नवमुक्ताफलभूषणैर्भुजैः ।
नियतन्दधते च चित्रकै
रवियोगम्पृथुगण्डशैलतः ॥ ७७ ॥

त्यागिभिश्चोक्ते च मङ्क्षीमति रित्यनेनास्य सम्बन्धः ॥ ७५ ॥

अथ विशेषकमाह । अलघूपलेत्यादि । यस्याश्रियः सम्पदनुभूतभावद्यमनुभवन्तीति वक्ष्यति तत्प्रकारमेवाह । अधिरूढनितम्बभूमयः उद्गतश्रोणिभागाः अलघुभिः उपलानां मणीनां पाषाणानां च पङ्क्तिभिः शालन्त इति तच्छालिनीः । उपलौ मणिपाषाणाविति विश्वः । परितोरुद्धमावृतं निरन्तरं सान्द्रं अविच्छिन्नं च अम्बरं वस्त्रमाकाशं च याभिस्ताः अधिरूढनितम्ब भूमीराक्रान्तश्रोणिभागाः प्राप्तकटकाश्चेति । विभक्तिविपरिणामः । मेखलारशनाः मध्यतमध्यभूमीश्च चिराय न विमुञ्चन्ति । अत्र सम्पदादिविषयत्वेनोभयेषामपि मेखलादीनां वर्ण्यत्वेन प्रकृतत्वात् केवलप्रकृतगोचरः श्लेषः ॥ ७६ ॥

कटकानीति । किञ्च नवमुक्ताफलानि नूतनमौक्तिकानि भूषणानि येषां तैश्चारुभिः भुजैः कटकानि वलयानि भजन्ति अन्यत्र नवमुक्तान्यचिरत्यक्तानि अतः अफलानि वैधव्याद्विफलानि आभरणानि यैस्तैर्भुजैरुपलक्षिताः कटकानि तटानि भजन्ति । किञ्चेति चार्थः पृथुगण्डशैलतः पृथुगण्डस्थलेषु चित्रकैः पत्ररचनाभिर्नियतमवियोगं सम्पर्कं दधते,

इति यस्य ससम्पदः पुरा
यद्वाप्भवनेष्वरिस्त्रियः।
स्फुटमेव समस्तमापदा
तदिदानीमवनीध्रमूर्द्धसु ॥७८॥ ॥विशेषकम्॥

महतः कुकुरान्धकद्रुमा
नतिमात्रन्दववद्दहन्नपि।
अतिचित्रमिदम्महीपति
र्यदकृष्णाम्पृथिवीङ्करिष्यति ॥ ७९ ॥

परितः प्रमिताक्षरापि सर्वं
विषयम्प्राप्नवती गता प्रतिष्ठाम्।

अन्यत्र च्युतस्थूलोपलेषु चित्रकैर्मृगविशेषैः सङ्गवासं दधते। अत्रापि प्रकृतगोचरः श्लेषः ॥ ७७ ॥

इतीति। यस्यारिस्त्रियः पुरा पूर्वं ससम्पदः सश्रीकाः भवनेषु सदनेषु यद्वाश्चर्मैश्वर्यादिकमनुबभूवुः। समस्तमशेषं तदिदानीमापदा अवनीध्रमूर्द्धसु पर्वतशृङ्गेषु स्थित्वा स्फुटमेवानापुः नष्टास्य वैरिणां जीवितायेति भावः। अत्रापि यदर्थस्योत्तरश्लोके नान्वयः ॥ ७८ ॥

महत इति। यत्तदोर्नित्यसम्बन्धात्। स महीपतिर्महतोऽधिकान् कुकुराणामन्धकाय यादवभेदास्तानेव द्रुमानतिमात्रं दवत् दवाग्निवत्। दवदावौ वनारण्यवह्नी इत्यमरः। दहन्नपि अवनीमकृष्णामश्यामां करिष्यति इति यत् इदमतिचित्रं विरुद्धमित्यर्थः कृष्णरहितामित्यविरोधः अतएव विरोधाभासोऽलङ्कारः कुकुरान्धकैः सह कृष्णं हनिष्यतीति श्लेषार्थः ॥ ७९ ॥

अथ युग्मेनाह। परित इति। प्रकर्षेण मिताक्षरापि एकत्र मित-

न खलु प्रतिहन्यते कुतश्चि
त्परिभाषेव गरीयसी यदाज्ञा ॥ ८० ॥

याममूढवानूढवराहमूर्त्ति
र्मुहूर्त्तमादौ पुरुषः पुराणः।
तेनोह्यते साम्प्रतमक्षतैव
क्षतारिणा सम्यगसौ पुनर्भूः ॥ ८१ ॥

भाषितत्वादन्यत्र तु एकत्वाश्वात्साचराणि सर्वं विषयं राज्ञ कार्य्यं देयञ्च परितो व्याप्नुवती सर्वत्र प्रवर्त्तत इत्यर्थः। प्रतिष्ठां प्रामाण्यं स्थितिं गता गरीयसी भूयिष्ठार्था यदाज्ञा यस्य राज्ञः शासनं परिभाषा अनियमनियामको न्यायविशेष इव कुतश्चित् कुत्रापि न प्रतिहन्यते खलु न बाध्यते हि। परिभाषा च शास्त्रैकदेशे स्थिता सर्वशास्त्रमभिज्वलयतीति भाष्यकारः। इकोगुणवृद्धी इत्यादिका परिभाषा इकोयणचि-त्यादिविषयः। उपमालङ्कारः। औपच्छन्दसिकं वृत्तम् ॥ ८० ॥

यामिति। यां भुवमादौ पूर्वं पुराणपुरुषो विष्णुः ऊढवराहमूर्त्तिः धृतवराहशरीरः स च न तु स्वरूपेणेति भावः। मुहूर्त्तं क्षणमात्रं ऊढवान् धृतवान्। क्षतारिणा संहृत सकलविपक्षेण क्षतएवैनां पुनस्तेन राज्ञा अविक्षतेनेति भावः। अक्षतैव विपक्षैरनुपहतैव असौ भूः साम्प्रतमद्यापि न तु मुहूर्त्तमिति भावः। सम्यक्, यथाशास्त्र-मुह्यते धार्य्यते। वहेः कर्मणि लट् वचिस्वपीत्यादिना सम्प्रसारणम्। अत्र राज्ञो विष्णोराधिक्यकथना द्व्यतिरेकः। अत्र ध्वनिः कश्चिद्वरः स चोढवराहमूर्त्तिरर्थमविक्षतामादौ प्रथमं मुहूर्त्तमूढवान् परिणीत-वानिति अतएव अक्षता पूर्वं च अक्षतयोनिका। अतएवासौ भूर्वोढुः। क्षतारिणा शौर्य्यादिगुणाढ्येनेत्यर्थः तेन केनचिद्वरेण साम्प्रतं पुन-रुह्यते पुनः पुनः परिणीयते। सा चेदक्षतयोनिः स्यात् पुनः संस्का-रमर्हतीति स्मरणादिति भावः। सा पुनर्भूरुच्यते इति योज्यम्। पुनर्भूं

भूयांसः क्वचिदपि काममस्खलन्त
स्तुङ्गत्वन्दधति च यद्यपि द्वयेऽपि ।
कल्लोलाः सलिलनिधेरवाप्यपारं
शीर्य्यन्ते न गुणमहोर्म्मयस्तदीयाः ॥ ८२ ॥

लोकालोकव्याहतङ्घर्म्मरश्मेः
शालीनं वा धाम नालम्प्रसर्त्तुम् ।
लोकस्याग्रे पश्यतो धृष्टमाशु
क्रामत्युच्चैर्भूभृतो यस्य तेजः ॥ ८३ ॥

दिधिषूरूढा द्विरूढादिधिषूः पतिरित्यमरः । अत्राभिधाया प्रकृतार्थ एव नियन्त्रणादप्रकृतार्थप्रतीतिर्ध्वनिरेव ॥ ८१ ॥

भूयास इति । द्वयेऽपि समुद्रोर्म्मयो गुणोर्म्मयश्चेति द्वितया अवयवा इत्यर्थः । द्वेस्तयप् तस्य द्वित्रिभ्यामित्यनेन अयजादेशः प्रथमचरमेत्यादिना जसि विभाषया सर्वनामसंज्ञा । भूयांसो बहुतराः क्वचिदप्यस्खलन्तोऽप्रतिहतप्रसरा इत्यर्थः । कामं तुङ्गत्वं दधति यद्यपि दधत्येव । यद्यपीत्यवधारणे इति केशवः । तथापीति शेषः । सलिलनिधेः समुद्रस्य कल्लोला महोर्म्मयः । अथोर्म्मिषु महत्सूल्लोलकल्लोलावित्यमरः । पारं तीरमवाप्य शीर्य्यन्ते विशीर्य्यन्ते । शीर्य्यतेर्दैवादिकात्कर्त्तरि लट् । तदीया गुणमहोर्म्मयस्तु पारमवाप्य न शीर्य्यन्ते अत्र गुणमहोर्म्मीणां भूयस्त्वादिति साधर्म्येण गुरुत्वेन समुद्रस्याधिक्याद्व्यतिरेकः अनेन राज्ञोऽपि समुद्राधिक्यं व्यज्यते । प्रहर्षिणी वृत्तम् ॥ ८२ ॥

अथ युग्मेनाह । लोकालोकेत्यादि । लोक्यते आलोक्यते च पार्श्वान्तरेणेति लोकालोकः । लोकालोकश्चक्रवाल इत्यमरः । विशेषण समासः । तेन व्याहतं निरुद्धप्रसारं लोकस्यालोकेन चक्षुःप्रकाशेन व्याहतमित्यपि स्फुरति । अतएव शालीनमधृष्टतया लज्जया सन्नं भाग्यमित्यर्थः, शा-

विच्छित्तिर्नवचन्दनेन वपुषोर्भिन्नाऽधरोऽलक्तकै
रच्छाच्छे पतिताञ्जने च नयने श्रोण्योलसन्मेखलाः ।
प्राप्तो मौक्तिकहारमुन्नतकुचाभोगस्तदीयद्विषा
मित्यन्नित्यविभूषणा युवतयः सम्पत्सु चापत्स्वपि ॥ ८४

विनिहत्य भवन्तमूर्जितश्री

लोकालोकमिति कष्टाकार्ययोरिति निपात । इवार्थे यामन्द तद्दु
ष्टेन्वा । यस्य राज्ञो भौम तेज मध्यतोलोकस्यापि उच्चैर्भूभृत पर्वताम
राज्ञस मस्तु व्याप्तु नालन समर्थस । लोकालोकव्याप्तस लोकाप्ये
वस्त्वरत्नादित्यर्थ । यस्य राज्ञस्तु तेज मध्यतोलोकस्याप्यतएव श्रेष्ठ लोका
दव्याहतत्वात्तगनभ स्तत उच्चैर्भूभृतोराज्ञ पर्वतास्य क्रामति व्याप्नोति ।
अत्रो प्रतिहत प्रतापत्वेन राज्ञ सूर्यादाधिक्याद्व्यतिरेक स च द्वयो
र्लोकालोकयोर्द्वयानार भूभृता अभेदाध्यवसायात श्लेषमूलाति शयोक्त्युत्थ
पितया मालोमलोल्लेचया सङ्कीर्यते । मालिनीवृत्तमेतत् ॥ ८३ ॥

विच्छित्तिरिति । वपुषो नवचन्दनेन वि च्छित्तिर्वियोग प्राप्तेति अन्यत्र
चन्दनालेपनमिति याव । अधरोऽ अलक्तकै लाक्षारागैर्भिन्नो, वियुक्त
अन्यत्र युक्त । नयने च पतिताञ्जने गलितकज्जले अतएवाच्छाच्छे अच्छ
प्रकारे । प्रकारे गुणवचनस्येति द्विर्भाव कर्म धारयवदिति सुपोलुक् ।
अन्यत्र अच्छाच्छे नयने पतिताञ्जने प्राप्ताञ्जने । श्रोण्यो नितम्बा लस
न्मेखलाम भवन्तीत्यलसन्मेखला निर्मेखला इत्यर्थ । अन्यत्र लसन्मेखला
इति पदच्छेद उन्नत कुचाभोग कुचविस्तारोमौक्तिकानां हार ह
रण प्राप्त । अन्यत्र मुक्तादाम प्राप्त । इत्यमित्थं तदीयद्विषा युव
तय सम्पत्सु चापत्स्वपि नित्यविभूषणा अत्रापत्सम्पदो प्रस्तुताप्र
स्तयो युवतिविशेषणसाधारण्येनश्लेष । शार्दूलविक्रीडित वृत्त लच्च
णमुक्तम् ॥ ८४ ॥

अथमीदृशस्ते राजा तत किमित्याशङ्का तर्हि तत्त्वमाकर्ण्य वेत्याह ।

युधि सद्यः शिशुपालतां यथार्थाम् ।
रुदताम्भवदङ्गनागणानां
करुणान्तः करणः करिष्यतेऽसौ ॥ ८५ ॥

इति श्रीमाघकृते शिशुपालवधे
महाकाव्ये षोडशः सर्गः ॥ १६ ॥

विनिहत्येति । ऊर्जितश्रीरधिकैश्वर्योऽसौ राजा युधि भवतः सद्यो वि-निहत्य हत्वा रुदतां मन्दतां भवदङ्गनागणानां करुणान्तःकरणः कृ-पाविष्टचित्तः सन् शिशुपालतां यथार्थां करिष्यते अङ्गनागणान् प्रति तच्छिशुपालनेन निजां शिशुपाल संज्ञामन्वर्थां करिष्यतीत्यर्थः । अत्र रोदनकरुणापदार्थयोर्विशेषण गत्या क्रमात् करुणाशिशुपालनहेतुकत्वा-त्काव्यलिङ्गयोः सङ्करः । औपच्छन्दसिकं वृत्तम् ॥ ८५ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथ सूरिविरचिते माघ काव्य-व्याख्याने सर्वङ्कषाख्ये षोडशः सर्गः ॥ १६ ॥



सप्तदशः सर्गः ।

इतीरिते वचसि वचस्विनाऽमुना
युगक्षयक्षुभितमरुद्गरीयसि ।
प्रचुक्षुभे सपदि तदम्बुराशिना
समन्महाप्रलयसमुद्यतं सदः ॥ १ ॥

सरागया स्रुतघनघर्मतोयया
कराहतिध्वनितपृथूरुपीठया ।
मुहुर्मुहुर्दशनविखण्डितोष्ठया
रुषा नृपाः प्रियतमयेव भेजिरे ॥ २ ॥

इतीति । इतीत्थममुना वचस्विना वाग्मिना मनस्विनेति पाठे मनस्विना धीरेण दूतेन युगक्षये कल्पान्ते क्षुभित उद्वेलो मरुन्महद्गरीयसि वचसि ईरिते सति तदम्बुराशिना युगक्षयवर्द्धिना समं तुल्यं यथा तथा सदो नृपैरास्थानं महाप्रलये सर्वसंहारे समुद्यतमुद्युक्तं सत् सपदि प्रचुक्षुभे प्रचुक्षोभ । कल्लोलितमहामारुतेन महार्णव इव तद्वचनेन तत्सदः क्षुभितमासीदित्यर्थः । उपमा । रुचिरावृत्तम् । चतुर्ग्रहैरिह रुचिरा जभस्जगा इति लक्षणात् ॥ १ ॥

अथाष्टादशभिः सभाक्षोभं वर्णयति । सरागयेत्यादि । नृपाः राजानः सह रागेण पाटलिम्ना अनुरागेण च सरागया । तेन सहेति तुल्ययोगे बहुव्रीहिः । स्रुतं घनं सान्द्रं घर्मतोयं स्वेदोदकं यस्यां सा तया कराहत्या पाणितलास्फालनेन ध्वनितं पृथु महदूरुः पीठमिव ऊरुपीठं यस्यां तया मुहुर्मुहुर्दशनविखण्डितोष्ठया दन्तदष्टाधरया । रुषा

अलक्ष्यत क्षणदलिताङ्गदे गदे
करोदरप्रहितनिजांसधामनि ।
समुल्लसच्छकलितपाटलोपल
स्फुलिङ्गवान् स्फुटमिव कोपपावकः ॥ ३ ॥
अवज्ञया यदहसदुच्चकैर्बलः
समुल्लसद्दशनमयूखमण्डलः
रुषारुणीकृतमपि तेन तत्क्षणं
निजं वपुः पुनरनयन्निजां रुचिम् ॥ ४ ॥
यदुत्पतत्पृथुतरहारमण्डलं

प्रियतममेव भेजिरे। आविष्टोऽनाविष्टश्च रौद्रस्थायी क्रोधः प्रादुर्भूत इत्यर्थः। उपमालङ्कारः ॥ २ ॥

अथ सप्तदशभिः राज्ञां क्रोधानुभावानाह। अलक्ष्यतेत्यादि। करोदरप्रहितं पाणितलास्फालितं निजमंसधाम स्वांसप्रदेशो येन तस्मिन्। अतएव क्षणात् दलिताङ्गदे भग्नकेयूरे। गदे गदाख्ये कृष्णानुजे समुल्लसद्भिरुत्पतद्भिः शकलितैः शकलीकृतैरङ्गदलग्नैः पाटलोपलैः पद्मरागैः कोपपावकः स्फुलिङ्गवानिव स्फुटं व्यक्तमलक्ष्यतेत्युत्प्रेक्षा। विप्रुषः स्फुलिङ्गोऽग्निकण इत्यमरः ॥ २ ॥

अवज्ञयेति। बलो बलभद्रः समुल्लसत् समन्ततः प्रसरद्दशनमयूखमण्डलं दन्तरश्मिपटलं यस्य स सन् अवज्ञया अनादरेण उच्चैः अहसदिति यत् तेन हासेन रुषारुणीकृतमपि निजं वपुः तत्क्षणं तस्मिन् क्षणे। अत्यन्तसंयोगे द्वितीया। पुनर्निजां रुचिं धावल्यमेवानयत्। अत्र वपुषः स्वाधारक्तत्यागेन दन्तधावल्यस्वीकारात् तद्गुणालङ्कारः। तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणाश्रयादिति लक्षणात् ॥ ४ ॥

यदीति। उल्मुको नाम राजा उत्पतदुच्छलत् पृथुतरं हारमण्डलं

व्यवर्त्तत द्रुतमभिद्रुतमुत्सुकः ।
वृहच्छिलातलकठिनांसघट्टित
न्ततोऽभवद्भ्रमितमिवाखिलं सदः ॥ ५ ॥
प्रकुप्यतः श्वसनसमीरणाहति
स्फुटोष्मभिस्तनुवसनान्तमारुतैः ।
युधाजितः कृतपरिहार्यवीजन
मुनस्तरां वदनसरोजमस्विदत् ॥ ६ ॥
प्रजापतिक्रतुनिधनार्थमुत्थित
व्यतर्कयज्ज्वरमिव रौद्रमुद्धतम् ।

सङ्ग्रामकामोऽस्मिन् कर्म्मणि तदग्रयातया अभिद्रुतं द्रुताभि मुखं व्यवर्त्तत विहृत इति द्रुतं यत् ततोविवर्त्तनादखिलं सदः वृहता शिलातलकठिनेनां सेन स्कन्धेन घट्टितं भ्रमितमिवाभवत् विवर्त्तवेगवेगोत्पादं संघट्टनाद्भ्रमितमिवाभूदित्युत्प्रेक्षा ॥ ५ ॥

प्रकुप्यत इति । प्रकुप्यतोऽतिक्रुध्यतोयुधाजितोनाम राज्ञोवदनं सरोजं श्वसनसमीरणस्य निश्वासमारुतस्याहतिभिः स्फुटः प्रकटः ऊष्मा उष्णत्वं येषां तैः तनुवसनान्तमारुतैः सूक्ष्मवस्त्राञ्चलवातैः कृतं परिहार्यवीजनं दीर्घविधूननं यस्य तत् अतिदीर्घं वीज्यमानमपीत्यर्थः पुनस्तरां पुनरत्यन्तम् । अव्ययादाम्प्रत्ययः । अस्विदत् स्विद्यति स्म । स्विदेर्लुङि पुषादित्वादङ्प्रत्ययः अत्रोष्मविशेषण गत्या स्वेदहेतुत्वात्काव्यलिङ्गं वीजनैरपि स्वेदइति विरोध । वीजिरयं चुरादिषु अन्वेषणीयः ॥ ६ ॥

प्रजेति । जनः सपदि विद्विषां वधाय समुद्यतचक्राक्तं उद्धतं तीव्रं अतएवातिक्रुधमधिकक्रोधमनौषधमप्रतीकारमित्यर्थः निषधं निषधाख्यं नृपं प्रजापतिक्रतुनिधनार्थं दक्षाध्वरध्वंसनार्थमुत्थितं रुद्रस्येमं

समुद्यतं सपदि वधाय विद्विषा
मतिक्रुधविषधमनोपधस्थ्नः ॥ ७ ॥
परस्परस्परिकुपितस्य पिंपतः
सतोर्मिकाकनकपरागपङ्कलम् ।
करद्वयं सपदि सुभग्नमोनिजै
रनारतह्रुतिभिरधाव्यताम्बुभिः ॥ ८ ॥
निरायतामनलशिखोज्ज्वलां ज्वल
न्नखप्रभाकृतपरिवेषसम्पदम् ।
अविभ्रमद्भ्रमदनमोन्मुक्ताकृति

मदेशिनोऽङ्गदिव दग्धमाशुकिः ॥ ९ ॥
दुरीहतामभजत मन्मथस्तथा
यथा पुरा परिचितदार्ढ्यधार्ष्ट्यया ।
ध्रुवम्पुनः समरमसुन्तृतीयया
हरोऽपि न व्यसहत वीक्षितुन्दृशा ॥ १० ॥
विचिन्तयन्नुपनतमाहवं रसा
दुरः स्फुरत्तनुरुहमग्रपाणिना ।
परामृशत्कठिनकठोरकामिनी
कुचस्थलप्रमुषितचन्दनम्पृथु ॥ ११ ॥

दग्धमिवाशुमेघा । अबिभ्रमत् भ्रमयति स्म । भ्रमेर्णौ चङ् । द्रुत सन्तर्जनाय भ्राम्यमाणनखप्रभापटला तर्जनी जगद्दाहाय आशुमा खालातचक्रवदलक्ष्यतेत्यर्थः ॥ ९ ॥

दुरीक्ष्यतामिति । मन्मथ प्रद्युम्नाख्यः कामस्तथा दुरीक्षता दुर्दर्शनत्वम् । ईक्षते खलन्तात्तलुप्रत्यय । अभजत यथा हरोऽपि पुरा पूर्वजन्मनि परिचितमभ्यस्तं दार्ढ्यधार्ष्ट्यं दृढत्वसाहसं यस्यास्तया तृतीयया दृशा । समरमसु मन्मथं ध्रुवं पुनर्वीक्षितुं न व्यसहत न शक्तः । पारमेश्वर्यः शैवक्षितयक्षित्वनिवर्तितः सुखशार्दूलधादीनां वा कार्यमाथेऽपि इति विकल्पात्र पक्षम् । अनयोर्वर्मेवायं रुद्रस्यापि भीषणं किमुतान्येषामिति वस्तु व्यज्यते ॥ १० ॥

विचिन्तयन्निति । पृथुर्नाम राजा उपनतं प्राप्तमाहवं युद्धं रसाद्रागात् विचिन्तयन् कदेति ध्यायन् कठिनेन कर्कशेन कठोरेण प्रवृद्धेन कामिन्याः कुचस्थलेन प्रमुषितमपहृतं चन्दनं यस्य तत् । एतेनास्य सुरतसमरयोः समरसत्वं व्यज्यते । अतएव स्फुरत्तनुरुहमुद्गतपुलकमुरः कपाटवक्षः परामृशदिति । समानाधिकरणसमासः अतएव

विलङ्घितस्थितिमभिवीक्ष्य रूक्षया
रिपोर्गिरा गुरुमपि गान्दिनीसुतम् ।
जनैस्तदा युगपरिवर्त्तवायुभि-
र्व्विवर्त्तिताः गिरिपतयः प्रतीयिरे ॥ १२ ॥
विवर्त्तयन्मदकलुषीकृते दृशौ
कराहतक्षितिकृतभैरवारवः ।
क्रुधा दधत्तनुमतिलोहिनीमभू

इत्यापायह्नुत्यादयोर्गुणगुणिनोर्भेदाभेदयोरिति वामनः । तेनायमपायिना पाणितलेन परामृशत् परामृष्टवान् । रणकण्डूयपाणित्वादिति भावः । अतएव सद्भिर्भावरोषजनकं दूतवाक्यं तदाभिमतमपकारश्च तयास्य हर्षे हेतुरिति भेदार्थः ॥ ११ ॥

विलङ्घितेति । गुरुं स्वभावतो धीरमपि सन्तं रूक्षया परुषया रिपोर्गिरा दूतवाचा विलङ्घितस्थितिमुल्लङ्घितमर्यादं क्षोभाद् दुर्मर्यादं विकारापन्नमित्यर्थः गान्दिनीसुतमक्रूरमभिवीक्ष्य जनैस्तदा अक्रूरविक्रियालोकनसमये युगपरिवर्त्तवायुभिः कल्पान्तवातैर्विवर्त्तिताः स्थानादुच्चालिताः गिरिपतयोऽद्रय प्रतीयिरे विश्वसिरे । अक्रूरविक्रियादर्शनाद्गिरिचलनमपि युगान्ते सम्भावितं मेने इति जनैर्विश्वस्तमित्यर्थः । मन्दयोऽधीनप्रत्ययत्वाद्विश्वास हेतुमित्यमरः । प्रतिपूर्वादिणः कर्मणि लिट् । अत्र कल्पान्ते गिरिपतनविक्रियाकल्पनमक्रूरविक्रियेति वाक्यभेदेन सादृश्याक्षेपान्निदर्शनालङ्कारः । तेनास्य लोकोत्तरं धैर्यं नैसर्गिकमिति वस्तु व्यज्यते ॥ १२ ॥

विवर्त्तयन्निति । मदो मद्यविकारो दानं च । मदो मद्योऽमदानयोरिति विश्वः । तेन कलुषीकृते व्याकुलीकृते दृशौ विवर्त्तयन् घूर्णयन् करेण पाणिना पुष्करादण्डेन चाहताया क्षितौ भूमौ कृतो भैरव-

प्रसेनजिद्गज इव गैरिकारुणः ॥ १३ ॥

सकुङ्कुमैरविरलमम्बु विन्दुभि-
र्गवेषणः परिणतदाडिमारुणैः ।
स मत्सरस्फुटितवपुर्विनिःसृतै-
र्बभौ चिरन्निचित इवासृजां लवैः ॥ १४ ॥

ससम्भ्रमञ्चरणतलाभिताडन-
स्फुटन्मही विवरवितीर्णवर्त्मभिः ।
रवेः करैरनुचिततापितोरगं
रसातलं शिनिरनयद्रसातलम् ॥ १५ ॥

दर्शयद्भुरध्वनिर्येन सः क्रोधात्मध्वानं करेण क्षितिं ताडयन्नित्यर्थः। क्रुधा क्रोधेन अतिलोहिनी मतिलोहिताम्। वर्णादनुदात्तात्तोपधात्तो न इति विकल्पात् ङीप् तकारस्य च नकारः। तद्वपुर्दधत् प्रसेनजिन्नाम राजा गैरिकारुणो धातुरक्तो गज इवाभूत् तद्वद्दृश्यतेत्यर्थः ॥ १२ ॥

सकुङ्कुमैरिति। स मणिमौलिवेणुर्नाम राजा सकुङ्कुमैः सर्वाङ्गीणकाश्मीरजद्रवैरित्यर्थः। अतएव परिणतदाडिमारुणैः परिपक्वदाडिमबीजरक्तैरम्बुबिन्दुभिः क्रोधसात्त्विकैः स्वेदबिन्दुभिरित्यर्थः। मत्सरेणान्तः संरम्भेनाल्पत्वकरेण स्फुटितात् विभिन्नात् वपुषो विनिःसृतैरसृजां लवैः रक्तबिन्दुभिरविरलैरविरलं निचितो व्याप्त इव चिरं बभौ। उत्प्रेक्षा ॥ १४ ॥

ससम्भ्रममिति। शिनिः सात्यकेः पितामहः ससम्भ्रमं सत्वरं चरणतलाभिताडनेन पादतलाभिघातेन स्फुटन्त्या दलन्त्या मह्या विवरैः छिद्रैः वितीर्णवर्त्मभिर्दत्तमार्गैस्तनूभवरन्ध्रैरित्यर्थः। रवेः करैः अनुचितं पूर्वमपरिचितमिदं यथा तथा तापिताः सन्तापं गमिताः

प्रतिक्षणं विधुवति शारणे शिरः
शिखिद्युतः कनककिरीटरश्मयः ।
अशङ्कितं युधमधुना विभून्नमी
क्षमापतीनिति निरराजयन्निव ॥ १६ ॥

दधौ चलत्पृथुरसनं विवक्षया
विदारितं विततबृहद्भुजालतः ।
विदूरथः प्रतिभयमास्यकन्दरं
चलत्फणाधरमिव कोटरन्तरुः ॥ १७ ॥

उरगा यस्मिन् तत् उरगातलं प्रकाशतां प्रकटत्वमनयत् । अत्र महीर-
विवरोदरलक्षितमार्गाणां क्रमेण स्फुटनान्तः प्रवेशतापदकारणैरसम्बन्धेऽपि
सम्बन्धोक्तेरतिशयोक्तिः पादाहननैरमाकूर्णी तीव्रतां व्रजति व्यक्तेति
ध्वनिः ॥ १५ ॥

प्रतीति । शारणो नाम राजा प्रतिक्षणं शिरो विधुवति क्रोधात्
कम्पयति सति । धुवतीत्यादिनोवङ् ... ... धात्विन्द्रा-
दिना ... । शिखिवत् द्योतन्त इति शिखिद्युतोऽग्निप्रभाः । किं च ।
कनककिरीटरश्मयो नीराजनकर्तारः अमी नृपाः अधुना अशङ्कितं
निःशङ्कं युद्धमाजिम् । ... इत्यमरः । विभून्निति
क्षमापतीन्निव ... नीराजन्ति ... । नीराजना
... इत्यागमः ॥ १६ ॥

दधाविति । वितते विस्तृते बृहत्यौ भुजे लते इव यस्य स विदू-
रथो नाम राजा । विवक्षया किमपि वक्तुमिच्छया विदारितं व्यात्तं
चलन्ती पृथुर्महती रसना जिह्वा यस्मिन् तम् । रसज्ञा रसना
जिह्वेत्यमरः । प्रतिभयं भयङ्करमास्यं कन्दरमिवास्यकन्दरम् । दरी
तु कन्दरो वा स्त्रीत्यमरः । चलत्फणाधरः फणी यस्मिन् स कोटर-

समाकुले सदसि तथापि विक्रिया
मनोऽगमन्न मुरभिदः परोदितैः ।
घनाम्बुभिर्बहुलितनिम्नगाजलै
र्जलं न हि व्रजति विकारमम्बुधेः ॥ १८ ॥
परानमी यदपवदन्त आत्मनः
स्तुवन्ति च स्थितिरसतामसाविति ।
निनाय नो विकृतिमविस्मितः स्मित
मुखं शरच्छशधरमुग्धमुद्धवः ॥ १९ ॥
निराकृते यदुभिरिति प्रकोपिभिः

मित । निवकुहः कोटरं वा मेत्यमर । दधौ । धौतौ पूर्व्वोपमा ॥ १७ ॥

समाकुल इति । परोदितैः शत्रुवाक्यैः सदसि आस्थाने तथा समाकुले क्षुभितेऽपि मुरभिदो हरेर्मनो विक्रियां क्षोभं नागमत् । तथा हि बहुलितानि क्षोभितानि निम्नगाजलानि यैस्तैर्घनाम्बुभिः मेघोदकैरम्बुधेर्जलं विकारं न व्रजति । यथा वर्षोदकैर्नद्यः क्षुभ्यन्ति न समुद्रस्तद्वदिति । भावः । दृष्टान्तालङ्कारः ॥ १८ ॥

परानिति । अमी खलाः परानन्यानपवदन्ते निन्दन्ति । अपाद्वद इत्यात्मनेपदम् । आत्मनः स्वानि स्तुवन्ति चेति यत् असावसतां खलानां स्थितिः प्रकृतिरिति इति मत्वेत्यर्थः । गम्य मानार्थत्वादप्रयोगः अन्यथा पौनरुक्त्यमित्यालङ्कारिकाः । विस्मितो न भवतीति अविस्मितोद्भूतप्रलापैर्विस्मयं न गत उद्धवः स्मितं स्मेरम् । उभयत्र कर्त्तरि क्तः । अतएव शरच्छशधरमुग्धं शरदिन्दुसुन्दरमित्युपमा । मुखं विकृतिं न निनाय न प्रापयामास । न हि महतां निन्दास्तुतिर्वा विकारकारणमिति भावः ॥ १९ ॥

निराकृत इति । तत्र सदसि इतीत्थं प्रकोपिभिरतिमन्युभिः यदुभिः

स्पशे शनैर्गतवति तत्र विद्विषाम् ।
मुरद्विषः स्तनितभयानकानक
बलं क्षणादथ समनह्यताजये ॥ २० ॥
मुहुः प्रतिस्खलितपरायुधा युधि
स्थवीयसीरचलनितम्बनिर्भराः ।
अदंशयन्नरहितशौर्यदंशना
स्तनूरयं नय इति वृष्णिभूभृतः ॥ २१ ॥
दुरुद्वहाः क्षणमपरैस्तदन्तरे

विद्विषां स्पशे चरे । अपसर्पश्चरः स्पशः इत्यमरः । निराकृते धिक्कृते शनैर्गतवति गच्छति सति । सागसोऽपि दूतस्यावध्यत्वादिति भावः । अथ दूतगमनानन्तरं स्तनितेन ध्वनिना भयानकाः भयङ्कराः आनकाः पटहा यस्मिन् तत् मुरद्विषोबलं क्षणादाजये युद्धाय समनह्यत सन्नद्धम् ॥२०॥

मुहुरिति । वृष्णिभूभृतो यादवनरेन्द्राः मुहुरसकृद्युधि प्रतिस्खलितपरायुधाः प्रत्यस्तपरायुधाः स्थवीयसीः स्थूलतराः पराक्रमानुरूपमाकर्षवतीरित्यर्थः । स्थूलदूरेत्यादिना पूर्वस्य गुणः लोपौ । अचलनितम्बनिर्भराः अद्रिकटकनिबिडाः अन्तःसारवतीरित्यर्थः । अरहितमत्यक्तं शौर्यमेव दंशनं वर्म यासां तास्तनूर्देहान् अयं नय इति धर्मधारणं नीतिरिति हेतोर्न तु भयादिति भावः । अदंशयन् अवर्मयन् । दंशेरनुदात्तेत्त्वात्परस्मैपदं चिन्त्यमित्याहुः । अतएव भट्टमल्लः संवर्मयति यदन्त्यात्मनेपदन्तोऽस्मी । दन्दशते दंशयते इत्याह पदमञ्जर्यामिति । केचित्तु पुरादिषु भयदादिषु पठन्ति । अत्र साभिप्राय-विशेषणत्वात् परिकरालङ्कारः ॥ २१ ॥

दुरुद्वहा इति । महिमभृतां मेदस्वतां महौजसां राज्ञां कुम्भ-

रणप्रवादुपचयमाशु बिभ्रति ।
महीभुजां महिमभृतां न सम्ममु-
र्मुदोऽन्तरा वपुषि बहिश्च कञ्चुकाः ॥ २२ ॥
सकल्पनं द्विरदगणं वरूथिन-
स्तुरङ्गिणोजयनयुजश्च वाजिनः ।
त्वरायुजः स्वयमपि कुर्वतो नृपाः
पुनःपुनस्तदधिकृता नतत्वरन् ॥ २३ ॥
युधे परैः सह दृढबद्धकक्षया

क्षितीति रणप्रवात् युद्धश्रवणात् आशु शीघ्रं उपचयं वृद्धिं बिभ्रति बिभ्राणे वपुषि अपरैरन्यैः क्षणमपि दुर्वहा दुर्भरा मुदः सन्तोषाः अन्तरा न संमम्नुस्तदन्तरे बहिः कञ्चुकाश्च न सममुः न मान्ति स्म नावर्त्तन्तेत्यर्थः पूर्वत्र आधेयाधिक्यात् उत्तरत्राधाराधिक्यादिति विवेकः अत्र । मुदां कञ्चुकानां च प्रकृतानामेव विशेषणसाम्यादौपम्यगम्यतायां केवलप्रकृतास्पदा तुल्ययोगिता ॥ २२ ॥

*सकल्पनमिति । द्विरदगणं सह कल्पनया सकल्पनं यथोचितसन्ना-*हसहितम् कल्पना सज्जना समा इत्यमरः । वरूथोऽस्य गुप्तिरेषामस्तीति वरूथिनो रथान् । रथगुप्तिर्वरूथो नेत्यमरः । तुरङ्गिणोऽश्वयुक्तान् वाजिनोऽश्वान् जयनयुजः पल्ययनादिसन्नाहयुक्तान् । सम्पदादिभ्यः क्विप् । जयनः स्यात्तुरङ्गादिसन्नाहे विजयेऽपि चेति विश्वः । स्वयं त्वरायुजः त्वरायुक्तान् स्वतः कुर्वतोऽपि स्वतएव त्वरया कुर्वाणानपीत्यर्थः तदधिकृतान् हस्त्यादिषु नियुक्तपुरुषान् नृपाः पुनः पुनरतत्वरन् त्वरयन्ति स्म तेषां तथा रणौत्सुक्यादिति भावः । त्वरतेर्णौ चङि चङ् ह्रस्वः त्वर प्रथमदन्तस्य त्वामित्यभ्यासस्याकार ॥ २३ ॥

युधे इति । अथ परैः सह युधे युद्धाय दृढबद्धा कक्षा मध्यबन्धनं

कलक्वणन्मधुपकुलोपगीतया ।
अदीयत द्विपघटया सवारिभिः
करोदरैः स्वयमथ दानमक्षयम् ॥ २४ ॥

सुमेखलाः सिततरदन्तचारवः
समुल्लसत्तनुपरिधानसम्पदः ।
रणैषिणामुपलकभृतोऽधिकन्धरं
ललम्बिरे सदसिलताः प्रिया इव ॥ २५ ॥

मनोहरैः प्रकृतिमनोरमाकृति

वशात्तया । कक्ष्या इष्टिकायां स्यात् काञ्च्यां मध्येभबन्धने इति विश्वः । अन्यत्र इष्टोद्योगवत्यर्थः । कलं क्वणता मधुपकुलेनालिगणेनोपगीतया बन्दिमागधस्तुतया चेति गम्यते । द्विपघटया कर्त्र्या स्वयं सवारिभिः सोदकैः करोदरैः पुष्कराग्रैः पाणितलाग्रैश्चाक्षयमपरिमितं दानं मदः अदीयत दानं द्रव्यं चादीयत दत्तम् । अत्र प्रस्तुतगजघटाविशेषण-साम्येनाप्रस्तुत दानकर्तृ प्रतीतेः समासोक्तिरलङ्कारः ॥ २४ ॥

सुमेखला इति । शोभना मेखला बन्धनरज्जुश्च काञ्ची च यासां ताः सुमेखलाः । मेखला खड्गबन्धे स्यात् काञ्चीशैल नितम्बयोरिति विश्वः । सितेतरैर्दन्तैर्दशनैस्तत्प्रभिर्द्दशनैश्च चारवः उज्ज्वलन्त्यः तनवः सूक्ष्माः परिधानसम्पदः कोशसम्पदोऽस्य सम्पदश्च यासां ताः पुलकभृतः छायाभृतः रोमाञ्चधारिण्यश्च सदसिलताः चारुखड्गा वल्ल्यः प्रिया इव रणैषिणां रणाकाङ्क्षिणां कन्धरास्वधिकन्धरं अधिकण्ठम् । विभक्त्यर्थेऽव्ययीभावः । ललम्बिरे लग्ना इत्यर्थः । श्लेषः श्लिष्टोपमा वा मतभेदात् ॥ २५ ॥

मनोहरैरिति । अथ प्रकृतिमनोरमाकृतिः स्वभावसुन्दरमूर्त्तिः स-मितिषु युद्धेषु भीमं दर्पमं यस्य समोमदर्पमोहर जिह्वादिर्मनोहरैः मन-

र्निषादिभिर्विदितयताङ्कुशक्रियैः ।
गजाःसकृत्करतललोलनालिका
हतामुहुः प्रणदितघण्टमाययुः ॥ २५ ॥
सविक्रमक्रमणचलैरितस्ततः
प्रकीर्णकैः क्षिपत इव क्षितेरजः ।
व्यरंसिषुर्नखलु जनस्य दृष्टय
स्तुरङ्गमादभिनवभाण्डभारिणः ॥ २६ ॥
चलाङ्गुलीकिसलयमुद्गतैः करै

यास्तैरित्यर्थः अतएव विदिते यताङ्कुशक्रिये यतयाताख्ये पदाङ्कुशकर्मणी यैस्तैः । पादकर्म यतं प्रोक्तं यातमङ्कुशवारणमिति हलायुधः । निषादिभिर्यन्तृभिः प्रचोदिता प्रेरिता गजा सकृदेकवारमेव करतललोलाभिः भ्रामितचलिताभिर्नालिकाभिरन्तर्नाडिकाभिर्हतास्ताडितास्तथापि मुहुः प्रणदिता अत्यन्तं ध्वनन्तो घण्टा यस्मिन् कर्मणि तद्यथा आययु रस्यात्तमागताः । स्वभावोक्तिः ॥ २५ ॥

सविक्रमेति । सविक्रमेण साङ्घ्रिविन्यासविशेषेण क्रमणेन गमनेन चलैः प्रकीर्णकैश्चामरैः । चामरं तु प्रकीर्णकमित्यमरः । क्षितेर्भुवो रजः खुरोद्धतमितस्ततः क्षिपतो निरस्यत इव स्थितादित्युत्प्रेक्षा । अभिनवभाण्डभारिणः प्रत्यग्राभरणधारिणः । साश्वभाण्डमश्वाभरणमित्यमरः । तुरङ्गमात्तुरङ्गमेभ्यः । जातावेकवचनम् । जुगुप्साविरामप्रमादार्थानामुपसंख्यानमित्यपादानत्वम् । जनस्य दृष्टयो न व्यरंसिषुर्न विरता खलु । रमेर्लुङि व्याङ्परिभ्यो रम इति परस्मैपदं यमरमनमातां सक्चेति सगिडागमौ इट ईटीति सिचो लोपः ॥ २६ ॥

अथ विशेषकमाह । चलेत्यादि । स्फुटं हतं कर्णताडं कर्णताडनं यथा तथा द्विपघटया करिण्या चलाङ्गुल्य एव किसलया यस्मिन् क

रनृत्यत स्फुटकृतकर्णतालया ।
मदोदकद्रवकटभित्तिसङ्गिभिः
कलस्वरं मधुपगणैरगीयत ॥ २७ ॥
असिच्यत प्रशमितपांशुभिर्मही
मदाम्बुभिर्धृतनवपूरकुम्भया ।
अवाद्यत श्रवणसुखं समुन्नम
त्पयोधरध्वनिगुरु तूर्यमाननैः ॥ २८ ॥
उदासिरे पवनविधूतवासस
स्ततस्ततो गगनलिहश्च केतवः ।
यतः पुरः प्रतिरिपु शार्ङ्गिणः स्वयं
व्यधीयत द्विपघटयेति मङ्गलम् ॥ २९ ॥ विशेषकम् ॥

र्षं यथा तथोद्धृतैः करैर्हस्तैरनृत्यत अनर्ति । भावे लङ् । तथा मदोदकेन द्रवासार्द्रासु कटभित्तिषु गण्डस्थलेषु सङ्गिभिरासक्तैः मधुपगणैर्भ्रमरगणैः कलस्वरं मधुरस्वरमगीयत गीतम् । भावे । लङ् ॥ २७ ॥

असिच्यतेति । धृतौ नवौ पूर्णकुम्भौ शिरःपिण्डकौ यया तया द्विपघटया कर्त्र्या । कुम्भौ घटेभमूर्द्धांशावित्यमरः । प्रशमितपांशुभिर्मदाम्बुभिर्मही असिच्यत सिक्ता । आननैः शुण्डैः करणैः श्रवणयोः सुखयतीति सुखं सुखकरम् । सुखहेतौ ... सुखमिति शब्दार्थः समुन्नमत्पयोधरध्वनिगुरु उद्यन्मेघगर्जितगम्भीरं तूर्यं अवाद्यत । वादितम् । ... तूर्यं वाद्यादित्यर्थः ॥ २८ ॥

उदासिरे इति पवनेन विधूतवाससः कम्पितपटाः गगनलिहोऽभ्रंलिहाः केतवो ध्वजाश्च

रिपुं रिपुं प्रति । आभिमुख्येऽव्ययीभावः ।

न शून्यतामगमदसौ निवेशभूः
प्रभूततान्दधति बले चलत्यपि ।
पयस्यभिद्रवति भुवं युगावधौ
सरित्पतिर्नहि समुपैति रिक्तताम् ॥ ४० ॥

थियासितामथ मधुभिद्विवस्वता
जनोजरन्महिषविषाणधूसराम् ।
पुरः पतत्परबलरेणुमालिनी
मलक्षयद्दिशमभिधूमितामिव ॥ ४१ ॥

शतादेयः । शार्ङ्गिणः पुरोऽग्रे स्वयं मङ्गलं व्यधीयत विहितम् । अत्र श्लोकद्वये प्रस्तुतद्विपघटाविशेषणसाम्यादप्रस्तुतमङ्गलाचरणपरपुरन्ध्रीप्रतीतेः समासोक्तिरलङ्कारः ॥ ३९ ॥

नेति । प्रभूततां भूमानं दधति दधाने बले सैन्ये चलति प्रतिष्ठमानेऽपि असौ निवेशभूः सेनानिवेशभूमिः शून्यतां रिक्ततां नागमत् । तथाहि युगावधौ युगान्ते पयसि भुवमभिद्रवत्यभिप्लवमाने सति सरित्पतिः समुद्रो रिक्ततां न समुपैति हि दृष्टान्तालङ्कारः ॥ ४० ॥

थियासितामिति । अथ मधुभिद्धरिरेव विवस्वान् तेन थियासितां यातुमिष्टां जिगमिषिताम् । यातेः सन्नन्तात्कर्मणि क्तः । पततोऽभिधावतः परबलस्य शत्रुसैन्यस्य रेणून्मालते धारयतीति तन्मालिनी । मलतेर्णिनिः प्रत्ययः । अतएव जरतो वृद्धस्य महिषस्य विषाणवद्धूसरां धूम्रां पुरोऽग्रे दिशमभितो धूमोऽस्याः सञ्जातस्ता मभिधूमितामिव जनो लोकोऽलक्षयत् । मधुभिद्विवस्वतेति रूपकोत्थापितायदिशि धूमितत्वोत्प्रेक्षेति सङ्करः । यन्नाहुः धङ्कारिणी दिनविनिर्मुक्ता यस्यां रविस्तिष्ठति सा प्रदीप्ता । सम्प्रति वास्यति यां दिनेशः शेषाः प्रशस्ताः शुभदाश्च ताः स्युरिति ॥ ४१ ॥

मनस्विनामुदितगुरुप्रतिश्रुतिः
श्रुतस्तथा न निजमृदङ्गनिस्वनः ।
यथा पुरःसमरसमुद्यतद्विष-
द्बलानकध्वनिरुदकर्षयन्मनः ॥ ४२ ॥

यथा यथा पटहरवः समीपता-
मुपागमत्स हरिवराग्रतःसरः ।
तथा तथा हृषितवपुर्मुदाकुला
द्विषाञ्चमूरजनि जनीव चेतसा ॥ ४३ ॥

मनस्विनामिति । उदिता उत्पन्ना गुरुर्गम्भीरा प्रतिश्रुतिः प्रतिध्वनिर्यस्य सः निजमृदङ्गनिस्वनः स्वसेनातूर्यघोषः श्रुतः सन् तथा मनस्विनां मनो नोदकर्षयन् नाचकर्ष । कृषिरयं स्वार्थे ण्यन्तः । यथा पुरोऽग्रे समरसमुद्यते समरोद्युक्ते द्विषद्बले शत्रुसैन्ये ये आनकाः तेषां ध्वनिरुदकर्षयत् एतेनैषां वीरस्थायी महोत्साह उक्तः । अत्र भयहेतोरपि परसैन्यघोषस्योत्साहजनकत्वं महावीरेषु न विरुध्यत इति विरोधाभासोऽलङ्कारः भीरुत्वे सत्यपि भयाकुलत्वे विरोधोक्तिरिह कार्योत्पत्ते विषमभेदश्चेति सङ्करः ॥ ४२ ॥

यथा यथेति । हरिर्वरो नाथोऽस्येति हरिवरः । वरो जामातृ वर्ययोरिति विश्वः । तस्याग्रतः सरतीत्यग्रतःसरः । पुरोऽग्रतोऽग्रेषु सर्तेरिति टप्रत्ययः । स पूर्वोक्तः पटहरवो यथा यथा यावद्यावत्समीपतामासन्नतामुपागमत् । तथा तथा तावत्तावद् द्विषतां चमूर्जनीव वधूरिव । जनी सीमन्तिनी वधूरिति विश्वः । चेतसा मुदाकुला चानन्दाविष्टा हृषितवपुः रोमाञ्चिताङ्गी । हृषे र्लोमसु इतीडागमः । अजनि जाता । जनेः कर्तरि लुङ् दीपजनेत्यादिना च्लेश्चिण्प्रत्ययः वधूवरसमागमवत् प्रतिद्वन्द्विसमागमो महोत्साहवर्धनो वीरसेनाया इत्युपमार्थः ।

न शून्यतामगमदसौ निवेशभूः
प्रभूततान्दधति बले चलत्यपि ।
पयस्यभिद्रवति भुवं युगावधौ
सरित्पतिर्नहि समुपैति रिक्तताम् ॥ ४० ॥
यियासितामथ मधुभिद्विवस्वता
जनोजरन्महिषविषाणधूसराम् ।
पुरः पततपरबलरेणुमालिनी
मलक्षयद्दिशमभिधूमितामिव ॥ ४१ ॥

समारोपः। शार्ङ्गिणः पुरोऽग्रे स्वयं मङ्गलं व्यधीयत विहितम्। अत्र श्लोकद्वये प्रस्तुतद्विपघटाविशेषणसाम्यादप्रस्तुतमङ्गलाचरणपरपुरन्ध्रीप्रतीतेः समासोक्तिरलङ्कारः ॥ ३९ ॥

नेति। प्रभूततां भूमानं दधति दधाने बले सैन्ये चलति प्रतिष्ठमानेऽपि असौ निवेशभूः सेनानिवेशभूमिः शून्यतां रिक्ततां नागमत्। तथाहि युगावधौ युगान्ते पयसि भुवमभिद्रवत्यभिप्लवमाने सति सरित्पतिः समुद्रो रिक्ततां न समुपैति हि दृष्टान्तालङ्कारः ॥ ४० ॥

यियासितामिति। अथ मधुभिद्धरिरेव विवस्वान् तेन यियासितां यातुमिष्टां जिगमिषिताम्। यातेः सन्नन्तात्कर्मणि क्तः। पततोऽभिधावतः परबलस्य शत्रुसैन्यस्य रेणून्धत्ते धारयतीति तन्मालिनी। मत्वर्थीय इनिप्रत्ययः। अत एव जरतो वृद्धस्य महिषस्य विषाणवद्धूसरां धूम्रां पुरोऽग्रे दिशमभितो धूमोऽस्याः सञ्जातस्तामभिधूमितामिव जनो लोकोऽलक्षयत्। मधुभिद्विवस्वतेति रूपकोत्थापितायां दिशि धूमितत्वोत्प्रेक्षेति सङ्करः। व्य-
माङ्गः अङ्गारिणी दिग्विनिर्मुक्ता यस्यां रविस्तिष्ठति सा प्रदीप्ता। सम्भिता यास्यति यां दिनेशः शेषाः प्रशस्ताः शुभदाय ताः स्युरिति ॥ ४१ ॥

मनस्विनामुदितगुरुप्रतिश्रुतिः
श्रुतस्तथा न निजमृदङ्गनिस्वनः ।
यथा पुरःसमरसमुद्यतद्विष
द्बलानकध्वनिरुदकम्पयन्मनः ॥ ४२ ॥

यथा यथा पटहरवः समीपता
मुपागमत्स हरिवराग्रतःसरः ।
तथा तथा हृषितवपुर्मुदाकुला
द्विषांचमूरजनि जनीव चेतसा ॥ ४३ ॥

मनस्विनामिति । उदिता उत्पन्ना गुरुर्गम्भीरा प्रतिश्रुतिः प्रतिध्वनिर्यस्य सः निजमृदङ्गनिस्वनः स्वसैन्यतूर्यघोषः श्रुतः सन् तथा मनस्विनां मनो मोदकर्षं यद् नाचकरे । कपिरयं स्वार्थे कन् । यथा पुरोऽग्रे समरमुद्यते सम्प्रति युद्धे द्विषद्बले शत्रुसैन्ये ये आनकाः तेषां ध्वनिरुदकम्पयत् एतेनैषां धीरत्वाधीनो महोत्साह उक्तः । अत्र भयहेतुत्वस्यापि परकीयघोषस्याह्लादजनकत्वं महावीरेषु न विरुध्यत इति विरोधाभासोऽलङ्कारः भयहेतौ सत्यपि भयानुत्पत्ते विशेषोक्तिरिति सङ्कार्योऽस्यते-इनयभेदश्चेति सङ्करः ॥ ४२ ॥

यथा यथेति । हरिर्निरोजमातेव हरिवरः । अद्रोजमातृ वर्ययो-रिति त्रिंशः । रथ्यापतः सरतीत्यग्रतः सरः अग्रेऽग्रतोऽग्रेषु सर्तेरिति टप्रत्ययः । स पूर्वोक्तः पटहरवो यथा यथा आवश्यकदन्तो-पलम्भकत्वात्समीपतामुपागमत् । तथा तथा तावत्तत्र द्विषतां चमूर्जनीव वधू-रिव । जनी सीमन्तिनी वधूरिति विश्वः । चेतसा मुदाकुला आनन्दा-न्विता हृषितवपुरोमाञ्चिताङ्गी । हृषे लोमस्विति इडागमः । अजनि जाता । जनेः कर्तरि लुङ् दीपजनेत्यादिना चिण्प्रत्ययः वधूपरसमा-स्पन्दमुपनिहितविषमा गमोऽभूतोऽत्र हर्षेषोदेरसैनामाद्यमार्थः ।

प्रसारिणी सपदि नभस्तले ततः
समीरणभ्रमितपरागरूषिता।
व्यभाव्यत प्रलयजकालिकाकृति
र्विदूरतः प्रतिबलकेतनावलिः॥ ४४॥
क्षणेन च प्रतिमुखतिग्मदीधिति
प्रतिप्रभास्फुरदसिदुःखदर्शना।
भयङ्करा भृशमपि दर्शनीयतां
ययावसावसुरचमूश्च भूभृताम्॥ ४५॥
पयोमुचामभिपततान्दिवि द्रुतं
विपर्य्ययः परित इवातपस्य सः।

तेन सैन्ययोरन्योऽन्यस्य सन्दर्शनप्रकारादिर्णो प्रत्यासत्ति रासीदिति व्यज्यते॥४३॥

प्रसारिणीति। तत आगमनानन्तरं सपद्यविलम्बेन नभस्तले प्रसारिणी व्याप्ता समीरणेन वायुना भ्रमितेन परागेण रूषिता रूक्षीकृता अत एव प्रलयजाया कल्पान्तप्रादुर्भूताया कालिकाया मेघपङ्क्त्या आकृतिरिवाकृतिर्यस्याः। सा। प्रतिबले प्रतिपक्षसैन्ये केतनावलिर्ध्वजपङ्क्तिर्विदूरतो दूराद्व्यभाव्यत। एतावता प्रत्यासत्ति रासीदित्यर्थः। उपमालङ्कारः॥४४॥

क्षणेनेति। प्रतिमुखमभिमुखस्य तिग्मरश्मेः सूर्यस्य प्रतिप्रभाभिः प्रतिफलितदीधितिभिः स्फुरद्भिर्दीप्यमानैरसिभिः खड्गैर्दुःखं दुष्करं दर्शनं यस्याः सा दुर्दर्शेत्यर्थः। असावसुरचमूर्दैत्यसेना क्षणेन च भूभृतां हरिसैनिकानां भयं भयङ्करोतीति भयङ्करापि। मेघर्तिभयेषु कृञ इति खच्प्रत्ययः। दर्शनीयतां मनोहरतामिति विरोधः। हरिविषयतां यथा विषयविरोधः अतएव विरोधाभासोऽलङ्कारः॥४५॥

पयोमुचामिति। अथाहवदिनाद्युद्धारम्भानन्तरं समविषमेषु निम्नो-

समक्रमः समविषमेष्वथ क्षणा-
त्समानलम्बजलराशिरानशे ॥ ४६ ॥
ममौ पुरः क्षणमिव पश्यतो महत्
तनूदरस्थितभुवनत्रयस्य तत् ।
विशालतान्दधति नितान्तमायते
भवद्विषाम्मधुमथनस्य चक्षुषि ॥ ४७ ॥
मृशस्विदः पुलकविकाशिमूर्त्तयो
रसाधिके मनसि निविष्टसाध्वसाः ।

एतेषु समक्रमस्तुल्यसञ्चारः कनकजलराशिः सैन्धवसागरः दिवि क्षोणि
कृतमभिमततामभिधास्यतां पयोमुचां सम्बन्धी ध्यानमस्य विपर्ययः सा-
देव परितः चयात् समानतं भूतलं ध्यानये । अम्बु व्याप्तौ अतश्चादेरि-
त्याधदीर्घः अश्नोतेश्चेति नुमागमः । उपमालङ्कारः ॥ ४६ ॥

ममाविति । पुरोऽग्रे क्षणमिव यावतः सप्तमाल विलोकयतः । तन-
दोदरस्थानवहारे तनौ क्षोदीयस्युदरे कुक्षौ स्थितं भुवनत्रयं यस्य तस्य
मधुमथनस्य हरेः सम्बन्धिनि विशालतां वैपुल्यं दधति दधाने नितान्त-
मायते दीर्घे द्राघीयसि चक्षुषि भवद्विषां सैन्यं ममौ माति । अप-
कीयस्यादेर्भवतो दैत्यानां परिच्छेदेत्यर्थः । क्षोदीयस्यपि कुक्षौ
भुवनत्रयं परिच्छिन्दतः हरेरति महति चक्षुषि दर्शनपरिच्छेद-
विषयाविति भावः । अत्र भुवन तयाधेयाधारस्य हरेरसामर्थ्यात्ते-
दाधेयस्य वपलासत्या आधिक्यालङ्कारो सङ्कीर्यते ॥ ४७ ॥

मृदेति । स्विन्नरोमाञ्चकम्पस्वेदपुलकसमाहः रतौरवेति निद्राणु ।
तावां तथा सुभोदये दुरारम्भे रतौ च रसाधिकत्वात् सर्वदा भवं स्विः
सर्वाति भवन्ति । किम् । पुलकविकाशि मूर्त्तयो रोमाञ्चोद्भिन्न-
गात्राः रसः वीरः ..... निर्भरे निर्भरे मनसि नि-

विसारितामजिहत कोकिलावली
मलीमसा जलदमदाम्बुराजयः ॥ ५७ ॥
शिरोरुहैरलिकुलकोमलैरमी
मुधा मृधे मृषत युवान एव मा ।
बलोद्धतन्धवलितमूर्द्धजानिति
ध्रुवञ्जनाञ्जरत इवाकरोद्रजः ॥ ५८ ॥
सुसंहतैर्दधदपि धाम नीयते
तिरस्कृतिं बहुभिरसंशयम्परैः ।

मदहेतुत्वादिति भावः तदुक्तं महाभारते । स्त्रियोऽनार्य्या नृत्यन्ति गावः स्वच्छन्दचारतः । कुञ्जराः पांशुवर्षेण बाल्मणाः परनिन्दयेति । दिगन्तचारिणो मेघाः सैन्यरजोमेलनादरुणीभूता इत्यर्थः । अत्र दिगन्तेषु च दन्तिस्रुतमदरूपाणां धनकृष्णस्तुषयस्तावयवरूपकं रूपकमेव समस्तमिति श्लिष्टपरम्परितमिति सङ्करः । अजिहतेति ओहाङ्गतौ ङित् आत्मनेपदे लङ् श्नाभ्यस्तयोरातइत्याकारलोपः अदभ्यस्तादित्यदादेशः ॥ ५७ ॥

शिरोरुहैरिति । अमी युवानः अलिकुलकोमलैः शिरोरुहैः मुधा मृधे । मृध इति युद्धपर्यायेष्वमरः । मा मृषत न म्रियन्ताम् । म्रियतेर्माङि लुङि न माङ्योगे इत्यडभावः । उश्चेति सिचः कित्त्वाद् गुणः । इतीयमाशीरित्यर्थः बलोद्धतं रजः कर्त्तृ धवलितमूर्द्धजान् धवलीकृतकेशान् जनान् जरत इवाकरोत् वृद्धानिवाकरोदित्यर्थः । ध्रुवमित्युत्प्रेक्षायां अनेन यद्धस्य धवलिमधारणार्थ त्यागतेन यौवनरक्षाम् । इत्युत्प्रेक्षावाक्ये इति शिवः । यवयाः स्वविरोऽङ्गोजीर्णोजीर्णो जरन्नपीत्यमरः । जीर्य्यतेरतृन्निति अतृन् प्रत्ययः ॥ ५८ ॥

सुसंहतैरिति । धाम तेजोदधदपि दधानोऽपि तेजस्वी अपीत्यर्थः । इतरेतरैः सुसंहतैः सुसङ्गतैः परैरेकमत्यैः बहुभिः तिरस्कृतिं नी-

यतः क्षितेरवयवसम्पदोऽणव
स्त्विषान्निधेरपि वपुरावरीषत ॥ ५९ ॥

द्रुतद्रवद्रथचरणक्षतक्षमा
तलोल्लसद्बहुलरजोऽवगुण्ठितम् ।
युगक्षयक्षणनिरवग्रहे जग-
त्पयोनिधेर्ज्जल इव मग्नमाबभौ ॥ ६० ॥

समुल्लसद्दिनकरवक्त्रकान्तयो
रजस्वलाः परिमलिताम्बरश्रियः ।
दिगङ्गनाः क्षणमविलोकनक्षमाः
शरीरिणाम्परिहरणीयतां ययुः ॥ ६१ ॥

यते । यथायं निश्चितम् । कर्मभावेऽव्ययीभावः । कुतः यतः क्षितेः स्वल्पा-
क्षितेरवयवसम्पदो रेणुसमूहाः त्विषां निधेः सूर्यस्यापि वपुरावरीषत
आच्छादितवन्तः । वृञोऽनुङि वृतोवेति । ऋटोदीर्घः । विशेषेण सामान्य-
समर्थनरूपोऽर्थान्तरन्यासः ॥ ५९ ॥

द्रुतेति । द्रुतं शीघ्रं द्रवतां धावतां रथानां चरणैश्चक्रैः क्षतात्
क्षुण्णात् क्षमातलादुल्लसता परता बहुलेन सान्द्रेण रजसावगुण्ठितमा-
च्छादितं जगद्युगक्षयक्षणे कल्पान्तकाले निरवग्रहे निर्मर्यादे पयो-
निधेर्जले मग्नमिवाबभाविवाद्रष्टेत्युत्प्रेक्षा । ६० ॥

समुल्लसदिति । समुल्लसन्ती दिनकरस्य वक्त्रस्य कान्तिर्यासां ताः र-
जोभिर्धूसर रजः कार्तं स्माऽऽभाग्यमीति रजस्वलाः । रजः समाप्तति-
रिच्छटोर्वल्लीत्यादिना मतुबर्थीयोऽनुप्रत्ययः । धूलि पुष्पः रजः उद-
क्याश्च । परिमलिताः परितः संज्ञातमला अम्बरस्याकाशस्याम्बरस्य
वस्त्रस्य च श्रीर्यासां ताः क्षणमविलोकनक्षमा विलोकनानर्हाः दिश

निरीक्षितुं वियति समेत्य कौतुका
त्पराक्रमं समरमुखे महीभृताम् ।
रजस्ततावनिमिषलोचनोत्पल
व्यथाकृति त्रिदशगणैः पलाय्यत ॥ ६२ ॥
विषङ्गिणि प्रतिपदमापिबत्यपो
हृताचिरद्युतिनि समीरलक्ष्मणि ।
शनैःशनैरुपचितपङ्कभारिकाः
पयोमुचः प्रययुरपेतवृष्टयः ॥ ६३ ॥

एवाङ्गनाः दिगङ्गनाः शरीरिणां मानिनां चक्षमायत्वाच् परिहर-णीयतामगम्यतां ययुः । तस्मात् मलवद्वाससं न संविशेदेवेत्यादिनिषे-धादिति भावः । श्लिष्टपरम्परितरूपकम् ॥ ६१ ॥

निरीक्षितुमिति । त्रिदशगणैर्देवगणैः समरमुखे रणारम्भे महीभृतां तेषां पराक्रमं निरीक्षितुं वियति कौतुकात्समेत्य रजस्ततौ रजस्तोमे न निमिषन्त्यनिमिषाणि पक्ष्मपातरहितानि । मिषेः पचाद्यच् कुटादित्वान्न गुणः । तेषां लोचनोत्पलानां व्यथा कृति दुःखकारिणीं सत्याम् । तत्र क्विप् । पलाय्यत अपागत । भावे परा-पूर्वादयतेर्लङि तङ् उपसर्गस्यायताविति रेफस्य लत्वम् । अत्र लोचनोत्पलानां व्यथासम्बन्धेऽपि असम्बन्धोक्तेरतिशयोक्तिभेदः ॥ ६२ ॥

विषङ्गिणीति । विषङ्गिणि विषक्ते अतएव हृताचिरद्युतिनि तिर-स्कृताचिरद्युतिनि समीरलक्ष्मणि वातकेतौ रजसि प्रतिपदं प्रतिक्षणं अपोऽम्भांसि आपिबति आकर्षति सति अतएव अपेतवृष्टयो निवृत्तवर्षाः पयोमुचः । उपचिता प्रवृद्धिताः पङ्कभारिका पङ्कभरणानि येषां ते उपचितपङ्कभारिकाः सन्तः । पर्यायार्हणोत्पत्तिषु ण्वुजित्यर्हणार्थे ण्वुल्प्रत्ययः । अर्हणञ्च कर्तव्यसामर्थ्यम् । अतएव भाराक्रान्तैः शनैः श-

नभोनदीव्यतिकरधौतमूर्त्तिभि
र्विवद्गतैरनधिगतानि लेभिरे
चलच्चमूतुरगखुराहतोत्पत
न्महीरजः स्नपनसुखानि दिग्गजैः ॥ ६४ ॥
गजव्रजाक्रमणभरावनम्रया
रसातलं यदखिलमानशे भुवा ।
नभस्तलं बहुलतरेण रेणुना
ततोऽगमत्त्रिजगदिवैकतां स्फुटम् ॥ ६५ ॥
समस्थलीकृतविवरेण पूरिता

त्तुः भावाः । अत्र नभोगतानां पद्मभरण्या सम्बन्धेऽपि तदसम्बन्धोक्ते-
रतिशयोक्तिः ॥ ६३ ॥

नभोनदीति । नभोनद्याः व्यतिकरैः सम्पर्कैः धौत-
मूर्त्तिभिः क्षालिताङ्गैः विवद्गतैः खेचरैः अतएव दिग्गजैरनधिगतानि
चलच्चमूतुरगाणां खुरैराहतम् अतएवोत्पतदुद्गच्छत् मही-
रजस्तेन स्नपनमभिषेचनं तेन यानि सुखानि तानि लेभिरे । कुञ्जराः
पांशुवर्षैः क्रीडां... । अत्रापि दिग्गजानां रजःस्नपनासम्बन्धेऽपि
सम्बन्धोक्तेरतिशयोक्तिः ॥ ६४ ॥
गजेति । गजव्रजानां आक्रमणभरेण पादन्यासगौरवेणावनतया
... रसातलं पातालमानशे व्याप्तम् । यद्यस्मात् नभस्तलं बहु-
लतरेण रेणुनानशे ... ... अगमदेकताम् । ...
... ... । ... ...
स्फुटं ... ॥ ६५ ॥
समेति । समस्थलीकृतानि विवराणि निम्नस्थानानि येन तेन बहु-

महीभृतामखिलरजसा महागुहाः ।
रहस्त्रपाविधुरवधूरतार्थिनां
नभःसदामुपकरणीयतां ययुः ॥ ६६ ॥

गते मुखच्छदपटसादृशीं दृशः
पथस्तिरोदधति घने रजस्यपि ।
मदानिलैरधिमधुचूतगन्धिभि
र्द्विपा द्विपानभिययुरेव रंहसा ॥ ६७ ॥

रजसा पूरिताः महीभृतां भूधराणां महागुहाः । रह इति । अत्यन्तसंयोगे द्वितीया । त्रपया विधुराणां विह्वलानां वधूनां रतं सुरतमर्थयन्त इति तदर्थिनां नभःसदां सुराणां उपकरणीयतां उपकारकत्वं ययुः तासां रजःपूरणात् तामन्धकारणत्वादिति भावः । कृत्यल्युटो बहुलमित्यनीयर् कर्तर्यर्थे । अत्र रजःपूरणस्य विशेषणगत्या उपकारकहेतुत्वात् काव्यलिङ्गभेदस्तथोपकारकत्वासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिरिति सङ्करः ॥ ६६ ॥

गत इति । छाद्यतेऽनेनेति छदः मुखस्य छदो मुखच्छदः । पुंसि संज्ञायां घः प्रायेणेति घप्रत्ययः छादेर्घेऽद्व्युपसर्गस्येति ह्रस्वः । स चासौ पटश्च तत्सादृशीं तत्सादृश्यम् । ब्राह्मणादित्वात् ष्यञ्प्रत्यये षिद्गौरादिभ्यश्चेति ङीष् । स च ष्यञ् पितकरणादीकारो बहुलमिति वामनवचनाद्वैकल्पिकः । गते प्राप्ते । गजानां युद्धपूर्वकाले मुखावरणकारणात् तत्सदृशे घने सान्द्रे रजसि दृशो दृष्टेः पथो मार्गान् तिरोदधति छादयति सत्यपि । अधिमधौ अधिकमकरन्दस्य चूतस्येव गन्धो येषां तैः । उपमानाच्चेति गन्धस्येत्वे तदेकान्तग्रहणं तु व्यभिचारि । मदानिलैरभिज्ञातैर्द्विपा गजा द्विपान् गजान् प्रति रंहसा वेगेनाभिययुरेव । अत्र तिरोहितदृष्टेरभियानविरोधस्य फलाभिद्धे परिहाराद्विरोधाभासोऽलङ्कारः ॥ ६७ ॥

मदाम्भसा परिगलितेन सप्तधा
गजाञ्जनः शमितरजस्तयानधः ।
उपर्यवस्थितघनपांशुमण्डला
नलोकयत्ततपटमण्डपानिव ॥ ६८ ॥

अन्यूनोन्नतयोऽतिमात्रपृथवः पृथ्वीभरस्योद्भृत
स्तन्वन्तः कनकावलीभिरुपमां सौदामिनीदामभिः ।
वर्षन्तः शममानयन्नुपलसत् शृङ्गाररेखायुधाः
काले कालियकायकालवपुषः पांशून् गजाम्भोमुचः ॥

मदाम्भसेति । सप्तधा । करात् कटाभ्यां मेढ्राच्च नेत्राभ्यां च मदस्रुतिरिति । पालकाप्ये । सप्तभिः स्रोतोभिः परिगलितेन स्रुतेन मदाम्भसा अधः शमितोरजश्चयो यैस्तान् उपर्यवस्थितानि तथैव स्थितानि घनानि सान्द्राणि पांशुमण्डलानि पूर्वोक्तरजःपुञ्जा येषां तान् गजान् जनो लोकस्तता उपरि विततः पटमण्डपा येषां तानिवेत्युत्प्रेक्षा । अलोकयत् ॥ ६८ ॥

अन्यूनेति । अन्यूनोन्नतयोऽन्यूनोच्छ्रायाः अतिमात्रपृथवोऽत्यन्त विपुलाः अतएव पृथ्वीभरस्योद्धृतः शैलयोधाधारिण इति निदर्शनालङ्कारः । कनकावलीभिराभरणहेतुहेमराजिभिः करणैः । सुदाम्ना पर्वतेनैकदिक सौदामिन्यो विद्युतः । तेनैकदिगित्यण्प्रत्यये ङीप् । ताभिर्दामभिरिव सौदामिनीदामभिर्विद्युल्लताभिः उपमां सादृश्यं तन्वन्तः । तडित्सौदामिनी विद्युदित्यमरः । अलुक्तोपमाध्यारिति सहयमचनस्यैव निषेधादिह सादृश्यवाचित्वात् तृतीया । उपलसन्तः शृङ्गाराः सिन्दूरादिमण्डनान्येव रेखायुधानि हरधनूंषि तेषां ते तथोक्ताः । शृङ्गारः सुरते नाट्ये रसे च गजमण्डने । रेखोल्लेखे हर इति च विश्वः । कालियस्य कालियनागस्य कायवत् कालवपुषः कृष्णदेहाः । गजा एव

यातैश्चातुर्विध्यमस्त्रादिभेदा-
दव्यासङ्गैः सौष्ठवालाघवाच्च ।
शिक्षाशक्तिं प्राहरन्दर्शयन्तो
मुक्तामुक्तैरायुधैरायुधीयाः ॥ ११ ॥
रोषावेशादाभिमुख्येन कौचि-
त्पाणिग्राहं रंहसैवोपयातौ ।
हित्वा हेतीर्मल्लवन्मुष्टिघातं
घ्नन्तौ बाहूबाहवि व्यासृजेताम् ॥ १२ ॥

त्सरुमुखा । खड्गादिमुष्टौ त्सरुरित्यमरः ॥ १० ॥

यातैरिति । आयुधेन जीवन्तीत्यायुधीयाः आयुधजीविनः शस्त्राजीवे काण्डपृष्ठायुधीयायुधिकाः समा इत्यमरः । आयुधाच्छ चेति छप्रत्ययः । शिक्षाशक्तिमभ्यासपाटवं दर्शयन्तः अस्त्रादि भेदादस्त्रशस्त्रादिकभेदाच्चातुर्विध्यं यातैः प्राप्तैः । सुष्ठुभावः सौष्ठवं नैपुण्यादिगुणवत्त्वं तस्मात् । युवादित्वादण् प्रत्ययः । लाघवाद्वेगवत्त्वाच्च । इगन्ताच्च लघुपूर्वादित्यण् प्रत्ययः । अव्यासङ्गैरप्रतिषिद्धैः मुच्यन्त इति मुक्तानि शरादीनि न मुच्यन्त इत्यमुक्तानि खड्गादीनि च तैर्मुक्तामुक्तैरिति द्वन्द्वः । आयुधैः प्राहरन् । स्वभावानुप्रासयोः संसृष्टिः ॥ ११ ॥

रोषावेशादिति । कौचिद्योधौ रोषावेशात्क्रोधपारवश्यादाभिमुख्येन रंहसा वेगेनैवोपयातौ मिथः प्रत्यासन्नौ अत एव पाणिग्राहमन्योन्यं पाणिं गृहीत्वा । द्वितीयायां चेति णमुल्प्रत्ययः । हेतीः शस्त्राणि हित्वा त्यक्त्वा वैकल्यादिति भावः । हेतिस्तु शस्त्रे द्वयोरिति केशवः । मल्लवन्मल्लाभ्यां तुल्यम् । तेन तुल्यमिति वतिप्रत्ययः । मुष्टिघातं मुष्टिभिर्हत्वा । करणे हन इति णमुल्प्रत्ययः । घ्नन्तौ प्रहरन्तौ । हन्तेर्लटः शत्रादेशः, कषादित्वादनुप्रयोगः । मुष्टिभिर्घ्नन्तावित्यर्थः । बा-

शुद्धाः सङ्गं क्वचिदप्राप्नुवन्तो
दूरान्मुक्ताः शीघ्रतां दर्शयन्तः ।
अन्तःसैन्यं विद्विषामाविशन्तो
युक्तं चक्रुः सायका वाजितायाः ॥ १३ ॥
आक्रम्याजेरग्रिमस्कन्धमुच्चै

ताभ्यां बाहुभ्यां प्रहृत्य प्रवृत्तमिदं युद्धं बाहूबाहवि बाहुयुद्धम्। तत्र तेनेदमिति सरूपे इति बहुव्रीहाविच् कर्मव्यतीहारे, इच् प्रत्ययः समासान्तः अन्येषामपि दृश्यत इति दीर्घः तिष्ठद्गुप्रभृतिषु पाठादव्ययीभावत्वादव्ययत्वम्। तत्र व्यासज्जेतां व्यासक्तवन्तौ। कर्तरि कर्मव्यतीहारे इत्यात्मनेपदम्। मल्लवदिति तद्धितगता श्रौती पूर्णोपमा॥ १२॥

शुद्धा इति। शुद्धा निर्विषाः। न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैरिति निषेधादिति भावः। अन्यत्र साध्व्य इत्यर्थः। क्वचित्कुत्रापि सङ्गं प्रतिबन्धं न प्राप्नुवन्तः न प्राप्ताः दुर्वारा इत्यर्थः। दूरान्मुक्ता दूरत एव विसृष्टाः। स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेनेति समासः पञ्चम्याः स्तोकादिभ्य इत्यलुक्। शीघ्रतां जवनत्वं दर्शयन्तः। विद्विषां सैन्यानामन्तः सैन्यम्। विभक्त्यर्थेऽव्ययीभावः। आविशन्तः सेनामध्यं प्रविशन्त इत्यर्थः। सायका बाणाः। वाजितायाः पक्षवत्तायाः अश्वत्वस्य च। वाजौ पक्षवेगयोरिति विश्वः। युक्तमनुरूपं कर्म चक्रुः। सर्वाधिकत्वमश्वानां वाजिनामेव सम्भवादिति भावः। पक्षाभिधायाः प्रकृतपक्षता मासोपमोपमानाद्यर्थाविशेषशब्देन प्रकृतस्यैव प्रतीतेर्ध्वनिरेवेति न श्लेषालङ्कारः किन्तु शुद्धादिपदार्थविशेषणगत्या सायकानां युक्तकारित्वहेतुत्वात् पदार्थहेतुकं काव्यलिङ्गम्॥ १३॥

आक्रम्येति। मानभाजोऽभिमानवन्तः। वह्नेरुत्पत्त्यालेयुद्धस्य विपक्षाग्रपदभागस्कन्धप्रदेशं आक्रम्यारुह्य शीतयद्य थिर सम्मुख उस-

रास्थायाथो वीतशङ्कं शिरस्य ।
हेलालोलावर्त्म गत्वानिमर्त्य
न्द्यामारोहन्मानभाजः सुखेन ॥ १४ ॥
रोदोरन्ध्रं व्यश्नुवानानि लोलै
रङ्गस्यान्तर्मापितैः स्थावराणि ।
केचिद्गुर्वीमेत्य संयन्निषद्यां
क्रीणन्ति स्म प्राणमूल्यैर्यशांसि ॥ १५ ॥

मकाय चास्थायारुह्य हेलासु युद्धक्रीडासु लीलासु च लोला उत्सुकाः सन्तः अतिमर्त्यं गत्वा अमानुष्यं युद्धं कृत्वेत्यर्थः । अन्यत्रा मानुषगम्यमारोहणमार्गं गत्वा सुखेनानायासेन द्याः स्वर्गं मन्दरम् गिरिशिखरादि क्रीडास्थानम् । द्यौः स्वर्गसुरवर्त्मनोरिति विश्वः । आरोहणमारूढा । युद्ध्यमाना परं गतवा स्वर्गं यान्त्यपराङ्मुखा इति मनुस्मरणादिति भावः । यथा कथञ्चित् कश्चित् स्कन्धमूर्द्धारोहण क्रमेण किञ्चिदूरारोहमद्रितटादिकमारोहति तद्वदिति प्रस्तुत विशेषणसाम्यागता समासोक्तिः ॥ १४ ॥

रोदोरन्ध्रमिति । केचिद्वीराः गुर्वीं महतीं संयतोयुध एव निषीदन्त्यस्यामिति निषद्या आपणम् । आपणस्तु निषद्यायाम् इत्यमरः । संज्ञायां समजनिषदेत्यादिना क्यप् । तत्र प्राप्य । माङ्पूर्वादियः क्त्वो ल्यप् । देहस्यान्तरभ्यन्तरे मापितैः परिच्छिन्नैः । मातेर्माङो वा ण्यन्तात्कर्मणि क्तः । अर्त्तिह्रीत्यादिना पुगागमः । लोलैरस्थिरैः प्राणैरेव मूल्यैः प्राणमूल्यै रोदसोद्यावापृथिव्योरन्ध्रमन्तरालं व्यश्नुवानानि व्याप्नुवन्ति । अश्नोतेर्लटः शानजादेश । स्थावराणि स्थिराणि यशांसि क्रीणन्ति स्म स्तोकस्थिरमित्यर्थः । अत्र न्यूनं प्राणं ततोऽधिकयश परिवर्त्तनात् न्यूनपरिवृत्तिरलङ्कारः । समन्यूनाधिकानां च यदा

शौर्य्योत्साहश्लाघि कृत्वावदानं
संग्रामाग्रे मानिनां लज्जितानाम्।
अज्ञातानां शत्रुभिर्युक्तमुच्चैः
श्रीमन्नाम श्रावयन्ति स्म नम्राः॥ १६॥

आधावन्तः सम्मुखन्धारिताना
मन्यैरन्ये तीक्ष्णकौक्षेयकाणाम्।
वक्षःपीठैरात्मरोरात्मनैव
क्रोधेनान्धाः प्राविशन्पुष्कराणि॥ १७॥

र्निमग्नोऽभवत्। सार्धं यथाधिकन्यूनैः भटैर्युतिरवो भवेदिति बुध-
वाक्॥ १६॥

मिश्रीभूते तत्र सैन्यद्वयेऽपि
प्रायेणायं व्यक्तमासीद्विशेषः ।
आत्मीयास्ते ये पराञ्चः पुरस्ता
दभ्यावर्त्ती सम्मुखो यः परोऽसौ ॥ १८ ॥
सह शत्वादङ्गसंसङ्गिनीत्वं
नीत्वा कामङ्गौरवेणावबद्धा ।
नीता हस्तं वञ्चयित्वा परेण
द्रोहञ्चक्रे कस्यचित् स्वा कृपाणी ॥ १९ ॥

त्यादिश्रमरः । आङ् मर्यादाभिविध्योरिति विकल्पादसमासः । आ-कामात् स्वयमेव परप्रयत्नं विनेत्यर्थः । प्राविशन् प्रविष्टाः । अत्र क्रोधा-न्द्रविशेषणगत्या पुष्करप्रवेश हेतुत्वात् काव्यलिङ्गभेदः ॥ १७ ॥

मिश्रीभूत इति । तत्र युद्धे सैन्यद्वयेऽपि मिश्रीभूते मिलिते सति प्रायेणायं विशेषोऽसाधारणधर्मो व्यक्तमासीत् । क इत्याह । पुरस्ता-दग्रे ये पराञ्चः पराङ्मुखाः परेऽपीति भावः । ते आत्मीयाः स्वबन्धवा इत्यर्थः । न भीतं न पराङ्मुखमिति वधनिषेधस्मरणात् । यः पुरस्ता-दभ्यावर्त्ती परावर्त्ती सम्मुखोऽभिमुखः स्वकीयोऽपीति शेषः । असौ परः शत्रुर्वध्य इत्यर्थः । मायतुल्यस्य स्वामिद्रोहित्वादित्यर्थः ॥ १८ ॥

सहेति । सहशस्त्राङ्कुशकरत्वात् कृष्णीभूतत्वाच्चाङ्गसंसङ्गिनीत्वं खड्गकृष्ण-त्वं नीत्वा । अनुपूर्वविवक्षायां क्त्वलोपे ल्यबभावस्येति न पुंवद्भाव । कामं गौरवेणादरेणावबद्धा संयता च कस्यचित् स्वकीया कृपाणी धर्मलता । परेणान्येन वञ्चयित्वा प्रतार्य हस्तं नीता स्वायत्तीकृता सती द्रोहं हिंसां व्यभिचारं च चक्रे कृतवती । अत्र प्रकृतकृपाणी-विशेषणसाम्यादप्रकृतस्वैरिणीप्रतीतेः समासोक्तिः ॥ १९ ॥

नीते भेदं धौतधाराभिघाता-
दम्भोदाभे शातवेणापरस्य ।
सान्द्राजिस्तोत्नमार्गस्य मार्गो
विद्युद्दीप्तः कङ्कटे लच्यते स्म ॥ २० ॥
आमूलान्तात्सायकेनायतेन
स्यूते बाहौ मण्डुकम्लिष्टमुष्टेः ।
प्राप्यासह्यां वेदनामस्तधैर्य्या-
दप्यभ्रश्यच्चर्म नान्यस्य पाणेः ॥ २१ ॥
भित्त्वा घोणामायसेनाधिवक्तः

नीत इति। शातवेन मलुया। प्रज्ञादित्वात् स्वार्थेऽण्प्रत्यय। धौताया उत्तेजिताया धाराया खड्गधारायाः अभिघातात् भेदं नीते विदारिते अम्भोदाभे मेघश्यामे अपरस्य भटस्य कङ्कटे कवचे। उरश्छदः कङ्कटकोऽजगरः कवचोऽस्त्रियामित्यमरः। सान्द्रा अत्यन्तानि उरञ्जरेण तीक्ष्णमार्गस्य खड्गस्य मार्गः प्रहारो विद्युद्दीप्तस्तडिदुज्ज्वलो लक्ष्यते स्म। उपमालङ्कारः २० ॥

आमूलान्तादिति। अन्यस्य भटस्य बाहौ आयतेन दीर्घेण सायकेन आमूलान्तात् मूलप्रदेशपर्यन्तं आकर्णमित्यर्थः। विकल्पादसमास। स्यूते नीते सति असह्या वेदना व्यथा प्राप्य अतएवास्तधैर्य्यात्त्यक्तधैर्य्यादपि धारयितुमसमर्थादपि मण्डुकं खड्गं श्लिष्टा दृढा मुष्टिर्यस्य तथाभूतात् पाणेः फलकम्। फलकोऽस्त्री फलं चर्म खड्गे चोपादितस्त्व इत्यमरः। नाभ्रश्यन्नापतत्। अत्र सायकप्रोतत्वादिहेतौ सत्यपि पतनाभावात्, विशेषोक्तिरलङ्कारः ॥ २१ ॥

भित्त्वेति। आयसेनायोमयेन शार्ङ्गिक्षेपपुङ्खसंज्ञो येन पत्र इषु

स्थूरीपृष्ठो गार्ङ्गपत्त्रेण विद्धः ।
शिक्षाहेतोर्गाढरज्ज्वेव बद्धो
दर्त्तुं वक्रान्नाशकद्दुर्मुखोऽपि ॥ २२ ॥
कुन्तेनोच्चैः सादिना हन्तुमिष्टा
न्नाजानेयोदन्तिनस्त्रस्यति स्म ।
कर्मोदारङ्कीर्त्तये कर्त्तुकामान्
किं वा जात्याः स्वामिनोह्रेपयन्ति ॥ २३ ॥

तेन शार्ङ्गपत्त्रेण बाणविशेषेण घोणा नासा भिन्ना। घोणा नासा च नासिकेत्यमरः। अधिवक्त्रं वक्त्रे। विभक्त्यर्थेऽव्ययीभावः। विद्धः प्रहृतः। व्यधेः कर्मणि क्तः ग्रहिज्येत्यादिना सम्प्रसारणम्। स्थूरीपृष्ठोनवारूढोऽश्वः शिक्षैव हेतुः तस्य शिक्षाहेतोः शिक्षया निमित्तेन शिक्षार्थमिति यावत्। षष्ठी हेतुप्रयोगे इति षष्ठी। गाढरज्ज्वा गाढपाशेन बद्ध इवेत्युत्प्रेक्षा। दुर्मुखोऽप्यशिक्षितमुखोऽपि वक्त्रं ह र्त्तुमपाक्रष्टुं नाशकत् न शक्तः। शकेर्लुङि पुषादित्वात् च्लेरङादेशः। शिक्षितोहि शिक्षावशाद्बद्धोऽपि बद्धवदास्ते अशिक्षितस्तु निबद्धोऽपि झटिति मुखमपहरतीति भावः। अपि विरोधे। अतएव विरोधाभासोऽलङ्कारः ॥ २२ ॥

कुन्तेनेति। आजानेयः कुलीनाश्वः। आजानेयाः कुलीनाः स्युरित्यमरः। शुभ्रादिभ्यश्चेति ढक्प्रत्ययः। सादिना अश्वारोहेण कर्त्रा। उच्चैरुन्नतेन कुन्तेन प्रासेन करणेन हन्तुं प्रहर्त्तुमिष्टादभिप्रेतात् दन्तिनोन त्रस्यति स्म न त्रस्तः। वा भ्राशेत्यादिना श्यन् प्रत्ययः। अथ हि जात्याः कुलीनाः। भवार्थे यत्प्रत्ययः। कीर्त्तये उदारं कर्म महापौरुषं कर्त्तुं कामो येषां तान् कर्त्तुकामान्। तुं काममनसोरपीति मकारलोपः। स्वमेषामस्तीति स्वामिनो भर्त्तॄन्। स्वा

जेतुन्नैताः शेकिरे नारिसैन्यैः
पश्यन्तोऽधोलोकमस्तेपुनालाः ।
नागारूढाः पार्वतानि श्रयन्तो
दुर्गाणीव त्रासहीनास्तसानि ॥ २४ ॥
विष्वद्रीचीर्विक्षिपन्सैन्यवीची
राजावन्तः क्वापि दूरम्प्रयातम् ।

विनैतदर्थे ईति निपात । क्षेपयन्ति जल्कयन्ति कि न क्षेपयन्ती त्यर्थे । अर्तिह्रीत्यादिना पुगागम । सामान्येन विशेष समर्थनरू- पोऽर्थान्तरन्यास ॥ २३ ॥

जेतुमिति। सेनारएव सैन्या सयमीका । जेतमशक्ते प्रमादि- त्वात्कार्थे चमनाय । लोक जनमध पश्यन्त स्वयमुपर्यव स्थानात् लोकमधोदेशे पश्यन् अथ गतमन्दमानाय। अस्तेव् आला॰ छिन्न- पर्णिकरा त्रासहीनादुर्गम्भ्यादिभीका नागारूढाः गजारोहा सर्वन्ति गच्छन्तीति नगानि लङ्गमानि। चरिष्णुजङ्गमचरत्रसमिङ्ग चराचरमित्यमर । पार्वतानि पर्वत सम्बन्धीनि दुर्गाणि गिरिदुर्गा णीत्यर्थ । श्रयन्तोऽधिष्ठन्त इव इति उत्प्रेक्षा। तात्येवभूता एवैत मार । अरिसैन्ये कर्तृभि नेतु न शेकिरे अभ्यसामर्थ्यरतार्थ मके कर्मणि लिट। यज्ञ मह । धनुर्दुर्ग महीदुर्गमब्दुर्ग तथैव च नृदुर्गं गिरिदुर्गं च समाश्रित्य वसेद्वृप । सर्वेणैव प्रकारेण गिरिदुर्ग समाश्रयेत्। तेषां हि बहुगुणत्वेन गिरिदुर्गं विशिष्यते इति ॥ २४ ॥

विष्वगिति। एक कोऽपि वीर । विष्वगञ्चतीति विष्वद्रीची सर्व व्यापिनी । विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये इति टेर द्र्यादेश- ... दार्थं । सैन्यानि ऊर्मिरिव सैन्यवीचिरित्युपमित समास । विष्वी

स्थूरीपृष्ठो गाङ्गपत्त्रेण विद्धः ।
शिक्षाहेतोर्गाढरज्ज्वेव बद्धो
दर्तुं वक्त्रान्नाशकद्दुर्मुखोऽपि ॥ २२ ॥
कुन्तेनोच्चैः सादिना हन्तुमिष्टा
न्नाजानेयो दन्तिनस्त्रस्यति स्म ।
कर्मोदारङ्कीर्त्तये कर्त्तुकामान्
किं वा जात्याः स्वामिनो ह्रेपयन्ति ॥ २३ ॥

तेन गाङ्गपत्त्रेण बाणविशेषेण घोणां नासां भित्त्वा । घोणा नासा च नासिकेत्यमरः । अधिवक्त्रौ वक्त्रमि, विभक्त्यर्थेऽव्ययीभावः । विद्धः प्रहृतः । व्यधेः कर्म्मणि क्तः ग्रहिज्येत्यादिना सम्प्रसारणम् । स्थूरीपृष्ठोनवारूढोऽश्वः शिक्षैव हेतुः तस्य शिक्षाहेतोः शिक्षया निमित्तेन शिक्षार्थमिति यावत् । षष्ठी हेतुप्रयोगे इति षष्ठी । गाढरज्ज्वा गाढपाशेन बद्ध इवेत्युत्प्रेक्षा । दुर्मुखोऽप्यशिक्षितमुखोऽपि वक्त्रं हर्त्तुमपाकर्तुं नाशकत् न शक्तः । शकेर्लुङि पुषादित्वात् च्लेरङादेशः । शिक्षितो हि शिक्षावशाद्बद्धोऽपि बद्धवदास्ते अशिक्षितस्तु निबद्धोऽपि झटिति मुखमपहरतीति भावः । अपि विरोधे । अतएव विरोधाभासोऽलङ्कारः ॥ २२ ॥

कुन्तेनेति । आजानेयः कुलीनाश्वः । आजानेयाः कुलीनाः स्युरित्यमरः । शुभ्रादिभ्यश्चेति ढक्प्रत्ययः । सादिना अश्वारोहेण कर्त्रा उच्चैरुन्नतेन कुन्तेन प्रासेन करणेन हन्तुं प्रहर्त्तुमिष्टादभिप्रेतात् दन्तिनोन त्रस्यति स्म न त्रस्तः । वा भ्राशेत्यादिना श्यन् प्रत्ययः । तथा हि जात्याः कुलीनाः । भवार्थे यत्प्रत्ययः । कीर्त्तये उदारं कर्म्म महापौरुषं कर्त्तुं कामोयेषां तान् कर्त्तुकामान् । तुं काममनसोरपीति मकारलोपः । स्वमेषामस्तीति स्वामिनो भर्तॄन् । स्वा

जेतुञ्जैत्राः शेकिरे नारिसैन्यैः
पश्यन्तोऽधोलोकमस्यैव जालाः ।
नागारूढाः पार्वतानि श्रयन्तो
दुर्गाणीव त्वासदीनास्त्रसानि ॥ २४ ॥
विष्वद्रीचीर्विक्षिपन्सैन्यवीची
राजावन्तः क्वापि दूरम्प्रयातम् ।

मितैश्वर्य इति निपातः । ह्रेपयन्ति लज्जयन्ति किं न ह्रेपयन्ती-त्यर्थः । अर्तिह्रीत्यादिना पुगागमः । सामान्येन विशेष समर्थनरूपोऽर्थान्तरन्यासः ॥ २३ ॥

जेतुमिति । जेतार एव जैत्राः जयशीलाः । जेतृशब्दात् प्रज्ञादित्वात्स्वार्थेऽण्प्रत्ययः । लोकं जनमधः पश्यन्तः स्वयमुपर्यवस्थानात् लोकमधोदेशे पश्यन्तः अधःस्थंमन्यमानाश्च । अस्यैव जालाः छिन्नमर्मिकराः त्वासदीनादुर्गस्थत्वान्निर्भीकाः नागारूढाः गजारोहाः त्रस्यन्ति गच्छन्तीति त्रसानि जङ्गमानि । चरिष्णुजङ्गमचरत्रसमिङ्ग चराचरमित्यमरः । पार्वतानि पर्वतसम्बन्धीनि दुर्गाणि गिरिदुर्गाणीत्यर्थः । श्रयन्तोऽभितिष्ठन्त इव इति उत्प्रेक्षा । तेऽप्येवंभूता एवेति भावः । अरिसैन्यैः कर्तृभिः जेतुं न शेकिरे अशक्या बभूवुरित्यर्थः । शकेः कर्मणि लिट् । अत्र मनुः । धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव च । नृदुर्गं गिरिदुर्गं च समाश्रित्य वसेत्पुरम् ॥ सर्वेणैव प्रकारेण गिरिदुर्गं समाश्रयेत् । तेषां हि बहुगुणत्वेन गिरिदुर्गं विशिष्यते इति ॥ २४ ॥

विष्वगिति । एकः कोऽपि वीरः । विष्वगञ्चतीति विष्वद्रीचीः सर्वव्यापिनीः । विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये इति टेर् अद्र्यादेशः धातोरञ्चतेरुपसङ्ख्यानादुगितश्चेति ङीप् अच इत्यकार लोपे चाविति दीर्घः । सैन्यानि वीचिरिव सैन्यवीचीरित्युपमितसमासः । विष्वौ

अभ्रामैकोबन्धुमिष्टन्दिदृक्षुः
सिन्धौ वाद्योमण्डलङ्गोर्वराहः ॥ २५ ॥
यावच्चक्रे नाञ्जनम्बोधनाय
व्युत्थानज्ञोहस्तिचारी मदस्य ।
सेनास्थानाद्दन्तिनामात्मनैव
स्थूलास्तावत्प्रावहन्दानकुल्याः ॥ २६ ॥
क्रुध्यन् गन्धादन्यनागाय दूरा
दारोढारन्धूतमूर्द्धावमत्य ।

येन, लिङ्गात् विविधपत्रमाकुर्वन् । अन्तः आजि मध्ये क्वापि दूरं प्रयातं दृष्टं बन्धुं दिदृक्षुर्द्रष्टुमिच्छुः सन् । इयं सन्देहादुत्प्रेक्षा । क्वापि प्रयातं मग्नं भौमं गोमण्डलं भूगोलं दिदृक्षुरादिवराह इव सिन्धौ वा समुद्रे इव । उपमाया विकल्पेनेत्यर्थः । आजौ अभ्राम एकवीरस्य कुतोभयमित्यर्थः ॥ २५ ॥

यावदिति । व्युत्थानं गजोत्थापनं जानातीति व्युत्थानज्ञः हस्तिनि चरतीति हस्तिचारी यन्ता । मदस्य बोधनायोत्थापनाय नागाञ्जनकर्द्दमं कर्म यावत् चक्रे तावत् भागेन । अत्यन्तसंयोगे द्वितीया । सेनास्थानात्तेनाञ्जनलेपनादित्यर्थः । दन्तिना आत्मना स्वयमेव स्थूलास्तावद्दानकुल्यामदधारा प्रावहन् इति दन्तिमाहात्म्याद्व्यतिरेकोक्तिः अञ्जनात् प्रागेव दानसम्बन्धोक्तेरतिशयोक्तिः ॥ २६ ॥

क्रुध्यन्निति । दूरात् दूरत एव गन्धात् मदगन्धाघ्राणात् अन्यनागाय प्रतिगजाय क्रुध्यन् न किमपि परिहर्तुं । क्रुधद्रुहे त्यादिना सम्प्रदानत्वम् । नागोऽधूतमूर्द्धा विधूतमस्तकः सन् । आरोढारं यन्तारं अवमत्य अवधूय । घोरारावैर्दोर्दण्डस्कन्धैः आस्फालितावयवद्विषो येन तं किन्तु तथा च दारुणोऽभवतीत्यपि । गैरिक. अनुप्रास । स्वे स्वकीयएव अङ्गुल

वेगारावध्वानिताशेषदिक्के
विक्के नागः पर्यणंसीत्स एव ॥ २७ ॥
प्रत्यासन्ने दन्तिनि प्रातिपक्षे
यन्त्रा नागः प्रास्तवक्त्रच्छदोऽपि ।
क्रोधाक्रान्तः क्रूरनिर्दारिताक्षः
प्रेक्षाञ्चक्रे नैव किञ्चिन्मदान्धः ॥ २८ ॥
तूर्णं यावन्नापनिन्ये निषादी
वासश्चक्षुर्वारणं वारणस्य ।

र्थेत्वर्थं । पूर्वादिष्वष्टोसंख्योर्वेति विकल्पात् स्मिवादेशः । अतएव सर्वे स्वपूर्वे विक्के इति शिष्टगत्या व्याख्याय पुनरथापि जातित्वाद् सर्वनामसंज्ञेति बहुव्रीहि प्रामादिको । विक्के त्रिंशतिवर्षके द्विपे । विक्कोऽपि त्रिंशतिवर्षक इति वैजयन्ती । पर्यणंसीत् तिर्यक् प्रजहारेत्यर्थः । तिर्यग्दन्त प्रहारस्तु गजः परिणतो मत इति हलायुधः । अमरसेनमालां दधेति अमेर्लुङि सिचि वृद्धिनेटीति वृद्धिप्रतिषेधः ॥ २७ ॥

प्रत्यासन्न इति । प्रातिपक्षे प्रतिपक्षसम्बन्धिनि । तस्येदमित्यण् । दन्तिनि गजे प्रत्यासन्ने सति यन्त्रा सादिना प्रास्तवक्त्रच्छदोऽपि निरस्तमुखपटोऽपि क्रोधाक्रान्तः । अतएव क्रूरं घोरं निर्दारिताक्षः तथापि मदान्धो नागो गजोन किञ्चिदेव प्रेक्षां चक्रे । किमपि पुरोगतं प्रातिपक्षमन्यद्वा न ददर्शेत्यर्थः । आवरणान्तराभावेऽपि मदावरणस्यानपायादिति भावः । दृशा देव गुणमतोऽन्धकरत्वात्मुन्दयः । अत्रानाहृतोन्मीलिताक्षस्यादर्शनविरोधस्य मदान्धेनाविरोधाद्विरोधाभासोऽलङ्कारः ॥ २८ ॥

तूर्णमिति । निषादी यन्ता वारणस्य गजस्य चक्षुर्वारणं नेत्रावरणं वासोऽवगुण्ठनपटं यावत्तूर्णं नापनिन्ये नापचकार तावदन्य नागाधिरूढः प्रतिगजाधिरोहः एव एककालीनः पातो देवानैरेकपाते ये समस्ताव-

बभ्रामैकोबन्धुमिष्टन्दिदृक्षुः
सिन्धौ वाद्योमण्डलक्रोडवराहः ॥ २५ ॥
यावच्चक्रे नाञ्जनम्बोधनाय
व्युत्थानज्ञोहस्तिचारी मदस्य ।
सेनास्थानाद्दन्तिनामात्मनैव
स्थूलास्तावत्प्रावहन्दानकुल्याः ॥ २६ ॥
क्रुध्यन् गन्धादन्यनागाय दूरा
दारोढारन्धूतमूर्द्धावमत्य ।

वेति, सिन्धुमिति विच्छिपचपाकर्वेन् । अत्र आजि मध्ये क्वापि दूरे
प्रयात इष्ट बन्धु दिदृक्षुर्द्रष्टुमिच्छु सन् । इमे सन्दनाद्युपताय ।
क्वापि प्रयात मग्न भीम गोमण्डल भूगोल दिदृक्षुरादरोवराह
सिन्धौ वा समुद्रे इव । उपमाया विकल्पेवतुमर । आलो बभ्राम
एकवीरस्य कतोमयमितर्थः ॥ २५ ॥

यावदिति । व्युत्थान गतोत्थापन जानातीति व्युत्थानज्ञः हस्तिन
चरतीति हस्तिचारी यन्ता । मदस्य बोधनायोत्थापन नायाञ्जनमद्दी
मन कर्म्म यावत्र चक्रे तावत् प्रागेव । अत्रमाणे विधा विमर्थः ।
सेनास्थानात्मनाकबकनभ्रवणादितर्थः । दन्तिना आत्मना स्वयमेव स्थू-
लामहत्यो दानकुल्यामदसरित प्रावहन् इति दन्तिनासंवाच्चालिरेकोक्त-
सङ्गात् प्राग्दानसम्बन्धोक्तेरतिशयोक्ति ॥ २६ ॥

क्रुध्यन्निति । दूरात् दूरतएव गन्धात् मदगन्धाघ्राणात् अन्यनागाय
प्रतिगजाय क्रुध्यन् न विमोहरित्यर्थः । क्रुधद्रुहे त्यादिना सम्प्रदान
त्वम् । धूतोधूतमूर्द्धा विधरमस्तक सन् । आरोढार यन्तार अवमत्य
अवधूय । घोरारावैर्दारितमन्द्रनै ध्वनिना अवेपदिशो येन तादृश्
तथा छन्दै राक्रोशतीत्यय । सेविद्य अपलत्य । से स्वकीयएव अपुत्र

योगेरावध्वानिताशेषदिक्के
विष्वङ्नागः पर्यणंसीत्स एव ॥ २७ ॥
प्रत्यासन्ने दन्तिनि प्रातिपक्षे
यन्त्रा नागः प्रास्तवल्गाङ्कुशोऽपि ।
क्रोधाक्रान्तः क्रूरनिर्दारिताक्षः
प्रेक्षाञ्चक्रे नैव किञ्चिन्मदान्धः ॥ २८ ॥
तूर्णं यावन्नापनिन्ये निषादी
वासश्चक्षुर्वारणं वारणस्य ।

पर्यणंसीत् । पूर्वोक्त-दोषवशादेवेति विकल्पात् क्विबादेशः । अतएव स्वे पुवे स्थित इति स्थितमत्वा व्याख्यातं पुनरथापि जातित्वाद सर्वनाम-संज्ञेति बहुभोक्ति मामादिको । विष्वक् विगततिर्यके छिन्ने । विष्वोऽङि-रुतिर्यक इति वैजयन्ती । पर्यणंसीत् तिर्यक् प्रजहारेत्यर्थः । तिर्यग्-दन्तप्रहारस्तु गजः परिणतोमत इति हलायुधः । यमरमनमातां सक् चेति सगिडागमौ नेटीति वृद्धिप्रतिषेधः ॥ २७ ॥

प्रत्यासन्न इति । प्रातिपक्षे प्रतिपक्षसम्बन्धिनि । तस्मिन्दन्तिनि । दन्तिनि गजे प्रत्यासन्ने सति यन्त्रा सादिना प्रास्तवल्गाङ्कुशोऽपि निरङ्कुशप्रेरितोऽपि क्रोधाक्रान्तः । अतएव क्रूरं घोरं निर्दारिताक्षः तथापि मदान्धो नागो मत्तोऽपि किञ्चिदेव प्रेक्षां चक्रे । किमपि पुरोगतं प्रातिपक्ष-मद्राक्षं न ददर्शेत्यर्थः । कारणान्तराभावेऽपि मदावरणस्यान्धत्वादिति भावः । एवा देव गुणतोऽन्धकारकत्वाद्विशेषः । प्रकाशकत्वोत्कीर्तिताच्च दर्शनविरोधस्य मदान्धे भावविरोधाद्विरोधाभासोऽलङ्कारः ॥ २८ ॥

तूर्णमिति । निषादी यन्ता वारणस्य गजस्य चक्षुर्वारणं नेत्रावरणं वासः पटोपुष्पकटं यावत् पूर्वं मार्गनिन्ये नापनकार तावदन्य नागाभिद्रुतः सिंहगजाधिरोह एकः एककालीनः पातो देशान्तरेकमातैषु गतस्यादि-

पृ॰॰॰

तावत्पूगैरन्यनागाधिरूढः
कादम्बानामेकपातैरसीव्यत् ॥ २९ ॥
आस्यद्दृष्टेराच्छदञ्च प्रमत्तो
यन्ता यातुः प्रत्यरीभं द्विपस्य ।
मग्नस्योच्चैर्वक्षभारेण शङ्का
रावव्राते वीक्षणे च क्षणेन ॥ ३० ॥
यत्नाद्रचनसुस्थितत्वादनाशं
निश्चित्यान्यश्चेतसा भावितेन ।
अन्त्यावस्थाकालयोग्योपयोग
न्द्रव्येऽमोघन्नागमापद्घन वा ॥ ३१ ॥

भिरिति शीघ्रतोक्तिः । कादम्बानां शराणाम् । कादम्बमार्गणशरा इत्यमरः । पूगैर्व्रातैरसीव्यत् । चक्षुषा सह सन्दधे स्यूतवानित्यर्थं सीव्य तेर्लङ् । अत्र चक्षुषः सीवनासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ २९ ॥

आस्यदिति । यन्ता प्रमत्तः सन् प्रत्यरीभमरिगजमभिप्रति । आभि मुख्येऽव्ययीभावः । यातुर्गन्तुः । यातेस्तृच् द्विपस्य दृष्टेराच्छदं नावर माम । पुंसि संज्ञायां घः । आस्यत निरस्तवान् । असुरित क्षेपणे दिवादेः असेरिति पुगागमः । मग्नस्य सुखनिमग्नस्य शङ्को शल्यायुधस्य । ना पुंसि शल्यं शङ्कुर्न्नरमर । उच्चैर्वक्षभारेण निष्कपट क्षेत्र नाशके चक्षुषी क्षणेनावव्राते आवृते वृणोतेः कर्मणि लिट् अन्यो न्यसमुच्चयचकाराभ्यां आवरणनिरासे पुनरावरणयोरेककाले प्रसक्तेरतिशयोक्तिः ॥ ३० ॥

यत्नादिति । अन्यः गजारोहः भावितेनालोचितेन चेतसा सुस्थि तत्वादनपायदेशत्वादनाशमनपाय निश्चित्य यत्नाद्रचन् शस्त्रेभ्यस्त्रा

अन्योन्येषां पुष्करैराघ्नन्तो
दानोद्भेदानुच्चकैर्भुग्नवालाः ।
उन्मूर्द्धानः सन्निपत्यापरान्तैः
प्रायुध्यन्त स्पष्टदन्तध्वनीभाः ॥ ३२ ॥
द्राघीयांसः संहताः स्थेमभाज
श्चारूदग्रास्तोदिनामत्यनन्तः ।
दन्ता दन्तैराहताः सामजाना

नु धनु । कल्याणस्लाकाले साधनान्तरकाले नायकाले योग्योपयोगं अतएव मोटं नाम गजमामर्दनं वापइनमिव दृष्टं अन्यतोऽप्रकाशे धारणमाप । धरतेः स्वरितेत्त्वात्कर्त्तरि लिट् । ३१ ॥

अन्योन्येषामिति । इमा गजाः अन्योन्येषां परस्परेषाम् । कर्म्मव्यतीहारे सर्वनाम्नोऽद्वे भवत इति वक्तव्यात् द्वित्वम् । समासश्च बहुलमिति विकल्पादसमासपक्षे पूर्वपदस्य प्रथमैकवचनं वक्तव्यम् । एद्भिदाने कर्मणि तद्धेतोः । यदर्त्तरि च कारके संज्ञायामिति कार्यार्थे धञ् प्रत्ययः । दानोद्भेदान् कटादिमदस्थानानि पुष्करैः हस्ताग्रैः । इष्टं कतिपयमिवमरः । आघ्नन्तोऽभिघ्नन्तः उच्चकैरुद्भग्नवालाः प्रभूतपुच्छाः । वालः केशे पिच्छे पुच्छे वालोऽश्वोऽभपुच्छयोः । उन्मूर्द्धानः उद्गतमस्तकाः सन्तः स्फुट दन्तध्वनि यथा तथा सन्निपत्यापरान्तैः सह प्रायुध्यन्त । दिवादि युध्यते कर्त्तरि लङ् । समासोऽन्ति । ॥३२॥

द्राघीयांस इति । द्राघीयांसो दीर्घतराः । प्रियस्थिरेत्यादिना दीर्घस्य ईयसुनि द्राघादेशः । संहताः दृढाः अतएव स्थेमभाजः स्थैर्यभाजः । प्रियस्थिरेत्यादिना स्थिरस्य स्थादेशः । चारवो रम्याः उदग्रा उन्नता ते चारूदग्राः । विशेषणसमासः । तोदिनां नैक्ष्ण्यं अत्यनन्तः सामजानां गजानां दन्ता दन्तैः प्रतिमल्लविपक्षैराहताः

भङ्गम्भर्तुर्न स्वयं सामजाताः ॥ २३ ॥
मातङ्गानान्दन्तसङ्घट्टजन्मा
हेमच्छेदच्छायचञ्चच्छिखाग्रः ।
लग्नोऽप्यग्निश्चामरेषु प्रकाम
माञ्जिष्ठेषु व्यज्यते न स्म सैन्यैः ॥ २४ ॥
श्लोपामासे मत्सरोत्पातवाता
स्निग्धच्छन्दश्चारुहाङ्कपर्णोत्थैः ।

स्तम्भो भङ्गं भेदं गताम्, अभङ्गः । सामजाता दन्तिनस्तु स्वयं भङ्गं न राजवत् न गताः, दन्तभङ्गेऽपि स्वयं न पराववृतुरित्यर्थः । अत्रापि दार्शनिकत्वेन वर्ण्यतया प्रकृतानां हस्तिनां तुल्यप्रमाणदन्ताग्रतया अभग्नत्वेनाधिक्योक्तेर्व्यतिरेकस्तुल्ययोगितायाधक इति गमयितव्यम् ॥ २३ ॥

मातङ्गानामिति । मातङ्गानां दन्तिनां दन्तसङ्घट्टजन्मा दन्तसङ्घर्षोत्थः हेमच्छेदच्छायानि कनकपरागवर्णानि चञ्चन्ति चलन्ति च शिखाग्राणि ज्वालाग्राणि यस्य सोऽग्निः मञ्जिष्ठया ओषधिविशेषेण रक्तेषु माञ्जिष्ठेषु । तेन रक्तं रागादित्यण्प्रत्ययः । मञ्जिष्ठा विकसा जिङ्गी समङ्गा । चामरेषु लग्नोऽपि सैन्यैः प्रकामं न व्यज्यते न विविच्यते स्म सावर्ण्यादिति भावः । अत्र सामान्यालङ्कारः । सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकतेति लक्षणात् । स च विशेषणोत्थकाव्यलिङ्गसङ्कीर्णः ॥ २४ ॥

श्लोपामासे इति । मत्सरोत्थैरमर्षोत्पातवात व्याकुलिकवायुसमा क्षिप्यन्तो युध्यमाना दन्तानामग्र स्पृशन्तो हस्तायाः मदवेगोत्थाः जन्म येषां तैर्बृंहितैर्योगान्तैर्दूरात्स्वयैर्वृंहितैरिव धारयाणां सर्वं स्वदन्तं मुखं व्योमम अदि मूर्द्धो भव नदत्कुमारा द्वारविशेषः । मैव नवमणारा भाव चमत्कियातियोक्तिर्व्यतिकर । ज्योतिर्मण्डलम्

यौगान्तैर्वा वह्निभिर्वारणाना
मुक्तैर्मूर्द्धैर्व्योम्नि नक्षत्रमाला ॥ ३५ ॥
सान्द्राम्भोदश्यामले सामजानां
वृन्दे नीताः शोणितैः शोणिमानम् ।
दन्ताः शोभामापुरम्भोनिधीनां
कन्दोद्भेदा वैद्रुमा वारिणीव ॥ ३६ ॥
आकम्प्राग्रैः केतुभिः सन्निपात
न्नागा दीर्घैर्वनादं ब्रजन्तः ।
मग्नानङ्गे गाढमन्यद्विपाना

ओषामासे उवोष दग्धेत्यर्थः । उष दाहे इति धातोः कर्मणि लिट् । उषविदजागृभ्योऽन्यतरस्यामित्याम्प्रत्ययः लघूपध गुणः कृञ्चानुप्रयुज्यते लिटीत्यनुप्रयोगः । अत्र नक्षत्रमालयोरभेदाध्यवसायेन निर्देशात् रूपकसंकीर्णेयमुपमा ॥ ३५ ॥

सान्द्राम्भोदेति । सान्द्रं च तदम्भोदश्यामलं च तस्मिन् सामजानां गजानां वृन्दे शोणितैः शोणिमानमारुण्यं नीताः दन्ताः अम्भोनिधीनां वारिनिधीनां वारिणि जले विद्रुमाणां प्रवालानां 'द्रुमे वैद्रुमाः' । विद्रुमः पुंसि प्रवालं पुंनपुंसकमित्यमरः । कन्दो मूलपिण्डः तस्योद्भेदाः प्ररोहा इव शोभामापुरित्युपमा ॥ ३६ ॥

आकम्प्राग्रैरिति । आकम्प्राणि दन्तोत्खननसंक्षोभाद्दूर्ध्वं कम्प्राग्राणि येषां तैः केतुभिर्ध्वजैः सन्निपातं सङ्घर्षं ब्रजन्त इति दुःखहेतूक्तिः । नागाः गजास्तारैरुच्चैर्दीर्घैः उल्बणैः पञ्चानां श्रोत्राद्युत्थानां शङ्खशभूपवादीनां नादो यस्मिन्, कर्म्मणि तत्तथा अन्यद्विपानां प्रतिगजानामङ्गे गाढं मग्नान् अन्तःप्रविष्टान् दन्तान् दुःखादुत्खनन्ति स्म तेषां गाढमग्नत्वात् स्वयं केतुभाराक्रान्तत्वाच्च कष्टादुद्ध-

न्दन्तान्दुःखादुत्खनन्ति स्म नागाः ॥ ३७ ॥
उत्क्षिप्योच्चैः प्रस्फुरन्तं रदाभ्या
मीषादन्तः कुञ्जरं प्रावधीयम् ।
शृङ्गप्रोतप्रावृषेण्याम्बुदस्य
स्पष्टम्प्रापत्साम्यमुर्वीधरस्य ॥ ३८ ॥
भग्नेऽपीभे स्वे परावर्त्य देहं
योद्धा साङ्गं व्रीडया मुञ्चतेषून् ।
साकं यन्तुः समादेनानुबन्धी

दुरित्यर्थः । अत्रोक्तभारमज्जनयोर्विशेषणगत्या दुःखोत्खननहेतुत्वात् काव्यलिङ्गम् ॥ ३७ ॥

उत्क्षिप्येति । ईषे लाङ्गलदण्डाविव दन्तौ यस्य स ईषादन्तो महादन्तो दन्ती । ईषा लाङ्गलदण्डः स्यादित्यमरः । प्रस्फुरन्तं प्राणोत्क्रमणादुःखादुल्लसन्तं आत्मवत्स्वेद आत्मीयं कुञ्जरं रदाभ्यां दन्ताभ्याम् उच्चैरुत्क्षिप्योर्ध्वं धृत्वा शृङ्गे शिखरे प्रोतः स्यूतः प्रावृषेण्यः प्रावृषि भवोऽम्बुदो येन तस्य । प्रावृष एण्य इत्येण्यप्रत्ययः । उर्वीधरस्य गिरेः साम्यं सादृश्यं स्पष्टं प्रापत् । आप्नोतेर्लुङि पुषादित्वात् च्लेरङादेशः । उपमा ॥ ३८ ॥

भग्नेऽपीति । स्वे स्वकीये इभे गजे भग्नेऽपि देहं साङ्गं परावर्त्य प्रतिपक्षाभिमुखमावर्त्य । वृतेर्ण्यन्ताल्ल्यप् । अण्यन्तत्वपाठे अकर्मकस्य कर्मानन्वयात् । व्रीडया साङ्गमिषून् मुञ्चता इषुमोचनेन स्वगजभङ्गव्रीडां निरस्यतेत्यर्थः । योद्धा भग्नेभस्थेन भटेन कर्त्रा अभ्यमोच्यन्त इषव इत्युक्तम् । ल्वादिभ्य इति निष्ठानत्वम् । अनुबन्धी सततानुबन्धी वारणो यन्तुः प्रतिगजारोहस्य सम्मदेन साकं स्वेभजयजन्येन हर्षेण सह । प्रमदसम्मदौ हर्ष इति निपातः । प्रत्यरोधि

दूनोऽभीत्यां वारणः प्रत्यरोधि ॥ ३९ ॥
व्याप्तं लोकैर्दुःखलभ्यापसारं
संरम्भित्वादेत्य धीरोमहीयः ।
सेनामध्यङ्गाहते वारणः स्म
ब्रह्मेव प्रागादिदेवोदरान्तः ॥४०॥
भृङ्गश्रेणीश्यामभासां समूहै
र्नाराचानां विद्धनीरन्ध्रदेहः ।

प्रतिद्वन्द्वः तत्प्रतिरोधेन तत्पुरस्कारापि प्रतिरोधव्याप्तेरिति भावः । सार्द्धं साकं समं सहेत्यमरः । अत्र प्रोहितेषुमोक्षयोः समकालत्वप्रतिरोध-योश्च कार्यकारणयोस्तत्पौर्वापर्यविपर्ययरूपातिशयोक्त्या सहभावोक्तेः सङ्कीर्यते ॥ ३९ ॥

व्याप्तमिति । वारणः कश्चिद्धस्ती संरम्भित्वात् क्रोधित्वात् । संरम्भः संभ्रमे कोपे इति विश्वः । धीरोनिर्भीकः सन् एत्यागत्य मह्रीयोवि-पुलं लोकैः जनैः अन्यत्र भुवनैश्च व्याप्तम् । लोकस्तु भुवने जने इ-त्यमरः । अतोदुःखलभ्योऽपसारोऽपसरणं यत्र तत्सेनामध्यं प्राक् पुरा आदिदेवस्य उदरान्तरुदराभ्यन्तरं ब्रह्मा स्रष्टेव गाहते स्म प्रवि-वेश । पुरा किल यदा बाह्यं विस्रष्टुः ब्रह्मा पूर्वं सृष्टिदिदृक्षया विष्णोः कुक्षिं प्राविशदिति पौराणिकी कथा । केचित् ब्रह्मा ब्राह्मणो मार्क-ण्डेय इति व्याचक्षते सोऽपि भगवत्कुक्षिभावलोकनकौतुकात्तदनुज्ञया महाप्रलये तदुदरं प्रविश्य बभ्रामेत्यागमः । ब्रह्मा विधिः प्रजापतिरि-त्यमरः । उपमालङ्कारः ॥ ४० ॥

भृङ्गेति । भृङ्गश्रेणीव श्यामभासां कृष्णवर्णानां नाराचानामयो-मयेषूणां विशेषाणां समूहैः विद्धोनीरन्ध्रोनिर्विवरो देहो यस्य सः तथापि निर्भीकत्वादाहवेनाकृतेच्छः अव्याहतोत्साहः अतएव हृष्यन् मोदमा-

निर्भीकत्वादाहवेनाहतेच्छो
हृष्यन् हस्ती हृष्टरोमेव रेजे ॥ ४१ ॥
आताम्राभा रोषभाजः कटान्ता
दाशूत्खाते मार्गणे धूर्गतेन ।
निश्च्योतन्ती नागराजस्य जज्ञे
दानस्याहो लोहितस्येव धारा ॥ ४२ ॥
आमन्दन्तौ दन्तिनः साहसिक्या
दोषादण्डौ मृत्युशय्यातलस्य ।
सैन्यैरन्यस्तत्क्षणादाशशङ्के
स्वर्गस्योच्चैरर्द्धमार्गाधिरूढः ॥ ४३ ॥

नीरुक्तो हृष्टरोमेव हर्षात् पुलकित इवेत्युत्प्रेक्षा। हृषेर्लोमसु इति विकल्पादिडभावः । रेजे शुशुभे। फणाञ्च सप्तानां विकल्पादेत्वाभ्यासलोपौ ॥ ४१ ॥

आताम्रेति। रोषभाजः क्रुद्धस्य नागराजस्य महेभस्य कटान्तात् गण्डस्थलान्निश्च्योतन्ती प्रागेव स्रवन्ती दानस्य मदस्य धारा आताम्राभा क्रोधादरुणवर्णा जज्ञे जाता आह्रो धूर्गतेन पुरोगतेन यन्त्रा मार्गणे शरे आशूत्खाते लोहितस्य क्षतजस्येव धारा जज्ञे। जने कर्त्तरि लिट्। किमियं क्रोधारुणा मदधारा यद्वोद्धरणजन्मा रक्तधारा वेत्युभयकारणसम्भवात् सादृश्याच्च संशय स च विकल्पितसादृश्यमूल इत्यलङ्कार ॥ ४२ ॥

आमन्दन्तेति। मृत्युशय्यातलस्यान्तकपर्य्यङ्करूपस्य। अथ खट्वपर्य्यङ्कौ तल्पमित्यमरः । दोषादण्डौ दारुविशेषौ तत्सदृशौ आयतावित्यर्थः दन्तिनोदन्तौ सहसा वर्त्तत इति साहसिक। ओज एकोऽस्मभोवर्त्तत

कुर्वन्ज्योत्स्नाविप्रुषान्तुल्यरूप
स्तारस्ताराजालसारामिव द्याम् ।
खड्गाघातैर्दारिताद्दन्तिकुम्भा
दाभाति स्म प्रोच्छलन्मौक्तिकौघः ॥४४॥
दूरोत्क्षिप्तक्षिप्रचक्रेणकृत्त
मस्तोद्दस्तं हस्तिराजः स्वमेव ।
भीमम्भूमौ लोलमानं सकोपः
पादेनासृक्पङ्कलेपम्पिपेष ॥४५॥

इति ठक्प्रत्ययः । तस्य मार्ताण्डाद्दक्षिणस्मात् क्रामन् माङ्गल्यान्विताद्दिः । चन्द्रमत्पथादूर्ध्वं रुद्रस्य स्वर्गस्य अर्द्धेनाध्वनो मार्गं येति तदर्द्धमार्गाभिरूढ इति सैन्यैराशङ्क्यते इत्युत्प्रेक्षा ॥ ४३ ॥

कुर्वन्निति । ज्योत्स्नाविप्रुषां तुल्यरूपः चन्द्रिकाबिन्दुस्वरूपः तारः शुद्धः । तारौत्कृष्टादिमंशुद्धाविति विश्वः । खड्गाघातैर्दारिताद्दन्तिकुम्भात् प्रोच्छलन् उत्पतन् मौक्तिकौघो मुक्तापुञ्जो द्यामाकाशं ताराजालसारां नक्षत्रमण्डितां तारकितां कुर्वन्निवेत्युत्प्रेक्षा । तारः मुक्तादावुत्कर्ष इति विश्वः । आभाति स्म बभौ ॥ ४४ ॥

दूरोत्क्षिप्तेति । स असौ हस्तिराजः करीन्द्रः दूरादुत्क्षिप्तेन प्राक्षिप्तेन क्षिप्रेण सत्वरेण चक्रेण कृत्तं अतएव भूमौ लोलमानं लुठमानम् । लोलतेरनात्मनेपदित्वाल्लोलायतेर्वा चनप्रत्ययः श्यामभित्ति ताच्छील्ये चानश्प्रत्ययः अतएव लोलमानादयश्चानशीति वामनः । भीमं भयङ्करं स्वं स्वकीयमेव हस्तं सकोपः सन् पादेनाङ्घ्रिणा असृक्पङ्कलेपम् असृक्पङ्केन यथा लिप्तो भवति तथा पिनष्टीति असृक्पङ्कलेपम् । णमुल् । पिष्लृ चूर्णने पिष इति णमुल् । पिपेष । कषादिषु यथाविध्यनुप्रयोगः । रक्तपङ्केन लेपयित्वा पिपेषेत्यर्थः । कृत्तमपि कोपात्पिपेषेति भावः । अत्र भयानकस्य रसस्याङ्गत्वेऽपि इत्यस्यौज्ज्वल्यात् प्रतिभाति ॥ ४५ ॥

आपस्कारात्लूनगात्रस्य भूमिं
निःसाधारङ्गच्छतोऽवाङ्मुखस्य ।
लब्धायामन्दन्तयोर्युग्ममेव
स्वन्नागस्य प्रापदुत्तम्भनत्वम् ॥ ४६ ॥

लब्धस्पर्शम्भूव्यधाद्व्यथेन
स्थित्वा किञ्चिद्दन्तयोरन्तराले ।
ऊर्द्ध्वाग्रासिच्छिन्नदन्तप्रवेष्टं
जिग्योत्तस्थे नागमन्येन सद्यः ॥ ४७ ॥

हस्तेनाग्रे वीतभीतिङ्गृहीत्वा

आपस्कारादिति । गात्रमूलमापस्कारं आपस्कारादामूलात् । आङोऽविकल्पादसमासः । लूनगात्रस्य छिन्नजङ्घस्य । द्वौ पूर्वपश्चाज्जङ्घादिदेशौ गात्रापरे क्रमादित्यमरः । अत एवावाङ्मुखस्य सत साधारं सावष्टम्भनं न भवतीति निःसाधारं यथा तथा भूमिं गच्छतः पततः इत्यर्थः । नागस्य लब्धायामं प्राप्तदैर्घ्यं आयतमित्यर्थः । स्वं स्वकीयं दन्तयोर्युग्ममेवोत्तम्भनत्वमवलम्बनत्वं प्रापत् । जङ्घाच्छेदेऽपि दन्तावष्टम्भादायततेत्यर्थः । अत्र स्वभावातिशयोक्त्योः संसृष्टिः ॥ ४६ ॥

लब्धस्पर्शमिति । भूव्यधाद्दन्ताभ्यां भुवो विद्धत्वादित्यर्थः । व्यधजपोरनुपसर्गेत्यप्प्रत्ययः । अव्यथेन स्वयमविद्धत्वादव्यथेन सताऽन्येन केनचिद्भटेन दन्तयोरन्तराले किञ्चित् लब्धः स्पर्शो यस्मिन् कर्म्मणि तद्दन्ताभ्यां भटस्पर्शं यथा तथा स्थित्वा ऊर्द्ध्वं प्रसारितेनाग्रासिना खड्गैकदेशेन छिन्नः पूर्व्विंशो दन्तप्रवेष्टो दन्तवेष्टनं यस्य तं नागं जिग्ये सद्य एव उत्तस्थे च जितम् । भावे लिट् । अत्रापि तयोस्थानाद्यसम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ ४७ ॥

कश्चिद्व्यालः क्षिप्तवानूर्द्ध मुच्चैः ।
आसीनानां व्योम्नि तस्यैव हेतो
र्दिव्यस्त्रीणामर्पयामास नूनम् ॥ ४८ ॥
कश्चिद्दूरादायतेन द्रढीयः
प्रासप्रोतस्रोतसान्तः क्षतेन ।
हस्ताग्रेण प्राप्तमेवायतोऽभू
दानैश्वर्यं वारणस्य ग्रहीतुम् ॥ ४९ ॥
तन्वाः पुंसो नन्दगोपात्मजायाः
कंसेनेव स्फोटितायागजेन ।

हस्तेनेति । व्यालोदुष्टदन्ती । व्यालोदुष्टगजे सर्प इति विश्वः । अग्रे वीतभीति निर्भीक भीरो खड्गाभावादिति भाव । कश्चिद्वीर हस्तेन गृहीत्वा ऊर्द्धमुपर्युच्चैः क्षिप्तवान् । अत्र प्रेक्षते तस्यैव हेतोस्तेनैव हेतुना तदुपरणार्थमेवेत्यर्थः । सर्वनाम्नस्तृतीया चेति चकारात् षष्ठी । व्योम्नि आसीनानामवस्थितानाम् । ईदाप इति शानचईकार । स्व र्गे स्त्रीणामप्सरोणामर्पयामास नूनम् ॥ ४८ ॥

कश्चिदिति । दूरादायतेनात्म क्षतेन विक्षतेन अतएव द्रढीयसा प्रासेन प्रोत स्रोतोयस तेन हस्ताग्रेण करण्डेन अयत प्राप्तमपि कश्चि द्भट गृहीतु आदातु वारणस्य अनीश्वरस्य भाव आनैश्वर्यं असाम र्थ्यमभूत । नञ सुधोस्वरेत्यादिना नञ्पूर्वपदो भयपदवृद्धि । ईशापि आनैश्वर्यं सम्भोक्तेरतिशयोक्ति ॥ ४९ ॥

तन्वा इति । गजेन स्फोटिताया विदारिताया पुंस कस्यचि द्वी रस्य तन्वा शरीरात् कंसेन स्फोटिताया नन्दगोपात्मजाया नन्दकन्याया इवोत्पतन्ती दिव्या मूर्त्ति चण्डिकेव नन्दकन्या शरीरादाविर्भवन्ती का- चिदेव रविकृतैर्व्योमगा, खेचरै बोधाभावे बोधिता । दृश्यते कर्मणि

दिव्या मूर्त्तिर्वैरिमर्गैरुत्पतन्ती
वीक्षामासे विस्मितैश्चण्डिकेव ॥ ५० ॥
आक्रम्यैकामग्रपादेन जङ्घा
मन्यामुच्चैराददानः करेण ।
सास्थिस्थानन्दारुवद्दारुणात्मा
कञ्चिन्मध्यात्पाटयामास दन्ती ॥ ५१ ॥
शोचित्वाग्रे भृत्ययोर्मृत्युभाजो
रर्य्यः प्रेम्णा नो तथा वल्लभस्य ।
पूर्व्वं दत्त्वा नेतरस्य प्रसाद

लिट् इजादेश्च गुरुमतोऽनृच्छ इत्याम्प्रत्ययः । मनुष्यभावमुत्सृज्य देवभावङ्गतेत्यर्थः । उपमा व्यक्ता । पुरा किल दुरात्मनः कंसस्य प्रतारणाय भगवदाज्ञया तन्मायाशक्तिर्नन्दगोपाज्जाता कंसेन हिंसितेति पौराणिकाः ॥ ५० ॥

आक्रम्येति । दारुणात्मा क्रूरचित्तो दन्ती एकां जङ्घामस्य पादेनाक्रम्यान्यां जङ्घामुच्चैरुन्नतेन करेणाददान आकर्षयन् । सास्थिस्थानं भज्यमानास्थिपटत्कारशब्दयुक्तं यथा तथा कञ्चिद्वीरं दारुवत्काष्ठवत् मध्यात्पाटयामास मध्ये विभज्य पाटयामासेत्यर्थः । ल्यब्लोपे पञ्चमी । उपमा ॥ ५१ ॥

शोचित्वेति । भट्टस्तोत्रार्थः । अर्य्यः स्वामिवैश्ययोरिति यत्प्रत्ययान्तो निपातः । अर्य्यो समक्षमेव मृत्युभाजोर्मरणं गतयोर्भृत्ययोः शोचित्वा वल्लभस्य तयोर्मध्ये प्रियभृत्यस्य सम्बन्धिना प्रेम्णा तद्गतप्रेम्णेत्यर्थः । तथा तेन प्रकारेणानन्दो हर्षं सन्तापं नो आप । यथा येन प्रकारेणेतरस्यावल्लभस्य पूर्व्वं जीवनकाले प्रसादम्प्रीति दानाद्युपकृतं न कृता पश्चात्तामाप्ततोऽयमस्माभिरपोषितएव प्राणाम् प्रादादित्यनुत-

मन्थात्तापादाप दाहं ययान्तः ॥ ५२ ॥

उत्प्लुत्याराद्अर्द्धचन्द्रेण लूने
वक्त्रेऽन्यस्य क्रोधदष्टोष्ठदन्ते।
सैन्यैः कण्ठच्छेदलीने कबन्धा
द्भूयोबिभ्ये वल्गतः सासिपाणेः ॥ ५३ ॥
तूर्याराबैराहितोत्तालताले
गायन्तीभिः काहलं काहलाभिः।

यात् दाहमाप। नियमत्यागमरणोदय मन्दानिलमरणमेव व्याधिमोद्गम-
हेतुः स्वहेतुरासीदित्यर्थः। स्वभावोक्तिः ॥ ५२ ॥

उत्प्लुतेति। अर्द्धचन्द्रेण बाणेन लूने छिन्ने वक्त्रेऽपि क्रोधेन दष्टौ
ओष्ठौ येन दन्तायस्य तस्मिन् अन्यस्य योधस्य वक्त्रे आरात् दमतिदूरमेव
स्थित। आराद्दूरसमीपयोरित्यमरः। भूयः पुनरपि कण्ठस्य छेदः छि-
न्नदेशः तत्र लीने स्थिते सति वल्गतो न्दतः असिः पाणियस्य तस्मा
त्कबन्धादपमूर्द्धकलेवरात्। भीत्रार्थानां भयहेतुरिति पञ्चमी। सैन्यैर्बिभ्ये
भीतम्। भाव लिट्। लूनस्यापि वक्त्रस्य पुनः स्वस्थानप्राप्तत्वादकुण्ठना-
भिघाताभ्यां कबन्धादप्यकबन्धभ्रान्त्या सर्वे बिभ्युरित्यर्थः। अतएव भ्रा-
न्तिमद् अलङ्कारः ॥ ५३ ॥

तूर्याराबैरिति। आहिताः सम्पादिताः उत्तालाः प्रस्फुटाः तालाः
करपुटादिक्रियामानानि येषु तैः। तालः कालक्रियामानमित्यमरः।
तूर्याराबैर्ढक्कादिवाद्यघोषैः सह काहलं भृशं गायन्तीभिः व्यक्त-
न्तीभिः काहलाभिः शुष्कवाद्यविशेषैश्च करणैः। काहलं भृशमु-
क्तयोः। वाद्यभाण्डविशेषे तु काहला काहलः स्मृत इति विश्वः। कामे
अपमूर्द्धि कलेवरे। अतएव पशुः स्त्री इति इहितः   लिङ्ग
कर्मणि तत्तथा स्याद् इत्यमर इति। कर्त्तरि अः।

व्यर्थीकृता नाकनारी मुमूर्च्छ ॥ ५८ ॥
लूनग्रीवात्सायकेनापरस्य
द्यामत्युच्चैराननादुत्पतिष्णोः ।
त्रेसे मुग्धैः सैंहिकेयानुकारा
द्रौद्राकारादप्सरोवक्त्रचन्द्रैः ॥ ५९ ॥
वृत्तं युद्धे शूरमाश्लिष्य काचि
द्रन्तुं तूर्णं मेरुकुञ्जं जगाम ।
त्यक्त्वा नाम्नो देहमेति स्म याव
त्पत्नी सद्यस्तद्वियोगासमर्था ॥ ६० ॥

प्रस्थिता तं वरीतुमागतेत्यर्थः । नाकनारी व्यर्था कृता तदुज्जीवना-दिफलमनोरथा सती मुमूर्च्छ । अत्राकृतवैयर्थ्यस्य विशेषणगत्या नाक-नारीमूर्च्छाहेतुत्वात्काव्यलिङ्गं मूर्च्छासम्बन्धातिशयोक्त्या सङ्कीर्यते ॥५८॥

लूनग्रीवादिति । अपरस्य सायकेन लूनग्रीवाच्छिन्नकण्ठात् अतएव द्यामाकाशं प्रति आशु उच्चैरुत्पतिष्णोरुत्पतनशीलात् । अलङ्कृञित्यादिना इष्णुच्प्रत्ययः । अतएव सिंहिकाया अपत्यं पुमान् सैंहिकेयो राहुः । तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुद इत्यमरः । स्त्रीभ्यो ढक् । तम-नुकरोतीति तदनुकारात्तत्सदृशादित्यर्थः । कर्मण्यण्प्रत्ययः । रौद्रा-कारात् भीषणाकृतेरस्य वीरस्य आननात् मुग्धैः सुन्दरैः अप्सरसां वक्त्रैरेव चन्द्रैस्त्रेसे त्रस्तम् । भावे लिट् । अत्र राहुहेतुकत्रासस्य चन्द्र एव सम्भवाद्वक्त्रचन्द्रैरिति रूपकं सिद्धं तस्य सैंहिकेयानुकारा-दिति लुप्तोपमासापेक्षत्वात् सङ्करः ॥ ५९ ॥

वृत्तमिति । काचिदमरनारी युद्धे वृत्तं मृतम् । वर्ततेऽतीते दृष्टे ख्याते वर्तुलेऽपि वृत्तं त्रिषु इति विश्वः । शूरमाश्लिष्य रन्तुं तूर्णं मेरोः कुञ्जं दरीं जगाम । यावत्तद्वियोगासमर्था तद्विरहासहा पत्नी

त्यक्तप्राणं संयुगे हस्तिनीस्था
वीक्ष्य प्रेम्णा तत्क्षणादुद्गतासुः ।
प्राप्याखण्डन्देवभूयं सतीत्वा
दाश्लिष्यैव स्वैव कञ्चित्पुरन्ध्री ॥ ६१ ॥

स्वर्गे वासङ्कारयन्त्या चिराय
प्रत्यग्रत्वं प्रत्यहं धारयन्त्या ।
कश्चिद्भेजे दिव्यनार्य्या परस्मिन्
लोके लोकम्प्रीणयन्त्येह कीर्त्या ॥ ६२ ॥

सद्योऽग्नौ देहं त्यक्त्वा नैतिं स मानगाम। अत्र भेदेऽप्यभेदरूपातिशयोक्तिः । सम्बन्धेऽप्यसम्बन्धोक्तेरतिशयोक्तिः ॥ ६० ॥

त्यक्तेति । संयुगे युद्धे त्यक्तप्राणं कञ्चिद्वीरं हस्तिन्यां तिष्ठतीति हस्तिनीस्था करेणुमारूढा सती वीक्ष्य प्रेम्णा तत्क्षणादुद्गतासुर्गतप्राणा । स्वैव पुरन्ध्री स्वभार्य्यैव सतीत्वात्पतिव्रतात्वादखण्डमक्षयं देवभूयं देवत्वम् । भुवो भावे इति क्यप् । प्राप्याश्लिष्य । स्त्रीणां पातिव्रत्यमेव पतिसालोक्यनिदानं नाग्निप्रवेशादिकमिति भावः । अत्र सतीत्वस्य विशेषणगत्या देवभूयहेतुत्वात्काव्यलिङ्गमतिशयोक्त्यादिकं तु यथासम्भवमूह्यम् ॥ ६१ ॥

स्वर्ग इति । कश्चिद्वीरश्चिराय चिरकालं स्वर्गे वासम् । शयवासवासिष्वकालादिति विकल्पादलुक् । कारयन्त्या अनुभावयन्त्या प्रत्यहं प्रत्यहम् । नपुंसकादन्यतरस्यामित्यव्ययीभावे समासान्तष्टच्प्रत्ययः अव्ययानां भमात्रे टिलोप इत्यात्मम् । प्रत्यग्रत्वं नूतनत्वं धारयन्त्या परमेभोगसदृत्वादिति भावः । लोकं प्रीणयन्त्या अद्भुतत्वं प्रापयन्त्या । प्रीञोऽण्यन्तात्लटः शतरि ङीप धूञ्प्रीञोर्नुग्वक्तव्य इति नुगागमः । दिव्यनार्य्या परस्मिंल्लोके इह लोके कीर्त्या च भेजे सम्भेजे ।

गत्वा नूनं वैबुधं सद्म रम्य
म्मूर्च्छाभाजामाजगामान्तरात्मा।
भूयोदृष्टप्रत्ययाः प्राप्तसंज्ञाः
साधीयस्ते यद्रणायाद्रियन्ते॥ ६३॥

कश्चिच्छस्त्रापानमूढोऽपवोढु
र्लब्ध्वा भूयश्चेतनामाहवाय।
व्यावर्त्तिष्ट क्रोशतः सख्युरुच्चै
स्त्यक्तश्चात्मा का च लोकानुवृत्तिः॥ ६४॥

भजेः कर्मणि लिट्। रणमरणाल्लोकद्वयमपि जिगायेत्यर्थः। अत्र दिव्याङ्गनाकीर्त्त्योः प्रकृतयोरेव तुल्यधर्मसम्बन्धात् केवलप्रकृतास्पदा तुल्ययोगिता॥ ६२॥

गत्वेति। मूर्च्छाभाजामन्तरात्मा जीवः रम्यं वैबुधं सद्म दिव्यभवनं गत्वा आजगाम। मूर्च्छासमये सुरलोकरमणीयकं दृष्ट्वा आजगाम। नूनमुत्प्रेक्षायाम्। कुतः यद्यस्मात् प्राप्तसंज्ञाः लब्धबोधाः सन्तः दृष्टप्रत्ययाः दृढविश्वासाः भूयः पुनरपि साधीयो गाढतरम्। गाढादीयसुनि अन्तिकबाढयोर्नेदसाधाविति साधादेशः। रणाय रणं कर्तुमाद्रियन्ते उत्सहन्ते इत्यर्थः। कर्त्तरि लट् श्यन् प्रत्ययः। कथञ्चिदुज्जीवितानां पुनः स्वर्गप्राप्तिः श्रेयोदर्शनहेतुकेति भावः॥ ६३॥

कश्चिदिति। शस्त्रापातमूढः प्रहारमूर्च्छितः कश्चिद्वीरश्चेतनां संज्ञां लब्ध्वा अपवोढुर्मूर्च्छासमये युद्धभूमेरपनेतुः सख्युर्मित्रस्य उच्चैः क्रोशतः आगच्छागच्छेत्याक्रोशति। षष्ठी चानादरे इति षष्ठी। क्रोशन्तमनादृत्येत्यर्थः। भूयः पुनरपि आहवाय रणाय व्यावर्त्तिष्ट। आत्मा देहस्त्यक्तश्च तथा हि लोकानुवृत्तिश्च का नैवेत्यर्थः। सुहृद्वचनानुरोधस्तु हितार्थिनः परित्यक्तुं इत्येतदर्थः। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः॥ ६४॥

भिन्नोरस्कौ शत्रुणाक्षिप्य दूरा
दासन्नत्वात्कौचिदेकेषुणैव ।
अन्योऽन्यावष्टम्भसामर्थ्ययोगा
दूर्ध्वाविव स्वर्गतावप्यभूताम् ॥ ६५ ॥
भिन्नानस्त्रैर्मोहभाजोऽभिजातान्
हन्तुं लोलं वारयन्तः स्ववर्गम् ।
जीवग्राहं ग्राहयामासुरन्ये
योग्यैर्नार्थः कस्य न स्याज्जनेन ॥ ६६ ॥
भग्नैर्दण्डैरातपत्राणि भूमौ

भिन्नोरस्काविति । शत्रुणा दूरादाक्षिप्य आसन्नत्वाच्चयोरित्यर्थः । उद्विष्टत्वादेकेषुणैव भिन्नोरस्कौ विदारितवक्षसौ कौचिद्वीरौ अन्योन्यावष्टम्भ एव सामर्थ्यं तस्य योगात् सम्भवादूर्ध्वाविव ऊर्ध्वं तिष्ठन्ताविव स्वर्गतावपि मृतावप्यभूतां बभूवतुरित्यर्थः । तत्र स्वर्गयोरूर्ध्वस्थानासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ ६५ ॥

भिन्नानिति । अन्ये वीरा अस्त्रैर्भिन्नान् विदारितान् अतएव मोहभाजो मूर्च्छाभाजो मूर्च्छां गतानभिजातान् कुलीनान् । अभिजातः कुलीने स्यान्न्याय्ये कुलीनमाम्ययोरपीति विश्वः । हन्तुं लोलं उत्सुकं स्ववर्गं वारयन्तः जीवं गृहीत्वा जीवग्राहं ग्राहयामासुः जीवमेव ग्राहयामासुरित्यर्थः । समूलाकृतजीवेषु हन्कृञ्ग्रहः इति णमुल्प्रत्ययः कषादित्वादनुप्रयोगः । जीवग्रहणप्रयोजनमर्थान्तरन्यासेनाह तथा हि योग्येन जनेन हेतुना कस्य पुंसोऽर्थः कीर्त्यादिप्रयोजनं न स्यात् स्यादेव सर्वस्यापीत्यर्थः । अतो वीराणां रक्षेऽपि अतिपरिचितत्वाप-देव भेदः । नार्थं नातिपरिचितमिति ज्ञानमिव भादिति भावः ॥ ६६ ॥

पर्यस्तानि प्रौढचन्द्रद्युतीनि।
आहाराय प्रेतराजस्य रौप्य
स्थालीनीव स्थापितानि स्म भान्ति॥ ६७॥
रेजुर्भ्रष्टा वक्षसः कुङ्कुमाङ्का
मुक्ताहाराः पार्थिवानां व्यसूनाम्।
हासालक्ष्याः पूर्णकामस्य मन्ये
मृत्योर्दन्ताः पीतरक्तासवस्य॥ ६८॥
निम्नेष्वोघीभूतमस्तक्षतानां
मस्रं भूमौ यच्चकासाञ्चकार।
रागायैतत्किन्नु कौसुम्भमम्भः
संव्यानानामन्तकान्तःपुरस्य॥ ६९॥

भग्नैरिति। भग्नैर्दण्डैर्हेतुना भग्नदण्डत्वादिति भावः। भूमौ पर्यस्तानि उत्तानपतितानि प्रौढचन्द्रद्युतीनि पूर्णेन्दुप्रभाणि छत्रपत्राणि श्वेतच्छत्राणीत्यर्थः प्रेतराजस्यान्तकस्य आहाराय भोजनाय स्थापितानि विहितानि रौप्यस्थालीनि राजतभाजनानीव भान्ति चेत्युत्प्रेक्षा॥ ६७॥

रेजुरिति। व्यसूनां मृतानां पार्थिवानां वक्षोभ्रष्टाः पतिताः कुङ्कुमाङ्काः कुङ्कुमारुणिता इत्यर्थः। मुक्ताहाराः पूर्णकामस्य सकलराजकसंहारात्सफलमनोरथस्य अतएव पीतं रक्तमेवासवं येन तस्य मृत्योः हासादट्टहासाल्लक्ष्याद्दृश्याद्दन्ता रेजुरिति मन्ये इत्युत्प्रेक्षा॥६८॥

निम्नेष्विति। भूमौ निम्नेषु निम्नस्थलेषु ओघीभूतं राशीभूतं क्षतक्षतानां सम्बन्धि यदस्रं रक्तं चकासाञ्चकार दिदीपे। चकासृ दीप्ताविति धातोर्लिट्, कासेश्च आम् प्रत्ययमिति आम्प्रत्यये कृञोऽनुप्रयोगः।

रामेण त्रिःसप्तकृत्वो ह्रदाना
ञ्चित्रञ्चक्रे पञ्चकं क्षत्रियास्रैः।
रक्ताम्भोभिस्तत्क्षणादेव तस्मिन्
सङ्ख्येऽसङ्ख्याः प्रावहन्द्वीपवत्यः ॥ ७० ॥

सन्दानान्तादश्विभिः शिञ्चितास्त्रै
राविश्याधः प्रातमस्त्रावलूनाः
कूर्मौपम्यं व्यक्तमन्तर्नदीना
मैभाः प्रापन्नङ्घ्रयोऽसृङ्मयीणाम् ॥ ७१ ॥

तदुपमन्तकान्तः पुरस्य कतानावरोधस्य संव्यानानामुत्तरीयाणां रागार्थं रञ्जनार्थं कुसुम्भक्षोदं कौसुम्भं चूर्णः किं नु कुसुम्भद्रवो नु वेत्युत्प्रेक्षा ॥ ६९ ॥

रामेणेति। रामेण भार्गवेण सामर्थ्यात् त्रीन् वारान् त्रिः। द्वित्रिचतुर्भ्यः सुजिति सुच्प्रत्ययः। त्रिरावृत्ता सप्त त्रिःसप्तकृत्व एकविंशतिवारानित्यर्थः। सङ्ख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुजिति कृत्वसुच्प्रत्ययः। क्षत्रियास्रै राजन्यरक्तैः चित्रमद्भुतं ह्रदानां पञ्चपरिमाणमस्य पञ्चकम्। सङ्ख्यायाः संज्ञासङ्घसूत्राध्ययनेष्विति सङ्घार्थे कन् प्रत्ययः। चक्रे कृतं तस्मिन् सङ्ख्ये युद्धे। मृधमास्कन्दनं सङ्ख्यमित्यमरः। तत्क्षणादेव रक्तैरेवाम्भोभिः असङ्ख्याः द्वीपवत्यो नद्यः प्रावहन् प्रासरन् रामेण बहुकालेन च समन्तपञ्चकाख्यं ह्रदपञ्चकमेव कथञ्चित् कृतम्। अत्र तु क्षणमात्रेणासङ्ख्या नद्यः प्रवृत्ता इत्युपमाना- दुपमेयस्याधिक्योक्तेर्व्यतिरेकालङ्कारः ॥ ७० ॥

सन्दानान्तादिति। शिञ्चितास्त्रै रभस्वास्त्रविद्धैरश्विभिराकृष्यैः कंधः रथानामधस्तादाविश्य प्रविश्य सन्दानान्तात् बन्धन प्रदेशात् शीर्षदेशमधिकृत्येत्यर्थः। प्रातं प्रीतम्। याम्कोरन्तरस्थाभिःत विक्र-

पद्माकारैर्योधवक्त्रैरिभानां
कर्णभ्रष्टैश्चामरैरेव हंसैः ।
सोपस्काराः प्रावहन्नस्ततोयाः
स्रोतस्विन्यो वीचिषूच्चैस्तरङ्गैः ॥ ७२ ॥

उत्क्रान्तानामामिषायोपरिष्टा-
द्ध्याकाशं बभ्रमुः पत्त्रवाहाः ।
भर्त्रा प्राणा नूनमद्याप्यवेता
मा स्युः कायं त्याजिता दारुणास्त्रैः ॥ ७३ ॥

त्वाद्दीर्घाभावः । तेन मत्स्येष्ववकृत्ताः छिन्नाः । इभानामिभेभ्यः अद्व्यग्रचरणाः असृङ्नयोधा नदीनामन्तरभ्यन्तरे व्यक्तं कूर्मोपमत्वं कमठोपमताम् । स्वार्थे ष्यञ्प्रत्ययः । चातुर्वर्ण्यादयः स्वार्थ इति वामनः । प्रापन् प्राप्ताः । आपो लुङि पुषादित्वात् च्लेरङादेशः । उपमा ॥ ७१ ॥

पद्माकारैरिति । उच्चैर्वीचिषु तरङ्गैः प्लवमानैः पद्माकारैः कमलसदृशैर्योधवक्त्रैर्भटमुखैरिभानां कर्णेभ्यो भ्रष्टैश्चामरैर्हंसैः सोपस्काराः सपरिकराः । सम्पर्युपेभ्यः करोतौ भूषणे इति सुडागमः । अस्ततोया रक्तजलाः स्रोतस्विन्यो नद्यः प्रावहन् । अत्र रूपकोपमयोः सङ्करः सुगमः ॥ ७२ ॥

उत्क्रान्तानामिति । पत्त्राणि वहन्तीति पत्त्रवाहाः पक्षिणः आमिषाय आमिषमत्तुम् । क्रियार्थोपपदस्य च कर्मणि स्थानिनः इति चतुर्थी । उत्क्रान्तानां मृतानां उपरिष्टादध्याकाशमाकाशे । विभक्त्यर्थेऽव्ययीभावः । बभ्रमुः भ्रेमुः । वा जॄभ्रमुत्रसामिति विकल्पादेत्वाभ्यासलोपाभावः । अत्रोत्प्रेक्ष्यते । दारुणास्त्रैः घोरास्त्रैः कायं त्याजिता विसर्जिताः त्यजेर्ण्यन्ताद् द्विकर्मकात्कर्मणि क्तः । एतेन करुद

आतन्वद्भिर्दिक्षु पलायनाद
म्लानैर्दूरादाशु तीक्ष्णैर्मुखाग्रैः ।
आदौ रक्तं सैनिकानामजीवै-
र्जीवैः पश्चात्पत्त्रिपूगैरपायि ॥ ७४ ॥
ओजोभाजां यद्रणे संस्थिताना-
मादत्तीव्रं सार्द्धमङ्गेन नूनम् ।
ज्वालाव्याजादुद्वमन्ती तदन्त-
स्तेजस्तारन्दीप्तजिह्वा ववाग्नि ॥ ७५ ॥

कर्मण्यामिति वचनात् । मूर्त्ताः मूर्त्तिमन्तः । प्राणा यद्यपीदानीमपि का-यमवेक्षमाणाः पूर्वाभिमानात् पुनः कायमवेक्ष्यापेक्षिणो मूर्त्ताः प्राणा-एव नूनमाराद्गमन्नोत्पातमिवाहुः । इजादेश्च गुरुमतोऽनृच्छ इत्याम्-प्रत्ययः कृञ्चानुप्रयुज्यते लिटीत्यस्मात्तु प्रयोगः आम्प्रत्ययवदित्यत्र कृञ एवेति नियमादस्तेर्नात्मनेपदम् ॥ ७३ ॥

आतन्वद्भिरिति । दिक्षु पलायनाद्भ् पलायनघोषं आतन्वद्भिर्वि-स्तृण्वद्भिर्दूरादाशु प्राप्तैरागतैरजीवैरचेतनैः । पश्चाज्जीव-न्नेन नजसमासः । पत्त्रिपूगैर्बाणव्रातैरित्यर्थः । तीक्ष्णैर्मुखाग्रैः करणैः सैनिकानां रक्तमपायि पीतम् । पिबतेः कर्मणि लुङ् आतो-युक्चिण्कृतोरिति युगागमः । पश्चाज्जीवैश्चेतनैः पत्त्रिपूगैः पक्षिसङ्घैः कङ्कभिल्लीहरैर्मुखाग्रैश्चञ्चुपुटैः करणैरपायि । पत्त्रोभयेषां पत्त्रिणां प्रकृतत्वात् केवलप्रकृतविषयः श्लेषः ॥ ७४ ॥

ओजोभाजामिति । दीप्ता ज्वलन्ती जिह्वा यस्याः सा दीप्तजिह्वा शिवा । रणे संस्थितानां मृतानामोजोभाजामोजस्विनाम् । अङ्गैः गात्रैः सार्द्धं यत्तीव्रं तिग्मं तेन आदद्भक्षयत् । अदेर्लुङ् अद सर्वेषामित्यडागमेऽप्राप्तस्य आडजादीनामित्याडागमोऽद्रस्य आदत्

नैरन्तर्य्यच्छिन्नदेहान्तरालं
दुर्भक्षस्य ज्वालिना वाशितेन ।
योद्धुर्बाणप्रोतमादीप्य मांसं
स्पाकापूर्वस्वादमादे शिवाभिः ॥ ७६ ॥
ग्लानिच्छेदी क्षुत्प्रबोधाय पीत्वा
रक्तारिष्टं शोणिताजीर्णशेषम् ।
स्वादुङ्कारं कालखण्डोपदंशं

इति । तदनन्तरमन्तरे तेजोज्वालाव्याजात्कृतखोल्काञ्चलादुद्गमनी तारस्वरैर्वाशं रौति स्म । तिरश्चां वाशितं रुतमित्यमरः । नूनमित्युत्प्रेक्षायां अत्र व्याजशब्देन ज्वालालापह्नवेन तेजोल्कोत्प्रेक्षयोः सापह्नवोत्प्रेक्षेति सर्वस्वकारः ॥ ७५ ॥

नैरन्तर्य्येति । नैरन्तर्य्येणाविच्छेदेन छिन्नं देहस्यान्तरालं यस्मिन् कर्मणि तद्यथा तथा बाणैः प्रोतं स्यूतं अतएव दुर्भक्षस्य भक्षयितुमशक्यस्य । कृच्छ्रार्थे खलप्रत्ययः । योद्धुर्योधस्य सम्बन्धि मांसं ज्वालिना ज्वालावता वाशितेन रुतेन शिवानां वाशितेन जिह्वा ज्वलतीति प्रसिद्धं । आदीप्य प्रज्वाल्य । बाणाग्राहाय मांसपाकाय चेति भावः । अत एव पाकेनापूर्वोऽभिनवः स्वादो रुचिर्यस्य तत्तथा शिवाभिर्गोमायुभिः । स्त्रियां शिवा भूरिमायगोमायुमृगधूर्त्तकाः इत्यमरः । आदे जक्षे भक्षितमित्यर्थः । शिवान्दतरस्यामिति विकल्पाददेर्घस्लादेशः । वाशिते स्वयं जिह्वाज्वालादग्धेषु अप्रतिबन्धेन पाकरुधिरं जग्धमित्यर्थः । अत्र पाकापूर्वस्वादाद्यसम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ ७६ ॥

ग्लानीति । क्रोष्टा जम्बुकः क्षुत्प्रबोधाय ग्लानिच्छेदी खेदहारी शोणितरोऽजारिष्टं अजीर्णशेषेण तद्रक्तमेवारिष्टं पानविशेष इति रूपकम् । तत्पीत्वा स्वादुङ्कारं स्वादूकृत्य । स्वादुमीति णमुल् । का

क्रोष्टा डिम्बं व्यष्वणद्रास्वनञ्च ॥ ७७ ॥
क्रव्यात्पूगैः पुष्कराण्यानकाना
मत्याशाभिर्मेदसोदारितानि ।
आभीलानि प्राणिनः प्रत्यवश्य
न्कालोनूनं व्याददावाननानि ॥ ७८ ॥
कीर्णा रेजे साजिभूमिः समन्ता

चखण्डेन महता उपदंशं कालखण्डमुपदंशं कृत्वेत्यर्थः। काल खण्ड-यकृती तु समे इत्यमरः। उपदंशस्तृतीयायामिति णमुल्। कालखण्डस्य दंशनक्रियाकर्मत्वेऽपि भुजिक्रियाकरणत्वात् तृतीयोपपदतया, तृतीयाप्रभृतीन्यन्यतरस्यामिति विकल्पेनोपपदसमासः। डिम्बं कलेवरं व्यष्वणत् भुक्तवानित्यर्थः। वेः स्वनभोजन इति षत्वम्। व्यस्वनदशब्दयच्चेति समुच्चय। अभोजनार्थत्वात् षत्वं न ॥ ७७ ॥

क्रव्यादिति। क्रव्यमदन्तीति क्रव्यादो मांसभक्षकाः वृकगृध्रा-दयः क्रव्ये चेति विट्प्रत्ययः तेषां पूगैः कदम्बैः मेदसोवसायाः। मे-दस्तु वपा वसेत्यमरः। अत्याशाभिस्तृष्णाभिर्दारितानि मेदःस्वत्र भ्रान्त्या पाटितान्यानकानां तूर्याणां पुष्कराणि मुखानि। पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले इत्यमरः। प्राणिनः करितुरगादीन् प्रत्यवश्यन् अभ्यवहरन्। अभ्यवहारः प्रत्यवसानं भोजनं जग्धिरिति हलायुधः। कालोऽन्तकः आभीलानि भयङ्कराणि। आभीलं भीमकृच्छ्रयोरिति विश्वः। आननानि व्याददौ विजहार। व्याङोदोनास्यविहरण इत्यस्य प्रत्युदाहरणमेतत्। यानि विदारितानि पुष्कराणि तान्येवाननानि। नूनमित्युत्प्रेक्षायाम् ॥ ७८ ॥

कीर्णेति अप्राणैरङ्गरेजीर्णा विस्तारादिभ्याणैरित्यर्थः। कनु शोभने इति धातोर्लिटः एत्वादेशः। प्राणभाजां प्राणिनां प्रतीकैरवयवैः। अङ्ग

द्प्राणद्भिः प्राणभाजां प्रतीकैः ।
बह्वारम्भैरङ्गसंयोजितैर्वा
रूपैः स्रष्टुः सृष्टिकर्मान्तशाला ॥ ७९ ॥
आयन्तीनामविरतरयं राजकानीकिनीना-
मित्थं सैन्यैः सममलघुभिः श्रीपतेरूर्मिमद्भिः ।
आसीदोघैर्मुहुरिव महद्वारिधेरापगाना-
न्दोलायुद्धं कृतगुरुतरध्वानमौद्धत्यभाजाम् ॥ ८० ॥
इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये

प्रतीकोऽवयवः इत्यमरः । समन्तात्कीर्णा सा आजिभूमिः ईषदसमाप्तार-
म्भैरिति बह्वारम्भैः किंच दृष्टैरित्यर्थः । विभाषा सुपो बहुच् पुर-
स्तादिति बहुच् प्रत्ययः तथाङ्गसंयोजितैरङ्गघटितैश्च रूपैः आकारैः ।
रूपं स्वभावे सौन्दर्ये आकारे श्लोकयोरपीति विश्वः । कीर्णा स्रष्टु-
र्धातुः सृष्टिकर्मान्तशाला वा । "सृष्टिकर्मणो निर्माणागारमिव रेजे इत्यु-
त्प्रेक्षा ॥ ७९ ॥

आयन्तीनामिति । द्रुतसञ्चारीत्या अविरतरयमविच्छिन्नवेगं यथा
तथा आयन्तीनामभिधावन्तीनामौद्धत्यभाजां प्रागल्भ्यभाजां राज्ञां
समूहा राजकानि । गोत्रोक्षेत्यादिना वुञ् प्रत्ययः । तेषामनीकिन्यः सेना
तासां राजकानीकिनीनां अलघुभिर्महद्भिरूर्मिमद्भिरुत्तरङ्गैर्वा श्री-
पतेः कृष्णस्य सैन्यैः सम सेनाभिः सह अपां समूहो आपम् । भिक्षा-
दिभ्योऽण् । आपैम गच्छन्तीति आपगा नामसत्त्वविशेषविशिष्टानां वारि-
धेरोघैः प्रवाहैः इव हतो गुरुतरध्वनिर्महाध्वनिर्यस्मिन् तत् महद्दोला-
युद्धं अनियतजयपराजयं युद्धं मुहुरासीत् उपमा । मन्दाक्रान्ता वृत्त-
मेतत् ॥ ८० ॥

सङ्कुलयुद्धवर्णनो नामाष्टादशः सर्गः ॥ १८ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघकाव्यव्याख्याने सर्वङ्कषाख्येऽष्टादशः सर्गः ॥ १८ ॥

ऊनविंशः सर्गः ।

अथोत्तस्थे रणाटव्यामसुहृद्वेणुदारिणा ।
नृपाङ्घ्रिपौघसङ्घर्षादग्निवद्वेणुदारिणा ॥ १ ॥

तदेवमष्टादशसर्गे तुमुलं युद्धमभिधायेदानीमेकोनविंशतितमे सर्गे द्वन्द्वयुद्धमनुद्धृतेन छन्दसा चित्रबन्धेन वर्णयितुमारभते । अथेत्यादि । अथैवं तुमुलयुद्धानन्तरम् । रण एवाटवी तस्यामुपमितसमासः । अग्निवदिति तद्धितोपमालिङ्गात् । एवमुत्तरत्रापि द्रष्टव्यम् । तस्यां रणाटव्याम् असुहृदः शत्रवो वेणवो वंशा इव । वेणु मस्करतेजना इति वंशपर्यायेष्वमरः । तान्दारयति दलेनासुहृद्वेणुदारिणा वेणुदारिणा बाणात्मकेन । नृपा अङ्घ्रिपाः पादपा इव तेषामोघाः सङ्घास्तेषां संघर्षात् सङ्घट्टात् क्षेपाद्वा अग्निवदग्नितुल्यम् । तेन तुल्यमिति तुल्यार्थे वतिप्रत्ययः । उत्तस्थे उत्थितम् । भावे लिट् । अत्राग्निवदिति तुल्यार्थेन वतिना धर्मव्यवधाने सादृश्य प्रतिपादिना उपमानोपमेयसमानधर्मसादृश्यप्रतिपादकानां चतुर्णां चोपादानाद्वतेरार्थी तद्धितगता पूर्णोपमा । सा च रणाटव्यादिरूपकानुगतोपमासापेक्षेति सङ्करः । सर्गेऽस्मिन्ननुष्टुभं वृत्तम् । पञ्चमं लघु सर्वेषु सप्तमं द्विचतुर्थयोः । गुरु षष्ठं च सर्वेषामेतत् श्लोकस्य लक्षणमिति लक्षणात् । अत्रैकान्तरक्रमेण यमका द्यन्तमयङ्गालङ्कारनियमः सर्वत्र यदा समासमधोरङ्कारस्य तत्र यमकलक्षणमुक्तं दण्डिना । अव्यपेतव्यपेतात्मा व्यावृत्तिर्वर्णसंहतेः । यमकं तच्च पादानामादिमध्यान्तगोचरम् । एकद्वित्रिचतुष्पादे यमकानां विकल्पना । आ-

आपतन्तममुन्दूरादूरीकृतपराक्रमः ।
बलोऽवलोकयामास मातङ्गमिव केसरी ॥ २ ॥
जजौजोजाजिजिज्जाजी तन्ततोऽतिततातितुत् ।
भाभोऽभीभाभिभूभाभूरारारिररिरीररः ॥ ३ ॥
॥ एकाक्षरपादः ॥

दिमध्यान्तमध्यान्तमध्याद्याद्यन्त सर्वत इति । अत्रेदं समपादान्तं यमकं द्विपादयमकभेदः ॥ १ ॥

आपतन्तमिति । आपतन्तमाधावन्तं अमुं वेणुदारिणं दूरात् अरीकृतपराक्रमोऽङ्गीकृतपौरुषबलेन सह्यानुगतसंप्रहार इत्यर्थः । बलोबलभद्रः केसरी सिंहो मातङ्गं गजमिवावलोकयामास अनयोरपि तदन्तरमिति भावः । अतोऽलङ्कारेण वस्तुध्वनिः ॥ २ ॥

जजाविति । ततोऽवलोकनानन्तरं जजन्तीति जजाः योधाः । जज युद्धे पचाद्यच् । जजानामोजसा जाता जजौजोजाः तानाजिं जयतीति जजौजोजाजिजित् । जयतेः क्विप् । जजतीति जाजी योधी । ताच्छील्ये णिनिः । अतिततानततरुतान् अतितिरति अतितुदतीति अतितुत् । तुदतेः क्विप् । भस्येव भा यस्य स भाभो नक्षत्रकान्तिः । नक्षत्र भं तारेत्यमरः । नास्ति भीर्येषां तेऽभियो निर्भीकाः तानिभान् गजान् अभिभवतीति अभीभाभिभूः । क्विप् । तस्याः भा यस्तेजः सा एव भूः स्थानं अभीभाभिभूभाभूः । अराः सन्त्येषामिति अरीणि चक्राणि तैः रीयन्ति गच्छन्तीति अरिर्यो रथाः । री गतिरेषणयोरिति धातोः क्विप् । तेषां ईरं प्रेरणं राति अरिरीररोरथिकः । आतोऽनुपसर्गे कः । अरिं शत्रुं वेणुदारिणं आर योद्धुमाससारेत्यर्थः ऋगताविति धातोर्लिट् द्विर्भावितोऽणिल वृद्धिः अभ्यासस्योरदत्वे अत आदेरिति दीर्घे पुनः सव र्णदीर्घः । भिन्नैकाक्षरपादाख्योऽयमासभेदः भाभ इत्युपमा सा च योरे काक्षरानुप्रवेशलक्षण सङ्करः ॥ ३ ॥

भवन्भयाय लोकानामाकम्पितमहीतलः।
निर्घात इव निर्घोषभीमस्तस्यापतद्रथः ॥ ४ ॥
रामे रिपुः शरानाजिमहेष्वास विचक्षणे।
कोपाद्थैनं शितया महेष्वा स विचक्षणे ॥ ५ ॥
दिशमर्कमिवावाचीं मूर्च्छागतमपाहरत्।
मन्दप्रतापं तं सूतः शीघ्रमाजिविहायसः ॥ ६ ॥

भवन्निति। लोकानां जनानां जगतां च। लोकस्तु भुवने जने इत्यमरः। भयाय भवन् सम्पद्यमानः भयं जनयन्नित्यर्थः। क्लृपि सम्पद्यमाने चतुर्थी च वक्तव्येति क्लृप्यर्थनिर्देशाच्चतुर्थी। आकम्पितमहीतलो भूकम्पं कुर्वन्नित्यर्थः। निर्घोषेण भीमो भयङ्करः तस्य बलभद्रस्य रथो निर्घात इवापतत् आधावत्। श्रौती पूर्णोपमा ॥ ४ ॥

राम इति। रिपुर्वेणुदारी आजिमहेषु रणोत्सवेष्विति रूपकम्। मह उद्धव उत्सव इत्यमरः। विचक्षणे प्रगल्भे। चिक्षङ् इति कर्तरि ल्युडिति ल्यादकारः असनयोश्च प्रतिषेधो वक्तव्य इति चक्षिङः ख्याञादेशाभावः। रामे बलभद्रे शरान् आस चिक्षेप। अस्यतेर्लिट् अत आदेरित्यभ्यासदीर्घे सवर्णदीर्घः। कोपात् रामः एनं वेणुदारिणं शितया शातया। शाच्छोरन्यतरस्यामितीत्वम्। महेष्वा महेषुणा। पत्री रोप इषुर्द्वयोरित्यमरः। विचक्षणे जघान। चणु हिंसायामिति धातोः कर्तरि लिट्। अभिन्नमपादो नाम पादाभ्यासयमकभेदः। एवमुत्तरत्रापि द्रष्टव्यम् ॥ ५ ॥

दिशमिति। मूर्च्छागतं रामेषुपातान्मोहमुपगतम् अतएव मन्दप्रतापमल्पप्रकाशं तं वेणुदारिणं अवाचीं दक्षिणां दिशं प्राप्तम्। अतएव मन्दप्रतापमर्कमिव सूतः सारथिरनूरुश्च आजेर्विहायसः आकाशाच्च आजिविहायस इत्युपमितसमासः। शीघ्रमपाहरत् अपसारितवान्। उपमा ॥ ६ ॥

ज्ञात्वा शिनेः शाल्वचमूं सप्रभावा चमूर्जिताम् ।
ससर्ज्ज वल्गैः फुल्लाब्जसप्रभा वाचमूर्ज्जिताम् ॥ ७ ॥
उल्मुकेन द्रुममाप्य सङ्कुचत्पत्त्रसञ्चयम् ।
तेजः प्रकिरता दिक्षु सप्रतापमदीप्यत ॥ ८ ॥
पृथोरध्यक्षिपद्रुक्मी यया चापमुदायुधः ।
तयैव वाचाऽपगमं ययाचापमुदा युधः ॥ ९ ॥

ज्ञात्वेति। प्रभावेन सह वर्त्तत इति सप्रभावा महानुभावा शिनेः सात्यकिपितामहस्य चमूः सेना। शाल्वोनाम चैद्यपक्षोराजा तस्य चमूं सेनां जितां ज्ञात्वा जिग्येत्यर्थः। अतएव वल्गैर्मुखैः। येनाङ्गवि-कार इति तृतीया विकारस्यापि विकारत्वात्। फुल्लाब्जस्य प्रफुल्लार-विन्दस्य सप्रभा समानप्रभा हर्षेण विकासितेत्यर्थः। ऊर्ज्जिताम्-उदारां वाचं ससर्ज्ज के यूयमस्मदग्र इत्याद्युच्चैर्गर्ज्जिं जगादेत्यर्थः। उप-मायमकयो: संसृष्टि: ॥ ७ ॥

उल्मुकेनेति। दिक्षु तेजः प्रभावं प्रकाशञ्च प्रकिरता विक्षिपता उल्मुकेन भागवतेन राज्ञा ज्वलातेन च। सङ्कुचन्ती पत्त्रसम्पद्वाहन-सम्पत्पर्णसम्पदिव यस्य तम्। सप्रतापं सपराक्रमं प्रकृष्टतापसहितं च। द्रुमं द्रुमाख्यं राजानं वृक्षञ्च प्राप्यादीप्यत प्रजज्वले। भावे लङ्। श्लेषाभिधायाः प्रकृतार्थे नियन्त्रणाद् प्रकृतार्थप्रतीतिर्ध्वनिरेव न श्लेष ॥ ८ ॥

पृथोरिति। रुक्मी भीष्मकात्मजो रुक्मिण्या भ्राता। उदायुधः उद्यतायुधः सन्। यया वाचा पृथोराजस्य चापमध्यक्षिपत् धिगिदं चापं कष्टमिति निनिन्द। अपगता मुद्यस्याश्रया अपमुदा निरुत्सा-हया तयैव वाचा युधो युद्धादपगममपसरणं ययाच च। मा त्वाद्य प्रहरामि पलायमानं पराङ्मुखमपि ईत्यर्थ अत्र च। उभयपदी ॥ ९ ॥

समं समन्ततो राज्ञामापतन्तीरनीकिनीः।
कार्ष्णिः प्रत्यग्रहीदेकः सरस्वानिव निम्नगाः॥ १०॥
दधानैर्घनसादृश्यं लसद्दायसदंशनैः।
तत्र काञ्चनसच्छाया ससृजे तैः शराशनिः॥ ११॥

॥ निरोष्ठ्यः॥

नखांशुमञ्जरीकीर्णामसौ नरहरिवोच्चकैः।
बभौ बिभ्रद्धनुः शाखामविरूढशिलीमुखाम्॥ १२॥
प्राप्य भीममसौ जन्यं सौजन्यन्दधदानते।

सममिति। समं युगपत्समन्तत आपतन्तीरागच्छन्तीराज्ञां चैद्यपक्षाणामनीकिनीः सेनाः। एकस्त्वसहायः पुमान् कार्ष्णिः प्रद्युम्नः। कत इव। निम्नगाः नदीः सरस्वान् समुद्र इवैकोऽसहायः प्रत्यग्रहीत् प्रत्यवरुरोध॥ १०॥

दधानैरिति। लसन्ति आयसानि लोहमयानि दंशनानि वर्माणि येषां तैः। 'तनुत्रं वर्म दंशनम्' इत्यमरः। अतएव घन साहश्यं कार्ष्ण्यान्मेघसाम्यं दधानैस्तैः सैनिकैः तत्र कार्ष्णौ काञ्चन सच्छाया सुवर्णवर्णा शर एवाशनिः निर्घातः ससृजे उत्सृष्टा। उपमा रूपकयोः संसृष्टिः। ओष्ठ्यवर्णनिरोधान्निरोष्ठ्यं चित्रभेदः शब्दालङ्कारः॥ ११॥

नखेति। नखांशवो मञ्जर्य इव ताभिः कीर्णां व्याप्तां अविरूढाः शिलीमुखा बाणा भ्रमराश्च यस्यां ताम्। 'अलिबाणौ शिलीमुखौ' इत्यमरः। धनुः शाखेव तां बिभ्रदसौ कार्ष्णिरुच्चकैरुन्नतस्तरुरिव बभौ। तरुरिवेति चिह्नातुपमालोपोऽभिमतप्रायः। शिलीमुखेति श्लिष्टविशेषणेयमुपमा॥ १२॥

प्राप्येति। अरिपूगाणां शत्रुसङ्घानामन्तकः अरिपूगान्तकोऽसौ कार्ष्णिः भीमं भयङ्करं जन्यं युद्धं प्राप्य। 'युद्धमायोधनं जन्यम्' इत्यमरः।

विध्यन् मोच न रिपूनरिपूपान्तकः शरैः ॥ १३ ॥
क्षतस्य पूर्व्वक्षितिपैर्विजयाशंसया पुरः ।
अनेकस्य चकारासौ बाणैर्बाणस्य खण्डनम् ॥ १४ ॥
या बभार कृतानेकमाया सेना ससारताम् ।
धनुः स कर्षन्नुचितमायासेनाससार ताम् ॥ १५ ॥
ओजोमहौजाः कृत्वाधस्तत्चणादुत्तमौजसः ।
कुर्व्वन्नाजावमुख्यत्वमनयन्नाम मुख्यताम् ॥ १६ ॥

आनते नम्रे सौजन्यं सौहार्द्दं दधत् न तु विध्यन् । न क्लीबं न कृताञ्जलिमिति निषेधादिति भावः । रिपून् प्रतिपक्षान् शरैर्विध्यन् प्रहरन् न मुमोच न तत्याजेत्यर्थः । संदंशयमकभेदः ॥ १३ ॥

क्षतस्येति । असौ कार्ष्णिः पूर्व्वक्षितिपैर्विजयाशंसया जयेच्छया पुरोऽग्रे क्षतस्य निकृत्तस्य प्रयुक्तस्य वा अनेकस्यानेकाङ्किनः बहुवारायत्तेत्यर्थः । अन्यत्रानेकस्य बहुसङ्ख्यस्य बाणस्य बाणासुरस्य शरजालस्य च बाणैः खण्डनं छेदं चकार । अत्र बाणयोर्द्वयोरपि प्रकृतत्वात् केवलप्रकृतयोः श्लेषः ॥ १४ ॥

येति । या सेना कृतानेकमाया कृतबहुकपटा सती ससारतां सारवत्तां बभार तां सेनां स कार्ष्णिः धनुः कर्षन् धनुषा विध्यन्नित्यर्थः । आयासेन रहितमनायासं यथा तथा आससार अभियुक्तवानित्यर्थः । बाणं भङ्क्त्वा तत्सेना वैभङ्गेत्यर्थः ॥ १५ ॥

ओज इति । महौजाः महाबलः प्रद्युम्नः उत्तमौजसो नाम राज्ञः ओजस्तत्क्षणादेवाधः कृत्वाभिभूय आजौ युद्धे अमुख्यत्वमप्रधानत्वं कुर्व्वन् अथ वा अमुख्यत्वं अमुख्याधिक्यं तस्मान्न कुर्व्वन् नाम निजं प्रद्युम्ननामधेयं मुख्यतां प्रधानतां प्रसिद्धार्थतामनयत् । प्रकृष्टं द्युम्नं बलं यस्येति प्रद्युम्न इति स्वामी ॥ १६ ॥

दूरादेव चमूभर्त्तुः कुमारो हन्ति स्म याः ।
न पुनः सांयुगीनास्ताः कुमारोहन्ति सस्मयाः ॥१७॥
निपीड्य तरसा तेन मुक्ताः काममनास्थया ।
उपाययुर्विलक्षत्वं विद्विषोन शिलीमुखाः ॥१८॥
तस्यावदानैः समरे सहसा रोमहर्षिभिः ।
सुरैरशंसि व्योमस्थैः सह सारोमहर्षिभिः ॥१९॥
सुगन्धयद्दिशः शुभ्रमम्लानि कुसुमन्दिवः ।

दूरादिति। स कुमारः प्रद्युम्नः सस्मयाः सगर्वाः याश्चमूर्दूरा-देव भर्त्तुर्बाणविशेषैर्हन्ति स्म जघान ताश्चम्वः पुनर्भूयः सांयुगीनाः सांयुगीद्धं युद्धे रणकुशलमित्यर्थः। गौला कुः भूमिर्वी पृथ्वीत्यमरः। न आरोहन्ति स्म नारूढाः ॥१७॥

निपीड्येति। तेन प्रद्युम्नेन तरसा बलेन कामं निपीड्य अनास्थया अनादरेण मुक्ताः। यान्ति न परिहर्तव्या इति निर्बन्धेना वध्या इति यो-वनोत्सुका इत्यर्थः। अनेन क्षिप्ताः विद्विषो विलक्षत्वं सलज्जत्वमापयु। विलक्षस्तु लज्जान्वित इत्यमरः। शिलीमुखाश्चापास्तु विलक्षत्वं लक्ष्यभ्र-ष्टत्वं चापयुः। अत्र द्वयोरपि विलक्षत्वयोर्भेदाध्यवसायादयं व्यति-रेकोऽविद्विषां शिलीमुखानां च प्रकृतत्वात्तुल्ययोगितेत्यनयोरिति सङ्करः ॥१८॥

तस्येति। समरे तस्य प्रद्युम्नस्यावदानैरत्युत्कर्षैः कर्मभिः सहसा सद्यः रोमहर्षिभिः रोमाञ्चकृद्भिः व्योमस्थैः सुरैः महर्षिभिः सह सार्द्धं सारो बलमशंसि शंसितः ॥१९॥

सुगन्धयदिति। दिशः सुगन्धयत् सुगन्धाः कुर्वत्। सुगन्धास्तत्करो-तीति ण्यन्तात्शतृप्रत्ययः। शुभ्रं धवलं अम्लानि म्लानिरहितं भूरि प्रभूतं दिवोऽन्तरिक्षात् प्रद्युम्ने अपतत् तत्र प्रद्युम्नाद्युपरि पूर्वोक्त-

भूरि तत्रापतत्तस्मादुत्पपात दिवं यशः ॥ २० ॥
सोढुंतस्य द्विपोनालमपयोधरवारणम्।
ऊर्णुनाव यशश्च द्यामपयोधरवारणम् ॥ २१ ॥
केशप्रचुरलोकस्य पर्य्यस्कारि विकासिना।
शेखरेणेव युद्धस्य शिरः कुसुमलक्ष्मणा ॥ २२ ॥

ऊर्द्ध्वयुक्त दिवमन्तरिक्षं प्रति उत्पपात। अत्र द्रुमद्रुमन्वयो कुसुमय-शोभ्यामन्योऽन्योपस्कारजननादन्योऽन्या लङ्कार। परस्परं क्रियाजन-नेऽन्योऽन्यमिति लक्षणात् ॥ २० ॥

सोढुमिति। अपगताभयाश्चिरत्तायोधामां रवा सिंहनादा येषां ते अपयोधरवा द्विप मलव तस्य काष्णं रण सोढुं नालमशक्ता। अ तएव यशश्च अविद्यमान पयोधराणां वारणं मेघप्रतिघातोयस्य तत् अपयोधरवारणं सत् द्यामूर्णुनाव मेघ मण्डल उल्लङ्घ स्वर्गमाच्छाद यामासेत्यर्थः। ऊर्णोतेर्लिट्। अजादेर्द्वितीयस्येति द्वितीयस्याचोद्वि र्भाव। गुणवृद्ध्यावादाम्रुणेषे। यमकशाब्दार्थहेतुक काव्यलिङ्गयो संसृष्टि ॥ २१ ॥

केशेति। विकासिना विविधमार्गचारिणा, विकस्वरेण च कुसुम लक्ष्मणा पुष्पकेतुना प्रद्युम्नेन अन्यत्र कुसुमचिह्नेन, तत्त्वयनेत्यर्थः। कचवत्प्रचुरा प्रभूता लोका जना यस्मिन् तस्य युद्धस्य शिरःप्रभृति अन्यत्र केशैः प्रचुरस्य केशाढ्यस्य लोकस्य जनस्य शिर मूर्द्धा शेखरेणापी-डेनेव शिखामाल्येनेवेत्यर्थः। शिखास्वापीडशेखरावित्यमरः। पर्य्य-स्कारि परिष्कृतं भूषितमित्यर्थः। परिपूर्वात्करोते कर्म्मणि लिङ् सम्प-र्य्युपेभ्य करोतौ भूषणे इति सुडागमः अड्व्यासव्यवायेऽपीति नियमा-त्परिनिविभ्य इत्यादिना षत्वे सिवादीनां वाड्व्यवायेऽपीति उपमा ॥ २२ ॥

सादरं युध्यमानापि तेनान्यनरसादरम्।
सा दरम्लाननानिन्ये हीयमाना रसादरम् ॥ २३ ॥
इत्यालिङ्गितमालोक्य जयलक्ष्म्या झषध्वजम्।
क्रुद्धयेव क्रुधा सद्य प्रपेदे चेदिभूपतिः ॥ २४ ॥
अहितानभि वाहिन्या स मानी चतुरङ्गया।
चचाल वल्गत्कलभसमानीचतुरङ्गया ॥ २५ ॥

सादरमिति। सादरं साभिनिवेशं युध्यमानापि सम्प्रहरन्त्यपि अरं दूरं दूरादिति यावत् रसात् रसे रागात् हीयमाना अपक्रम्यमाणा प्रद्युम्नपक्षिक्षेति भाव। अतएवात्र विरोधाभासोऽलङ्कारः। जहातेः कर्मणि लटः शानजादेशः। सा पृतना चैद्यस्य सेना तेन प्रद्युम्नेन अन्येषां नरस्यानामपि नराणां सादं निषेदतां राति ददातीति अन्यनरसादरम्। आतोऽनुपसर्गे कः इति कप्रत्ययः। दरं भयं दरोऽस्त्रियां भये श्वभ्रे इत्यमरः। निन्ये नीता। नयतेः प्रधाने कर्मणि लिट्। प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणामिति वचनात्। विरोधाभासयमकयोः संसृष्टिः ॥ २३ ॥

इतीति। इतीत्थं जयलक्ष्म्या आलिङ्गितं झषध्वजं मकरकेतुं प्रद्युम्नम्। पृथुरोमा झषो मत्स्य इत्यमरः। आलोक्य सद्यः क्रुद्धया सपत्न्यागमात्कोपितयेवेत्युत्प्रेक्षा। क्रुधा प्रद्युम्नाश्रितया रुषा कर्त्र्या चेदिभूपतिं प्रपेदे प्राप्त, तं शिश्रायेति योगः। कामिन्यः प्रायेण साहजिक्यः सपत्नीमन्यमसहमानाः सद्यः पुरुषान्तरमाश्रयन्ते इति भावः। किल-मिदं प्रद्युम्नं दृष्ट्वा चैद्यश्चुकोपेत्यर्थः ॥ २४ ॥

अहितानिति। मानी अभिमानवान् स चैद्यः वल्गन्तः प्लव-मानाः कलभसमाः करभप्रायाः करटप्रग्रीवा उच्चास्तुरङ्गा यस्यां तया वल्गत्कलभसमानीचतुरङ्गया। चतुरङ्गाणि हस्त्यादीनि यस्याः

भूरि तलापतत्तस्मादुत्पपात दिवं यशः ॥ २० ॥
सोढुन्तस्य द्विपोनालमपयोधरवारणम्।
अगुणैनाव यशश्च द्यामपयोधरवारणम् ॥ २१ ॥
केशप्रचुरलोकस्य पर्य्यस्कारि विकासिना।
शेखरेणेव युद्धस्य शिरः कुसुमलक्ष्मणा ॥ २२ ॥

कागुणयुक्तं दिवमन्तरिक्षं प्रति उत्पपात। अत्र द्रवद्रव्ययोः कुसुमय शोभ्यामन्योऽन्योपकारजननादन्योऽन्या लङ्कारः। परस्पर क्रियाजन नेऽन्योऽन्य मति लक्षणात् ॥ २० ॥

सोढुमिति। अपगताभयाभिहत्तायोधाना रथा शिवनादा यस्मिं न्ने अपयोधरवा द्विपः मत्तः तस्य काष्णे रण सोढु नालमशक्तः। अ तएव यशश्च अविद्यमानः पयोधराणां वारणा मेघप्रतिघातो यस्य तत अपयोधरवारणं यत् द्यामगुणैनाव मेघ मण्डल उल्लङ्घ्य स्वर्गमाक्राट यामासेत्यर्थः। जसोतेर्लिट्। अजादेर्द्वितीयस्येति द्वितीयस्याचोद्वि भाव। शुवङ्गावादाभ्युणिषेधः। यमकशाब्दार्थेऽलङ्क कात्यानुयो र्संसृष्टिः ॥ २१ ॥

केशेति। विकासिना विविधमार्गचारिणा विकस्वरेण च कुसुम लक्ष्मणा पुष्पकेतुना प्रद्युम्नेन अन्यत्र कुसुमचिह्नेन तज्जवनेत्यर्थः। कश्चवत्प्रचुरा प्रभूता लोकाः जनाः यस्मिन् तस्य युद्धस्य शिरोऽग्रभूमि रन्यत्र केशैः प्रचुरस्य केशाढ्यस्य लोकस्य जनस्य शिरः मूर्द्धा शेखरेणापी डेनेव शिखामाल्येनेवेत्यर्थः। शिखास्वापीडशेखरावित्यमरः। पर्य्य स्कारि परिष्कृत भूषितमित्यर्थः। परिपूर्वात्करोतेः कर्म्मणि लिट् सम्प र्य्युपेभ्यः करोतौ भूषण इति सुडागम अडभ्यासव्यवायेऽपीति नियमा त्परिनिविभ्यः इत्यादिना षत्वं सिवादीनां वाड्व्यवायेऽपीति विकल्प। उपमा ॥ २२ ॥

सादरं युध्यमानापि तेनान्यनरसादरम् ।
सा दरस्पृतनानिन्ये हीयमाना रसादरम् ॥ २३ ॥
इत्यालिङ्गितमालोक्य जयलक्ष्म्या झषध्वजम् ।
क्रुद्धयेव क्रुधा सद्यः प्रपेदे चेदिभूपतिः ॥ २४ ॥
अहितानभि वाहिन्या स मानी चतुरङ्गया ।
चचाल वल्गत्कलभसमानीचतुरङ्गया ॥ २५ ॥

सादरमिति । सादरं साभिनिवेशं युद्ध्यमानापि सम्प्रहरन्त्यपि अरं शीघ्रं हठादिति यावत् रसात् रणे रागात् हीयमाना [illegible] प्रद्युम्नमहिम्नेति भावः । अतएवात्र विरोधाभासोऽलङ्कारः । जहातेः कर्मणि यक् शानजादेशः । सा पृतना चैद्यस्य सेना तेन प्रद्युम्नेन अन्येषां तटस्थानामपि नराणां सादं निश्चेष्टतां राति ददातीति अन्यनरसादरम् । आतोऽनुपसर्गे कः इति कप्रत्ययः । दरं भयं दरोऽस्त्रियां भये श्वभ्रे इत्यमरः । निन्ये नीता । नयतेः प्रधाने कर्मणि लिट् । प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणामिति वचनात् । विरोधाभासयमकयोः संसृष्टिः ॥ २३ ॥

इतीति । इतीत्थं जयलक्ष्म्या आलिङ्गितं झषध्वजं मकरकेतुं प्रद्युम्नम् । झषो मत्स्ये इत्यमरः । आलोक्य चैद्यः [illegible] सपत्न्यालिङ्गनात्कोपितयेवेत्युत्प्रेक्षा । क्रुधा [illegible] चेदिभूपतिं प्रपेदे प्राप्तः तं [illegible] भावः । [illegible] सद्यः पुरुषान्तरमाश्रयन्त इति भावः । [illegible] ॥ २४ ॥

अहितानिति । मानी अभिमानवान् स चैद्यः । [illegible]

॥ श्लोकप्रतिलोमयमकम् ॥

अभग्नवृत्ताः प्रसभादाकृष्टा यौवनोद्धतैः ।
चक्रन्दुरुच्चकैर्मुष्टिग्राह्यमध्या धनुर्लताः ॥ २५ ॥
करेणुः प्रस्थितोऽनेकरेणुर्घण्टाः सदस्वनः ।
करेऽणुः शीकरोऽनघ्ने रेणुस्तेन शमं ययौ ॥ २६ ॥

याः तमोमोह भजे क्षोभाय्याजनीत्यर्थः । अत्र प्रातिलोम्येन पूर्व-
श्लोकावृत्तेः श्लोकप्रतिलोमयमकम् । तदुक्तं दण्डिना । आवृत्तिः प्राति
लोम्येन पादार्धश्लोकगोचरा यमकं प्रतिलोमत्वात् प्रतिलोममिति स्म
र्यते ॥ २४ ॥

अभग्नेति । अभग्ना अभङ्गुराः वृत्ताः वर्तुलाकाराः याः ताः अभग्नवृत्ताः ।
विशेषणसमासः । अन्यत्राचलितचरित्राः । वृत्तमाचारे । मुष्टिग्राह्यमध्याः मु-
ष्टिग्राह्यं मध्यं यासां ताः धनुर्लताः अन्यत्र मुष्टिमेयमध्याः यौव
नेनोद्धतैर्दृप्तैरिव प्रसभाद्बलादाकृष्टाः अत्र एकत्र गुणेष्वन्यत्र कचेषु
चेति भावः । उच्चैस्तरां चक्रन्दुः टङ्कारध्वनिं चक्रुर्धनुर्लता अन्यत्र चु-
क्रुशुः । अत्र प्रस्तुतधनुर्लताविशेषणादप्रस्तुतधूर्ताक्रन्दितपतिव्रताप्र-
तीतेः समासोक्तिः तथा च आकर्षणस्य विप्रलम्भतया क्रन्दनहेतुत्वात्
काव्यलिङ्गमङ्गाङ्गिभावेन सङ्कीर्यते ॥ २५ ॥

करेणुरिति । अनेकोऽबहुः करेणुः करेणवः प्रस्थिताः । जातावेक
वचनम् । प्रचलिताः करिणो योद्धुं ययुरित्यर्थः । करेणुरिभ्यां स्त्री
नेभे इत्यमरः । घण्टाः सदस्वना घण्टाः करिकण्ठस्था रेणुर्दध्वनुः । अतएव घ
नत्वमध्येऽनादेशादेर्लिटीत्येत्वाभ्यासलोपौ । करे पुष्करे अणुरल्पः शीक
रोऽम्बुकणोऽजनि । जातावेकवचनम् । करेष्वणवः शीकरा जाता इत्यर्थः ।
जने कर्तरि लिट् । तेनाधुना शीकरेण रेणुः रजः शमं ययौ ।
एतेन करिणां बाहुल्यं व्यज्यते ॥ २६ ॥

घृतप्रत्यग्रशृङ्गाररसरागैरपि द्विपैः ।
सरोषसम्भ्रमैर्बभ्रे रौद्र एव रणे रसः ॥ २७ ॥
न तस्थौ भर्तृतः प्राप्तमानसम्प्रतिपत्तिषु ।
रणैकसर्गेषु भयं मानसं प्रति पत्तिषु ॥ २८ ॥
बाणाहिपूर्णतूणीरकोटरैर्धन्विशाखिभिः ।
गोधाश्लिष्टभुजाशाखैरभूद्भीमा रणाटवी ॥ २९ ॥

घृतेति । घृतः प्रत्यग्रः शृङ्गाररस एव रागो यैस्तैरपीति विरोधः रौद्रशृङ्गारयोर्विरोधित्वात् घृतसिन्दूररञ्जनैरित्य विरोधः । अतएव विरोधाभासोऽलङ्कारः । शृङ्गारः सुरते नाट्ये रसे च गजमण्डने । शृङ्गारं चूर्णसिन्दूरे लवङ्गकुसुमेऽपि चेति विश्वः । सरोषसम्भ्रमैः द्विपैः रणे रौद्ररस एव क्रोधरस एव बभ्रे भृतः । कर्मणि लिट् ॥ २७ ॥

नेति । भर्तृतः स्वामिभ्यः प्राप्ते मानसम्प्रतिपत्ती पूजासौमनस्ये येषु तेषु प्राप्तमानसम्प्रतिपत्तिषु रणे एकसर्गेषु नियतोत्साहेषु नियतनिश्चयेषु वा । सर्गस्तु स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु इति वैजयन्ती । पत्तिषु पदातिषु मानसम्प्रति पत्तीनां मानसेष्वित्यर्थः । कर्मप्रवचनीययुक्ते द्वितीया । भयं न तस्थौ पूर्वमपि कारस्कारविघोर-धाय निर्भीकाः प्रागिवेत्यर्थः । अन्यथा यस्तु भीतिपराङ्मुखः सङ्ग्रामे हन्यते परैः । भर्तुर्यद्दुष्कृतं किञ्चित्तत्सर्वं प्रतिपद्यते । यदस्य सुकृतं किञ्चिदमुत्रार्थमुपार्जितम् । भर्ता तत्सर्वमादत्ते पराङ्मुखहतस्य तु इति निषेधकरणादिति भावः । अत्र मानसम्प्रतिपत्तिरिति विशेषणगत्या भयाभावस्य हेतुत्वात्पदार्थहेतुकं काव्यलिङ्गं यमकेन संसृज्यते ॥ २८ ॥

बाणेति । रणमेवाटवी रणाटवी बाणैरहिभिः पूर्णाः तूणीरा-निषङ्गा एव कोटराः कुहराणि येषां तैः गोधाश्लिष्टानि निबद्धानि । गोधा तले निबद्धायामिति विश्वः । तलं ज्याघात वारणम् । सर्वो-

नानाजावदन्नानाना सा जनौघघनौजसा।
परानिहङ्गहानिराप नान्वियातनयाऽन्विता ॥ ४० ॥

प्रतिलोमानुलोमपादः।

विषमं सर्वतोभद्रचक्रगोमूत्रिकादिभिः।
श्लोकैरिव महाकाव्यं व्यूहैस्तदभवद्बलम् ॥ ४१ ॥

संहत्या सात्वतान्चैद्यमति भास्वरसेनया।
ववले योद्धुमुत्पन्नप्रतिभा स्वरसेनया ॥ ४२ ॥

योधा इव योधा इति विग्रहवाक्यम्। ताभिराहिताः सुभटा इव [illegible] दैत्यैर्भिन्नहृदयैरेव [illegible] बभूव। समस्त[illegible] ॥ ३९ ॥

नानेति। उदारां नानाविधायां आजौ चित्रयुद्धे ओजसा ते-
जसा [illegible] इयती। [illegible]। जनौ-
घेन [illegible] जनौघघना बहुजनैर्व्याप्ता। [illegible]
[illegible] इत्यमरः। [illegible] इत्यमरः। सा
चैद्यसेना [illegible] नाम नाम। अत्र प्रतिपादं पादार्ध-
[illegible] ॥ ४० ॥

विषममिति। तद्बलं चैद्यसेना सर्वतोभद्रचक्रगोमूत्रिकादिभिः श्लो-
[illegible] श्लोकैर्महाकाव्यं शिशुपालवधादि-
[illegible] व्यूहैः सर्वतोभद्रादिभिरेव [illegible]। व्यूहस्तु बलविन्यास इ-
त्यमरः। विषमं दुरवगाहमभवत्। [illegible] बन्ध-
[illegible] ॥ ४१ ॥

संहत्येति। भास्वरा तेजस्विनी [illegible] भास्वरसेनया सा-
[illegible] मति [illegible] प्रचेले। [illegible]
[illegible]

त्रिस्रोतसमायामवती लोललोकनिरन्तरा ।
नरेन्द्रमार्गं रथ्येव पपात द्विषतां बलम् ॥ ४३ ॥
वारणागगभीरा सा साराऽभीगगणारवा ।
कारितारिवधा सेना नासेधा वारितारिका ॥४४॥

युग्मम् ।

अधिनागस्य जविनो विकर्षत्यिच्छचारवः ।

प्रतिषेधः । या यदूनां संहतिः सारेण स्वभावेन योद्धृत्वमप्रतिमा अज्ञातप्रतिमा वा सैव रथसङ्कुला सा पराहूता कथं निवर्तेत इति भावः ॥ ४२ ॥

अथ यदुसेनायाः प्रतिपक्षाभियोगं युग्मेनाह । त्रिस्रोतसमित्यादि । आयामवती द्राघीयसी लोललोकनिरन्तरा चलज्जनसङ्कुला सा सेने- त्युत्तरश्लोकेनान्वयः । सा यदुसेना त्रिस्रोतसं द्विषतां बलं नरेन्द्रमार्गं राजपथं रथ्या विशिखेव पपात जगाम । उपमानेऽपि विशेषणं योज्यम् ॥ ४३ ॥

वारणेति । कीदृशी सेना वारणैरेवागैरचलैर्गभीरा दुरवगाहा वारणागगभीरा सा साराणां श्रेष्ठानां न भियं गच्छन्तीत्यभीगानां निर्भीकानां गणानां जन्तुसङ्घानामारवो यस्यां सा सारा भीगगणा- रवा कारितारिवधा कृतशत्रुवधा । रामो राज्यमकारयदितिवदत्र स्वार्थे णिच् । नास्त्यासेधः प्रतिषेधो यस्यां सा नासेधा नञर्थेन नशब्देन बहुव्रीहिः । अनासेधा वा वारितारिका ईप्सितशत्रुका अनेनाहं योत्स्ये इति स्वयं वृतप्रतिभटेत्यर्थः । यौगिकः कप्प्रत्ययः । सा सेना पपातेति पूर्वेणान्वयः । अत्र प्रातिलोम्येन अर्द्धप्रतिलोमयमकमेतत् यदलं- कारं निध्नदित्यादिश्लोकार्धं तल्लोमयमके ॥ ४४ ॥

अधीति । मदस्रवन्तीति प्रजविनोऽतिजवनाः प्रजोरिनिरिति इनि-

पेतुर्बर्हिणदेशीयाः शङ्कवः प्राणहारिणः ॥ ४५ ॥
प्र वृ त्ते वि क स द्वा नं सा ध ने ध्य वि पा दि भिः
व पु पे वि क स द्दा नं यु ध मा प्य वि पा णि भिः॥४६॥
पुरः प्रयुक्तैर्युद्धान्तश्चलितैर्लब्धशुद्धिभिः ।
आलापैरिव गान्धर्वमदीप्यत पदातिभिः ॥ ४७ ॥
केनचित्स्वासिनान्येषां मण्डलाग्रानवद्यता ।

प्रत्यय") विकसद्भिः पिच्छैः कलापैरिव । अतएव ईषदसमाप्तबर्हिण-देशीया मयूरकल्पाः । ईषदसमाप्तावित्यादिना देशीयर्प्रत्ययः । प्राणहा-रिणः शङ्कवः शल्यायुधानि । ना पुंसि शल्यं शङ्कुर्ना इत्यमरः । भागेष्वधिनागम् । विभक्त्यर्थेऽव्ययीभावः । गजेषु वर्मसु च निपेतुः वर्मसु बर्हिणा इवेत्यर्थः । अतएवोपमालङ्कारः । शङ्कोपाहिगजा-भागा इति वैजयन्ती ॥ ४५ ॥ —

प्रवृत्त इति । विकसन् जृम्भमाणो ध्वानो ध्वनिर्यस्मिन् तदा या तथा साधने सम्प्रहारे प्रवृत्ते ऽध्यविषादिभिर्विषादरहितैर्विषाणिभिर्दन्तिभि-र्युधं आप्य प्राप्य विकसद्भूतं दानं मदोवपुषे । युद्धारम्भे प्रमदा-मद इत्यन्यते सत्त्वसम्पन्नत्वात् साधनेऽपि अविषादस्य विरोधाद्विरोधा-भासः । गोमूत्रिकाचित्रबन्धोऽयम् । वर्णानामेकरूपत्वं यद्येकान्तरम-र्धयोः । गोमूत्रिकेति तत्प्राहुर्दुष्करं तद्विदो विदुरिति लक्षणात् । यो ऽयमेकोऽन्तरे पङ्क्तिद्वयेऽर्धद्वयं क्रमेण लिखित्वैकान्तरविनिमयेन वाचने श्लोकनिष्पत्तिरित्यलङ्कारः ॥ ४६ ॥

पुर इति । तत्युद्ध पुरः प्रयुक्तैः गजादिभ्यः प्राक्प्रवर्त्तितैः । अन्यत्र गानात्पूर्वं सञ्चारितैः चलितैः मण्डलचारिभिः अन्यत्र कुङ्-रावर्त्तितैरित्यर्थः लब्धशुद्धिभिः कातर्यकपटादिदोषरहितैरित्यर्थः अन्यत्राप्तैस्तरागानुगुणैरित्यर्थः पदातिभिः पत्तिभिः करणैः गान्धर्व [illegible] रिवाचरविषैरिवादीप्यताशोभत ॥ ४७ ॥

प्रापे कीर्त्तिस्रुतमहीमण्डलाग्राऽनवद्यता ॥ ४८ ॥
विहन्तुं विद्विषस्तीक्ष्णः सममेव सुसंहतैः ।
परिवारात्पृथक्चक्रे खड्गश्चात्मा च केनचित् ४९
अन्येन विदधेऽरीणामतिमात्रा विलासिना ।
उद्गूर्णेन चमूस्तूर्णमतिमात्राविलाऽसिना ॥ ५० ॥
सहस्रपूरणः कश्चिल्लूनमूर्द्धाऽसिना द्विपः ।

केनचिदिति । स्वासिना स्वखड्गेन अन्येषां मण्डलाग्रान् अवद्यता खण्डयता । द्यतेर्लटः शत्रादेशः । केनचिद्वीरेण कीर्त्तिस्रुतं यथो-व्याप्तं महीमण्डलाग्रं भूपृष्ठं यया सा कीर्त्तिस्रुतमहीमण्डलाग्रा अनवद्यता अनिन्द्यता प्रापे प्राप्ता ॥ ४८ ॥

विहन्तुमिति । केनचिद्वीरेण विद्विषो विहन्तुं तीक्ष्णो निशितः परि-च्छेत्ता च खड्गः सुसंहतैः सुघटितानां दृढं सक्तैर्भृतैश्च परिवारात्कोशात् परिजनाच्च । परिवारः परिजने खड्गकोशे च इति विश्वः । सममेव पृथक् चक्रे उद्धृतः । आत्मा च पृथक् चक्रे विभक्तः । खड्ग-मुद्धृत्य सैन्याद्विर्गत्यारिमध्ये पपातेत्यर्थः । अत्र खड्गात्मनोः प्रकृतयोः समानक्रियायोगात् केवलप्रकृतास्पदा तुल्ययोगिता ॥ ४९ ॥

अन्येनेति अन्येन वीरेण विलासिना विलासशीलेन उद्गूर्णेन उद्य-तेन असिना खड्गेन मात्रं मानमतिक्रान्ताऽतिमात्रा अपरिमिता अ-रीणां चमूः सेना तूर्णं शीघ्रम् अतिमात्रमत्यन्तमाविला कलुषा अति-मात्राविला अत्याविला विदधे कृता ॥ ५० ॥

सहस्रेति । पूरयतीति पूरणः । पूरयतेः कर्त्तरि ल्युट् । सहस्राणां पूरणः सहस्रसंख्यायाः पूरयिता वा सहस्रपूरणः सहस्रतमो सह-स्रतमा वा कश्चिद्भटः । अन्यस्तु सहस्रपूरणः सहस्रसंख्यापूरकः सहस्र-मारैकः कबन्धो नृत्यतीति प्रसिद्धिः । असिना खड्गेन द्विषो लूनमूर्द्धा लूनमस्तकः । आविष्टोऽपि गतकातात्मभावः । अन्यस्तु द्विषोऽसिना

वपुषामश्यापातादिमानामभितोऽगलत् ॥ ६८ ॥

॥ असंयोगः ॥

रणाङ्गणं सर इव प्लावितं मदवारिभिः ।
गजः पृथुकराकृष्टशतपत्रमलोडयत् ॥ ६९ ॥
शरक्षते गजे भृङ्गैः सविषादि विषादिनि ।
कृतव्याजेन रुदितन्त्वासीदतिसीदति ॥ ७० ॥
अन्तकस्य पृथौ तत्र शयनीय इवाहवे ।

छेतो मिथोनिपीडनादिव वस्त्रादिनिपीडनादिवेत्युत्प्रेक्षा । अनारतम-
श्रान्तं दानतोयमभितोऽगलत् वस्त्रवत् निर्ह्रिया पातेऽपि मदातिरेक इति
गजानामुत्साहातिशयोक्तिः । अत्र संयोगाभावादसंयोगचित्रभेदः ।
श्लोकोऽनन्तरश्च संयोगः ॥ ६८ ॥

रणेति । गजो मदवारिभिः प्लावितमुक्षितं रणाङ्गणं सर इव पृथुना
करेणाकृष्टानि शतपत्राणि अमितवाहनानि अन्यत्र कुशेशयानि च
यस्मिन् कर्मणि तद्यथा रणाङ्गणमलोडयत् अपाक्षोभयत् । श्लेषविशेषणो-
पमालङ्कारः ॥ ६९ ॥

शरक्षते इति । गजे शरेण क्षते भङ्गे अतएव विषादिना विषादवता
विषादिना यन्त्रा सह वर्त्तते इति तस्मिन् सविषादि विषादिनि तत्र रणे
अतिसीदति अतिशयं यति क्षते सतीत्यर्थः । षदेकैः षट्पदैरेव भृङ्गैः
कर्तृभिः । न लोकैर्ग्रादिना पश्चो मतिषेध । कृतव्याजेन कृतच्छलेन
रुदितं रोदनमाधीय । स्वाश्रयनाशदुःखाद्रोदनं कृतमिवेत्युत्प्रेक्षा
व्यञ्जकाप्रयोगाद्गम्या । सा च कृतव्याजेनेत्यपह्नवपूर्व्वं कल्पितमपह्नवेति
सङ्कीर्णालङ्कारः ॥ ७० ॥

अन्तकस्येति । अन्तकस्य मृत्योः सम्बन्धिनि शेतेऽस्मिन्निति शयनीये
तल्पसदृशे स्थितमित्यर्थः । कृत्यल्युटोबहुलमित्यधिकरणेऽनीयर् । पृथौ
विपुले तत्राहवे मतङ्गजाः दन्तश्चमाद्विषाणभङ्गहेतोः सतुकर्णतमीयुः

दशनव्यसनादीयुर्मत्कुणत्वमतङ्गजाः ॥ ७१ ॥

अ	भी	क	म	ति	के	ने	द्धे
भी	ता	न	न्द	स्य	ना	श	ने ।
क	न	त्स	का	म	से	ना	के
म	न्द	का	म	क	म	स्य	ति ॥७२॥

॥ अर्द्धभ्रमकः ॥

दधतोऽपि रणे भीममभीरुणभावमासुरम् ।
हताः परैरभिमुखाः सुरभूयमुपाययुः ॥ ७३ ॥

मत्कुणादव इत्यर्थः । कुमारस्तु मायिनः अट्टाश्रयाः कीटविशेषा मत्कुणाः । कालेऽप्यजातदन्ते च गजाजन्तौ च मत्कुणः । तत्काट-श्मश्रुदन्तौ तथा स्वल्पमक्रं अन्तःकस्य शयनीय इत्येतत्रतुर्भेदाणामेवमिति शङ्करः ॥ ७१ ॥

अथ युग्मेनाह । अभीकेत्यादि । अभीका निर्भीका मतिर्यस्य तेनाभीकमतिकेन निर्भयचित्तेन । शैषिकः कप्प्रत्ययः । इद्धे दीप्ते । भीतानामानन्दस्य नाशने । नन्द्यादित्वात्कर्त्तरि ल्युट् । कनन्ती दीप्यमाना सकामा विजयिष्णुत्सुककामा सेना यस्य तस्मिन् कनत्सकाम-सेनाके । पूर्ववत्कप् । मन्दकाममकं मन्दोत्साहम् । पूर्ववदेव कप् । अस्यति निराकुर्वाणे रणे इत्युत्तरेण सम्बन्धः । अत्र सर्वतो भद्रस्य सर्वपादभ्रमणाभावात्तदाईतामिव भ्रमपादार्द्धभ्रमकम् । उद्धारस्तु सर्वतोभद्रस्य स्यादेव ॥ ७२ ॥

दधत इति । रणे पूर्वोक्तप्रकारे अभीरुणमत्यन्तं भीमं भयङ्करं आसुरमसुरसम्बन्धिनं भावं पुरुषकारलक्षणम् । भावो लीलाक्रिया-चेष्टाभूत्यभिप्रायजन्तुषु इति वैजयन्ती । आसुरत्वाच्च दधतः दधाना अपि परैः शत्रुभिः अभिमुखा एव स्थिताः हताः वीरा इति शेषः सुर-

॥ युग्मम् ॥

येनाङ्गमूहे प्रणवत्सरुचा परतोमरैः ।
समत्वं स ययौ खड्गत्सरुचापरतोऽमरैः ॥ ७४ ॥
निपातितसुहृत्स्वामिपितृव्यभ्रातृमातुलम् ।
पाणिनीयमिवालोकि धीरैस्तत्समराजिरम् ॥ ७५ ॥

एव सुराणां भावं सुरभूयं सुरत्वं देवत्वमुपाययुः । स्वर्गं याताः स्म-राङ्गणा इति स्वरूपादिति भावः । भुवोभावे इति क्यप् । अत्रासु-रभावेऽपि सुरभूय मुपाययुरिति विरोधस्य भावशब्दस्यार्थान्तरत्वेन परि-हारात् विरोधाभासः ॥ ७३ ॥

येनाङ्गमिति । रुचा सह वर्तते यस्तेन सरुचा तेजस्विना येन वीरेण परतोमरैः शत्रुशस्त्रैः व्रणवत्सव्रणमङ्गमूहे ऊढम् । वहेः क-र्मणि लिट् सम्प्रसारणम् । खड्गत्सरौ खड्गमुष्टौ चापे च रतः खड्गत्सरुचापरतः खड्गेषु प्रहारेषु युद्धं कुर्वन्नित्यर्थः । त्सरुः खड्गादिमुष्टौ स्यादित्यमरः । स वीरोऽमरैः समत्वं ययौ पौरुषे-णेति भावः । उपमायमकयोः संसृष्टिः ॥ ७४ ॥

निपातितेति । निपातितास्त्र वीरयुद्धाक्रमिताः सुहृदादयो यत्र तत्त-थोक्तम् । अभिमुखवन्धोरपि रणे वध्यत्वादिति भावः । अन्यत्र निपा-तिताः लक्षणाभावे शब्दसाधुत्वाय सूत्रकृता स्वस्वरूपेणो च्चारिता सुहृ-दादिशब्दा यत्र तदित्यर्थः । अतएव तत्समराजिरं रणाङ्गणम् । पाणिनिना प्रोक्तं पाणिनीयं अष्टाध्यायीव्याकरणमिव । तेन प्रोक्तमिति छः प्रत्ययः । धीरैर्धैर्यैरेवालोकि दृष्टम् । उभयत्रापि धीरैर्द्रष्टव्यत्वादिति भावः । शोभनं हृदयं यस्य स सुहृत् । सुहृद्दुर्हृदौ मित्रामित्रयोरिति हृद-यशब्दस्य हृद्भावो निपातितः । स्वमस्यास्तीति स्वामी ईश्वरः । स्वामिन्नै-श्वर्ये इति मत्वर्थीय निपातः । पितुर्भ्राता पितृव्यः स्यान्मातुर्भ्राता तु मा-तुल इत्यमरः । पितृव्यमातुलमातामहपितामहाः इति व्यड्डुलजन्तनि-पाताः । बिभर्तीति भ्राता । नप्तृनेष्ट्रादिसूत्रादौणादिको निपातः ॥ ७५ ॥

अभावि सिन्ध्वा सन्ध्याभ्रसदृग्रुधिरतोयया।
हृते योद्धुं जनः पांशौ स दृग्रुधि रतो यया ॥७६॥
विदलत्पुष्कराकीर्णाः पतत्कङ्ककुलाकुलाः।
तरत्पत्ररथा नद्यः प्रासर्पन्रक्तवारिजाः ॥ ७७ ॥
असृग्जनोऽस्त्रक्षतिमानवमज्जवसादनम्।
रक्षःपिशाचं मुमुदे नवमज्जवसादनम् ॥ ७८ ॥
चितज्यापैरपेतज्यैः स्फुरद्रक्तशतह्रदम्।

अभावीति। सन्ध्याभ्रसदृक् सन्ध्यामेघसदृशं रुधिरमेव तोयं यस्यास्तया सिन्ध्वा रक्तनद्या अभावि भूतम्। भावे लुङि चिण्। यया सिन्ध्वा दृशोरुधद्धीति दृगुधि दृष्टिरोधके। रुधेः क्विप्। पांशौ रजसि हृते सति स जनो वीरलोको योद्धुं रतः सतृष्णः अभूदिति शेषः। उपमायमकयोः संसृष्टिः॥ ७६॥

विदलदिति। विदलद्भिर्विदीर्यमाणैः पुष्करैः करिहस्ताग्रैः अन्यत्र विकसद्भिः पद्मैराकीर्णाः व्याप्ताः। पतद्भिः कङ्ककुलैः नेत्राटाम्भि-घट्टैः कम्बुसङ्घैराकुलाः। तरन्ति प्लवमानानि पत्राणि वाहनानि रथाश्च अन्यत्र पत्ररथा अण्डजा यासु ताः रक्तवारिजा रुधिरतोयजन्याः अन्यत्र रक्तानि वारिजानि यासु ताः नद्यः प्रासर्पन् प्रावहन्। अत्र नदीनां रक्तनदीनां च श्लेषः॥ ७७॥

असृगिति। असृक्क्षतिमान् असृक्प्रहारजान् जनो वीरजनोऽसृक्पङ्कं लवणादनं नवस्य मेदोवेगस्य सादनं सादकं यथा स्यात्तथा अश्नन् नवयोर्मज्जवसयोर्मेदोरसयोरदनं भक्षकम्। कर्तरि ल्युट्। रक्षांसि च पिशाचाश्च रक्षःपिशाचम्। समाहारे द्वन्द्व एकवद्भावः। मुमुदे जहर्ष। अत्र मोदस्य ★ हेतुत्वात् काव्यलिङ्गं तच्च यमकेन संसृज्यते॥ ७८॥

चितज्यमिति। अपेतज्यैरपगतमौर्वीकैः। मौर्वी ज्या शिञ्जिनी गुण

पयोदजालमिव तद्वीराशंसनमाबभौ ॥ ७९ ॥
बन्धौ विपन्नेऽनेकेन नरेणेह तदन्तिके ।
अमोचि सैन्ये घण्टाभिर्न रेणेह तदन्तिके ॥ ८० ॥
क्षतैः कीर्णा मही रेजे दन्तैर्गात्रैश्च दन्तिनाम् ।
क्षुण्णलोकासुभिर्मृत्योर्मुसलोलूखलैरिव ॥ ८१ ॥
युद्धमित्थं विधूतान्यमानवानभियोगतः ।
चैद्यः परान्पराजिग्ये मानवानभियोगतः ॥ ८२ ॥

इत्यमरः । चार्मैश्चित्रं विचित्रं स्फुरन्ति रक्तान्येव शतह्रदाः शम्पा यस्मिन् तत् । शम्पा शतह्रदा ह्रादिनीत्यमरः । तत्प्रकृतं वीराः आशंसन्ते अत्रेति वीराशंसनं भयद्रुता युद्धभूमिः सा वीराशंसनं युद्धभूमिर्यातिभयप्रदेत्यमरः । पयोदजालमिवाबभौ ॥ ७९ ॥

बन्धाविति । इह सैन्ये बन्धौ विपन्ने मृते सति अनेकेन नरेण अनेकैर्नरैरित्यर्थः । जात्यावेकवचनम् । तदन्तिके तस्य मृतस्य बन्धोरन्तिके अमोचि किन्तु हता दन्तिनो यत्र तस्मिन् हतदन्तिके सैन्ये घण्टाभिर्न रेणे न दध्वने । रणतेर्भावे लिट् । अत्र हतदन्तिके इति विशेषणगत्या घण्टानामरणनहेतुत्वात्पदार्थहेतुकं काव्यलिङ्गं यमकेन संसृज्यते ॥ ८० ॥

क्षतैरिति । क्षतैः छिन्नैः दन्तिनां दन्तैर्गात्रैश्च कीर्णा मही रणभूमिः क्षुण्णाः पिष्टाः लोकासवो जनप्राणा यैस्तैः मृत्योर्मुसलोलूखलैः कीर्णेव रेजे । अयोऽग्रं मुसलोऽस्त्री स्यादुलूखलमित्यमरः । अत्र मुसलोलूखलैरिति राजदन्तादिपाठेऽपि सर्वकुलाभ्रेत्यादिस्त्रेणादेव अभिचारत्वामकात्परनिपातव्यत्ययः ॥ ८१ ॥

युद्धमिति । मानवानभिमानवान् चैद्यो युद्धमित्थं प्राप्तः सन् इत्थं विधूता अभिभूता अन्ये चैद्यातिरिक्ता मानवा यैस्तान् । विधूतान्यमान-

अथ वक्षोमणिच्छायाच्छुरितपीतवाससा ।
स्फुरदिन्द्रधनुर्भिन्नतडितेव तडित्वता ॥ ८३ ॥
नीलेनानालनलिननिलीनोन्नललनालिना ।
ललनाललनेनालं लीलालोलेन लालिना ॥ ८४ ॥

द्व्यक्षरः ।

अपूर्वयेव तत्कालसमागमसकामया ।

वान् अभियः निर्भीकान् परान् अरीन् अभियोगतोऽभि योगादभ्यवरीधात् पराजिग्ये जिगायेत्यर्थः । विपराभ्यां जेरित्यात्मनेपदम् । षड्भिरष्टाभिरिति कुलकम् ॥ ८२ ॥

अथ भगवदभियोगं पञ्चभिः कुलकेनाह । अथेत्यादि । अथ चैद्यजयानन्तरं वपुषा राजन् परः पुमान् अदृश्यतेति पञ्चमेन सम्बन्धः । तद्विशेषणैश्चतुर्भिर्विशिनष्टि । वक्षोमणेः कौस्तुभस्य छायया छुरितानि व्याप्तानि पीतवासांसि पीताम्बराणि यस्य तेन । अतएव स्फुरता इन्द्रधनुषा भिन्नाः सङ्गतास्तडितो यस्य तेन तडित्वता मेघेनेव स्थितेनेत्यर्थः ॥ ८३ ॥

नीलेनेति । पुनः कीदृशेन वपुषा नीलेन श्यामलेन तथा नालं नालरहितं यन्नलिनं तस्मै निलीना आसक्ताः उन्नलन्तो लुठन्त नादन्तो वा अलयो यस्य तेन अनालनलिननिलीनोन्नललनालिना सुरभिगौरभनीलपरिमलहृष्टभ्रमरेणेत्यर्थः । ललनानां त्रिया स्त्रिणीनां स्त्रीणां लालनेन उपलालनेन वशीकरणेनेत्यर्थः । अथ मन्मनं लीलालोलेन क्रीडालोलुपेन लीलालालनेनेति पाठे लीलानां विलासानामालानेन आश्रयेणेत्यर्थः । नालयति भक्तानिति लालिना भक्तानुकम्पिनेत्यर्थः । द्व्यक्षरोऽयं नामोऽलङ्कारः ॥ ८४ ॥

अपूर्वयेति । किञ्च अपूर्वयेव अपूर्वसमागमत्वेव तत्काल समागमे सकामया साभिलाषया विजयश्रिया चैद्यविरक्तयेति भावः । कटाक्ष-

दृष्टेन राजन्वपुषा कटाक्षैर्विजयश्रिया ॥ ८५ ॥
विभावी विभवी भाभोविभाभावी विवोविभिः ।
भवाभिभावी भावावोभवाभावोभुवोविभुः ॥ ८६ ॥

द्वाक्षरः ।

उपैतुकामैस्त्वारन्निश्चितैर्योगिभिः परैः ।
देहत्यागकृतोद्योगैरदृश्यत परःपुमान् ॥ ८७ ॥

साङ्गं दृष्टेनालोकितेन वपुषा राजन् दीप्यमान । अत्र प्रस्तुतजयश्री विशेषणसाम्यात् अप्रस्तुतानुरक्तकामिनी प्रतीतेः समासोक्तिः प्रतीयमाना भेदाध्यवसायादपाङ्गदर्शनोत्प्रेक्षा च ॥ ८५ ॥

विभावीति विभावोऽस्यास्तीति विभावी प्रभावसम्पन्नः विभवोऽस्यास्तीति विभवी ऐश्वर्य्यवान् भस्याभेवाभा यस्य स भाभोनक्षत्रवदुज्ज्वल इत्यर्थः । विभा विशिष्टाभा भावयति सम्पादयति विश्वस्येति विभाभावी तस्य भासा सर्व्वमिदं विभातीति श्रुतेः । सुवोवरुन्तात् क्विप् । विना पक्षिणा याति गच्छतीति क्विप् । पक्षिवाहन इत्यर्थः । आतोऽनुपसर्गे कः । विभीर्निर्भीकः भवं संसारं अभिभवतीति भवाभिभावी भक्तानां संसारनिवर्त्तक इत्यर्थः । सुवा पानि । भावान् जन्तून् अवतीति भावावः विश्व त्राता । भावोजीवात्मनिर्दाचेष्टाभूत्यभिप्रायजन्तुषु इति वैजयन्ती । अवते कर्म्मणि अण् । भवाभावोऽस्यास्तीति संसारहीनः ईश्वर इत्यर्थः । अर्शआदित्वादच् प्रत्ययः । भुवोभूमेर्विभुर्भर्त्ता ॥ ८६ ॥

उपैतुमिति । एवम्भूतः परः पुमान् परमपुरुषो हरिः । त्वारं तस्य हरेः पारं अन्तमुपैतुकामैः जिगीषुभिः । अन्यत्र दिदृक्षुभिरित्यर्थः । तुङ्कामममनसोरपीति मकारलोपः । निश्चितैर्योगैः कृतनिश्चयैरित्यर्थः । अन्यत्र निश्चिततत्त्वैः । अकर्म्मकादपि विशेषविवक्षिते कर्म्मणि क्तः । यथा पीताम्बरं विभक्ता भ्रातरः इत्यादिवदूहायतव्य स्फुटीकृत चैतत् अध्यापयेय बर्षिकिन्नौ विदितइत्यत्र । देहत्यागकृतोद्योगैर्मरणोद्यतैः । अन्यत्र

तं श्रिया घनयाऽनस्तरुचा सारतया तया ।
यातया तरसा चारुस्तनयाऽनघया श्रितम् ॥ ८८ ॥

गतप्रत्यागतम् ।

विद्विषोऽद्विषुरुद्वीक्ष्य तथाप्यासन्निरेनसः ।
अरुच्यमपि रोगघ्नन्निसर्गादेव भेषजम् ॥ ८९ ॥

मुमुक्षुभिरित्यर्थः । योगिभिः सद्यापवर्गिभिरपायवद्भिर्वा । अन्यत्र ध्यान-वद्भिः । योगः सन्नहनोपायध्यानसङ्गतियुक्तिष्वित्यमरः । परैः शत्रुभिः । अन्यत्र परमयोगिभिः अहङ्कृत परेभ्योऽतिश्रेष्ठत्वेऽर्थं अन्यत्र साक्षात्-कृतः । तमेव विदित्वातिमृत्युमेतीति श्रुतेः । अर्थान्तरप्रतीतिर्ध्वनिरेव न श्लेष अभिधायाः प्रकृतार्थे नियन्त्रणात् ॥ ८७ ॥

युग्मेनाह । तमिति । घनया आनन्दसान्द्रया । अनस्तरुचा अनी-षत्कान्त्या । सारतया सारत्वेन सर्वोत्कर्षगुणेन यातया प्राप्तया । चारु-स्तनया रम्यकुचया । स्वाङ्गाच्चोपसर्जनादसंयोगोपधादिति विकल्पादनी-कारः । अनघया निर्दोषया तया प्रसिद्धया श्रिया रमया तरसा त्वरया श्रितमाश्लिष्टं तं हरिमुद्वीक्ष्य उत्तरेण सम्बन्धः । अत्रापि प्रतिलो-मेनाह इति श्लोकप्रतिलोमयमकम् । गतप्रत्यागतन्तु नामैवोक्तम् ॥ ८८ ॥

विद्विष इति तं पूर्वोक्तं हरिं उद्वीक्ष्य विद्विषः शत्रवः । अद्विषुः द्विषन्ति स्म । लङि द्विषश्चेति विकल्पेन जुसादेशः । तथापि द्विषन्तोऽपि निरेनसोऽनिष्पापा आसन् । ईदृशोऽयमर्थान्तरन्यासेनाह । अरुच्यमिति । रोचत इति रुच्यम् । राजसूयसूर्येत्यादिना क्यबन्तो निपातितः । अरुच्यमरोचमानमपि भेषजमौषधम् । भेषजौषधभैष-ज्यान्यगद इत्यमरः । निसर्गात् स्वभावादेव रोगं हन्तीति रोगघ्नं आरो-ग्यकारि । हरिर्हरति पापानीति वचनादिति भावः । अप्रस्तुतप्रशंसेयं

युग्मम् ।

विदितन्दिवि केऽनीके तं यातन्निर्जिताजिनि ।
विगदङ्कुविरोद्धारोयोद्धायोनतिमेति न ॥ ९० ॥

प्रतिलोमेनायमेवार्थः ।

नियुज्यमानेन पुरः कर्मण्यतिगरीयसि ।
आरोप्यमाणोरुगुणमभूत् कार्मुकमानमत् ॥९१॥

तत्र बाणाः सुपरुषः समधीयन्त चारवः ।
द्विषामभृत्सुपरुषस्तस्याह्वस्य चारवः ॥ ९२ ॥

विदितमिति । किन्तु योद्धा वीरो यो हरिः नतिं परेषां नम्रतां नैति नाप्नोति । नितरां जिता आजयो येन तस्मिन् निर्जिताजिनि अनेकाजिविजयिन्यपि अनीके सैन्ये । वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियामित्यमरः । यातं योद्धुमागतम् । दिवि स्वर्गेऽपि विदितं प्रख्यातं विगदं निरामयं तं हरिं कवि भुवि । रोद्धारो जेतारः के न केऽपीत्यर्थः । प्रातिलोम्येऽप्येतदेव पदार्थो वाक्यार्थः । एतदपि श्लोकप्रतिलोमयमकमेव पदपदार्थादि संवादस्तु वैचित्र्यविशेषः । लक्षणन्तु निरवनदित्यत्रैवोक्तमनुसन्धेयम् ॥ ९० ॥

नियुज्यमानेनेति । पुरोऽग्रे अतिगरीयसि कर्मणि स्वस्वसमर्थे अन्यत्र दुष्करे कस्मिंश्चित् कार्यवस्तुनि नियुज्यमानेन व्यापार्यमाणेन आरोपयिता च भर्त्रा स्वामिना आरोप्यमाणोऽधिश्रियमाण उरुर्महान् गुणो मौर्वी यस्मिन् तत् । अन्यत्र अधिकसौन्दर्यादिकं । कर्मणे प्रभवतीति कार्मुकं धनुः । कर्मण उकञ् । आनमत् गुणाकर्षणादाकुञ्चितकोटिकमभूत् । अन्यत्र प्रणतदनुर्थः । अत्र प्रकृत कार्मुकविशेषणसामर्थ्याद् प्रस्तुतनियोज्यपुरुषप्रतीतेः समासोक्तिः ॥ ९१ ॥

तत्रेति । तत्र कार्मुके शोभनानि परूंषि येषां ते सुपरुषः सुपर्वाणः । अतएव चारवोऽतिरम्या बाणाः समधीयन्त निहिताः आहवस्य तस्य__

पश्चात्कृतानामप्यस्य नराणामिव पत्रिणाम् ।
योयोगुणेन संयुक्तः स स कर्णान्तमाययौ ॥ ९३॥
प्रापे रूपी पुराऽरेपाः परिपूरी परःपरे ।
रोपैरपारैरुपरि पुपूरेऽपि पुरोऽपरैः ॥ ९४ ॥

॥ इ्चरः ॥

दिङ्मुखव्यापिनस्तीक्ष्णान् ह्रादिनो मर्म्मभेदिनः ।
चिक्षेपैकक्षणेनैव सायकानहितांश्च सः ॥ ९५ ॥

कार्मुकस्यारवस्य ह्रिया सह परम हृदययोर्वितर्कं मोऽभूत । यमक विशेषालङ्कारः । ९२ ॥

पश्चादिति । नराणां पुंसामिव पश्चात्कृतानां निषङ्गपङ्क्तौ तथा उपेक्षितानामपि अग्यत्वादवधीरितानामपि । पत्रिणां निषूणां मध्ये इत्यर्थः । योयः पत्री नरश्च गुणेन ज्यया दाक्षिण्यादिना च संयुक्तः स स पत्री नरश्चास्य हरेः कर्णान्तं कर्णसमीपमाययौ आगतः गुणयोगादाकर्णमाकृष्टः अन्यत्वान्निकटमागते इत्यर्थः । श्लेषसङ्कीर्णोपमा । ९३ ।

प्राप इति । पुरा पूर्वं रूपी मायावल्लोढानेकरूपवान् अरेपा निष्पापः परिपूरयति कर्मफलानीति परिपूरी भक्तवरदः । परिपूर्तेर्णिनि । परः परमपुरुषोऽप्यरिः परैः शत्रुभि प्रापे प्राप्त अवरुद्ध इत्यर्थः । अपरैरन्यैः शत्रुभिः अपारैरनन्तैः रोपैरिषुभिः पत्री रोपदष्टुर्बन्धो रित्यमरः । पुरोऽग्रे उपरि च पुपूरे पूरितः । पूर्यते कर्मणि लिट् । द्व्यक्षरानुप्रासोऽलङ्कारः । ९४ ।

दिङ्मुखेति । स हरिर्दिङ्मुखव्यापिनो दिगन्तव्यापकान् । अति तीक्ष्णान् निशितान् शूरांश्च । ह्रादन्ते इति ह्रादिनः शब्दायमानान् चिक्कणादयतश्च । मर्मभेदिनो मर्मस्थानविदारकान् सायकानहितान् शत्रूंश्च एकक्षणेनैव चिक्षेप निरास । अत्र सायकानां अहितानां

शरवर्षी महानादः स्फुरत्कार्मुककेतनः ।
नीलच्छविरसौ रेजे केशवच्छलनीरदः ॥ ९६ ॥

॥ गूढचतुर्थः ॥

न केवलं जनैस्तस्य लघुसन्धायिनो धनुः ।
मण्डलीकृतमेकान्ताद्बलमैक्षि द्विषामपि ॥ ९७ ॥
लोकालोकी कलोऽकल्ककलिलोऽलिकुलालकः ।
कालोऽकालोऽकलिः काले कोलकेलिकिलः किल ९८

च प्रकृतानामेव तुल्यधर्मयोगादौपम्योपगमात्तुल्ययोगिताभेदः ॥ ९५ ॥

शरेति । शरवर्षी बाणवर्षी नीरवर्षी च । शरं नीरे शरो बाण इति विश्वः । महान् नादः सिंहनादो गर्जितं च यस्य स महानादः । स्फुरन्ती कार्मुककेतने धनुर्ध्वजौ यस्य सः । अन्यत्रेन्द्रचापं चिह्नमित्यर्थः । नीलच्छविः श्यामकान्तिः । अस्य केशवस्य छलं कपटं यस्य स नीरदः केशवच्छलनीरदो हरिमेघोऽसौ रेजे रथरङ्गात्प्रोतकर्षेण दिदीपे इत्यर्थः । अत्र छलशब्देन हरित्वापह्नवेन मेघत्वारोपणाच्छलादिशब्दैरसत्यत्वप्रतिपादनरूपोऽपह्नवालङ्कारः । त्रिपाद्यन्तर्गतचतुर्थपादाक्षरत्वाद् गूढचतुर्थोऽयमित्यत्र विशेषः शब्दालङ्कारश्चेति सङ्करः ॥ ९६ ॥

नेति । लघु शीघ्रं सन्धत्ते यस्तस्य लघुसन्धायिनस्तस्य हरेः धनुरेव केवलं एकान्तात् मण्डलीकृतं शीघ्राकर्षणनियमेन वलयीकृतं जनैर्नैक्षि । कर्मणि लुङ् । किन्तु द्विषां बलमपि मण्डलीकृतं त्रासादेकत्र पुञ्जीकृतमैक्षि । अत्र धनुर्बलयोः प्रकृतयोरेव तुल्यधर्मयोगात् केवलप्रकृतास्पदा तुल्ययोगिता ॥ ९७ ॥

युग्मेनाह । लोकेति । लोकानालोकते इति लोकालोकी त्रैलोक्यदर्शी कलो मधुरभाषी कल्केन पापेन दम्भेन वा कलिलो न भवतीति अकल्ककलिलः । कल्कः पापाघयोः पापे दम्भे इति विश्वः । अलिक

द्व्यक्षरः ।

अच्छिन्नाराशु विव्याध द्विषतः स तनुत्रिणः ।
दानेषु स्थूललक्ष्यत्वन्नहि तस्य शरासने ॥ ९९ ॥

युग्मम् ।

वरोऽविवरोवैरिविवारी वारिरारवः ।
विववार वरोवैरं वीरोरविरिवौर्वरः ॥ १०० ॥

सायकः अविज्ञातमौलिमूर्छित इत्यर्थः । काकोलीलक्ष्यः कोनालकोश नास्ति यस्य सोऽस्यः निरम इत्यर्थः अशक्तिरक्षकः सदम-बद्धदीन इत्यर्थः काले मलयकाले कोलकेला कदाचिदपि विहति क्षोदति कोनकेटिकिकः । किंवदन्तस्तु यस्यार्थं । विद्याधिकस्थरेण स-ख्यः । द्व्यक्षरानुष्टुप् ॥ ९८ ॥

अच्छीति । स पूर्वोक्तगुणविशिष्टो हरिः तनुत्राणि सन्ति येषां तांस्तनुत्रिणः कवचिनः । तनुत्रं वर्म दंशनमित्यमरः । तान् द्विषत स-प्तून् अच्छिन्नाराशु नैकधाऽनिधाय विव्याध प्रजहार । तथा हि तस्य हरे दानेषु वितरणेषु एव स्थूललक्ष्यत्वं विपुलविषयत्वम् । स्थूलदा-त्मस्थूललक्षदानशौण्डा बहुप्रदे इत्यमरः । शरासने धनुषि तु न स्थूल-लक्ष्यत्वमेव सूक्ष्मेऽपि लक्ष्ये विध्यत्वात् सूक्ष्मपरत्वं । अतोऽस्याक्षर-द्वयं व्यासृक्तम् ॥ ९९ ॥

वर इति । वरान् राति ददातीति वरो वरदः । राति दाने धातोऽनुप-सर्गे कः । अविवरो निश्छिद्रोऽनवद्यः । वैरिणः शत्रून् विवारयतीति वैरिविवारी । वारीव राति शब्दं करोति वारिरः । पूर्ववत् । तस्य भावो रारवः स वारिरारवः । वरः श्रेष्ठो वीरः शूरः स हरिः । उर्वरा सर्वसस्या-ढ्यभूमिः तत्र भवोऽग्निरिति स्मृतः । तस्यां भव और्वरः वाडवाग्निः रविरिव वैरं वैरिणां द्वन्द्वं विववार निवारयामास ज्वालाग्रैरिव भस्मीचकार इत्यर्थः । द्व्यक्षरानुष्टुप् ॥ १०० ॥

द्व्यक्षरः ।

मुक्तानेकशरप्राणमहरद्भूयसां द्विषाम् ।
तदीयमनुरन्यस्य न हि सेहे सजीवताम् ॥ १०१ ॥

राजराजीरुरोजाजेरजिरेऽजोऽजरोऽरजाः ।
रेजारिजूरजोर्जार्जी रराजर्जुरजर्जरः ॥ १०२ ॥

द्व्यक्षरः ।

उद्धतान्द्विषतस्तस्य निघ्नतो द्वितयं ययुः ।

मुक्तेति । मुक्तानेकशरं क्षिप्तबहुबाणम् । तस्य हरेरिदं तदीयं धनुः भूयसां द्विषां प्राणानहरत् । तथा हि अन्यस्य परस्य सजीवतां न सेहे । अथ वा अन्यस्य धनुषः सजीवतां सज्याकत्वं न सेहे । किंतु जीयते जीवः स्यान्मौर्वी ज्यौति वैजयन्ती । वाक्यार्थहेतुकं काव्यलिङ्गम् ॥ १०१ ॥

राजेति । न जायते इत्यजोऽनादिः । अन्येष्वपि दृश्यते इति जनेर्डप्रत्ययः । न जीर्यते इत्यजरः अनन्तः । पचाद्यच् । नास्ति रजो यस्येत्यरजाः रजोगुणरहितः । रेजन्तीति रेजाः तेजिष्ठाः । रेजृ दीप्तौ पचाद्यच् । ते च ते अरयश्च तेषां जूरो हिंसनं तेन जातं रेजारिजूरजम् । तदूर्जं बलं अर्जयतीति रेजारिजूरजोर्जार्जी । अर्जेर्णिनिः । ऋजुरार्जववान् । जर्जरो न भवतीति अजर्जरो दृढः स हरिः आजेरजिरे रणाङ्गणे राजराजीः राजश्रेणीः रुरोज बभञ्ज । रुज भङ्गे लिट् । अतएव रराज दिदीपे । द्व्यक्षरानुप्रासः ॥ १०२ ॥

उद्धतानिति । उद्धतान् दृप्तान् द्विषतः शत्रून् निघ्नतो हिंसतः । जासिनिप्रहणेति सूत्रे निप्रेत्यसङ्घातविपर्यस्तव्यस्तस्य ग्रहणोपदेशाद्वि- हन्तेरयेवकर्मणि द्वितीयैव । तस्य हरेः शराः । पानार्थे धातौ पा पाने इति धातौ सति रुधिरं रक्षार्थे धातौ पा रक्षणे इति भुवनं जगच्चेति द्वितयं ययुः रुधिरमपिबन् भुवनमरक्षंश्चेति श्लेषार्थः । अत्र

पानार्थे रुधिरन्त्वाती रक्षार्थे भुवनं शराः ॥ १०३ ॥
क्रूरारिकारी कोरेककारकः कारिकाकरः ।
कोरकाकारकरकः करीरः कर्करोऽर्करुक् ॥ १०४ ॥

द्व्यक्षरः ।

विधातुमवतीर्णोऽपि लघिमानमसौ भुवः ।
अनेकमरिसङ्घातमकरोद्भूमिवर्द्धनम् ॥ १०५ ॥
दारी दरदरिद्रोऽरिदारुदारोऽद्रिदूरदः ।

पानरक्षयोरभेदाध्यवसायेन रुधिर भुवनयोस्तुल्ययोगितालङ्कारः । तत्र पानार्थं इत्यादिवाक्यस्य मनु वधेन भुवनरक्षचेति इत्कार्यगर्भत्वात् सौक्ष्म्यन्नाम गुणः । तत्र वक्तृलक्षणं शब्दानां सौक्ष्म्यमुच्यत इति वचनात् ॥ १०३ ॥

अथ कुम्भेनाह । क्रूरेति । क्रूरान् अरीन् किरति विक्षिपतीति क्रूरारिकारी । किरतेर्णिनिप्रत्ययः । कोर्भूमेरेककारकः एककर्त्ता । करोतेर्ण्वुल् । कारिका यातनाः करोति दुष्टानामिति कारिकाकरः । कारिका यातनाश्चर्योरित्यमरः । कृञोहेत्वादिना ताच्छील्ये टप्रत्ययः । कारिकाः क्रियाः । धात्वर्थनिर्देशे ण्वुल् । तत्कर इति केचित् । कोरकाकारौ करौ यस्य स कोरकाकारकरकः कमलमुकुलसमपाणिरित्यर्थः । शैषिकः कप्प्रत्ययः । करिणोऽभिजातान् ईरयति क्षिपतीति करीरः । कर्मण्यण् । कर्करोऽत्र कर्कश इत्यर्थः । अर्कस्येव रुक् दीप्तिर्यस्य सोऽर्करुक् सूर्यसमप्रभः । द्व्यक्षरानुप्रासः ॥ १०४ ॥

विधातुमिति । भुवो भूमेर्लघिमानं लघुत्वं भारापहरणं विधातुमवतीर्णोऽपि इति यावत् असौ पूर्णोऽच्युतो भगवान् हरिः अनेकं बहु परिसङ्घातं भूमिवर्द्धनं भूभारमकरोत् इति विरोधः सत्यकर्तृत्वेऽर्थविरोध । तस्य विरोधाभासोऽलङ्कारः ॥ १०५ ॥

दारीति । दारी बहुदारवान् । भूमार्थे मत्वर्थीयः । दरेण

दूरादरौद्रोऽददरद्रोदोरुद्दारुदरादरी ॥ १०६ ॥
एकेषुणा सङ्घतिथान् द्विपोभिन्दन्द्रुमानिव ।
स जन्मान्तररामस्य चक्रे सदृशमात्मनः ॥ १०७ ॥
शूरः शौरिरशिशिरैराशाशैराशु राशिशः ।
शरारुः श्रीशरीरेशः शुशूरेऽरिशिरः शरैः ॥१०८॥

दरिद्रो निर्भीकः। दरोऽस्त्रिया भये श्वभ्र इत्यमरः। उदारो महान् दाता वा। 'उदारो दातृमहतोः' इत्यमरः। अद्रिवत् दुःखेन दृयते दुर्दरो दुर्भेदोऽद्रिदुर्दरः। दृङ् विदारणे खल्प्रत्ययः। अरौद्रः साधूनां सौम्यः रोदसी रुणद्धीति रोदोरुत् विश्वव्यापी। रुधेः क्विप्। ददातीति दारुर्दाता। ददातेरौणादिको रुप्रत्ययः। आदरोऽस्यास्तीति आदरी सन्मार्गादरवान् स हरिः अरीनेव दारु काष्ठमिदारु दूरादेव अददरत् दारयति स्म। दारयतेर्लुङि चङि 'अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशाम्' इत्यभ्यासस्यात्वम्। अरिदारीति रूपकमर्थालङ्कारोऽयमक्षराद्‌मासस्य ॥ १०६ ॥

एकेषुणेति। स हरिरेकेषुणा एकेनैव शरेण सङ्घाना पूरणान् सङ्घतिथान् सङ्घशः स्थितानित्यर्थः। बहुपूगगणसङ्घस्य तिथुगिति तिथुगागमादेश स्वापकादसङ्ख्यात्वेऽपि सङ्घात् डट्प्रत्ययः। द्विपः गजान् द्रुमानिवेत्युपमा। भिन्दन् विदारयन् जन्मान्तरे रामस्य दाशरथेरात्मनः सदृशं चक्रे। एकशरेणानेकारिद्रुमभेदस्तु जन्मान्तरभावनया यात इति भावः। विभेद च स सप्ततालान् स एकेन महेषुणेति रामायणे ॥ १०७ ॥

शूर इति। शृणातीति शरारुः हिंस्रः। शरारुर्घातुको हिंस्र इत्यमरः। शृवन्द्योरारुरित्यारुप्रत्ययः। श्रीशरीरयोरीशः श्रीशरीरेशः लक्ष्मीभार्यनाथः शूरो वीरः शौरिः कृष्णः अशिशिरैः तीक्ष्णैः आशाशैः दिगन्तव्यापकैः। अश्नोतेः कर्मण्यण्प्रत्ययः शरैर्बाणैः।

॥ द्व्यक्षरः ॥

व्यक्तासीदरितारीणां यत्तदीयास्तदा मुहुः ।
मनोहृतोऽपि हृदये लेगुरेषां न पत्रिणः ॥ १०९॥
नामाक्षराणाम्मलिता मा भूद्भर्त्तुरतः स्फुटम् ।
अगृह्णत पराङ्गानामघ्नन्नघ्नन् मार्गणाः ॥ ११०॥

॥ अतालव्यः ॥

आच्छिद्य योधसार्थस्य प्राणसर्व्वस्वमाशुगाः ।

अरिविट् शत्रुशिरांसि । जातावेकवचनम् । राशिभः अनुयः शाम् भीमं मृम्रूरे जघान । मूर हिंसास्तम्भनयोरिति धातोर्लिट् । द्वाच त्वाद्वयासः ॥ १०८॥

व्यक्तेति । तदा तस्मिन् समये एषां अरीणामरिता शत्रुता व्यक्ता आसीत् । यद्यस्मात्तस्य हरेरिमे तदीयाः पत्रिणो बाणाः मनोहरन्ति कायादुद्धरन्ति इति मनोहृतोमारका इत्यर्थः । हरतेः क्विप् । मनोघ्नाः प्रतीयन्ते । अतएव मनोहृतोऽपि हृदये मनसि न लेगुर्न लग्नाः इति विरोधः वक्षोनिर्भिद्य निर्जग्मुरित्यर्थः । हृदयं वक्षसि स्थाने इति विश्वः । विरोधाभासोऽलङ्कारः ॥ १०९॥

नामेति । भर्त्तुः स्वामिनो नामाक्षराणां फलेषु लिखितानां मलिनामालिन्यं तिरोधानं मा भूदिति बुद्ध्येत्यर्थः । अतः मार्गणाः हरिशराः पराङ्गानां अरिशरीराणां अघ्नन् प्राणान् अग्रहृत । घ्नेर्लङ् । माधुरत्वम् । रक्ताविलेपस्य अग्राभावनिमित्तस्य स्वामिनामाक्षरमालिन्यपरिहारार्थत्व उत्प्रेक्ष्यते स्फुटमिति । अत्र तालव्यवर्णाभावादतालव्य इति चित्रभेदः । दृश्यमानं तालिति इत्यर्थस्यापि तालुत्वेऽपि अप्राधान्यात् एवायं नियम इति न दोषः ॥ ११०॥

आच्छिद्येति । आशुगाः बाणाः योधसार्थस्य वीरवर्गस्य प्राणसर्व्वस्वं आच्छिद्य [illegible]

ऐकागारिकवद्भीतो दूराज्जग्मुरदर्शनम् ॥ १११ ॥
भीमास्त्रराजिनस्तस्य बलस्य ध्वजराजिनः ।
कृतघोराजिनश्चक्रे भुवः सरुधिराजिनः ॥ ११२ ॥
मांसव्यधोचितमुखैः प्रत्न्यतान्दधदक्रियम् ।
शकुन्तिभिः शत्रुबलं व्यापि तस्येषुभिर्नभः ॥११३
दाददोदुद्ददुद्दादी दादादोदूददीददोः ।

गारिकः चौर इत्यर्थे निपात्यते इत्यर्थे । इकट्प्रत्यये चकिच निपात्यते इत्यपरे । तैस्तुल्यमैकागारिकवत् । तत्रार्थे वतिः । दूराद्भावदर्शन-महश्यतां जग्मुः ॥ १११ ॥

भीमेति । भिमोऽरिः अस्त्राणान्याक्षा व्यपदेयः । भीमा अस्त्र-राजयो यस्य तस्य भीमास्त्रराजिनः । इकोऽचि विभक्ताविति नुमागमः । ध्वजैराजते यस्तस्य ध्वजराजिनः । ताच्छील्ये णिनिः । कृता घोरा आजिर्युद्धं येन तस्य कृतघोराजिनः । पूर्ववन्नुमागमः । तस्य बलस्य सैन्यस्य सम्बन्धिनोर्युद्धभूमेः सरुधिराः साक्षाश्चक्रे । चक्रुमादय-मकम् ॥ ११२ ॥

मांसेति । मांसव्यधो मांसखण्डनम् । व्यधजपोरनुपसर्गे इत्यप्प्रत्ययः तस्योचितानि परिचितानि मुखानि चञ्चवः मत्स्यानि च येषां तैः शकुन्तिभिः पक्षिभिः न्यूनमामचेतनत्वं अस्यत तत्र्कालमेव मूर्त्तत्वं वा दधत् अतएव अक्रियमस्पन्दं सत् बलं व्यापि व्याप्तम् । आप्नोतेः कर्मणि लुङ् । तस्य हरेरिषुभिः नभोऽव्यापि । अत्रैषु पक्षिणां नभोबलयोर्व्याप्तिः तुल्यधर्मयोगित्वात्तुल्ययोगिताभेदः ॥ ११३ ॥

* दादद इति दयते इति दादः दानम् । दद दाने इति कर्मणि घञ् । दादं ददातीति दाददो दानप्रदः । आतोऽनुपसर्गे कः । दुद्-दुद्दादी दुदु उपतापः । टुदुञ् उपतापे क्विप् । तद्दुदं उपतापं ददाति साधनामिति दुद्दा. अस्त्रः । एवं उतक. । तेषां हत उपताप

दुद्दादं ददद्दे दुद्दे ददाददददोऽददः ॥ ११४ ॥

॥ एकाक्षरः ॥

स्रुतेभकुम्भोरसिजैर्दयत तिजन्मभिः ।
प्रावर्त्तयन्नदीरस्त्रैर्द्विषान्तद्योषिताञ्ज सः ॥११५॥

ददत इति दुद्ददादी। दद दाने इति धातोर्णिनिः। दादादः। दोः शुद्धिः दैप् शोधने क्विप्। तां ददत इति दादादः। दद दाने कर्मण्यण्। दूद्दीददोः। दूः परितापः। दूञ् परितापे क्विप्। तां ददातीति दूद्दाः दुष्टाः। दी क्षयः। दीङ् क्षये क्विप्। तां दत्त इति दीदौ नाशकौ। समर्थ्यातोऽनुपसर्गे कः। दूद्दानां दीदौ दूद्दद्दौ दोषौ भुजौ यस्य सः दूद्दीद्दोः दुष्टभञ्जकभुज इत्यर्थः। ददाददददः। ददन्ते इति ददाः दातारः न ददन्ते इति अददा अदातारः तेषां द्वयानामपि ददोदाता ददाददददः। सर्वत्र दद दाने पचाद्यच्। अदन्तेऽनदा अकामुरसूतनामभ्रतय। अदः पचाद्यच्। तान् द्यति खण्डयति इति अददः। दोऽवखण्डने धातोरनुपसर्गे कः। एवम्भूतो हरिः। दुदं ददातीति दुद्दः दुःखदः तस्मिन् दुद्दे शत्रौ। दुदं ददत इति दुद्दादं शस्त्रम्। दद दाने कर्मण्यण्। ददद्दे ददौ प्रयुक्तवानित्यर्थः। दद दाने कर्त्तरि लिट्। दकाराक्षरानुप्रासोऽलङ्कारः ॥ ११४ ॥

स्रुतेति। स हरिः स्रुताः क्षरिताः इभकुम्भाः एव असिजा दर्पिता इभकुम्भाः एवोरसिजाव येषां। इदयभतिभिः शरैः मनोभङ्गैव विपादमादश्वैः सह देशं तैः। हृदयं वदति साक्ष इति विग्रहः। द्विषां नद्योषितां चापैः शोणितैरसृग्भिः। अथान्तस्थेपि शोणित इति विश्वः। नदीः प्रावर्त्तयत् प्रवाहयत्। अत्र सर्वेण नदादेरदोऽसृदिन्दर्थः। अत्र इभकुम्भयुक्ताः स्तनाः स्तन्यः। तैरत्र हिनां नद्योषितां दयानन्दवल्लभाः समुद्रामुद्दतः। नदनदीभेन विभान्तद्योषितां चापैः शोणितैः क्षेमूलभेदादिद-

सदामदबलप्रायस्समुद्धूतरसो बभौ ।
प्रतीतविक्रमः श्रीमान्हरिर्हरिरिवापरः ॥११६॥

योक्तिमहिम्ना वस्तुरूपतुल्यधर्मयोर्गत्या तुल्ययोगिता चक्राद्रिभावेनैषा बद्धा ॥११५॥

सदेति। सदा मदोऽस्य स सदामदः नित्यमत्तः बलं बलभद्रं प्रीणातीति सदामदबलप्रायः । प्रत्यासृकर्मण्यण्प्रत्ययः । समुद्धृतरसा भूर्येन स समुद्धृतरसः प्रतीताः प्रसिद्धा विक्रमाः पादन्यासा यस्य स त्रिविक्रम इत्यर्थः । श्रीमान् रमापतिः हरिः कृष्णोऽपरोऽन्यो हरिरिन्द्र इव बभौ सोऽपि सतामामदोऽद्भुतदो यो बलासुरस्तस्य प्रायान् नाशं करोतीति सदामदबलप्रायः । तत्करोतीति णिजन्तात्पचाद्यच् । समुद्धृतरसः उत्तमपानेन समुपगत हृतविष शृङ्गारादौ विषवीर्ये द्रवे रागे गुणे रस इत्यमरः । प्रतीतविक्रमः प्रसिद्धपराक्रमः श्रीमान् स्वाराज्यलक्ष्मीयुक्तः । तथाऽपरोऽन्यो हरिः सूर्य इव बभौ । सोऽपि आमरोगं दाति खण्डयतीति आमदः । बलं पृणातीति बलपः । मूलविभुजादित्वात् कः । सतां भक्तानामामदो बलप्रश्च अथ उदयोऽस्य स सदामदबलप्रायः । स्वोदयेन भक्तारोग्यबलकारीत्यर्थः । उद्यन्नद्य इत्यादि श्रुतेरिति भावः । समुद्धृतरसः । धर्मेणाम्बुशोषित्वसलिलः । प्रतीतविक्रमः प्रसिद्धगतिः । यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिष्वित्यमरः । तदेवमुपमानयोरुपमेये साधर्म्यवचनादेषामवाच्येषु चित्रभेदः । एतावदेव कवेर्विवक्षितमतोऽन्यत्सर्वं वाच्यमौपम्यमेव । अत्रापरो हरिरिवेत्यपरशब्दप्रयोगादुपमेयेन नोपमा । अपरस्येन्द्रस्यार्कस्य वाऽप्रसिद्धेः । प्रसिद्धसादृश्यवर्णनमुपमा । प्रसिद्धताद्रूप्यारोपे रूपकम् । प्रसिद्धताद्रूप्यसम्भावनमुत्प्रेक्षा । अत एव वर्णयन्ति । अप्रकृतगुणक्रियाभिसम्बन्धादप्रकृततयेन प्रकृतस्य सम्भावनमुत्प्रेक्षेति तथाह परशब्देन प्रतीतस्याप्रकृततयाऽध्यवसायप्रतीतेरिवशब्देन तस्य साध्यस्य प्रतीतत्वमुत्प्रेक्षैवेति सर्वस्वकारः । तस्मादिवशब्दसा-

॥ अर्थत्रयवाची ॥

द्विधात्रिधा चतुर्द्धा च तमेकमपि शत्रवः ।
पश्यन्तः स्पर्द्धया सद्यः स्वयम्पञ्चत्वमाययुः ॥११७॥

सदैव सम्पन्नवपूरणेषु
स दैवसम्पन्नवपूरणेषु ।
महोदधेस्तारि महानितान्तं
महोदधेऽस्तारिमहा नितान्तम् ॥ ११८ ॥

त्समयोस यशोपमा । [illegible] । उभयोः पदयोरे [illegible] इति विवेकः । [illegible] न्दार्थता व्यतिरेके [illegible] । [illegible] इत्यवमतिमहत्या ॥ ११६ ॥

द्विधेति शत्रवः एकमपि तं हरिं द्विधा द्वित्वेन त्रिधा त्रित्वेन चतुर्द्धा चतुष्ट्वेन [illegible] दृश्यन्ते [illegible] । [illegible] ॥ ११७ ॥

सदेति । सदैव [illegible] ॥

॥ समुद्गः ॥

दृष्ट्वा त्वार्थं मन्त्रिणः शार्ङ्गपाणे-
रेत्याधोमुख्यं प्राविशन् भूमिमाशु ।
मुद्रा युक्तानां वैरिवर्गस्य मध्ये
भर्त्रा क्षिप्तानामेतदेवानुरूपम् ॥ ११९ ॥

सत्वं मानविशिष्टमाजिरभसादालम्ब्य भव्यः पुरो
लब्धावत्ययमुद्धितरुद्धुरतरश्रीवत्सभूमिर्मुदा ।

प्राप्तपारं समुद्रपारगामि नितान्तं स्फारि विस्तीर्णं महत्तेजोदधे धारयामास । अर्धाभ्यामलक्ष्यसमुद्रयमकभेदः । अर्धाभ्यां समुद्रस्यादस्य भेदास्त्रयोमता इत्युक्तं दण्डिना । उपेन्द्रवज्रा वृत्तम् ॥ ११८ ॥

दृष्टमिति । शार्ङ्गं पाणौ यस्य शार्ङ्गपाणेः कृष्णस्य । प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवत इति पाणेः परनिपातः । पत्रिणो बाणा दृष्टमेव गात्रं यथा स्यात्तथा एत्य आधोमुख्यमधोमुखत्वमेत्य प्राप्य आशु भूमिमाविशन् मुद्रया लोहमुद्रया पत्रिलतया च युक्तानां तथापि भर्त्रा स्वामिना वैरिवर्गस्य मध्ये क्षिप्तानां पातितानां एतदेव आधोमुख्येन क्वचित्प्रवेशनमेवानुरूपमुचितम् । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । आगत वैश्वदेवीवृत्तम् । पञ्चाश्वैश्छिन्ना वैश्वदेवी ममौ याविति लक्षणात् ॥ ११९ ॥

सत्वमिति । भव्यः कल्याणमूर्तिः लब्धोऽत्ययः समुद्धितश्च येन स लब्धात्ययमुद्धितः श्रीवत्सस्य लाञ्छनविशेषस्य भूमिर्वक्षःस्थला उद्धुरतरा उन्नततरा यस्य स उद्धुरतरश्रीवत्सभूमिः कामसपत्नभीः निर्भीकः पदे नरेश्वरस्य प्रणाशोपायं स्थाप कृत्यमुत्तमशिष्टरूपकम् । व्याधोत्तम-धाजोरोसमगुरुत्वमक्रोऽपि जेतव्यः । उदधौ निधानादुदधानात् । द्वि-वियोगे मतुबर्थीयः । स हरिः पुरः पूर्वमाजिरभसात् रणरागात् मा

वहतः स्कन्धगतञ्च तस्य मृत्युम् ।
अभिशौरि रथोऽथ नोदिताश्वः
प्रययौ सारथिरूपया नियत्या ॥ २ ॥

अभिचैद्यमगाद्रथोऽपि शौरे
रवनिं जागुडकुङ्कुमाभिताम्रैः ।
गुरुनेमिनिपीडनावदीर्ण
व्यसुदेहस्रुतशोणितैर्विलिम्पन् ॥ ३ ॥

स निरायतकेतनांशुकान्तः
कलनिक्वाणकरालकिङ्किणीकः ।

सम्पूतोच्चत इति । स्थितचक्रमिमातसम्पूतोच्चम् । ईक्षतेः कर्मण्यण् । स्कन्धगतं मृत्यु वहतः तस्य चैद्यस्य रथ सारथिरूपया नियत्या विधिनेति रूपकम् । भाग्यं स्त्री नियतिर्विधिरित्यमरः । नोदिताश्वः प्रेरिताश्वः सन् अभिशौरि शौरिमभि । आभिमुख्येऽव्ययीभावः । एच्यमादाप्नुय इति सूपोलुक् । प्रययौ प्रतस्थे ॥ २ ॥

अभीति । अथ शौरेः कृष्णस्य रथोऽपि जागुडो देशविशेषः तत्र यत्कुङ्कुमं तद्वदभिताम्रैः रक्तैरित्युपमा । यावकेति पाठे यावकश्च कुङ्कुमञ्च ताभ्यामभिताम्रैरित्यर्थः । गुरुणा नेमीना चक्रधारया निपीडनेन मोदनेनावदीर्णेभ्यो व्यसूनां विगत प्राणानां देहेभ्यः स्रुतैः शोणितैरसृग्भिरवनिं विलिम्पन् रूपदि हानः सन् । अभिचैद्यं चैद्यमभि । समासोऽव्ययीभावो वा विकल्पात् । अगात् । इणो गा लुङीति गादेशः ॥ ३ ॥

स इति । निरायतोऽतिदीर्घः केतनांशुकान्तः ध्वजपटाञ्चलो यस्य सः
रवैः मधुरस्वरैः कराला कुण्डाः भगन्ना: किङ्किण्यः क्षुद्र-

विंशः सर्गः ।

मुखमुल्लसितत्रिरेखमुच्चै-
र्भिदुरभ्रूयुगभीषणन्दधानः ।
समिताविति विक्रमानमृष्यन्
गतभीराहृत चेदिराट् मुरारिम् ॥ १ ॥
शितचक्रनिपातसम्प्रतीच्छं

अथ हरिशिशुपालयोर्युद्धं वर्णयितुमुपोद्घातं करोति। मुखमिति। इतीत्थं समितावाजौ। समित्याजिसमिद्युध इत्यमरः। विक्रमान् मुरारेः पराक्रमान् अमृष्यन् असहमानः अतएव तिस्रोरेखास्त्रिरेखा। दिक्सङ्ख्ये संज्ञायामिति समासः। सा उल्लसिता क्रोधादुद्भूता यस्मिन् तदुल्लसितत्रिरेखम्। क्वचित्त्रिवलीकमित्यपि पाठः। तथा भिदुरेण भ्रूयुगेन भीषणं भयङ्करं उच्चैरुन्नतं मुखं दधानः चेदिषु राजते चेदिराट्। सत्सूद्विषेति क्विप्। यद्वा। चेदीनां राट् चेदिराट्। अन्येभ्योऽपि दृश्यते इति क्विप्। राजा राट् पार्थिवक्ष्माभृन्नृप इत्यमरः। गतभीर्निर्भीकः सन् मुरारिं हरिं आह्वत। अयमहं कोऽसि मामभ्युपैहि इति स्पर्द्धया अमर्यादाकारयामासेत्यर्थः। विनाशकाले विपरीतबुद्धिर्वा स्यादिति भावः। स्पर्द्धायामाङ इति ह्वयतेर्लुङि तङ् आत्मनेपदेष्वन्यतरस्यामिति च्लेरङादेशः। अतिमर्षस्य विशेषणगत्या आह्वानहेतुत्वात्काव्यलिङ्गम्। सर्गेऽस्मिन्नौपच्छन्दसिकं वृत्तम्। वैतालीये युग्माधिक्यात्। तदुक्तं वैतालीये हि ररलाकुरुकारे युग्मतोऽन्ते गकौ पर्यन्ते विकमिति ॥ १ ॥

स्मितेति। अथ आह्वानानन्तरं शितचक्रनिपातं शिशुपालं ...

वहतः स्कन्धगतञ्च तस्य मृत्युम्।
अभिशौरि रथोऽथ नोदिताश्वः
प्रययौ सारथिरूपया नियत्या ॥ २ ॥
अभिचैद्यमगाद्रथोऽपि शौरे
रवनिज्जागुडकुङ्कुमाभिताम्रैः।
गुरुनेमिनिपीडनावदीर्ण
व्यसुदेहस्रुतशोणितैर्विलिम्पन् ॥ ३ ॥
स निरायतकेतनांशुकान्तः
कलनिक्वाणकरालकिङ्किणीकः।

सम्प्रतीक्षत इति शितचक्रनिपातसम्प्रतीक्षम्। वहतेः कर्मण्यण्।
स्कन्धगतं मृत्युं वहतः तस्य चैद्यस्य रथः सारथिरूपया नियत्या विधि-
नेति रूपकम्। भाग्यं स्त्री नियतिर्विधिरित्यमरः। नोदिताश्वः प्रेरि-
ताश्वः सन् अभिशौरि शौरिमभि। आभिमुख्येऽव्ययीभावः। अव्य-
यादाप्सुप इति सुपो लुक्। प्रययौ प्रतस्थे ॥ २ ॥

अभीति। अथ शौरेः कृष्णस्य रथोऽपि जागुडो देशविशेषः तद्-
भवं कुङ्कुमं तद्वदभिताम्रैः रक्तवर्णैरित्युपमा। यावकेति पाठे यावकश्च कुङ्कु-
मञ्च ताभ्यामभिताम्रैरित्यर्थः। गुरूणां नेमीनां चक्रधाराणां निपी-
डनेन मर्दनेनावदीर्णेभ्यो व्यसूनां विगत प्राणानां देहेभ्यः स्रुतैः शोणि-
तैरसृग्भिरवनिं विलिम्पन् रञ्जयन् इति यावत्। अभिचैद्यं चैद्य-
मभि। समासोऽव्ययीभावो विकल्पात्। अगात्। इणो गा लुङीति
गादेशः ॥ ३ ॥

स इति। निरायतोऽतिदीर्घः केतनांशुकान्तः ध्वजपटाञ्चलो यस्य सः
कलनिक्वाणैः मधुरस्वरैः करालाः कुत्सिताः प्रगल्भाः किङ्किण्यः क्षुद्र-

विरराज रिपुचय प्रतिज्ञा
मुखरीमक्तशिखः स्वयन् मृत्युः ॥ ४ ॥
सजलाम्बुधरारवानुकारी
ध्वनिरापूरितदिङ्मुखो रथस्य।
प्रगुणीकृतकेकमद्भ कण्ठैः
शितिकण्ठैरुपकर्णयाम्बभूवे ॥ ५ ॥
अभिवीक्ष्य विदर्भराज पुत्री
कुचकाश्मीरजचिह्नमच्युतोरः।

कल्किकायस्य स तथोक्तः। नद्यतवेति कम्। किङ्किणी क्षुद्रघण्टिकेत्य-
मरः। स कृष्णस्य रथ रिपुचयस्य शिशुपालवधस्य प्रतिज्ञया मुखरोवा
चाल अतएव मुक्ताशिखोमुक्तकेश विरराज। माहमेनमद्यस्य शिरा
मस्ये करिष्यामीत्युद्घोषयन्नित्यर्थं स्वय साक्षात्, मृत्युरन्तकः किमित्यु-
त्प्रेक्षा ॥ ४ ॥

सजलेति। सजलो योऽम्बुधर तस्यारव गर्जितमनुकरोतीति तथोक्त
गम्भीर इत्यर्थ। उपमालङ्कार। आपूरितदिङ्मुखो व्याप्तदिगन्तो रथस्य
हरिरथस्य ध्वनि उन्नर्त कण्ठा येषा तैरुन्नद्भ कण्ठैः ऊर्ध्वाकृतग्रीवैरित्यर्थं
आत्ममयूरपोषितकन्धरैरित्यर्थ। शितिकण्ठैर्नीलकण्ठैः प्रगुणीकृता:
व्यतितारीकृता केका यस्मिन् कर्मणि तद्यथा तथा। केका वाणी
मयूरस्येत्यमर। उपकर्णयाम्बभूवे मेघारवभ्रान्त्या दत्तकर्णैरित्यर्थं।
एतेन भ्रान्तिमदलङ्कारोऽव्यक्त इति वस्तुनालङ्कारध्वनि ॥ ५ ॥

अभीति। चेदिराजः शिशुपाल। गालाहयस्थित्यटम्। विदर्भरा-
जपुत्र्या रुक्मिण्या कुचयोर्यत्काश्मीरज कुङ्कुमन्तच्चिह्नं यस्य तद
च्युतोर कृष्णवक्ष अभिवीक्ष्य चिरदयितया विदोप सुजापि रुक्मि
णीहरणात् मन्यति सम्भृतयापीत्यर्थः। रुषा रोषेण तदैव तदाभीमिवे

चिरसेवितयापि चेदिराजः
सहसावाप रुषा तदैव योगम् ॥ ६ ॥
जनिताशनिशब्दशङ्कमुच्चै
र्धनुरास्फालितमध्वनन्नृपेण।
चपलानिलचोद्यमान कल्प
चयकालाग्निशिखानिभस्फुरज्ज्यम् ॥ ७ ॥
समकालमिवाभिलक्षणीय
ग्रहसन्धानविकर्षणापवर्गैः।
अथ सामिसरं शरैस्तरस्वी
स निरस्कर्तुमुपेन्द्रमभ्यवर्षत् ॥ ८ ॥

त्युत्प्रेक्षा। सहसा योगं सम्बन्धमवाप। यथा कामी कान्तसम्भोगचिह्नदर्शनोद्दीप्तः कान्तया संयुज्यते तद्वदित्यर्थः परमार्थस्तु रूप एव कोपो वैदर्भीकुचकुङ्कुमदर्शनादुद्दीपित इत्यर्थः। अत्र प्रकृतरुक्चैद्यविशेषसाम्यादप्रकृतकान्ताप्रतीतेः समासोक्तिः उक्तोत्प्रेक्षा त्वङ्गमस्याः ॥ ६ ॥

जनितेति। नृपेण चेदिपेन आस्फालितं सङ्घट्टितं अतएव चपलानिलेन तीव्रमारुतेन चोद्यमानस्य संवर्धमानस्य कल्पक्षयकालाग्नेः शिखा ज्वाला तया समाना तन्निभा। इति नित्यसमासः। सा स्फुरन्ती दीर्घ्यमाना ज्या मौर्वी यस्य तत्तथोक्तं धनुः जनिता उत्पादिता अशनिशब्दशङ्का यस्मिन् कर्मणि तत्तथोक्तम्। उच्चैस्तराम् अध्वनत्। कल्पाग्निशिखानिभेत्युपमाया अशनिशब्दशङ्केति भ्रान्तिमतः आस्फालितमध्वनदिति पदार्थहेतुककाव्यलिङ्गस्य च सापेक्षत्वात्सङ्करः ॥ ७ ॥

समेति। अथ धनुरास्फालनानन्तरं तरस्वी बलवान् स चैद्यः समकालमिवेत्युत्प्रेक्षा। अत्यन्तसंयोगे द्वितीया। अभिलक्षणीया दृश्या-

ऋजुताफलशुद्धियोगभाजा
गुरुपक्षाश्रयिणां शिलीमुखानाम् ।
गुणिना नतिमागतेन सन्धिः
सह चापेन समञ्जसो बभूव ॥ ९ ॥
अविपन्नतमे कृताधिकारं
वशिना कर्म्मणि चेदिपार्थिवेन ।

यद्वा धनुषं सन्धाय धौर्या दोलन विकर्षमाकर्षणमपवर्य भी- षय येषां तैः शरैः सामिभरं सानुचरं उपेन्द्रं हरिं तिरस्कर्त्तुं माच्छादयितुमभ्यवर्षत् ॥ ८ ॥

ऋजुतेति । ऋजुता अवक्रत्वं अकुटिलबुद्धित्वञ्च फलं शल्यं प्रयोजनञ्च तेन योगः शुद्धिर्दोषराहित्यं निर्मलत्वञ्च तत्र याथार्थ्यमार्जवं शुद्धिश्च भजन्तीति तद्भाजां गुरोर्महतः पक्षस्य पत्रादिपक्षस्य सहायस्य चा- श्रयः आश्रयणमेषामस्तीति गुरुपक्षाश्रयिणां शिलीमुखानां शरा- णाम् । गुणिना मौर्वीमता नतिमागतेन आकर्षणादाकुञ्चितकोटिना वि- नयवता प्रह्वेण चापेन सह सन्धिः सम्बन्धः समञ्जसः सार्थकोऽनुरूपो ब- भूव अर्थवता वशिना बलेन सन्धिरयोचितेति भावः । अत्र प्रस्तु- तचापविशेषणसाम्यादप्रस्तुतार्थान्तरप्रतीतेः समासोक्तिः । तत्र शब्दयोः प्रकृतिप्रत्ययाभेदाच्छब्दशक्तिमूलः । अ- र्थान्तरन्यासः ऋजुतादिशब्दानां समानार्थत्वादिति वस्तुनोः प्रकृतप्रक्रियोरिव वस्तुभेदेन शब्दस्य प्राकरणिकत्वाप्राकरणिकत्वं विभाग- युक्तयोर्भिन्नयोरिव भेदात् ॥ ९ ॥

अविपन्नेति । वशिना स्वाधीनेन चेदिपार्थिवेन अविपन्नतमे दुष्करे कर्मणि निश्चयाधारं कृताधिकारं कृतनियोगं नियुक्तमात्रमिति ... ददृशोरकीर्णाः योधाः प्रथमावर्जनेन चेष्टमाना दोषवत्तामा- पन्ना कथा यथा तथा । ... ...

असरद्धनुरुच्चकैर्दार्त्तिं
प्रसभाकर्षणवेपमानजीवम् ॥ १० ॥

अनुसन्ततिपातिनः पटुत्व-
न्दधतः शुद्धिभृतो गृहीतपक्षाः ।
वदनादिव वादिनोऽथ शब्दाः
क्षितिभर्त्तुर्धनुषः शराः प्रसस्रुः ॥ ११ ॥

शवलासितकान्ति तस्य मध्ये
स्थितघोरायतबाहुदण्डनासम् ।

ण वेपमानः कम्पमानो जीवः प्राणोयस्ये त्यर्थः । आर्त्तिं पीडाधनुः को-
ष्टोरित्यमरः । जीवः प्राणेऽस्त्रियां मा तु वन्त्रावात्मनि गोष्मतौ
लिषु जीवति मौर्व्यां स्त्रोति वैजयन्ती । धनुरुच्चकैररसत् चक्रन्दा-
क्रन्दत् । यथा राज्ञा नियुक्तः पराधीनः बलादाकृष्यमाणः क्रोशति
तद्वदित्यर्थः । अत्रापि प्रकृतविशेषणसामर्थ्यादप्रकृतापराध्यधिकृतपुरुषप्रतीतेः
समासोक्तिः ॥ १० ॥

अन्विति । अथाकर्षणानन्तरं क्षितिभर्तुर्यस्य धनुषः सकाशात्
अनुसन्ततं पतन्तीति अनुसन्ततिपातिनोऽविच्छेदवर्त्तिनः पटुत्वं दृढ़-
भेदपाटवं वाक्कलशक्तिञ्च दधतः शुद्धिभृतः लोहशुद्धिभृतः निर्दिष्टा
वा अन्यत्र साधव इत्यर्थः गृहीतपक्षाः स्वीकृतवक्त्रादिपक्षाः । अ-
न्यत्र गृहीत नियतादिसाध्यार्थाः । पक्षः पार्श्वगरुत्साध्यसहायब-
लभित्तिष्विति वैजयन्ती । शराः वादिनः कथकस्य वदनाच्छब्दाः प्रति-
ज्ञाहेत्वादय इव प्रसस्रुर्निर्जग्मुः । श्लिष्टविशेषणेयमुपमेति केचित्।
श्लेष एव प्रकृताप्रकृतविषय इत्यन्ये ॥ ११ ॥

शवलेति । शवलं मलिनं श्वेतमित्यमरः । तद्दलितकान्ति इष्टु
वर्षं मध्ये स्थिता घोरा भीमा आयता च बाहुदण्डोनासा नासि-

ददृशे कुपितान्तकोन्नमद्भ्रू-
युगभीमाकृति कार्मुकं जनेन ॥ १२ ॥
तडिदुज्ज्वलजातरूपपुङ्खैः
खमयः श्याममुखैरभिध्वनद्भिः ।
जलदैरिव रंहसा पतद्भिः
पिदधे संहतिशालिभिः शरौघैः ॥ १३ ॥
शितशल्यमुखावदीर्णमेघ
च्युतदम्भः स्फुटतीव्रवेदनानाम् ।
स्रवदस्रुततीव चक्रवालं
ककुभामौर्णविषुः सुवर्णपुङ्खाः ॥ १४ ॥

तेन यथित् तत्तथोक्तम् । कुपितस्यान्तकस्य भ्रुवोरुन्नमत् यद्युगं तद्वद्भीमा आकृतिर्यस्य तत्तस्य चेष्टास्य कार्मुकं जनेन ददृशे दृष्टं सभयविस्मयमिति भावः । उपमालङ्कारः ॥ १२ ॥

तडिदिति । तडिद्वदुज्ज्वला दीप्ता जातरूपस्य हेम्नः पुङ्खाः कर्त्तर्यो येषां तैः । अयोमयत्वात् श्याममुखैः श्यामाग्रैरभिध्वनद्भिर्ध्वनिभिः खमप्यर्णैर्गर्जद्भिरिव रंहसा वेगेन पतद्भिर्धावद्भिः संहतिशालिभिः सङ्घशालिभिः शरौघैर्जलदैरिव खमाकाशं पिदधे पिहितम् । कर्मणि लिट् । वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोरित्यपेरकारलोपः । उपमालङ्कारः ॥ १२ ॥

शितेति । सुवर्णपुङ्खाः सुवर्णकर्त्तरिकाः शराः शितैर्निशितैः शल्यमुखैः फलाग्रैः अवदीर्णा अवभिन्ना ये मेघास्तेभ्यः च्युतेन स्रवता अम्भसा स्फुटा व्यक्ता तीव्रा वेदना यासां तासां ककुभां सम्बन्धि चक्रवालं अनुगतिं रुधन्तमिर्यस्य तदिव स्वरूपकारवेदनया रुदितमिव स्थि-

अमनोरमतां ययौ जनस्य
क्षणमालोकपथान्नभःसदां वा।
रुरुधे पिहिताहिमद्युतिर्द्यौ
र्विशिखैरन्तरिता च्युता धरित्री ॥ १५ ॥

विनिवारितभानुतापमेकं
सकलस्यापि सुरद्विपोर्बलस्य।
शरजालमयं समं समन्ता
दुरु सद्मेव नराधिपेन तेने ॥ १६ ॥

नमित्युत्प्रेक्षा। चक्रवालं मण्डलमौर्वीरिषवः व्याच्छादयामासुः। स्त-र्णोतेर्लुङ्डीडागमे तस्य विभाषोर्णोरिति ङित्वाभावपक्षे ऊर्णोतेर्विभा-षेति वृद्धिविकल्पादन्ये गुणः अजादित्वादाटश्चेति वृद्धिः ॥ १४ ॥

अमन इति। विशिखैर्द्यावापृथिव्यौ कर्तृभिः पिहिता हिमद्युतिस्ति-रोहिताङ्का। अतएवामनोरमतां ययौ प्राप्नुवती। इण् गतौ कर्तरि लुगित-श्चेति ङीप्। द्यौराकाशं जनस्य भौमलोकस्य आलोकपथात् दृष्टिमा-र्गात् क्षणं रुरुधे रुद्धा। रुधः कर्मणि लिट्। अत्र पथोरीषाण यत्वात् ध्रुवमपाये इति पञ्चमी। तथान्तरिता च्युता तिरोहिता नष्टा अतएवामनोरमतां ययौ धरित्री नभसदां वा आलोकपथात् रुरुधे वाकारो जनसमुच्चयार्थः। अत्र द्यावापृथिव्योः प्रकृतयोरेव रोधाख्यतु-ल्यधर्मयोगात्तुल्ययोगिताभेदौ ताभ्यामेव जनस्य नभःसदां यथासङ्ख्या-न्वयाद्यथासङ्ख्यालङ्कारः सापेक्षतया सङ्कीर्यते ॥ १५ ॥

विनिवारितेति। नराधिपेन सकलस्यापि सुरद्विपोर्हरेर्बलस्य सैन्यस्य विनिवारितो भानुतापो येन तदेकमद्वितीयं शरजालमयं बाणवृन्दात्मकं उरु महत्सद्मेव सदनमिवेत्युत्प्रेक्षा। समं युगपत्समन्तात्तेने स्त-मित्यर्थः। तनोतेः कर्मणि लिट् ॥ १६ ॥

इति चेदिमहीभृता तदानीं
न्तदनीकं दनुसूनुसूदनस्य।
वयसामिव चक्रमक्रियाक
स्परितोऽरोधि विपाटपञ्जरेण ॥ १७ ॥
इषुवर्षमनेकमेकवीर-
स्तदरिप्रच्युतमच्युतः पृषत्कैः।
अथ वादिकृतम्प्रमाणमन्यैः
प्रतिवादीव निराकरोत्प्रमाणैः ॥ १८ ॥
प्रतिकुञ्चितकूर्परेण तेन
श्रवणोपान्तिकनीयमानगव्यम्।

इतीति। इतीत्थं चेदिमहीभृता चैद्येन तदानीं तत्काले दनुसूनुसूदनस्य दानवान्तकस्य हरेस्तदनीकं बलम्। वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियामित्यमरः। वयसां चक्रं पक्षिकुलम् इव अक्रियाकं निश्चेष्टं यथा तथा विपाटयन्तीति विपाटाः शराः। पचाद्यच्। तैरेव पञ्जरेण परितः सर्वतः अरोधि रुद्धम्। रुधेः कर्मणि लुङ्। उपमा ॥ १७ ॥

इष्विति। अथानीकरोधनानन्तरं एकवीरो महाशूरोऽच्युतो हरिः अरिप्रच्युतं शत्रुगलितं तदनेकमपरिमितमिषुवर्षं पृषत्कैर्बाणैः वादिकृतं वादिना प्रयुक्तं प्रमाणमनुमानं अन्यैः प्रमाणैः प्रत्यनुमानैः प्रतिवादीव निराकरोत्। इतेन समासोविभक्त्यलोपश्चेति समासात् समासगता श्रौती पूर्णोपमा ॥ १८ ॥

प्रतीति। प्रतिकुञ्चितकूर्परेण कुञ्चितकफोणिना। स्यात् कफोणिस्तु कूर्पर इत्यमरः। तेन हरिणा श्रवणोपान्तिकं नीयमाना आकृष्यमाण

ध्वनति स्म धनुर्घनान्तमत्त
प्रचुरक्रौञ्चरवानुकारमुच्चैः ॥ १९ ॥
उरसा विततेन पातितांसः
स मयूराञ्चितमस्तकस्तदानीम् ।
क्षणमालिखितो नु सौष्ठवेन
स्थिरपूर्वापरमुष्टिराबभौ वा ॥ २० ॥
ध्वनतोऽनितरां रयेण गुर्व्य
स्तडिदाकारचलद्गुणादसङ्ख्याः ।
इषवो धनुषः सशब्दमाशु

गम्या ज्या यस्य तत् । गम्यं गता स्थिते गम्या ज्यायां मौर्व्यादिके लिङ्गमिति विश्वः । धनुः शार्ङ्गं घनान्ते शरदि ये मत्ताः प्रचुराः भूयिष्ठाः क्रौञ्चास्तेषां रवमनुकरोतीति तदनुकारं क्रौञ्चकूजितसदृशं यथा तथेत्यर्थः । कर्मण्यण् । उच्चैस्तारं ध्वनति स्म दध्वान । लट् स्मे इति भूते लट् । स्वभावोक्त्युपमयोः सङ्करः ॥ १९ ॥

उरसेति । तदानीं धनुराकर्षणसमये विततेन विस्तारितेनोरसा उपलक्षित पातितांसो नमितस्कन्धः मयूरवदञ्चितं मनोहरं मस्तकं यस्य सः उन्नमितमूर्धेत्यर्थः । स्थिरौ दृढौ पूर्वापरौ अग्रिमचरमौ मुष्टी स्तब्धौ तत्स्तम्भमौर्वीकौ पाणी यस्य स हरिः । सुष्ठु भावः सौष्ठवं तेन सौष्ठवेन स्थानकपाटवेन हेतुना क्षणमालिखितोऽनु लिखित इव आबभौ वा बभासे किम् । नुशब्दो वितर्कार्थः । नु पृच्छायां वितर्के चेत्यमरः । वाशब्दोऽपि तदर्थ इत्युत्प्रेक्षालङ्कारोऽयम् ॥ २० ॥

ध्वनत इति । ध्वनतोऽनितरां तडिदिवाकारोऽस्य स तडिदाकारः चलनात्तेजोमयत्वाच्चाचिरप्रभाकारश्चलन् गुणो मौर्वी यस्य तस्मात् । मौर्वी ज्या शिञ्जिनी गुण इत्यमरः । धनुषः शार्ङ्गात् गुर्व्यः-

न्यपतन्नम्बुधरादिवाम्बुधाराः ॥ २१ ॥

शिखरोन्नतनिष्ठुरांसपीठः
स्थगयन्नेकदिगन्तमायतान्तः ।
निरवर्णि सहस्रसारितोऽस्य
क्षितिभर्त्तेव चमूभिरेकबाहुः ॥ २२ ॥

नतकुण्ठमुखाः सुपर्णकेतो-
रिषवः क्षिप्रमिव प्रजग्मुरेण ।
विभिदामनयन्त कृत्यपक्ष

इत्य असङ्ख्या अपरिमिता इषवोऽम्बुधरान्मेघात् अम्बुधारा इवाशु सपक्षा न्यपतन् । अत्रोपमानोपमेययोरेकलिङ्गतान्वयादिषु शब्दो द्विलिङ्गोऽपि स्त्रीलिङ्ग एव प्रयुक्त इति ज्ञापनाय गुर्वी इति विशेषणम् ॥ २१ ॥

शिखरेति । शिखरं शृङ्गमिवोन्नतं निष्ठुरं चांसपीठं यस्य स एकदिगन्तमेकदिग्भागं स्थगयन् आयतान्तो द्राघिष्ठस्वरूपः । अन्तोऽध्यवसिते मृत्यौ स्वरूपे निश्चयेऽन्तिक इति वैजयन्ती । सकृत्प्रसारितो न तु पुनःपुनरिति, स्थैर्योक्तिः । अस्य हरेरेकबाहुः सव्यापरोऽसितो वामबाहुरित्यर्थः चमूभिः । क्षितिभर्त्तेव भूधर इव निरवर्णि साधु निरीक्षित इत्यर्थः । निर्वर्णनन्तु निध्यानं दर्शनालोकनेक्षणमित्यमरः ॥ २२ ॥

नतेति । नतकुण्ठमुखा निशिताग्रा प्रगल्भगिरश्च सुपर्णकेतोर्गरुडध्वजस्य हरेरिषव परेषामरीणां क्षिप्रं शक्र इषुमिव अयथार्थं वपुः अमनाक् अभयवेत्तार इत्यर्थः । कृत्याश्चैते यथा वर्णसार प्रणिधिरेव चेतन्यलमाना । नेतुर्नायकस्य जिगीषो नृपते । कृत्यपक्षं अमात्यादिभेदवर्गमिव । कृत्या क्रियादेवतयोस्त्रिषु भेद्ये धनादिभिरित्यमरः । विभिदां भेदम् । षिद्भिदादिभ्योऽङ् । अनयन्त । स्वरित इत्यात्मनेपदम् ॥ २३ ॥

दयितैरिति । उष्मणा स्फुटा अङ्गेषु लेखाश्चिह्नलेखा नखरेखाश्च

नृपतेर्नेतुरिवायथार्थवर्णाः ॥ २३ ॥

दयितैरिव खण्डिता मुरारे-
र्विशिखैः सम्मुखमुज्ज्वलाङ्गलेखैः ।
लघिमानमुपेयुषी पृथिव्यां
विफला शत्रु शरावलिः पपात ॥ २४ ॥

प्रमुखेऽभिहताश्च पत्रवाहाः
प्रसभम्माधवमुक्तवत्सदन्तैः ।
परिपूर्णतरम्भुवोगतायाः
परितः कातरवत्प्रतीपमीयुः ॥ २५ ॥

दयेति । मुरारेर्विशिखैर्दयितैः प्रियैरिव सम्मुखं समक्षमेव खण्डिता तुच्छा अन्यत्रावमानिता अतएव विफला विगल्भा अलब्धकामा च । अतएव लघिमानमगुरुत्वं कलहताञ्चोपेयुषी शरावलिः पृथिव्यां पपात । अत्र प्रकृतशरावलिविशेषणसाम्यात् प्रकृतखण्डिता नायिकाप्रतीतेः समासोक्तिः । दयितैरिवेत्युपमा खण्डिताविशेषणान्तः पातित्वादङ्गमेव । अतएव तत्र विशेषण साम्यं श्लिष्टतया साधारणेनौपम्यगर्भत्वेन च प्रतीत्युक्तं सर्वत्र कारैः प्रातेऽन्यासङ्गविलते खण्डितेर्ष्याकषायितेति साधेवं पृथिव्यां पततीति भावः ॥ २४ ॥

प्रमुख इति । पत्राणि वहन्तीति पत्रवाहाः पक्षिपक्षैर्युक्ताः शराः । कर्मण्यण् । माधवमुक्तवत्सदन्तैः शौरिचिह्नशरैः प्रसभं बलात् प्रमुखे अग्रभागे वदने चाभिहताः खण्डिताः सन्तः अतएव कातरैः लक्ष्यैस्तुल्यं कातरवत् । तुल्यार्थे वतिप्रत्ययः । परिपूर्णतरं गतायाः गर्त्तं गतायाः इत्यर्थः । भुवोऽन्तरालभूमेः परितः प्रतीपं प्रतिकूलमीयुः प्रापुः प्रत्यागताश्च । माधवान्तिकात् प्रादृत्य जग्मुरित्यर्थः । चकारः पूर्व्वस्लो-

इतरेतरसन्निकर्षजन्मा
फलसङ्घट्टविकीर्णविस्फुलिङ्गः ।
पटलानि लिहन्नलाघवाना
मपरेषु क्षणमज्वलत्कृशानुः ॥ २६ ॥

शरदीव शरश्रिया विभिन्ने
विभुना शत्रुशिलीमुखाभ्रजाले ।
विकसन्मुखवारिजाः प्रकाम
मभजन्नाशा इव यादवध्वजिन्यः ॥ २७ ॥

स दिवं समचिच्छदच्छरौघैः

फलाः प्रतिनिवृत्ता इत्यर्थः । कातरत्वादिति तद्धितगता श्रौती पूर्णो-
पमा ॥ ५४ ॥

क्षतनिर्गमद्युतिमण्डलापलापैः ।
ददृशेऽथ च तस्य चापयष्टि-
रिपुरेकैव जनैः सहस्रदृष्टा ॥ २८ ॥

भवति स्फुटमागतो विपक्षा-
न्न सपक्षोऽपि हि निर्वृतेर्विधाता ।
शिशुपालबलानि कृष्णमुक्तः
सुतरां तेन तताप तोमरौघः ॥ २९ ॥

गुरुवेगविराविभिः पतत्रै-
रिपवः काञ्चनपिङ्गलाङ्गभासः ।
विनतासुतवत्तलम्भुवः स-

रित्यर्थः । शरीरैर्हि दमाकार्यं स हरिः शरान् च्छदत छादयतिस्म शरैरेव चतुर्भिर्धारा तुल्यः च्छदत शराभ्यास कौशलम् । युक्तञ्चैतत् । अनुपक्षतात्-क्षेत्राशयेनोतुष्येत्युते कथाशिखवसरे तस्य हरेश्चापयष्टिः इषुः शतरेकदा विसृष्टा सहस्रा एकैव जनैर्ददृशे दृष्टा । इषुर्या पुङ्खानुपुङ्खगमनप्राशीया-नेव एवं तु रेकदैव गच्छतीत्युत्प्रेक्षा । इदयकमुहूर्तसहस्रकार्यसम्पादनं युक्तमिति भाव ॥ २८ ॥

भवतीति । विपक्षाच्छत्रुकुलादागतः सपक्षः कङ्कादि पत्रवान् तु-च्छ निर्वृतेर्विधाता सुखकरो न भवति हि यतः स्फुटम् तेन कारणेन कृष्णमुक्तस्तोमरौघः शिशुपालबलानि सुतरां तताप ददाह । अतः शत्रु-कुलादागतः । स्वजनोऽपि न विश्वसनीय इत्यर्थः । सपक्षोऽर्थान्तिर्वर्तक इति विरोधेऽपिशब्दः । विपक्षादागत इत्यविरोधाद्विरोधाभासः ॥ २९ ॥

गुर्व्विति । गुरुवेगविराविभिः गुरुणा वेगेन विरुवन्ति ध्वनन्तीति तथोक्तैः । रौरैर्ध्वनिभिः । तीव्रवेगविरावद्भिः पतत्रैः पक्षैः उपलक्षिता काञ्चनेन पुङ्खविशेषेण पिङ्गलाङ्गभासः । अन्यत्र काञ्चनवदिति विग्रहः ।

व्यथितभ्रान्तभुजङ्गमं विशन्ति ॥ ३० ॥
शतशः परुषाः पुरोविशङ्कं
शिशुपालेन शिलीमुखाः प्रयुक्ताः ।
परमर्म्मभिदोऽपि दानवारे
रपराधा इव न व्यथां वितेनुः ॥ ३१ ॥
विहिताङ्गतलोकसृष्टिमाये
जयमिच्छन् किल मायया मुरारौ ।
भुवनत्रयकालयोगनिद्रे
नृपतिः स्वापनमस्त्रमाजहार ॥ ३२ ॥

। इपत्र शौरिपरा विनतासुतवद्वैनतेये स्तुत्यं व्यथिता भीषिताः अत-
एव भ्रान्तामूढा भुजङ्गमा यस्मिन् तत्तथा भुवस्तलं पातालं विशन्ति स्म
तद्वितगता शौरौ पूर्ण्वमस्र पाताल प्रवेशासम्बन्धातिशयोक्त्या सङ्की-
र्यते । ३० ॥

शतश इति । शिशुपालेन पुरोऽग्रे विशङ्कं निःशङ्कं शतशः प्रयुक्ताः
क्षिप्ता उच्चारिताश्च परुषाः निष्ठुराः परमर्म्मभिदोऽपि शिलीमुखा
बाणाः । शतश अपराधा पञ्चदशसर्गोक्ताः अभिशापा इव दानवारेर्ह-
रेर्व्यथा दुःखं न वितेनु स्वलापकारो महता सकिञ्चित्करा इति भाव. ।
उपमालङ्कारोपमा ॥ ३१ ॥

विहितेति । नृपतिश्चैद्यो विहिता अङ्गता लोकसृष्टिरेव माया
यस्मिन् तस्मिन् भुवनत्रयकाले प्रलयकाले न लिद्रालोमिति भावः उ
चिता योगनिद्रा । यस्य तस्मिन् मुरारौ मायया जयमिच्छन् किल न
तु जेष्यतीति भावः । स्वापयतीति स्वापनं अस्त्रं आजहार प्रयुक्तवानि-
त्यर्थः । अनादिमायाधारे सकलभुवनसृष्टिसंहार महानाटकसूत्रधारे
सर्व्वाङ्गतनिधाने सकलकलुषकषणपटुतरा भिधाने पुराणेन्द्रजालिके

सलिलार्द्रवराहदेहनीलो
विदधद्भास्करमर्थशून्यसंज्ञम् ।
प्रचलायतलोचनारविन्दं
विदधे तद्बलमन्धमन्धकारः ॥ ३३ ॥
गुरवोऽपि निपद्य यन्निदद्रु-
र्धनुषि क्ष्मापतयो न वाच्यमेतत् ।
चयितापदि जाग्रतोऽपि नित्यं
ननु तत्रैव हि तेऽभवन्निषण्णाः ॥ ३४ ॥

अजयति हरावपि मायया जिगीषेत्यहो महानस्य व्यामोह इति भावः । अत्र हरिविशेषणस्य दुर्जयत्वसिद्धेः काव्यलिङ्गम् ॥ ३२ ॥

सलिलेति । सलिलेनार्द्रो यो वराहदेहस्तद्वन्नीलं भासं प्रकाशं करोतीति भास्करः । दिवाविभेत्यादिना टप्रत्ययः । तमर्थशून्यां भास्करसदृशमरीचिनिमित्तशून्यां संज्ञां भास्कराख्यां यस्य तं विदधत् सौरलोकमभिभवन्नित्यर्थः । अन्धङ्करोतीति अन्धकारः तापमान्ध्यमभवत्तमः । कर्मण्यण् । प्रचलानि निद्राघूर्णितानि आयतलोचनान्येवारविन्दानि यस्मिन् कर्मणि तत्तथा सूर्यतिरोधानेऽरविन्दमुकुलीभावस्याप्यभावादिति भावः । तद्बलं हरिसैन्यं अन्धमप्रकाशं विदधे निद्रां प्रापितमित्यर्थः । अन्धमन्धेति यमकञ्जनयुग्मयोरेकत्रावृत्त्या वृत्त्यनुप्रासभेदः । तस्य वराहदेहनीललोचनारविन्देत्युपमाद्वयोः संसृष्टिः ॥ ३३ ॥

गुरव इति । गुरवो धीराः क्ष्मापतयोऽपि धनुषि निपद्य अवलम्ब्य निदद्रुः सुषुपुरिति यत् एतत् धनुषि निद्राणं वाच्यं निन्द्यं न भवति । कुतः हि यस्मात्ते क्ष्मापतयो जाग्रतोऽपि प्रबुद्धा अपि । जागर्तेः शतरि यस्य जक्षित्यादयः षडित्यभ्यस्तसंज्ञा नाभ्यस्ताच्छतुरिति नुम्प्रतिषेधः चयितापदि सर्वोपद्विनाशके इत्यर्थः । तत्रैव धनुषि नित्यं नि-

श्लथतां व्रजतस्तथा परेषा
मगलद्धारणशक्तिमुज्झतः स्वाम् ।
सुगृहीतमपि प्रमादभाजा
मनसः शास्त्रमिवास्त्रमग्रपाणेः ॥ ३५ ॥
उचितस्वपनोऽपि नीरराशौ
स्वबलाम्भोनिधिमध्यगस्तदानीम् ।
भुवनत्रयकार्य्यजागरूकः
स परन्तत्र परः पुमानजागः ॥ ३६ ॥

संख्या लक्षिता अभवन् नतु । अत्र सदाधनुरारोपणकार्यस्याभावाच्छैताहे-
तुत्वाहाक्यार्थहेतुकं काव्य लिङ्गम् ॥ ३४ ॥

श्लथतामिति । तथेति पूर्व्वोक्तधनुरारोपणसमुच्चये तथा तेषां धनु
रारोपणं तथान्येषां धनुर्गलनञ्चाभूदित्यर्थः । श्लथतां प्रयत्न शै-
थिल्यं व्रजतः भजत स्वां निजां धारणशक्तिं वाहनसामर्थ्यं च
जहत त्यजत परेषां राज्ञाम् । अयञ्चाशौ पाणिर्येति । समानाधि-
करणधर्माद. हस्तापापहस्तादप्रोशुणगुणिनोर्भेदाभेदादिति वामनवच-
नात् । तस्मादग्रपाणे हस्ताीतं सुष्ठु धृतमपि धन्वन्व स्वायत्तमपि
प्रमादभाजा गुणनिकादनवधानरहितानां मनसश्चित्तात्. शास्त्रं विद्येव
अस्त्रं धनुरगलदभ्रश्यत् निद्रापारवश्यादित्यर्थः । इवेन सह नित्यसमासात्
अप्रयुक्ता श्रौती पूर्णोपमा ॥ ३५ ॥

उचितेति । नीरराशौ समुद्रे उचितस्वपनोऽपि परिचित निद्रोऽपि
तदानीं सर्वनिद्रावसरे स्वबलाम्भोनिधिमध्यगः स्वसेना सागरमध्यगतः ।
बलपाथोनिधीत्यपि पाठः । भुवनत्रयकार्य्ये त्रैलोक्यरक्षाविधौ जाग
रूकः प्रवुद्धः । जागर्त्तेरूक इत्यूकञ् प्रत्ययः । परः पुमान् परमपुरुषः
परं केवलं हरिरेवेत्यर्थः । परमव्ययमिच्छन्ति केवल इति विश्वः । तत्र

अथ सूर्य्यरुचीव नस्य दृष्टा
तदभृत्कौस्तुभदर्पणङ्गतायाम् ।
पटु धाम ततोन चाङ्गु तन्त
द्विभुरिन्द्रकविलोचनः किलासौ ॥ ३७ ॥
महतः प्रणतेष्विव प्रसादः
स मणेरंशुचयः ककुम्मुखेषु ।
व्यकसद्विकसद्विलोचनेभ्यो
ददृदालोकमनाविलम्बलेभ्यः ॥ ३८ ॥

निद्रापवादोके कजाग जागर्त्ति स्म । सर्वान्धकारहारिणो नित्यप्रकाश
विद्यमान तत्रापि कार्य्यभावस्य कुतोनिद्रेति भावः । जागर्त्तेर्लुङि
तिप् यदादिता अपोद्भवि सार्वधातुकगुणे रपरे हलन्त्यादिति वृद्धौ
च रेफस्य विसर्जनीयः । अत्र सघुद्भनिद्रालोकत्वैव जागरे विरोध परि
हारमुखेन कार्य्यं नागच्छत्तनुपरमपुरुषत्वयोर्विशेषमगत्वा तात्त्विकजागरण
हेतुत्वाद्विरोधाभासश्लेषो काव्यलिङ्गम् ॥ ३६ ॥

अथेति । अथान्धकारव्याप्त्यनन्तरं तस्य हरेर्दृष्टौ चक्षुर्मितेजसो
त्यर्थः । सूर्य्यरुचीव सूर्य्यतेजसीव । कौस्तुभो दर्पण इवेत्युपमित समास ।
सूर्य्यरुच्येवेति विद्वान् । त कौस्तुभदर्पणं गताया प्रविष्टाया सत्या तस्मा
कौस्तुभात् पटु सर्वान्धकारहारिणि समर्थं धाम तेज उद्भूत् उदगात्
तद्धामोद्भवन न चाङ्गु त तत असौ विभुरिन्द्रकविलोचने
वपम हिस सनु अतस्तद्वपो सूर्य्याकत्वाच्चदर्पणत्वात् कौस्तु
भादर्पणादेरिव धाम प्रादुर्भावो व्यज्यते इत्यर्थः । अतो वाक्यार्थहेतुक-
काव्यलिङ्गम् ॥ ३७ ॥

महत इति । स पूर्वोक्तमणे कौस्तुभस्यांशुचयः विकसन्ति उन्मी
लन्ति विशेषमानि येषा तेभ्यो विकसद्भ्योऽनाविल मलम् आलोक ददृश

प्रकृतिम्प्रतिपादुकैस्स्व पादै
स्स्वरूपे भानुमतः पुनः प्रसक्तुम् ।
तमसोऽभिभवादपास्य मूर्च्छा
मुदजीवत्सहसैव जीवलोकः ॥ ३९ ॥

घनसन्तमसैर्जवेन भूयो
यदुयोधैर्युधि रेधिरे द्विषन्तः ।
ननु वारिधरोपरोधमुक्तः
सुतरामुत्तपते पतिः प्रभाणाम् ॥ ४० ॥

तत्रत्यानस्य ददृशुरितयश्चन् । महतोमहात्मनः प्रसादोऽनुग्रहः प्रभवेषु भक्तेषु इव ककुम्मुखेषु ककुभामग्रेषु व्यकसदमूर्च्छत् । पूर्णोपमा ॥ ३८ ॥

प्रकृतिमिति । प्रकृतिं स्वभावं प्रतिपादुकैः प्रतिपद्यमानैः । लषपतपदेत्यादिना उकञ्प्रत्ययः । न लोकेत्यादिना षष्ठीप्रतिषेधः । भानुमतोऽशुमतः पादैर्दीप्तिभिश्च पुनर्भूयः प्रसक्तुं स्वरूपे योक्तुं । क्लृप् सामर्थ्ये भावे लिट् कृपोरोल इति ऋकारस्यापि रेफस्य लकारः । जीवलोकः प्राणिवर्गश्च तमसोऽन्धकारस्याभिभवादभिभूतत्वादित्यर्थः । कर्तृकर्मणोः कृतीति कर्मणि षष्ठी । सहसैव मूर्च्छामपास्य उदजीवत् उदश्वसीत् । श्लोकोऽज्जीवनस्यार्कैकर प्रसारहेतुकत्वात् वाक्यार्थहेतुकं काव्यलिङ्गम् ॥ ३९ ॥

घनेति । घनं सान्द्रं सन्तमसमन्धकारो येषु । अवसमन्धेभ्यस्तमस इति समासान्तोऽच्प्रत्ययः । गतेति पाठे गतं सन्तमसं येषान्तै यदुयोधैर्यादवभटैर्भूयः पुनरपि जवेन युधि द्विषन्तो रेधिरे जिहिंसिरे हता इत्यर्थः । राध्यतेः कर्मणि लिट् । राधो हिंसायामित्येत्वाभ्यासलोपौ । तथाहि वारिधरोपरोधात् । मेघापसरणात् मुक्तः प्रभाणां द्युतीनां पतिरर्कः सुतरामुत्तपत्ययं नन्तु प्रकाशततरां खलु । उद्विभ्यान्तप इत्यात्मनेपदम् । अत्र यदुयोधानां द्युतिपतेश्च वाक्यभेदेन प्रतिबिम्बकरणा दृष्टान्तालङ्कारः । न चोपमानोपमेययोर्भिन्नवचनत्वदोष इति चन्द्रा-

व्यवहार इवानृताभियोग
स्तिमिरन्निर्जितवत्यथ प्रकाशे।
रिपुरुल्बणभीमभोगभाजा
म्भुजगानाञ्जननीञ्जजाप विद्याम् ॥ ४१ ॥

पृथुदर्विभृतस्ततः फणीन्द्रा
विषमाग्नीभिरनारतं वमन्तः।
अभवन् युगपद्विलोलजिह्वा
युगलोढोभयसृक्वभागमाविः ॥ ४२ ॥

कोटीनामुपमाना नामवशात्त्वेऽपि चन्द्राननी इति वत् [illegible] स्यात् ॥ ४० ॥

व्यवहार इति। व्यवहारे न्यायवादे अनृताभियोगं मिथ्याभियोगमिव प्रकाशे कौस्तुभतेजसि तिमिरं ग्रस्तान्धकारं निर्जितवति निरस्तवति सति [illegible] अनन्तरं रिपुश्चैद्यः उल्बणान् महतो भीमांश्च भोगान् फणान् कायांश्च भजन्तीति तद्भाजाम्। भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोरित्यमरः। भुजगानां जननीं भुजगादिकां विद्यां मन्त्रं जजाप जपति स्म [illegible]। [illegible] ॥ ४१ ॥

पृथुरिति। ततो भुजगास्त्रप्रयोगानन्तरं पृथुदर्विभृतः महा [illegible] [illegible]। अत एव दर्वीकरा दीर्घपृष्ठाश्च दर्वीकराः [illegible] [illegible] इत्यमरः। [illegible]। [illegible] [illegible]। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]। [illegible]। [illegible] [illegible]। [illegible]

पृथुवारिधिवीचिमण्डलान्त
र्विलसत्फेनवितानपाण्डुराणि ।
दधति स्म भुजङ्गमाङ्गमध्ये
नवनिर्मोकरुचिं ध्वजांशुकानि ॥ ४७ ॥

कृतमण्डलबन्धमुल्लसद्भिः
शिरसि प्रत्युरसं विलम्बमानैः ।
व्यरुचज्जनता भुजङ्गभोगै
र्दलितेन्दीवरमालधारिणीव ॥ ४८ ॥

व्याहतदेहाः सन्तः धात्रीं शय्यामधेव, यादवसङ्घेन, ब्रह्मनाय यम भागैस्तुल्यं यमपाशवत् कालपाशवदित्युपमा । न्यपतन् निपेतुः बभञ्जु-रित्यर्थः ॥ ४६ ॥

पृथ्विति । भुजङ्गमाङ्गमध्ये पृथोर्वारिधिवीचिमण्डलस्यान्तर्मध्ये वि-लसन्तः फेना इव वितानपाण्डुराणि शुभ्रवर्णानीत्युपमा । ध्वजा-शुकानि नवनिर्मोकरुचिं नवकञ्चुकशोभां दधति स्म । समौ कञ्चुकनि-र्मोकावित्यमरः । निर्मोकरुचिमित्यत्राप्यधर्मा साम्यान्न सम्बन्धेन निर्मो-कत्वेनेति भावः सादृश्याक्षेपादसम्भवद्वस्तुसम्बन्धनिदर्शना फेनपाण्डुरोपमया-ऽनेन कल्प्यते ॥४७॥

कृतेति । जनता जनसमूहः । ग्रामजनेत्यादिना तल्प्रत्ययः । शिरसि कृतो मण्डलबन्धो वलयीभावो यस्मिन् कर्मणि तत् यथा तथा भुजङ्गैः प्रत्युरसं उरसि उरसि । प्रतेरुरसः सप्तमीस्थादिति समा-सान्तोऽच्प्रत्ययः । विलम्बमानैर्विशेषेण लम्बमानैः भुजङ्गभोगैरहि-कायैः दलितेन्दीवरमालधारिणी विकसितनीलोत्पलमालाधारिणीव व्यरु-चत् । रुचेर्लुङि । द्युद्भ्यो लुङीति विकल्पात्परस्मैपदम् ॥४८॥

परिवेष्टितमूर्तयश्च मूला-
दुरगैराशिरसः सरलपुष्पैः ।
दधुरायतवल्लिवेष्टिताना-
मुपमानम्मनुजा महीरुहाणाम् ॥ ४९ ॥

बहुलाञ्जनपङ्कपट्टनील-
द्युतयो देहमितस्ततः श्रयन्तः ।
दधिरे फणिनस्तुरङ्गमेषु
स्फुटपल्याणनिबद्धवध्रलीलाम् ॥ ५० ॥

प्रसृतं रभसादथोऽभिनीला
प्रतिपादम्परितोऽभिवेष्टयन्ती ।

परिवेष्टितेति । क्रियेति चार्थः मूलात्प्रभृत्यारभ्येत्यर्थः । ल्यब्लोपे पञ्चमी । आशिरसः शिरोऽन्तम् । अभिविधावाङिति विकल्पादसमासः । सरलैरेव पुष्पैः सह वर्तन्ते इति सरलपुष्पाः । तेन सहेति तुल्ययोगे इति बहुव्रीहिः । उरगैः परिवेष्टितमूर्तयो वेष्टिताङ्गाः मनुजा आयताभिर्वल्लीभिर्लताभिर्वेष्टितानां महीरुहाणां उपमानं साम्यं दधुरित्युपमा ॥ ४९ ॥

बहुलेति । बहुलाञ्जनस्य सान्द्रकज्जलस्य पङ्कपट्टः पङ्कघनस्तद्वन्नीलद्युतयः श्यामभासः । देहं शरीरमितस्ततः पुच्छपार्श्वादि स्थानेषु श्रयन्तोऽभजन्तः फणिनस्तुरङ्गमेषु स्फुटानि उल्बणानि यानि पल्याणेषु पल्ययनेषु निबद्धानि बद्धानि वरत्राणि वध्रं तद्वध्रवरत्रयोरिति विश्वः । तेषां लीलां शोभां दधिरे दधुः । बद्धलीलामित्युपमालंकारः सुगमन्या दर्शनोपलक्षणा ॥ ५० ॥

प्रसृतमिति । रभसा वयोगात् अभिनीला पादेषु प्रतिपादम् । वि-

दलघूदीरितनादमुत्पतन्तः ।
क्षणमैक्षिषतोच्चकैश्चमूभि
र्ज्वलतः सप्तरुचेरिव स्फुलिङ्गाः ॥ ५३ ॥
उपमानमलाभि लोलपक्ष
क्षणविक्षिप्तमहाम्बुवाहमस्त्रैः ।
गगनार्णवमन्तरा सुमेरोः
कुलजानाङ्गरुडैरिलाधराणाम् ॥ ५४ ॥
पततामपरितः परिस्फुरद्भिः
परिपिङ्गीकृतदिङ्मुखैर्मयूखैः ।

दितनाद' उच्चरितघोषं यथा तथा 'खगेन्द्रात् गरुत्मतः उत्पतन्तः उद्भवन्तः खगा' सुपर्णाः ज्वलतः प्रज्वलतः सप्तरुचेः सप्तार्चिषोऽग्नेरुच्चकैरूर्ध्वं प्रसृताः स्फुलिङ्गा इव चमूभिः क्षणमैक्षिषत ईक्षिताः । ईक्षतेः कर्मणि लुङ् । अत्रोपमयोः सङ्करः ॥ ५३ ॥

उपमानमिति । गगनमर्णव इव गगनार्णवस्तमन्तरा तस्य मध्य इत्यर्थः । अन्तरान्तरेण युक्ते इति द्वितीया । अत्रार्णव स्यैकदेशेऽपि तदेकदेशापेक्षया भेदविवक्षेन मध्यप्रतियोगित्वसम्भवान्न द्वितीयानुपपत्तिः । लोलैः पक्षैः क्षणाद्विक्षिप्तमहाम्बुवाहामलस्त्रा इव येषां तैः गरुडैः रुक्मिभिः सुमेरोः कुलजानां हेमाद्रिवंश्यानां अन्येषामहिरण्मयतया गरुडसाम्यासम्भवादित्यर्थः इलाधराणां भूधराणां कर्णधान्तराणामित्यर्थः । गोत्रिला कुम्भिनी क्ष्मेति कोशः । उपमानं सादृश्यमलाभि अलम्भि । लभेः कर्मणि लुङि विभाषा चिण्णमुलोरिति विकल्पान्नुमभावः । इलाधराणामुपमानमिति षष्ठ्योपमाया अन्याभ्यां समासगताभ्यामङ्गाङ्गिभावेन सङ्करः ॥ ५४ ॥

पततामिति । परिस्फुरद्भिः समन्ततः प्रसरद्भिः अतएव

सुतरामभवद्दुरीक्ष्यबिम्ब
स्तपनस्तत्किरणैरिवात्मदर्शः ॥ ५५ ॥

दधुरम्बुधिमन्थनाद्रिमन्थ
भ्रमणायस्तफणीन्द्रपित्तजानाम्।
रुचमुच्चसमानवैनतेय
द्युतिभिन्ना फणभारिणो मणीनाम् ॥ ५६ ॥

अभितः क्षुभिताम्बुराशिधीर
ध्वनिराकृष्टसमूलपादपौघः।

…पिङ्गलितानि सौवर्णत्वात्पिङ्गलितानि दिङ्मुखानि यैस्तैः पतता
पक्षिणा मयूखैः तपनः सूर्यः तत्किरणैस्तपनकिरणैः सम्बद्धैरिति
भावः। आत्मा स्वरूपं दृश्यतेऽस्मिन्नित्यात्मदर्शो दर्पण इव सुतरां दुरी
क्ष्यबिम्बः अभवत्। स्वतेजसा दुर्दर्शः तदानीमतिदुर्दर्शोऽभूदित्यर्थः। अत्र
तपनस्य दुरीक्ष्यत्वासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ ५५ ॥

दधुरिति। उच्चसमानाभिर्दीप्यमानाभिर्वैनतेयस्य द्युतिभिर्भिन्नाः
शबलिताः फणभारिणः फणाभृतः अम्बुधिमन्थने समुद्रमन्थने अद्रे
र्मन्दराद्रेरेव मन्थस्य मन्थनदण्डस्य भ्रमणायासस्य भ्रमणेनायस्तस्य फणी
न्द्रस्य वासुकेः पित्तात् पित्तधातोर्जातास्तज्जातास्तेषाम्। … मन्थ
मन्थनमन्थनदण्डके … । मणीनां …
…। तेषां मणीनां मरकतानां रुचं दधुः वैनतेयद्युतिसम्भेदात्
… मरकतच्छायामापुरित्यर्थः। … योगेन …
… निदर्शनालङ्कारः ॥ ५६ ॥

अभीति। अभितः समन्तात् क्षुभितोऽम्बुराशिः … अम्बुराशि
… ध्वनिर्गम्भीरध्वनिरित्युपमा। आकृष्टः पातिताः समूलाः
पादपौघाः … च। अत्र पादपोन्मूलनासम्बन्धेऽपि सम्ब

जनयन्नभवद्युगान्तशङ्का-
मनिलोऽनागविपक्षपक्षजन्मा ॥ ५७ ॥
प्रचलत्पतगेन्द्रपक्षवात-
प्रसभोन्मूलितशैलदत्तमार्गैः।
भयविक्लवमाशु दन्दशूकै-
र्विवशैराविविशे स्वमेव धाम ॥ ५८ ॥
खचरैः क्षयमक्षयेऽहिसैन्ये
सुकृतैर्दुष्कृतवत्तदोपनीते ।

न्योक्तेरतिशयोक्तिः। युगान्तशङ्कां जनयन् कल्पयोत्प्रेक्षा जनयन्नि-त्यपि सैवातिशयोक्तिः। नागविपक्षपक्षजन्मा गरुडपक्षोद्भवोऽनिलोऽ-भवदुदभवदित्यर्थः ॥ ५७ ॥

प्रचलदिति। प्रचलतां पतगेन्द्राणां ये पक्षवातास्तैः प्रसभं उन्मू-लितैरात्मरक्षणार्थैः शैलैर्दत्तो मार्गो येभ्यस्तैः विवरैः पलायनमि-त्येतैरित्यर्थः। गर्हितं दशन्ति भृशमिति दन्दशूकैः सर्पैः। दन्दशूको-ऽविशेषय इत्यमरः। लुपसदचरेत्यादिना दंशे भावगर्हायां यङ्। जप-जभदहदशभञ्जपशां चेति अभ्यासस्य नुमागमः यजजपदंशदशां यङ इति दंशे-र्यङन्तादूकप्रत्ययः। भयेन विक्लवं विवशं विशिष्टं यथा तथा आशु स्वमेव धाम पातालमेव विवेश। तत्संपतत्पवनोन्मूलितशैलरन्ध्रपतत्वेन पातालं प्रविष्टमित्यर्थः। विशेः कर्मणि लिट्। दन्दशूकानां रन्ध्रप्रवेशा-सम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ ५८ ॥

खचरैरिति। खे चरन्तीति खचरैर्विनतेयैः। चरेष्टः गवड्डरवे इति बहुलमिति सुपिकल्पः। अक्षये अनन्ते अहिसैन्ये सर्पसङ्घे सुकृतैः हरिहरनामादिसुकृतैर्दुष्कृतमकृत्यादेरिवेत्। तत्र तस्ये-वेति तत्रार्थे वतिप्रत्ययः। क्षयमुपनीते नाशं प्रापिते सति तदा तत्काले

अयुगार्च्चिरिव ज्वलन्नुपाथो
रिपुरौदर्च्चिषमाजुहाव मन्त्रम् ॥ ५९ ॥

सहसा दधदुद्धताट्टहास
श्रियमुत्त्रासितजन्तुना स्वनेन ।
विततायतहेतिबाहुरुच्चै
रथ वेताल इवोत्पपात वह्निः ॥ ६० ॥

ज्वलितोद्धतधूमकेतनोऽसौ
रभसादम्बररोहिरोहिताश्वः ।
द्रुतमारुतसारथिः शिखावान्
कनकस्यन्दनसुन्दरश्चचाल ॥ ६१ ॥

असौ रिपुश्चैद्य । उदर्चिष इदमौदर्चिषमाग्नेयं मन्त्रं आजुहाव आहूतवान् जजापेत्यर्थः । ह्वयतेर्लिट्, अभ्यस्तस्य चेति द्विर्वचनात्प्रागेव सम्प्रसारणम् । इववद्भूतवदिति तद्धितगता श्रौती पूर्णोपमा ॥ ५९ ॥

सहसेति । अथाग्नेयास्त्राह्वानानन्तरं उत्त्रासितजन्तुना भीषितप्राणिकेन स्वनेन ध्वनिना उद्धताट्टहासश्रियं महाट्टहासं सम्पदं दधत् तेनैवाट्टहासवान् तत्तुल्यनादवानित्यर्थः । वितताः प्रसारिताः आयतादीर्घाः हेतयो ज्वालाबाहव इव हेतिबाहवो यस्य स वह्निर्वेतालोभूतविशेषः स इव सहसा झटिति उच्चैरूर्ध्वं, उत्पपात उत्तस्थौ । उपमा ॥ ६० ॥

ज्वलितेति । ज्वलितश्चासौ उद्धत उन्नतश्च धूम एव केतनं केतुर्यस्य सः रभसाद्वेगादम्बररोहिणो रोहिताश्वा रक्तवर्णा अश्वा इव यस्य स द्रुतमारुताः शीघ्रवाता एव सारथिर्यस्य सः कनकस्यन्दनसुन्दरः कनकरथवद्रम्य इत्युपमा । असौ शिखाज्वाला अस्य सन्तीति शिखावान् ।

ज्वलदम्बरकोटरान्तरालं
बहुलार्द्राम्बुदपत्त्रबद्धधूमम् ।
परिदीपितदीर्घकाष्ठमुच्चै-
स्तरुवद्विश्वमुषोष जातवेदाः ॥ ६१ ॥

गुरुतापविशुष्यदम्बुशुभ्राः
क्षणमात्रमकृशानुताम्रभासः ।
श्यमसारतया मषीभवन्तः
पुनराकारमवापुरम्बुवाहाः ॥ ६२ ॥

ज्वलितानललोलपक्षक्रान्ताः
स्फुरदच्छापदपत्त्रपीनभासः ।

ज्वलदिति। जातं वेदो धनं यस्माज्जातवेदास्तनूनपात्। अम्बरं कोटरमिव तस्यान्तरालमभ्यन्तरं ज्वलद्यस्य सः। बहुलाः सान्द्राः आर्द्राम्बुदाः पत्त्राणीव तेषु बद्धधूमम्। परिदीपिताः प्रज्वलिताः काष्ठा दिशः काष्ठानीव यस्य। तद्वदुच्चैरुच्चं विश्वं जगत्। तरुवत् तरुमिवेत्यर्थः तुल्यार्थे वति प्रत्ययः। उषोष ददाह। उष दाहे लिट् कथूपधगुणे• प्रथमं द्विर्भावः अभ्यासस्य यवत्वं हलादिःशेषः अनादिष्टादच• इति गुणस्य स्थानिवत्त्वाभावात् स्फोटोपमालिङ्गात् सर्वोपमितसमासः ॥ ६१ ॥

गुर्विति। गुरुतापेनाग्निदाहेन विशुष्यदम्बवः शोषमाणोदकाः अतएव शुभ्राश्चेति विशेषणसमासः। ततः क्षणमात्रमनेन कृशानुना ताम्रभासो लोहितवर्णाः अथाधारतया जलशोषाभिः सारतया मषी भवन्तः अम्बुवाहाः पुनः श्यामाकारमीलरूपमवापुः। अत्र मेघानां मषीभावादाद्यश्यामत्वेऽपि श्यामत्वोक्तेरतिशयोक्तिः ॥ ६२ ॥

ज्वलितेति। ज्वलितेन प्रज्वलता अनलेन अनलपातेन आक्रान्ताः

क्षणमात्रभवामभावकाले
सुतरामापुरिवायतिं पताकाः ॥ ६४ ॥
निखिलामिति कुर्वतश्चिराय
द्रुतचामीकरचारुतामिव द्याम् ।
प्रतिघातसमर्थमस्त्रमग्ने
रथ मेघङ्करमस्मरन्मुरारिः ॥ ६५ ॥
चतुरम्बुधिगर्भधीरकुक्षे
र्वपुषः सन्धिषु लीनसर्वसिन्धोः ।
उदगुः सलिलात्मनस्त्रिधाम्नो
जलवाहावलयः शिरोरुहेभ्यः ॥ ६६ ॥

कनकरचनाभिः पीतभासः पिङ्गलवर्णाः पताकावैजयन्त्यः अभावकाले विनाशकाले क्षणमात्रभवां क्षणमात्रभाविनीं क्षणमात्र स्थायिनीमित्यर्थः आयतिं दैर्घ्यं सुतरामापुरित्यर्थः प्रदीपवदिति भावः। अष्टसु लोहेषु पदं असेदत्राापदम् । अष्टनः संज्ञायामिति दीर्घः। रुक्मं कार्त्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियामित्यमरः ॥ ६४ ॥

निखिलामिति। अथानन्तरं मुरारिः इतीत्थं निखिलां द्यामाकाशं द्रुतचामीकरचारुतां गतप्रहेमकर्दुरामिवेत्युत्प्रेक्षा। चारुतामित्यत्र। चिराय कुर्वतोऽग्नेः प्रतिघातसमर्थं मर्दनक्षमं मेघान् करोतीति मेघङ्करं मेघजननम्। मेघर्त्तिभयेषु कृञः खश्प्रत्ययः अरुर्द्विषदजन्तस्य मुमिति मुमागमः। अस्त्रं वारुणास्त्रं अस्मरत् अध्याहरत् ॥ ६५ ॥

चतुरिति। चत्वारोऽम्बुधयएव गर्भास्तेन धीरो गभीरः कुक्षिर्यस्य तस्य वपुषः सन्धिषु लीनाः सर्वाः सिन्धवो नद्यो यस्य तस्य सलिलात्मनस्तोयात्मकस्य। त्रीणि धामानि स्थानानि भूरादीनि सत्वादीनि वा यस्य तस्य त्रिधाम्नो हरेः शिरोरुहेभ्यो जलवाहा वलयः मेघपरम्परा उदगुः उद्भूताः। इणोगा लुङीति गादेशे गातिस्थेत्यादिना सिचोलुक् [—]नम

कुभः कृतनादमास्तृणन्त-
स्तिरयन्तः पटलानि भानुभासाम् ।
उदनंसिषुरब्भ्रमभ्रसङ्घाः
सपदि श्यामलिमानमानयन्तः ॥ ६७ ॥
तपनीयनिकर्षराजिगौर-
स्फुरदुत्तालतडिच्छटाट्टहासम् ।
अनुबद्धसमुद्धताम्बुवाह-
ध्वनिताडम्बरमम्बरम्बभूव ॥ ६८ ॥
सवितुः परिभावुकैर्मरीची-

केशेषु जीमूतानद्यः सर्वाङ्ग सन्धिषु । कुक्षौ समुद्राश्चत्वारस्तस्मै तोया-
त्मने नमः त्वात्मनोऽङ्गं प्रमाणमिति भावः ॥ ६६ ॥

ककुभ इति । कृतनादं कृतगर्जारवं यथा तथा ककुभः काष्ठा आस्तृणन्तः
आच्छादयन्तः । स्तृणातेर्लटः शत्रादेशः स्वाभ्यस्तयो रित्याकारलोपः ।
भानुभासामर्कांशूनां पटलानि तिरयन्तस्तिरस्कुर्वन्तः । तिरः शब्दा-
त्तत्करोतीति ण्यन्तात् लटः शत्रादेशः णाविष्ठवद्भावाट्टिलोपः । अदभ्र-
माकाशं श्यामलिमानमानयन्तः श्यामलत्वं प्रापयन्तः । शुभ्रसङ्घाः
मेघौघाः सपदि सद्य उदनंसिषुरुत्पेतुः । उत्पूर्वान्नमतेर्लुङि यमर-
मनमातां सक्चेति सगिडागमौ नेटीति वृद्धिप्रतिषेधः स्वभावोक्तिः ॥ ६७ ॥

तपनीयेति । तपनीयस्य हेम्नो निकर्षराजयः कषणरेखा इव गौर्यः
पीताः । गौरोऽरुणे सिते पीते इत्यमरः स्फुरन्त्य उत्ताला उद्भतास्तडि-
च्छटा विद्युन्मालास्ता एवाट्टहासा यस्य तत्तथोक्तं अनुबद्धोऽनुस्यूतः समुद्धता-
म्बुवाहानां ध्वनिताडम्बरो गर्जिताडम्बरो यस्य तदम्बरं नभ एव तदा-
म्बुवाहैर्द्रुतमभीभिर्गर्जिताडम्बरैरट्टहासं कुर्वाणोऽस्याम्बरस्य गा-
म्भीर्यं । व्यञ्जकाप्रयोगादुत्प्रेक्षा ॥ ६८ ॥

सवितुरिति । सवितुर्मरीचीनुपयूखान् परिभावुकैस्तिरस्कुर्वद्भिः ।
लषपतेत्यादिना उकञ्प्रत्यये न लोकेत्यादिना षष्ठी प्रतिषेधः । कविरा-

त्रुटितमुर्विपतेरिवैकपत्रम् ॥ ७३ ॥

व्यगमन् सहसा दिशामुखेभ्यः

शमयित्वा शिखिनश्च नाथनौघाः ।

उपकृत्य निसर्गतः परेषा

मुपरोधन्न हि कुर्वते महान्तः ॥ ७४ ॥

कृतदाहमुदर्चिषः शिखाभिः

परिषिक्तमपुरम्भसा नवेन ।

विगताम्बुधरावरणमपेदे

गगनन्तापितपायितासिलच्छीम् ॥ ७५ ॥

इति नगपतिरस्त्रं यद्यदाविश्चकार

त्रुटितं छिन्नं पतिपते पक्षिराजस्य गरुत्मत एकं पत्रं पक्षमिव कश्चिदालक्ष्यत व्यदृश्यत इत्युपमा । पुरा मातृदास्य विमोकायामृत माहरता गरुडेनेन्द्रप्रयुक्तवज्रगौरवार्थैकं पत्रं मुक्तमित्यागमः ॥७३॥

व्यगमन्निति । घना घनौघाः सद्यः कालदसमूहाः । गगनात्कमन्ते अव मेकाद्रावनाथना इत्यर्थः । शिखिनमग्निं शमयित्वा सहसा दिशा मुखेभ्योऽव्यगमन्नपगताः । तथा हि पुनरपि दिशां मुखेभ्यः । तथा हि महान्तो निसर्गतः स्वभावादेव परेषां उपकृत्य उपकारं कृत्वा उप रोधं न हि कुर्वते । महान्तो निष्कारणमेव परोपरोधार्थे न भवन्ति । कारान्तेन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ७४ ॥

कृतेति । उदर्चिषोऽग्नेः शिखाभिः ज्वालाभिः कृतदाहं विहित तापं नवेनाम्भसा मुहुः परिषिक्तं विगता अम्बुधरा एव आवरणं यस्य तद्गगनं कृतापितकायं मापित स वायौ पायितं पानं कारितं । पितृतैरपि मातृ गन्धेथि स । पादोभायाम्भावेपां मुर्गात मुगागमः । तस्य तापितपायितस्य तत्फलोल्लासैः पतनस्य लक्ष्मीं अपेदे प्राप । इति विरोधालङ्कारः अम्बुधरमेति रूपकश्लोकः ॥७५॥

प्रकुपितइव रोगः क्षिप्रकारी विकारम् ।
भिषगिव गुरुदोषच्छेदिनोपक्रमेण
क्रमविदथ मुरारिः प्रत्यहंस्तत्तदाशु ॥ ७६ ॥

शुद्धिश्च्युतैरपि परानृजुभिर्विदित्वा
बाणैरजय्यमविघट्टितमर्म्म भित्तम् ।
मर्म्मातिगैरनृजुभिर्नितरामशुद्धै
र्वाक्सायकैरथ तुतोद तदा विपक्षः ॥ ७७ ॥

प्रकुपितेति। क्षिप्रं करोतीति क्षिप्रकारी शीघ्रप्रयोक्ता अन्यत्र विकारकारी नरपतिश्चैद्यः प्रकुपितः प्रक्षुभितः सन् यद् यदस्त्रं व्याशिचकार रोगो विकारमिव अथ क्रमवित्परिपाटीवेदी मुरारिर्भिषग्वैद्य इव गुरुदोषच्छेदिना गुरुदोषप्रतिघातकेन दोषनिवर्त्तकेन चोपक्रमेणोपायेन प्रत्यस्त्रप्रयोगेणेत्यर्थः अन्यत्र महौषधप्रयोगेण तत्तदस्त्रं आशु शीघ्रं तद्विकारमिवेति भावः प्रत्यहन् प्रतिजघान। हन्तेर्लङ् अदादित्वाच्छपो लुक् इतश्चेति लोपे। उपमा ॥ ७६ ॥

शुद्धिमिति। युद्धे तस्मिन् समये विपक्षोऽरिश्चैद्यः परासत्परं शुद्धं दोषशुद्धिं गतैरनृजुभिरप्यविघट्टितमर्म्मभिरस्पृष्टमर्म्मस्थानैः शरैर्हरिमजय्यं जेतुमशक्यम्। अयमजय्यो यथार्थं विदात। विदित्वानन्तरमपरे मर्म्माणि अतिगच्छन्तीति मर्म्मातिगैर्मर्म्मभेदिभिरनृजुभिर्वक्रैः नितरामशुद्धैरपवित्रैः वाच एव सायकास्तैः वाक्सायकैरिति रूपकं तुतोद व्यथयामास। अक्रमयोगत्वाय सुपोढान इति भावः। अत्र वाक्सायकानां मशुद्धसाधर्म्यव्यतिरेकोक्तेर्व्यतिरेकरूपकयोः सङ्करः। वसन्ततिलका वृत्तम् ॥ ७७ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघ

राहुस्त्रीस्तनयोरकारि सहसा येनाश्लथालिङ्गन
व्यापारैकविनोददुर्ललितयोः कार्कश्यलक्ष्मीर्वृथा ।
तेनाक्रोशत एव तस्य मुरजित्तत्काललोलानल
ज्वालापल्लवितेन मूर्द्धविकलं चक्रेण चक्रे वपुः ॥ ७८ ॥
श्रिया जुष्टन्दिव्यैः सपटहरवैरन्वितम्पुष्पवर्षै
र्वपुष्टश्चैद्यस्य क्षणमृषिगणैः स्तूयमानन्निरीय ।
प्रकाशेनाकाशे दिनकरकरान्विक्षिपद्विस्मिताक्षै
र्नरेन्द्रैरौपेन्द्रं वपुरथ विशद्धाम वीक्षाम्बभूवे ॥ ७९ ॥

॥ अथ कविवंशवर्णनम् ॥

सर्व्वाधिकारी सुकृताधिकारः श्रीधर्म्मनाभस्य बभूव राज्ञः ।
असक्तदृष्टिर्विरजाः सदैव देवोऽपरः सुप्रभदेवनामा ॥ ८० ॥
काले मितं वाक्यमुदर्कपथ्यन्तथागतस्येव जनः सचेताः ।
विनानुरोधात्स्वहितेच्छयेव महीपतिर्यस्य वचश्चकार ॥ ८१ ॥
तस्याभवद्दत्तकइत्युदात्तः क्षमी मृदुर्धर्म्मपरस्तनूजः ।
यं वीक्ष्य वैयासमजातशत्रोर्वचोगुणग्राहि जनैः प्रतीये ॥ ८२ ॥
सर्वेण सर्वाश्रयइत्यनन्दमानन्दभाजा जनितञ्जनेन ।
यश्च द्वितीयं स्वयमद्वितीयो मुख्यः सताङ्गौणमवाप नाम ॥ ८३ ॥

श्रीशब्दरम्यकृतसर्गसमाप्तिलक्ष्म
लक्ष्मीपतेश्चरितकीर्त्तनचारु माघः ।
तस्यात्मजः सुकविकीर्त्तिदुराशयादः
काव्यं व्यधत्त शिशुपालवधाभिधानम् ।

इति श्रीशिशुपालवधे महाकाव्ये
श्रीदत्तकसूनुकविश्रीमाघविरचिते
शिशुपालवधोनाम विंशतितमः सर्गः समाप्तः ॥